Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

zed by Arya Samaj Foundation Chennai and eGa

BHARTI
Sanskrit

Vol. 14
1964

G. K. V.
HARDWAR

n Public Domain. Gurukul Kangri Collection, Ha

Digitized by Arya Samaj Foundation Chennai and eGangotri

1135

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

भारती

संस्कृतमासिकस्य

श्चमराष्ट्रेष्वपि यो भारतमहिमानमाघोषत् ।
ानिविवेकानन्दो गुणैरमन्दोदयो जयति ॥१॥

१४

३

वार्षिक मूल्यम् चतस्रो मुद्रा -४/-

एकप्रतेः चत्वारिंशत् नयपैसाः ४० नयेपै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रमसंख्या	लेखाः	लेखकाः	पृष्ठसंख्या
१.	श्रद्धाञ्जलिः	श्री'पद्म' शास्त्री, पुष्करम्	८३
२.	श्री गोवर्धनराममाधवरामस्त्रिपाठी, बी. ए., एल-एल. बी.	श्रीगणेशरामशर्मा, झालावाडः	८४
३.	शिवजन्म	श्रीश्रीधरभास्करवर्णेकरः, नागपुरवासी	८७
४.	रहस्योद्घाटनम्	श्रीचन्द्रशेखररामचन्द्र ताम्बे, नागपुरम्	९२
५.	राज्यपालस्य डा० सम्पूर्णानन्दमहाभागस्य भाषणस्यः सारः	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	९६
६.	नूतनवर्षम्	श्रीरामकिशोरमिश्रः, रामसिंहपुरा सीरों	९७
७.	"न मानुषाच्छ्रेष्ठतरं हि किंचित्"	श्रीशिवसागरत्रिपाठी, एम. ए. जयपुरम्	९९
८.	हरिश्चन्द्रनाटकम्	श्रीदामोदरात्मजगोविन्दप्रसाद शर्मा	१०४
९.	देश-विदेश-वार्ता		१०७
१०.	श्रीशिवाजी	श्रीकन्हैयालालजी भेड़ा बम्बई	१०९
११.	आयुर्वेदस्तम्भः	श्रीसुदेवचन्द्रपाराशरी, जयपुरम्	११२
१२.	सम्पादकीयम्	सम्पादकः	११५
१३.	लघुकथा	श्रीकमलानाथ शर्मा	११८
१४.	सूक्तिसुधा	सम्पादकः	१२०

शुभसूचना

भारत्या समग्रे भारते सहस्रशो ग्राहका अनुग्राहकाश्च अद्यतनीये अस्वास्थ्यकरवातावरणे स्वस्थाः रोगमुक्ताश्च भूत्वा यथाजीवितस्य चरमोद्देश्यमैहिकमामुष्मिकञ्च श्रेयः सम्पादयितुं प्रभवेयुः इति लक्ष्यीकृत्य 'भारती' परिवारेण संस्कृत-प्रचार-परिषदोऽध्यक्षमहोदयानां आयुर्वेदमहाविद्यालयात् प्राप्तावकाशानां श्रीस्वामिजयरामदासमहाभागानां नागरिकाभिनन्दनसमारोहावसरे यत् माननीयराज्यपाल-डा०श्रीसम्पूर्णानन्दमहाभागानां साभापत्ये सम्पत्स्यमाने "**आयुर्वेदाङ्क**" इत्यभिधानं द्वितीयं विशेषाङ्कं अभिनन्दनग्रन्थरूपेण फाल्गुनमासे प्रकाशयितुं निश्चयः कृतः।

आयुर्वेदाङ्कस्य प्रतिः सुरक्षिता भवेत् एतदर्थं निम्नाङ्कितसंकेते शीघ्रमेव पत्रं प्रेषणीयं तत्रभवद्भिर्विद्वद्भिः।

एकस्याङ्कस्य शुल्कं रूप्यकपञ्चकम् ५) रु० मात्रम्

यदि कश्चित् "भारती पत्रिकाया" ग्राहकत्वमपि अङ्गीकरिष्यति तर्हि रूप्यकत्रयमात्रप्रदानेनैव आयुर्वेदाङ्कं प्राप्स्यति। सप्तरूप्यकाणि संप्रेष्य च वर्षपर्यन्तं 'भारती' मासिकं आयुर्वेदविशेषाकं च लप्स्यते।

प्रबन्धसम्पादकः

भारती-भवन, गोपालजी का रास्ता

जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113547
Digitized by Arya Samaj Foundation Chennai and eGangotri
COMPILED

राजस्थान-पञ्जाब-उत्तरप्रदेश-बिहार-मध्यप्रदेश-आंध्र-मद्रास-मैसूर-महाराष्ट्रसर्वसर्कारैः स्वीकृता-

सम्पादकः कविशिरोमणिः भट्टश्रीमथुरानाथशास्त्री जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः गिरिराजशर्मा शास्त्री भारती-भवन, गोपालजी का रास्ता, जयपुर (राज०)

वर्षम् १४ | (जनवरीमासः, सन् १९६४) | अङ्कः ३

गुरुकुल कांगड़ी
113547

श्रद्धाञ्जलिः

"हा हन्त ! कैनेडि हतो डलासे"

(ले०—श्री "पद्म" शास्त्री पुष्करम्)

हा हन्त ! सूर्योऽस्तमगाद्ध विस्थः
मृषा हि सत्यस्य मुखं बबन्ध ।
कृपा कृपाणेन विकर्तिताऽस्ति
दया दिवायां दलिता डलासे ॥१॥

बाल्ये विनीतः पठने प्रवीणः
यो यूत्यभूद्व रणनीतिदक्षः ।
हृष्टः प्रहृष्टो न कदापि रुष्टः
संमानभाजां हि सदा वरिष्ठः ॥२॥

स्वसेवया संसदि सर्वमान्यः
सदस्यतामाप यदा स सूर्यः ।
पच्छच्छिद्वे तद्धि विपक्षिणोऽपि
भूत्वा सपक्षा नु शरण्यमीयुः ॥३॥

निर्वाचितो राष्ट्रपतिः स्वदेशे
जनैर्जितेन्द्रैर्जनतंत्ररीत्या ।
ववर्षु पुष्पाणि—अमेरिकायां
प्रहर्षिताः सर्वस्वतंत्रदेशाः ॥४॥

निर्वाचिते कैनेडिसार्वभौमे
फासिस्टतत्वा न परं प्रहृष्टाः ।
अकार्षु वै तस्य विनाशनाय
चान्ते हि तेषां सफलः प्रयत्नः ॥५॥

किमोसवाल्डेन कृतं सुकृत्यं ?
काऽभूद्दशा तस्य विदन्ति लोकाः ।
कैनेडिशोकेन भृशं प्रतप्ता—
स्चीनं विना के रुरुदुर्न देशाः ॥६॥

नूनं हि कैनेडि हतो डलासे
स राष्ट्रभक्तस्त्वमरत्वमाप ।
मृतं शरीरं निभृतं समाधा—
वखण्डदीपो यशद्योतकश्च ॥७॥

हतोऽस्ति कैनेडि—अनेन सार्धं
विश्वे हि के ये विलपुर्न मान्याः ।
संवेदनाभिः श्री कैनेडीयै
तद्वेदनामल्पमकार्षु लोका ॥८॥

अमेरिकागर्भगताश्चप्राणा—
स्त्वत्कार्यसंपूर्तिकृतप्रतिज्ञाः ।
न विस्मरिष्यन्ति तव प्रणाशं
मृतो न कः प्राणधरः पृथिव्याम् ॥९॥

स्वराष्ट्रसेवाव्रततत्पराय
नमोऽस्तु कैनेडिमहोदयाय ।
श्री शान्तिदूताय जगद्धिताय
नीग्रोसमुद्धारक ! भो ! नमस्ते ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

श्री गोवर्धनराममाधवरामस्त्रिपाठी, बी. ए., एल-एल. बी.

मूललेखकः—श्रीशिवप्रसाददलपतरामपण्डितः

अनुवादकः—विद्याभूषणः पं० श्रीगणेशरामशर्मा, झालावाडः (राज०)

गुर्जरलोकेष्वयं गोवर्धनराममहाभागः 'सरस्वतीचन्द्रः' इत्याख्यस्योपन्यासग्रन्थस्य लेखकत्वेन सुतरां प्रसिद्धोऽस्ति। गुर्जरभाषायाः साहित्ये ग्रन्थोऽसौ 'सरस्वतीचन्द्रो'ऽद्वितीयोऽपूर्वश्च विश्रूयते। अस्य ग्रन्थस्य समकक्षो ग्रन्थो गुर्जरभाषायाः साहित्ये न कोऽप्यन्योऽद्यावधि व्यलिख्यत। अस्य ग्रन्थरत्नस्य प्रथमो भागः सन् १८८७ ईषवीये वर्षे प्राकाश्यमाप्य सञ्चारमापेदे। बर्कलेमहाशयस्य 'सभ्यताया इतिहासस्य' (History of Civilisation) प्राकट्ये संजाते इंग्लैण्डदेशस्य शिक्षितसमाजे यथा चर्चा बभूव, तथैव 'सरस्वतीचन्द्रस्य' प्रकाशने जाते गुर्जरसाहित्यसेविषु तस्य चर्चा समभूत्। स एष ग्रन्थश्चतुर्षु बृहद्भागेषु विभक्तो विद्यते। अस्य प्रथमो भागः सन् १८८७ ईषवीये वर्षे, द्वितीयः सन् १८९२ वर्षे, तृतीयः १८९८ वर्षे तथा चतुर्थः सन् १९०२ ईषवीयवर्षे प्राकाश्यं जगाम। अर्थादस्य समग्रस्य ग्रन्थस्य प्रकाशने पञ्चदशवर्षाणां समयो व्यतीयाय। 'सरस्वतीचन्द्रो' गुर्जरसाहित्येऽविरलं प्रकाशं निचिक्षेप। ग्रन्थोऽयमुपन्यासकथास्वरूपो विद्यते, तच्छैल्यैव प्रणीतोऽस्ति परन्त्वसौ ज्ञानानुभवयोर्महार्णवो वक्तुमुचितः। कल्पनाया, रसपरिपाकस्य, कलाविधानस्य, भाषागौरवादीनामुन्नतं स्वरूपमस्मिन् ग्रन्थे समुपलभ्यते। धर्म-समाजराजनीतिप्रभृतीनामनेकेषां विषयाणां चर्चात्र ग्रन्थे महत्या योग्यतया विहितास्ते। सत्यप्येवमस्य ग्रन्थस्येद वैशिष्ट्यं वर्तते यदत्र पुस्तके स्वारस्यनिर्वाहे न क्वापि बाधा मनागुपस्थिता। आराज्ञो रङ्कपर्यन्तमापण्डितान्मूर्खमाबालवृद्धं स्त्रियः पुरुषाः सर्वेऽपि च तमेतं सरस्वतीचन्द्रं प्रपठ्यासाधारणं लाभं गृह्णन्तो मोमुद्यन्ते। स एष ग्रन्थो गुर्जराञ्जनान् विचारशीलान् रसज्ञान् कलाप्रियांश्च विदधे। सोऽयं ग्रन्थो बहूनां जनानां जीवने प्रोत्साहमाशां च प्रपूरयामास। बहूनां जीवनक्षेत्रे खलूच्चाशयस्य बीजमुप्तवान्। बहूनामभिलाषा अतीवोद्दामाः प्रोत्कटाः सुस्फीताश्च विदधे। बहुभ्यो विपथगामिभ्यः प्रोन्नतं पन्थानं प्रादर्शयत्। बहूनां किल शुष्कं जीवनं रसाप्लुतं चक्रे। किं बहुनोक्तेन, स एष ग्रन्थो (सरस्वतीचन्द्रः) गुर्जरप्रान्ते नवीनयुगस्य महाभारतमिवास्ते। यावद्गुर्जरभाषाया अस्तित्वं भवेत् तावत् सरस्वतीचन्द्रोनामोपन्यसग्रन्थोऽपि सजीवो विद्यमानः स्यात्। नात्र कोऽपि सन्देहः। ग्रन्थोऽयमस्य लेखकमजरामरं चकार।

ग्रन्थरत्नस्यास्य प्रथमद्वितीयभागयोरधिकांशस्य महाराष्ट्रीभाषायां भाषान्तरमपि जातमास्ते। अस्माकं (सरस्वत्याः) ये पाठका गुर्जरीं भाषां परिचिन्वन्ति तैरेतत्पुस्तकमवश्यं पठितव्यमिति वयं तस्यानुशंसां कुर्मः। हिन्दीलेखकेषु च ये किलोपन्यासलेखने रुचिं दधते, तेभ्यो वयं सविनयं प्रार्थयामहे यत्ते कंचित्कालं यावदिन्द्रजालकथानां गुप्तचररहस्यकथानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च लेखनं परित्यज्य पुस्तकस्यास्य—सरस्वतीचन्द्रस्य—भाषान्तरं हिन्दीभाषायामवश्य कुर्युः।

श्रीगोवर्धनराममहाभागो न केवलमुपन्यासकथाकार एवासीदपि तु स खल्वेक उत्तमः कविररपि चाभूत्। आबाल्यादेव स कवितासु रुचिमधत्त। यदा स गुर्जरवाचनमालाया द्वितीयं पुस्तकं पठन्नासीत्तदैव तत्पुस्तकस्यैकं चरणमन्वेकं लघु पद्यं विरच्य स्वजनन्याः समीपं प्राहिणोत्। प्राप्ते हि वयसि गोवर्धनरामस्य कवित्वशक्तेर्बीजमङ्कुरितं सद्विकासशीलं बभूव। तस्येदं फलं बभूव यत् सन् १८८९ ईषवीये वर्षे 'स्नेहमुद्रा' इति नामकमेकमुत्तमं काव्यग्रन्थमसौ प्राकाशयत्। अस्मिन् काव्ये तादृशा एवोत्तमा भावा वर्तन्ते यथांग्लभाषायाः संस्कृतभाषायाश्च सुप्रसिद्धानां कविपरिवृढानां काव्येषूपलभ्यन्ते।

अथ सन् १९०२ ईषवीये वर्षे गोवर्धनराममहाभागः स्वस्य ज्येष्ठपुत्र्या जीवनचरितं 'लीलावत्या जीवनकला' इति नाम्ना प्राकाश्यं निन्ये। गोवर्धनरामस्यैषा दुहिता कर्तव्यपरायणा मेधाविनी विशुद्धचरित्रा च बभूव। अस्याश्चरितमिदमतीवश्रेष्ठया शैल्या समलिख्यत तथा स्त्रीपुसां प्रत्येकमध्ययनार्हमास्ते।

अस्य गोवर्धनराममहाभागस्यान्यान्येषां लघुलघूनां ग्रन्थानां लेखानां चोल्लेखं वयमधस्ताद्विदध्महे—

१—Classical Poets of Gujarat and their influence on Society and morals. अर्थात्–गुर्जरप्रदेशस्य प्रसिद्धाः कवयस्तथा तेषां समाजे, नैतिकाचरणे च प्रभावः—स एष निबन्धस्तेन मोहमय्या विलसन-कालेजेति महाविद्यालये स्वर्गीयस्य माननीयस्य जवेरीलाल-उमियाशङ्करयाज्ञिकमहोदयस्य साभापत्ये पठितोऽभूत्। स एष निबन्ध आंग्लभाषायां लिखितोऽस्ति, पुस्तकाकारश्च प्रकाशितोऽस्ति। गुर्जरप्रदेशस्य प्राचीनानां कवीनां विषये जिज्ञासव आंग्लभाषाशिक्षिता जनास्तदिदं पुस्तकमवश्यमेवावलोकन्ताम्। गोवर्धनरामस्यान्यान्ये सर्वे ग्रन्था इवायमपि च ग्रन्थो मोहमय्या एन. एम. त्रिपाठीमण्डली (कालबादेवी रोड) इति स्थानादुपलभ्यते।

२—"एशिया-यूरोपप्रभृतिषु भूभागेषु महाप्रजानां जनस्वभावस्य लाक्षणिका दृष्टान्ताः।"

३—"साक्षरस्य श्रीनवलरामलक्ष्मीराममहाशयस्य जीवनकथा" तदेतदेकस्यातीव सम्भ्रान्तस्य गुर्जरसमालोचकस्य जीवनवृत्तान्तरूपं पुस्तकं विद्यते। तदिदं सुपाठ्यं वर्तते।

४—Conflict of Laws between Converts and Non-Converts in India." स एष न्यायविधानसम्बन्धी ग्रन्थ आंग्लभाषायां प्रणीतोऽस्ति।

अतोऽतिरिक्तं 'ईस्ट एण्ड वेस्ट", "इण्डियनरिव्यू" तथा "हिन्दुस्तान-रिव्यू" इत्यादिष्वांग्लभाषाया मासिकेषु पत्रेषु गोवर्धनराममहाभागस्यानेके लेखाः प्राकाश्यं जग्मुः। 'सती चुनी' नामकमेकं गुर्जर्याः साध्व्या महिलायाश्चरितमसौ "East & West" मासिकपत्रे लिलेख। एतस्य भाषान्तरं तैलङ्गभाषायामपि च बभूव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहमयी–विश्व–विद्यालयस्य स्नातकोत्तर-परीक्षायामसौ गोवर्धनराममहाभागो गुर्जर-भाषायाः परीक्षको नियुक्तो भवति स्म । अनेकानि वर्षाणि यावदयं विश्वविद्यालयस्य सदस्यत्वेन तस्थौ ।

यद्यप्यसौ गोवर्धनरामः कियद्भ्यो वर्षेभ्यो निवृत्तिमार्गस्य पथिको बभूव तथापि देशसेवार्थं, साहित्यसेवार्थं च तेन स्वजीवनं प्रवृत्तिमयं कर्तव्यमेव भवति स्म ।

श्रीगोवर्धनराममहाभागस्य स्वभावो बाल्यावस्थाया एव शुद्धः पवित्रोऽनुकरणीयश्चाभूत् । छात्र-जीवनेऽयं न कदापि गुप्तरीत्या कस्यापि विद्यार्थिनः प्रश्नपत्राणां प्रतिलिपिं चक्रे, न च कस्मा अपि प्रतिलिपिं कृत्वा गोपनीयतोद्भेदनायावसरं प्रददौ । अस्य स्वभावेऽतीव दृढनिश्चयो बभूव । स एष गणित-विषयेऽतीव दुर्बलो बभूव । स खलु गणितविषय एतावद्धि मन्दोऽभूत् यदेकवारं सः शतद्वयाङ्केभ्यः केवलमष्टाङ्कांल्लेभे । तत आरभ्यासौ न्यूनतामिमां दूरीकर्तुं विनिश्चिकाय तथा चावकाशदिनेषु गणि-ताभ्यासमेतावता परिश्रमेणाकार्षीद्यत्ततो न पुनः कदापि लज्जाभिभवस्यावसरः समाययौ ।

वानप्रस्थावस्थायामसौ स्वरयाधिकाधिकं समयं योगाभ्याससाधने तथोपनिषदामध्ययने च व्यतीयाय । अनेकाधिव्याधिभिर्ग्रस्तोऽप्ययं स्वसङ्कल्पान्न कदापि विचचाल । असौ तत्कालीनयुगस्य ब्रह्मर्षि-रासीत् । तस्य साक्षाद्दर्शन एव हि द्रष्टॄणां मनसि पूज्यताभावोऽभ्युदेति स्म । स एकदा किलोच्च-न्यायालये वादविवादं कुर्वन्नासीत् । तत्समयेऽस्य कर्मकौशलं योग्यतां च वीक्ष्यास्य प्रतिपक्षस्थो वाक्कीलः श्रीचौबलेमहाशय इत्थमुवाच—

" I love you, I respect you, I revere you, I admire you. 'अहं त्वां प्रीणयामि, अहं त्वां सम्मन्ये, अहं त्वामाद्रिये तथाहं त्वां श्लाघे ।' एवंविधानुद्गारानन्येऽपि च बहवः सज्जनास्तद्विषये प्रोचुः ।

स एष पूज्यपुरुषः ४, जनवरी सन् १९०७ दिनाङ्के मध्याह्ने द्विदादनसमये स्वसुहृदः सुप्रसिद्धस्य वैज्ञानिकस्याध्यापकस्य श्रीयुक्तत्रिभुवनदास-गज्जरमहाशयस्य गृहे नश्वरमिदं शरीरं तत्याज ।❀

❀ मई १९६३ वर्षस्य 'सरस्वती' मासिकपत्रिकायाः साभारम् ।

—अनुवादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवराज्योदये महाकाव्ये चतुर्थः सर्गः

शिवजन्म

(ले०—कविः श्री श्रीधरभास्करवर्णेकरः, नागपुरवासी)

अथ सुतां पतिभक्तिसमुत्सुकां
स समवेत्य विदर्भनराधिपः ।
प्रियसुहृत्सचिवोत्तमसन्निभां
स्वगृहिणीं निजगाद मनोगतम् ॥१॥

प्रियसुताविरहं परिभाव्य सा,
सपदि वाष्पपरिप्लुतलोचना ।
प्रतिजगाद जिजाजननी पतिं
किमपि कुण्ठितकण्ठमविस्फुटम् ॥२॥

हृदयनाथ ! जिजाहृदयं मम
श्वसितमुच्छ्वसितं खलु जीवितम् ।
अमृतवर्तिरिवाक्षिसुखप्रदा
वद कथं बत तद्विरहं सहे ॥३॥

विरहकल्पनया मम मानसं
हिमवदेव घनीभवति क्षणात् ।
द्रवति हन्त विमर्शवशात्
वहति वाष्पभरेण बहिर्मुखम् ॥४॥

किमु वदामि जिजाविरहाकुता
तदभिधानपरा रसना मम ।
गदितुमुत्सहते न तदप्रियं
प्रिय कुरुष्व ययाभिमतं तव ॥५॥

पतिकुलोद्गमनाह्नि समागता
उषसि ताः सुखदुःखसमाकुलाः ।
प्रियसखीसहवासभृशातुराः
सवयसः प्रतिवेशिकुलाङ्गनाः ॥६॥

विहितमङ्गलगाहनभास्वरा
रुचिरकुंकुमचन्द्रकलाधरा ।
अरुणवस्त्रयुता शुशुभे जिजा
शरदुषा इव सर्वमनोहरा ॥७॥

धवलपाटलनीलसरोरुहै-
र्विहितमङ्गलकुन्तलभूषणा ।
मुखविलोचनपद्ममयी जिजा
सपदि सा ददृशे सरसी यथा ॥८॥

विविधहीरकमौक्तिकभूषणैः
हृदयसन्निहितैर्विरराज सा ।
गुणवती मृदुमञ्जुलभाषिणी
सदुपमानगणैः कविता यथा ॥९॥

नयननीरभृशार्द्रमुखी जिजा
पतिपुराभिमुखी समदृश्यत ।
विषमसह्यशिलोच्चयमार्गगा
गिरिनदीव महार्णवगामिनी ॥१०॥

पतिमिताऽमितसम्मदमानसा
तदवलोकनमोदितमानसम् ।
तदुदितेङ्गितमात्रवशंवदा
प्रथमसिद्धिरिवोत्तमकर्मिणम् ॥११॥

अथ चिरन्तनपुण्यकृतां सतां
युगयुगान्तरसञ्चितकर्मणाम् ।
सुपरिपाकमिवोत्कटपिण्डितं
कमपि गर्भमुवाह जिजा शिवम् ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतिरिवाद्भुतमन्त्रबलान्विता
विजयभाग् रणनीतिरिवोज्ज्वला ।
प्रखरवीररसा कविता यथा
प्रबलगर्भभरा शुशुभे जिजा ।।१३।।

प्रथिततीर्थजलान्तरगाहने
मुनितपस्विपदाम्बुजवन्दने ।
सकलगोद्विजसम्परिपालने
मनसि साऽविरतं प्रतितत्वरे ।।१४।।

भगवतीं महिषासुरमर्दिनीं
समनुकर्तुमियेच्छदनेकदा ।
प्रखरपट्टिशखड्गकृपाणभृन्-
निजवपुर्मु कुरे समलोकयत् ।।१५।।

नगरसीमविलङ्घनमङ्गला—
हनि चतुर्दिगुपान्तजिगीषया ।
सरभसेव महारणरागिणी
सकलदिक्षु च चक्षुरुपाक्षिपत् ।।१६।।

शारदि मङ्गलदीपमहोत्सवे
पतितमन्दिरगर्भगृहेष्वपि ।
शतशतोज्ज्वलदीपकमालिकाः
रचयितुं न्यदिशत् सकलान् जनान् ।।१७।।

नभसि गैरिकशोणशुभप्रभाम्—
मुषसि सायमवेक्ष्य दिने दिने ।
समुदितो भगवद्ध्वज इत्यसौ
प्रमुदिता समवन्दत भक्तितः ।।१८।।

न हि समैहत वीक्षितुमुज्ज्वलां
निमिषमप्युदयाचलसंस्थिताम् ।
यवनशासनवैभवबोधिनी-
त्यतिशुभामपि चान्द्रमसीं कलाम् ।।१९।।

हततुरुष्कजयध्वजसप्रभे—
त्वयि विलोकयितुं न समैहत ।
मरकतोज्ज्वलवर्णसुशोभितां
सुरुचिरामपि सह्यवनश्रियम् ।।२०।।

विषमसह्यगुहावनचारिणो
वसनभूषणहीनतनूञ्जनान् ।
सुखमलोकयतादरतो यथा
न हि तथा धनिनः स्वजनानपि ।।२१।।

हनुमदर्जुनभीमरघूत्तम—
प्रभृतिवीरवरेण्यचरित्रतः ।
प्रथितसङ्गररौद्ररसाः कथाः
निशमितुं भृशमुत्सुकतां दधे ।।२२।।

परमपूरुषवीरचरित्रतो
भृशमरोचत सैव कथाद्भुता ।
नखरशस्त्रबलेन महासुरौ
हत उरःप्रविदारमसौ यदा ।।२३।।

सकल एष जनोऽस्तु सुखाप्लुतः
चिरमनामय एव च जीवतु ।
जगति पश्यतु भद्रमनेकधा
भृशमयाचत सेति सदाशिवम् ।।२४।।

पतिरिमां निकटप्रसवामथो
निजनिवासभरातिसमाकुलम् ।
दृढमवेत्य पदं च निरापदं
किमपि सुप्रसवं समचिन्तयत् ।।२५।।

निकटवर्तिनमुन्नतदुर्गमं
शिवमयं च शिवासमधिष्ठितम् ।
गिरिगतं शिवनेरिशिवाभिधं
स्ववशदुर्गमिमामहिनोदसौ ।।२६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः परं ४८ श्लोकपर्यन्तं निदाघवर्णनम्

अथ मधौ हि विलासविमूर्च्छिते
तपनदीधितितापभयावहः ।
समय उष्णतयाऽतिविशोषको
दहनबन्धुरिवाभिययौ द्रुतम् ।।२७।।

रविमवेक्ष्य सुतप्ततरं भृशं
मरुदियाय स तद्गुणतां स्वयम् ।
बत वत क्षमया प्रथिता क्षमा–
ऽभवदसौ सहसा ध्रुवमक्षमा ।।२८।।

खनितुमेव हि कूपतलं श्रमी
विवरमेत्य भुवो भृशशीतलम् ।
सदनशेखरसंस्थितशिल्पिनं
रविकराभिहतं समुदीक्षते ।।२९।।

सुघटिता समता हि निदाघतः
सकलसज्जनवृन्दसमीहिता ।
विनिहिताः सदनेष्वखिलैर्यतो
धनिभिरम्ब्वधनैरिव मृद्घटाः ।।३०।।

क्षणश एव यथा रविरुच्चकैः
समधिरोहति तुंगनभोगिरिम् ।
जगदिदं स्वकरैरुपकर्णयन्
नयति सन्निधनामिव चात्मनः ।।३१।।

रविकरैरदयं युगपद् हृतं
सकलमीनसरोवरजीवनम् ।
प्रखरतापभृतां दहनात्मनां
हृतबलेषु कुतः करुणाऽसताम् ।।३२।।

तरणिना हि धरान्तरसंस्थितान्
सकतरत्ननिधीनभिवीक्षितुम् ।
निजसहस्रकरैरिव दारिता
कठिनमृत्कवचाऽपि वसुन्धरा ।।३३।।

तपनदीधितितापभृशाकुलं
पशुकुलं विनिविष्टमहर्दिवम् ।
तरुतले बहुपल्लवशीतले
पिहितचक्षुरहान्तमपेक्षते ।।३४।।

सुषुमयाऽमरराजहरिद् यया
बहु विराजति पाटलयोषसि ।
प्रतिनिशं सकलास्वपि दिक्षु सा
स्फुरति नूनमहो दववह्निना ।।३५।।

मरुति वाति निशास्वतिदाहके
स्फुरति दावमहानलतेजसि ।
न रविरस्तमगादिति शङ्कया
बहिरियाय न घूककदम्बकम् ।।३६।।

विगतपङ्कमये धरणीतले
तरणितापहतं खलु गोकुलम् ।
न च विदूरमपेतुमभीहते
क्षणमहो लघुकूपसमीपतः ।।३७।।

कृपणतुल्यमनेन जलं चिरं
विजतकूपखलेन हि सञ्चितम् ।
तदपनीतमतो रविणा स्वयं
खलधनं हरणीयमिहाधिपैः ।।३८

सकलकूपसरःसरितां पयो
रविकरैरुपशोष्य दिवानिशम् ।
बहुपिपासितयेव दिवाऽधुना
किमदयं सकलं परिपीयते ।।३९।।

यदि सरो विजलं क्व सरोरुहं
न हि सरोरुहमेव कुतोऽलयः ।
यदलयो न कुतो मधुगुञ्जितं
न मधुगुञ्जितमेव कुतो मुदः ।।४०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बक उपेति सरित्तटमुत्सुको
नियतदम्भतपश्चरणाय: स ।
विगतनीरतया पुलिने पुन-
र्भवति तस्य नितान्तविडम्बना ।।४१।।

तपनदाहसुदग्धतनूरियं
बकततिः समगात् किमु कृष्णताम् ।
इति संशंकमयं बहुकौतुकी
वियति पश्यति काकततिं जनः ।।४२।।

समविशद् रविरश्मिविभर्जितः
प्रकुपितोऽहिरितीव पिपीलिकाः
स्वविवरं परिहाय भयाकुलाः
उदककुम्भसमीपमुपस्थिताः ।।४३।।

विकचमेचकनीरजपुञ्जवत्
निशि नभः प्रतिभाति च माधवे ।
तदभिलाषवशीकृतमानसा
इव समुत्पतिता उडुहंसकाः ।।४४।।

तपनदीधितितप्ततनूभृतो
दिव इवाधिकघर्मपयःकणाः ।
उडुगणा हि निदाघनिशासु ते
परिलसन्ति सुमौक्तिकसुन्दराः ।।४५।।

सुखयितुं सकलानुपनीतमि-
त्यभिविलेकितमादरतो जनैः ।
पवनजेन हिमालयशेखरं
प्रतिनिशं शशिखण्डमदो मुदा ।।४६।।

शशिभुजङ्गमदेवसरिद्धरो-
ऽपि स हरो न सहेत महातपम् ।
शिरसि सन्ततधारमतो जलं
निहितमस्य जनैः प्रतिमन्दिरम् ।।४७।।

रविकरैरभितप्ततनूभृतां
तरुविहीनपथं व्रजतां नृणाम् ।
क्वचिदकालघनो नभसि स्फुरन्
वरदहस्तसमो भवति प्रभोः ।।४८।।

इति निदाघ-महातपतापिते
समय एव शुभाहनि माधवे ।
किमपि सौख्यमबोधितकारणं
स्वहृदये सहसा जनताऽन्वभूत् ।।४९।।

विपिनपुष्पसुगन्धवहो मरुत्
परिजहर्ष तथैव हुताशनः ।
मुदितभृङ्गविहङ्गकुलं जगौ
किमपि मङ्लगीतमविस्फुटम् ।।५०।।

सकलदेवकुलेषु महाध्वनिः
मुरजशंखभवोऽनददुच्चकैः ।
निशमिताः सुचिरं जयगर्जनाः
मुदितदेवगणैरिव घोषिताः ।।५१।।

सकलसज्जनमानसवर्तिनी
परममङ्गलवाञ्छितवल्लरी ।
शुभतमेऽह्नि नवार्भकजन्मना
सुफलिता शिवनेरिमहालये ।।५२।।

नवशिशोरतिभास्वरतेजसा
न गृहमात्रगता लघुदीपिकाः ।
प्रतिहता यवनाधिपमस्तक-
स्थितकिरीटमहामणिभा अपि ।।५३।।

पुण्ये च नामकरणाहनि मीलिताभिः
तस्याङ्गनाभिरुदितं हि नवार्भकस्य ।
तद्दुर्गदैवतसमाख्यमनन्तकीर्ति
प्रेम्णा शिवाजिरितिमङ्गलनामधेयम् ।।५४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥३५५७

नृवीरत्र्यर्यस्य रणप्रियस्य
प्रियं शहाजेरपि तच्च नाम ।
शिवा भवेदाजिरमुष्य चेति
स नामधेयार्थमुदाजहार ॥५५॥

नवीनां निरुक्तिं स्वतःकल्पितां तां
स्वपुत्राभिधानस्य लोकान् ब्रुवाणः ।
पिता मन्त्रवत् सञ्जुगुञ्जेव भूयः
नवार्भस्य तन्मङ्गलं नामधेयम् ॥५६॥

कुटीरे कुटीरे प्रसन्नान्तराणां
शिशूनां च यूनां च सीमन्तिनीनाम् ।
ननर्तेव जिह्वाग्रमञ्चेऽभिधानं
शिवाजिः शिवाजिः शिवाजिः शिवाजिः ॥५७॥

रसालरसरक्तकण्ठपिकवृन्दमञ्जुस्वराः
कृषीवलकुलाङ्गनाः प्रतिगृहं जगुः सर्वदा ।
सुशाययितुमर्भकान् स्वरचिताश्च गीतीर्नवाः
स्वबान्धवसुखश्रवाः प्रियशिवाजिनामांकिता
॥५८॥

❀ अपर गैंगेज शूगर मिल्स लिमिटेड
❀ दी अवध शूगर मिल्स लिमिटेड
❀ न्यू इण्डिया शूगर मिल्स लिमिटेड
❀ दी न्यू स्वदेशी शूगर मिल्स लिमिटेड
❀ भारत शूगर मिल्स लिमिटेड
❀ गोबिन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्या इक्षुशर्करायाः निर्मातारः
मैनेजिंग एजेंट्सः—
दी काटन एजेण्ट्स प्राइवेट लि०
इन्डस्ट्री हाउस
१५६, चर्चगेट रिक्लेमेशन
बम्बई—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतियोगितायां प्रेष्यमाणा लघुकथा

रहस्योद्घाटनम्

(ले०—श्रीचन्द्रशेखररामचन्द्र ताम्बे, नागपुरम्)

एकस्मिन्ग्रामे कश्चिद्भूस्वाम्यासीत् । स तत्र मुख्योऽगण्यत । असौ सदाचारप्रियो धर्मपरः सुखी सम्पन्नश्चाभूत् । जनेष्वासीत्किंवदन्ती यत्तद्वंश एव विगतवर्षशतैरेतद्ग्रामाधिपत्यं भुञ्जान आस्त तथा च भुवो विभाजनं न भवति स्म किन्तु गुणवत्तमायैवाधिकारः समर्प्यते स्म ।

वर्तमानस्य ग्रामाधीशस्य साध्व्येका भार्या द्वौ सुतौ चास्ताम् । बालभावं यावत्सुतौ समस्वभावौ दृश्येते स्म किन्तु किशोरदशां स्पृशतोस्तयोः प्रकृतिवैषम्यं शनैर्दृष्टिपथं प्राप्तवत् । अग्रजोऽनुजापेक्षया हासोत्सवक्रीडाभिरधिकं रेमे। अनुजस्तस्माद्विपरीतं गम्भीरतरः शान्तो विद्याभ्यसनप्रियश्च सन्नवर्तत। ग्रामवासिभिरनुमितं यदनुज एव पितुरुत्तराधिकारी भविष्यति ।

दुराचारिभिर्मित्रैः सहाग्रजोऽसौ प्रतिदिनं दुराचारमशिक्षत । स मद्यपाने गणिकानृत्यावलोकने द्युते च समासक्तः । अनेकधा जनकेन परिबोधितोऽपि चञ्चलस्वभाव आसक्तिं नामुञ्चत् । उपभोगैर्मनोऽरमयत् । तत्कारणात्पितुर्धनस्य व्यर्थो व्ययो भवति स्म । स संसारविषयेष्वेवारक्तः सन्नीश्वरं सर्वथा विस्मृतवान् । जनकोऽपि तस्य कुटिलां वीक्ष्य प्रकृतिं परवश इवासीत् । ज्यायान्भ्राता ग्रामजनताया निन्दापात्रं समभूत् । सर्वोऽपि जनस्तमभिद्रुह्यति स्म ।

अनुजः सदाचारेण विनयेनेश्वरभक्त्या च सर्वजनस्य प्रीतिकरः प्रशंसाभाजनमभूत् । तस्य मित्राण्यपि सदाचारपरा आसन् ।

अग्रजस्य मते विविधसुखभोग एव मनुष्यजन्मनः साफल्यं निहितमासीत् । अनुजस्तु सुखोपभोगं विषमिव मन्यमानो विषयविरागेणेश्वरोपासनमेव मानवजीवनस्य हितकरं समर्थयते स्म । एवं प्रतिकूलोद्देश्यतया तयोः परस्परस्नेहो वृद्धिं नालभत । तौ दूर एव च तिष्ठतः स्म । जनकोऽनुजस्य सौजन्येन परां प्रीतिमाससाद । तस्य दुराचारिणि ज्यायसि पुत्रे महतीर्ष्या सञ्जाता किन्तु सुतवात्सल्यं तं बलादग्रजस्याभिलषितानि रक्षितुं प्रेरयति स्म ।

एकदानुयायिभिरग्रजः प्रार्थितः—'वयस्य ! यदि जन्मदेशं त्यक्त्वान्यत्र न गच्छामस्तर्हि निष्फलमस्माकं जीवनम् । विविधदेशनिरीक्षणेन जीवनं सफलं भवति ।' एतन्निशम्यैवाग्रजो देशाटनोत्सुको बभूव । तदनु पित्रा यथाकथंचिदाज्ञप्तो महद्धनं गृहीत्वोच्चचाल । कदाचिद्देहल्यां कदापि काश्मीरे कदा च मोहमय्यामेवं बहुस्थानेषु भ्रान्त्वा प्रससाद । तत्र तत्र च स्वीयाः कामनाः पूरयामास । तस्य मित्राणि तदनुयायिनोऽभवन् ।

अनुजस्तु निरभिलाषः स्वकीये ग्रामे निवसन् भगवदाराधनं कुर्वन् कालं यापयति स्म । ग्राम्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तस्य कल्याणं काङ्क्षन्तस्तस्य कार्येषु योगं ददति स्म। स सर्वेषां चित्ताह्लादकोऽभवत्।

अग्रजो वर्षद्वयानन्तरं भ्रमणाद्विरतः समित्रो निजग्रामं प्रतियातवान्। महामहान्ति वीक्ष्य नगराणि तस्य मनो ग्रामे नारमत। तदा तस्य वयस्यास्तस्मा उपायमेकं निवेदितवन्तः—'अस्माकं ग्रामादारादेकस्मिन्ग्रामे कस्यचन धनिनो गृहे वरयात्राप्रसङ्गेन गणिकानृत्यमायोजितमस्ति। तत्रैव गत्वा मनः प्रसादयामः।' अग्रजेन प्रस्तावः स्वीकृतः। तातेन प्रत्यादिष्टोऽपि तमनादृत्यानुयायिभिः साकं धनेन समं प्राचलत्।

यस्मै ग्रामायाग्रजः प्रास्थात्तस्यैव समीपस्थे ग्रामे कश्चिद् भगवद्गुणगायकः कथावाचक आयात आसीत्। यद्यप्यनुजः स्वग्रामं न जहाति तथापि जनैर्निवेदितां कथावार्तां श्रुत्वोत्फुल्लमनास्तत्र जिगमिषां चकार। जनयित्रा सानन्दमादिष्टोऽसौ सवित्तमित्रः प्रयाणमकरोत्। यत्र कथावाचकस्य कथायोजितासीत्तत्र यात्वा गृहस्वामिना सम्मानितोऽभूत्। समागतेषु श्रोतृषु रात्रेरष्टवादनवेलायां कथा प्रारभ्यत। सर्वे कथाश्रवणे संलग्ना जाताः। कथाकारस्तेषां कर्णयोरमृतमिव न्यषिञ्चत्। प्रातश्चतुर्वादनवेलायां प्राप्तायां कथा समाप्तिमगात्। श्रोतृभिः स्वयोग्यतानुसारं तस्मै दक्षिणाः प्रादीयन्त। भूस्वामिपुत्रोऽपि महतीं दक्षिणां तस्मै प्रायच्छत्। अनुजेन सूर्योदयात्पूर्वमेव गृहं गतुं निश्चयः कृतः। अन्धकारे सहानुयायिभिः स गमनमारब्धवान्। कथाश्रवणसंजातप्रमोदास्ते येन मार्गेण गच्छन्ति स्म तस्योच्चनीचभागानपि न लक्षयन्ति स्म। ते कथामाधुर्यं चिन्तयन्तः कथाकारं मुहुः प्रशंसन्ति स्म। अधुनापि तिमिरं प्रसृतमासीत्। सहसानुजस्य दृष्टिर्विचलिताभूत्। तस्य पादः समीपवर्तिन्येकस्मिन्महति गर्तेऽलगत्। असौ तस्मिन्न्यपतत्। अनुयायिभिर्दृष्टं यत्तस्य देहे क्षतानि संजातानि गात्रेभ्यश्च रुधिरधाराः प्रसरन्ति। अस्य दक्षिणपदास्थि त्रुटितमभवत्। तद्वयस्या यथाकथंचित्तं गर्तान्निष्कास्यात्यन्तं दुःखिताः स्कन्धे धृत्वा गृहं प्रापयामासुः।

अनुजस्य कथाश्रवणानन्तरं निवर्तनसमकाल एवाग्रजोऽपि वाराङ्गनोत्सवं विलोक्य निवर्तते स्म। तेन तस्या नृत्यगानादिकमनुभूय कापि तुष्टिः समासादिता। तस्यै प्रसन्नः पञ्चशतरूप्यकपरिमितं द्रव्यं प्रदत्तवान्। तयापि स समादृतोऽभूत्! पश्चाद्धनिना सत्कृतोऽनुयायिभिः सार्धं गृहं प्रति चलितः। यथागच्छतस्तस्य कियद्दूरे पादेन किंचिद्वस्तु स्पृष्टमभवत्। अन्धकारेऽर्वानिपुणं निरीक्ष्य तेन ज्ञातं यदियं विशुद्धस्य सुवर्णस्येष्टिकास्ति। सुवर्णेष्टिकाप्राप्त्या संजातानन्दः स आत्मनि गौरवमनुभूतवान्। तेन मित्रेभ्यः कथितं—'पश्यत, लोके वेश्यादिषु धनव्ययः पापं मन्यते। किन्त्वहं वदामि यदि तत्तथा तर्हि मयापि लोकदृष्टितः पापमाचरता कथं सुवर्णेष्टिका लब्धा। किं पापस्यैतदेव फलं यन्मम महद्द्रव्यलाभः। ततत्तस्यैव तात्कालिकं फलम्। अतो निस्सन्दिग्धमिदं यद्वेश्यादिषु धनव्ययः पापं न प्रत्युत सुकृतमेव भवति। तस्य प्रत्यक्षमुदाहरणभूतोऽहमेवास्मि' इति। मित्राणि तद्वचः स्वीचक्रुः।

अग्रजः स्वग्रामं प्रविशन्नवीनमेव सर्वत्र विलोकयांचकार। सर्वे जना इतस्ततो 'महत्कष्टं महत्कष्टमि'त्येवालपन्तो धावन्ति स्म। तत्रत्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनता दुःखदग्धेवासीत् स्वभ्रातृविपत्तिविषयकमखिलमपि वृत्तं विज्ञाय गृहं गत्वा भ्रातरमुपससर्प। भ्रातुर्विपदं विलोकयतस्य नेत्रयोरश्रूणि निर्गतानि।

किन्तु तस्य गर्वोऽजायत—'मया लोकदृष्ट्या पापं कुर्वतापि सुवर्णेष्टिका प्राप्ता। अनेन मम भ्रात्रा लोकदृष्ट्या पुण्यं कृत्वापि गर्तपतनजनितविपदनुभूयते' इति। तदा प्रभृति स ग्रामवासिष्वीश्वरस्यासत्यत्वं तद्भक्तेश्च निरर्थकत्वं हानिकरत्वं च प्रचारयितुं प्रवृत्तः। तेनात्मनः कर्मणां पुण्यफलकारित्वं प्रख्यापितम्। जनतापि प्रत्यक्षप्रमाणमुपलभ्य तस्य कथनमनुचितमपि प्रत्यादेष्टुं नाशकत्।

बहुभिर्दिनैर्निरन्तरचिकित्सया कनीयसो व्याधिः शान्तः। असौ पूर्ववन्नीरोगोऽतिष्ठत्। समस्ते ग्रामे प्रसन्नता व्यलोक्यत। कनीयांस्तादृशं दुःखमनुभूयापि भगवति श्रद्धां नात्यजदपि तु स्वनीरोगतायां परमात्मनः प्रसादमेव वीक्षते स्म। तस्य पूर्ववद्धर्माचारः प्रारभत। सकलमपि ग्रामं तत्सदृशमाचरन्तं पुनरपि विलोक्याग्रजस्य चित्तं चिन्ताकुलमभवत्। तेनेश्वरस्यास्तित्वं मिथ्येति सिद्धीकर्तुं द्वे उदाहरणे अपि प्रदत्ते यन्मयेश्वरमचिन्तयता पापं कुर्वाणेन तात्कालिकं फलं सुवर्णेष्टिका प्राप्ताभूत्। मयानुजस्तु भगवदाराधनं कुर्वन् कथां श्रुत्वापि तात्कालिकं फलं गर्तपतनं प्राप्तवान्। लोकाः सविस्मयं विपरीतमिदमुदाहरणद्वयं दृष्ट्वा किंकर्तव्यविमूढा इवासन्।

यद्यपि लोकाः सदाचारं परमात्मभक्तिं चैव श्रेयःसाधकं मन्यन्ते स्म तथापि विपरीतेनैतदुदाहरणद्वयेन तेषां बुद्धिर्विभ्रान्ताभूत्। सम्प्रति ग्रामे सर्वत्र जनेषु वार्ताया विषयः समजायत—'य ईश्वरो भक्तवत्सलो दयासागरश्च कथ्यते विद्वद्भिः सोऽविचार्यैवात्मनोभक्ताय कष्टप्रद आत्मनोऽभक्ताय पापिने च सुखप्रदः कथमभूत्। कनीयसा भ्रात्रैव स्वपुण्यकर्मानुसारतः सुवर्णेष्टिका प्राप्तव्यासीत्। ज्यायसा भ्रात्रैव स्वपापकर्मणां कृते गर्तपतनजनितव्याधिरनुभवितुमासीत्। किन्तु तथा न भूत्वा विपरीतं कथं जातम्? अत्र भगवतः काचिल्लीला किंचिद्रहस्यं त्ववश्यमेव स्यात्। अन्यथा विपरीतं भवितुं न शक्यते। इति।

भूस्वाम्यपि स्वपुत्रयोर्वृत्तान्तेनाश्चर्यमग्नो बभूव। तेन बहुविचार्यापि न किंचिदवगतम्। ग्राम्याणां समक्षेऽधुनैक एव प्रश्नः समुत्थितोऽभूत्। अस्योत्तरं ते बहुकालात्प्रतीक्षन्ते स्म। किन्तु तेषां सन्देहनिवारको न कोऽप्यासीत्। अस्याः समस्याया निर्णयाभावे तेषां जीवनव्यवस्थापि सम्यङ् न प्राचलत्। तेऽस्योत्तरविषये निराशा बभूवुः।

बहवो महात्मानो विद्वांसश्च भूस्वामिना पृष्टाः। तैः स्वस्वबुद्धिवैभवानुसारं प्रश्नस्योत्तरं कृतं परन्तु सर्वजनसन्तोषकरमेकस्याप्युत्तरं नासीत्।

कालक्रमेण हायनत्रयं व्यतीतम्। तदैव कश्चिन्महात्माप्रतिमप्रतिभावांस्तत्र समायातः। खिन्नाञ्जनान्विलोक्य तेन भूस्वामी पृष्टः—'स्वामिन्, भवतो ग्रामस्य जनता विमनायमानास्वस्थेवालोक्यते। यदि कथयितुं पारयसि तत्कथय'। भूस्वाम्यपि मनस्युत्तरस्याशां कृत्वा निखिलं वृत्तान्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेदयामास। महात्मना समस्यागौरवं स्वीकृत किञ्चित्समयानन्तरं च ध्यात्वा सर्वेषां ग्रामनिवासिनां समक्षं प्रश्नस्योत्तरं कृतम्—'भो जनाः परमात्मनो विधाने शंका न करणीया। ईश्वरेण सर्वथोचितमेव विहितम्।' ग्रामवासिनोऽकथयन्—'गुरो, वयं श्रोतुमेतदेवेच्छामो यत्परमेश्वरस्य विहितं नानुचितम्। किन्त्वत्रौचित्यं बोद्धुं न पारयामः! भक्तिप्रियस्य पुण्यात्मनः कनीयसो गर्तपतनानुभवः कथमुचितः? ईश्वरनिरोधकस्य पापात्मनो ज्यायसः सुवर्णलाभः कथमुचितः? एतद्रहस्यं प्रकटीक्रियताम्।' महात्मनोक्तम्—'अत्राश्चर्यस्य किं कारणमिति न ज्ञायते। पूर्वजन्मनः कर्मानुसारतोऽनुजस्य तस्मिन्दिने मृत्युयोगः किलासीत्। तथापि दयालुरीश्वरस्तस्यास्मिञ्जन्मनि सदाचारं भक्तिं च विलोक्य केवलमवशिष्टपापानां कृते तं गर्तेऽपातयत् किन्तु मृत्योररक्षत्। एतस्माद्विपरीतमग्रजस्य पूर्वजन्मनः कर्मप्रभावात्तस्मिन्दिवसे बृहद्राज्यप्राप्तियोगो बभूव तथापि तस्यात्रजन्मनि पापानि वीक्षमाण ईश्वरस्तस्मै सुवर्णेष्टिकाप्रदानेनैव सन्तोषितवान्। एतत्तस्यावशिष्टपुण्यानामेवाभूत्फलमिति'।

अद्य ग्रामवासिनां मनः शल्यमिव तद्रहस्यमुद्घाटितमभूत्। सर्वे हृष्टा एतेनोत्तरेण। महात्मापि सन्तोषमाप। ग्राम्यैः सत्कृतः पूजितश्च निर्जगाम। ग्रामीणास्तस्योपकारं न व्यस्मरन्। तस्य बुद्धिवैभवं पुनः पुनः प्राशंसन्। तैर्ज्ञातं यदीश्वरस्य स्मरणेन यदि कष्टमप्यनुभूयते तर्हि तद्वरं, ईश्वरस्य विरोधेन लब्धमपि सुखं न वरम्।

ज्यायसो भ्रातुर्गर्वोऽगलत्। कनीयसो भ्रातुर्गौरवं गीयते स्म। सर्वस्या जनताया हृत्स्थं नैराश्यतमो निष्कासयन्नाशाप्रकाशः प्रासरत्।

उत्तर प्रदेश से प्रकाशित समाचार पत्रों में सर्वाधिक बिक्री वाला

पाञ्चजन्य साप्ताहिक

मकर संक्रमण १४ जनवरी १९६४ से

नये रूपरंग और बड़े आकार में

निष्पक्ष और निर्भीक आलोचना तथा गंभीर चिन्तनयुक्त सामग्री

मूल्य एक प्रति २५ न.पै. मात्र (वार्षिक शुल्क १२ रु., अर्धवार्षिक ६ रु. ५० न.पै.)

अपने स्थानीय अभिकर्त्ताओं से सम्पर्क स्थापित करें अथवा आदेश दें।

व्यवस्थापक

'पाञ्चजन्य'

पो. बा. २०७ अशोकनगर, लखनऊ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खेतड़ीनगरे स्मृतिमन्दिरस्योद्घाटनमाचरतो राजस्थानस्य

राज्यपालस्य डा० सम्पूर्णानन्दमहाभागस्य भाषणस्य सारः

(अनुवादकः श्रीदीनानाथत्रिवेदी 'मधुपः' महाराजसंस्कृत-कॉलेजः, जयपुरम्)

गतनवम्बरमासस्य १२ तारिकायां स्मृतिमन्दिरस्योद्घाटनमाचरता डॉ० श्रीसम्पूर्णानन्दमहाभागेन प्रोक्तम्–यत् स्वामी विवेकानन्दो युगपुरुष आसीत्। तस्य जीवनात् प्रेरणां लब्ध्वा वयं स्वकर्मसु सांप्रतमग्रेसरा भवेम।

यदा भारतवासिनो जनाः स्वधर्मं विस्मृत्यात्मानं हिन्दुनाम्ना कथयितुमपि संकोचमनुभवन्ति स्म, तदा स्वामी विवेकानन्दः सुदूरस्थममेरिकादेशं गत्वा तत्र, सर्वधर्म–सम्मेलने हिन्दुधर्मं व्याख्यातवान्, प्रत्येक–हिन्दुधर्मावलम्बिने जनाय चात्मबलं प्रदत्तवान्। तस्मिन् समये देशस्य या परिस्थितिः समभूत् तस्याः परिज्ञानायाऽस्माभिः–इतिहासस्य विवेचनं कर्तव्यं भविष्यति। सम्राजो हर्षवर्धनस्यानन्तरं भारतवर्षमिदं लघु-लघु-खण्डेषु विभक्तमभूद् दासताञ्चागात्। यवनैरपि मौगलशासनसमये हिन्दुधर्मे सुमहान् प्रहारः कृतः। गौराङ्गानां शासनकाले च ईसाइपदवाच्या जनाश्च 'हिन्दवो भवन्त्यज्ञाः' इति कथयित्वा देशे सर्वत्र ईशवीयं मतं प्रचारितवन्तः। स्वामी विवेकानन्दश्च खल्वेतादृशे काले ईसाइजनानां दुर्गभूताममेरिकां गत्वा-ईसाइजनानां कृते तु तन्मुखमुद्रणापादनदक्षं समुचितमुत्तरन्तु प्रदत्तवानेव, सदैव हिन्दुसंस्कृतिं तथा धर्मञ्चापि पतनस्य गर्तेऽभिगमनात् सुरक्षितवान्।

किञ्च—स्वामिविवेकानन्दस्योपदेशेभ्यस्तथा तत्कार्येभ्यश्च प्रेरणायाः ग्रहणस्याद्यापि तावत्येव वर्तते परमावश्यकता, यावती तस्मिन् समये समभूत्। स्वामिनो जीवनस्य विषये खेतड़ीनगरस्य सुमहद् ध्यानमस्थात्, तथाऽग्रेऽपि च खेतड़ीतस्तस्य स्वामिनो विचाराणां प्रसारश्चापि भविष्यत्येव।

श्रीमुख्यानन्दस्य भाषणम्

स्वामी श्रीमुख्यानन्दश्चाभाषत् यत् स्वामिविवेकानन्देन सर्वाण्यपि कार्याणि निखिलस्यापि मानवसमाजस्य हितायैव समाचरितान्यभूवन्। किञ्च स्वामिविवेकानन्दो धर्मविशेषस्याऽथवा देशविशेषस्य नासीत्, अपि त्वखिलस्याप्यभूद् विश्वस्य सः। अन्ते चायं स्वामिने विवेकानन्दाय श्रद्धाञ्जलिमर्पितवान्।

श्रीवेणिशङ्कर शर्मा

रामकृष्णमिशनस्योपाध्यक्षोऽयञ्च शुभावसरेऽस्मिन् स्वकीये स्वागतभाषणेऽवोचत्—'स्वामिविवेकानन्दमहाभागेन स्वस्याध्यात्मिकशक्त्या दैव्या प्रतिभया तथाऽलौकिकेन च ज्ञानेन भारत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूतनवर्षम्

लेखकः—शास्त्री, रामकिशोर मिश्रः, रामसिंहपुरा सोरों (एटा) उत्तरप्रदेशः

सर्वत्रैव व्रजसि, परमे ! वर्ष भोः ! नूतन ! त्वम् ।
यस्मिन्देशे भवति गमनं तेऽद्य तद्भारतोऽयम् ।।
यामोषोभ्यां प्रथमसमयात्ते वयं भारतीयाः ।
वेदैः साकं प्रतिपुरगतैः स्वागतं व्याहरामः ।। १ ।।

रामारामे सुरभिता यत्र चाध्यात्मविद्या ।
कृष्णेनैषा त्विह युधि महाभारते साधु गीता ।।
वेदव्यासैर्विविधकविभिः कालिदासीयकाव्यैः ।
माघैर्वाणैः कथितमथ ते स्वागतं व्याहरामः ।। २ ।।

आगच्छ, त्वं स्ववसरयुतं भारतीं भाषमानम् ।
काले काले सविधि सुलभाः योजनाः युज्यमानम् ।।
स्वर्गारावैः सुदिवसनिशोर्ग्रैश्च वृक्षानिलैस्ते ।
गङ्गादीनां कलकलरवैः स्वागतं व्याहरामः ।। ३ ।।

स्यैव न, अपितु समग्रस्य विश्वस्यापि या सेवा कृताऽऽसीत्, तथा मानव-कल्याणाय च यः सुमहान् श्रमः समाचरितोऽभूत्, तदर्थं कृतज्ञतां प्रकटयन्तो वयमद्य श्रद्धया नतमस्तका भवामः ।' अग्रे चाऽनेन कथितं यत् 'स्वामिवर्यस्य तस्य खेतड़ीनगरेणानेन सह निकटतमः सबन्ध आसीत् । अत एवात्र तस्य स्मृतौ स्मारकस्यास्य स्थापना क्रियते' ।

अवसरे चास्मिन् वेणिशङ्करशर्मा-राष्ट्रपति-डॉ० राधाकृष्णन्महाभागस्य, स्वामिरंगनाथानन्दस्य तथाऽन्यमहानुभावानाञ्च प्राप्तान् शुभान् संन्देशान् पठित्वाऽश्रावयत् । स्वामिविवेकानन्द-शताब्दीमहोत्सवस्य मन्त्री पण्डित-झाबरमल्लशर्मा तदानीं स्वस्य विवरणपत्रिकामुपास्थापयच्च ।

समारोहेऽस्मिन् राज्य-मन्त्रिमण्डलस्य कतिचन सदस्यास्तथा झूंझनू-जयपुर-सीकराऽजयमेरु-मण्डलानां प्रमुखाः साहित्यकाराः, राजनीति नेतारः, व्यापारिणः, उद्योगपतयः, प्राध्यापकाः, पत्रकाराश्च महत्यां संख्यायां समुपस्थिता अभूवन् । अवसरे चात्र राज्यपाल-डॉ० सम्पूर्णानन्दमहाभागस्य नागरिकैरभिनन्दनमप्यक्रियत । एवं पिलानोस्थितस्य विद्याविहारस्य सञ्चालकः श्रीशुभदेवपाण्डेयो राज्यपालाय शुभमभिनन्दनपत्रं समर्पितवान्—इति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानातीर्थैर्निजगतिगतैर्देशभक्तैर्वचोभिः ।
यत्रोदीच्यां हिमनिपतनैः शैलराजस्य साधु ।।
प्राच्यां भङ्गैस्तव जलनिधेः पश्चिमे दक्षिणे च ।
मध्ये कृष्णा षड्तुकुसुमैः स्वागतं व्याहरामः ।। ४ ।।

आर्यावर्तं तदनु भरतस्तस्य यो भारतोऽयम् ।
हित्वा कान्तां परिणयगतां पण्यकान्तासुसेवी ।।
तस्याऽऽदिव्यास्तम इव कृतो वञ्चकैः स्वीयजालैः ।
बुद्धिं प्रत्याव्रज सरति ते स्वागतं व्याहरामः ।। ५ ।।

'हिन्दुस्थानं' यदि न रुचितं 'इण्डिया' नाम किन्ते ।
'यत्रांऽग्रजी' विलसति, न किं भारती, तत्र दास्यम् ।।
त्याज्ये द्वे दे तदिति वदतः कुर्वतो भारतीं ताम् ।
पत्या सार्धं नरपतिपदे स्वागतं व्याहरामः ।। ६ ।।

लब्धाऽतीते यदिह यशसो भा, रतं तत्र भूयाः ।
वर्षं ह्येतन्नवदिनसमं शं व्रजत्वादिसृष्टेः ।।
बालस्येन्दोरिव दिनमणेस्ते गुणौ यान्तु लोकाः ।
उच्चस्थानं व्रज जगति ते स्वागतं व्याहरामः ।। ७ ।।

* * *

कुमारेश
लिवर और पेट की बीमारियों में
सालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न मानुषाच्छ्रेष्ठतरं हि किंचित्"

(ले० शिवसागरत्रिपाठी, एम० ए०, साहित्याचार्यः, जयपुरम्)

महर्षिकृष्णद्वैपायनस्य श्रीमन्महाभारताख्ये वीरकाव्ये सन्ति सहस्रशः सूक्तिमुक्ताः, तास्वैवान्यतमैषा सूक्तिः। मानवधर्मव्याख्याकर्त्रा तेन सूक्तं यत्परिवर्तिनि नानायोनिसमुत्पन्नजीवभरेऽस्मिन् जगति कर्मभूमित्वोत्तरदायित्वसहृदयताविवेकबुद्धिप्रभृतिभिः काभिश्चित्प्रातिस्विकीभिर्विशेषताभिर्ज्ञानविज्ञानकेन्द्रबिन्दुर्मानव एव श्रेष्ठतमः। यथोक्तं मानवधर्मशास्त्रे—

"भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठा...................... ...।।"[२]

यं विरचय्य प्रजापतिरतिमुदं लेभे। यत एषः स्वप्रज्ञाबलेन ज्ञानकर्मोपासनादिसाधनैश्च परमेश्वरदत्तशक्तीनां पूर्णविकासं कृत्वा प्रभुमक्षुण्णसुखञ्च प्राप्तुं जीवन्मुक्तो वा भवितुं शक्नोति। यथा श्रीमद्भागवते—

"सृष्ट्वा पुराणि विविधात्मजयात्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः।।[३]

महर्षिवेदव्यासेन महाभारते लोकोत्तरसत्यमिदमित्थमुद्घोषितम्—

"गुह्यं ब्रह्म तदिदं ब्रवीमि
न हि मानुषाच्छ्रेष्ठतरं हि किञ्चित्।[४]

यद्यप्याचार्यैः जनजीवने परिवारगतसौख्याय, देवानामभिप्रीतये समाजहितार्थञ्च पितृदेवर्षिरूपत्रयाणामृणानामेव महत्ता प्रतिपादिता, परमेतेन महामुनिना व्यासेन मानवमात्रशर्मणे चतुर्थं मनुजर्णमपि सर्वोपरि स्वीकृतम्—

"ऋणैश्चतुर्भिः सार्धं जायन्ते मानवा भुवि।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः।।[५]

अपि च तेन प्रथममेव मङ्गलाचरणे नारायणरूपेण मानवस्यैव वन्दना कृतैवम्—

"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।"[६]

यतो महाग्रन्थेऽस्मिन् प्रधाननायकौ नरनारायणावतारभूतौ, यौ चैकतत्त्वस्वरूपावेव "नारायणो नरश्चैव तत्वमेकं द्विधा कृतमिति।" यथा नारायणस्य महिमा 'नर एव नारस्तेषामयनं नारायण' इति मानवगुणसंवलितः सन् चरितार्थो भवति, तथैव नरोऽपि नारायणीं शक्तिमवलम्ब्यैव जगति सफलतां प्राप्नोति। अत एवैषः परमेश्वरांशरूपेणापि व्याख्यातः। बाइबिलाख्यख्रिष्टधर्मग्रन्थे परमात्मतुल्यः कुरानशरीफे चाल्लप्रतिनिधिस्वरूप एव निर्दिष्टः।

यद्यपि मनुष्येतरप्राणिषु वर्तमानाः (यथा कुक्कुरेषु स्वामिभक्तिः, भ्रमरेषु रसग्रहणशक्तिः काकेषूपार्जिताहारं समं विभज्य भक्षणप्रवृत्तिः, गोपु

१. महाभारतं-हंसगीता २९९।२०। २ मनुस्मृतिः १।९६ ३. श्रीमद्भागवतम् ११।९।२८। ४. महाभारते-शान्तिपर्वणि १८०।१२। ५ महा० आदि० १२।१८। ६. महा० आदि० १।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोजन के बाद
दिन में दो बार..
सभी ऋतु में
स्वास्थ्य लाभ का
श्रेष्ठ साधन

दो चमच मृतसंजीवनी के साथ चार चमच महाद्रक्षारिष्ट (६ सालका पुराना) सेवन करने से आपकी स्वास्थ्य का शीघ्रही उन्नति होगा।

पुराना महाद्राक्षारिष्ट फुसफुस को शक्तिशाली और सर्दी, खासि, खास वगरह रोग निवारण करने मे अत्यधिक फलप्रद है। मृतसंजीवनी भुक और हजम शक्ति वर्धक और वलकारक टनिक है। दोनो दवा एक साथ सेवन करने आपका शरिर का वजन और शक्ति वढ़ाता है। मनमे उत्साह और उद्दीपना का संचार करेगा और नवलक्त स्वास्थ और कर्मशक्ति दीर्घ समय तक अटुट रखता है।



साधना औषधालय

विश्व का सर्वश्रेष्ठ | ढाका | आयुर्वेद प्रतिष्ठान–

कलकत्ता केन्द्र :
डा. नरेशचन्द्र घोष एम. बी. बी. एस.,
आयुर्वेद- आचार्य
३६, सेआलपारा रोड, कलकत्ता-३७

अध्यक्ष : डा. योगेशचन्द्र घोष, एम. ए.
आयुर्वेद- शास्त्री, एफ. सी. एस. (लन्दन),
एम.सी.एस. (अमेरिका) भागलपुर कालेज
के भूतपूर्व रसायनशास्त्र के प्रोफेसर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोपकारिता, पिपीलिकासु च कर्मतत्परता) प्रभृत्यनेकगुणाः दरीदृश्यन्ते; रामायणेऽपि परोपकार्थं श्रमं कृत्वा मरणासन्नं जटायुषं निमित्तीकृत्येयं प्रशंसा कृता भगवता रामेण—

"सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः ।
शूराः शरण्याः सौमित्रे ! तिर्यग्योनिगतेष्वपि।।[७]

तथाप्येतेषां गुणानां समवायरूपेणैकत्र संस्थितिर्मानव एवाशास्यते । महर्षिपराशरेण ये भगवद्दत्ता मानवगुणा वर्णिता :—

"चित्तप्रसादबलरूपतपांसि मेधा-
मायुष्यशौचसुभगत्वमरोगिता च ।
ओजस्वितां त्विषमदात् पुरुषस्य चीर्णं
स्नानं यशो विभवसौख्यमलोलुपत्वम् ।।[८]

तेषां समानाधिकरण्यं श्रद्धासमन्विता बुद्धिश्च यत्र विद्यते, स पुरुषोत्तमः "महात्मा वेति कथ्यते, यश्च श्रीराम–कृष्ण-बुद्ध–महावीर–सेण्टफ्रांसिस–क्राइष्ट-कनफ्यूशियसविवेकानन्द-गान्धिस्वरूपेषु समये समय आगत्य मानवतां प्रतिपादयति, यस्य चानुपदं गच्छन्नेव मानवो जीवनसाफल्यमैहिकामुष्मिकं लभते । परमिदमवश्यमेव ध्येयं यद् "यस्य छाया अमृतं यस्य मृत्युः[९]" इत्यमृतमृत्युस्वरूपे साम्प्रतिकमनोविज्ञानानुसारन्तु रक्षिकानाशिकास्वरूपे वा द्वे प्रवृत्ती व्यष्टौ (समष्टावपि) भवतः । एते परिचय्य कर्मभूमौ व्यवहर्तव्यं तदैव मानवस्य सत्स्वरूपं प्रकटीभविष्यति । 'रामादिवद्वर्तितव्यं न रावणा-[१०]द्विवदिति रामायणस्य 'युधिष्ठिरादिवद्वर्तितव्यं न दुर्योधनादिवदिति'[११] महाभारतस्य चार्थवादयोरपि तात्पर्यमिदमेव ।

मानवशब्दस्य व्युत्पत्तिपरकोऽर्थोऽपीदमेव पोषयति । 'मन्यते जानाति दिव्यदृष्ट्या स्थावरजङ्गमात्मकं सकलं जगददृश्यं धर्माधर्मादिकञ्च यः स मनुः । यद्वा मन्यते चोदनालक्षणोऽर्थो धर्म इति जैमिनिसूत्रबोधितं विहितं पुण्यजनकं निषिद्धं पापजनकञ्च सर्वं कर्म यः स मनुः ।' मनोरपत्यं पुमान् मानवः, मनोर्जातः मनुजश्च । वेदनिरुक्त्यादिग्रन्थास्तु 'मत्वा कर्माणि सीव्यन्तीति'[१२] 'मादुषमेव सन्तं परीक्षेण मानुषमित्याचक्षते'[१३] इति कृत्वा तत्र बुद्धि दोषराहित्यञ्च प्रतिपादयन्ति । अर्थाद् यः प्रज्ञाबलमधिकृत्य निर्दुष्टो भूत्वा मन्वादिमहर्षिप्रणीतेन मार्गेण व्यवहरति, स एव मानवः । तस्य भावः कर्म वा मानवता । यश्च मानवताविपरीतमाचरति स शास्त्रीयव्यांख्यया 'माणव' इति व्युत्पद्यते—

"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः ।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ।"[१४]

सम्प्रति तु भौतिकवादग्रस्तस्याणुबमोद्जनबमदूरमारकादिमहायुधविभीषिकाकलुषस्य जगतो वातावरणे मानवो माणवो भूत्वैव स्वालङ्कारभूतां प्रज्ञां दुरुपयुङ्क्ते, समस्तसामाजिकनैतिकाध्यात्मिकराजनीतिकविधानानि तिरस्करोति, युद्धं वीरवृत्तमिति प्रशंसति, मानवतां प्रति च सम्मानगौरवयोर्महतो लक्ष्यात् परिभ्रष्टो भूत्वा जन्यजन्यं वैशसञ्च विस्मृत्य तृतीयाय महाहवाय प्रयतते । यान्त्रिकाणविकशक्तिप्रापणमेव तस्य प्रधानं लक्ष्यम् । फलत-

७. रामायणेऽरण्यकाण्डे ६८।२ ८. पराशरस्मृतौ । ९. चरकः १०।१०।१२१ । १०. काव्यप्रकाशे ताण्ड्ये च ८।२।१० ११. नीलकण्ठः महाभारते । १२. निरुक्ते ३।२।१ । १३. ऐतरेयं ३:३३ । १४. काशिकासूत्रवृत्तौ ४।१।१६१ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तथाकथितामुन्नतिं विधायापि सः क्रूरतापरपीडन-परद्रव्यापहरणान्धविश्वासैर्न मुक्तः। नूनमेवैतत्तस्य स्थूलं मर्त्यरूपं यत्र क्षुद्रं मोहात्मकं हृदयदौर्बल्यं स्वार्थलिप्सेर्ष्यादीनाञ्च प्राज्यं राज्यं दृश्यते। विश्वस्य वास्तविकोन्नत्यं न भविष्यत्यस्यांशतोऽपि योगः। इदन्त्ववसेयं यदपरोऽपि सूक्ष्मरूपोऽमृतस्वरूपो देवतात्मा हृदि तिष्ठति—

"अंगुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः।"[१५]

यः पुरि शरीरे शयान एव सत्यमार्गं प्रदर्शयति। अतो विश्वोन्नत्यायमृतत्वप्राप्त्यै च स एव मन्तव्य उत्थातव्यश्च। उक्तञ्च—

"एष देवो विश्वकर्म्मा महात्मा
सदा जनानां हृदये सन्निविष्टः।
हृदा मनीषा मनसाभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति॥[१६]

अतो वैज्ञानिकेऽस्मिन्युगेऽपि मानवस्य विकसितायाः बुद्धिशक्तेरुपरि नैतिकताया आध्यात्मिकतायाश्च सुदृढनियन्त्रणं परमावश्यकम्। तदैव विश्वमानवस्य विश्वबन्धुत्वस्य तदनन्तरं विश्वशान्तेश्च स्वप्नः साकारो भविष्यति। अद्य सर्वैं राजनयज्ञैः प्रतिक्षणमनुभूयत एकमानवधर्मस्यैकमानवराष्ट्रस्यैकमानवसंस्कृतेश्च महत्यावश्यकता। तत्पूर्तये संयुक्तराष्ट्रसंघेन अष्टचत्वारिंशदुत्तरोनविंशतितमे[१७] ख्रिष्टाब्दे दिसम्बरमासस्य दशतारिकायां प्रस्थापितो मानवसार्वभौमोन्नतेः प्रतीकः प्रेरणादायकश्च 'मानवाधिकारदिवसः' प्रतिवर्षमनेकैं राष्ट्रैरत्युत्साहपूर्वकं मान्यते; परं सिद्धान्तत एव न व्यवहारतः।

वस्तुतो मानवजातेरेकपरिवारो खल्वसम्भवो नास्ति, परन्तत्र निर्जीवसमानतायाः कल्पना न कर्तव्या, विविधता तु चिरस्थायिनी, यतो देशकालवैशिष्ट्यं परम्परावैशिष्ट्यं वा तु स्वाभाविकम्। अतो 'वसुधैव कुटुम्बकं" 'वाराणसी मेदिनी' 'स्वदेशो भुवनत्रय'ञ्चेति भारतीयपरम्परया प्राप्तामसङ्कीर्णराष्ट्रियतामधिकृत्यैव सर्वे देशाः स्ववैशिष्ट्यैः सार्धमेव विकासं कुर्युः, परस्परञ्च न्यायसत्ययोर्पक्षमवलम्ब्य सहकारिणो भवेयुः। अपि च 'सर्वेषु दानेष्वभयप्रदानमिति स्मृत्वात्मरक्षासाधनानां विकासेन सह राष्ट्रेभ्योऽभयदानेन, क्षात्रधर्मेण साकं ब्रह्मधर्मविकसनेन निर्बलेभ्यश्च साहाय्यप्रदानेन तेषामुन्नतिस्तथा विधेया, यथा ते राज्यलिप्सायाः केन्द्रा न भवेयुस्तदैवाद्यतनाः कर्तव्यविमुखाधिकारविषयकाः स्वार्थलिप्ताः सर्वे संघर्षाः शान्ता भविष्यन्ति, मानवजातेः गौरवो भविष्यति। तथा च मानुषः स्वश्रेष्ठतमं स्थानमखिलब्रह्माण्डे प्रतिष्ठापितुं शक्ष्यति। अतो 'भूयाद्विश्वस्य मङ्गल'मिति भावनां स्वीकृत्य मानवमात्रस्येयं कामना भवेत्—

"पुमान् पुमांसं परिपातु विश्वतः।[१८]

अपि च—

"भद्रं भद्रं सर्वतो नः समेयाद्
भद्रा वाचः सुमनसो वदेम।
भद्रं मनो भद्रकामाय भूयात्
कामे कामे नो भद्रं विरोचताम्॥

★ ★ ★

१५. काठकोपनिषदि २।६।१७। १६. श्वेताश्वतरोपनिषदि ४।१७।१६. १६०८ ई०। १७. ऋक् ६।७५।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षा और



विकास का काम



साथ साथ चलता है

देश की विकास योजनाएं हमारी रक्षा-व्यवस्था का अभिन्न अंग हैं। संकट का सामना करने के लिए नई प्राथमिकताएं निश्चित की गई हैं और बिजली योजनाओं, इस्पात, मशीन, मशीनी औजार, बिजली का साज-सामान, कोयला खनन, रेलवे जैसे बुनियादी उद्योगों, इंजीनियरी और चिकित्सा कर्मचारियों के प्रशिक्षण कार्यक्रमों पर तेजी से अमल करने की व्यवस्था की गई है।

शक्ति की ठोस बुनियाद पर ही रक्षा की तैयारी निर्भर करती है। यही हमारी समस्या का एकमात्र हल है।

इस कार्य में मन, वचन और कर्म से पूरा पूरा सहयोग दीजिए। भारत के करोड़ों नागरिकों की निरन्तर और निस्वार्थ सेवा-भावना और कठोर परिश्रम से ही देश की रक्षा-सामर्थ्य बढ़ सकती है।

योजना को
सफल
बनाइये

भारत की रक्षा-व्यवस्था को सुदृढ़ कीजिए

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

डी एन/१२४

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिश्चन्द्रनाटकम्

(ले०—पं० श्रीदामोदरात्मजगोविन्दप्रसादशर्मणा शास्त्रिणा दाधीचेननिर्मितम्।)

नान्दी—सत्येन संदीव्यति दृश्यमेतत्

सत्यं सदा पाति दधाति विश्वम् ।

सत्यं परब्रह्म तपश्च धर्मः

सत्याय तस्मै सततं नमोस्तु ॥१॥

सूत्रधारः—आर्ये ! यदि नेपथ्यकार्यं संपादितम्, तर्हि इत आगम्यताम् ।

नटी—आर्य ! इयमस्मि ।

सूत्रधारः—अस्यां विद्वन्मण्डितसभायां सभ्यानां हिताय संस्कृतमातृभाषायाः प्रचाराय प्रसाराय बालक-बालिकानां सुखेन बोधाय सरलसंस्कृत-भाषायां सत्यप्रभावोत्पादकं राज्ञो हरिश्चंद्रस्य नाटक-मुपस्थातव्यमस्माभिः ।

नटी—यदाज्ञापयति आर्यः ।

सूत्रधारः—आर्ये ! पूर्वं त्वया कलिमलमलि-नान्तःकरणानमलीकर्तुं परमेश्वरस्य किमपि गीतं गेयम् ।

नटी—तथा । (गायति)

जय जय विश्वविहारिन् जनबंधनसंहारिन् !

हरिजिनबुद्धखुदेशा निखिलाश्च तवैवांशाः ॥

त्वयि निवसन्ति च लोका लघुशून्यसमानाङ्काः ।

जगदुदयस्थितिनाशं कुरुषे हरसे त्रासम् ॥

हरिजनगौरवदाता भाग्यविधाता जन्तो–

स्तव पदयोर्निपतामः शरणं भगवन् ! यामः ॥

सूत्रधारः—आर्ये ! साधु गीतं त्वया । अत्र सभायां तव परमात्मवंदनायां दत्तचित्तानां सभ्यानां समुद्भूतसत्वगुणाऽलङ्कृतान्तःकरणेषु सत्यं द्रष्टुं [illegible] जागृता संजाता ।

नटी—उपकृताऽस्मि आर्येण ।

(द्वावेव निष्क्रान्तौ)

(इन्द्रसभायां सर्वे देवाः ऋषिमुनयश्चोपविष्टाः सन्ति)

नारदः—देवेन्द्र ! सांप्रतं मृत्युलोके प्रजापालकः सत्यवादी सच्चरित्रो धर्मात्मा राजा हरिश्चन्द्रोऽस्ति।

इन्द्रः—श्रुतपूर्वः स मया ।

वसिष्ठः—मघवन् ! नारदेन सत्यमुक्तम् । राजा हरिश्चन्द्रोऽतीवसत्यवादी धर्मात्मा मम शिष्योऽस्ति

विश्वामित्रः—सुरपते ! नारदस्तु राज्ञः स्वागतेन तद्यशांसि गायति । वसिष्ठोऽपि राज्ञः पुरोहित-त्वात् तं प्रशंसति । इह जगति धनयौवनराज्यमदेन कोऽपि पुरुषः सत्यवादी धर्मात्मा वा दृष्टिपथं नायाति ।

वसिष्ठः—भगवन् ! भवता स परीक्षणीयः ।

इन्द्रः—राजर्षे ! सोऽस्माभिः परीक्षणीयः । भवतापि ब्राह्मणरूपधारिणा तत्र गंतव्यम् । अस्मा-भिर्नानारूपधारिभिस्तत्परीक्षार्थं यास्यते ।

(सर्वे निष्क्रान्ताः)

(एकदा रात्रौ स्वप्नावस्थायां राज्ञा एकस्मै ब्राह्मणाय राज्यं दत्तम् । प्रातरुत्थाय स्वराज्ञीं कथयति)

राजा—प्रिये ! रात्रौ मया स्वप्ने एकस्मै ब्राह्म-णाय समग्रं राज्यं दत्तम् । स यावन्नागच्छति तावन्न खादिष्यामि न च पास्यामि ।

शैब्या—स्वामिन् ! भवता सत्यं पालनीयम् । स ब्राह्मणो [illegible] भवता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा—(सभायां प्रधानसचिवं कथयति) मंत्रिन् ! मया स्वप्ने राज्यं दत्तम् कस्मैश्चिद्ब्राह्मणाय । अतस्त्वया सोऽन्वेष्टव्यः ।

मुख्यमंत्री—यदाज्ञापयति महाराजः । (तेन प्रेषितो दूतः)

(अत्रान्तरे एको ब्राह्मणः समायाति)

ब्राह्मणः—द्वारपाल ! निवेदय राजानम् ।

द्वारपालः—यदाज्ञापयति देवः । (निवेदयति) महाराज ! कोऽपि ब्राह्मणो द्वारि तिष्ठति ।

राजा—प्रवेशय शीघ्रम् । (प्रवेशयति)

ब्राह्मणः—स्वस्ति ते भूयात् ।

राजा—अभिवादये भवन्तम् । पूर्वमाज्ञापयतु देवः ।

ब्राह्मणः—त्वया स्वप्नावस्थायां राज्यं दत्तम् । सोऽहमेव ब्राह्मणोऽस्मि । दीयतां मदीयं राज्यम् ।

राजा—तपस्विन् ! पूर्वमेव मया भवंतमन्वेष्टुं गुप्तचरः प्रेषितः । इदानीं स्वयमेव भवान् समागतोऽस्ति । भवता गृह्यतां राज्यमेतत् ।

ब्राह्मणः—(राज्यं गृह्णाति वदति च) सत्यमूर्ते ! त्वया दाने राज्यं दत्तम् । परं च दानदक्षिणा न प्रदत्ता । विना दानदक्षिणां दानं सफलं न भवति ! अतो मह्यं दाने सहस्रसुवर्णमुद्रा देहि ।

राजा—महात्मन् ! विस्मृतं मया । क्षम्यताम् । अधुनैव ददे दानदक्षिणामपि ।

(राजा कोषाधिकारिणं समाह्वयति)

कोषाधिकारी—(राजानमुपेत्य) आज्ञापयतु स्वामी ।

राजा—कोषाधिपते ! अधुनैव कोषात् सहस्रसुवर्णमुद्रा अस्मै ब्राह्मणाय देहि ।

कोषाधिकारी—यदाज्ञापयति महाराजः ।

ब्राह्मणः—सत्यवादिन् ! इदानीमसत्यवादिवत् त्वमाचरसि । किं न जानासि । अस्य राजस्य वस्तुमात्रं ममैवास्ति । तव किमपि नास्ति । पुनः कथं कोषात् सहस्रसुवर्णमुद्राः आनाययसि ।

राजा—विप्रवर ! सत्यमुक्तं भवता । व्यस्मरम् । क्षम्यताम् । निषेधितः कोषाध्यक्षो मया ।

ब्राह्मणः—राजन् ! अस्मिन्नेव क्षणे तव समीपे महिष्याः समीपे वा यावद्वस्तूनि राज्यचिह्नानि भवेयुः तानि प्रदाय मम नगरात् बहिरन्यत्र सपरिवार स्त्वं निर्गच्छ ; अन्यथा स्वकीयसत्यप्रतिज्ञां विसृज्य पुनः राज्यं लभस्व, राज्यसुखं च भुंग्धि । व्यर्थं किमर्थं कष्टमनुभवसि ।

राजा—विप्रवर ! एवं मा वद । एतानि धृतानि राज्यवस्तूनि गृहाण । अधुनैव नगरमपि त्यजामि । श्रूयताम्—

भार्या च पुत्रश्च सुखं च राज्यं
पुण्यं तथा बांधवमित्रसंघः ।
धान्यं धनं नश्यतु मद्रपुर्वा
सत्यं परं मे न कदापि नश्येत् ॥

(राजा साधारणवस्त्रं धृत्वा अन्तःपुरं प्रविशति)

शैब्या—(राजानं विलोक्य) आह कष्टम् ! स्वामिनं राजवेशभूषितं न पश्यामि । हा दैव ! एतत् त्वया किं कृतम् । एकदाऽसौ राजा सुरपतिरिव भूमंडलस्य शास्तासीत्, सोऽद्यराज्यहीनो वस्त्रहीनश्च क्षुत्पिपासितोऽस्ति । (रोदिति)

राजा—प्रिये ! त्वं तु वीराङ्गना । पुनः कथं रोदिषि । मा रोदिहि । मा शोचय । विधात्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ललाटे यल्लिखितं तन्निवारयितुं कः क्षमः। अतो धैर्यं धर।

शैब्या—स्वामिन्! धैर्यं धरामि। नित्यं प्रतिक्षणं परमेश्वरं प्रार्थयामि यन्मे प्राणनाथश्चिरं जीवतु। राज्यदानात् अद्यावधि भवता किमपि न भुक्तं, न च पीतम्। अद्य तु भुज्यतां पीयतां च।

राजा—शैब्ये? अत्रास्माकं भक्ष्यं, चर्व्यं, चोष्यं, पेयं किमपि वस्तु नास्ति। एतत् सर्वं तपस्विनो ब्राह्मणस्यास्ति।

शैब्या—प्राणपते! सत्यमुक्तं भवता। अत्रास्माभिर्वासोपि न करणीयः।

राजा—प्राणप्रिये! आदिष्टोऽहं ब्राह्मणेन यत् सपरिवारस्त्वं नगराद् बहिर्निर्गच्छेति। अतोऽहं नगरं विहाय अन्यत्र गच्छामि। यत्र कुत्रापि वृत्तिं विधाय ब्राह्मणाय दक्षिणां दास्यामि। अतो भवती रोहिताश्वेन सह मातृगृहं यातु। तत्र च सुखेन निवसतु।

शैब्या—स्वामिन्! भवान् अनया वाचा मे हृदयं न वेधयतु। यत्र पतिस्तत्र पत्नी निवसति। श्रूयताम्। भगवन् इयं दासी तु भवता सहैव चलिष्यति—

गंधस्तु पृथ्वीं खमिदं तु शब्दः
स्पर्शस्तु वायुं सलिलं च शैत्यम्।
धूमोऽनलं सर्वमिमे त्यजेयु-
र्हातुं न शक्नोमि पतिं क्षणं मे ॥६॥

राजा—प्रिये! यदि कामय मे तर्हि शीघ्रं चल। किन्तु रोहिताश्वं तु मातुलगृहं प्रेषय।

रोहिताश्वः—आर्यपितरौ! अहमपि युवाभ्यां सह चलिष्यामि। अन्यथा मरिष्यामि। श्रूयतां मम निवेदनम्—

माता पिता यत्र निवत्स्यतो वै
तत्रैव वत्स्यामि युवां प्रपूज्यौ।
सेवां करिष्यामि पदाम्बुजानां
मंस्ये तदाऽहं मम पुत्रतेति ॥७॥

राजा—पुत्र। त्वमपि चल। अतिवेला संजाता। अतो वयं त्वरितं नगराद्बहिर्निर्गच्छेम।

(सर्वे यान्ति)

प्रथमदृश्यं समाप्तम्।

(क्रमशः)

सधन्यवादम्—

फोर्ट ग्लास्टर
इंडस्ट्रीज लिमिटेड
उत्तमप्रकारक जूट, टाट एवं
बोरकवस्त्र-
निर्माता
मैनेजिंग एजेन्ट्सः—
केटलवेल बुलन एण्ड
कम्पनी, लिमिटेड
२१ स्ट्रान्ड रोड,
टेलीफोन—२२-४६०१-५ टेलीग्राम—केटबुलन
कलकत्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देश-विदेश-वार्ता

अखिलभारतीय-संस्कृत-साहित्यसम्मेलनेन समायोजितायां संस्कृतविचारगोष्ठ्यां साभापत्यपदमलङ्कुर्वतो डॉ० श्रीसम्पूर्णानन्दराज्यपालमहाभागस्य भाषणस्य तथा तस्या उद्घाटनमाचरतः श्रीलालबहादुरशास्त्रिणश्च भाषणस्य सारः



गत-नवम्बरमासस्य २ दिनेऽत्र राजस्थानस्य राजधान्यां जयपुरपुर्यां संस्कृत-विचारगोष्ठ्या-मध्यक्षपदाद् राज्यपालः समभाषत यत् संप्रति देशे संस्कृतस्य याः परीक्षाः समायोजिता भवन्ति, तास्वेकरूपतायाः सम्पादनं परमावश्यकं वर्तते । गोष्ठ्याश्चास्याः समुद्घाटनं भूतपूर्वगृहमन्त्रिणा श्रीलालबहादुरशास्त्रिणा विहितम् । अवसरे चास्मिन् श्री शास्त्रिमहोदयायाऽभिनन्दनपत्रमपि समर्प्यत ।

डॉ० श्रीसम्पूर्णानन्दमहाभागेन भाषमाणेन प्रतिपादितं यत् संस्कृतविद्वांसः संस्कृतशिक्षाया एकरूपतां प्रति ध्यानं दद्युः । कार्यमिदमति स्वाभाविकं विद्यते । विशेषतया च जयपुरनगर-मिदं संस्कृताध्ययनाध्यापनविषये प्रतिष्ठितं केन्द्र-मवर्तत । अत्रत्यैरनेकैर्विद्वद्भिः संस्कृतस्य सुमहती सेवाऽक्रियत । संस्कृतस्य च प्रारम्भादेव देशे तथा समाजे च विशिष्टं स्थानमविद्यत । किञ्च प्रत्येक-ग्रामेऽद्यापि स्वल्पस्याधिकस्य वा संस्कृतस्याभिज्ञो जनोऽवश्यं प्राप्यत एव । एवं सुप्राचीनात् कालादेव संस्कृतं राष्ट्रभाषायाः कार्यं कुर्वद् वर्तते । एवं यदि देशस्यास्य राष्ट्रभाषा संस्कृतमेव भवेत् तदा तु भाषा-विषयकः संप्रति योऽयं विवादः प्रचलन् वर्तते, सोऽपि समाप्तिं गच्छेत् । अपि च 'संस्कृतमतिकठिनं विद्यते' इत्युक्त्वा 'संस्कृतज्ञा एव संस्कृतस्य महतीं क्षतिमुपजनयन्ति । एष हि महान् भ्रमो वर्तते यत् संस्कृतं काचित् कठिना भाषाऽस्तीति । अतः संस्कृतभाषायाश्चास्याः साधारणजनतायामपि प्रसा-रस्य महती वर्तते सांप्रतमावश्यकता । एतदर्थञ्च विद्वांसः स्वल्पमतिरिक्तं समयं निष्कास्य जनान् संस्कृतं पाठयेयुः' इति । अग्रे च प्रतिपादितं श्रीराज्यपालेन यत् संस्कृते शोधकार्यं यद् भवति, तस्य मूल्याङ्कनमप्यत्यावश्यकमस्ति ! यतो हि प्रायोऽद्यत्वे यो ऽपि विद्याभ्यासानुविहितः प्रबन्धः (थीसिस)-THESIS लिख्यते, तत्रार्धं साहित्यं-तु व्यर्थकार्गलातिरिक्तमन्यत् न किमपि भवति ।

अपि च येषां विदुषां सविधे प्राचीनं पूर्वपुरुषो-पार्जितं ज्ञानं सञ्चितमास्ते, तस्यापि संस्करणं भवेत्, अन्यथा तैः सह तज्ज्ञानमपि विनङ्क्ष्यति । किञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य प्रचाराय प्रसाराय तथा सुरक्षणाय च वेदस्याऽध्ययनाध्यापनयोरपि महत्यावश्यकता वर्तते। यथा हि वृक्षस्य मूलस्य सेचनेन तस्य शाखापल्लवादीनां स्वयमेव सिध्यति। एवमेवान्यशास्त्राध्ययनाध्यापनापेक्षया वेदस्याध्ययनाध्यापनयोरधिकतया प्रयत्नः समनुष्ठेयः। एवञ्च यजुर्वेदसंहितायाः ४०तमाध्यायस्य मन्त्रद्वयस्य व्याख्यानरूपमेवास्ति गीताभिधं पुस्तकम्। अतः सुरक्षितादेकस्माद् वेदादनेका गीता भवितुं शक्नुवन्ति, न पुनर्गीतायास्तावदेकोऽपि वेदः। अत एव 'प्रधाने कृतः प्रयत्नः फलभाग् भवति' इति सिद्धान्तः स्थिरीभवति।'

श्रीलालबहादुरशास्त्रिणो भाषणम्

श्रीशास्त्रिमहाभागेन भाषितम्–यत् महात्मनो गान्धेः कथनमस्मि यत् सर्वोऽपि हिन्दुबालकः संस्कृतं जानीयात्। संस्कृतस्य ज्ञानेन च विना हिन्दुधर्मस्य रहस्यं स न कथमपि विज्ञातुं प्रभवति इति। अग्रे च भणितं श्रीशास्त्रिवर्येण पुरा सर्वेऽपि भारतवासिनो जनाः संस्कृतं जानन्ति स्म' इति न सत्यं प्रतीयते। अपि तु तस्मिन् समये संस्कृतभाषा जनभाषा न भूत्वा देशस्य विभिन्ननां भागानामेकतायाः सूत्रे संयोजन-कर्मणि शृङ्खलारूपेणावश्यं स्थिता भवेत्। यथाऽद्य केवलं प्रतिशतं द्वित्रा जना आंग्लभाषां जानन्ति, पुनरपि साऽखिलं भारतमेकतासूत्रे बध्नाति। शास्त्रिणैतदप्युक्तम्–यत् संस्कृतस्य न केवलं भारते एवासीत् प्रचारः अपितु देशान्तरेष्वपि स समभूत्। किञ्च संस्कृतस्याऽध्ययनार्थं रात्रिशाला अपि संस्थाप्याः सन्ति' इति।

श्रीगाडगिलस्य भाषणम्

पञ्चनदस्य भूतपूर्वो राज्यपालः श्रीनरहरिविष्णुगाडगिलमहाभहाभागः सम्मेलनस्य कार्यवाहकाध्यक्षः स्वभाषणेऽभाषत यदत्यधिकसंख्यायां जनाः संस्कृतं पठेयुः, अध्ययने चाऽस्य यत्काठिन्यं समापतति तद् दूरीकरणीयम्। किञ्चावसरेऽस्मिन् भारती-संस्कृत-मासिक-प्रदर्शन्यास्तथा वैदिकप्रदर्शन्याश्चानेन महाभागेन 'समुद्घाटनं कृतम्। विधानसभासदस्यः श्रीस्वरूपनारायणपुरोहितमहाभागः १७१३ तमे ईसवीयाऽब्दे लिखिता महाभारतस्यैका हस्तलिखिता प्रतिलिपिः देहल्यां समुद्घाटितस्य राजेन्द्रपुस्तकालयस्य कृते श्रीलालबहादुरशास्त्रिणे सादरं समर्पितवान्।

श्रीहरिभाऊः–उपाध्यायः

प्रारम्भे सम्मेलनस्य स्वागताध्यक्षः श्रीहरिभाऊः उपाध्यायः स्वागतभाषणं पठितवान्; स्वभाषणे च सम्यगेतत्साधितवान् यत्-'भारतस्य संस्कृतयाः सभ्यतायाश्च परिचयार्थं संस्कृतस्य ज्ञानं परमावश्यकं विद्यते-इति।

महामन्त्री मण्डनमिश्रः

श्रीमण्डनमिश्रश्च गोष्ठ्या उद्देश्यान्यधिकृत्य समभाषत यत् सर्वेषामेव राज्यानां संप्राप्ताः संस्कृतविद्वांसः संप्रति संस्कृत–संबन्धि–समस्यासु दश–दलेषु विभाजिता भूत्वा सन्ति विचार–परायणाः' इति शम्।

× × ×

हिमाञ्चलप्रदेशस्य लोहौलाख्ये स्पितीनाम्नि च क्षेत्रे १९६१ तमेऽब्दे केवलं द्वौ यवनौ आस्ताम्, परमद्य तत्र सहस्रमेकं यवना वर्तन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवाजी

वैद्यराज श्रीकन्हैयालाल भेड़ा बम्बई,

हिन्दुसंस्कृतिसुरक्षणवीरो
म्लेच्छमूर्च्छनकृते बहुधीरः ।
देशलुण्ठककृतेऽग्निसमीरः
स्मर्यतामनुदिनं शिववीरः ॥

अविरलमदधाराधौतकुम्भः शरण्यः
फणिवरवृतगात्रः सिद्धसाध्यादिवन्द्यः ।
त्रिभुवनजनविघ्नध्वान्तविध्वंसदक्षो
वितरतु गजवक्त्रः संततं मङ्गलं वः ॥१॥

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाड्,
विघ्नव्यालकुलाभियानगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाम्बुधौ वाडवो
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु वः ॥

भगवतो भक्तजनकल्पवृक्षस्य, अमन्दानन्द-संदोहसुन्दरस्य जगदालम्बस्य, प्रत्यूहतिमिराच्छेदः, मोक्षाद्यनेकवस्तुप्रदातुः, अभिप्रेतार्थसिद्धिदस्य, अचिन्त्यवैभवस्य, अपारकरुणापूरिततरङ्गितदृशः,

---

एवं भारते मुस्लिमजनानां संख्या संप्रति तीव्रगत्या तावती प्रवर्धमाना विद्यते यत्तस्याः गणनां कर्तुं याथातथ्येन न पारयामः । अत्र पाकिस्तानवासिनां यवनानां भारतेऽवैधः प्रवेश एव परमो हेतुः । उक्तस्यैतस्य रहस्यस्योद्घाटनं सांप्रतमेव जनसंघस्य महामन्त्री श्री दीनदयालोपाध्यायः कृतवान् ।

× × ×

इदानीमेव गतदिनेषु सम्पन्ने राजस्थानीयनगरपालिकानां निर्वाचने स्वतन्त्रदलपक्षो जयपुर-बांदीकुयीप्रभृतिनगरेषु मताधिक्यं प्राप्तवान्, तथा जनसंघश्च-उदयपुर-डीडवाणा-भिवानीमण्डीप्रभृति-नगरेषु ।

× × ×

जनवरीमासस्यागामिन्यां ३१ तारिकायां सरदारशहरे राजस्थानसंस्कृत-सम्मेलनस्यैकादशाधिवेशनमभूत्, यस्योद्घाटनं राजस्थानस्य राज्यपालः डॉ०श्रीसम्पूर्णानन्दमहाभागः कृतवान् ।

श्रूयते–राजस्थानसर्वकारः शिक्षासचिवः श्रीविष्णुदत्तमहाभागस्याध्यक्षतायामेकां समितिं संघटितवान्–या संस्कृत–विश्वविद्यालयस्य स्थापनाया विषये विचारं करिष्यति । विश्वविद्यालयेऽस्मिन् संस्कृतस्य माध्यमेन शिक्षा प्रदास्यते तथाऽऽयुर्वेदस्य विशिष्टो विभागः (फैकल्टी) अपि स्थास्यति ।

अस्यां समितौ–काशीस्थ-संस्कृतविश्वविद्यालयस्योपकुलपतिः श्री एस० एम० एन त्रिपाठी, राज्य-संस्कृत–सलाहकारबोर्डस्याऽध्यक्षः श्री एल० एल० जोशी, वैद्य–सीताराममिश्रः, राज्यस्य आयुर्वेदविभागस्य संस्कृतशिक्षियाश्च सञ्चालकौ तथा सर्वकारस्योपशिक्षासचिवः—एते सदस्याः सन्ति ।

**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्दुभूषणनन्दनस्य, सिद्धिविनायकस्य, श्रीगजाननस्य, महोत्सव–कार्यक्रमेषु दशदिनावधि भिन्न–भिन्नविषयेषु प्रत्यहं वारचतुष्टयं भवंति विपश्चिदपश्चिमानां विदुषां भाषणानि। मञ्जुलमङ्गलकार्याणि च।

अद्य तादृशगुणोपेतस्य भगवतो गणेशस्य, अल्पेतरया दयया "श्री शिवाजी महाराजस्य राजनीति" विषयमधिकृत्य किञ्चिद् वक्तुं भवतां पुरस्तात् समुपस्थितो ऽहम्।

अनाप्तपुण्योपचयैर्दुरापा,
फलस्य निर्धूतरजाः सवित्री।
तुल्याभवद्दर्शनसंपदेषा,
वृष्टेर्दिवो वीतबलाहकायाः॥

मान्याः! अस्मिन् खलु नानाविधप्राणिजनपरिपूर्णे विरंचिप्रपञ्चे, प्रत्यहं असंख्येयाः जनाः जायन्ते, जाताश्च कतिचिद्वर्षाणि अस्मिन् जगति चेष्टन्ते। व्यतीतेषु केषुचिद् वर्षेषु एकस्मिन् दिने पञ्चत्वमुपगच्छन्ति। को हि नाम विद्वान् जनः, एतेषां सत्वं सत्वमिति आकलयेत्। एते हि प्रातः संदृश्यमानाः सत्यमेव स्मरणीयामवस्थां प्राप्नुवन्ति। कतिविधाः कुवेरसदृशधनशालिनो नृपाः जाताः, किन्तु नामाऽपि एतेषां स्मरणपथं कस्यापि नारोहति। त एव जाताः इति कथ्यन्ते एषां कथाशेषतां यातेष्वपि भौतिकेषु देहेषु किमपि–अन्यदेव यशः-शरीरमासंसारंमाबालगोपालानां–रसनायां नित्यं नृत्यति। एतादृशं यशःशरीरं स्वप्रतिभाविलासेन व्यास – वाल्मीकि–कालिदास–भवभूति–प्रभृतिभिः लब्धम्। अन्येऽपि एषां केषाञ्चिन्नामानि जनानां रसनायां नृत्यन्ति, तत्रापि खलु तेषां विक्रम एव प्रधानं निदानम्। रामकृष्णादिभिः प्राचीनैरपि महापुरुषैः इथं प्रणाली अनुसृता। महाकवीनामपेक्षया एतेषां वीराणां तृणीकृत-स्वदेहानां योग्यता न कथमपि न्यूना, किन्तु अधिकैव।

यावत्कालपर्यन्तं भारतं स्यात् ' तावत्कालपर्यन्तमेतेषां नामानि न कोऽपि विस्मर्तुं शक्नुयात्। भारतस्येतिहासे एतेषां नामानि सुवर्णाक्षरैरेव अंकितानि स्युः।

भारतस्योतिहासः सूक्ष्मया दृशा अवलोक्यते चेत् यदा-कदा परकीयैः भारतमाक्रान्तं तदा-तदा-कश्चन-महात्मा-शरीरं जग्राह। गृहीत्वा च शरीरं दुःखितानां दुःखानि, पोड़ितानां पीडाश्च, सन्तप्तानां सन्तापाश्च, दूरीकृताः। रामकृष्णादयः तद्विरुद्धत्वेन रावणकंसादयश्च दृष्टान्तत्वेन वर्णयितुं शक्यन्तेऽस्माभिः।

ये च एतादृशाः स्वविक्रमेण भारतं समलङ्कुर्वन् तन्मध्यात् अद्य ये व्याख्यानविषयीभूतः छत्रपति श्रीशिवाजीमहाराजः" प्रधानत्वेन परिगणयितुं शक्यते। के वीराः इति गणनायां सत्यां सर्वेषां विदुषां-कनिष्ठिका अस्मिन्नेव महावीरे निपतति। अहो! मे भाग्यमेतादृशं महावीरमधिकृत्य किमपि वक्तुं मे अद्यावसरः अत्रत्यैः अधिकारिभिः प्रादायि। इति तेभ्यो धन्यवादान् वितरामि। एतस्य महावीरस्य शिवराजस्य यथामति वर्णनं कृत्वा आत्मानं पवित्रीकर्तुमभिलषामि। भवन्तोऽपि सर्वे-अस्य-वीरस्य-चरितश्रवणेन पूताः भवेयुः इति मे मनसि दृढो विश्वासः।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



डाबर आँवला केश तैल
केश शृङ्गार का अनुपम साधन

पुदीन-हरा
अजीर्ण, अरुचि में सेवनीय

काफ़
हैजे की शुरुआत में उपयोगी

सरवाईना
सर दर्द में मुफ़ीद

अबलारी
स्त्रियों के लिए परम उपयोगी

दन्तमुक्ता
दाँतों को मोती का आब देता है

लाल-शर
बच्चों का मधुर स्वास्थ्य-प्रद पेय

दब-दमा
दमे की तकलीफ़ में उपयोगी

डाबर बाम
दर्द, जले कटे में फ़ायदेमन्द

शुद्धता और स्वच्छता हमारा संकल्प है
समग्र राष्ट्र की लोक सेवा हमारा लक्ष्य है
आपका संतोष और प्रसन्नता हमारा धन है
पौन शताब्दी से भी अधिक से जनता का विश्वास
पानेवाला और राष्ट्र के कोटि-कोटि रोग
पीड़ितों की सेवा करने वाला एक मात्र प्रतिष्ठान

डाबर (डा० एस० के० बर्म्मन) प्रा० लि०, कलकत्ता-२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

स्वास्थ्यशिक्षा

(ले०—प्रो० आचार्य श्रीसुदेवचन्द्रपाराशरी, गवर्न० आयुर्वेदकालेजः, जयपुरम्)

अस्माकं प्रत्येकः समाजे निवसन् स्वात्मना समाजं प्रभावयति; समाजश्च तस्य घटिकानां व्यक्तीनामाचारव्यवहारं सम्यक् प्रतिबिम्बयत्येव। व्यवतेः समाजस्य च स्वास्थ्यं प्रत्येकस्मात् पृथक् कर्त्तुं नैव शक्यते। व्यक्तिः स्वात्मरक्षायै सर्वमपि वैयक्तिकं स्वस्थवृत्तं यथावदनुपालयति, परं तस्योपवासिनः (पड़ोसी) स्वास्थ्यनियमानामवहेलां कुर्वन्ति, तदा तद्व्यक्तेः स्वास्थ्यनियमानुपालनं न सम्यक् प्रभावशालि भविता। या व्यक्तिः स्वस्याः कृते स्वस्थवृत्तमनुपालयति, सा समाजस्य कृतेऽपि कृतिनीत्यत्र नास्ति सन्देहलवलेशः। नागरिकाणां सामूहिकप्रयत्नैरेव प्रत्येकस्य नागरिकस्य सुरक्षा सम्भवति।

यद्यपि व्यक्तेः स्वरक्षाऽऽत्मन उपर्येव तिष्ठति तस्याः। परमस्माकमेकोऽपि नैकाकी स्वकार्यनिर्वहणे समर्थो दरीदृश्यते। आवश्यकतापूर्त्तये, सुरक्षायै, पोषणाय, सम्वर्धनाय च मिथोऽनुदानमपरिहार्यम्। अद्यतनीयजटिलसमाजे तु, सहयोगभावना सहकारभावना, समूहभावनैव बलीयसी गरीयसी च सर्वत्रैव भूवलये प्रवर्त्तते कार्यकरी च। सुरक्षकजलवितरणयोजना, मलप्रतिक्षेपव्यवस्था, दुग्धविसंक्रमणवितरणं, खाद्यपेयपदार्थसुरक्षा, चिकित्सालयनिर्म्माणं, स्वास्थ्यसुविधाप्रदानं, स्वास्थ्यचिकित्सासेवा चेत्येवमादीनि सहयोग-सहकार-समूहभावनयैव प्रवर्त्तन्ते। व्यक्तीनां स्वास्थ्यरक्षयैव समाजिकस्वास्थ्यरक्षा वर्धते। व्यक्तयः स्वारोग्यरक्षायै सर्वतः प्रयत्नमनुष्ठीयन्ताम्, समाजश्च तासां स्वास्थ्यरक्षायै समस्ताः सुविधाः समासाद्यताम्; उभयोरपि सहकारेणैव परस्परानुग्रहेण व्यक्तयः समाजश्चोभावपि स्वस्थौ स्थास्यत इति समाजधर्मतत्त्वम्।

स्वास्थ्यसम्पादनसाधनानां समुपयोगः

आरोग्यकरसाधनानां बुद्धिपूर्वकमुपयोगोऽधिकवत्सरयोगेनायुष्यं सुखायुषा चायुष्यवर्षाणि योजयति। नागरिकस्य अपेक्षितस्वास्थ्यशिक्षाया लिङ्गम्—(नागरिकैः स्वास्थ्यसाधनानामुपयोगेनैव लिङ्ग्यते स्वास्थ्यशिक्षा) तेन स्वास्थ्यसाधनानां समुपयोगः। केचिन्नगरिका उपलब्धारोग्यसाधनानां सम्यगुपयोगं कुर्वन्ति स्वास्थ्यसुविधासेवानाञ्च सम्प्रयोगमाचरन्ति।

चिकित्सासेवाः— स्वास्थ्यरक्षाचरणेषु वैयक्तिकस्य पारिवारिकस्य वा चिकित्सकस्य सेवायै स्वास्थ्यसम्बन्धिप्रश्नानां समाधानाय च नियोजनम्। अन्यदेशानामिव अस्मद्देशेऽपि ईदृशानां चिकित्सकानां मध्यतो निर्वाचनाय आयुर्वेदचिकित्सासमाजः प्रत्यत्र परामर्शदानाय स्थापितो भवेत्। अन्यसूचनास्रोतोभिरपि सम्पर्को विधेयः। चरमनिर्णीति चिकित्सके अधरोक्ता अर्हता भवेयुस्तथा हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१—स राज्येष्टितो (duly registered Medical Practitioner) भवेत् ।

२—स आयुर्वेदचिकित्सासमाजस्य सदस्यो भवेत् ।

३—स कस्मिंश्चिच्चिकित्सालये कार्यपदाधिकारी स्यात् ।

४—स चिकित्साव्यवसायपटुः स्यात् ।

५—स सरलतया समुपलब्धः स्यात् ॥

एकोऽनुभवी चिकित्सकः परामर्शदातुः कार्यं सम्यक्तया सम्पादयति । तस्यारोग्यविषये विस्तृतं व्यापकञ्चाभिज्ञानं भवति यतः । सोऽशीतिप्रतिशतरोगाणां प्रतीकारं कर्त्तुमर्हति । विशेषज्ञस्यापेक्षायामपि स उपयुक्तविशेषज्ञनिर्वाचनेन स्वरोगिणमुपकरोति । आकर्षकव्यक्तित्वेनैव न कश्चिदुपयुक्तपात्रत्वं प्राप्नोति, अधुना बहवश्चिकित्सका वैज्ञानिकम्मन्याः स्वानतिवैज्ञानिकत्वेन दर्शयमाना इतस्ततो दृश्यन्ते ! परं चिकित्सकस्य व्यावसायिकं दाक्ष्यं तस्य लोकाभिशंसनादेवाभिज्ञायते ।

यदि लोकश्चिकित्सकस्य महतीं सेवां प्राप्नोतुं समीहते , तदा तेत स्वीयं समग्रं चर्यावृत्तं व्यथाविवरणं च चिकित्सकाय निष्कपटतया निवेदनीयम्; वैद्योक्तशासनमधिकृत्य च सर्वं दैनन्दिनमाहारविहारादिकं च सम्यगनुष्ठेयम् । व्यस्तचिकित्सको वाञ्छति यत्तस्य जनो नियतान्तरे परीक्षार्थं नियमितः समायातु । अथ च यथापेक्षं परामर्शार्थमपि समागच्छेत् । वैद्यः स्वयं व्यक्तिं गवेषयितुं नेतस्ततो भ्रमितुमर्हति ।

महाविद्यालयस्वास्थ्यसेवा — छात्रावस्थायां व्यक्तेः कृते सुचिकित्सकसेवाया आवश्यकता वरीवर्त्ति । कुशलश्छात्रोऽस्याः सेवाया उपयोगं कुरुते । यद्यपि महाविद्यालयस्वास्थ्यसेवा निम्नोक्तविषयाणां सीमानं नातिक्रामति ; यथा— (१) स्वास्थ्यपरीक्षाः (२) परामर्शसेवा (३) सामन्यारोगोपचारः (४) आकस्मिकसाहाय्यम् । विद्यालयान्तेवासिनां कृतेऽतितरं परामृश्येतऽधस्तनी व्यवस्था; तथा हि—

१—प्रवेशकाले स्वास्थ्यपरीक्षणम् ।

२—वैद्य-छात्रयोः स्वास्थ्यसम्मेलननिदेशानुपालनम् ।

३—वैद्यकृतापेक्षितकाले छात्रापेक्षितकाले वाऽतिरिक्तं स्वास्थ्यपरीक्षणम् ।

४—स्वास्थ्यस्य क्षमताऽऽवश्यकतयोर्दृष्ट्या छात्रस्य कृते चर्याक्रमनिर्धारणम् ।

५—विशिष्टचेष्टाकार्यक्रमेषु क्रीडादिषु भागनयनार्थं विशेषपरीक्षाऽनुमतिदानाय ।

६—रोगावस्थायां आकस्मिकं वाहनस्य चोपक्षितं साहाय्यम् ।

७—वैद्यविशेषज्ञैः सहावश्यकपरामर्शः ।

८—आवश्यकारोग्यशालानिवासः ।

९—आरोग्योचितस्वस्थवृत्तानुपालने साहाय्यम् ।

छात्रो विद्यालयस्वास्थ्यसेवाकार्यविषये सुपरिरिचितो भवेत्, अधिकाधिकसम्भावितलाभप्राप्त्यै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च सहयोगं कुर्यात्। यदि स केनचिद् रोगेण पीडितस्तदा स्वपारिवारिकचिकित्सकेन स्व-रोगस्य ज्ञातव्यवृत्तमधिगत्य स्वाभिभावकद्वारा विद्यालयचिकित्सकविमर्शपरामर्शहेतवे प्रदद्यात्।

दन्तसेवा—प्रत्येकस्य छात्रस्य दन्तपरीक्षा वर्षे न्यूनतमषाण्मासिकी वारद्वयं विधेया। दन्त-रक्षा स्वास्थ्यरक्षायै नितरामावश्यका। एक एव दन्तचिकित्सको बहोः कालाय स्थायिरूपेण नियोज्यः कार्यसौकर्याय सौष्ठवाय च।

चिकित्सालयसुविधाः—करदानेन शुल्केन वैयक्तिकानुदानैः, समाजसाहय्येन वा नागरिकाणां स्वास्थ्यरक्षायै चिकित्सागृहाः स्थापनीयाः। चिकि-त्सालयनिर्म्माणं तत्सञ्चालनं च बहुव्ययसाध्यं कार्यम्, परमेतत् समाजस्य स्वास्थ्यसेवायै नितरा-मेपक्ष्यते। अन्यनागरिकाणामिव छात्रोऽपि चिकि-त्सालयस्य सामाजिकमहत्त्वविषये सुपरिचितः स्यात्। चिकित्सकपरामर्शानुसारं चिकित्सालयस्य लाभोऽपि गृह्णीय एव। चिकित्सालयस्य सहायता-ऽपि प्रत्येकेन सम्भवोपायेन सुविधेयैव॥

चिकित्सालयः चिकित्सासुरक्षानिग-मश्च—चिकित्सालयः चिकित्सासुरक्षानिगमश्च (Medical Insurance) समाजस्य नागरिकाणां कृते चिकित्सायाश्चिकित्सालयसाधनानां च पूर्णो-पयोगस्य विश्वस्तां व्यवस्थामापादयन्ति। सुरक्षा-निगमे नागरिकाः स्वार्थमौषधव्ययीकरणाय स्व-ल्पार्थव्ययेन प्रभूतलाभान्विता भवन्ति। व्यक्तयः शल्यकर्मणि. चिकित्सालयनिवासस्य च व्यया-सुविधादिषु जायमानात्कष्टात्त्रायन्त्यात्मानम्। छात्रा अपि स्वशिक्षान्तरायं विनैव चिकित्सा-चिकित्सालययोः सुविधासेवाभ्यां लाभान्विताः स्वास्थ्यरक्षां कर्तुं शक्नुवन्ति।

स्थानिकस्वास्थ्यविभागः—पूर्णकालिक-स्वास्थ्यसेवाभिलोका लाभान्विताः स्युः। अनेन नागरिकाणां स्वास्थ्यस्य संरक्षणं संवर्धनं च भवति। तेषामपि तेऽधिकतरलाभं प्राप्नुयुर्ये स्वास्थ्यविभाग-कार्यस्य मूल्याङ्कनं कर्तुमर्हन्ति। छात्रैस्तु संक्रा-मकरोगाणां नियन्त्रणसाधनानि, जलवायुदेश-कालशुद्ध्यै क्रियमाणोपायजातानि च स्वास्थ्य-विभागकर्त्तव्यैस्सह सम्यगवएन्तव्यानि स्युः। स्वास्थ्यविभागेन च छात्राणां कृते विवरणानि स्वास्थ्यसूचनाश्च वितरणीयाः, याभिस्ते महत्त्व-पूर्णस्वास्थ्यमूल्यैरभिज्ञा भवेयुः।

स्वास्थ्यस्वयंसेवकसंस्थाः—अराजकीयं स्वयंसेविस्वास्थ्यसंस्था अपि छात्राणां कृते सेवा-कार्यं कर्त्तुं प्रभवन्ति। विद्युद्दर्शनपरीक्षा (Resentgenographic Examination) चिकित्साकेन्द्रं (Clinic) वा ताभिश्चालितं छात्राणां विशेषलाभसाधकं भवेत्। जनसेवि विज्ञनागरिकाणां ज्ञापकानि किल कस्मि-न्नपि देशे एतादृक् स्वयंसेविस्वास्थ्यसंस्थासंघट-नानीत्यवधेयम्।

एका व्यक्तिः स्वस्वास्थ्यस्य संरक्षणसम्व-र्धनयोः कृते समपेक्षितसाधनजातानां व्यवस्थां कर्तुं न कदापि शक्नोति। एतादृक्स्वास्थ्यसंस्था-विभागादीनां सत्त्वे तेषां उपयोगप्रकारस्य सम्यग्ज्ञाने च व्यक्तिः स्वास्थ्यरक्षावर्धनं कर्त्तुं प्रभवत्येव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूगर्भस्य रहस्योद्घाटनम्

पृथिव्या उपरिस्तरे ('पपडी') छिद्रविधानम्

पाश्चात्यवैज्ञानिका बहोः कालाद् 'वसुन्धराया एतस्या अन्तस्तले किं किं रहस्यमन्तर्हितमस्तीति' गवेषणायां संलग्नाः। नानादेशेषु उपयुक्तं स्थलमन्विष्य, तत्र भूखननेन छिद्रं विधाय, भूगर्भस्य अन्तर्गतां परिस्थितिं ज्ञातुमभिलषन्ति। अमेरिकाराजधान्याः 'न्यूयार्कस्य' जुलाईमासान्तस्य (१९५९) संवादोऽस्ति यत्—'कोलम्बियाविश्वविद्यालयस्य' वैज्ञानिकैः संभूय तदिदं निश्चितं यत्—'पृथिव्याः सौरमण्डलस्य च' उद्भवस्य संबन्धे सांप्रतं नवीनं रहस्यमाविष्कृतं भवेत्। यतो हि वैज्ञानिकैरेतैरन्विष्टम्—"कैरवियनसागरस्य तले पृथिव्या उपरिस्तरे ('पपडी') छिद्रविधानस्य पूर्णतः सौकर्यम्। 'प्योर्टीरिको' स्थानस्य उत्तरदिशि पृथिव्या उपरिस्तरः केवलं सार्धैकक्रोशात्मकः (२.७ मील) अस्ति। अन्यत्र सर्वेष्वपि पृथिव्याः प्रदेशेषु भूगर्भस्य उपरिस्तरः द्वात्रिंशत् 'मीला'-त्मकोऽस्ति। यत्र हि न्यूनान्न्यूनोऽपि पृथिवीस्तरोऽस्ति, तत्रापि एकोनविंशतिमीलात्मकात् न्यूनो नास्ति।

कैरवियनसागरस्य नीचैस्तले छिद्रकरणस्य येयं योजना प्रकान्ता, तस्याः कार्यरूपे परिणमनमपि शीघ्रं भवेदिति शुभलक्षणम्। यतो हि तस्मिन्नेव समये अमेरिकाप्रदेशीयेन "राष्ट्रियविज्ञानप्रतिष्ठानेन' भूगर्भखननकार्यार्थम् त्रिंशत्सहस्र 'डालर' मुद्राणामनुदानं तत्कालमेव प्रत्तम्।

किं बहुना, संप्रति मानवोऽयं सर्वतः प्रथमं भूगर्भस्याऽस्य विस्मयजनकं रहस्यं मानवसमाजस्याऽग्रे उद्घाटयेत्। भूगर्भविज्ञानेन चाऽनेन वैज्ञानिकाः किं किं अग्रिमं गवेषणं स्थिरीकुर्युरिति विवेकिभिः स्वत एव समुन्नेयम्।

तथ्यमुक्तं प्राचीनैः—

"उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥"

स्वास्थ्यविज्ञानस्य सुफलानि पूर्वकालापेक्षया प्रचुराणि। कोऽपि जनः सम्यक् स्वास्थ्यतत्त्वाभिज्ञश्चेत् स्वास्थ्यविज्ञानस्य सूपयोगं कर्तुं शक्नोति स्वास्थ्यलाभाय। स्वास्थ्यविज्ञानस्य प्रचारप्रसारस्य प्रायोगिकं सुफलं तु पञ्चविंशतिवर्षोत्तरमेव प्राप्स्येत। स्वस्थवृत्तशिक्षायाः सुफलानि तु प्रतिदिनमनुदिनं च व्यक्तिभिरुपभुक्तानि भुज्यमानानि च प्रतीयेरन्। नेयं काचिन्महती गवेषणा; प्रत्युत सामयिकं स्मारकं तत्त्वमित्यभिज्ञेयम्।

"स्वास्थ्यतत्त्वसमाचारश्चारः सम्यक् कृतः कृतः।
स्वास्थ्यसुफललाभाय वृत्तं संवृत्तमिष्यते॥"

चन्द्रलोके जनवसतिरस्तीति निश्चितम्

सितम्बरमासस्य १७ तारिकायां 'मास्को'नगरात् 'माइक्रो बाइलोजी इन्स्टिट्यूट' संस्थानस्य अध्यक्षेण डा० निकोलाई चेरुसालिम्स्कीमहाशयेन स्वस्थानीये 'त्रुद' पत्रे सोत्साहं घोषितमस्ति—"यत् चन्द्रलोके जीवानां वसतिरस्ति, कामं ते जीवा लघवो भवेयुर्महान्तो वा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरेण वैज्ञानिकेनाऽपि पत्रेषु सूचितं यत् 'चन्द्रलोकः "निर्जीवं स्थलम्" इति न नाम वक्तुं शक्यम्। कतिभिः प्रकारैर्विज्ञानेन निश्चितं यत् चन्द्रसंस्थानं जीवधारिणामावासभूमिरिति'।

चन्द्रलोकादवतरणं भृशं सरलम्

रूसीय-वैज्ञानिकश्रीअलेकसेइ इलियूशिनमहाशयेन चन्द्रलोकस्य परिस्थितिं परीक्ष्य सूचितं यत्—'चन्द्रनक्षत्रात्परावर्तनम् (अवतरणम्) आरोहापेक्षया अतिसहजं भवेत्। यतो हि अवतरणे प्रतिशतं ९६ मिता प्रहारशक्तिरावश्यकी स्यात्। 'सोव्येतस्काया रशिया' पत्रे तैः प्रकाशितं यत् 'व्योमराकेटानाम्' सफलैरुड्डयनैस्तदिदं सुसंभवमभिमन्यते यत्–मनुष्यः 'अयनक्षेत्र' पर्यन्तं शक्नुयात्प्राप्तुम्।'

'लितरेतूसाम गाज्येता' स्थानात् एकेन प्रधानवैज्ञानिकेन डा० ब्लादिमिरदोबोनराबोवमहोदयेन घोषितं यत्—'संप्रति चन्द्रस्य समन्तात् उड्डयनार्थम् एकस्य विस्तीर्णस्य कृत्रिमोपग्रहस्य योजना सज्जिताऽस्ति यः चन्द्रनक्षत्रस्य 'टेलिविजन'चित्राणि पृथिव्यां प्रेषयितुं प्रभवेत्।

यत् किमप्यस्तु, यश्चन्द्रः पृथिवीस्थलोकानामुपरि उत्तममधमं वा प्रभावमद्यावधि समचारयत्, 'मुखं चन्द्रः' इति च कविभिरागीयते स्म, स हि साम्प्रतं मानुषलोकानां गम्यो, बुद्धिशक्त्या नानाप्रकारैरुपनम्यश्च भवेदिति शनैः शनैः प्रतीक्षणीयं प्रतिभावद्भिरित्यलम्।

प्रलयंकरः अणुविस्फोटः

['अणु–विस्फोट' तः पञ्चक्रोशान् दूरे स्थितोऽपि प्राणी पञ्चदशमिनिटष्वेव म्रियेत]

वाशिंगटनराजधान्याम् अमेरिकाराष्ट्रस्य 'प्रतिरक्षाविभागस्य' वैज्ञानिको डा० शेल्टनो राष्ट्रसभायाम् (कांग्रेस) 'अणुबमस्य' परीक्षापरिणाममासीद् प्रकाशयमानः। तेन हि प्रोक्तं यदि 'अणु–युद्धम्' जगति न प्रसज्येत, तदैव विश्वस्य मङ्गलम्। अन्यथा यदि महाशक्तिषु तदिदं युद्धं प्रवर्तेत तदा यानि राष्ट्राणि तटस्थानि, एतस्माद् युद्धाद् दूरेऽवस्थितानि, तान्यपि युद्धस्याऽस्य भयंकरपरिणामाद् न तिष्ठेयुः सुरक्षितानि। शेल्टनः स्वपरीक्षणस्य परिणाममसूचयद्—यत् 'यानि तटस्थानि राष्ट्राणि तेषां मानुषाणां जीवनशक्तेः कदाचिद् हानिर्न भवेत्, किन्तु तेषां 'प्रजनन'शक्तेः क्षतिरवश्यं भवेत्।

'चतुर्दिवसीयपरीक्षणस्य' परिणामस्तेनाऽयं सूचितः 'अणुशक्ति–समितेः' संमुखे—यत् एकमात्रो 'मेगाटनबमः यदि विस्फुटितो भवेत्तर्हि विस्फोटस्थानात् क्रोशद्वयान्तरालेऽवस्थितानां सुदृढपाषाणनिर्मितानां गृहाणां पंक्तिर्धराशायिनी तत्कालमेव भवेत्।

'ताप-रेडियमधर्मिता'-अणु-आयुधस्य विस्फोटादुत्पन्नः असाधारणः ऊष्मा पञ्चक्रोशान्तराले स्थितानां सुदृढगृहाणां जवनिकाः ('पर्दे'), गृहपरिसरे स्थितान् तृणकाष्ठाद्यवकरराशींश्च सद्यो भस्मीकुर्यात्। किन्तु यदि १० दशसंख्याकाः 'मेगाटन-बमाः' विस्फुटिता भवेयुस्तर्हि त्रयोदशक्रोशान्तराले स्थितानां गृहाणामावरणवस्त्राणि, तृणादिराशयश्च नितरां दह्येरन्। १० मेगाटन-बमाः यदि भूमेरन्तरे विस्फुटिताः स्युस्तर्हि भूमौ २४० फुटगभीरः, २५०० फुटाऽऽयतश्च महान् गर्तः संभवेत्। यदि चाऽयं विस्फोटः समधरातले भवेत्तर्हि कतिक्रोशपर्यन्तं सर्वमपि धरातलं शून्यीकुर्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वे दिन याद करें... ऐसे भी कई बरस थे जब इस दिवसपर सारा राष्ट्र खुशीसे फूला नहीं समाता था, आतिशबाजीकी आवाजें आसमान तक पहुँचती थीं और जगमगाती रोशनीमें राष्ट्रका सन्मान उज्ज्वल हो उठता था! आइये, आज वे दिन याद करें जब अपने राष्ट्रके स्वाभिमानको कोई भय नहीं था और हम इस राष्ट्रीय दिवसको हर्षोल्लासमें मस्त होकर संपन्न करते थे। आज अपने हर्ष को कुछ संयत रखते हुए हम निश्चय करें कि हम एक रहकर अपने देशकी सुरक्षा करेंगे और अपनी प्रिय मातृभूमिकी सीमाओंपर संकटोंका सामना करनेवाले उन बहादुर जवानोंके हाथ अधिक मजबूत बनाएँगे।



पश्चिम और मध्य
रेल्वे द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा

पूर्वतोऽनुवृत्तम्—

तारकं तीर्थम्

"अवश्यमस्ति। अथवा किमिति न भवेत् ?" वृद्धः पौराणिकः क्षणार्द्ध एव स्वस्थः गम्भीरश्च समभूत्। "यद्येकस्याऽपि पुरुषस्योद्धारः असंभवः संभवेत्तर्हि भगवान् पतितपावनः कथं प्रसिध्येत् ?" "किन्तु भजनं पूजनं जपस्तपः व्रतोपवासादिकं मत्तो न किञ्चिदपि संभवेद् भगवन् ?" दस्युना स्वयमेकः प्रत्युपायः प्रतिनिर्दिष्टः। "मत्समीपे संपत्तेर्न किञ्चिदभावः। मम हि गुप्तकोषः स्वर्ण-रत्नैः संपूर्णः। यदि तस्याऽस्मिन् कार्ये भवेदुपयोग..."

"नैव तात !" ब्राह्मणः शिरःकम्पेन सर्वथा तदिदं प्रत्यषेधत्।

"तद्धि पातकद्वारा समुपार्जनं नूनम्। न हि नाम पंकेन पङ्कस्य प्रक्षालनं संभवेत्। यदि कष्टोपार्जितमिदं समभविष्यत् तर्हि किञ्चित्कार्यमसेत्स्यत्। तद्धि धनं स्वमण्डलभुक्तेभ्य एव संविभज्य तानेतस्मात्कार्यान्निवारय, यदि ते तमिममुपदेशं संशृणुयुः।"

"ते मन्ये, संमन्येरन्, किन्तु मम कः प्रत्युपायो भवेत् ?" अहह ! दस्योः पूर्व-

अवश्य है। अथवा क्या नहीं हो सकता ? वृद्ध कथावाचक आधे क्षण में ही स्वस्थ और गम्भीर हो गया। "यदि एक भी मनुष्य का उद्धार असंभव होता तो भगवान् 'पतितवान' नाम से कैसे प्रसिद्ध होता ?"। "किन्तु भजन, पूजन, जप, तप, व्रत और उपवास आदि मुझ से कुछ भी नहीं हो सकता हे भगवन् !"। स्वयं डाकू ने एक उपाय बतलाया। "मेरे पास धन की कुछ भी कमी नहीं है। मेरा एक गुप्त खजाना सोने और रत्नों से भरा हुआ है। यदि उसका इस काम में उपयोग हो........"

"नहीं तात !" ब्राह्मण ने मस्तक हिलाकर पूर्ण रूप से उसके लिए मना कर दिया।

"क्योंकि निश्चय से वह धन पाप के द्वारा इकट्ठा किया हुआ है। कीचड़ से कीचड़ नहीं धोया जा सकता है। यदि यह धन कष्ट से उपार्जित किया हुआ होता तो भी कुछ काम बन सकता था। इसलिए तू उस धन को अपनी टोलीवालों के लिए बाँटकर उन्हें इस काम के करने से रोक दे, यदि वे इस उपदेश को सुनें।"

"मैं मानता हूँ कि वे सब मान लें, परन्तु मेरे लिए क्या उपाय हो सकता है ?" अहा ! डाकू

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्मसु समाचरितं किञ्चित्सुचरितमस्मिन् जन्मनि समभून्नूनं परिपाकोन्मुखम् ।

ब्राह्मणेन प्रत्युक्तम्—"त्वं विधेहि तीर्थयात्राम् । (किञ्चिद्विचार्य) प्रोक्तम्—'संपूर्णस्य भारतस्य विधेहि तीर्थयात्राम् । प्रान्तप्रान्ते स्थितानां तीर्थानां विधेहि दर्शनम् । यात्रायामस्यां पद्भ्यां चलिष्यसि, क्षुधातृषे सहिष्यसे, स्वयमिदं तपः संपत्स्यते । संयम-नियमौ स्वतः संभविष्यतः । स्थाने स्थाने भगवतः श्रीविग्रहाणां दर्शनम्, साधु-महापुरुषाणां च समागमः संपद्येत । शरीरेणैव यदिदं साध्येत तादृक् साधनं तु केवलमियं तीर्थयात्रैव ।"

"साम्प्रतमहं पवित्रो जातः' इति कथमहं जानीयाम्", इति जिज्ञासितं दस्युना ।

"यदा हि दीन-दुःखितेषु स्वयमेव चित्तं भवेद्दयाऽऽर्द्रम् । यदा च तिरस्कार-कारकाणामुपर्यपि न भवेत्क्रोधः, अपराधं कृतवतामप्युपरि न भवेदमर्षः, तदा हि भवान् ज्ञास्यति—'पवित्रं मे मनः संजातमिति ।'

दस्युराजः करौ संपुटीकृत्य, क्षमा-मृदुना चेतसा ब्राह्मणाय कृतवान् सप्रश्रयं प्रणामम् ।

का पहले जन्मों में किया गया कुछ पुण्य इस जन्म में निश्चय से फलोम्मुख हो गया ।"

ब्राह्मण ने उत्तर दिया—"तू तीर्थयात्रा को कर । (कुछ विचार कर) कहा—"सारे भारत की तीर्थयात्रा को कर । प्रत्येक प्रान्त में स्थित तीर्थों के तू दर्शन कर । इस यात्रा में तू पैदल चलेगा, भूख और प्यास का सहन करेगा, यह स्वयं तप हो जायेगा । संयम और नियम अपने आप हो जायेंगे । स्थान-स्थान पर भगवान् की मूर्तियों का दर्शन, साधु और महापुरुषों का दर्शन हो सकेगा । शरीर के द्वारा ही जो यह सिद्ध किया जा सके वैसा साधन तो केवल यह तीर्थयात्रा ही है ।"

"अब मैं पवित्र हो गया हूँ । ऐसा मैं किस प्रकार जान सकता हूँ" इस प्रकार दस्यु ने जानना चाहा ।

"जिस समय दीन-दुःखियों पर चित्त स्वयं ही दया से आर्द्र हो जाये । और जब तिरस्कार करने वालों पर भी क्रोध उत्पन्न न हो, अपराध करने वालों पर भी अमर्ष उत्पन्न न हो, निश्चय से तब तुम जानोगे—कि मेरा मन पवित्र हो गया है ।

डाकुओं के सरदार ने दोनों हाथों को जोड़ कर क्षमा के कारण कोमल चित्त से ब्राह्मण के लिए विनय के सहित प्रणाम किया ।

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No, J 7
Licence No. PP-6
"Licenced to Post
without Prepayment

सूक्ति-सुधा

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्॥१॥

विपत्ति में धैर्य रखना, उन्नति के काल में क्षमाशील रहना, सभा में बोलने में निपुण, युद्ध में पराक्रम दिखाना, यश में (उत्तम कार्यों में) अभिरुचि, शास्त्रों में अनुराग ये सब गुण महान् पुरुषों में स्वभाव से ही होते हैं ॥१॥

सम्पत्सु च महतां
चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैल-
शिलासंघातकर्कशम् ॥२॥

महान् पुरुषों का चित्त अच्छे दिनों में (अभ्युदय-काल में) पुष्प के कौंपल की तरह कोमल होता है और आपत्ति के समय महाशैल (सुविशाल पर्वत) की शिला पर होने वाले संघात (चोट) पर जैसे वह अत्यन्त कठोर रहकर संघात सहन कर लेती है वैसे ही उनका चित्त भी विपत्ति में अत्यन्त कठोर रहता है ॥२॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥३॥

अपने गुरुजनों की कठोर अक्षरवाली वाणी से जिनने तिरस्कार (फटकार, धमकी) सहा है वे ही पुरुष बड़े बनते हैं (उनको ही आगे चलकर महत्त्व मिलता हैं)। जिन मणियों ने (जिनों ने) सान के पत्थर पर घिसाई नहीं भोगी (नहीं पाई) वे रत्न कभी राजाओ के मस्तक पर नहीं चढते। खराद पर जिन रत्नों कीं पहले घिसाई हो जाती है, वे ही रत्न राजाओं के किरीट (सिरपेंच) में स्थान प्राप्त करते है। बिना खराद पर चढे रत्न कभी राजाओं के मस्तक पर नहीं चढ़ते ॥३॥

न व्याप्तिरेषा गुणिनो
गुणवान् जायते ध्रुवम् ।
चन्दनोऽनलसंदग्धो
न भस्म सुरभि क्वचित् ॥४॥

गुणी से पैदा होने वाला सदा गुणी ही हो, यह व्याप्ति (दृढ नियम) नहीं। यदि चन्दन को अग्नि में जला दीजिये तो क्या उसका भस्म सुगन्धित होगा? कभी नहीं। चन्दन से पैदा होने वाला भस्म सुगन्धित होना चाहिये। परन्तु यह दृढ नियम नहीं कि गुणवान् से पैदा होनेवाला गुणवान् ही हो ॥ ४॥

प्रकाशक:—जयबहादुरसिंह पता:—गोपालजी का रास्ता, जयपुर
राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिन्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

धर्म-व्याकरणाचार्यो मन्त्री सम्मेलनस्य यः ।
वृद्धिचन्द्रसुधीः सोऽयं सुरलोकमितो गतः ॥

र्षम् १४
ङ्कः

वार्षिक मूल्यम् चतस्रो मुद्रा ४)
एकप्रतेः चत्वारिंशत् नवपैसाः (४० न.पै.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रमसंख्या	लेखाः	लेखकाः	पृष्ठसंख्या
१.	अस्माकं भारतभूमिः	भट्टश्रीमथुरानाथशास्त्री, जयपुरम्	१२३
२.	स्वर्गत-पण्डित-श्रीवृद्धिचन्द्रशास्त्रिमहाभागस्य परिचयः	श्रीदीनानाथत्रिवेदी 'मधुपः', जयपुरम्	१२४
३.	हरिश्चन्द्रनाटकम्	श्रीदामोदरात्मजगोविन्दप्रसाद शर्मा	१२९
४.	शिवशिक्षिणम्	श्रीश्रीधरभास्करवर्णेकरः, नागपुरवासी	१३१
५.	अयि ! निद्रालवलीन बन्धो रे !	श्रीगंगाधरशास्त्री, रेडियो कलाकार बीकानेर	१३३
६.	श्रीशिवाजी	श्रीकन्हैयालालजी भेड़ा बम्बई	१३४
७.	सम्पादकीयम्	सम्पादकः	१३६
८.	लघुकथा	श्रीकमलानाथ शर्मा	१३८
९.	सूक्तिसुधा	सम्पादकः	१४०

सूचना

ग्राहकमहानुभावाः 'भारती' पत्रिकानुरागिणश्च सादरं सूच्यन्ते यद् वर्षस्यास्य मार्चमासस्याङ्कः '**आयुर्वेदांकः**' इति विशेषाङ्करूपेण प्रकाशितो भविष्यति। अतस्तं भवतां सविधेऽप्रेलमासस्य द्वितीयसप्ताहं यावत् प्रेषयितुं प्रभविष्यामः इति।

भवदीयः

प्रबन्ध सम्पादकः

'भारती'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-पञ्जाब-उत्तरप्रदेश-बिहार-मध्यप्रदेश-आंध्र-मद्रास-मैसूर-महाराष्ट्रसर्वकारैःस्वीकृता-

सम्पादकः
कविशिरोमणिः
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी।
भागीरथीव भावाढ्या भारते भातु भारती॥

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवन,
गोपालजी का रास्ता,
जयपुर (राज०)

वर्षम् १४ | (फरवरीमासः, सन् १९६४) | अङ्कः ४

निखिलनिगमनिश्चेय-निरवधिनिरुपाधिकगुणा।
विमलविवेकविधेय-विनया वाग्देवी जयति॥१

अस्माकं भारतभूमिः

भट्टश्रीमथुरानाथशास्त्री, जयपुरम्

मानवसमाजे सभ्यतायाः साधयित्री सेय-
मितमगाधज्ञानराशिजनयित्रीयम्।
विश्वमण्डलेऽस्मिन्निखिलेऽपि प्रभवित्री बभौ
भरत-भगीरथादिभूपोद्भावयित्रीयम्।
श्रीमद्राम-कृष्णपदपङ्कजैः पवित्रीकृता
भीष्मप्रमुखानां धर्मधीराणां सवित्रीयम्।
वीराणां वरित्री चिन्तनीयचरितानां चारु-
चेतसि चरित्री भाति भारतधरित्रीयम्॥२

—

इयं भारतभूमिः सर्वविधाभिः प्राकृतशोभाभिर्धन्या—

नानावृक्षवल्ल्योऽत्र रोहन्ते वसन्ते, ततो
ग्रीष्मे दिग्दिगन्ते रश्मिमाली दीप्तिमास्तृणाति।
परितः प्रभूतभूमिकर्षा भान्ति वर्षा यत्र
शरदि शशाङ्करुक्प्रकर्षाद्भूर्मुदं ददाति।
तूलिकानिवीता यत्र हेमन्ते रमन्ते जनाः
शिशिरे स्वदन्ते वह्नितापाः पवने प्रवाति।
श्रेयसी समग्रसमयेषु गिरिस्थेयसीयं
प्रेयसी प्रकृतिदेव्या भारतधराऽसौ भाति॥३

—

दृश्यतां भारतस्य पुष्पसमृद्धिः—

(छप्पयच्छन्दः)

कमलकेतकीकुन्दकुटजकुरबकततितुष्टा।
मिलन्मालतीमधुकमल्लिकामाधविजुष्टा।
एलालकुचलवङ्गपूगपाटलपरिणद्धा।
शालशिरीषाऽशोकतिलकतरुणीपरिरब्धा।
दलदतिमुक्तकनवमालिकायूथिचम्बकोद्भेदिनी।
इयमनवधि कुसुमामोदिनी भव्या भारतमेदिनी॥४

—

अस्माकं भारतस्य गौरवभूता संस्कृतभाषा

मयैवादौ सृष्टा नरजगति सभ्यत्वसरणि-
र्यदीयं साम्राज्यं क्वचनसमये प्राज्यमभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गत-पण्डित-श्री वृद्धिचन्द्रशास्त्रिमहाभागस्य परिचयः

श्रीदीनानाथत्रिवेदी 'मधुपः' महाराज-संस्कृतकॉलेजः, जयपुरम् ।

राजस्थान-संस्कृत-साहित्य-सम्मेलनस्य प्रधान-मन्त्री 'भारती' संस्कृतमासिकपत्त्रस्य च भूतपूर्व-सम्पादकः स्वर्गीयः पण्डितराजः श्रीवृद्धिचन्द्रशास्त्री व्याकरणधर्मशास्त्राचार्यो जयपुरनगरस्यैव न, अपि तु राजस्थानस्य तथा भारतवर्षस्यापि संस्कृत-पण्डितानां स एकतमो महान् सुयोग्यो विद्वान् समभूत् । स हि स्वस्य ५५ पञ्चपञ्चाशद्वर्षात्मकस्या-युषः समाप्तिपर्यन्तं २८ अष्टाविंशतिवर्षाणि यावद् भारतप्रसिद्धे जयपुरस्थे महाराज-संस्कृत-कॉलेजे विभिन्नपदेषु कार्यं कुर्वाणः संस्कृतभाषायाः समुन्नतौ श्लाघ्यं सहयोगं प्रदत्तवान् ।

जन्म

शास्त्रिमहोदयस्य जन्म १९६२ तमे वैक्रमाब्दे फाल्गुनकृष्णपक्षस्य तृतीयायां जयपुरनगरे श्रीमाली-ब्राह्मणकुले काश्यपगोत्रीयस्य ज्योतिषशास्त्रिणः श्रीगणेशलालशर्मणो गृहे जातम् । शास्त्रिणः पूर्वजा-स्तु राजस्थानस्य तथा गुर्जरातप्रान्तस्य सीमाप्रान्ते वर्तमाने घाणोरावनामके ग्रामे निवसन्ति स्म । ग्रामोऽयं संस्कृतसाहित्यस्य सुप्रसिद्धस्य विदुषस्तथा श्रीमालीजातिमहारत्नभूतस्य महाकवेर्माघस्य जन्म-ना समलङ्कृतस्य भीनमालस्यातिनिकटे वर्तते । अथ कालान्तरे च जीविकोपार्जनेच्छया परिवारः सोऽयं हिन्दूस्तानस्य विभिन्नेषु स्थानेषु परिभ्राम्यन् महाराजाधिराजस्य श्रीरामसिंहस्य शासनसमयेऽत्र जयपुरनगरं प्राप । कुतोऽपि कारणादस्यैव परिवारस्य शाखैका वर्धाप्रान्त (सी० पी०) आष्टी-खड़कीप्रभृतीन् ग्रामान् जगाम । शास्त्रिणः पितृपादस्य श्रीगणेश-लालशर्मणोऽन्येऽपि त्रयो भ्रातर आसन्, परं ते

यतोऽमूः संभूता जगदुदरसूता नरगिरो
गिराऽसौ गैर्वाणी जयति वरवाणीपरिवृढा ।।५

—

एतादृशीमपि वर्तमानसमये केचिन्मृतां 'डेडलेंग्वेज' इति व्याहरन्ति किन्तु या प्रत्यक्षं संमुखे वर्तमाना, सापि मृता कथमुच्यताम् ?

दृश्यतां यस्या मूर्तिः

मौलिर्वेदोऽस्ति यस्या मुखमुपनिषदः कन्धरा धर्मशास्त्रं
वक्षो वेदान्तविद्या कलय कटितटं दर्शनानीतराणि ।
जङ्घाऽन्ये शास्त्रसंघाश्चरणमथ नयो मण्डनं काव्य-मेतत्
प्रत्यक्षं वीक्षसे चेत्कथमहह मृता सा हि गीर्वाणवाणी ।।६

—

अन्ते सरस्वत्या मङ्गलेन विसर्जनमङ्गलं करोमि—

दीव्यति यदीयपदपङ्कजपरागवतां
सा काचन कोविदसमाजे प्रतिभा सताम् ।
पूर्वकविभारतीप्रभावपरिचेया या च
वचसामुपेया श्रुतिमौलिषु चकासताम् ।
मञ्जुनाथ कच्छपीनिनादिगुणमादकरी
मञ्जुलयलहरी किल यस्या याति दासताम् ।
निर्मिति नवीनामेव दधती कवीनां हृदि
सकलगवीनामद्य देवी प्रतिभासताम् ।।७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ततिरहिता एवाभूवन् । अत एव शास्त्रिमहाभाग एव तेषां सर्वेषामपि अतिप्रियः पुत्रवद् बभूव। जन्मानन्तरञ्च वर्षद्वयवयस्क एव स स्वस्य ज्येष्ठस्य पितुः श्रीश्रीलालस्य सविधे गतवान्। तत्रैव च तस्य संरक्षकतायां निवसन् शास्त्रिप्रवरः स्वस्य बाल्यकालमतिवाहितवान् ।

यदा स सप्तवर्षात्मको जातस्तदैव यथाविधि यज्ञोपवीतसंस्कारः शास्त्रिमहोदयस्य समपद्यत। अनन्तरमेकादशवर्षात्मकं वयः प्राप्तवत एव तस्य पूज्यपितृचरणानां स्वर्गमनेन सर्वस्यापि परिवारस्य पालनपोषणसम्बन्धी भारः सर्वोऽपि केवलं श्रीश्रीलालमहोदये समापतितः। तदानीं प्रारम्भिकशिक्षायामुत्तीर्णो जातः स शास्त्रिमहानुभावः। ततश्च निजपरिवारस्य स्थितिं सुदृढां विधातुं तज्ज्येष्ठपितृचरणाः शास्त्रिमहाभागं कुलक्रमागतां ज्यौतिषविद्यामध्यापयाम्बभूवुः। तेषाञ्चायमासीत्केवलं मनोरथो यदेष संस्कृतभाषाया मार्मिकमध्ययनं कुर्यादिति। अतः स्वर्गतात् स्वस्य गुरोः श्रीचुन्नीलालशर्मणात् प्रेरणां प्राप्य सोऽयं शास्त्रिमहोदयः खड़कीग्रामतो जयपुरं (जन्मभूमिं) प्रत्यागत्य भारतप्रसिद्धानां विदुषां साहचर्यमधिगत्य तथा तेषामेव शुभाशीर्वादैश्च स्वाभिलाषं पूरयितुं प्रबभूव।

शिक्षा-दीक्षा च

आर्वीतः (वर्धातः) प्रत्यागत्य च शास्त्रिमहोदयो जयपुरीय-महाराज-संस्कृतकोलेजेऽध्ययनार्थं प्रवेशं लब्ध्वा १६ षोडशवर्षात्मके वयसि १९२३ ईसवीयाब्दे काशीस्थ-राजकीयप्रथमापरीक्षायामुत्तीर्णः। ततो वर्षचतुष्टयानन्तरं १९२७ तमे वर्षे व्याकरणमध्यमापरीक्षामुत्तीर्य स्वर्गीयपण्डितश्रीचन्द्रशेखरशर्मणो ब्रह्मपुरीनिवासिनः सान्निध्याद् व्याकरणोपाध्यायपरीक्षाञ्च १९२५ तमे ख्रिस्ताब्दे प्रथमश्रेण्यामुत्तीर्णवान् सः। [illegible] स्वर्गीयपण्डितश्रीचन्द्रदत्तमैथिलमहाभागात् समधीत्य १९२८ तमे वत्सरे च व्याकरणशास्त्रिपरीक्षां

प्रथमश्रेण्यां, १९३१ तमे च वर्षे व्याकरणाचार्यपरीक्षां द्वितीयश्रेण्यां तथा १९३६ तमेऽब्दे च धर्मशास्त्राचार्यपरीक्षामुदतीतरत्। तथा महामहोपाध्याय–पण्डित–श्रीगिरिधरशर्मचतुर्वेदमहाभागस्य प्रेरणया च १९३३ तमे ख्रिस्ताब्दे च पञ्चनद-विश्वविद्यालयस्य शास्त्रिपरीक्षां संस्कृते (ऑनर्स) समुत्तीर्य तस्मिन्नेव वर्षे च एड्वांस-हिन्दीपरीक्षामप्युत्तीर्णवान् स शास्त्रिवर्यः।

अध्यापनकालः

व्याकरणाचार्यपरीक्षोत्तरणानन्तरञ्च शास्त्रिमहानुभावः १९३१ तमे ईसवीये वर्षे चमडिया-संस्कृतकॉलेजे फतेहपुरे (जयपुरराज्ये) अध्यक्षपदमलङ्कृत्य तत्र च वर्षद्वयं यावत् कार्यमनुष्ठितवान्। तत्र च स्वस्य वृद्धिं गतायाः ज्ञानपिपासायाः शान्तिं नैवानुभूय १९३३ तमे वर्षे च ततः स्थानीय-महाराजसंस्कृत-कॉलेजस्य प्रवेशिकाविभागे व्याकरणाध्यापकस्य पदे साधारणाध्यापकरूपेण केवलं ३०) त्रिंशद्रूप्यकमासिकवेतनलभ्ये समागतवान्। अत्रागत्य चाध्ययनाध्यापनकार्यातिरिक्तञ्च स्ववंशपरम्पराप्राप्ताया ज्यौतिषविद्यायास्तथा विशेषरूपेण च नक्षत्र-खगोलादि-विज्ञानस्य च विशिष्ट-[illegible] स शास्त्रिवर्यः। एवं महाराज-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकॉलेजस्य विभिन्नेषु पदेषु कार्यमनुतिष्ठन् तथोत्कर्षमासादयन् स्वविशिष्टयोग्यतानुसारेणाचिरादेव धर्मशास्त्रविभागाध्यक्षपदं लेभे। अत्रैव च कार्यं सम्पादयन् ५५ वर्षात्मकं स्वस्यायुषो भागं समाप्य १९६१ तमे ईसवीयवत्सरे राजकीयसेवातो विश्रान्तिमासादितवान्। एवमत्र महाराज-संस्कृत-कालेजे कार्यं कुर्वाण एव स शास्त्रिवर्यो विभिन्नशास्त्राणां मार्मिकं ज्ञानं प्राप्तवान्। यथा हि स विद्यावाचस्पति–स्वर्गतश्रीमधुसूदनशर्ममैथिलमहाभागाद् वैदिकविज्ञानविषयकमध्ययनं विधाय तथा दर्शनशास्त्राणां विशिष्टमध्ययनञ्च महामहोपाध्यायश्रीगिरिधरशर्मचतुर्वेदमहाभागात् सम्यक् कृतवान्। तथात्र विषये श्रीचतुर्वेदमहाभागेन प्रत्तस्य प्रमाणपत्त्रस्यायमस्ति सारः—

'पण्डितवृद्धिचन्द्रशास्त्री व्याकरणधर्मशास्त्राचार्यो ममान्तिके दर्शनशास्त्रस्यानेकान् महतो ग्रन्थान् पठितवान्। अस्य शास्त्रीया योग्यतापि विशिष्टा वर्तते, सर्वेषु शास्त्रेषु चास्य गतिर्विद्यते, तथा लेखनशैली पाठनशैल्यपि प्रशंसार्हास्ति। अहं हृदयेनैतादृशस्य प्रौढस्य पण्डितस्य समुचितामुन्नतिं द्रष्टुं कामये'—इति।

एवमेव स्वर्गीय-राजगुरु–पण्डितश्रीचन्द्रदत्त-मैथिलमहानुभावाद् व्याकरणशास्त्रातिरिक्तं साहित्यविषयकमध्ययनमपि विशिष्टं कृतवान् शास्त्रिमहोदयः। तथा भट्टश्रीमथुरानाथशास्त्रिमहोदयोऽपि श्रीशास्त्रिणो गुरुर्वर्तते। किञ्च तदीयां योग्यतां कार्यपटुताञ्च समीक्ष्य सर्वकारेण शास्त्रिमहोदय उदयपुरस्थमहाराज–संस्कृतकॉलेजस्याऽध्यक्षीयपदमलङ्कर्तुमामन्त्रितोऽभूत्, परं पारिवारिकपरिस्थितिवशात् स्थानीयसंस्कृतकॉलेजं प्रति अनुरागातिशयाच्च पदोन्नतिमपि न समुचितां मेने, प्रत्युत धर्मशास्त्रस्य प्राध्यापकपद एव चास्मिन् विश्रामग्रहणपर्यन्तं कार्यं चकार सः। अयोध्यास्थ-संस्कृत-कार्यालयाच्च 'साहित्यार्णवः' इत्युपाधिना विभूषितश्चाभूत्।

विविधकार्यसम्पादनञ्च

अथाऽध्ययनकर्मणा शास्त्रिमहाभागो जयपुरराज्येन सञ्चालितायाः धर्मसभायाः सम्मानितः सदस्यो बभूव, यत्र प्रतिबुधवारं प्रतिशनिवारं वा धार्मिकेषु विषयेषु विवेचनं क्रियते स्म।

एवमेव जयपुरस्य तथा योधपुरस्य राजकीय-पारिवारिक-धार्मिक-व्यवस्थासु शास्त्रिणः सहयोगश्चापि चिरस्मरणीय एव स्थास्यति। स्वस्य जीवनसमये च जयपुरस्य कासाञ्चित् सभानां संस्थानाञ्च सम्मानितः सदस्यः समवर्तिष्ट, यासु-दादूमहाविद्यालयः, (जयपुरम्), राष्ट्रभाषाकॉलेजः, संस्कृतवाग्विवर्द्धिनी परिषद्, वैदिकसंस्कृतिप्रचारकसंघस्तथा संस्कृतप्रचारपरिषत्प्रभृतीनां नामानि विशेषतः समुल्लेख्यानि वर्तन्ते।

अपि च अ० भा० संस्कृतसाहित्यसम्मेलनस्य मुखपत्त्रस्य 'संस्कृतरत्नाकरस्य' सम्पादनमेवं दर्शनाङ्काभिधस्य विशेषाङ्कस्य प्रकाशनमपि सम्पादनकलाकुशलेन शास्त्रिवर्येण समनुष्ठितम्।

एवं राजस्थानसर्वकारेण संस्कृतस्याभ्युन्नतये राजस्थानसंस्कृतपरामर्शप्रदातृमण्डलस्य राजस्थानीयस्तरेण यत् संघटनमक्रियत तस्यापि सदस्यतां भेजे सः। तथा समये समये स्वकीयां बहुमूल्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



मित्रमण्डले (सप्तर्षिमण्डले) श्रीवृद्धिचन्द्रशास्त्रिणः

संस्कृतमहाविद्यालयस्य अध्यक्षमहाभागेन श्रीचन्द्रशेखरशास्त्रिणा सह उपविष्टाः महाविद्यालयीयछात्रसंघस्य निर्देशकाः श्रीवृद्धिचन्द्रशास्त्रिणः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रणां प्रदाय स संस्कृतस्याभ्युन्नतौ सदा सयत्न एवास्थात्। किञ्चित्कालं यावच्च जयपुरीय-राजस्थानविश्वविद्यालयस्य प्राच्यविद्याविभाग (फैकल्टी ऑफ ओरियन्टल लर्निंग) समित्या अपि सम्मानितः सदस्यः समभूत् सः।

शास्त्रिमहोदयस्य शिष्यवर्गे च श्रीप्रवीणचन्द्रो जैनः एम्० ए०, अध्यक्षः (डूंगरकॉलेजः, बीकानेरम्), डा० श्रीमण्डनमिश्रशास्त्री, महामन्त्री अ० भा० सं० साहित्यसम्मेलनम्, दिल्ली, श्रीहरिशङ्करशर्मा प्रवक्ता जामनगरम्, जयपुरस्थ-महाराजसंस्कृतकॉलेजे च श्रीगोविन्दनारायणशर्मा न्यायप्राध्यापकः, श्रीरामनारायणचतुर्वेदी यजुर्वेदप्राध्यापकस्तथा श्रीरामगोपालशर्मा साहित्यधर्मशास्त्राचार्यः, राजगुरु-कथाभट्टश्रीजगदीशचन्द्रशास्त्री अध्यापकः—एते प्राधान्यं भजन्ति। तथा शास्त्रिणः पाण्डित्यविषये च म० म० श्रीचतुर्वेदमहाभागस्य प्रमाणपत्रमत्र समुद्ध्रियते—

काशी हिन्दूविश्वविद्यालयः, बनारसः।

तिथिः चैत्रशुक्ला ७ सं० २००७ जयपुरे-

व्याकरण - धर्मशास्त्राचार्यः श्रीवृद्धचन्द्रशर्मा चिरान् मत्परिचितः। अयं मत्सकाशे बहून् धर्मशास्त्र-ग्रन्थानधीतवान्, मदध्यक्षतायां महाराजसंस्कृतमहाविद्यालये विद्यालयविभागे, तदनु महाविद्यालयविभागे च कतिचिद् वर्षाणि अध्यापनकार्यं कृतवान्। शास्त्रे, लेखे, वक्तृतायां च प्रौढः पटुरयं स्वव्युत्पत्त्या, शीलेन, सदाचारेण, परिश्रमेण च मां नितरां पर्यतूतुषत्। अनेकधा पाठ्यक्रमनिर्माण-पारितोषिकप्रबन्ध - परीक्षाप्रबन्धादिषु दायित्वपूर्वकं विनियोज्य मयास्य प्रबन्धपाटवमपि सम्यक् परीक्षितम्। सुचतुरः पक्षपातादिविरहितश्चायं मया सर्वेषु कार्येषु दृष्टः। प्रायेण सर्वेष्वेव शास्त्रेष्वस्य योग्यता, वाक्पाटवं, लेखपाटवं

च सुप्रशस्यम्। ईदृशस्य परमविदुषः सर्वाङ्गीणामनुपलमेधमानामुन्नतिमहमभिकाङ्क्षामि। सुचिरंमयं जीव्यात्, शास्त्रप्रौढ्या जगदुपकुर्याच्चेति जगदीश्वरं प्रार्थयते— गिरिधरशर्मा चतुर्वेदः।

किञ्च कालेजतो विश्रामग्रहणाऽनन्तरञ्च स्वकीयं सर्वमपि समयं संस्कृतस्य विकासायैव प्रयच्छन्नवर्तत, तथा विगतवर्षत्रयाद् रा० सं० सा० सम्मेलनस्य प्रधानमन्त्री च समासीत् शास्त्रिमहाभागः। एवं गतमासत्रयाच्च अर्बुद (केन्सर) रोगेण निपीडितः स शास्त्रिमहोदयो हा हन्त! गतजनवरीमासस्य २८ तारिकायां सायं समये संस्कृतपरिवारमिह परित्यज्य परलोकपथिकः समजनि।

शास्त्रिमहोदयस्य परिवारे च द्वौ पुत्रौ, तिस्रः पुत्र्यश्च वर्तन्ते। तत्र ज्येष्ठः पुत्रः श्रीघनश्यामशर्मा एम्० एस्० सी० संप्रति राज० उच्चतर मा० विद्यालये (जोबनेरे) भौतिकशास्त्रस्य वरिष्ठाध्यापको विद्यते, कनिष्ठः पुत्रश्च श्रीप्रभाकरशर्मा शास्त्री एम्० ए० धर्मशास्त्राचार्यः, बीकानेरस्थ-डूंगरकॉलेजे संस्कृतस्य प्रवक्ता वर्तते। अन्ते चातः परं परमात्मानमहं प्रार्थये—

संस्कृतस्य प्रसाराय सयत्नोऽभूत् सदैव यः।
सन्ततं शास्त्रिवर्यः स स्वर्गे सुखमवाप्नुयात्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

हरिश्चन्द्रनाटकम्

(ले०—पं० श्रीदामोदरात्मजगोविन्दप्रसादशर्मणा शास्त्रिणा दाधीचेननिर्मितम्)

द्वितीयदृश्यम् ।

(ब्राह्मणो राज्यसभायां प्रविशति)

ब्राह्मणः—मंत्रिगण ! अधुनास्य राज्यस्याऽहमेवाऽधिपोऽस्मि । अतो यूयं मम स्वामित्वभावेन ममाज्ञया परोक्षे प्रत्यक्षे वा पूर्ववत् सर्वं राज्यकार्यं कुरुत । अहं तु तपश्चरितुं गच्छामि ।

मंत्रिगणः—यदाज्ञापयति देवः ! वयं पूर्वमेवाभिहिताः स्मः ।

(ब्राह्मणो निष्क्रान्तः)

(सर्वे यान्तं राजानं विलोक्य)

प्रजा—राजन् ! सकुटुम्बो भवानस्मान् विहाय कुत्र याति । वयमपि भवता साकं यास्यामः ।

राजा—प्रियजनाः ! सत्यपालनाय मया सर्वस्व त्यक्तम् । यूयं मम कार्ये सहायकाः भवेत, न तु बाधकाः । अतो यथास्थानं गच्छेत ।

मंत्रिगणः—स्वामिन् ! वयं तु भवन्तं विना न जीविष्यामः । वयमपि भवता साकं यास्यामः ।

राजा—सचिवाः ! यूयमपि मया सह चलिष्यथ, तदा प्रजां कः पालयिष्याति । अत्रैव तिष्ठत ।

(सर्वे निष्क्रान्ताः)

(अत्रान्तरे ब्राह्मणः समायाति)

ब्राह्मणः—नरेन्द्र ! मम दक्षिणां देहि । किं मुखमाच्छाद्य धावसि । न लज्जसे ।

राजा—महाराज ! क्रोधं न विधत्ताम् । कृपया मासावधि ददतां भवान् । अहं अवश्यमेव दक्षिणां दास्यामि ।

ब्राह्मणः—राजन् ! न जाने, त्वं अन्यत्र कुत्र यास्यासि । अहं त्वां कुत्र अन्वेषयिष्यामि । अतो मह्यं दक्षिणां प्रदाय गच्छ ।

राजा—तपस्विन् ! अधुना वयं वाराणसीं गच्छामः । तत्र कुत्रापि वृत्तिं विधाय भवद्दक्षिणां दास्यामि । यद्यहं मासमेकं यावत् दक्षिणां न दद्याम्, तर्हि भवान् अस्मान् सर्वान् विक्रीय स्वदक्षिणां लभताम् ।

ब्राह्मणः—सत्यवादिन् ! मासं यावत् प्रतीक्षे ।

(निष्क्रान्तः)

(राजा काशीं प्रविश्य धनार्थं यतते । परं च कोऽपि मनुष्यः तस्मै ऋणं न ददाति अतो भगवन्तं विश्वनाथं प्रार्थयति)

राजा—हे नाथ ! कष्टं हरतां मदीयं
दत्तां सुवर्णस्य सहस्रमुद्राः ।
दास्यामि विप्राय दयां विधत्तां
सत्यं भवान् रक्षतु सर्वदा मे ॥८॥

रोहिताश्वः—हे मातः ! क्षुधितोऽस्मि ।

शैब्या—स्वामिन् ! एतन्मम कर्णपुष्पं विक्रीय भोजनमानयतु भवान् ।

राजा—यथेच्छति भवती । (आपणं गच्छति राजा)

ब्राह्मणः—(मार्गे राजानं विलोक्य) राजन् ! कुत्र यासि ।

राजा—महाराज ! आपणात् क्षुधितबालकाय भोजनं क्रेतुं गच्छामि ।

ब्राह्मणः—धिक् त्वाम् ! त्वं तु राज्यस्य चोरिकाधनेन यथेच्छं भुंक्षे । एकमासोऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यतीतः । अतो मे दक्षिणां देहि । यावन्मम दक्षिणां न ददासि तावत् कोऽपि न भुंजीत ।

राजा—विप्रवर ! यदाज्ञापयति भवान् । यत्नादपि मया सहस्रमुद्रा न लब्धाः । अतो भवानमान् विक्रीय दक्षिणां लभताम् ।

ब्राह्मणः—सर्वे भवन्तो मया सह आपणं चलन्तु ।

राजा—यदाज्ञापयति देवः ।

(ब्राह्मणेन सह सर्वे यान्ति)

ब्राह्मणः—(आपणं यात्वा घोषणां करोति) अयि जनाः ! भवन्तः क्रीणन्तु दासदास्यौ ।

चांड़ालः—महाराज ! अस्य दासस्य कृते पंचशतं सुवर्णमुद्राः ददामि । यदि भवानेनं विक्रीणीयात् ।

ब्राह्मणः—आर्य श्वपच ! स्वीकरोमि । अस्य मूल्यं देहि ।

श्वपचः—(मूल्यं दत्वा दासं प्रति वदति) अरे दास ! इदानीं त्वं श्मशानभूमिं गच्छ । तत्रैव नक्तंदिवं निवस । श्मशानकरं च गृहाण । यदि त्वं सावधानतया कार्यं न करिष्यसि तर्हि मृत्युदण्डं प्राप्स्यसि ।

दासः—यदाज्ञापयति स्वामी । (चांड़ालस्तं नयति)

शैब्या—(यान्तं पतिं विलोक्य तदग्रे धरायां पतन्ती, रुदन्ती, विलपन्ती च वदति)—

स्वामिन् ! भवान् बालकरोहिताश्वं
त्यक्त्वैकलां मामधुनैति कुत्र ।
संप्रेषयिष्ये भवता सहैव
प्राणान्मदीयानव नाथ ! सत्यम् ।।६।।

रोहिताश्वः—(रुदन् वदति)—

हे तात ! दासोऽस्मि पदाब्जयोस्ते
तौ युग्मपादौ परिगृह्य नित्यम् ।
प्राणांन् धरे दुःखितजीवनं धिक्
प्राप्नोम्यहं संप्रति पंचतत्त्वम् ।।१०।।

राजा—(धैर्यं धृत्वा तौ च आश्वासयति) हे शैब्ये ! हे पुत्र ! युवां धैर्यं धरतम् । आत्महत्यां मा कुरुतम् । पूर्वं युवाभ्यां ब्राह्मणाय शेषाः पंचशतं सुवर्णमुद्राः प्रदेयाः । युवयोरेष धर्मोऽस्ति ।

शैब्या—(धैर्यं धृत्वा) यदाज्ञापयति स्वामी ।

ब्राह्मणः—(पुनः उद्घोषयति आपणे) आर्यजनाः ! क्रीणन्तु भवन्तः ।

आचार्यः—अयि ब्राह्मण ! अस्याः सबालकायाः दास्याः कृते पंचशतं सुवर्णमुद्राः प्रयच्छामि । यदि तुभ्यं रोचते ।

ब्राह्मणः—भद्र ! स्वीकरोमि । त्वया दीयतामनयोर्मूल्यम् ।

आचार्यः—हे विप्र ! अनयोर्मूल्यं गृहाण । एतौ क्रीतौ प्रेषय मया सह ।

ब्राह्मणः—(मूल्यं गृहीत्वा वदति च)

हे शैब्ये ! अद्य मया अवशिष्टा दक्षिणा लब्धा । सबालका त्वमपि आचार्येण सह गच्छ ।

शैब्या—यदाज्ञापयति महाराज ।

(ब्राह्मणो गतः)

आचार्यः—हे दासि ! मया सह गृहं चल ।

दासी—यदाज्ञापयति देवः । (सा बालकेन सह याति)

आचार्याणी (सपुत्रां दासीं विलोक्य) अयि भृत्ये ! त्वमत्र सर्वं गृहकर्म विधेहि । तव बालकोऽपि प्रतिदिनं पूजनार्थं उद्यानात् पुष्पाणि चानयेत् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवराज्योदये महाकाव्ये पञ्चमः सर्गः

शिवशिक्षणम्

(ले०—कविः श्री श्रीधरभास्करवर्णेकरः, नागपुरवासी)

जिजातनूजः शिवनेरिदुर्गे
दिने दिने संववृधेऽतितेजाः ।
यथोदयाद्रावुदयोन्मुखोऽसौ
क्षणे क्षणे बालसहस्ररश्मिः ॥१॥

विलम्बिदोलाशयने शयानः
मुखारविन्देन पदारविन्दम् ।
लिहन् मुद्रा मातृमनोऽरविन्दे
न्यषिञ्चदानन्दसुधाप्रवर्षम् ॥२॥

क्षुधाकुलं तं च विजानती सा
माता जिजा सत्वरमुत्सरन्ती ।
गाढं गृहीत्वा हृदयावलग्नम्
अपाययत् हार्दमयं पयः स्वम् ॥३॥

स स्तन्यपीयूषरसं प्रसन्नः
पपौ स्वमातुर्मुखमीक्षमाणः ।
आकेकराक्षोऽमृतरश्मिबिम्ब-
निषक्तनेत्रो हि यथा चकोरः ॥४॥

अभ्यङ्गसुस्नातममुं कुमारं
श्रीखण्डरेखाङ्कितभालचन्द्रम् ।
विलोकयन्ती जनताद्रिसंस्था
मेने शिवाजिं शिवकल्पमेव ॥५॥

संत्यज्य मृत्क्रीडनकानि सर्वा-
ण्यबालसत्त्वः स हि वीरबालः ।
कृपाणखड्गच्छुरिकादिशस्त्रैः
संक्रीडितुं तत्परतां दधार ॥६॥

आकर्णसंकृष्टधनुर्गुणोऽसौ
अनन्यदृष्टिः स्थिरचित्तवृत्तिः ।
विध्यन् स्ववेध्यं द्रुतमप्रमादं
मेने गुणज्ञैः खलु वीरयोगी ॥७॥

सम्भ्रामयन् पट्टिशमुज्ज्वलाभं
मरुज्जवेनेव सुनीलकान्तिः ।
रराज स स्वेदलवार्द्रमूर्तिः
तडित्परीताभिनवाम्बुदाभः ॥८॥

दूरस्थवेध्याभिमुखं स्वशूलं
प्रक्षिप्य शक्त्याऽपि पुनस्तमेव ।
संधर्तुकामः स्वकरेण भूयः
शूलानुसारी प्रदुधाव वेगात् ॥९॥

स मल्लकेलीषु शिशून् वयस्यान्
न केवलं जेतुमभूत्समर्थः ।
वयोऽधिका अप्यभवन्न शक्ताः
तरस्विनं जेतुममुं कुमारम् ॥१०॥

वृक्षाग्रशाखासु समुत्प्लवन्तं
प्लवङ्गवृन्दं भृशलोलशीलम् ।
विडम्बयन्तुड्डयनैः स बालः
प्रमोदमग्नान् विदधे वयस्यान् ॥११॥

झञ्झामरुच्चञ्चलमुत्प्लवन्तं
तुरङ्गमं रश्मिविनाकृतं च ।
स्फुरत्सटावग्रहणं स वेगात्
क्षणादिवाध्यास्य चमच्चकार ॥१२॥

उक्षाणमुन्मत्तमपि प्रसह्य
विषाणयोरात्मबलेन धृत्वा ।
प्रत्याक्षिपत्तं हि तथा यथाऽसौ
वप्रावलीलारसमुत्ससर्ज ॥१३॥

सह्याद्रिजारण्यविहारलोलं
शार्दूलशावं रभसा प्रगृह्णन् ।
पृष्ठं समध्यास्य मुदाऽस्य हिण्डन्
घोरैरपि व्यात्तभयैरलोकि ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रे भुजङ्गाभरणं विलोक्य
शिवं तमेव ह्यनुकर्तु कामः ।
हर्षादिवाक्रष्टुमभीहतान्त-
बिलं निलीनार्धतनुं भुजङ्गम् ॥१५॥

असौ द्विपञ्चाशदुदम्बुकुण्डे-I
ष्वनेकधा तोयविहारसौख्यम् ।
अभीरभीक्ष्णं ह्यनुभूय खिन्नः
समुद्रसंगाहनमाचकांक्ष ॥१६॥

सा वीरजाता नरवीरजाया
जिजा निजार्भस्य च वीरवृत्तम् ।
अदृष्टपूर्वं प्रविलोकयन्ती
जगाद जाताऽस्म्यपि वीरमाता ॥१७॥

कृपाणपाषाणकृतव्रणेषु
शिशोस्तनावस्य च वज्रसारे ।
सतैलहस्तेन परामृशन्ती
समन्वभूद् वीरसुतैकभाग्यम् ॥१८॥

आबाल्यतो वीररसैकसक्तं
पिता निजं पुत्रमवेत्य सुज्ञः ।
सुक्षात्रसंस्कारविशेषदीप्तां
कर्तुं तदीयां प्रतिभामियेष ॥१९॥

दादोजि-नामानमुदग्रमानं
पापैकभीरुं गुरुमग्रवर्ण्यम् ।
विश्वासपात्रं प्रियमात्ममित्रं
न्ययोजयच्छस्त्रकलागुरुत्वे ॥२०॥

अजानता येन कदाचिदन्य-
त्तरोः फलं लूनमहेतुपूर्वम् ।
तं स्वापराधं परिहर्तुमैच्छत्
यो हस्तविच्छेदनतो मनस्वी ॥२१॥

तस्मिन् गुरौ ब्राह्मणकर्मशीले
महातपस्विन्यवसत् सुखेन ।
ऊर्जस्वता क्षत्रियवीरविद्या
वितानवल्लाविव कर्मसिद्धिः ॥२२॥

दण्डप्रहारच्छुरिकाविभेद-
कृपाणविच्छेदनशूलघातैः ।
सवञ्चिकाचर्मनिरोधयुक्तैः
गुरूपदेशैरभवद् बलाढ्यः ॥२३॥

प्रडीन-संडीन चतुष्कयुक्तैः
क्षेपैरनेकैः करवालपाणिः ।
विद्युज्जवेनेव परिभ्रमन् सः
जातः सहस्रैरपि दुष्प्रधर्षः ॥२४॥

यत्रोन्मदानां यवनाधमानाम्
अभद्रशब्दः सहसोद्बभूव ।
तत्रान्धकारेऽपि हि भद्रशीलः
स शब्दवेधी निजघान बाणम् ॥२५॥

शरीरसामर्थ्यवदेव तस्य
प्रज्ञाबलं वर्धयितुं जिजाऽपि ।
संस्थापयामास गणाधिपस्य
ह्युपासनार्थं महतीं सुमूर्तिम् ❀ ॥२६॥

मनीषितं साधयितुं स्वकीयम्
अनन्यसंकल्पितपूर्वमुत्कः ।
भक्त्या स तं ज्ञाननिधिं ययाचे
प्रज्ञां सुमेधां प्रतिभां च दीप्ताम् ॥२७

सबालको भाग्यविशेषशाली
बाल्ये हि यः प्रत्यहमाशृणोति ।
कथाः पवित्रा जननीमुखेन
रामायणीया अपि भारतीयाः ॥२८॥

(क्रमशः)

I शिवनेरिदुर्गे पुरा किल द्विपञ्चाशत् उदकुण्डानि आसन् इति श्रूयते ।

❀ इयं गणेशमूर्तिः पुष्पपत्तनवासिभिः नगरदेवतेति साम्प्रतं पूज्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि ! निद्रालवलीन बन्धो रे

(लय—ओ पवन वेग से उड़ने वाले घोड़े—)

रचयिता—गंगाधरशास्त्री, रेडियो कलाकार बीकानेर

अयि ! निद्रालवलीन बन्धो रे ।
सुप्तस्त्वं अधुना कुत्र
आगत्य शीघ्रं अत्र
रक्ष त्वं अद्य तव भारतीम् ।
अयि ! निद्रा............

कथं विस्मृता अद्य चत्वारो वेदाः
विस्मृताः कथं रे गीतोपदेशाः
अद्य त्वं शपथन्नीत्वा ।
पुनः वेदांश्च पठित्वा ।।
रक्ष त्वं अद्य तव भारतीम्
अयि ! निद्रा............

दूषिता कथमद्य चिकित्साप्रणाली ।
कथं रे सुषुप्ताद्य वैद्यप्रणाली
अद्य त्वं शपथन्नीत्वा ।
वैद्यप्रणालीञ्च पठित्वा ।।
रक्ष त्वं अद्य तव भारतीम् ।
अयि निद्रा............

सुप्तस्त्वमधुना कुत्र ।
आगत्य शीघ्रं अत्र ।।
रक्ष त्वं अद्य तव भारतीम्
अयि ! निद्रा............

❀ अपर गैंगेज शूगर मिल्स लिमिटेड
❀ दी अवध शूगर मिल्स लिमिटेड
❀ न्यू इण्डिया शूगर मिल्स लिमिटेड
❀ दी न्यू स्वदेशी शूगर मिल्स लिमिटेड
❀ भारत शूगर मिल्स लिमिटेड
❀ गोबिन्द शूगर मिल्स लिमिटेड

शुद्धकणवत्या इक्षुशर्करायाः निर्मातारः

मैनेजिंग एजेंट्सः—

दी काटन एजेण्ट्स प्राइवेट लि०

इन्डस्ट्री हाउस

१५६, चर्चगेट रिक्लेमेशन

बम्बई—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवाजी

पूर्वतोऽनुवृत्तम्—

वैद्यराज श्रीकन्हैयालाल भेड़ा, बम्बई।

पूज्याः !

कीर्तिर्यदीया धवलामलेयं,
विराजतेऽद्यापि हि सर्वदिक्षु।
तं राजनीतौ कुशलाग्रगण्यं,
वीरं नमामः शिवराजसिंहम्। १

यवनैः भारते आक्रान्ते धर्मो लुप्तप्रायो बभूव। एतेषां हिन्दूनाञ्च स्वाभाविकमेव वैरं वर्तते। ततः पूर्वं सर्वास्वपि पाठशालासु सर्वत्रैव भारते ब्राह्मणानां वेदघोषः, मन्दिरे-मन्दिरे-जय-जय-ध्वनिः। स्वधर्ममनुसरन्त एव सर्वेऽपि सुखिनः स्ववृत्ति कुर्वन्तश्च आसन्। किन्तु यवनैः प्रथममेव यथा भारतीयानां धर्मः लुप्तः स्यात्, तथा प्रयतितम्। वेदाः विच्छिद्य भस्मसात् कृताः, मन्दिराणि भिन्नानि, क्वचिद् द्वारा अपहृताः, क्वचित् हठाद् यथेष्टं धनमपि लुण्ठितम्। नैतावदेवं सर्वमपि भारतं यथा यवनधर्ममनुसरेत्, तथैव एतैः प्रकामं प्रयतितम्। धनलोभं प्रदर्श्य नानाविधाः भारतीयाः यवनधर्मे परिवर्तिताः।

भारते यानि प्रसिद्धानि तीर्थानि आसन्, तानि सर्वाण्यपि मृत्तिकावशिष्टानि कृतानि। सर्वत्रैव हाहाकारः, सर्वत्रैव दुःखं दृश्यमानमासीत्।

किञ्च—भारतं-भारतं-तावत्कालपर्यंतं समभूत्-यावद् राज्यतंत्रं भारतीयाना राज्ञामेव वश्यमभूत्—अन्यथा वैदेशिकसत्तया नैजमाधिपत्यं न स्थापितम्।

यदा प्रभृति-विविध-कला-कलाप-चातुरीचणं भारतं यवनानां हस्ते पतितं, तदा प्रभृति परं शैथिल्यं प्राप। किम् वक्तव्यम्—भारतीयानि च तक्षशिलानालन्दादिस्थानान्यपि विद्यापीठानि कथाशेषतां जग्मुः। सर्वं भारतीयं वेषभूषादिकं धार्मिकञ्च कार्यमस्तमितम्।

अहो ! परिवर्तनशीले संसारे, समस्तमपि वस्तुजातं विनिमयते। स्वातंत्र्यादस्वातंत्र्यम्, निर्धनात्-संपच्छालित्वं, ओजस्विता च संलक्ष्यते। तत् समये-एतस्माद् दुःखसमूहाद् भारतवर्षमपि पृथग् गणयितुं न शक्यते। यतोऽत्र स्वातंत्र्यस्थाने पारतंत्र्यं व्यवस्थितम्। एतच्च पारतंत्र्यं निर्धनत्व-धर्मनाशादयश्च भारतवर्षेणाऽप्यङ्गीकृताः। यतः परिणतिरीदृशी जाता-यथा-नैजमाचारविचारादिकं दूरे विहाय स्वकीयमर्यादोल्लंघनाद् नानाविधानि दुःखानि समभूवन्।

किन्तु-दुःखस्य चरमसीम्नि एव सुखं परिदृश्यते, निराशायाः अन्तिमे भागे आशायाः तेजः-शलाका नित्यं नृत्यति, अमायाः समीप एव चन्द्रकला विद्योतते।

तथा च-भासः—

सुखं हि दुःखान्यनुभूय शोभते,
यथाऽन्धकारादिव दीपदर्शनम्।

किरातार्जुनीयेऽपि—

प्रायेण सत्यपि हितार्थकरे विधौ हि,
श्रेयांसि लब्धुमसुखानि विनान्तरायैः। (५-४६)

एतादृशेभ्यः दुःखितेभ्यः संतप्तेभ्यः सुखं प्रदातुमेव सर्वत्र शान्तेः प्रचुरः प्रचारो यथा भवेत्, तदर्थमेव अनेन महावीरेण शिवराजेन स्वजन्मना भारतं समलंकृतम्। तथापि अस्य महावीरस्य नानाविधानि चरितानि भारतीयभाषासु वर्तन्ते, किन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीर्वाणगिरा विरलैरेव एनं महावीरं हिन्दुधर्म-प्राणभूतं शिववीरमधिकृत्य स्वलेखनीकण्डुः खण्डिता, स्वप्रदिभाविलासः प्रर्नशितश्च ।

कृतेऽपि प्रयत्ने ग्रन्थद्वयं लभ्येत वा न वा-इत्यत्र संशयः ।

यः शूरवीरेषु शिरोमणिः सन्,
अदम्यमुत्साहमिहादधानः ।
नांगीचकारेतरपारतन्त्र्यम्,
वीरं शिवाजीं विनता नमामः ।

अयं शिववीरः षोडशशताधिकसप्तविंशाति तमे वर्षे, त्रिंशत्तमे वर्षे वा. स्वजन्मना भारतं समलंचकार । केचित् पुनः तपस्ये (फाल्गुने) असिते तृतीयायां. अन्ये पुनः राधे (वैशाखे) सिते तृतीयायां मन्यन्ते । प्रायः महाकवीनां महावीराणाञ्च जन्मविषये न कदाऽपि सर्वेषां सम्प्रतिपत्तिर्भवति, प्रत्युत विप्रतिपत्तिबाहुल्यमेव दरीदृश्यते ।

अस्य धन्यौ पुनः पितरौ, सहाजी, जीजा माता च । अयं पुनः घोंसले कुलोत्पन्नः, बीजापुरबादशाहस्य सेनापतिः आसीत् । यद्यपि मनसि स्वदेशं स्वजातिमवलम्ब्य महान् स्नेहस्तथापि अनन्यगतिकतया सेवावृत्तिं करोति स्म । किन्तु यथा बीजं तथा निष्पत्तिः, आहोस्वित्-क्षीराश्रितमुदकं क्षीरमेव भवतीति, न्यायानुसारं पित्रोर्मनसि ये ये विचाराः प्रादुर्भूताः त एव पुत्रे प्राधान्येन समागताः । अस्य शिववीरस्य जन्म शिव एव नरः, अस्मिन् भारते वर्षे समुत्पन्न इति प्रदर्शयितुमेव शिवनराख्ये दुर्गे एव सञ्जातः ।※

भृशं विनीतं सुजनेषु नित्यं
जीजीजनन्या अनुरूपपुत्रम् ।
विकम्पयन्तं समरे स्वशत्रून् ।
शिवाजी वीरेति यथार्थसंज्ञम् ।

अयं हि शैशवे एव दादाजी-कुण्डदेवमहोदयात् अश्वारोहविद्यां, मल्लविद्यां, खड्गचालनचातुर्यं, बाणविद्याञ्च, आन्वीक्षिकीं राजनीतिञ्च, अधीत्य ऊनषोडशवर्ष एव तोरणं नाम विजिग्ये ।

तेजस्विनां वयः कदा न समीक्ष्यम्, तुलसीदासेनाऽपि हिन्दीभाषायां-'तेजवन्त लघु गणिये न राणी' । काकपक्षधरेण एव रामेण मारीचसुबाहू निहत्य विश्वामित्रस्य गुरोः यज्ञविघ्नाः दूरं दूरीकृताः । अत एव कालिदासेनाऽपि इममेव अभिप्रायं मनसि निधाय-"तेजसां न हि वयः, समीक्ष्यते" । इति । 'प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः' 'तेजो यस्य विराजते स बलवान्, स्थूलेषु कः प्रत्ययः । एतदनन्तरं-केषांचिद् वीराणां साहाय्यं गृहीत्वा अन्यानपि काँश्चिद् दुर्गान् अनेन शिववीरेण विजित्य महाराष्ट्रराज्यस्य शिलान्यासः कृतः । एतत् सर्वमसहमानः यवनराज प्रथममेव पुण्यपत्तने शिवराजं हन्तुं 'साहीस्तानखान' नामानं वीरं यवनसेनापतिं ससैन्यं प्राहिणोत् । किन्तु शिववीरेण विरलानामेव वीराणां साहाय्यं गृहीत्वा तस्य अङ्गुलयः विलूनाः कृत्वा तस्य पराजयं चकार शिववीरः ।

अयं हि महाराष्ट्रविषयः (देशः) पर्वतप्रचुरः, नानाविधगहनवनसंकुलः, भूमेरुच्चावचत्वात् मार्गोऽपि न समीचीनः । अत एव कृतप्रयत्नोऽपि यवनः नृपः असकृत् तं जेतुं विफलो बभूव ।

(क्रमशः)

※ये च-कौटिलीपार्थसंग्रहहृष्ट्या-'यस्याभियोगात् परे दुःखं गच्छन्ति तत् दुर्गम्' अथवा-'दुर्जनोर्योगविषयाद् वा स्वस्य विजिगीषोरपरो गमयति दुर्गम्' एतल्लक्षणकाः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते प्रेषणा (डाक) व्यवस्था

भारतीयशासनतन्त्रस्य प्रेषणाविभागेन (पोस्टल-डिपार्टमैण्ट) अक्टूबरमासस्य प्रथमतारिकायां टिकिटानां शताब्दीमहोत्सवः संमानितः। भारतेऽस्मिन् सर्वतः प्रथमं १८५४ तमस्य ख्रिष्टवत्सरस्य १ अक्टूबरदिने भारतस्यापि प्रेषणा (पोस्ट)विभागीयस्य पत्रस्य उपरि त्रिकटसंयोजनस्य प्रथा प्रथमप्रथमं परिचलिता। इतः पूर्वं १८४०तमे ख्रिस्तवत्सरे ब्रिटेनदेशेन विदेशे प्रेषणीयस्य पत्रस्योपरि त्रिकट (टिकिट) संश्लेषणस्य परिपाटी परिचालिता। किन्तु भारते १८५४ तमे संवत्सरे 'लार्डडलहौजी'शासने शुल्कपत्राणामारम्भोऽभवत्। भारतशासनतन्त्रस्य विवरणानुसारं वर्तमानकाले देशेऽस्मिन् (भारते) ४६००० संख्याकाः प्रेषणालयाः (पोस्ट-आफिस) सन्ति। एते हि प्रतिदिनं सप्ततिलक्षाणां पत्राणामादान-प्रदानं कुर्वन्ति।

पत्राणीमानि ३६ भाषासु लिखितानि भारतीयप्रेषणाविभागेन परितः प्रेष्यन्ते। सर्वाण्यपि पत्राणि याताऽऽयातयोः कार्यक्रमे, न्यूनाद्न्यूनं दशवारान् प्रेषणाविभागीयैः कर्मचारिभिर्निरीक्ष्यन्ते. इति हि विभागस्याऽस्य सुप्रबन्धः। पत्राण्येतानि भूतलेऽस्मिन् द्विलक्षक्रोशपरिमिते प्रदेशे याताऽऽयातं कुर्वन्ति। गगनमण्डले च विंशतिसहस्रक्रोशमितं व्योममार्गं वायुयानेनाऽतिक्रामन्ति। भारते सार्द्धसप्तनवतिशतं पत्रमञ्जूषाः सन्ति।

भारतीयशासनतन्त्रेण या 'पञ्चवर्षीया योजना' निर्णीता, तस्यां भारते प्रेषणालयानाम् [illegible] समधिका वृद्धिः सिद्धान्तिता। साम्प्रतं हि भारतसर्वकारस्तेषु सर्वेष्वपि ग्रामेषु एकैकं प्रेषणालयं स्थापयितुमिच्छति, येषु जनसंख्या २००० तो न स्यान्न्यूना।

शताब्दीमहोत्सवेऽस्मिन् प्रेषणाविभागीयानां त्रिकटानां (टिकिट) अन्ताराष्ट्रिया एका 'बहत्-प्रदर्शिनी' अपि ससमारोहं संभृताऽभूत्, यस्यां संसारस्य ७४ देशैः सोत्साहं भागो गृहीतः। प्रदर्शिन्या अमुष्या उद्घाटनसमारोहो भारतप्रधानमन्त्रिणा नेहरूमहाभागेन १ अक्टूबरे दिने भारतराजधान्यां सोल्लासं निर्वर्तितः। तस्मिन्नुत्सवे प्रदर्शिनी, विवरणपाठः, चित्रप्रदर्शनादीनि नानाकार्याण्यन्यानि तु संजातान्येव। किन्तु यस्मिन्नवसरे उद्घाटनमुहूर्तः समभवत्तस्मिन् समये विस्मयेन, प्रमोदेन, गर्वोल्लासेन च जनता समभूदेकवारमेव अभिभूता। यतो हि अवसरेऽस्मिन् भारतीयराजनीतेः संदेशप्रेषणस्य किञ्चिद् दिग्दर्शनमिव लोकानां स्मृतौ अवतारितम्। उद्घाटनस्य साक्षात् क्षणे एव अकस्माद् गगनादुड्डीय पञ्च कपोता उत्सवमंडपस्योपरि तले अवतीर्णाः। येभ्यो द्वौ कपोतौ नेहरूमहोदयस्य हस्ते उपविश्य संदेशं प्रापितवन्तौ।

हिमनगरम्

[मानवोद्भावितं नवीननगरम्]

भौतिकविज्ञानेन पाश्चात्यदेशीया अन्तरिक्षयात्रायै नानाविधान् सफलोपायान् प्रत्यहं कुर्वन्ति। मङ्गल-चन्द्रलोकादिषु मानवो गच्छेत्, सत्यां सुविधायां तत्र निवासमपि कल्पयेदिति एतत्संबन्धिसंवादान् संवादपत्रेषु प्रत्यहं पठन्त्येव पाठकमहोदयाः। किन्तु भूप्रदेशेऽपि अद्यावधि अप्राप्तां सुविधां विज्ञानबलेन ते प्रचारयेयुरिति संवादाः श्रूयन्ते [illegible]। उत्तरीय-ध्रुवप्रदेशः असाधा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणशीतकारणात् मानवनिवासयोग्यो नास्तीत्यद्यावधि निर्धारितं मानवैः।

किन्तु सोवियत (रूस) प्रदेशीयैः शिल्पिभिः एकस्य 'हिमनगरस्य' मानचित्रमेव स्थिरीकृतं यस्याऽऽधारेण तत्र मानवानां सुखपूर्वको निवासः संभवेत्। तत्र हि "तन्नगरस्य "जलवायू" मानवानुकूलौ पृथग् भवेताम्। तत्रत्या जीवधारिणः पृथग्विधाः स्युः, वनस्पतयो विभिन्नाः स्युः। अन्यत्किम्, तत्रत्यः सूर्योऽपि तत्रत्यः पृथगेव भवेत्। 'तास' प्रदेशीयेन एकेन संवादपत्रेण [मार्चस्य १० तारिकायाम्] नगरादेतस्माद् बहिः, कियदपि असह्यं शीतं किं न भवेत्, किन्तु एतन्नगरवासिनः समःशीतोष्णयोर्जल-वाय्वोरानन्दं सर्वदाऽनुभवेयुः। अधुनापर्यन्तं पञ्चशतमनुष्याणां कृते सेयं निवाससुविधा विज्ञानबलेन कल्पिता वैज्ञानिकैः। शनैः शनैरधिकाधिकं व्यवस्थासौकर्यं स्यादिति बुद्धिमद्भिः प्रतीयेतैव। अस्तु, भौतिकविज्ञानं मानवानां कृते सुख-सुविधामुत्तरोत्तरं संचारयेदिति सर्वेऽपि भगवन्तं प्रार्थयेरन्निति किमत्र विशेषविवरणेन।

शिक्षिता व्यक्तयश्चरित्रसंपन्ना भवेयुः

राजधान्या देहल्या 'विश्वविद्यालयस्य' उपकुलपतिः डा० चिन्तामणिदेशमुखमहाभागो युवकसमारोहे संमिलितेभ्यश्छात्रेभ्यः मार्चमासस्य १३ तारिकायां पुरस्कारान् वितताार। अवसरेऽस्मिन् समवेतेभ्यः सर्वेभ्योऽपि शिक्षाशास्त्रिभ्यः सविनयमनुरोधः कृतो यत् ते वर्तमानशिक्षाप्रणाल्याः कश्चिदेवंविधं परिष्कारं कुर्युः येन शिक्षिता व्यक्तयः सुचरित्रसंपन्ना भवेयुः। विचारश्चेत्क्रियेत तर्हि शिक्षाया मौलिकमुद्देश्यं चरित्रसंपन्नव्यक्तेर्निर्माणमेव। किन्तु विचारशाली पुरुषः स्पष्टमिमं खेदमनुभवेत् यद् वर्तमानसमये शिक्षाद्वारा मानवस्योपरि अभीष्टः प्रभावो नोत्पद्यते। प्रायः प्रत्येकदिने विद्यालयेषु शिक्षितानां, शिक्षमाणानां च अध्यापकैः सह, अधिकारिभिः साकमपि च संघर्षकथाः श्रूयन्ते। यो विनयो, या च सुशीलता शिक्षया आपाद्यते शिक्षमाणानां हृदये, तस्याः किल तदेतत् सुतरां विपरीतम्। अत एव शिक्षायाः फलं येन समुचितं निष्पद्येत, तदेतत्सर्वैरेव शिक्षाधिकारिभिः प्रयतनीयम्।

कलानां जीवने भूयः किल महत्त्वम्। महान् हर्षस्यायं विषयो यत् दिल्लीविश्वविद्यालयस्य छात्राः अध्ययनातिरिक्तं, कलाशिक्षणं प्रत्यपि सुतरामभिमुखाः। तदनन्तरं डा० देशमुखमहाभागः २४ छात्रेभ्यो नानाप्रकारान् पुरस्कारान् वितताार।

शिक्षा हि जीवनोपयुक्तान् सर्वानेव सद्गुणानुद्भावयति। तेषु चारु चरित्रं, विनयश्च प्राधान्यमावहतीत्यद्यावधि सर्वैरेव संस्कृतपण्डितैः समये समये सूचितम्। किन्तु साम्प्रतपर्यन्तमपि समुचितमवधानं शिक्षाधिकारिणां, शिक्षमाणानां च जातमिति बहुष्ववसरेष्वनुभूतम्। भगवान् भावयतु भव्यां भावनां भारतीयानामिति किमधिकेनात्र विवरणेन फलम्।

एन बी सी बेयरिंग
उन पहियों को चलाते हैं जिनसे

क्योंकि
NBC बेयरिंग
* बारीकी से बने हैं
* वैज्ञानिक प्रमाप विधि से बने हैं
* ऊंचे दर्जे के कार्बन क्रोम स्टील के बने हैं
* मजबूत हैं

निर्माता : नेशनल इंजिनियरिंग इंडस्ट्रीज लिमिटेड
(बेयरिंग डिविजन) जयपुर
बिक्री केन्द्र :
इंडिया एक्सचेन्ज बिल्डिंग, कलकत्ता-१ जो/३. पुडवेन्ट, १२/ए, बंकवे रिक्लेमेशन, कोलाबा रोड, बम्बई। ए-३३७, डिफेन्स कोलोनी, नई दिल्ली ० अमर निवास, ५६, मजीठा रोड अमृतसर ० बोस्को हवेन, ट्रीची रोड, कोयम्बटूर।

देश को शक्तिशाली बनाइए—राष्ट्रीय रक्षा सर्टिफिकेट्स खरीदिये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



पूर्वतोऽनुवृत्तम्—

तारकं तीर्थम्

दस्युराजस्य दुर्दान्तस्य दृढतमं शरीरं साम्प्रतमपि श्रमसहं विशालं, किन्तु-दुर्बलम्। साम्प्रतमपि स्थूल-सुदृढः स दीर्घदण्डस्तस्याऽस्ति हस्ते। किन्तु दण्डेन तेन सारमेया अपि न बिभ्यति साम्प्रतम्। शिरसः श्मश्रु-कूर्चयोश्चापि केशाः सर्वे सम्प्रति शुक्लीभूताः। परिधेयवस्त्राणि प्राचीनानि जीर्णानि च। निरुपानत्कौ, विच्छिन्नप्रायौ पादौ, परस्परं जटीभूताः-असंवृताः केशाः। सहसा दर्शने दुर्दान्तः कश्चित्तपस्वीव प्रतीयते। अयाचनेऽपि यदि भोजनं कश्चिद्दद्यात्तर्हि क्षुधा परिशाम्यति, अन्यथा कुत्रचिज्जलमेव निपीय कस्यचित्तरोरधस्तात्, कस्मिंश्चित् निर्जने देव-

डाकू सरदार दुर्दान्त का अत्यन्त मजबूत शरीर इस समय भी परिश्रम को सहन करने वाला और विशाल है, किन्तु है कमजोर। अब भी मोटा और मजबूत वह लम्बा डंडा उसके हाथ में है। किन्तु इस समय उस डंडे से कुत्ते भी नहीं डरते हैं। सिर और दाढी-मूंछ के सब बाल इस समय सफेद हो गये हैं। पहनने के कपड़े पुराने और फटे हुए हैं। जूते न पहने हुए प्रायः फटे हुए दोनों पैर, आपस में उलझे हुए (जटारूप) बिना संवारे हुए (उसके) केश हैं। अचानक देखने में दुर्दान्त कोई तपस्वी-सा मालूम पड़ता है। याचना न करने पर भी यदि (उसे) कोई भोजन दे दे तो (उसकी) भूख शान्त हो जाती है, वरना कहीं जल ही पीकर किसी पेड़ के नीचे, या किसी निर्जन देवमन्दिर में सम्पूर्ण रात्रि को (वह) व्यतीत करता है। बहुत ही कम

कुमारेश
लिवर और पेट की बीमारियों में
सालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल लिः · कुमारेश हाउस · हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दिरे वा संपूर्णां रात्रिं यापयति । अति-तमां स्वल्पं भाषते, किन्तु कण्ठस्वरे साम्प्रतमपि किञ्चिद् रूक्षता, भयानकता च प्रतीयते ।

"मातापितरौ सर्वतोऽपि पवित्रतमौ, महत्तमौ च तीर्थभूतौ । तयोः सेवा शुश्रूषा, तयोः कृते श्राद्धविधानं च सर्वतोऽपि पुण्य-तमं कर्तव्यम् ।" गयायामेकः तीर्थपुरोहितः समभून्मिलितः, स एव निर्धनस्याऽस्योपरि करुणां व्यधात् । मन्ये, सिकता-पिण्डानां विधानमेवंविधानामकिञ्चनाना-मेव कृते शास्त्रेण भवेत् समाज्ञप्तम् ।

"हन्त किञ्चिदपि सेवां नायं कृतवान् पामरतमस्तयोर्मातापित्रोः ।" इत्युक्तवानेव दुर्दान्तः सदैन्यं मुक्तकण्ठं च रुदितवान् । संभवतः सोऽयं सर्वतः प्रथमवारे एव एवं दैन्यतो रुदितवान् भवेन्नूनम् ।

"मा मा दुःखितो भवेर्भ्रातः । मातापितरौ नाद्य तिष्ठतस्तर्हि भवेन्नाम । किन्तु पूज्यतायां तत्समानः सोऽयं गुरुः पूज्यतमा गौः, अर्हतमाः साधवः, पावनास्तपस्विनश्च, सर्वतोऽपि श्रेष्ठतमानि चैतनानि तीर्थानि ।" पुनरगादीत्तीर्थपुरोहितः—"भवतः सोऽयं हार्दिकः पश्चात्तापः, अहह सर्वतोऽप्यधिकतमः । पश्चात्तापतः श्रेष्ठतरं पापक्षालकं तीर्थं नास्मिन् भूमण्डले महत्तमैरपि नूनं निर्दिष्टम् ।

बोलता है, किन्तु कण्ठ के स्वर में अब भी कुछ रूखापन और भयानकता प्रतीत होती है ।

"माता और पिता सभी से अत्यन्त पवित्र और बहुत बड़े तीर्थरूप हैं । उनकी सेवा, शुश्रूषा, और उनके लिए श्राद्ध करना सबसे ही अत्यन्त पवित्र कार्य है ।" गयाजी में एक तीर्थ-पुरोहित (पंडा) मिला । उसने ही इस निर्धन पर दया की । मैं ऐसा मानता हूं कि ऐसे निर्धनों के लिए ही शास्त्र ने मिट्टी के पिण्डों का विधान शायद बतलाया हो ।

" दुःख है, अतीव पामर इसने उन माता-पिता की कुछ भी सेवा नहीं की" इस प्रकार दुर्दान्त ने कहा और दीनता के साथ मुक्तकण्ठ हो, रोने लगा । संभव है, वह यह (दुर्दान्त) सब से पहली बार ही इस तरह दीनता से रोया हो ।

" हे भाई ! तुझे दुःखी नहीं होना चाहिए । माता-पिता आज विद्यमान नहीं हैं तो न सही । किन्तु पूज्यता में उनके समान यह गुरु है, अत्यन्त पूज्य गाय है, अतिपूज्य साधु हैं, और पवित्र करने वाले तपस्वी लोग हैं और सबसे अतिश्रेष्ठ ये तीर्थ हैं ।" पंडे ने फिर कहा—'आपका यह मन का पश्चात्ताप, अहो सबसे ही बहुत बढकर है । पश्चात्ताप से अतिश्रेष्ठ पापों को धोनेवाला तीर्थ इस संसार में बड़े आचार्यों के द्वारा भी निश्चय से नहीं बतलाया गया है ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No, J 7
Licence No. PP-6
"Licenced to Post
without Prepayment

सूक्ति-सुधा

मृत्योर्बिभेषि किं बाल न स भीतं विमुञ्चति ।
अद्य वर्षशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥१

अरे नादान ! तू मृत्यु से क्यों डरता है ? वह डरे हुए लोगों को नहीं छोड़ती । क्योंकि आज या सौ वर्ष में प्राणियों की मृत्यु होती तो अवश्य है ॥१

यो मुखसञ्ञतो भिक्खु मन्तभाणी अनुद्धतो ।
अत्थं धम्मञ्च दीपेति मधुरं तस्स भासितं ॥२

जो वाणी का संयमी है, मनन करके बोलता है, विनयी है, अर्थ-धर्म को प्रकाशित करता है, उसका भाषण मधुर होता है ॥२

यथापि रुचिरं पुप्फं वण्णवंत सगन्धकं ।
एवं सुभासिता वाचा सफलां होति सकुब्बते ॥३

जिस प्रकार सुन्दर पुष्प कार्ययुक्त तथा गंधयुक्त होने से सफल होता है, उसी प्रकार कथनानुसार कार्य करने वाले मनुष्य की सुभाषित वाणी सफल होती है ॥३

अभित्थरेथ कल्याण पापा चितं निवारयं ।
दन्धं हि करोतो पुञ्ञं पापस्मिं रमते मनो ॥४

शुभ कर्म करने में जल्दी करे पापों से मन को हटाये । शुभ कर्म करने में विलम्ब [illegible] मन पाप में प्रवृत्त होने लगता है ॥४

न सोऽस्ति पुरुषो राज्ञां यो न कामयते श्रियम् ।
अशक्ता एव सर्वत्र नरेन्द्रं पर्युपासते ॥५

राजा का कोई ऐसा सेवक नहीं मिलेगा जो राज्य श्री की अभिलाषा न करता हो, किन्तु एकमात्र असमर्थ मनुष्य ही सब प्रकार से राजा की सेवा करते हैं ॥५

प्रकाशक:—जयबहादुरसिंह पता :—गोपालजी का रास्ता, जयपुर

राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
गुरुकुल काँगड़ी

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

स्वामिविवेकानन्दप्रभृतीनां यो गुरुर्गरीयान् वै ।
श्रीरामकृष्णनामाऽर्पितधामा परमहंसः ॥

र्षम् १४
ङ्कः ७

वार्षिक मूल्यम् चतस्रो मुद्रा ४)
एकप्रतेः चत्वारिंशत् नवपणाः (४० न.पै.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रमसंख्या	लेखाः	लेखकाः	पृष्ठसंख्या
१.	कलेः प्रभावः	श्रीहरिहररायझा	१४३
२.	ईश्वरे सत्यं, सत्ये ईश्वरः	श्रीमती कृष्णकान्ता गुप्ता, आचार्या, जयपुरम्	१४४
३.	शिवशिक्षणम्	श्रीश्रीधरभास्करवर्णेकरः, नागपुरवासी	१४६
४.	शिवाजी	श्रीकन्हैयालालः भेड़ा, बम्बई	१४९
५.	राजस्थान-संस्कृत-साहित्यसम्मेलन-स्यैकादशाधिवेशने पुरस्कृताः पूर्तयः	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१५३
६.	हरिश्चन्द्रनाटकम्	श्रीदामोदरात्मजगोविन्दप्रसादशर्मा	१५४
७.	सम्पादकीयम्	सम्पादकः	१५७
८.	लघुकथा	श्रीकमलानाथशर्मा	१५८
९.	सूक्ति-सुधा	सम्पादकः	१६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-पञ्जाब-उत्तरप्रदेश-बिहार-मध्यप्रदेश-आंध्र-मद्रास-मैसूर-महाराष्ट्रसर्वंस्कारैः स्वीकृता-

सम्पादकः
कविशिरोमणिः
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भुवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवन,
गोपालजी का रास्ता,
जयपुर (राज०)

वर्षम् १४ | (मार्चमासः, सन् १९६४) | अङ्कः ५

कलेः प्रभावः

[ले० हरिहररायझा]

भूमौ कलेः प्रभावेण सञ्जातं परिवर्तनम् ।
जना देवालयान् त्यक्त्वा यान्ति चित्रपटालयम् ।
चन्दनं तिलकं भस्म व्यमुञ्चन् सुधियोऽधुना ।
श्वेतचूर्णादिभिर्वक्त्रे लेपं कुर्वन्ति प्रायशः ॥

मिष्टान्नं च फलं शाकं त्यक्त्वा सर्वेऽपि पण्डिताः ।
मांसं मद्यं च खादन्ति निर्विरोधं पिबन्ति च ॥
ध्यानं च भजनं त्यक्त्वा, एषा लीला कलेः किल ।
गायन्त्यश्लीलगीतानि सभामध्ये च सर्वतः ॥

गुरुर्माता पिता विप्रः प्रभावेण विनाऽभवत् ।
दुर्जनं कूटनीतिज्ञं तत्स्थाने कुरुते जनः ॥
आत्मद्रोही चात्मश्लाघी आत्महन्ता च वर्धते ।
मन्त्रशक्तेश्च स्थानेऽपि यन्त्रशक्तिस्तु गृह्यते ॥

दुग्धं घृतं जलं तैलं तक्रं विक्रीयते न हि ।
एवं कृते भवेत् पापं लिखितं मनुना स्मृतौ ॥
दर्शनं दुर्लभं पुंसां पञ्चानान्तु कलौ युगे
दुग्धं तथा घृतञ्चापि लभ्यते कृत्रिमं तथा

मानवस्य बलात्कारः कामं लोभश्च वर्धते ॥
ईश्वरस्योपयोगोऽपि शपथायैव केवलम् ।
वेदशास्त्रपुराणानां मिथ्यार्थः कथ्यतेऽधुना ॥
यज्ञधूमे विरोधोऽस्ति धूम्रपाने तथाऽऽदरः ।

'कर्म' 'ज्ञानं' तथा 'भक्तिः', एतत्तु साधनत्रयम् ।
अस्य कलेः प्रभावेण समूलमाशु नङ्क्ष्यति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईश्वरे सत्यं, सत्ये ईश्वरः

(लेखिका—श्रीमती कृष्णकान्ता गुप्ता, आचार्या, वैदिक-कन्याविद्यालयः, आदर्शनगरं, जयपुरम्)

सत्यव्रतः उत्कृष्टकर्मभिः शुभसंस्कारैः एतस्मिन् संसारे जातः। अल्पकाले एव मेधाबलप्रतिभां दर्शयितुम् प्रारब्धवान्। सदाचारेण, सद्व्यवहारेण शिष्टाचारेण न केवलं निजम्, अपि तु सर्वलोकान् अपि सन्तोषयति स्म। एतैर्गुणैः युक्तः सः स्वपितरं वणिजं असत्येन कपटेन च व्यापारं कुर्वन्तम् दृष्ट्वा महादुःखी अभवत्। सः सत्यवादी अन्यायमत्याचारम् च न अस्पृशत्। तस्य सच्चरित्रस्य प्रसिद्धिः बहुस्थानेषु लोकैः श्रुता। एकस्मिन् अभियोगे स्वपितुः विरुद्धे पक्षे साक्षी अभवत्। इत्थं सत्यव्रतस्य पिता स्वपुत्रस्य सत्यसाक्ष्येण अभियोगे पराजितः। एतेन पराजयेनोत्तेजितः पिता पुत्रम् गृहात् निष्कासितवान्। स्वसम्बन्धिनां मोहः तस्य मार्गे न बाधकोऽभवत्' लक्षाणाम् सम्पत्ति त्युक्तुम् च सः साहसी किंचिदपि दुःखम् नामन्यत। एकस्य महात्मनः आश्रमे उषित्वा वेदशास्त्राणाम् अध्ययनं कृतवान्। यदा सः पंचविंशतिवर्षाणि प्राप्तवान्, तदा धर्मप्रचारार्थं प्रस्थितः महात्मा सत्यव्रत-नामधेयेन प्रसिद्धोऽभवत्।

सत्येन समानं न तपः, अनृतेन समानं न पापम्,
यस्य मनसि सत्यं, तत्रैवास्ति ईश्वरनिवासः।

महात्मा सत्यव्रतः सत्यस्य पूजकः आसीत्। उपरिलिखितशब्देषु तस्य जीवनस्य प्रचारस्य च ध्येयम् दर्शितम्। "सत्ये ईश्वरः, ईशे च सत्यम् निहितम्" एतम् नियमम् सदैवामन्यत।

विभिन्नग्रामेषु नानानगरेषु च उपदेशेन सः लोकानाम् सन्तप्तहृदयानि अशामयत्। कस्मिंश्चित् स्थाने सः महात्मा द्वाभ्याम् दिनाभ्याम् नाधिककालम् एकत्र विश्रामम् करोति स्म। सः केवलं भोजनमखादत् तस्यैव गृहस्थस्य यः सत्यवादी अभवत्, कदापि नानृतम् अवदत्। यदि एतादृशः सत्पुरुषो नोपलब्धः कस्मिंश्चित् नगरे तर्हि तेन तदा उपवासः कृतः।

एकस्मिन् दिवसे एकनगरे उपदेशानन्तरम् एको भक्तः श्रोता महात्मानम् शिष्यान् च भोजने न्यमन्त्रयत्। महात्मा तं भक्तमपृच्छत् "कियन्तः पुत्राः भवतः?"

भक्तः प्रत्यवदत्— 'एकः'।

महात्मा द्वितीयम् प्रश्नमपृच्छत्–'किं ते पत्नी अस्ति?' भक्तः प्रोवाच 'नैवास्ति।'

महात्मापृच्छत्'—भवान् धनिकोऽस्ति। त्वया कियान् धनराशिः धृतः? भक्तोऽकथयत्, "पंचाशत्सहस्रमितं धनम् धारयामि।"

महात्मना भोजननिमन्त्रणम् स्वीकृतम्। भक्तश्च तम् प्रणम्य प्रत्यागच्छत्। एकोऽन्यः ईर्ष्यायुक्तः पुरुषः सभायाः अन्तकाले तथैव स्थितः महात्मानं चाकथयत्, "तेन भक्तेन सर्वथानृतम् उदितम्। अतः भोजनग्रहणम् नास्त्युचितम् तस्य गृहे।'

महात्माऽकथयत् "कथम्?"

सः पुरुषोऽवदत् 'तस्य धनिनः त्रयः पुत्राः सन्ति, किन्तु भवतः पुरतः सः स्वम् एकपुत्रधारिणम् अमन्यत। तस्य पत्नी जीवितास्ति परम् सः स्वम् पत्नीविहीनम् अङ्गीकरोति। लक्षरूप्याणाम् स्वामी भवन् केवलं पंचाशत्सहस्रधनराशिधरं स्वं कथयति।"

महात्मा प्रत्यवदत्—"मम आत्मा कथयति यत् तेन भक्तेन न कदाप्यनृतमुक्तम्। अत्यन्तश्रद्धया भोजनाय निमन्त्रिताः वयम् तेन। यत् अस्माभिः तदर्थं वचः दत्तम्, ततः तस्य पालनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकम् कर्त्तव्यमस्ति। साधुः— त्वया या शंका उद्भाविता ताम् अपनीय भोजनं खादिष्यामः।"

अन्येद्युः भक्तस्य वत्सो नियतसमये तं महात्मानं शिष्यान् च निजगृहमार्गदर्शनाय आगतः। सर्वे भक्तस्य गृहं गताः। धनिकभक्तेन अतिथयः अभिनन्दिताः। महात्मनः पादौ स्पृष्ट्वा भक्तः सर्वान् भोजनं कर्त्तुम् अकथयत्। महात्मा भक्तम् अवदत्, "भोजनात् पूर्वम् अहमेकां शंकाम् अपनेतुमिच्छामि।" धनिकोऽकथयत्। "भगवन्! भवतः आगमनेन मम गृहम् पूतं जातम्। भवतः आज्ञाम् पालयितुम् अत्रास्मि।"

महात्मा अब्रवीत्, "तव कथनेन एकपुत्रधारी त्वमसि, परं भवतः एव एकस्य नगरनिवासिनः वचसा तव त्रयः पुत्राः सन्ति' इति।

धनिको प्रत्यवदत्, "महात्मन्! बहुवर्षेभ्यः पूर्वं मे ज्येष्ठः पुत्रो मत्तः पृथगभवत्। सः निजव्यापारं करोति स्वपरिवारं च पालयति। यद्यपि सः जीवितोऽस्ति तथापि मम कृते मृतेन समानः। कनिष्ठः पुत्रः निरर्थकोऽभवत्, विद्याविहीनः कुलकलंकोऽवर्तत। मया दुःखिना सः सम्पत्त्या वंचितः—अतः तेनापि सह न मे कश्चित् सम्बन्धोऽस्ति। केवलम् मध्यमः पुत्रः मामनुगच्छति। सुशीलः धर्मनिष्ठावान् सः व्यापारम् सुष्ठु करोति। पापाद् बिभेति, अतः अहमेकपुत्रवान् अस्मि।

महात्मा उक्तवान्, "साधूक्तम् त्वया। तव वचनेन पत्नीरहितोऽसि, परं तेनैव नगरनिवासिना उक्तम् यत् भवतः पत्नी जीवितास्ति।"

धनिकोऽवदत्, "गतपंचदशवर्षेभ्यः आवयोः न पतिपत्नीसम्बन्धोऽस्ति संयमेन आवाम् वसावः। सा मम सखा, सहचरी, परं न पत्नी।"

महात्मा उवाच—'सुष्ठु कथितम्'।

पुनश्च सः महात्मा भक्तमुवाच, "ह्यः त्वमकथयः यत् भवान् पंचाशत्सहस्रधनराशिं धारयति किन्तु तस्य पुरुषस्य कथनेन त्वम् लक्षपतिः।"

भक्तः प्रत्युवाच, "निस्सन्देहं मे कोषे चतुर्लक्षमितानि रुप्यकाणि भविष्यन्ति किन्तु अहं एतस्य धनस्य संरक्षकोऽस्मि न तु स्वामी, अहं तदेव स्वधनं मन्ये यत् किंचित् शुभकार्येभ्यः दत्तम् मया। धर्मव्यापारेण यदुपार्जितम् धनम् अनाथालयेभ्यः कन्यापाठशालाभ्यः पुस्तकालयेभ्यः विधवाश्रमेभ्यः अन्यधार्मिकसामाजिकसंस्थाभ्यः दत्तम् तदेव मे वास्तविकं धनमस्ति। न किंचिदपि असत्यम् उक्तम् मया। मम दानराशिः पंचाशत्सहस्रधनात् नाधिकः।"

महात्मा त्रीणि उत्तराणि श्रुत्वातिप्रसन्नोऽभवत् अकथयत् च, "सत्यसारः लब्धः त्वया, धन्योऽसि। अधुना भोजनं खादिष्यामः।"

भक्तः महात्मनः आशीर्वादं प्राप्य सन्तुष्टोऽभवत् अवदत् च, "महात्मन् भवान् ईश्वरेण तुल्यः। भवतः दर्शनं कृत्वा कृतकृत्योऽहमिति मन्ये। यदि माम् अपि शिष्यं मंन्यते भवान् तर्हि संसारजालमद्यैव त्यजामि।"

महात्मा प्रत्यवदत्, "सरसिजम् जले वसति परं उदकस्य एको बिन्दुरपि न तस्मिन् प्रविशति। अतः भवानपि संसारे वसन् विषयेभ्यः वियुक्तो भवतु। एतत् जगत् न त्यक्तुमावश्यकम्। त्वम् स्वतपसा त्यागेन च वास्तविकं सत्यम् प्राप्तवान्। यदि सत्यं गृहीतम् भवता, तर्हि ईश्वरः प्राप्तः सत्यमीश्वरः भगवान् च सत्यम्।"

महात्मा तदनन्तरम् भक्ताय आशिषं दत्त्वा अन्यनगरं प्रस्थितः।

★ ★ ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

श्रीशिवराज्योदये महाकाव्ये पञ्चमः सर्गः

शिवशिक्षणम्

(ले०—कविः श्री श्रीधरभास्करवर्णेकरः, नागपुरवासी)

श्रीरामकृष्णार्जुनभीममुख्य-
वीरोत्तमानां चरितामृतस्य।
प्रबोधयन्ती परमं रहस्यं
माताऽभवद्धर्मगुरुः शिवस्य ॥२९॥

(३० श्लोकतः ५४ श्लोकपर्यन्तं
जिजादेवीकृतः हितबोधः—)

वत्स ! स्वकं क्षत्रियजातिधर्मं
न जातु कृच्छ्रेष्वपि संजहीहि ।
रामावतारे स्वयमीश्वरेण
यः पालितो विश्वहितार्थमेव ॥३०॥

गोमातरं भूतलदेवतां तां
त्रायस्व सेवस्व भजस्व भक्त्या ।
पूर्णावतारे स्वयमीश्वरेण
स्वकर्मणाऽऽदिष्ट इवैष धर्मः ॥३१॥

वेदोक्तशुद्धाचरणैकवित्तान्
सत्तत्त्वसञ्चिन्तनमग्नचित्तान् ।
भूदेवतान् जङ्गमशास्त्रबोधान्
त्रायस्व विप्रान् स्वभुजाश्रयेण ॥३२॥

रामासु रामानुजवत् परासु
मातृत्वबुद्धिं सततं दधीथाः ।
पराङ्गना यस्य मता स्वमाता
स राजयोगी स च योगिराजः ॥३३॥

सन्तो वसन्तो विजने जने वा
संसेवनीया दृढभक्तितस्ते ।
श्रद्धत्स्व तत्सूक्तिषु सर्वथा त्वं
श्रेयस्करं नान्यदतोऽत्र लोके ॥३४॥

धर्मेषु सर्वेषु समत्वबुद्धिं
त्वं सर्वदा धारय धर्मनिष्ठः ।
मानव्यमाङ्गल्यपरा उदारा
धर्मा हि सर्वे भगवत्प्रणीताः ॥३५॥

वेदानुकूलो मनुना प्रणीतः
विभक्तवर्णाश्रमकर्मधर्मः ।
स एव पथ्योऽखिलमानवानां
तद्रक्षणं ते परमो हि धर्मः ॥३६॥

ईशाधिवास्यं सकलं हि तत्तत्
चराचरं गोचरमत्र यद्यत् ।
त्यक्तेन तेनैव न भुञ्जते ये
चौराहिते तान् खलु दण्डय त्वम् ॥३७॥

मान्यः स मे यः परमो हि धर्मः
परं स सापेक्षतयैव सेव्यः ।
देवद्रुहां पापकृतां खलानां
जानीहि हिंसामपि तामहिंसाम् ॥३८॥

एकान्तनिष्ठं त्रिविधं हि सत्यं
न श्रेयसे तद्वदहिंसकत्वम् ।
कर्तव्यमालोच्य सदात्मनीनं
पाल्यं द्वयं विश्वजनीनमेतत् ॥३९॥

द्विराह• गीतासु जनार्दनो यद्
वाक्यं स्मर त्वं चिरमुत्तमं तत् ।
श्रेयान् स्वधर्मो विगुणोऽपि लोके
भयावहोऽसौ परधर्म उच्चैः ॥४०॥

• दृश्यताम्–गीता–३/३५ । १८/४७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलस्य वर्णस्य च राष्ट्रकस्य
धर्मो हि कः का च परम्परा मे ।
अहर्निशं चिन्तय सम्यगेवं
चिन्तामणिश्चिन्तनमेतदेव ॥४१॥

अनन्यभक्त्या परमेश्वरस्य
स्थिरं मनः स्वं कुरु लोलशीलम् ।
यच्चञ्चलं बन्धनमत्र घोरं
स्थिरं पुनर्मुक्तिनिदानमेव ॥४२॥

यदैन्द्रियं पञ्चकमात्मसंस्थं
सोदर्यमप्यान्तरशात्रवं तत् ।
त्वं जागरूको निगृहाण शश्वत्
समीहसे चेत् प्रभुतां प्रभूताम् ॥४३॥

वाक् सूनृता कामदुघेव धेनुः
सा शारदा मङ्गलदेवता वा ।
सात्यन्तसिद्धिः सकलार्थदात्री
सैका परं कार्मणकर्म लोके ॥४४॥

मेरुर्निवासः खलु चेत् सुराणां
स नातिदूरे विहितो नराणाम् ।
मनस्विनां कर्मपरायणानां
हृदि स्थितो निश्चय एव मेरुः ॥४५॥

अस्तंगतो भानुरुदेति भूयः
क्षीणोऽपि चन्द्रो लभते विकासम् ।
छिन्नोऽपि वृक्षः श्रियमुद्बिभर्ति
तन्मा स्म भूः कार्यहतौ हताशः ॥४६॥

जहीहि भोगान् सुलभानपि त्वं
भोगा हि भोगा इव पन्नगानाम् ।
स्वधर्मकल्याणपरायणास्ते
महौजसो जातु न भोगसक्ताः ॥४७॥

महाजनैः सत्तमतत्त्वनिष्ठैः
क्षुण्णोऽत्र यः कण्टकितोऽपि पन्थाः ।
तमेव हि त्वं व्रज, तत्र नूनं
द्वारं चतुर्धापुरुषार्थसिद्धेः ॥४८॥

प्रतिक्षणं क्षीयत आयुरेतत्
नायाति यातोऽवसरः कदापि ।
तन्मा कृथा जातु वृथा स्वमायुः
पले क्षणे वा दिवसेऽथ मासे ॥४९॥

सदैव देवं भज पूजय त्वं
स्वकार्यसिद्धावपि मा स्म दृप्यः ।
विना जगन्नाथकृपाकटाक्षं
न दिव्यकार्ये प्रभवन्ति मर्त्याः ॥५०॥

समीहसे त्वं यदि सर्वथैव
लोकानुरागं भव सौम्यतेजाः ।
उल्लासने तोयनिधेः समर्था
चन्द्रप्रभा जातु न सूर्यकान्तिः ॥५१॥

कुमारेश
लिवर और पेट की बीमारियों में
मालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमित्रमित्रादिविवेकमादौ
विधाय, सम्यग् विनियोज्यमाना ।
दृढस्थिरा शाश्वतराजनीतिः
नूनं यशोनिःश्रयणीह लोके ॥५२॥

आपत्सु रामः समरेषुभीमः
दानेषु कर्णश्च नयेषु कृष्णः ।
भीष्मः प्रतिज्ञापरिपालनेषु
विक्रान्तकार्येषु भवाञ्जनेयः ॥५३॥

म्लेच्छैश्चिरायाक्रमिताऽतिपापैः
या मातृभूमिस्तव पुण्यभूमिः ।
प्राणव्ययेनापि विमोचयैनां
कर्तव्यमेतत्तव जन्मसिद्धम् ॥५४॥

एवं यथाकालमुदीर्यमाणैः
श्रुतेश्च सूक्तैरिव मारुतुक्तैः ।
संस्कारकृद्भिर्दृढसंस्कृतात्मा
सदा सदाचारपरायणोऽभूत् ॥५५॥

तत्पावनं शिवचरित्रमनन्यतुल्यं
बाल्येऽपि वीक्ष्य जनतादरनिर्भरासीत् ।
ऊर्जस्वलं सुविमलं निजधर्मनिष्ठं
चारित्र्यमेव जनभक्तिनिदानमेकम् ॥५६॥

इति श्रीशिवराज्योदये महाकाव्ये
'शिवशिक्षणं' नाम पञ्चमः सर्गः समाप्तः ।

★ ★ ★

❀ अपर गैंगेज शूगर मिल्स लिमिटेड
❀ दी अवध शूगर मिल्स लिमिटेड
❀ न्यू इण्डिया शूगर मिल्स लिमिटेड
❀ दी न्यू स्वदेशी शूगर मिल्स लिमिटेड
❀ भारत शूगर मिल्स लिमिटेड
❀ गोविन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्या इक्षुशर्करायाः निर्मातारः
मैनेजिंग एजेंट्सः—
दी काटन एजेण्ट्स प्राइवेट लि०
इन्डस्ट्री हाउस
१५६, चर्चगेट रिक्लेमेशन
बम्बई—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

शिवाजी

वैद्यराजः श्रीकन्हैयालालः भेड़ा, बम्बई

कदाचित् स्वराज्यसभायां तेन उद्घोषितं किम्-सम्प्रति यवनराज्यं निर्वीर्यञ्जातम्। तादृशः कोऽपि सेनापतिर्न मे लोचनगोचरीभवति, यः शिववीरस्य प्राणानपहरेत्, यश्च वा तं जीवग्राहं गृहीत्वा अत्राऽऽनयेत्। यश्च एवं कुर्यात्—तस्मै प्रभूतं पारितोषिकं प्रभूतं प्रदेशं प्रदास्यामि। यवननृपात् एतादृशं दुःखितं वचनमाकर्ण्य सभायां समुत्तस्थौ। अपि चाहं अवश्यं शिववीरं वन्दीकृत्य अत्र आनेष्यामि—इत्यपि प्रतिश्रुतवान्।

यावत्सैन्यं यावच्च धनं अन्यदपि आवश्यकं वस्तुजातं तेन अपेक्षितं तत्सर्वं यवननृपः तस्मै प्रायच्छत्, इतोऽप्यधिकं किञ्चिदपेक्ष्यते चेत्—आवश्यकसाहाय्यं तुभ्यं प्रदातुमहं बद्धपरिकरोऽस्मि इत्यपि सूचितवान्।

किन्तु—शिववीरस्य "स्वामिभक्तिः, अव्यसनिता, दाक्ष्यं, शुचित्वं, अमूर्खता, प्रागल्भ्यं, प्रतिभानवत्वं, क्षान्तिः, परमर्मवेदित्वं, जातिश्चेति प्रथमा इति गुणाः (अर्थकौटिल्यम्) इति दिशा—नानावेशधारिणः, नानाविधभाषाभाषिणश्च, शिववीरस्य चराः चरन्तः, अपसर्पाः सर्वत्र प्रसर्पन्तश्च आसन्। एते कदाचिद् यवनवेषेण यवनजातीया एव वयं इति कथयित्वा यवनराजं सिषेविरे। तेभ्यः चरेभ्यः यवननृपस्य राजनीतिं यवननृपस्य उदन्तजातं सर्वं शिववीरो नित्यं ज्ञातवान्।

अफजलखानः पुनः विशालया सेनया सह शिववीरेण योद्धुं प्रतस्थे। शिववीरस्य राजनीतिस्तु—

'वहेदमित्रं स्कन्धेन, यावत्कालविपर्ययः'।
तमेव चागते काले भिन्द्याद् घटमिवाश्मनः।
व्रजन्ति ते मूढधियः पराभवं,
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधाः,
न संवृताङ्गान्निशिता इवेषवः॥

एतादृशी आसीत्। स्वल्पसाहाय्यमेव अत्र प्रधानं निदानम्। न खलु विक्रमस्य अभाव इत्यवगन्तव्यं श्रोतृभिः। 'कोषो हि महीपतीनां जीवितं, न प्राणाः' कोषो हि राजेत्युच्यते, न भूपतीनां शरीरम्—इति नीतिवचनैः—नृपस्य कोषं सैन्यञ्च द्वयं भूषणम्, किन्तु शिववीरः, वयसा नातिमहान्, न वा प्रभूतं धनम् सैन्यं वा तस्य समीपे आसीत्। किन्तु नूतनं राज्यं निर्मातुं सज्जोऽयं भगवतः, भगवत्याः एव च सर्वदा साहाय्यं लेभे।

शठेषु नूनं शठवच्चरन्तं पुरः कदाचिन्मुगलाधिपेषु।
कृत्वा प्रतीकं च सुधर्मचक्रं, वीरं नमामः शिवराजसिंहम्।२।

इतश्च-अफजलखानः बीजापुरात् प्रस्थाय मध्येमार्गं मन्दिराणि विध्वंस्य, बलाद् दारा अपहृत्य, मैरेयमदपरवशः, गोपीनाथपण्डितनामानं कमपि स्वदूतं प्राहिणोत्। स हिन्दूजातीयः द्विजकुलोत्पन्नः विवशं यवनानां मृत्युं कुर्वन् आसीत्। द्वितीयवारं समागते तस्मिन् भवान्याः-अन्तर्मन्दिरे एव, स शिवनृपेण साक्षात्कृतः। उक्तश्च—भवन्तोऽपि महाराष्ट्रकुलोत्पन्नाः, अस्मत्सजातीया एव, भवान् साक्षात्कृत्य कथनीयम्, अस्य अफजलखानस्य चेतसि किं वर्तते। एते यवनाः अस्माकं धर्मं लुप्तप्रायं कर्तुं कामयन्ते। दाराः हठादाहृत्य यवनीक्रियन्ते स्वान्तःपुरे स्थापयन्ति च। मन्दिराणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिन्दन्ति । किं वीरकुलोत्पन्नेभ्यो भवद्भ्यो रोचते एतत् सर्वम् । यवनैः महाराष्ट्रदेशो यवनमयः कृतः । किं भवन्तः ! द्रष्टुमभिलषन्ति । तदानीमेव गोपीनाथपण्डितेन न हि—न हि इत्येव उक्तम् ।

शिवनृपात्-एतादृशान् शब्दानाकर्ण्य लज्जितः अवनतमुखः, न किमपि वक्तुमपारयत् ? अन्ते च तस्य यवनस्य आगमनस्य रहस्यमपि शिवनृपस्य कर्णे कृतम् । निश्चितं दिनम्, समयोऽपि । प्रताप-दुर्गस्य मध्ये एव उभयोर्मिलनं स्यादित्यपि निर्णीतम् । सेवकानादिश्य प्रतापदुर्गस्य उपरि आगन्तुं नानाविधान् वृक्षान् छित्वा सुष्ठुपन्थानः निर्मिताः । तेन यवनेन एकाकिना एव आगन्तव्यम्, इत्यपि सूचितमासीत् । आवश्यकं सैन्यन्तु दुर्गस्याध एव स्थापनीयम् । एवं निर्णीते अपराह्णे-अफजल-खानोऽयं न केवलं शिवं द्रष्टुं समुत्कण्ठितः, अपि तु तं जीवग्राहं ग्रहीतुं-प्राणानपहर्तुञ्च । शिवनृपेण पुनः छिन्नानां वृक्षाणां पृष्ठतः गुप्तरूपेण स्वसैन्यं पदे पदे स्थापितमासीत् । न केनाऽपि एतज्ज्ञातम् । मध्याह्नसमये गोपीनाथपण्डितात् ज्ञातरहस्य एव शरीरं प्रथमं लौहमयेन वस्त्रेणान्तः-आच्छाद्य उपरि दुकूलमयमङ्गरक्षकं (कुर्ता) वक्षःस्थलं वार-बाणेन(लौहवस्त्रेण)पिधाय च सज्जीभूतः स्वांगुलीः सिंहनखैः समलंकृत्य भगवतीं भवानीं प्रणम्य प्रस्थितोऽयं यवनवीरं द्रष्टुम् । द्वौ वीरौ तस्य पार्श्वे आस्ताम्, अफजलखानस्यापि पार्श्वे एकः, एवमपि पूर्वं निश्चितमासीत् । यदा दुर्गात्-महान् ध्वनिर्भविष्यति, तदा तु महाराष्ट्रसैन्येन अधः स्थिता यवनसेना हन्तव्या इति ।

अफजलखानस्तु—उन्नतः, शिववीरस्तु तदपेक्षया वामनः । समागते शिववीरे दूरं स्थितौ च पार्श्वानुचरौ अफजलखानः बाहू प्रसार्य तं समालिलिङ्ग । आलिङ्गनसमये शिववीरस्य पृष्ठे असि-प्रहारं चकार । तदानीमेव शिववीरः स्वांगुलिस्थितसिंहनखैः तस्य उदरं विददार । सर्वाण्यपि अन्त्राणि बहिरागतानि । स्थातुमसमर्थोऽयं यवनः भूमौ पपात । तदानीमेव अफजलखानस्य वीरेण शिवं हन्तुं प्रयतितम् । किञ्च पार्श्वस्थिताभ्यां सेवकाभ्यां सोऽपि पञ्चत्वं प्रापितः ।

संजातो दुर्गात् महान् ध्वनिः, अधःस्थिता सेनाऽपि वृक्षाणां पृष्ठतः स्थितैर्महाराष्ट्रवीरैः पराजिता । दुर्गध्वजस्य उपरि तस्य विलूनं शिरः पताकेव स्थापितमासीत् ।

यस्य भगवती भवानी सहायभूता, तादृशं वीरं वराकोऽयं यवनः कथं हन्तुं समर्थः स्यात् । एतदन्तरं अन्यानपि कानिचिद् दुर्गाणि विजित्य महाराष्ट्र-राजस्य प्रसारः सम्पादितः शिववीरेण । पुण्ययत्तन-समीपे वर्तमानं 'कोंडला' नाम दुर्गं कदाचित् शिव-नृपस्य जननी अवलोक्य सस्नेहं स्वसुतं शिवं प्राह । समीपे वर्तमानो दुर्गः—यवनानामधिकारे कथम्-अहमेनं दुर्गं स्वाधिकारेण भूषितं द्रष्टुं कामये । तदानीमेव तस्मिन् कार्ये तानाजीनामानं शूरं वीरं-आमंत्र्य स्व-स्वकार्यं कथयामास । स वीरः श्व एव भाविनं पुत्रस्य परिणय परित्यज्य दुर्गं जेतुं प्रतस्थे । घोरं युद्धमभूत् । दुर्गो जितः, यवनाः, पराजिताः । किन्तु तानाजीवीरस्य प्राणाः पञ्चत्वं प्रापिताः, केनाऽपि यवनेन । यदैव शिववीरेण अयं वृत्तान्तः श्रुतः, तदैव तस्य मुखात् सहसैव इमे शब्दा निर्गताः—दुर्गो जितः, किन्तु सिंहो गतः । तदाप्रभृत्येव 'सिंहदुर्ग इति तस्य नाम ' नूतनं संजातम् । अयमपि दुर्गः सम्प्रत्यपि पुण्ययत्तनसमीपे विराजते । यवनानां राज्यं क्षीणबलं दुर्बलञ्च सञ्जातम् । इदमुदन्तजातं दिल्लीपति-अवरङ्गजेबे-नाऽपि ज्ञातम् । ज्ञात्वेदं महाराष्ट्रराज्यस्य अभ्यु-दयमसहमानः कथमयं शिवनृपो हन्तव्य इति सोऽपि नक्तंदिवं चिन्तयामास । स्वामात्यानपि पप्रच्छ, ते सर्वेऽकथयन्, केनापि व्याजेन शिवनृपमत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमंत्र्य तं बन्दीकरिष्यामः, पशुमारं मारयिष्या-मश्च। पत्रमपि प्राहिणोत्। दिल्लीमागन्तु सहर्षं निमंत्रणमङ्गीकृत्य कांश्चिदेव वीरान् गृहीत्वा दिल्लीं प्रतस्थे शिववीरः।

अवरङ्गजेबस्य मनसि इदमासीत्। अयं सामन्तनृपोऽस्माकं भवतु, करं प्रददातु च। अन्यथा एतं हनिष्यामः। राज्यसभायां गतः शिववीरः यवनराजस्य आज्ञया बन्दीकृतः। स्थापितश्च कारागृहे। अनेन सह समागताः अन्येऽपि केचित्, तेन सह तत्रैव आसन्। किंकर्तव्यतामूढाः सर्वे किं करणीयम्, कथं वा अस्मात् कारागृहान्निर्गन्तव्यमिति विचारयामासुः।

परिभवोऽरिभवो हि सुदुःसहः (माघः ६–४५)

न पारतंत्र्यन्तु कदाऽपि सह्यम्
आयान्तु विघ्ना बहवो न चिन्ता।
एवं सुधैर्येण समाचरन्तं
वीरं नमामः शिवराजसिंहम्।३।

युक्ति विना कार्यं, न सिद्धिः, सम्प्रति सबला अपि अबलाः, सशक्ता अपि अशक्ताः, समर्थाश्चापि असमर्थाश्च सञ्जाताः। तैश्च निश्चितं-किमपि-तत्र-त्येभ्यो नृपेभ्यः अयं मिष्टान्नपूर्णाः पेटिकाः, उपहारत्वेन प्रेषयितुं प्रारेभे।

प्रथमतः एव रक्षापुरुषैः प्रतिदिनं पेटिकाः सूक्ष्मेक्षिकया परीक्षिताः, किन्तु तत्र मिष्टान्नं विना ते किमपि नापश्यन्। मासद्वयं–मासत्रयं एतादृशो नियमः प्रचलित एवासीत्। रक्षपुरुषाः—जातविश्वासाः परीक्षणे पेटिकाणां शिथिला बभूवुः। अयमपि क्रमः—बहूनि दिनानि-प्रचलितानि। एकस्मिन् दिने सपुत्रः शिववीरः पेटिकायां स्थितः परीक्षणं विना दिल्लीनगराद् बहिरागतश्च। व्यतीतासु चतुष्पञ्चघटिकासु सर्वत्रैव हाहाकारः सञ्जातः। पलायितः शिववीरः, राजनीतिज्ञं अवरङ्गजेबं वञ्चयित्वा। एवमेव सर्वत्र हाहाकार, सञ्जातः। प्रेषितञ्च सैन्यम्। अन्ये तस्य सेवकाः दिल्लीनगराद् बहिरेव सञ्जीभूताः समासन्।

द्वाभ्यां सह एकेन मार्गेण स्वपुत्रं वेषं विपरिवर्त्य प्राहिणोत्। स्वयमपि धृतसन्यासीवेशः, तादृशेनैव स्वसेवकेन सह, ग्रामाद् ग्रामं, देशाद् देशं, तीर्थात्–तीर्थं, परिभ्रमन्नयं सकुशलं स्वदेशं महाराष्ट्रं प्राप चिरेण। एवमवरङ्गजेबोऽपि तं ग्रहीतुं विफलो जातः—पुनश्च तदेव वाक्यं स्मरन्तु भवन्तः—यस्य भगवती भवानी सहायभूता, तस्य किमपि अहितं–कः कर्तुं शक्नुयात्—इति।

यः पर्वतीयः खलु मूषिकोऽयम्,
इतीव तुच्छामभिधामगृह्णात्।
आकम्पयच्चाप्यवरङ्गजीवम्,
वीरं स्तुमस्तं शिवराजसिंहम्।४।

संस्कृत भाषा का प्रचार करने वाली
संस्थाओं तथा व्यक्तियों के प्रति
शुभ कामनाओं के साथ

रामविलास नंदलाल

२१५–१७ कालबादेवी रोड

बम्बई—२

निर्यातक—तैल, तिलहन, खली खनिजोत्पादित वस्तुएं एवं कपास इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यच्च—को विहन्तुमलमास्थितोदये,
वासरश्रियमशीतिदीधितौ ।
(माघ. १४-८)

न तेजस्तेजस्वी प्रसृतमपरेषां विषहते,
स तस्य स्वोभावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः,
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ।१।
(उत्तररामचरित. ६-४)

एतावता समयेन बहवो दुर्गाः विजिताः, महाराष्ट्रराज्यं प्ररूढमूलं: पादपैरिव सुस्थिरं स्वस्थञ्चासीत् । न कोऽपिरिपुर्मनसाऽपि एनं जेतुमियेष । प्रत्युत-एतस्मात्-शिवनृपात्-सर्वे भयग्रस्ताः बभूवुः । बहुभिः सेनापतिभिः सम्बन्धिभिश्च प्रार्थितोऽयं-शिवः—रामगढे-राज्या भिषेकं-कर्तु मात्मनमैच्छत् । उपनयनाभावात्-कोऽपि अत्रत्यो ब्राह्मणः पौरोहितकृत्यं कर्तु सज्जो नाभवत् । अत एव सुकृतैकराशिकाशीतः—गागामहनामानं कमपि ब्राह्मणं सगौरवमामंत्र्य राज्याभिषेकस्य पौरोहितकार्यं सम्पादयामास ।

यः स्थापयामास सुधर्मं राज्यं,
गजेन्द्रतुल्यान् यवनान् विजित्वा ।
श्रीरामदासादिसतां विधेयं,
वीरं स्तुमस्तं शिवराजसिंहम् ।

अद्यापि वर्तन्ते काश्यां गागामहवंशजाताः पुत्रपौत्रादयः । अस्य शिवनृपस्य गुरुः श्रीरामदासो नाम महात्मा कश्चिदासीत्–तेन च महाराष्ट्रविषयस्य नामधेयं—आनन्दवनमिति कृतमासीत् । यस्य महाराष्ट्रे प्रथितस्य महात्मनः श्रीतुकारामसाधोरपि दर्शनं शिववीरेण कृतमासीत् इतीतिहासतोऽवगम्यते । (क्रमशः)

पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम् ४ (नियमः ८)

१. प्रकाशनस्थानम्	जयपुरम्
२. प्रकाशने कालावधिः	मासिक पत्रम्
३. मुद्रकस्य नाम	राधेश्यामशर्मा, "श्री शङ्कर आर्ट प्रिण्टर्स"
नागरिकता	राजस्थानी
संकेतः	त्रिपोलिया बाजार, जयपुरम्
४. प्रकाशकस्य नाम	श्री जयबहादुरसिंहः
नागरिकता	भारतीयः
संकेतः	भारती-भवनं, गोपालजी का रास्ता, जयपुर
५. संपादकस्य नाम	कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री
नागरिकता	भारतीयः
संकेतः	मञ्जु-निकुञ्ज, सी. स्कीम, जयपुरम्
६. पत्रस्य संपत्तेः अधिकारिणां अधिकारस्यांशभाजां वा जनानां संस्थाया नाम, संकेतश्च	'संस्कृत-प्रचार-परिषद्' जयपुरद्वारा प्रकाशितम् ।

अहं श्रीजयबहादुरसिंहः घोषयामि यत् उपरलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति ।

दिनाङ्कः २०-३-१९६४.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरदारशहरसम्पन्ने
राजस्थान-संस्कृत-साहित्यसम्मेलनस्यैकादशाधिवेशने
पुरस्कृताः पूर्तयः

कविरत्नं श्रीदीनानाथत्रिवेदी 'मधुपः, महाराजसंस्कृतकॉलेजः, जयपुरम्

(१) 'हिमवानद्य कम्पते'

देवतात्मापि दुर्दैवात् शैलराजोऽपि दुर्बलैः ।
नीचैश्चीनैः समाक्रान्तो 'हिमवानद्य कम्पते' ॥१॥

शैला भवन्ति निष्कम्पा भूरिभारभृतोऽचलाः ।
प्रोच्यतेऽतः कथं विज्ञैः 'हिमवानद्य कम्पते' ? ॥२॥

हिमपातवशात् कश्चिद् वेपमानः स्वयं जनः ।
दृष्ट्वा हिमाद्रिमाहेत्थम्–'हिमवानद्य कम्पते' ॥३॥

नित्यं प्रहरिणा येन विपद्भ्यो रक्षिता वयम् ।
चीनैरुत्पीडितः सोऽयं 'हिमवानद्य कम्पते' ॥४॥

युधिष्ठिरेषु भीमेषु वीरेषु सत्सु भारते ।
कथं स चीनाक्रमणात् 'हिमवानद्य कम्पते' ? ॥५॥

वाष्पयानस्थितानां नः शीताद् हृन्निशि कम्पते ।
वागेषा भवतां मिथ्या– 'हिमवानद्य कम्पते' ॥६॥

(२) 'मशकदशनमध्ये दन्तिनः सञ्चरन्ति'

अतुलितमहिफेनं पूर्वमेवोपभुज्य—
तदुपरि जन एको भूरिभङ्गां निपीय ।
वदति 'कथमिवैते हन्त भो भीमकायाः
मशकदशनमध्ये दन्तिनः सञ्चरन्ति' ? ॥१॥

श्रीकृष्णस्य यशोदां प्रत्युक्तिः—

जननि ! न मयका मृद् भक्षिता, पश्य वक्त्रम्
इति सविनयमुक्त्वा श्रीयशोदात्मजेन ।
त्रिभुवनमवलोक्याऽऽस्ये तदा साऽह हं हो–
'मशकदशनमध्ये दन्तिनः सञ्चरन्ति' ॥२॥

(३) 'राष्ट्रोन्नतौ बाधकाः'

लोकेऽस्मिन् ललनारताविव जरादैन्यादिदोषा नृणां,
निद्रायामिव मत्कुणा भगवतो भक्तौ च कामादयः ।
विद्यापावविनीतताप्रभृतयो दोषास्तथा दुर्जनाः–
भ्रष्टाचार–विरुद्धनीति–निपुणाः 'राष्ट्रोन्नतौ
बाधकाः' ॥१॥

[राजस्थान-संस्कृत-साहित्यसम्मेलनावसरे श्रीमधुपमहोदयेन श्राविता एताः समस्यापूर्तयः द्वितीयश्रेण्या पुरस्कृताः सञ्जाताः—इति प्रबन्धसम्पादकः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—

हरिश्चन्द्रनाटकम्

(पं० श्रीदामोदरात्मजगोविन्दप्रसादशर्मणा शास्त्रिणा दाधीचेन निर्मितम्)

दासी—यदाज्ञापयति स्वामिनि ! (इति गृहकर्मादिकं करोति)

रोहिताश्वः—(उद्याने पुष्पाणिं चिन्वन्तं तं कृष्णसर्पोऽदशत् । स रुदन् वदति) हे मातरौ ! मां पाहि मां पाहि। अहं प्राणान् त्यजामि। (एवं निगद्य प्राणान् अत्यजत्)

उद्यानपालः—(मृतबालकस्य मातरमुपेत्य) हे देवि ! अद्योद्याने सर्पदशनात् तव पुत्रो मृतः ।

दासी—(स्वपुत्रमरणं श्रुत्वा अचेतनां प्राप्य धरायां पतति । पुनः चिरेण चेतनां प्राप्य आचार्याणीं निवेदयति) अयि स्वामिनि ! अद्य मम पुत्रो मृतः । तत्र गंतुमिच्छामि । आज्ञापयतु भवती ।

आचार्याणी—हतभाग्ये ? सर्वं गृहकार्यमवशिष्टमस्ति । तत्कृत्वा पश्चात् गन्तुं शक्नोषि ।

दासी—यदाज्ञापयति आचार्याणी । (इति गृहकर्मणि दत्तचित्ताऽभवत्)

आचार्यः—भद्रे ! इयं तु कर्मचौरास्ति, अद्य अस्याः पुत्रो मृतः, श्वः अस्याः पतिर्मरिष्यति, परश्वः अस्याः कोऽपि अन्यः पंचत्वं यास्यति । एवं तु एषा प्रतिदिनं यास्यति । तदा तु-अस्माकं गृहकार्यं न भविष्यति । अतो दासीं मा प्रेषय ।

आचार्याणी—स्वामिन् ! अवहिताऽस्मि ।

दासी—स्वामिनि! मया सर्वं गृहकार्यं विहितम् । सायमपि संजातम् । अतोऽधुना गंतुमाज्ञापयतु भवती ।

आचार्याणी—त्वं गच्छ । परं च शीघ्रमेव समागच्छेः ।

दासी—(गच्छति । मृतपुत्रमेत्य विलपति) हा पुत्र ! हा मम जीवनाधार ! मां विहाय कुत्र गतोऽसि ? हा रोहिताश्व ! तव पिता मामेकाकिनीं विहाय न जाने कस्य चांडालस्य दास्यं करोति । हा वत्स ! त्वया सह मामपि नय । रुदन्ती वदति—

हे सूर्य हे चन्द्र दिशश्च देवाः
मातर्धरे ! रात्रिदिने ! स्थलं तत् ।
विज्ञापयध्वं च मृतात्मजस्य
यत्रास्त्यसौ तत्र गतोऽप्ययिष्ये ।।११।।

(इति रात्रौ विलपन्ती निकटवर्तिनः कस्मादाश्रमात् काष्ठानि चाग्निमानीय चितां विरचयति)

ब्राह्मणः—हे देवि ! तव पत्युः कृते तत्प्रदत्तराज्यं मया पुनः परावर्तयितुमैशि परंच तेन तत् न स्वीकृतम् । स स्वयं कष्टं सहते, तवापि च दुःखं ददते । एकदा त्वं राज्ञः राज्ञी आसीत् । अधुना तु कस्यापि विप्रस्य गृहे भृत्यत्वं करोषि । किमेतत् तव कृते साधारणदुःखमस्ति । अपरं च भर्त्रा सह तव वियोगोऽपि जातः । अद्य तव पुत्रोऽपि मृतः । त्वं तु सांप्रतं घोरतरं कष्टं सहसे । अतोऽहं तव कष्टं निवारयितुं अत्र समागतोऽस्मि । शृणु, अहं मंत्रबलेन तव पुत्रं जीवयिष्यामि । परं त्वं स्वपत्युः राज्यं गृहाण । अहं तव कृते सर्वं राज्यं ददामि । मे कथनं स्वीकुरु ।

दासी—विप्रवर ! अलं अनया वाचा । वयं दाने यद्वस्तु अदाम, तन्न कदापि गृह्णीमः । मम पुत्रो जीवेद् वा न जीवेत्, अस्य दुःखं यावन्न बाधते, तावत्तव वाण्याः । अहं राज्यं पुत्रं वा नेच्छामि, केवलं मम पत्युः सत्यप्रणस्य रक्षणं वांछामि । अतो भवान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथास्थानं गच्छेत् । नो चेत् शापं ददामि ।

(ब्राह्मणो निष्क्रान्तः)

द्वितीयदृश्यं समाप्तम् ।

—

तृतीय दृश्यम्

दासः-(रात्रौ घोरान्धकारे तस्याः विलापं श्रुत्वा तद्दिशामागत्य वदति) हे देवि ! पूर्वं मे स्वामिनः करं दत्वा पश्चाद् बालकं प्रज्वलय ।

दासी—(तद्वाचा स्वपतिं प्रत्यभिज्ञाय विलपति) श्रूयताम्—

हा नाथ ! पुत्रं मृतरोहिताश्वं
दग्धुं समायातु चितां करोमि ।
धृत्वा तमङ्के तु सहैव तेन
वह्नौ ज्वलिष्यामि सुतं दहन्ती ।।१२।।

दासः—(राज्ञीं परिचीय मृतं रोहिताश्वं च परिज्ञाय मूर्च्छितः सन् भूमौ पतितः—चिरं च चेतनां प्राप्य विलपति) हा पुत्र ! मां पापिनं विहाय कुत्र गतोऽसि । हा दैव ! एतत्त्वया किं कृतम् । हा पुत्र ! अधुना त्वां विना न जीविष्यामि । हा वत्स ! उत्तिष्ठ । ममापराधेनैव तव माता दुःखितास्ति । मम लाल ! तद्दुःखं परिहर । (एवं विलपन् रुदन् वदति)—

सौधेऽवसस्त्वं बहुसौख्यपूर्णे
हा पुत्र ! भूमौ पतितोऽसि चाद्य ।
उत्तिष्ठ मे वत्स कथं न वक्षि
योग्यं श्मशाने शयनं तु नास्ति ।।१३।।

दासी—हे नाथ ! विना रोहिताश्वं न जीविष्यामि । अनेनैव साकं अहम् मरिष्यामि । अतो भवान् आवां दहतु ।

दासः—(धैर्यं धृत्वा) हे प्रिये ? धैर्यं धर । आवां पराधीनौं स्वः । स्वस्वामिनिर्देशं विना मर्तुं न शक्नुवः । पूर्वं मम स्वामिकरं च देहि ।

हे देवि ! मे स्वामिकरं च दत्त्वा
शक्नोषि दग्धुं मृतबालकं ते ।
वस्त्रं पलं रूप्यकमन्यवस्तु
यद्विद्यते देहि ममाधिपाय ।।१४।।

दासी—धर्मनिष्ठ ! श्रूयताम्—

स्वामिन् ममैकं तु विशीर्णशीर्णं
वस्त्रं शरीरेऽस्ति न किंचिदन्यत् ।
शक्नोमि दातुं धृतवस्त्रखंडं
तत्प्राक् गृहाणादिश तं च दग्धुम् ।।१५।।

(इति धृतवस्त्रात् करेणखंड़मेकं विदार्य ददाति)

दासः—(स्वामिनः करं गृहीत्वा सः स्वयं सुतं दग्धुं यतमानः पूर्वमग्निदेवं प्रार्थयति)—हे अग्ने ! मम पुत्राय मोक्षं देहि ।

(इति प्रज्वलिततूलिकापुंजं गृह्णाति)

विष्णुः—(स्वकरेण राज्ञः साग्निकं हस्तं गृहीत्वा वदति) हे राजन् ! भुवनत्रये त्वादृशः सत्यवादी, धर्मात्मा, दानशीलः कोऽपि राजा नास्ति । त्वं विश्वामित्रादिदेवैः परीक्षितोऽसि । अतो मा प्रज्वलय पुत्रम् । श्रूयताम्—

राजन् ! वयं सर्वसुराः प्रसन्ना-
स्तुभ्यं प्रदद्मश्च वरान् यथेच्छान् ।
स्वर्गं तु चेदिच्छसि गच्छ तत्र
राज्यं यदीच्छेः खलु भुंग्धि तत्त्वम् ।।१६।।

(तदनन्तरं कौशिकादिदेवाः प्रकटिताः संजाताः)

राजा—(सर्वान् नमति प्रार्थयति च) हे देवाः ! अद्य भवतां दर्शनेन कृतकृत्योऽस्मि । न च किमपि वांछामि । केवलं प्रजया सह स्वर्गं गन्तुमिच्छामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णु—एवमस्तु ।

शैव्या—(सर्वान् प्रणम्य विष्णुं प्रार्थयति) हे जगदीश्वर ! एतदेवाऽहं वांछामि यत् मे कदापि पत्युर्वियोगो न भवेत् । सर्वदा तस्य सेवां कुर्याम् ।

विष्णु :—तथास्तु ।

धन्याऽसि शैव्ये ! पतिरीदृशस्ते
सत्यप्रतिज्ञो बलवान् यशस्वी ।
दानी धनी धैर्यधरोऽस्ति धर्मी
मायेयमासीन्मुनिकौशिकस्य ॥१७॥

शैव्या—हे भगवन् मम ! मृतबालकं संजीवय ।

विष्णुः—तथास्तु । (पुत्रं प्रति वदति)—
उत्तिष्ठ हे पुत्र ! विसृज्य निद्रां
सुप्तोऽधिकं जागृहि सांप्रतं त्वम् ।
चिन्तातुरौ स्तः पितरौ त्वदीयौ
त्वां द्रष्टुमिच्छन्ति सुरादयोऽपि ॥१८॥

रोहिताश्वः—(साश्चर्यं समुत्थाय सर्वान् प्रणमति विष्णवे निवेदयति च)—हे भगवन् ! अद्य मम अहोभाग्यमस्ति 'यद् भवतां सर्वेषां, देवानां दर्शनं जातम् । सर्वे मम पित्रोः कष्टं संहरन्तु ।

विष्णुः—हे वत्स ! त्वयि जीविते सति तव पितरौ कष्टं पातुं न शक्नुतः । अहं त्वयि प्रसन्नोऽस्मि । किमिच्छसि । कथय ।

रोहिताश्वः—प्रभो ! निवेदयामि ।

याचे प्रभोऽहं वरमेतमेव
पित्रोश्च सेवां सततं प्रकुर्याम् ।
धर्मे च सत्कर्मणि पादयोस्ते
वेदादिशास्त्रेषु भवेद् रतिर्मे ॥१९॥

विष्णुः—एवमस्तु ।

विश्वामित्रः—राजन् ! मया परीक्षितस्त्वम् । अखिलभुवनेषु त्वादृशः कोऽपि सत्यवादी राजा नास्ति । भगवता नारदेन यदुक्तं तत्सत्यं मया दृष्टम् ।

राजा—राजर्षे ! अहं तव दासोऽस्मि । अन्या का आज्ञास्ति । आज्ञापय ।

विश्वामित्रः—सत्यवादिन् ! अधुना किमपि नेच्छामि अहं त्वयि प्रसन्नोऽस्मि । एतत्तव राज्यं गृहाण ।

राजा—(राज्यं गृहीत्वा स्वपुत्रं प्रति) हे पुत्र ! अहं तु स्वर्गं गच्छामि । त्वमधुना भूमंडलस्य राज्यं कुरु । प्रजां पालय । राज्य सुखं च भुंग्धि ।

शैव्या—हे वत्स ! अहमपि तव पित्रा सह स्वर्गं व्रजामि । त्वं पितृवत् शासनं विधेहि । धर्मेण प्रजां पालय । सदाचारेण सर्वान् जय ।

रोहिताश्वः—(राज्याभिषेकादिना राज्यं गृहीत्वा निवेदयति) हे पितरौ ! अहं युवयोः कामपि सेवां कर्तुं नाशकम् । सांप्रतं मामेकाकिनं विहाय द्वावेव स्वर्गं कथं गच्छतः ।

राजा—हे पुत्र ! यः पितरौ पापात् तारयति सः पुत्रो भवति । त्वं मम पुण्यकर्मणि बाधको मा भव । ममाज्ञां पालय ।

रोहिताश्वः—यदाज्ञापयति तातः ।

राजा—(विष्णुं प्रार्थयति) हे भगवन् !

प्रभो ! भारते भारतीया
तथा वेदाङ्गशास्त्राणि धर्मः ।
सदाचारसत्येतिहासाः पुराणं
त्वया संस्कृतिः सर्वथा पालनीयाः ॥२०॥

विष्णुः—हे राजन् ! एवमस्तु ।

शैव्या— (विष्णुं निवेदयति) हे प्रभो ! काश्यां मानवदुर्भावान् विलोक्य निवेदयामि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धूमपानेन सह ताम्बूलस्योपयोगः 'कैन्सर'रोगस्य कारणम्

भारते एव किं, संपूर्णभूमण्डले एव कैन्सर-रोगस्य परितो बाहुल्यमीक्ष्यते । प्राचीना वैद्या अनुभविनश्च बहुधा संगिरन्तः श्रूयन्ते यत्प्राचीनसमये सोऽयं रोगो न क्वापि श्रूयते स्म । साम्प्रतं तु भारतस्य स्थाने स्थाने सोऽयं दुष्टरोगः संश्रूयते, यस्य सफला चिकित्सा नाऽधुनापि चिकित्सकानां हस्तगता समभूत् । एतदर्थं स्थाने स्थाने विशिष्य रोगस्य कारणान्वेषणार्थं चिकित्सार्थं च चिकित्सालयाः स्थापिताः सन्ति, किन्तु नाधुनाऽपि सोऽयं पाप-रोगो भिषजाममीषां हस्तगतः साध्यश्च प्रसिध्यति ।

सिन्धुप्रान्तस्य कराचीनगरे कैन्सररोगस्य कृते विशेषचिकित्सालयो गवेषणालयश्च बहोः कालात् संस्थापितोऽस्ति । 'पाकस्थान कैन्सर इन्स्टिट्यूट'स्य अनुभविना एकेन प्रवक्त्रा स्वस्य कार्यविवरणं निर्दिशता प्रकाश्य घोषितम्–

"मुखे, कण्ठे वा कैन्सरोत्पत्तेः प्रधानं कारणमस्ति ताम्बूलाधिक्यम्, धूमवर्तेः सहैव उपयोगश्च । अस्मिन् चिकित्सालये 'सर्वेक्षणं कृत्वा गवेषकैर्निर्धारितं यत् स्थानेऽस्मिन् कण्ठे 'कैन्सर'वाहिनां रोगिणामपेक्षया पुप्फुसे (फैंफडा) कैन्सररोगिणां संख्या नितरां न्यूनाऽस्ति । कण्ठस्थरोगस्य च प्रधानं कारणं धूमवर्तेरुपयोगेन सह ताम्बूलभक्षणमेवास्ति । संप्रति भारते धूमपानस्य कियान् प्रचार इति सर्वेऽपि देशनिवासिनः सम्यक् परिजानते । प्रत्येकनगरे ताम्बूलिकाः अधिकलाभदृष्ट्या सहैव धूमवर्तिकाः ('बीडी') अपि विक्रीणते, येन कैन्सररोगस्य पदे पदे प्रवर्धनशङ्कां कलयन्ति मार्मिका लोकाः । अस्तु, किं विशेषविवरणेन । ये विचारशीलास्ते धूमपानेन सह ताम्बूलोपयोगं सद्य एव परित्यजेयुः । सहायकोऽस्तु भगवान् ।

* * *

कुटिलनीतिकलाऽत्र यदोत्थिता
विमलभारतपावनता गता ।
सहजभावविकाससुधान्विता
सुजनता जनतारण ! निर्गता ।।२१।।

विष्णुः—हे देवि ! भारतं विश्वहृदयमस्ति । अहं तस्मिन्नेव वसामि । स मम प्राणेभ्योऽप्यधिकप्रियोऽस्ति । कंचित् कालं यावत् तव भर्त्रा कस्मैचित् ब्राह्मणाय दाने प्रदत्ततया परतंत्रतां गतः । परं चाधुना सर्वतंत्रः स्वतंत्रोऽभवत् । अहं तस्मै चाशिषं ददामि ।

पुरा पारतंत्र्यांधकारप्रलुप्तं
प्रबुद्धमधुना सर्वतंत्रस्वतंत्रः ।
प्रजातंत्रराज्याभिषिक्तं पवित्रं
सदा भारतं भातु वः सच्चरित्रम् ।।२२।।

(इति सर्वे यथा स्वंगताः)

तृतीयदृश्यं समाप्तम् ।

समाप्तमिदं नाटकम् ।

शमिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

पूर्वतोऽनुवृत्तम्—

तारकं तीर्थम्

अहह दुर्दान्तः सोऽयं पूर्वतनो दुर्दान्तः क्वाऽधुनाऽस्ति ? जनाः साधारणतया तमेनं साधुं, स्वामिनं वा जानन्ति। एष हि साम्प्रतमद्वितीयो यात्री निष्पन्नोऽस्ति। यदि गावो दृष्टिगोचराश्चेद् भवेयुस्तर्हि सोऽयं वनस्य तृणान्युत्पाटयति। यावत्प्रत्येकधेनोः संमुखे कानिचित्तृणानि न स्थापये-त्तावन्नायमग्रे प्रसरति। यदि कश्चिद् भिक्षुकः, रोगक्लिष्टो वा संमिलेत्तर्हि न नूनं द्वित्राण्येव दिनानि, अपि तु मासमपि व्यतिगमयेत्तस्य सेवायाम्। अवश्यमयं साधूनाम्, 'सन्तमहात्मनाम्' च समीपे नाधिकं तिष्ठति। तेषां सूक्ष्मा ज्ञानचर्चा नाऽस्यं स्थूलायां बुद्धौ समाविशति। किन्तु सोऽयं महत्या श्रद्धया तान् सविनयं प्रण-मति। सुयोगश्चेन्मिलेत्तर्हि शुष्काणि समित्काष्ठानि तदन्तिके निदधाति। केषां-चिच्चरणसंवाहनं कुर्वाणोऽपि कंचित्कालं तेषां सविधे निषीदति। किन्तु अस्ति सोऽयं सर्वथा यात्री एव। कुत्रचित्स्थिरतया निवासो नाऽस्य परिचितो नूनम्। तस्य हि तीर्थयात्रा निर्विश्रामं यथावत्परि-चलति।

अहो, वह, यह दुर्दान्त पहले वाला दुर्दान्त अब कहां है ? लोग साधारण रूप से इस दुर्दान्त को साधु या स्वामी जानते हैं। निश्चय से इस समय यह अद्वितीय (बेजोड़) एक यात्री बन गया है। यदि गायें (इसे) दिखायी दे दें तो यह वन के घास को उखाड़ने लगता है। जब तक प्रत्येक गाय के संमुख कुछ घास नहीं रख देता तब तक यह आगे नहीं चलता है। यदि कोइ भिक्षुक या रोगी मिल जाये तो निश्चय से दो-तीन दिनों ही नहीं, किन्तु एक महीना भी उसकी सेवा में बिता देता। अवश्य यह साधुओं के और सन्त–महात्माओं के पास में अधिक नहीं ठहरता है। उनकी सूक्ष्म ज्ञान की चर्चा इसकी मोटी बुद्धि में नहीं प्रविष्ट होती है। किन्तु यह बड़ी श्रद्धा से उनको विनय के साथ प्रणाम करता है। अगर अच्छा योग मिल जाये तो सूखी समिधा की लकड़ियों को उनके पास में (लाकर) रख देता है। किन्हीं सन्तों के चरण संवाहन करता हुआ ही कुछ समय तक उनके पास में बैठ जाता है। किन्तु है यह पूर्णरूप से यात्री ही। स्थिर रूप से इसका निवास कहीं पर निश्चित नहीं है। उसकी तीर्थ-यात्रा निरन्तर (लगातार) यथावत् चलती रहती है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"भोः परमं तीर्थमस्ति पवित्रतमं निज-वित्तमेव नरस्याऽस्य।" उत्तराखण्डस्य यात्रां कुर्वाणस्याऽस्य सौभाग्यादेकः 'सन्त'-महात्मा समभिलत्, येन सह कतिचिद् दिनानि सोऽयं सहयात्रामकरोत्। दुर्दान्तः साधोरस्य आसन-मृगचर्मादिकं स्वकीय-स्कन्धे समवहत्। सोऽयं महात्मा प्रसन्नेन चेतसा समगदत्—"तव हृदयं संप्रति तीर्थ-तामगमत्। एवंविधाः पवित्रहृदयाः परोप-कारिणः साधुसेविनश्च पुरुषाः तीर्थेषु गत्वा तान्यपि तीर्थतां नयन्ति"।

विनम्रः तितिक्षुः क्षमामूर्तिश्च सोऽयं दुर्दान्तः कतिचिन्मासेभ्यो निरन्तरं भगवन्नामजपमप्यकार्षीत्। तस्य हृदयं कदाचित्कदाचित् स्वयमेव पश्चात्तापेन विषण्णमतिष्ठत्। श्रीबदरीनाथस्य श्री-विग्रहस्य संमुखे यदाऽयमुपातिष्ठत्, दैन्य-भावेन च साष्टाङ्गं प्राणमत्, तस्मिन् समये तस्य चरणौ स्वत एव प्राकम्पेताम्। भगवच्चरणौ प्रपश्यन्नेव सोऽयं निजमन्दिर-प्राङ्गणे एव धमिति न्यपतत्। समागताः 'सन्त'महात्मान एव तस्य देहं तस्माद्-स्थानादुत्थापयामासुः। भगवत्यामलक-नन्दायां च सोऽयं देहः समाहितोऽभवत्। तीर्थभूतोऽसौ तीर्थयात्री तीर्थराजेऽस्मिन् [illegible] भूय विश्रममलभत॥

"अरे, इस मनुष्य का अति पवित्र मन ही परमतीर्थ रूप है।" उत्तराखण्ड की यात्रा करते हुए इसे सौभाग्य से एक सन्त-महात्मा मिले, जिनके साथ कुछ दिनों तक इसने एक साथ यात्रा की। दुर्दान्त इस सन्त के आसन और मृगछाला आदि को अपने कन्धे पर रख कर ले चलता था। उस महात्मा ने प्रसन्न मनसे कहा—"तेरा हृदय इस समय तीर्थरूप हो गया है। इस प्रकार के पवित्र हृदय वाले परोपकारी और सन्तों की सेवा करने वाले मनुष्य तीर्थों में जाकर उन्हें भी तीर्थरूप बना देते हैं।"

अतिनम्र, कष्ट को सहन करने वाला और क्षमा की मूर्तिरूप यह दुर्दान्त कुछ महीनों से निर-न्तर भगवान् के नाम का जप भी किया करता था। उसका हृदय कभी-कभी अपने आप ही पश्चात्ताप के कारण खिन्न हो जाता था। श्री बदरीनाथ की मूर्ति के सम्मुख जिस समय यह खड़ा हुआ, और दीनता से इसने साष्टाङ्ग प्रणाम किया, उस समय उसके दोनों पैर स्वतः ही काँपने लगे। भगवान् के चरणों को देखता हुआ ही यह भगवन्मन्दिर के आँगन में ही धमाक से गिर पड़ा। (वहाँ पर) आये हुए सन्त-महात्माओं ने ही उसके शरीर को उस स्थान से उठाया और भगवती अलकनन्दा नदी में उसका वह यह शरीर प्रवाहित किया गया। (इस प्रकार) तीर्थरूप इस तीर्थयात्री ने इस तीर्थराज में तीर्थरूप होकर (सदा के लिए) विश्राम प्राप्त किया।

—हिन्द्यनुवादको दीनानाथद्विवेदी 'मधुपः'।

★ ★ ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP-6
"Licenced to Post
without Prepayment

सूक्ति-सुधा

अविदित्वात्मनः शक्तिं,
परस्य न समुत्सुकः ।
गच्छन्नभिमुखो नाशं,
याति वह्नौ पतंगवत् ।

—अपनी शक्ति और शत्रु की शक्ति का पता लगाये बिना जो बहुत शीघ्रता में आकर सामने जाता है, वह अग्नि के ऊपर गये हुए पतंग के समान नष्ट हो जाता है ।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तनुवर्तते ।

—श्रेष्ठ पुरुष जो-जो आचरण करता है, अन्य पुरुष भी उसके अनुसार ही बर्ताव करते हैं । वह जो कुछ प्रमाण कर देता है, लोग भी उसी के अनुसार चलते हैं ।

कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ?

—जो प्रिय है वह कितने भी अपराध करे, तो भी प्रिय ही बना रहता है । अनेक दोषों से दूषित होने पर भी अपना शरीर किसको प्रिय नहीं लगता ।

या लक्ष्मीर्नानुलिप्तांगी
वैरिशोणितकुंकुमैः
कान्ताऽपि मनसः प्रीतिं न
सा धत्ते मनस्विनाम् ।

—जो लक्ष्मी, शत्रुओं के रुधिररूपी केसर से चिह्नित नहीं होती, (जिसके अंग लिप्त नहीं होते) वह मनोहर होने पर भी वीर पुरुषों के मन को आनंदित नहीं करती ।

यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते
ध्रुवाणि तस्य नश्यन्ति
अध्रुवं नष्टमेव च ॥

—जो मनुष्य निश्चित कार्यों को छोडकर अनिश्चित के पीछे दौड़ता है उसके निश्चित कार्य भी नष्ट हो जाते हैं, अनिश्चित तो नष्ट ही हुआ रहता है ।

प्रकाशक :— जयबहादुरसिंह
पता :— गोपालजी का रास्ता, जयपुर

राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र
ती

तमासिकस्य

यु
र्वे
दा
ङ्कः

ाङ्कस्य मूल्यम्
चरूप्यकम्
★
वर्षम् १४
अङ्कौ ६-७
★
मुद्रकः
ङ्कर आर्ट प्रिण्टर्स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फैशन
क्वालिटी
बनावट में
अग्रणीय

ग्वालियर सूटिंग

GWALIOR FABRICS



दि ग्वालियर रेयन सिल्क मैन्यू० (वि०) कं० लि०
बिरला नगर - ग्वालियर

GR/NPS-172

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि आप

* राजस्थान की मौजूदा गतिविधियों से परिचित होना चाहते हैं
* राजस्थान के जन-जीवन और साहित्य एवं संस्कृति से अवगत होना चाहते हैं
* राजस्थान के महत्वपूर्ण ऐतिहासिक, पुरातत्व एवं आकर्षण स्थलों के बारे में जानना चाहते हैं

तो

राजस्थान के सचित्र मासिक

नवीन राजस्थान

को हर महिने पढ़ें

'नवीन राजस्थान' में अधिकृत विद्वानों, विशिष्ट कवियों एवं लेखकों, योजना के निर्माताओं और स्वतंत्र विचारधारा वाले विचारकों तथा लेखकों द्वारा—

* राष्ट्रीय एवं सामाजिक उद्देश्यों
* सांस्कृतिक एवं साहित्यक गतिविधियों
* योजना के बढ़ते चरण
* सैलानियों का आकर्षण केन्द्र
* योजना की खुली चर्चा आदि

स्तंभों में विचार व्यक्त किये जाते हैं।

दुरंगा रंगीन कवर, बहुरंगी कलात्मक चित्र, आदि से सुसज्जित पत्र का मूल्य—

वार्षिक चन्दा	एक प्रति
६ रुपये	५० नये पैसे

विज्ञापन तथा एजेंसी के नियमों के लिए

सम्पादक

'नवीन राजस्थान'

सार्वजनिक-सम्पर्क कार्यालय,

राजस्थान, जयपुर

से पत्र व्यवहार करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न हि जीवितदानाद्धिदानमन्यद् विशिष्यते

जन स्वास्थ्य समस्या समाधान के लिए

श्री धन्वन्तरि सेवा समिति जयपुर की विभिन्न प्रवृत्तियाँ

संस्थापक आयुर्वेदमार्तण्ड स्व० स्वामी श्री लक्ष्मीरामजी महाराज

श्री धन्वन्तरि भैषज निर्माणशाला

जयपुर

स्थापित २२ जून सन् १९२२

आयुर्वेदिक रसरसायन आसव, अरिष्ट, अवलेह, गुटिका चूर्ण, घृत, तैल आदि

औषधों का एकमात्र विश्वसनीय प्रतिष्ठान

निर्माणशाला के औषधरत्न

षड्गुणबलिजारितमकरध्वज, योगेन्द्ररस, वसन्तकुसुमाकर, स्वर्णवसन्तमालती, मल्लसिन्दूर, च्यवनप्राश, ब्राह्मीघृत, महात्रैफलघृत, महानारायणतैल ।

फार्मेसी के द्वारा प्रस्तुत औषधों की विक्री के लाभांश का उपयोग समिति द्वारा, औषधालय, आरोग्यशाला, एक्सरे विभागों में ही किया जाता है ।

फार्मेसी की दवा खरीदकर स्वास्थ्य एवं पुन्य लाभ प्राप्त करें ।

श्री धन्वन्तरि औषधालय, जयपुर

स्थापनाकाल २९ जून सन् १९१९

औषधालय में दैनिक रोगी संख्या ६०० के लगभग है

सुयोग्य चिकित्सकों से परामर्श लेकर स्वास्थ्य लाभ प्राप्त कीजिये । सधारण दवा के अतिरिक्त स्वर्णमुक्ताघटित योगों का प्रयोग भी किया जाता है ।

श्री धन्वन्तरि आरोग्यशाला

स्थापनाकाल १ मई सन् १९२८

कष्ट साध्य एवं जटिलरोगग्रस्त रोगियों को इस विभाग में प्रविष्ट पाकर स्वास्थ्यलाभ प्राप्त करना चाहिए ।

इस विभाग में :—२० शय्याओं का प्रबन्ध है ।

एक्सरे विभाग

इस विभाग की स्थापना केन्द्रीय सरकार से प्रदत्त १००००) रुपयों की सहायता एवं उतनी ही राशी संस्थाद्वारा व्यय करके १५ अगस्त सन् १९६३ से की है । एक्सरे विशेषज्ञ से परामर्श लेकर स्वास्थ्य लाभ प्राप्त कीजिये ।

सभी विभागों पर—गतवर्ष १८१०००) रुपये व्यय हुए थे ।

स्थायी सम्पत्ति—३०००००) रुपये के मूल्य के २ भवन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी

शुभकामना-सन्देशाः

संस्कृतमयीं 'भारती' पत्रिकां दृष्ट्वा प्रमुदितं मे चेतः। १३ वर्षैः सुरगिरामविरतं सेवां निर्वहन्ती मासिकपत्रिकेयं विषयवैविध्येन भाषासारल्येन च भृशमुपकरोति संस्कृतविदः। मूल्यमपि सर्वजनानुकूलं वर्तते।

अस्या उत्तरोत्तरं अभ्युदयं कामये। संस्कृतगौरवं संरक्षितुं धनिका अस्यै प्रभूतं साहाय्यं कुर्युरिति आशास्यते।

कुलपतिः
कन्हैयालाल मुन्शी
भारतीयविद्याभवनम्,
बम्बई

•

कृषि मन्त्री, भारत सरकार
MINISTER for AGRICULTURE
Government of INDIA
नयी दिल्ली,
मार्च २३, १९६४

सत्यमेव जयते

यह जानकर मुझे खुशी हुई कि श्रीयुत स्वामी जयरामदासजी महाराज के आयुर्वेद महाविद्यालय से अवकाश प्राप्त कर लेने पर आप लोग एक आयुर्वेद-विशेषांक इनके अभिनन्दन-ग्रन्थ के रूप में प्रकाशित करने जा रहे हैं।

आयुर्वेद एक प्राचीन देशी चिकित्सा प्रणाली है। आज भी सर्वसाधारण, विशेषकर गांव में रहने वाले लोग अधिक संख्या में इस देशी प्रणाली से ही अधिक लाभ उठाते हैं, क्योंकि इस प्रणाली के अनुसार चिकित्सा के लिए लोगों को न तो अधिक खर्च करने की जरूरत होती है और न ही विदेशों का मुँह जोहना पड़ता है। वस्तुतः आज आवश्यकता इस बात की है कि एलोपैथी के प्रचार के साथ-साथ आयुर्वेदिक इलाज के तरीकों को समय के अनुसार आगे बढ़ाया जाये, जिससे ये पुराने और अनुभव की कसौटी पर कसे हुए तरीके झील की तरह स्थिर न रहें, बल्कि बहती हुई नदी की तरह आगे बढ़ते जायें। इससे हम सार्वजनिक स्वास्थ्य का स्तर अधिक से अधिक ऊँचा करने और रोगों का निराकरण करने के अपने ध्येय में आशातीत सफलता प्राप्त कर सकते हैं!

मैं इस अवसर पर अपनी शुभकामनाएं भेजता हूँ और आशा करता हूँ कि यह विशेषांक न केवल आयुर्वेद के चिकित्साशास्त्रियों के लिए ही उपयोगी होगा, अपितु जन-साधारण को भी इससे अधिकाधिक लाभ पहुँच सकेगा।

रामसुभगसिंह

•

SPEAKER
RAJASTHAN LEGISLATIVE
ASSEMBLY
१३. सिविल लाइन्स,
जयपुर।
२१ नवम्बर, १९६३।

मुझे यह जानकर प्रसन्नता हुई कि श्री स्वामी जयरामदासजी महाराज के आयुर्वेद महाविद्यालय से अवकाश प्राप्त कर लेने के अवसर पर संस्कृत मासिक पत्रिका "भारती" एक अभिनन्दन-ग्रन्थ प्रकाशित कर रही है जिसकी सफलता के लिए मेरी हार्दिक शुभकामनाएँ प्रेषित हैं। स्वामी जयरामदासजी महाराज आयुर्वेद के प्रकाण्ड पण्डित व एक सुप्रख्यात चिकित्सक हैं। उनका अभिनन्दन करना एक उच्च व्यक्तित्व को सम्मानित करना तो है ही परन्तु इसके साथ-साथ आयुर्वेदिक पद्धति स्वयं के लिए बहुत हितकर होगी।

रामनिवास मिर्धा

•

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुर
राजस्थान
मार्च सन् १९६४

मुझे यह जानकर अत्यन्त प्रसन्नता हुई है कि स्वामी जयरामदासजी की सेवाओं के प्रति आभार प्रकट करने के लिए आप एक आयुर्वेद-विशेषांक का प्रकाशन कर रहे हैं। आयुर्वेद एक वैज्ञानिक चिकित्सा पद्धति है और वह हमारे स्वर्णिम भूतकाल की एक महानतम धरोहर है।

यह प्रसन्नता की बात है कि गत कुछ वर्षों से आयुर्वेद के अधिक से अधिक प्रचार एवं इसके क्षेत्र में नवीनतम शोध के कार्यों को बल मिलने लगा है। सरकार की भी यही नीति है कि आयुर्वेद को अधिक से अधिक प्रोत्साहन मिले।

स्वामी जयरामदासजी ने आयुर्वेद की जो सेवाएँ की हैं, वे अभूतपूर्व हैं। इस अवसर पर मैं उनके दीर्घ आयु होने की कामना करता हूँ और आपके आयुर्वेद-विशेषांक एवं अभिनन्दन-समारोह की सफलता की कामना करता हूँ!

मोहनलाल सुखाड़िया
मुख्य मंत्री

•

जयपुर
राजस्थान
दिनांक २० मार्च, १९६४

मुझको यह जानकर हार्दिक प्रसन्नता हुई कि देश के सुप्रख्यात विद्वान् आयुर्वेद-मार्तण्ड पूज्य स्वामीजी श्री लक्ष्मीरामजी महाराज के शिष्य श्रीयुत स्वामी जयरामदासजी महाराज के आयुर्वेद महाविद्यालय से अवकाश प्राप्त कर लेने पर 'भारती' संस्कृत मासिक पत्रिका की ओर से एक आयुर्वेद विशेषांक इनके अभिनन्दन-ग्रन्थ के रूप में प्रकाशित कर रहे हैं।

मैं स्वामीजी को व्यक्तिगत रूप से जानता हूँ और आप आयुर्वेद के ख्यातिप्राप्त विद्वान् हैं।

मैं इस जनोपयोगी आयुर्वेद-विशेषांक के सफल होने की कामना करता हूँ।

आपका
भीखा भाई
मंत्री, वन, श्रम, आयुर्वेद, सहकारिता, सामुदायिक विकास, पंचायतराज एवं पुनर्वास

•

Chief Minister, Punjab.
चण्डीगढ़

मुझे यह जानकर अत्यन्त हर्ष हुआ है कि "भारती" संस्कृत मासिक पत्रिका की ओर से एक आयुर्वेद-विशेषांक का स्वामी जयरामदासजी के अभिनन्दन-ग्रन्थ के रूप में प्रकाशन हो रहा है।

प्राचीन काल से ही आयुर्वेद का चिकित्सा शास्त्र में विशेष महत्त्व रहा है। इस अङ्क में चिकित्सा-शास्त्रियों के संकलित लेख जनोपयोगी एवं उत्कृष्ट सिद्ध हों, ऐसी मेरी कामना है।

प्रतापसिंह केरो
पंजाब के मुख्य मंत्री

•

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री हीरालाल शास्त्री भू० पू० मुख्यमन्त्री, राजस्थान की मंगल-कामना

श्री स्वामी जयरामदासजी ने स्व० पू० स्वामी लक्ष्मीरामजी महाराज के यहाँ की परम्परा को बहुत अच्छा निभाया है। मैंने बराबर देखा है कि आयुर्वेद की सेवा के अतिरिक्त स्वामी जयरामदासजी कई प्रकार के सेवा-कार्यों में भाग लेते रहे हैं। मेरा जब कभी उनसे मिलना हुआ, उन्होंने स्वाभाविक सरलता से जयपुर के सार्वजनिक हितों के विषय में चिन्ता व्यक्त की और मुझे एक-न-एक प्रकार से प्रेरणा व परामर्श देने का यत्न किया। स्वामी जी की प्रकृति के मिठास और उनके नम्रभाव का अनुभव मुझे कई बार हुआ।

स्वामी जयरामदासजी जैसे सुहृद् के सुखी और परोपकारी दीर्घजीवन के लिए मैं मंगल-कामना करता हूँ।

हीरालाल शास्त्री

श्रीमतां स्वामिपदभाजां श्री जयरामदासमहाभागानां सेवानिवृत्त्यवसरे तेषां गुणगरिम–विरुदावलीनां प्रकाशनाय सज्जनचित्तरंजनाय चैकस्याभिनन्दनग्रन्थस्यो पगुम्फनं भारती-पत्रिकामाध्यमतः प्रसरिष्यतीति ज्ञात्वा मम हृदि महान्मोदोऽभिसंजातः। शुभकार्येऽस्मिन्नहं आत्मानं मनसा संयोजकैः साकं मन्ये। यत् साम्प्रतमेव मयायुर्वेदीयनूतनोपसंचालकपदस्य भार एकमासपूर्वमेव गृहीत अस्मादेव कारणात् विस्तृतलेखरूपेण भावप्रकटनाय कालो न लब्ध अतः क्षमां याचे। आचार्याणाम् स्वामिमहाभागानाममितयशःसौरभमयी परम्परा भारतवर्षीय-विद्वन्मण्डले पर्याप्तकालादेव प्रकाशवती दरीदृश्यते। तस्याः हीरकमालायाः परमप्रकाशमानरत्नरूपेण श्रीमतां जयरामदासमहानुभावानां स्थितिरस्त्येव न तत्र किंचिच्छंकायाः स्थानम्। तेषां ज्ञानार्जनाल्लब्धगौरवा शिष्याणां परम्पराऽपि, अद्यावधि भारतस्य विभिन्नभागेषु महतीं कीर्त्तिं प्रसार्य तेषां महत्तां प्रकाशयिष्यतीति।

सर्वतः पूतकार्येऽस्मिन्नहम् स्वान्तःकरणात् साफल्यं कांक्षे।

भवदीयः–

रघुवीरप्रसादः त्रिवेदी

उप-संचालक आयुर्वेदस्य, मध्यप्रदेशशासनम्,

आपके पत्र से यह जानकर परम प्रसन्नता हुई कि आप लोग श्री स्वामी जयरामदासजी के अभिनन्दन के उपलक्ष्य में एक विशेषाङ्क प्रकाशित करने जा रहे हैं। राजस्थान में दिवंगत स्वामी लक्ष्मीरामजी के शिष्यों में तथा उनकी चिकित्सा परम्परा को अक्षुण्ण रखने में श्री स्वामी जयरामदासजी भी अन्यतम व्यक्ति हैं। कोटकल सम्मेलन में आपके सहवास का शुभावसर प्राप्त हुआ था और उनके सौजन्य तथा सौहार्द्र का भी परिचय प्राप्त हुआ था। आप आयुर्वेद क्षेत्र के एक प्रसिद्ध शिक्षक तथा चिकित्सक हैं। भगवान् आपको सुखायु तथा दीर्घायु करे जिससे आपके द्वारा और अधिक आयुर्वेद की सेवा हो सके। मैं हर प्रकार से इस समारोह की सफलता चाहता हूं।

भवदीय –

पं० शिवशर्मा (विद्यारत्न)

आयुर्वेदाचार्य,

बम्बई

इतने अल्प समय में संस्कृत भाषा में सुन्दर लेख लिखना मेरे लिए बड़ा कठिन कार्य होने के कारण लेख भेजने में असमर्थ हूँ फिर भी श्री स्वामी जयरामदासजी ने आयुर्वेद शास्त्र की अभिवृद्धि के लिए अध्यापन, ग्रन्थ-लेखन, शास्त्रचर्चा तथा सफल प्राणाभिसर चिकित्सक के नाते जो कुछ कार्य किया है उसके लिए सम्पूर्ण आयुर्वेद जगत् उनका सदा कृतज्ञ रहेगा। परमेश्वर उन्हें दीर्घायु करें और उनके हाथों आयुर्वेद की जड़ देश भर में मजबूत होने का कार्य चिरकाल तक होता रहे। शेष कुशल।

भवदीय

द. अ. कुलकर्णी

भूतपूर्व उपसंचालक आयुर्वेद उत्तर-प्रदेश

तथा भूतपूर्व प्रधानाचार्य स्नातकोत्तर आयुर्वेद-

प्रशिक्षण केन्द्र, जामनगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुझे तथा विद्यालय के समस्त अध्यापकों को यह जानकर प्रसन्नता हुई है कि आप लोग आयुर्वेद-विशेषांक अभिनन्दन-ग्रन्थ रूप में प्रकाशित करने जा रहे हैं।

श्रीयुत स्वामी जयरामदासजी महाराज आयुर्वेद के एक महान् पण्डित हैं, जिन्हें आयुर्वेद जगत् अच्छी तरह से जानता है। आपने लगन के साथ आयुर्वेद की सेवा की है और कर रहे हैं। आपकी शिक्षा से आज कौने कौने में आयुर्वेद का कार्य वैद्यों द्वारा हो रहा है। आपके ऐसे कर्मठ आयुर्वेद-प्रेमी ही आयुर्वेद का कल्याण कर सकेंगे। मैं अपनी तथा विद्यालय की ओर से इस ग्रन्थ के प्रकाशनार्थ शुभ सन्देश भेज रहा हूँ और आशा करता हूँ कि इस ग्रन्थ के प्रकाशित होने पर सभी आयुर्वेद-प्रेमी लाभ उठावेंगे। इस समिति के समस्त कार्यकर्त्ताओं को इस शुभ कार्य को करने के लिए हार्दिक-धन्यवाद देता हूँ तथा ईश्वर से प्रार्थना करता हूँ कि इसे पूरा करने में मदद करें।

भवदीय
वि. पा. धुलेकर
प्रिंसिपल
बुन्देलखण्ड, आयुर्वेदिक कॉलेज,
झांसी।

GOVERNOR'S CAMP,
UTTAR PRADESH.
मार्च २६, १९६४

प्रिय महोदय,

आपके पत्र क्रमांक २७३७ दिनांक १५ मार्च १९६४ के संदर्भ में मुझे आपको यह सूचित करने का आदेश हुआ है कि श्री राज्यपाल महोदय को यह जानकर प्रसन्नता हुई कि श्रीयुत स्वामी जयरामदासजी महाराज के अभिनन्दन ग्रन्थ के रूप में 'भारती' संस्कृत मासिक पत्रिका की ओर से एक आयुर्वेद विशेषांक प्रकाशित होने जा रहा है। वह अभिनन्दन ग्रन्थ को सफलता के लिए अपनी शुभ कामनायें भेजते हैं।

भवदीय,
गोविन्दवल्लभ पंथ
सहायक सचिव,
कृत सचिव, श्री राज्यपाल उ० प्र०

श्री हरिभाऊ उपाध्याय
शिक्षा मंत्री,
जयपुर
दिनांक २१-३ ६४

महोदय,

आपका पत्र क्रमांक २८०३ दिनांक १५-३-६४ का प्राप्त हुआ। तदर्थ धन्यवाद।

मुझे यह जानकर प्रसन्नता हुई कि श्रीयुत स्वामी जयरामदासजी महाराज के अभिनन्दन समारोह का आयोजन आप जयपुर में कर रहे हैं व इसी उपलक्ष में अभिनंदन ग्रन्थ भी प्रकाशित कर रहे हैं।

श्री स्वामीजी की आयुर्वेद के प्रति असीम सेवाऐं समस्त आयुर्वेद जगत् को विदित ही हैं और हमारा यह पुनीत कर्तव्य है कि ऐसे आयुर्वेद के उदभट विद्वान् तथा कर्मनिष्ठ योगी का सार्वजनिक रूप से अभिनन्दन करें।

मैं श्रीयुत स्वामीजी महाराज की दीर्घायु के लिए परमपिता परमेश्वर से प्रार्थना करते हुए आपके द्वारा आयोजित समारोह की सफलता की कामना करता हूँ।

भवदीय,
हरिशंकर भार्गव
प्रचार्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुभानुशंसा

(कविशिरोमणि-देवर्षिभट्टमथुरानाथशास्त्री, 'भारती' सम्पादकः)

परिवर्त्तनं हि नामास्य संसरणधर्मिणो जगतः प्रधानो गुणः। 'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिता' मिति विधयाऽनतिचिरमेवात्र जगति सकलमपि संविधानं परिवर्त्तते। अनेनैव क्रमेण समयोऽनतिक्रमणीयया गत्या सरति। पुरुषायुषाणामप्ययमेव क्रमः। अद्यतने बालकः श्वो युवा, परश्वो वृद्धः, युवकानां पिता च भविष्यति। 'पुत्रास्ते यत्र पितरो भवन्ति'। अद्य शृणोमि यदस्माकमभिन्नहृदयानां, प्रातःस्मरणीयानां, क्षणार्द्धमप्यविस्मृतानां, हैयङ्गवीनहृदयानां स्वामिश्रीलक्ष्मीराममहोदयानां शिष्यवर्यः, उत्तराधिकारी च स्वामिश्रीजयरामदासमहोदयः कृतकार्यत्वमात्मनः सम्पाद्य, आयुर्वेदकालेजस्याध्यक्षपदं विपुलवर्षाणि साफल्येन समधिरुह्य विश्रामं गृहीतवान्, प्रमोदमधिगच्छद्भिश्च सुहृच्छिष्यपरिकरैरयमभिनन्द्यत इति च। कियद् द्रुतं समयः प्रकान्तः। ह्यस्तनीमिवाद्य घटनामहं स्मरामि यदाऽयं स्वामिश्रीलक्ष्मीराममहाभागानां सकाशमायुर्वेदाध्ययनार्थमागतोऽभूत्। निर्मायं गुणप्रणयी, विद्याव्यसनी, विदुषां निच्छलस्नेही च स्वामिमहोदयो मां स्नेहातिरेकवशात्सुहृत्कोटौ, अन्तरङ्गसहचरकोटौ च स्थापयति स्मेत्यद्य साश्रु स्मरन् स्वामिमहाभागस्य साहचर्यं गौरवमनुभवामि। व्यतीतान्यद्य द्विचत्वारिंशद् वर्षाणि। स्वामिमहाभागः स्वकीयौषधालये विद्वत्सुहृद्भिः सह स्थितो विद्याविनोदमनुतिष्ठति स्म। आसीदयमस्य स्वभावो यद् विनोदवार्त्तालापेऽपि सोऽयं शास्त्रचर्चां छन्दोविच्छित्तिकौशलं, काव्योक्तिच्छटां चादाय मनोरञ्जनमुद्भावयति स्म। अत एव हि औषधालये आतुराणां परीक्षणसमये, रसायनशालायामौषधनिर्माणप्रक्रियानिरीक्षणकालेऽन्यत्र वा सर्वदैवास्य सहचरास्त एवासन् यानयं सुधीसुहृद्रूपेण पश्यति स्म। अहमेतेषु नितान्तं विश्वासपात्रमासम् स्नेहभाजिनत्वेन च स्वामिमहाभागस्य 'मुखलग्नः' (मुँहलगा) समभवम्। अत एव सर्वेष्वेव विषयेषु सकृपं स्वामिमहाभागो मन्मन्त्रणां, मद्विचारांश्च ज्ञातुं कुतूहली समभूत्। यदैव सूचितमभूद् यद् द्वारि हरिद्वारीयश्रीगोपालदासस्वामिमहोदयेन प्रेषितः शिष्य एकः स्वामिमहाभागं दिदृक्षते, तदैव स्वामिमहोदयः सस्मितं मामवोचत्—"भट्टमहोदय ! बहिस्तिष्ठत्येकः किशोरः। आगच्छत्ययमस्मत्सकाशमायुर्वेदाध्ययनायात्र निवासाय च। श्रीधन्वन्तरिमन्दिरस्योद्घाटनार्थं हृषीकेशं गतेन सोऽयं तत्र दृष्टोऽभूत्। आयुर्वेदाध्ययनाय कलिकातां गन्तुमिच्छुरयं मयाऽत्राऽऽकारितः। एतस्य हि व्युत्पत्तिर्भवताऽपि परीक्षणीया।"

पुराणपंडितानामासीदियं पुरातनी परिपाटी यत्प्रथमसम्मेलन एव शास्त्रार्थद्वयमिवोपस्थापयद् गूढवैदुष्यतलस्पर्शि वाग्युद्धमिव ते कल्पयन्ति स्म। शेखावाटीपरिसरस्थानां विदुषां विशेषतोऽभूदियं प्रवृत्तिः। यद्यपि नाहमिमां प्रवृत्तिमभिरोचयामि तथापि सस्नेहमहमिमं युवानमपृच्छं "किं भवताऽधीतं व्याकरणे" इति। "सारस्वतचन्द्रिकामवमधीतवान्" इत्यनेनोत्तरितम्। प्रवृत्ते च वार्त्तालापेऽनेन चन्द्रिकाऽध्ययनदार्ढ्यप्रदर्शनं तु विहितमेव, व्याकरणविदुषां परिष्कारादिप्रणालीमनुसृत्य बहवः प्रश्ना अपि समुपस्थापिता मत्पुरतः। अनेनैवाहमजानां यद्युवकोऽयं मेधावी, तीव्रबुद्धिश्च। विद्याऽधिगमनाय रुचिरप्यस्य सुदृढा। अभ्यन्तरमागत्य स्वामिमहाभागेनाऽपि सहायं बहुकालं समलपत्!

तद्दिनादारभ्यैवानेन स्वामिमहाभागानां सविधे निवासः प्रारब्धः। स्वामिमहोदयस्य सर्वेऽपि सुहृदोऽस्य विद्याभिरुचिम्, आयुर्वेदभक्तिं च प्रशंसन्ति स्म। आयुर्वेदपरिज्ञानेन सहैव व्याकरणसाहित्याद्यन्यान्यशास्त्राणामपि प्रचुरं परिज्ञानमस्य स्यादित्यभिलष्यता स्वामिना सोऽयं मत्सकाशमपि प्रेषितः साहित्यचर्चायै। शास्त्रिपरीक्षायां निर्धारितानि काव्यानि, कादम्बर्यादिगद्यग्रन्थाः, अनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादादिसामान्यज्ञानविषयाश्च तदनुसारमनेनाधीता मत्सकाशात्। न्यवसमहं तदा पुराणवसतिस्थे 'नागरपाड़ा' इति ख्याते प्रतिवेशे। तस्मिन्नेव वेश्मनि विद्याभ्यासार्थं सोऽयं जयरामदासमहोदयः समायाति स्म। सुतरां विनीतः, मार्मिकश्चायं छात्रोऽभूदिति सर्वदैवाहमस्य गहनज्ञानाधिगमौत्सुक्यं प्रशंसामि स्म।

आयुर्वेदे वैदुष्यमधिगम्य स्वामिसकाशं, तत्स्वर्गाधिरोहणानन्तरं स्वामिमहाभागस्योत्तराधिकारमप्ययमधगच्छत्। स्वामिश्रीलक्ष्मीराममहाभागानामेव पदाङ्कानुसरतानेन स्वकीयौषधालयस्य, उद्यानस्य, श्रीधन्वन्तर्यौषधालयस्य, आयुर्वेदिककालेजस्यापि च तथैव श्रीवृद्धिरनुष्ठिता, स्वामिमहाभागानां सुहृदस्तथैव संमानिताः, नवीनाश्च निर्मिता इति परमंप्रमोदस्यैत्र विषयः। एतत्सम्बन्धे सोऽयं सौभाग्यशाली वर्त्तते इति तु निश्चप्रचमेव वच्मि।

अद्य सोऽयमेव स्वामिमहोदयो वर्षीयान् संवृत्तः। सेवानिवृत्तोऽप्ययं सञ्जात इति साम्प्रतमधिकाधिकं समयमायुर्वेदसेवायां, स्वकीयगुरोः श्रीलक्ष्मीरामस्वामिन आदर्शमनुसृत्य लोकाराधने च व्यतिगमयिष्यतीति माद्दशानामस्य शुभाशंसकानां विश्वासः सकलमपि स्वकीयमायुरक्षरयोजनायामुपयुक्तवतोऽयं दृढो मे सिद्धान्तो यद्यदस्माभिरस्मत्पूर्वपुरुषेभ्य उपार्जितं ज्ञानरूपेण, विद्यारूपेण वा, तस्याधमर्णैरस्माभिरिदमेव सर्वभावेन निश्चेयं तदस्य गुर्वृणस्य पितृणस्य वा, विमोक्षः स्वयमपि किञ्चिद् विलिख्य परवर्त्तिभ्यश्च प्रदायैव कर्तुं शक्यते।

आयुर्वेदमार्त्तण्डश्रीलक्ष्मीरामस्वामिभ्योऽपि मयाऽसकृदिदमेव निवेदितं यत्तेषामायुर्वेदोपरि यदाधिपत्यमासीत्, यत्तेषां सार्वभौमं वैदुष्यमभूत्, तस्य कश्चिदंशो ग्रन्थरूपेणापि समाजाय सुलभो भवेच्चेत्समीचीनं स्यात्। अद्य स्वामिमहाभागानां कीर्त्तिः परःसहस्रं तच्छिष्याणां भारतस्य सर्वेष्वपि प्रदेशेषु ख्यातिमुपार्जितवतां कृतित्वरूपेण त्वजरामरा तिष्ठत्येव, किन्तु यदि स्वामिमहाभागेन कश्चन स्वकीयो ग्रन्थोऽप्यद्य वैद्यजगते प्रसादीकृतोऽभविष्यत्, सर्वेऽपि विद्वांसः कृतार्था अभविष्यन्। इदमेव मया श्रीमते जयरामदासस्वामिमहोदयायापि बहुधा बोधितमासीत्। तदेव सस्नेहं संमान्य महाभागेनानेन भोजनविज्ञानविषयकं पुस्तकमेकं पाण्डुलिपिरूपेण विलिखितमपि। अन्यदपि लेखनव्यसनमयं साम्प्रतं प्रचालयिष्यति यथावसरमिति विश्वसिमि। श्रीदादूमहामुनेः साहित्यस्य प्रकाशने रुचिं गृहीत्वाऽनेन प्रकाशनकार्यमपि सुचिरात्प्रारब्धमेव। तदधुना भूयोऽपि समेधिष्यत इत्याशासे।

स्वामिमहोदयः शतायुर्भवेत्, उत्तरोत्तरं चाऽस्य यशोभानुः प्रखरो भवेदित्याशानः समुपसंहरामि मदीयेनैकेन पद्येन यन्मया स्वकीये 'जयपुरवैभव' नाम्नि काव्ये स्वामिमहोदयस्य परिचयरूपेण प्रायस्त्रिंशद्वर्षेभ्यः पूर्वं विलिखितमभूत्—

अपि नववयसि विराम-विद्या-विनय-विवेकभृत्।
रञ्जयते जयरामदासः स्वामि-समाजगः।

कुमारेश
लिवर और पेट की बीमारियों में
सालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चिन्निवेदनम्

संप्रति माननीयस्य श्रीजयरामदास–महाराजस्य शुभमभिनन्दनसमारोहं सम्पादयतस्तथैनमेवोद्दिश्य 'भारतीं' पत्रिकया च सार्धद्विशतपृष्ठात्मकस्य 'आयुर्वेदाङ्कः' इत्याख्यस्य विशेषाङ्कस्य प्रकाशनमाचरतः 'भारती' परिवारस्य मनसि सुमहान् हर्षो भवति । स्वामिमहाराजस्यास्यायुर्वेदस्य, संस्कृतस्य तथा समाजस्यैतत्कृता विशिष्टाः सेवाः समवलोक्य महाभागस्यास्याभिनन्दनस्य योऽयं शोभनोवसरो भारतीपरिवारेण लब्ध :—इत्यस्ति महतो गर्वस्य विषयोऽस्माकं कृते ।

आयुर्वेदस्योत्थानस्य प्रचारप्रसारयोश्च कर्मणि सातत्येन समनोयोगं चेष्टमानः स्वर्गीयपूज्यस्वामिश्रीलक्ष्मीराममहाराजस्य कीर्तिकौमुदीमाधिक्येन समुद्द्योतयदेवायं महाभागः सहैव च संस्कृतसाहित्यस्य समुत्थानार्थं प्रसाराय प्रचाराय चापि सुमहत् कार्यमन्वतिष्ठत् । यदा हि महामहोपाध्यायः पण्डितश्रीगिरिधरशर्म–चतुर्वेदिमहाभागो जयपुरस्थ–महाराज–संस्कृतमहाविद्यालयस्याध्यक्षपदे समासीन आसीत् तदानीमितो जयपुरात् 'संस्कृतरत्नाकरः' मासिकपत्त्रं यन्नियमितनिरूपेण प्राकाश्यमलभत, तस्य नियमितरूपेण प्रकाशने चार्थिकसहयोगप्रदाने तथा तस्य प्रचारप्रसारयोश्चास्य स्वामिप्रवरस्यापूर्वः सहयोगोऽवर्तत । तस्यैवेदमभूत्फलं यत् स 'रत्नाकरः' जयपुरतः (राजस्थानात्) सर्वदैव स्ववेलामनतिक्राम्नेव प्राकाश्यमलभत, परं बहोः कालात् पूर्वं विगते काशीस्थे संस्कृतसम्मेलने वाराणसेयास्तथोत्तरप्रदेशस्य च केचन संस्कृतविद्वांसोऽकामयन्त यत्–रत्नाकरोऽयं काशीतः प्रकाशितो भवेदिति । ततश्च स्वल्पं कालं यावत् स तत एव प्रकाशितो भूत्वानन्तरञ्च कानपुरं तथा दिल्लीं गत्वा तु अनियमितरूपेणाव्यवस्थित इव स अजायत ।

किञ्च प्रारम्भादेव जयपुरनगरमिदं संस्कृतस्य प्रचारप्रसारयोः केन्द्रमवर्तत, तथा चात्रत्याः संस्कृतस्य सुयोग्या महान्तो विद्वांसो लेखनकलाकुशला भगवत्यां सुरसरस्वत्यां बद्धादराश्चाप्यविद्यन्त । अत एवात्र संस्कृतपत्त्रस्याभावमवलोक्य ते नितान्तं खिन्नमनस इव समजनिषत ।

तथा च १९५० तमे खिस्ताब्दे यदा माननीय उमाकान्तकेशव आपटेमहोदया जयपुरमागतवान्, तदा नगरस्यास्य कतिचन विद्वांस आपटेमहाभागस्य समीपमागत्य–'संस्कृतपत्त्रमेकं जयपुरात् प्रकाशितमवश्यं भवतु, तदर्थञ्चावश्यकः सर्वविधोऽपि सहयोगोऽस्माभिर्विधास्यते' इति स्वाभिप्रायं प्रकाशितवन्तः । तत्र च श्रीस्वामिमहाभागोऽयमासीदेव प्रमुखः । ततश्च 'स्वामिश्रीसुरजनदासमहोदयस्य सम्पादकत्वे पत्त्रिकायाः (भारत्याः) प्रकाशनं शीघ्रातिशीघ्रमेव कर्तव्यम्' इत्येष निर्णयोऽजायत । मह्यञ्च पत्त्रिकाया मुद्रापण-प्रकाशनयोस्तथान्यान्यसर्वविधव्यवस्थायाश्चोनरदायित्वमदीयत । इत्थं गुरुतरमिमं भारमहं पूज्यस्वामिमहाराजस्यैवानुग्रहेण वहन् प्रायो विगतपञ्चदशवर्षेभ्यः 'भारती' पत्त्रिकामिमां यथाकालं नियमितरूपेण प्रकाशयितुं सफलः समभूवम् । पञ्चदशवर्षात्मके सुदीर्घे कालखण्डेऽस्मिन् यदा-यदास्याः 'भारती' पत्त्रिकायाः प्रकाशनविधौ काठिन्यमापतितम्, तदा-तदा श्री स्वामिमहाराजस्यास्यैव सक्रियेण सहयोगेन तन्निराकर्तुमपार्यतास्माभिः ।

संप्रति चायुर्वेदमहाविद्यालयसेवातो विश्रान्तिं गृहीतवति पूज्यश्रीस्वामिमहाराजेऽस्मिन्–आयुर्वेदाङ्करूपेण पूज्यस्वामिवर्य्यस्याभिनन्दनग्रन्थोऽयं 'भारती' पत्त्रिकया प्रकाश्यमानो विद्यते । अत्र च वैद्यवर-श्रीसुदेवचन्द्रपाराशरिमहोदयस्य सत्सहयोगेनैवाखिलोऽप्येष विशेषाङ्को मुद्रितः समपद्यत । पाराशरिमहोदयश्चैष देशस्य सुप्रसिद्धेभ्यो वैद्येभ्यो लेखानामत्युत्तमानां संग्रहात्मकात् कार्यात् समारभ्य विशेषाङ्कास्यास्य प्रकाशनकार्यं यावल्लेखत्रुटिसंशोधनादिकं सर्वविधमपि कार्यजातं समनोयोगमनुतिष्ठन् विशेषाङ्कस्य सर्वाधिकं वैशिष्ट्यं परिवर्धयितुञ्च परिपूर्णं सहयोगं दत्तवान् । अतोऽहं पाराशरि–महाभागस्य महान्तमाभारं हृदयेन बिभर्मि । यैर्विद्वद्भिर्वैद्यवर्य्यैः स्वकीयममूल्यं समयं निष्काश्य विशेषाङ्केऽत्र प्रकाशनार्थं लेखाः प्रहिताः, तेभ्योऽपि धन्यवादान् वितरामः । तथा श्रीदीनानाथत्रिवेदी 'मधुपः' श्रीस्वामिनां जीवनवृत्तलेखनादिकार्ये चापूर्वं सहयोगं कृतवान् । अतः सोऽपि साधुवादार्हः :—इति सविनयं निवेदयति ।

—प्रबन्ध-सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	शुभकामना-सन्देशाः		
२.	शुभाशंसा	भट्टश्रीमथुरानाथशास्त्रिणः, जयपुरम्	
३.	किञ्चिन्निवेदनम्	प्रबन्धसम्पादकः, जयपुरम्	
४.	विषय-सूची		
५.	सम्पादकीयम्	श्रीसुदेवचन्द्रपाराशरी, जयपुरम्	
६.	श्रीधन्वन्तरिस्तवः	श्रीहरिशास्त्री, जयपुरम्	
७.	भारती	श्रीदेवशास्त्रीअसाडा, बाड्मेर	
८.	श्रीजयरामदासस्वामिमहाभागानां संक्षिप्त-परिचयः	श्रीदीनानाथत्रिवेदी, जयपुरम्	१
९.	अभिनन्दनीय-श्रद्धेय-श्रीस्वामिजयरामदासानामभिमतम्	" "	६
१०.	श्रीस्वामिनामालोकः	श्रीसुदेवचन्द्रपाराशरी, जयपुरम्	९
११.	अभिनन्दनपद्यानि	श्रीराजेश्वरदत्तशास्त्री	११
१२.	प्रेमास्पदीभूतं दशकम्	श्रीहजारीलालसुकुलः पाटलिपुत्रं	१२
१३.	कुसुमाञ्जलिः	श्रीबालकरामशुक्लः	१३
१४.	श्रीस्वामिनां परिचयः	श्रीअम्बिकादत्तशास्त्री कालेड़ा	१४
१५.	श्रद्धाञ्जलिः	श्रीहरिशङ्करशर्मा जामनगरम्	१५
१६.	अभिनन्दनप्रसूनाञ्जलिः	श्रीनारायणशास्त्रीकाङ्करः, जयपुरम्	१८
१७.	अभिनन्दनाशीः	श्रीगिरिधरशर्मा, जयपुरम्	१९
१८.	अभिनन्दनाशंसा	श्रीमणिरामशर्मा, रत्नगढ़ः	,,
१९.	स्नेहाञ्जलिः	श्रीविश्वनाथद्विवेदी, जामनगरम्	२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२०.	पुष्पाञ्जलिः	श्रीरामदयालुजोशी, पटना	१२
२१.	श्रद्धाञ्जलिः	श्रीकन्हैयालालभेड़ा, बम्बई	२२
२२.	,,	श्रीअम्बिकादत्तशास्त्री	२४
२३.	संस्मरणानि	श्रीचक्रपाणिद्वारकानाथः	२५
२४.	कर्मवीर स्वामी-	श्रीबापालालवैद्यः सूरतः	२६
२५.	संस्मरणानि-	श्रीरामनारायणवैद्यः	२७
२६.	मधुरास्मृतिः	श्री गणेशरामशर्मा, झालावाडः	२८
२७.	संस्मरणानि	श्रीसतीन्द्रनाथः वसुः, सरदारशहरः	३०
२८.	,,	श्रीनिरञ्जनदेवः, गुरुकुलकांगड़ी	,,
२९.	सुयोग्यः शिष्यः	श्रीसूर्यदत्तशास्त्री, पटना	३१
३०.	शुभकामना	श्रीरामनाथवद्यः, हरिद्वारम्	३४
३१.	छात्र वात्सल्य के आदर्श	श्रीऋषिदेवसोलङ्की, जोधपुर	३५
३२.	ब्रह्माण्डस्य स्रष्टा वरुणो विष्णुश्च	श्रीगोविन्दहरी मराठे, लश्कर-ग्वालियर	३७
३३.	आयुर्वेदस्य वैशिष्ट्यम्	श्रीबापालालवैद्यः, सूरतः	३८
३४.	आयुर्वेदमार्त्तण्ड-राजवैद्य-पण्डितलक्ष्मीराम-स्वामिमहाभागस्याभिमतम्		३९
३५.	महामहोपाध्याय-कविराज-श्रीगणनाथसेन-सरस्वतीमहोदयस्याभिमतम्		४०
३६.	आयुर्वेदमार्त्तण्डायुर्वेदोद्धारक-वैद्यश्रीयादवजी-त्रिकमाचार्य-महाशयस्याभिमतम्		४५
३७.	श्रीनिवासमूर्ति महाविदुषोऽभिमतम्		४६
३८.	आयुर्वेद आयुर्वेदस्यापसंज्ञानम्	श्रीसुदेवचन्द्रः पाराशरी, जयपुरम्	४७
३९.	आयुर्वेदः त्रैकालिक-सार्वभौम-चिकित्साविज्ञानम्	श्रीब्रह्मदत्तः शर्मा, जामनगरम्	५३
४०.	आयुर्वेदस्य विकासक्रमः	श्रीछेदालालशर्मा शास्त्री, नवाबगंज, बरेली	५७
४१.	आयुर्वेदस्य सर्वविज्ञानोपजीव्यत्वम्	श्रीश्रीनिवासशर्मचतुर्वेदः जयपुरम्	५९
४२.	विषयानुरोधेन चरकसंहितायाः नवीनसंस्करणम्	श्रीअत्रिदेवगुप्तः, जालन्धरम्	६२
४३.	कथमायुर्वेदप्रचारः क्रियताम्	श्री श्रीनारायणशास्त्री, लखनऊ	६६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४४.	द्रव्यगुण-विज्ञानम्	श्रीविश्वनाथद्विवेदि, जामनगरम्	६८
४५.	आधुनिकभौतिकीसिद्धान्तेभ्य आयुर्वेदपदार्थ-मूलसिद्धान्तानां संवादित्वम्	श्रीविनायकजयानन्दठाकरः, जामनगरम्	७२
४६.	दैवव्यापश्रयचिकित्साया अपूर्वो ग्रन्थः—	श्रीप्रियव्रतशर्मा, वाराणसी	८१
४७.	क्लोमविवेकः	श्रीदामोदरशर्मा गौड़ः, वाराणसी	८४
४८.	मेध्यरसायनम्	श्रीनटराजशास्त्री, तिरुचिरापल्ली	८९
४९.	पाश्चात्त्यदेशीयानां वयसोऽपेक्षया भारतीया-नामल्पायुष्ट्वे कारणान्वेषणम्	श्रीहरिवक्षजोशी, कलकत्ता	९७
५०.	आध्यात्मिका रोगाः	श्रीकन्हैयालालभेड़ा, बम्बई	१०१
५१.	श्वासरोगाः	श्रीमणिरामशर्मा, रत्नगढ़ः	१०९
५२.	मौक्तिकनामधेयो ज्वरः	श्रीलालचन्द्रो वैद्यः, झांसी	११२
५३.	प्राच्यप्रतीच्यशल्यसमन्वयः	श्रीअनन्तरामशर्मा	११५
५४.	आहारः स्वास्थ्यस्य मूलम्	श्रीरामनारायणवैद्यः	१२१
५५.	आहारसर्वस्वम्	श्रीवि०गो०साण्डू, बम्बई	१२८
५६.	तमसो मा ज्योतिर्गमय	श्रीउपेन्द्रनाथदासः, देहली	१३०
५७.	स्वास्थ्यसंरक्षणोपायाः	श्रीचन्द्रभानुशास्त्री, झांसी	१३१
५८.	आयुर्वेदशास्त्रोपदिष्टधर्माचरणम् (सद्वृत्तम्)	श्रीऋषिदेवःसोलंकी, जोधपुरम्	१३२
५९.	स्थौल्यं प्राकृतिक-सौन्दर्यं नास्ति	श्रीराजकुमारः 'गोयलः'	१३४
६०.	हृच्छूल में मृगश्रृंग का उपयोग	श्रीसोमदेवशर्मा, रायपुर	१३६
६१.	अनुभूत प्रयोग	श्रीराधेश्यामशर्मा विशाला, जयपुर	१३८
६२.	रक्त दान	श्रीरामकुमार अग्रवाल	१३९
६३.	राजस्थान में आयुर्वेदिक-योजना प्रारूप	श्रीभागीरथजोशी उदयपुर	१४५
६४.	सूक्ति-सुधा	वैद्यः श्रीबद्रीप्रसादशर्मा शास्त्री, जयपुरम्	१५४
६५.	परिशिष्टानि (अभिनन्दनपत्राणि)		क–ड
६६.	आयुर्वेदीयग्रन्थमाला, श्रीदादूमहाविद्यालयश्च	श्रीमङ्गलदासस्वामी जयपुरम्	ढ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयं निवेदनम्

आयुर्वेदसेवापरैः शिक्षकाग्रेसरैश्चिकित्सकचूडामणिभिः श्रीमज्जयरामदासस्वामिमहानुभावैः स्वकीयार्जव–दाक्षिण्य-साधुत्वभावादिगुणगणद्वारेण लोकशास्त्रसेवामुखेन च लोकचेतसां यदाकर्षणमापादितं तन्न तिरोहितं विपश्चित्कुलामलानाम्। तत एव जयपुराभिजनैर्वैद्यैरवैद्यैश्च सन्नागरिकैः स्वामिनामेतेषां राजकीयायुर्वेदमहाविद्यालयाध्यक्षपदाद् विरतिग्रहणावसरे समुचितमभिनन्दनं करणीयमिति परामृष्टमभूत्। 'भारती'-परिवारस्योत्साहिभिस्सञ्चालकैस्तदभिनिविष्टसुहृद्वर्गैश्चाहमत्र कर्मणि स्वामिनां प्रियहिततया विनियुक्तः सर्वतोऽपि साहित्यसंकलनाय समसूचयम्। लेखनीयविषयाणां निर्देशमपि सुप्रसिद्धानां वैद्यराजमहोदयानां सविधे समप्रेषयम्। भारतीयसुदूरप्रदेशेष्वपि कृतप्रतिष्ठैर्वैद्यविद्वत्कुलैः प्रायशः स्वं स्वं निबंधं प्रेषयद्भिरहमनुगृहीतस्तेषां सौजन्येन वैदुष्येण चायमायुर्वेयाङ्कविशेषाङ्को भारतीभूरुहो नवनवोन्मेषदलसङ्कुलः सम्पन्नः; नूनमत्र तेषां तेषां विदुषामेव कृतित्वं श्लाघनीयता च।

परमत्रत्यैरसमन्मित्रैः स्वामिमहाभागानां सुहृद्भिर्वा सच्छिष्यैर्वा निबन्धादिप्रदानं प्रतिज्ञायापि, अनुरोधशतं स्वीकृत्यापि पौनःपुन्येनावधिकालमुल्लङ्घ्यापि परिणामेऽस्मदधन्यतया वाऽन्यस्माद् वा कस्माद् वा यस्मात्तस्माद् हेतोः स्वनिबन्ध-संस्मरणादिदर्शनसौमनस्यसौभाग्याद् हन्त! प्रवञ्चितोऽहमिति सत्यं मां दुःखाकरोति।

कर्गदादिदौर्लभ्यं, प्रबन्धक-मुद्रकयोः कार्यान्तरव्यस्ततान्याद्दशी वा काऽपि विसंगतिः सम्भावितविशेषाङ्कप्रकाशनावधेरतिक्रमणे हेतुरजनि। चित्रसञ्चये, चित्रादिनिर्वाचने च प्रबन्धकैर्नाहं प्रदत्तावसरोऽभूवम्; परतन्त्रस्यात्र निवेदनं कुर्वतोऽपि विवशस्य मम मन्तुः क्षन्तव्यो भवेत्।

समयातिपातखिद्यमानचेतसो मे पुनरनिवार्यपारिवारिककार्यान्तरव्यापृतस्य बहिर्गमनमपरिहार्यमभवदिति मध्येमुद्रणमेवाहमन्यत्र गतवानिति अर्धावशिष्टभागस्य मुद्रणं, समेषां चित्राणां मुखपृष्ठस्य च मुद्रणं मम परोक्ष एव समपद्यत। क्रमसंयोजने मुद्रणसौष्ठवे शब्दाक्षरयोजनायाञ्चानेकविधानि मुद्रणसम्बन्धीनि स्खलितानि यान्यापतितानि तेषां कृते पाठकानां पुरतः क्षमामभ्यर्थये।

किञ्च, केषाञ्चिद् विदुषां पद्येषु ये छन्दोभङ्गादिदोषास्ते तेषां कृतित्वेनैव, नास्माभिः कृतिभङ्गभिया संशोधिता इति तत्र त एव कृतिनः प्रमाणम्। स्वामिमहाभागानां कृते श्रद्धावचांसीति कृत्वा सादरमत्र निवेशितानि तानि तानीति सन्तः तुष्यन्तु।

'भारती' - प्रबन्धसम्पादक - श्री-गिरिराजशर्मशास्त्रिणाऽहं सूचितो यद्राजस्थानायुर्वेदविभागसञ्चालक-राजवैद्य-श्री-प्रेमशङ्करशर्मणामीहितं तैर्व्यक्तं यदत्र विशेषाङ्के आयुर्वेदीयपाठ्यक्रमविषयकं सामयिकं दुर्विवादमधिकृत्यापि विमर्शेनावश्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवितव्यमिति । मदीयमप्यनुमतं पूर्वत एवेष्टं तद् - शुद्ध - मिश्रापनामायुर्वेदपाठ्यक्रमादिविषयक-प्रचलितानर्गलविवादस्य परिजिहीर्षया सत्यं परमार्थप्रतिपादनकामनया तत्त्वचिन्तनमिह समाकलितम् । केषाञ्चित्स्वर्गतानां युगप्रवर्त्त कानां मूर्धन्यविदुषामन्येषाञ्चायुर्वेदमर्मज्ञानामद्यतनीयानां युक्तिसंबलिता आगमाद्यखिलप्रमाणपरिपुष्टा आयुर्वेदानुग्राहका विचारा विदुषां तत्त्वजिज्ञासातुष्ट्ये शास्त्रस्य पुष्ट्ये चात्र सन्निवेशिताः । नीतिनिर्धारकाः प्रशासका आयुर्वेदजिज्ञासवो लोकहितैषिणश्च तत्त्वम् विमर्शयन्तः सत्पथारूढा भवेयुरिति साग्रहं मे निवेदनम् । राजस्थान–विश्वविद्यालयेऽग्रिमवर्षाद् 'आयुर्वेद-निकायः (Ayurveda Faculty)' संस्थापितः शिक्षणपरीक्षणादिकं हितैषिणां कृते हर्षस्य विषयः; तत्र च पाठ्यक्रमस्य प्रशिक्षणादिविधानस्य च निर्धारणे विचारा इमे पथप्रदर्शका भवितुमर्हाः ।

राजस्थाने आयुर्वेदविषये भावुकतायाः प्राबल्येऽपि प्रशासकैश्च शतशोऽस्य प्रदेशस्योद्घोषितेऽपि अग्रपदत्वेऽत्रत्यानां शिक्षणसंस्थानां शिक्षकाणां राजसेवास्थभिषजां चान्यविभागीयशिक्षकाणां पदाधिकारिणां च तुलनायां निकृष्टतमाऽवस्था वरीवर्त्ति वेतनमानादिविषये; एवमेव च मध्यप्रदेशोत्तरप्रदेशगुजरातादि—समस्ताग्रेसराऽन्यप्रादेशिकायुर्वेदसंस्थानामपेक्षयाऽतितरां हीनतरा वेतनस्तरादिरूपा ऽऽर्थिकी स्थितिः पदप्रतिष्ठितिश्चेति महद् दौर्भाग्यम् । प्रशासका अत्र विषये भूयो भूयोऽपि वचनीयाः सत्वरं परिस्थितिसंशोधनाय न्यायोचिताचरणाय च साग्रहं प्रार्थ्यन्ते ।

किं बहुना; कृपालवो वाचकवृन्दाः !! आयुर्वेद-भारतीप्रणयिनः श्रीमन्तः !!! इह विचक्षणानां पारदृश्वनां भिषजां यद् विज्ञानसारस्वारस्यं, तद् गृह्णन्तु विशेषाङ्कमायुर्वेदाङ्कममुं च कृपया स्वाङ्गी कुर्वन्तु । यै विद्वद्भिरस्मिन्कार्ये रचनादिप्रेषणेन साहाय्यमनुष्ठितम्; नाममात्रेणाऽप्यत्र सहयोगश्च कृतस्तेषां समेषामेव साधूनां सेवायां यथोचितान् धन्यवादान्पुनः पुनरपि समर्पयामि । मुद्रणादिदोषैः क्वचिदरुचिश्चेज्जायेत सुजना मर्षयन्तु मे मन्तुम् ।

भारती भिषजामेषा ह्यायुर्वेदाङ्कदायिनी ।
जगतां श्रेयसे भूयाद् भूयसे स्वामिनां मुदे ।।

एवं खलु प्रजानां शिवं साधूनाञ्च प्रसादमाशासानो विस्तराद् विरमामीति—

पाराशरीत्युपाह्वः सुदेवचन्द्रशर्म्मा
'भारती'–आयुर्वेदाङ्क-सम्पादकः

संस्कृत भाषा का प्रचार करने वाली
संस्थाओं तथा व्यक्तियों के प्रति
शुभ कामनाओं के साथ

रामविलास नंदलाल

२१५-१७ कालबादेवी रोड़

बम्बई—२

निर्यातक—तैल, तिलहन, खली खनिजोत्पादित
वस्तुएं एवं कपास इत्यादि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतप्रसिद्धा आयुर्वेदमार्तण्डाः प्राणाचार्याः, दिवङ्गताः श्रीमल्लक्ष्मीराम-
स्वामिमहाभागा आयुर्वेदाचार्याः, जयपुरराज्यसंस्कृत-
महाविद्यालयायुर्वेदविभागाध्यक्षाः

येषाञ्चारुविचारचित्रितचरा भैषज्यचित्रा श्रुतिः ।
लक्ष्मीरामशुभाभिधानभिषजः सद्वैद्यविद्यालयाः ।।
आयुर्वेदविदां वराः सुमनसो मान्याः वदान्याः सतां ।
ते चाद्यापि जयन्ति वेदवपुषः स्वर्गङ्गताः साधवः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदप्रचारप्रसारकर्मतत्पराणां राजस्थानायुर्वेदविभागसञ्चालकानां

राजवैद्यश्रीप्रेमशङ्करशर्मभिषगाचार्यमहाभागानां जनस्वास्थ्यरक्षायोजनायामायुर्वेदीयसिद्धान्तानुसारिशुद्धिपञ्चकपरामर्शोद्घोषः

साम्प्रतमवश्यं विचारणीयोऽयं विषयः पुरस्ताद्विद्यते यन्निखिलस्यापि देशस्य स्वास्थ्यस्य सुरक्षा कथं भवितुमर्हतीति। एतदर्थञ्च विश्वस्वास्थ्यसङ्घटनमहासम्मेलनेषु समस्तदेशानां प्रतिनिधयः समागच्छन्ति, विषयेऽत्र संवदन्ति च बहुतरम्—'अनुदिनवर्धमाननूत्नरोगशमनाय यथा यथा भेषजानि गवेष्यन्ते, भेषजव्ययोऽपि वर्धत एव, तदनुपातेनैव मेडीकलकालेजा अपि द्रुतगत्या वर्धन्ते, ततोऽपि देशे डाक्तराणां पूर्त्ति र्न भवति, न चानुदिनवर्धमानरोगनियन्त्रणसमस्यैव समाधीयते। अद्य विश्वस्य समेऽपि स्वास्थ्यविशारदाश्चिन्तिता यन्नैकेषामाशुचमत्कारिभेषजानां प्रतिक्रिया वर्धमानाः सन्ति, यासां निरोधोपायभेषजगवेषणमनिवार्यमित्यूरीक्रियते। पुनरपि भेषजानामुपरि व्ययाधिक्यसमस्यासमाधानं नैतैरुपायैर्भवितुमर्हति। एतत्कार्यनिमित्तेन चिकित्सकस्तरसमुन्नत्यै रोगप्रशमनौषधोपकरणसम्वर्धनाय च व्ययाङ्कवर्धनमित्यन्या वार्ता, गम्भीरतया विचारणीयन्त्वेतत् यत्सहस्राधिकग्रामोटजनिवासिदीनाऽसहायरोगिजनानां गृहे भेषजप्रेषणं कियत् कालेन कियद्व्ययानन्तरञ्च सम्भाव्यते।

राजस्थानप्रदेशवैद्यसम्मेलनमञ्चादस्माद् वयमदो निवेदयितुमभिलाषो विश्वस्वास्थ्यसङ्घटनाय यद् **विश्वस्य समेषां प्राणिनां हितायाऽऽयुर्वेदीयानां स्वस्थवृत्तसदाचारयोजनानां क्रियान्वयनाय भारतादायुर्वेदप्रतिनिधींस्तदामन्त्रयतु, सिद्धान्तश्चासौ क्रियायामाचरणीयः।** लंकासर्वकारेण भारतशासनमाध्यमेन पंडितशिवशर्ममहोदयानां भूतपूर्व नि० भा० आयुर्वेदसम्मेलनाध्यक्षणामाह्वानं कृत्वाऽस्य देशस्य पुरातनसर्वमान्यचिकित्साविधिना लङ्काप्रजालाभोऽनुष्ठित इति नूनमसौ धन्यवादार्हः।

प्रसंगेऽस्मिन्मे निवेदनम्—स्वस्थवृत्तसद्वृत्तयोजनानां देशे प्रदेशे वाऽऽधिकाधिकप्रयोगो विधीयेत चेत्तर्हि ग्रामपञ्चायत-तहसीलपञ्चायत-जिलाक्षेत्राणि चानेन **जनस्वास्थ्यसेवां विधायानुदिनवर्धमानरोगोत्पत्तिमुपरोद्धुं शक्नुवन्ति। अयमेव खलु स्वास्थ्यविभागस्य मूलदृष्टिकोणः। प्रतिग्रामपञ्चायतक्षेत्रवासिजनस्वास्थ्यरक्षार्थं स्थान-देह-आहार-विहार-मनसां पञ्चानां प्रत्येकस्य शुद्धिरावश्यकी। एभिरेवोपायैः स्वास्थ्यसंरक्षणयोजनां वयमधिकाधिकां सफलयितुं शक्ष्यामः।**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
कविशिरोमणिः
भट्टश्रीमथुरानाथशास्त्री
जयपुरम्
अस्याङ्कस्य सम्पादकः
वैद्यसुदेवचन्द्रपाराशरी
शास्त्री, D.L.M.S., प्राध्यापकः
राजकीयायुर्वेदमहाविद्यालयः,
जयपुरम् ।

भारती

संस्कृत-मासिकस्य

आयुर्वेदाङ्कः

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम् (राजस्थानम्)
अस्याङ्कस्य सहसम्पादकाः
दीनानाथत्रिवेदी मधुपः
वैद्यः लक्ष्मीनारायण शास्त्री
जयपुरम्

वर्षम् १४ | अप्रैल-मईमासौ, सन् १९६४ | अङ्कौ ६-७

श्रीधन्वन्तरिस्तवः

लेखकः—साहित्यमहोपाध्याय आशुकविकविभूषण-पण्डितश्रीहरिशास्त्री दाधीचः, जयपुरम् ।

अभयममृतकुम्भं सोमवल्लीं जलौकां,
करसरसिरुहैः स्वैर्जानुदीर्घैर्दधानः ।
कनकमुकुटरम्यः कुण्डलोल्लासिवक्त्रः,
भवतु भविकवृद्धैच देवधन्वन्तरिर्नः ॥१॥

नानारोगनिपीडितानपि जराजीर्णाञ्जनान् वीक्ष्य यः
कारुण्यैकनिधिः समस्तजगतां क्षेमाय सौख्याय च ।
आदित्यासुरमथ्यमानजलधेः सोल्लासमाविर्गतः
श्रीमानादिभिषक् श्रिये स भगवान्धन्वतरिर्जायताम् ॥

नामापि यस्य क्षममौषधेन,
स्वास्थ्यं प्रदातुं जगदातुरेभ्यः ।
*समं, स देव्यः प्रथमो भिषङ् मे,
धन्वन्तरिः श्रीहरिरस्तु भूत्यै ॥३॥

स्वास्थ्यश्रीणां प्रसारो भवजनितभियामेक एव प्रहारः
संहारः सर्वरोगव्रजकृतविपदां प्राणपुष्टेर्विहारः ।
आधारः श्रेयसां योऽखिलभवजनुषां शौर्य्यसौख्यैकसारः
आयुर्वेदोपदेष्टा स भवतु भगवानादिवैद्योऽत्युदारः ॥

पीताम्बरः कनकभूषणभूषिताङ्गः,
स्मेराननः श्रुतिभुजो धृतपद्ममालः ।
धन्वन्तरिः स भगवानरविन्दनेत्रः
पायादपायचयतः सुकृतैकराशिः ॥५॥

याभिर्वारिधिवारि सर्वमचिरात् पीयूषपूरायितम्,
याभिश्चोल्वणकालकूटजनितास्तापाः शमं प्रापिताः ।
याभिर्देवगणा धृता ह्यमरताकोटौ च दैत्या हताः
आरोग्यं वितरन्तु ता भगवतो धन्वन्तरेर्दृष्टयः ॥६॥

---

*'समं' औषधेन सममिति योजना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

रचयिता :—वैद्य-श्रीदेवशास्त्री, आयुर्वेदाचार्यः, काव्यतीर्थः, आ० अ० ।
इन्चार्ज :—श्री रा० आ० औ० असाडा (बाडमेर)

गजल-गीतिका

अयि भारतीय ! भव्या सेव्या स्वभारतीयम् ॥
प्रीणाति संसृतौ नः, प्राणान् नृणां सतीयम् ॥१॥
हृद्या मनोऽनवद्या, वन्द्याभिशंसिताशा ॥
नव्याननन्तगव्या, सेयं सदा शुभाशा[1] ॥२॥
परमेष्ठितोऽवतीर्णा[2], सूर्येण प्राणितेयम् ॥
सोमं गता हिमांगोत्तुंगां दिशं श्रितेयम् ॥३॥
रसनिर्झरीव सरिता, भागीरथीव झरिता ॥
हरितायिता पुनः स्मान्, चेतःसु चापि भरिता ॥४॥
एषा स्फुरत्प्रकाशं, वेदं प्रणष्टभेदम् ॥
विविनक्ति सम्यगर्थं, सार्थोपभेदभेदम् ॥५॥
एषा स्फुरत्यशेषा, विज्ञान-भूविशेषा ॥
लसदुत्तमांगसंगा, भाषादिभेद[3]भंगा ॥६॥
चलदुत्तरोत्तरंगा, गां गच्छतीव गंगा ॥
पायात् स्वभारतीयं चेतांसि नः [4]स्वरंगा ॥७॥
अधुना कृशा भृशं हा ! सर्वं सहा युतीयम् ॥
श्वसितीव चाश्रुमुक्ता, कोणे स्वभारतीयम् ॥८॥
अयि हे समाज ! सज्जां बुद्धिं विधेहि [5]धेहि ॥
हृदये स्वरं गिरं तां, निजभारतीमवेहि ॥९॥
सदयां मुदा प्रयाचे, "श्रीदेव" बुद्धिमञ्चेत् ॥
ललिताक्षरा विशालामलभारतीह सिञ्चेत् ॥१०॥

---

१. शुभाशा=निर्मलादिक् । २. यथा गंगाया त्रिपथगात्वं तथास्या इतितयोपमिता । ३. अनया-अध्ययनाध्यापनेन भाषाभेदः कलिरपगच्छतीति । ४. स्वः स्वर्ग एवांगो यस्याः, वा सेयमंगभूता । ५. धारय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यविद्याविद्योतितान्तःकरणानां महामहिमशालिनाम् आयुर्वेदमार्त्तण्ड-चिकित्साचूडामणि-भिषगाचार्य-

श्रीजयरामदासस्वामिमहाभागानां संक्षिप्त-परिचयः

[श्रीदीनानाथत्रिवेदी 'मधुपः', महाराजसंस्कृतकॉलेजः, जयपुरम्]

इह हि को न जानाति—भारतसुप्रसिद्धं सिद्धयोगं वैद्यविद्यानिपुणं निखिलगुणगणं स्वामिप्रवरं विद्वदग्रेसरं श्रीजयरामदासनामानं सर्वतः सर्वविधसम्प्राप्तसम्मानं विषयविरागं स्वामिमहाभागम्। एष आकृत्या मनोहरः प्रकृत्या सुकोमलः, वंशपरम्पराप्राप्ते वेशे एव बद्धादरः, अनन्तवैभवविभूषितोऽपि शमदमादिषट्कसम्पत्तिशाली, सद्द्वेषोऽपि द्वेषनिर्मुक्तचित्तः। एवं विशिष्टशिष्टजनोचितः सर्वोऽपि गुणानां गणोऽस्मिन् स्वामिनि विराजतेतमाम्।

जन्म

गुणिजनगेयस्य कामादिभिरजेयस्य स्वामिनोऽस्य महाभागस्य जयपुरमण्डलान्तर्गतस्य भादवाख्यग्रामस्य समीपवर्तिनि क्षेत्रे १९०५तमे खिस्तवत्सरे नवम्बरमासस्य १३ तारिकायां जातं जन्म। जन्मनाम च तदानीं 'जीवनः' इति रक्षितमभूत्। तदैव दैवज्ञेन केनापि कथितं 'यदयं बालको मातापित्रोः कृतेऽकल्याणकरो भविता' इति। ततो मातापितृभ्यां सोऽयं बालको भादवाग्रामस्थिताय दादूसम्प्रदायानुयायिने महन्त-श्रीभूरादासस्वामिने समर्पितो दादूसम्प्रदायविधिना च दीक्षितः समभूत्। ततस्तेन चैष स्वामिवर्याय वैद्य-श्रीकल्याणदासमहाभागायार्पितः।

इत्थञ्च भिवानीनिवासी स सुप्रसिद्धोऽनवद्यो वैद्यो महन्तपदवाच्यः श्रीकल्याणदासमहाभागः स्वामिनमेनं मतिमन्तं मत्वा शिष्यरूपेणाङ्गीकृत्य 'जयरामदासः' इति नामसंस्कारं च विधाय पालनपोषणे चाप्यस्य व्यधात्। अत एव प्रारम्भिकशिक्षामपि तत्र भिवानीनगरे एव स्वामिमहोदयोऽयमलभत। 'लोके भविष्यतो मनोहरस्य पादपस्य पर्णानि स्निग्धानि भवन्ति' इति लोकोक्त्यनुसारेण स गुरुमहोदयस्तु शिष्येष्वन्येषु सत्स्वपि गुणगणगरिष्ठं तेजोवरिष्ठं शिष्यमेनमेव स्वस्य महन्तपदेन संयोक्तुमैच्छत्। एवं ततश्च श्रीगुरोः स्वर्गगमनानन्तरमयमेव महामनाः स्वामिमहोदयस्तत्र महन्तपदासीनः समजनि।

शिक्षा

अथ स्वामिमहाराजः सोऽयमध्ययनार्थं काशीं प्रस्थितः। तत्र च साहित्यशास्त्राणि सम्यक् समभ्यस्य ततस्ततोऽपि कुलक्रमागतामायुर्वेदविद्याममध्येतुं श्रीदयानिधिस्वामिनोऽन्तिके हृषीकेशमगात्। तेष्वेव दिनेषु च तत्र हृषीकेशस्थ-श्रीधन्वन्तरिमन्दिरस्य समुद्घाटनार्थं परमपूज्य आयुर्वेदमार्तण्डः स्वर्गीयः स्वामिप्रवरः श्रीलक्ष्मीराममहाराजोऽपि स्वर्गत – राजवैद्य – पण्डित-श्रीनन्दकिशोरशर्मभिस्त्यागमूर्ति – स्वामिवर– श्रीमङ्गलदासमहाराजैश्च सार्धं गत आसीत्। तत्र च लेखस्यास्य नायकमेनं श्रीस्वामिमहोदयं कुशाग्रबुद्धिं विचिन्त्य ततो जयपुरञ्च प्रत्यागत्य स्व० श्रीलक्ष्मीराममहाराजोऽत्र जयपुर एवायुर्वेदस्याध्ययनार्थं समाहूतवान्। प्रत्युत्पन्नमतिश्चायं ततो हृषीकेशतो भिवानीं गत्वा तत्र च भवनादिकस्याखिलामपि सुव्यवस्थां विधाय श्रीमुरलीधराचार्यतिलकमहोदयेन सहैव १९७९ वैक्रमाब्दस्य ज्येष्ठशुक्ले १५ तिथौ श्रीस्वामिमहाराजस्यादेशानुसारेण जयपुरनगरमिदमागतवान्।

एवमत्रायुर्वेदस्य कतिचन प्रारम्भिकग्रन्थान् राजपण्डित-श्रीनन्दकिशोरशर्ममहाभागात्, शेषांश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीस्वामिमहाराजतः समधीयानः सोऽयं स्वामिमहा-भाग आयुर्वेदोपाध्यायं प्रथमश्रेण्यां, विशारदपरीक्षाञ्च द्वितीयश्रेण्यां समुत्तीर्य तदनन्तरं महाराज-संस्कृतकॉलेजतश्चौषधनिर्माणादिकं कार्यमपि सम्पादयन् आयुर्वेदशास्त्रिपरीक्षामुत्तीर्णवान् । तथैव च स्वामिमहाराजतः सम्यग् यथाविधि समधीत्य भिषगाचार्यपरीक्षामप्युदतीतरत् । सहैव तदानीं श्रीस्वामिमहाराजस्य सेवायां वर्तमानश्च तस्मात् तादृशमेव चिकित्सायां कौशलमपि समुपार्जितवान् । मध्ये-मध्ये चानेकेषु स्थानेषु चिकित्सार्थमपि प्रयाति स्म महानुभावोऽयम् ।

कार्यारम्भः

एवमध्यापनसमय एव चैतस्य कर्तव्यनिष्ठा-सेवाभावना-सत्यपरायणताप्रभृतिभिः स्वभावसिद्धैरेभिर्गुणैः सुप्रसन्नः सन् स्वर्गीयः श्रीस्वामिमहाराजश्चैतत् सुनिर्णीतवान्—'यन्मम स्थानस्यास्योत्तराधिकारी सुयोग्यतमोऽयमेव भवेत्' इत्यचीकमत । गुरुभक्तः स्वामिवर्योऽयमपि निजगुरुदेवस्य स्व० श्रीस्वामिमहाराजस्य केवलमाज्ञां शिरसि विधाय भिवानीस्थं वैभवसम्पन्नमपि पूर्वस्थानं न किञ्चित् परिगणयन् जयपुरे वस्तुमङ्गीकृतवान् । तथा च गुरुदेवस्य श्रीस्वामिमहाराजस्य समुचितां सेवां तथा चिकित्सामेवं स्वस्थानस्यास्य विविधानि कार्याणि च सुचारुणा विधिना कर्तुं प्रावर्तत सोऽयं महाभागः ।

अध्यापनम्

ततः स्व० स्वामिमहाराजे च राजकीयसेवातो विनिवृत्ते जातेऽनन्तरं स्वर्गीयो राजवैद्यः परमादरणीयः श्रीनन्दकिशोरशर्ममहाभाग आयुर्वेदस्य प्रधानरूपेण निर्वाचितोऽभूत्, तदानीं द्वितीयाध्यापकपदे च स्वामिवर्यः सोऽयं निर्णीतः समजायत । ततश्चैष राजसेवायामथ कार्यक्षेत्रे च पादार्पणं कुर्वन् स्वर्गीयस्य स्वामिमहाराजस्य भावनानामनुसारेण कार्यं कर्तुमारभत । एवं कालेजे चास्याध्यापनकौशलस्य, सद्व्यवहारस्य तथायुर्वेदस्याभ्युन्नतये च सातत्येन क्रियमाणस्य परिश्रमस्य प्रभावोऽधिकारिवर्गे तथा छात्रसमवाये च सुमहान् पतितः । आयुर्वेदाध्यापनेन सहैव चिकित्सायाः कार्यमपि विशिष्टरूपेण कर्तुं प्रावर्तत । तथा स्व० स्वामिमहाराजेन संस्थापितस्य स्थानीय 'श्रीधन्वन्तरी' ति ख्यातस्यौषधालयस्य तथा श्री दादूमहाविद्यालयस्य च संचालनव्यवस्थायामपि भागं ग्रहीतुं प्रवृत्तोऽभूत् ।

स्वामिलक्ष्मीराम-निधिरक्षणमण्डल (ट्रस्ट) स्थापनम्

किञ्च स्वर्गीयस्वामिमहाराजेन स्वोपर्जितधनराशितः संस्थापिते निधिरक्षणमण्डले (ट्रस्ट) अपि श्रीस्वामिमहाराजं संप्रार्थ्य द्रव्यस्य वृद्धिः कारिता महाभागेनानेन । निधिरक्षणमण्डलेनानेनैव च संस्कृतस्य तथायुर्वेदस्य शिक्षणार्थं छात्रवृत्तिः प्रदीयते, आयुर्वेदस्यैवं सन्तसाहित्यस्य प्रकाशनं विधीयते, धन्वन्तर्यौषधालयस्य तथा श्रीदादूमहाविद्यालयस्यैवमारोग्यशालायाश्च कृते साहाय्यं प्रदीयते । निधिरक्षणमण्डलमिदं राजस्थाने सर्वतः प्रथमं पञ्जीकृतमजायत ।

अपि च गुरुशुश्रूषणमेव परमं कर्त्तव्यं मन्वानः सोऽयं महाभागः स्व० स्वामिमहाराजं रुग्णावस्थायां समनोयोगं सर्वतो भावेनासेवत । परं सर्वविधचिकित्सायाः सौलभ्ये सत्यपि 'संयोगा हि विप्रयोगान्ताः' इति सिद्धान्तानुसारेण रात्रिन्दिवमपि त्यक्तान्यकार्यजातेनानेन सेवमानोऽपि नश्वरं स्वकीयं पाञ्चभौतिकं शरीरं स्वामिलक्ष्मीराममहाराजः १९३९ तमे ख्रिस्ताब्दे परित्यज्य निर्वाणपदं लब्धवान् । अनन्तरन्तु महाभागेऽस्मिन् विविधमन्यदपि समापतितमुत्तरदायित्वम् । तथापि महता धैर्येणोत्साहेन बुद्धिकौशलेन च प्राप्तं सर्वमपि कार्यजातं यथाविध्यन्वतिष्ठत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यश्रीजयरामदासस्वामी [illegible] णाचार्यः

संस्कृतप्रचारपरि[illegible]दध्यक्षः

यः स्वामिवर्योऽखिलवैद्यराजः, गुण्यग्रणीः श्रीजयरामदासः ।
त्यागी धनी सैष हिताय नृणां सन् दीर्घजीवी जयताज्जगत्याम् ॥
लक्ष्मीवदासेवितपादपीठो यदङ्गसन्नद्धमनोजलक्ष्मीः ।
यः [illegible]यः किल वैद्यलक्ष्मीरामस्य विद्यात स सुकीर्तिलक्ष्मीम् ॥ —मधुपस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यश्री[illegible]कारस्वामी भिषगाचार्यः

लक्ष्मीरामसुवैद्यवृन्दनृपतेर्यो भ्रातृजः श्रीमतः,
स्वामिश्रीजयरामदासभिषजः शिष्यश्च कॉलेजके ।
सत्प्राध्यापकतां वहञ्जयपुरे वेदस्य यश्चायुषः,
सोऽयं वैद्यवरो विभाति पुरतो रामप्रकाशः सुधीः ॥

—मधुपस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानाचार्यपदावाप्तिः

अनन्तरं च स्वर्गतराजवैद्यमहाभागो वर्तमानश्च सोऽयं श्रीस्वामिमहानुभाव एवमुभावपि सुमहान्तं प्रयासमायुर्वेदस्य समुद्धाराय समनुष्ठितवन्तौ। एतयोरुभयोरेव महानुभावयोः प्रभावेण श्रमेण च स्थानीयमहाराजसंस्कृतकालेजात् सोऽयमायुर्वेद-कॉलेजः १९४६ तमे ख्रिस्ताब्दे पृथग्रूपं प्राप्तवान्, यस्य च पुनरध्यक्षपदं स्व० राजवैद्यः समलङ्कृतवान्, तथा स्वयं चैष स्वामिमहाभागः प्रायोगिकविभागस्याध्यक्षस्तथा प्राध्यापकश्च समभूत्। अपि चायं स्वामिप्रवरो राजवैद्यमहाभागं स्वगुरुभ्रातरमेवामन्यत। स च स्वगुरोः स्थानस्योत्तराधिकारितामुपगतवतश्चास्मान् सर्वत्रापि कार्यकलापे सर्वविधमपि सहयोगमासादितवान्।

किञ्च—स्वर्गीयनन्दकिशोरवैद्यराजस्य तथा चैतस्य स्वामिमहाभास्य च महता प्रयत्नेन चिकित्साव्यवसायं सुव्यवस्थितरूपेण परिचालयितुं जयपुरस्थस्य 'इण्डियनमेडिसनबोर्डस्य,' तथायुर्वेदचिकित्साप्रोत्साहनं लभेत—इत्येतदर्थं संचालककार्यालयस्य च स्थापनमजायत। तत्र सोऽयं स्वामिवर्यो बोर्डस्य सदस्यतामलभत, साभापत्यञ्च स्व० राजवैद्यः। एवमायुर्वेदविभागस्यापि कार्यं प्रारब्धमभूत् तथा कतिचनौषधालयाश्चास्थाप्यन्त। अन्ते च १९५२ तमे ख्रिस्ताब्दे राजवैद्यमहाभागस्य स्वर्गमनानन्तरमायुर्वेदकालेजस्य प्रधानाचार्यत्वमाप्तवान् महानुभाव एषः।

विविधकार्यकलापोऽनेकपदलाभश्च

अपि च यदायुर्वेदसम्मेलने वैद्यवर—श्रीयादवमहाराजस्य श्रीशिवशर्मणश्च मिथः समुत्पन्नाद् वैमत्यात् मनाग् गतिनिरोधः समुदपद्यत, तथा यावत्महाभागेन च सम्मेलने स्वस्यागमनादिकमपि परित्यक्तमभूत्, तदानीं सोऽयं स्वामिमहाभाग एव महता परिश्रमेण बड़ौदास्थे सम्मेलने सर्वानपि विरुद्धमतभाजोऽपि भिषजः पुनरेकस्मिन् मञ्चे समानेतुं प्राभवत्।

किञ्च बडौदास्थ-सम्मेलनस्योद्घाटनं सन्त-विनोबाभावेन यदक्रियत, तदपि स्वामिमहाभागस्यास्यैव सातत्येन समनुष्ठितस्य परिश्रमस्य तथामितस्य प्रभावस्य च फलमभूत्। एवं दिल्लीस्थ-श्रीवनवारीलालायुर्वेदविद्यालयस्य स्वर्णजयन्ती-महोत्सवस्य चायमध्यक्षपदमलङ्कृतवान्। वर्षाणि यावच्च सद्वैद्यसभाया अध्यक्षोऽवर्तत, संप्रति च तस्याः संरक्षको विद्यते स्वामिमहाराजः। एवमेवायुर्वेदस्य निखिलभारतीयेषु वा कार्येषु निरन्तरमेवास्य महाभागस्य परिपूर्णः सहयोगोऽस्थात्। अत एव च स्वामिमहाभागोऽयं राजस्थान-प्रदेश-सम्मेलनस्याध्यक्षतामपि स्वीकृतवान्।

स्वामिलक्ष्मीराम-चलविजयोपहारः

तथा चायुर्वेदमधीयानेषु च्छात्रेषु भाषणकलामपूर्णामनुभवन्नयं स्वामिमहाभागः ५०० पञ्चशत-तोलापरिमितां रजतमयीं भगवतो धन्वन्तरेर्मूर्तिमेकां स्वामिलक्ष्मीराम-चलविजयोपहारस्वरूपे सम्मेलनाय दत्तवान्। यदर्थञ्च समये-समये वादविवाद-प्रतियोगिता भवन्ति समायोजिताः। तत्र प्राथम्यं लभमानाय कॉलेजायोक्तो विजयोपहारः प्रदीयते, प्रथमं स्थानं समासादयते च च्छात्राय सम्मेलनेन स्वर्णपदकं दीयते।

संस्कृते हिन्द्यां चानुरागः

अपि च स्वामिवर्योऽयं चिकित्साक्षेत्रे वर्तमानोऽपि 'संस्कृतसाहित्यं हि भारतवर्षस्य वर्ततेऽमूल्यो निधिः' इति कृत्वा संस्कृतसाहित्यस्य सेवायामपि सर्वदाग्रेसरतां वहन् वर्षेभ्य एवाखिलभारतवर्षीय-संस्कृत-साहित्य-सम्मेलनस्य कार्यसमितेः सदस्यो विद्यते।

किञ्च यदा हि संस्कृतरत्नाकरस्य प्रकाशनं जयपुराद् बहिर्गतं, तस्य रत्नाकरस्य प्रकाशनञ्चानियमितमभूत्, तदास्य महाभागस्य प्रेरणयैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'भारत्याः' संस्कृतमासिकपत्रिकायाः प्रकाशनं सञ्जातम्। सा चेयं प्रतिमासं यथाकालं प्राकाश्यं लभते, तथा च या सर्वेष्वेव क्षेत्रेषु ससम्मानमवलोक्यते। एवञ्च 'भारती' संस्कृतमासिकपत्रस्य कृते प्रारम्भत एव संस्कृतप्रचारपरिषदोऽध्यक्षोऽयं श्रीस्वामिमहाभागः परिपूर्णं सहयोगं दत्तवान्—एतदर्थञ्च 'भारती' परिवारोऽस्य महान्तमाभारं बिभर्ति। तथा च जयपुरस्थ-निखिलभारतवर्षीय-संस्कृतसाहित्यसम्मेलनस्य स्वागतमन्त्री समवर्तत, तथा हिन्दीसाहित्यसम्मेलनस्य चोपस्वागताध्यक्षः। एवमेव स्थानीय-राष्ट्रभाषाकॉलिजप्रभृतीनां विविधानां हिन्दीसंस्थानामध्यक्षस्तथा सदस्यश्च विद्यते। एवं नागरीप्रचारिणीसभायाश्चाजीवं सदस्यः, तथा स्थानीयानाथाश्रमस्य कार्यसमितेस्तथा दिल्यामिण्डियनबोर्डस्य चारम्भत एवायं विद्यते सदस्यः। एतदतिरिक्तञ्च कालेडास्थस्य कृष्णगोपाल-धर्मार्थौषधालयस्य महाभागोऽयं निधिसंरक्षकः (ट्रस्टाधिपतिः) अप्यवर्तत।

एवमेव गोगुरुभक्तः सोऽयं महाभागो गोशाला-प्रबन्धकसमितेस्तथा जयपुरस्थ-मानवाश्रमस्यापि वर्षेभ्यः कार्यसमितेः सदस्योऽवर्तत।

अधोलिखितानां संस्थानां परीक्षकोऽप्येष महाभागः—

१—स्नातकोत्तरप्रशिक्षणकेन्द्रं, जामनगरम्।
२—हिन्दूविश्वविद्यालयः, काशी।
३—गुरुकुल-कांगड़ी-आयुर्वेदविश्वविद्यालयः, कांगड़ी (हरिद्वारम्)।
४—वनवारीलालायुर्वेदविद्यालयः, दिल्ली।
५—अखिलभारतवर्षीयायुर्वेदविद्यापीठम्, दिल्ली।
६—आयुर्वेदपरीक्षामण्डलम्, राजस्थानम्।
७—हिन्दीसाहित्यसम्मेलनम्, प्रयागः।
८—ललितहर्यायुर्वेदकॉलेजः, पीलीभीत।

चिकित्साया वैशिष्ट्यम्

किञ्च चिकित्साक्षेत्रेऽपि स्वामिमहाभागस्यास्य विशिष्टं स्थानं वरीवर्ति। तथापि महाभागोऽयं चिकित्साविषयकं कार्यमिदं वस्तुतो व्यावसायिकदृष्ट्या नाङ्गीकृतवान्, अपि तु लोकसेवाया भावनया, तथायुर्वेदस्याभ्युदयो भवेदिति बुद्ध्या चैव। तथा नैजाप्रतिमप्रतिभाप्रभावेण निदान-चिकित्सोभय-विधपाटवेन चैष चिकित्साधुरीणोऽसाध्येभ्योऽपि रुग्णेभ्योऽसकृत् प्राणप्रदानं कृतवान्। इह सन्ति बहून्येवोदाहरणानि। एवं चिकित्साविषये तु कथनमेतदेव पर्याप्तं भविष्यति यत् कुशलचिकित्सके यावन्तो गुणा अपेक्ष्यन्ते तावन्तः सर्वे एव समुचिता गुणाः श्रीमति स्वामिनि साकल्येन विराजन्ते। तथा चास्य महाभागस्य चरकसिद्धान्तेषु परमः समादरो वर्तते।

महाविद्यालयस्याभ्युन्नतिः

अपि चात्रायुर्वेदकॉलिज आयुर्वेदस्याष्टानामप्यङ्गानां यथाविधि सम्यगध्ययनाध्यापनादिरूपः सोऽयं पुरातनः स्वप्नः श्रीस्वामिमहाभागस्यास्यैव कार्यकाले पूर्तिमगात्। तथा चारोग्यशालायां सर्वविधानामपि रोगिणां ससुखं निवासार्थमेकशत-संख्यामितानां शय्यानां प्रबन्धोऽपि कृतो विद्यते। एवमेव विज्ञानसम्बन्धिनो ज्ञानस्य पूर्णरूपेण प्राप्तये तथा विकासाय च पुस्तकालयस्य प्रयोगशालाया अध्यक्षकार्यालयस्य तथा नव्यकक्षाणाञ्च निर्माणमेकस्य भव्यस्य भवनस्य रूपे श्रीस्वामिवर्यस्यैव कार्यकाले समजायत। भव्यभवनस्यास्य चोद्घाटनं भारतसर्वकारस्य स्वास्थ्यमन्त्रिणा श्रीकरमकर-महाभागेन समपाद्यत। सांप्रतं चैकं विशालं सभा-भवनं जायमानं विद्यते। एवं श्रीस्वामिनः संरक्षकतायां महाविद्यालयोऽयं सर्वविधां समुन्नतिं कुर्वन् विद्यते—इति निःसंकोचं वक्तुं शक्यते।

स्वसम्प्रदायसेवा

दादूसंप्रदाये च शिक्षाया अभिवृद्ध्यर्थं स्वर्गीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामिमहाराजेन यः श्रीदादूमहाविद्यालयः स्थापित आसीत्, तस्य सञ्चालनकर्मणि सहसा समुपस्थितान् सर्वविधान् विघ्नानपि दूरीकुर्वन् सर्वदैव सोत्साहः संदृश्यते महाभागोऽयम् । स्वामिमहाराजस्यास्यैव प्रयासस्य वर्तते फलमिदं यत् 'त्यागमूर्तिः श्रीमंगलदासमहाराजः संस्थामेतामद्यावधि परिरक्षन् विद्यते' इति ।

श्रीदादूमहाविद्यालयस्य च भारतवर्षस्य संस्कृतशिक्षणसंस्थासु सुमहत्वपूर्णं स्थानमस्ति । महाविद्यालयस्य चैतस्यानेके स्नातकाः विशिष्टेषु स्थानेषु सुयोग्यतया प्रामाणिकतया च कार्याणि कुर्वाणा वर्तन्ते । एतन्महाविद्यालयीयेषु स्नातकेषु च मण्डलेश्वराः, व्याख्यातारः, अध्यापकाः, वैद्याः, प्राध्यापकाश्च सन्ति यत्र-तत्र सर्वत्र । स्वतन्त्ररूपेणापि ये सन्ति चिकित्सकास्तेऽपि ससम्मानं कार्यमनुतिष्ठन्ति । एवमनया संस्थया न केवलं दादूसम्प्रदायस्यैव सुमहान् 'उपकारः समभूत्, अपि तु शिक्षाक्षेत्रस्यापि ।

श्रीदादूदयालुमहासभा

अपि च १९४२ तमे वैक्रमसंवत्सरे स्वर्गीयस्वामिमहाराजेन संस्थापितायाः पुनर्मध्ये च सांप्रदायिकजनानामौदासीन्येन बाधकप्रवृत्तिभिश्च शैथिल्यमुपगतायाः श्रीदादूदयालमहासभायाः पुनः समुत्थानमेष स्वामिमहाभागो महता प्रयत्नेन कृतवान् । सभायाश्चास्याः प्रधानमन्त्रिपदमारूढोद्याऽवधि प्रबलेनोत्साहेन महासभाकार्यं सञ्चालयन् वर्तते। अद्य सभायाः संप्रति यद्रूपमवलोक्यते, तदस्यैव महाभागस्य श्रमस्य फलम् । अद्य हि सभा समाजस्य प्रतिनिधिभूता संस्था विद्यते । सैषा संप्रति निम्नलिखिताः संस्थाः संचालयन्ती वर्तते । यथा हि—

१. श्रीदादूमन्दिरम्, नरेना । २. श्रीदादूमठः, वाराणसी । ३. श्रीमहानन्दाश्रमः, हृषीकेशः । ४. श्रीदादूद्यानम्, कनखलम् । ५. श्रीदादूद्वारम्, आमेरः । ६. श्रीदादूद्वारम्, कलानौरम् ।

उल्लिखिताश्चैताः सर्वा अपि संस्थाः स्वकीयं विशिष्टं महत्वं रक्षन्ति । एवं नरेनास्थस्य श्रीदादूमन्दिरस्य जीर्णोद्धारमपि स्वामिनो महाभागस्यास्यैव सत्प्रयत्नानां फलं विद्यते ।

अपि च १९४४ तमे वर्षे नरेनानगरे श्रीदादूचतुःशताब्दीमहोत्सवो यः समायोजितः सोऽपि साफल्येन समपद्यत । यत्र च विशिष्टा विभिन्नसांप्रदायिका आचार्याः, मण्डलेश्वराश्चापि सम्मिलिता अभूवन् । तत्रापि श्रीस्वामिमहाभागस्य प्रयास एव परमो हेतुः ।

किञ्च—स्वसम्प्रदायस्य निखिलमपि कार्यजातं निर्विघ्नतया परिचलेत्' इति कामनयैव 'दादूनिधिरक्षणमण्डलं (ट्रस्ट) स्थापितमभूत्, यत्र च सर्वतः प्रथमं योगदानं स्वयं स्वामिवर्य एवायं कृतवान् ।

दानशीलता

अपि च स्वामिमहाभागोऽयं विविधेषु शैक्षणिकेषु च कार्यकलापेषु प्रारम्भत एव मुक्तमुष्टिः सन्नेव धनत्यागं कुर्वन् वर्तते । अत एव स्वजीवनकालेऽयमनुमानत एकलक्षमितरूप्यकाणां दानं कृतवान् । एवं दादूद्याने(कनखले)चैष महाभागो यद् भवनमेकं निर्माप्य संस्थायै प्रदत्तवान्, तस्य निर्माणे २५००० पञ्चविंशतिसहस्ररूप्यकात्मको व्ययः सञ्जातः । एवमेव वैद्यसमाजे, साधुसमाजे तथान्यकार्येषु च स्वामिमहाभागस्य सर्वदा सहयोगो भवति ।

अत एव सांप्रदायिकक्षेत्रे चायं महाभागः संप्रदायस्य मूलस्तम्भभूतः—इत्युच्यते विज्ञैः ।

विशिष्टाः शिक्षागुरवः

१—आयुर्वेदमार्त्तण्डः स्वर्गीयः स्वामी श्रीलक्ष्मीराममहाराजः ।

२—महामहोपाध्याय-पण्डित-श्रीगिरिधरशर्मचतुर्वेदमहाभागः ।

३—कविशिरोमणि—भट्टश्रीमथुरानाथशास्त्रिमहोदयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४—श्रीनारायणमुनिमहाराजः।
५—श्रीगणेशशास्त्री गौड़ः।
६—श्रीविद्यारामशास्त्रिमहानुभावश्च।
एवमखिलगुणगणमण्डितस्तथेदानीन्तनोऽजातशत्रुरयं स्वामिमहाभागो जयपुरस्थ—राजकीयायुर्वेदमहाविद्यालयस्य सेवाकार्यतो विश्रान्ति प्राप्य सांप्रतमात्मचिन्तने जनकल्याणसाधकेषु कार्येषु च वर्तते तत्परः। तथा च—

आयुर्वेदपयोधिमन्थनविधिप्रोद्यत्प्रभावोज्ज्वलः,
लक्ष्मीरामभिषङ्मरणेश्च प्रमुखः शिष्यः प्रवीणो महान्।
मान्यः स्वस्य निवासतो जयपुरं सम्मण्डयन् यः स्थितः
सोऽयं श्रीजयरामदाससुभिषग् जीव्यात् समाः शाश्वतीः॥

लक्ष्मीपूर्णकृपाकटाक्षवशतः सम्पूर्णसंपज्जुषः,
सर्वैरेव गुणैर्युतस्य च महोदाराशयस्याऽनिशम्।
निर्भीकस्य परायणस्य च हितेऽन्येषां नृणां, स्वामिनो
नास्यातो महिमानमत्र गदितुं शक्तो जनो मादृशः॥

शुभं भूयात्

आयुर्वेदीय-पाठ्यक्रमस्याधारभूता नीतिः कीदृशी भवेत्?

अभिनन्दनीय--श्रद्धेय--श्रीस्वामिजयरामदासानामभिमतम्

आयुर्वेदस्य पाठ्यक्रमस्य विषये बहोः कालाद् विचारः प्रचलन् वर्तते, महतो दुर्भाग्यस्यावसरोऽयमस्ति यत् 'बहुष्वपि वादविवादेषु जातेष्वपि नैवाद्याप्यैकमत्यमजायत' इति। वस्तुत आयुर्वेदीयाध्ययनाध्यापनयोर्विधेः सम्बन्धे चायुर्वेदस्य प्राचीनैराचार्यैः स्पष्टमुक्तं यत् 'आयुर्वेदस्य प्रयोजनं विद्यते स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य चातुरतायाः प्रशमनम्' इति। आयुर्वेदस्य परम्परा शाश्वतिकी विद्यते। सुख-दुःखहिताहितादीनां विचारेण चायुष्यस्य, अनायुष्यस्य तथा द्रव्य-गुण-कर्मणामुपदेशोऽत्र वर्तते।

ऐतिहासिकपरम्परायामवबोधोपदेशाभ्यां विविधसंहितानां तथानेकेषां तन्त्राणां विभिन्नदेशकालेषु निर्माणमभूत्, यत्र चरक-सुश्रुत-काश्यपहारीतादीन्येव यथाकथञ्चित् समुपलभ्यन्ते, शेषाणि च नामशेषतामुपयातानि, केषाञ्चन च नामान्येव न परिज्ञातानि। आयुर्वेदस्य व्यापकताया विचारेणावबोधस्य सौकर्यार्थमेव कायचिकित्साशालाक्यशल्यादीनामष्टानामंगानां विभाजनमभूत्, प्रत्येकांगस्य च प्राधान्यमनुवदद्भिः प्राचीनैराचार्यैः पृथक्पृथगंगेषु तन्त्राणि व्यरच्यन्त। ततोऽपि आयुर्वेदस्य विषयो दशप्रकरणेषु विषयविभागेषु वा प्रविभक्तः १—शरीर, २—वृत्ति, ३—हेतु, ४—व्याधि, ५—कर्म, ६—कार्य, ७—काल, ८—कर्तृ, ९—करण, १०—विधिभेदात्। देशस्य समावेशस्तु हेतौ करणे वा भवति। त्रिस्कन्धस्यायुर्वेदस्यैतेषां दशप्रकरणानामप्यनेके भेदा सम्पूर्णतन्त्रे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपन्ना ज्ञातव्याः । यथा पञ्चमहाभूतानि, दोषाः, धातुमलम्, द्रव्याणि, रसाः, गुणाः, वीर्यम्, विपाकः, प्रभावश्च । यथायुर्वेदः शाश्वतः सार्वभौमः सार्वकालिकश्च द्रव्य-गुण-कर्मात्मकस्वभावसंसिद्ध लक्षण-भावपदार्थैकनिष्ठः । भावस्वभावनित्यत्वान्नित्यः ।

वस्तुत आयुर्वेदस्य दृष्टिकोणो मानवकल्याणाय विद्यते । सर्वेष्वपि देशकालेषु विभिन्नैराचार्यैः कस्मिंश्चिदपि विषये कस्याप्यनुभवस्याधारेणाविष्कृतो मानवतायाः समुपकारार्थं संप्रति प्राप्यते, पूर्वमपि प्राप्यत तथा भविष्यति च प्राप्स्यते । अनया दृष्ट्या च वयमायुर्वेदस्य इयत्तां केषुचित् परिगणितेषु ग्रन्थेषु नैव कर्तुं शक्नुमः । ग्रन्था नष्टुं शक्नुवन्ति, भूमिरपि नष्टा भवितुमर्हति, परं द्रव्य-गुण-कर्मगतः स्वभावसंसिद्धलक्षणो भावस्वभावनित्यतायामाधारित आयुर्वेदः कदापि नैव नष्टो भवितुं शक्नोति । केनापि कस्मिंश्चिदपि देशे काले च कस्याञ्चिदपि भाषायामायुर्वेदस्यावबोध उपदेशो वा भवितुमर्हति । भवति च वर्तमाने, अग्रेऽपि भविष्यति । येन केनापि द्रव्याद्रव्यभूतोपायैः स्वस्थरक्षा व्याधेः शमनञ्च जायते, स एवास्ति किलायुर्वेदः ।

विज्ञानं' सदैव सजातीयं भवति, तस्य वैजात्यमज्ञानेन भवति, अज्ञानं च केवलमायुर्वेदो नैव भवितुमर्हति, अज्ञानेन च आयुषः स्वास्थ्यस्य वा रक्षापि न भवितुं शक्नोति । अत एवाचार्यैः प्रोक्तम्—"न चास्ति सुतरमायुर्वेदस्य पारम्—एवम्भूयश्च वृत्तसौष्ठवमभ्यनसूयकैः परेभ्योऽप्यागमयितव्यम्" । 'कृत्स्नो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम् ।

तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स चैव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ।।

विज्ञानस्याधारः प्रयोगास्तथा अनुभवा भवन्ती आयुर्वेदीयशारीरस्याध्ययने चेरक-सुश्रुतयोर्मान्यतानुसारेण ३६० षष्ट्युत्तरत्रिशतं त्रिशतञ्चास्थीनि बोधयता विदुषा प्रत्यक्षपरीक्षणेन च २०६ षड्द्विशतस्य अस्थ्नां बोधः कारयितव्यो भविष्यति । मांसपेशी-धमनी-शिरानाड्याशयादीनां निरूपणेऽपि प्रत्यक्षपदाश्रितं समुपयुक्तं ज्ञानं ग्राह्यं भविष्यति । किञ्च शवच्छेदनविधौ च साम्प्रतिके युगे अत्राप्रवहन्त्यां नद्यां पञ्जरे स्थापितस्य कुथितस्य शवस्य वंशस्य तूलिकया उत्कृत्योत्कृत्यांगप्रत्यंगानां परीक्षणं नोपयुक्तं भवितुं शक्नोति । शवच्छेदनस्य आधुनिकानि परिष्कृतानि साधनानि प्रकाराश्च सर्वथा आयुर्वेदीयाः सन्ति ।

शल्यतन्त्रे मूत्राश्मरी-निर्हरणस्य शस्त्रकर्म सौश्रुतेणोपायेनाद्य नोपयुक्तं विद्यते । नवेन विधिना वस्त्या उपरि छेदनं विधाय निरुपद्रवशस्त्रेण कर्म कर्तव्यं भविष्यति । बद्धान्त्रस्य शस्त्रकर्मणि कालपिपीलिकादंशनस्य मधुघृतयोश्च उपयोगं न कृत्वा नवीनकैटगटस्य विसंक्रामकद्रव्याणां प्रयोग एव समुचितः वृक्काश्मरी-पित्ताश्मर्यामाशयव्रणान्त्रपुच्छविद्रधि-प्रभृतीनां शस्त्रकर्म पूर्वग्रन्थेषु वर्णितं नास्ति । अतो नव्यशस्त्रकर्मकलानां ग्रहणमवश्यं कर्तव्यम् । 'क्ष' किरणादिभिः इन्द्रियविषयके ज्ञाने साहाय्यम्, एवं मूत्रपरीक्षादीनाञ्च युक्तिभी रोगस्यानुमानमायुर्वेदानुमतमेव विद्यते । शल्यतन्त्रे स्थानिकस्य सामान्यस्यं च शस्त्रकृत्यस्य संज्ञाहरणस्य विधयः प्रयोक्तव्याः । 'विसंक्रमणस्य विषहरणस्य च नव्या उपाया आयुर्वेदस्य सिद्धान्तानुसारेण सर्वथा ग्राह्याः सन्ति । एवं करणेन च सर्वस्याप्यष्टांगकस्यायुर्वेदस्य क्षमता चिरं स्थास्यति, प्रगतिशीला च भविष्यति ।

आयुर्वेदेन सह च 'शुद्ध' विशेषणं 'मिश्र' विशेषणं वा न प्रयोज्यम्, अशास्त्रीयमेतत् । आयुर्वेदस्य प्रयोगः प्राचीनैराचार्यैः परिभाषिते (पारि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषिके) एव अर्थे कृतोऽस्ति, अतः तत्रैव कर्तव्यः तस्य कतिपयग्रन्थेषु प्रयोगेण च स आयुर्वेद एकदेशीयो विकलोऽक्षमश्च भविष्यति। एवं करणेन जीवनसंग्रामे प्रतियोगितायाञ्च वैद्यानामस्तित्वं नाधिकं समयं यावत् समाजे स्थास्यति । मानवहितावहानि सर्वाण्यपि ज्ञानानि मिथः पूरकाणि परस्परं सहायकानि च भवन्ति । प्रसंगेऽस्मिन् दिवंगतस्य श्रीलक्ष्मीरामस्वामिनो विचार आयुर्वेदसम्मतो वैज्ञानिकश्च वर्तते, अतः स ग्राह्यः। एवं स्वर्गीय-गणनाथसेनमहाभागस्य तथा यादवमहाराजस्यापि मान्यतैषैवावर्तत ।

प्राचीना ऋषय इवाचार्यो वाग्भटः—आर्षोऽनार्षाभ्यां निर्वाचनस्य निकषमुपयोगितामेव निगदितवान्, तथा चरकसुश्रुतयोश्चापूर्णतामुद्घोषयन् स द्वयोरपि संकलनं विधाय अष्टांगसंग्रहे, अष्टांगहृदये च ज्ञानानामेकीकरणं कृतवान् । तदनन्तरञ्च आचार्यभावमिश्रेण फिरंगादीनां नवानां रोगाणां द्वीपान्तरवचापारसीकयमानीप्रभृतिद्रव्याणां च समावेशः स्वकीये भावप्रकाशग्रन्थे कृतो वर्तते । रसशास्त्रस्य रूपे तु असाध्यरोगाणामपि चिकित्साया मार्गः प्रशस्तः समपद्यत, एवं ज्ञानानामेकीकरणमेव विद्यते किलायुर्वेदः। देश-काल-व्यक्ति-भाषाप्रयुक्तञ्च बन्धनमस्मिन् आयुर्वेदे नास्ति बाधकम् ।

इत्थमायुर्वेदेन सह 'शुद्ध' विशेषणस्य प्रयोगोऽपि शास्त्रीयपरम्पराया तथार्षविज्ञानस्य च नास्त्यनुमतम्। भ्रामकमिदं हि विशेषणम्। अनेन संप्रदायवादस्य वृद्धया मिथो विघटनं प्रोत्साहनं लभते। अत आयुर्वेदेन सार्धं 'शुद्ध' विशेषणं 'मिश्र' विशेषणं वा निरर्थकमेव नास्ति, प्रत्युत हानिकारकमप्यस्ति ।

मिश्रणं हि तावद् विजातीयद्रव्याणां भवति, सजातीयानां नैव। सजातीयानि द्रव्याणि तु एकीभूतसंयोगादनन्तरं न तेषां पृथक् सत्ता प्रतीयते, यथा क्षीरेण सह क्षीरसंयोगे न तत्र क्षीरस्य पृथक्ताया प्रतीतिर्जायते। अतो मिश्रणं हि ज्ञानाज्ञानयोर्भविष्यति ज्ञानेन सह ज्ञानस्य न। एकीकरणं तेषां संपत्स्यते, स च सर्वदा आयुर्वेद एव स्थास्यति।

महाबलेश्वरस्य स्वास्थ्यमन्त्रिपरिषदो निर्णयस्यानुसारेण शुद्धायुर्वेदसमितेः संघटनमभूत्। परं न जानीमो वयं यत् तस्या दृष्टिकोणो विषयेऽस्मिन् कीदृशो विद्यते ? रोगनिदानस्य प्रतीकारस्य च सार्वभौमेषु साधनेषु प्रतिबन्धस्य नियोजनमायुर्वेदीयं न भवितुमर्हति। एष दृष्टिकोण ऋषिभिर्न कदापि स्वीकृतः। तेषां दृष्टिकोणस्तु सर्वत्र सर्वदा सर्वभूतहितं सत्यमेव स्वीकुर्वाणोऽविद्यत ।

अस्माकं विनम्रं सानुरोधं च निवेदनं वर्तते यत् 'पाठ्यक्रमे कस्याप्यन्तिमस्य निर्णयस्य ग्रहणे आयुर्वेदस्य चिरन्तन-शाश्वतिक-सार्वभौमतत्त्वानामुपेक्षा न कदापि कर्तव्या, अन्यथा मानवहितोऽवरुद्धो भविष्यति, स चायुर्वेदस्य शास्त्रीयव्याप्त्या अनुसारेण आयुर्वेदः कथं वक्तुं शक्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनन्दनानि

श्री स्वामिनामालोकः

(आचार्य श्रीसुदेवचन्द्रपाराशरी, 'भारती'मासिकायुर्वेदाङ्क-प्रधानसम्पादकः)

(१)

श्रीमान् यशस्वी निर्वैरभावः,
जैरामदासो वाचंयमोऽसौ ।
रामाग्रगो रामाधारनिष्ठः,
मन्ता गुरोरातुर्यस्य हन्ता ॥१॥
दानी ह्यमानी ज्ञानी प्रमाणी,
सः, सम्मतः सम्वृद्धः सभासु ।
स्वामी स नश्चाज्ञानान्धकारे,
मि[1]हिरुष्टमो' ह्यायुर्वेदभासा ॥२॥

(२)

चिरं जीव्याच्चिरं जीव्याच्चिरं जीव्याच्छतं समाः ।
रामान्तलक्ष्मीतीर्थः जयरामो रामाग्रपः[2] ॥१॥
युक्तो धर्मपरस्साधो र्दादोस्साधुपथाग्रणी ।
भूयसा श्रेयसा जुष्टः पुष्टात्मा तुष्टमानसः ॥२॥
यायजूको यतिर्योगी पुण्यायुर्भिषजां वरः ।
त्यक्तकिल्बिषकैवल्यः जीवन्मुक्तिमुपाश्रितः ॥३॥
शुभं सर्वस्य लोकस्य भद्रं मानवसन्ततेः ।
काम्यतेऽहर्निशं येन स जीव्याच्छरदः शतम् ॥४॥

१ सूर्यः । २ रामोऽस्त्यग्रे यस्य स रामप्रकाश स्वामीति तच्छिष्यनाम्ना सह समासः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

ये वैद्यपाशा वैवस्वता वा पाशा न पूज्या विदुषां समाजे ।
तत्त्वानभिज्ञा नाल्पं ब्रुवाणाश्छद्‌माश्रितां वाचमुदाहरन्ति ॥१॥

शुद्धक्रमो वा मिश्रक्रमो वा पाठ्यक्रमः स्यादथ कोदृशः कः ?
जल्पन्ति मूर्खा विज्ञानहीना धूर्त्ता मतान्धा दलपङ्कमग्नाः ॥२॥

रोगाहरास्ते मिथ्यापचारा वैद्यब्रुवाः शास्त्रमधिक्षिपन्ति ।
ह्यन्धन्तमोजुष्टमलीमसान्धिता वेदान् समस्तान्परिभावयन्ति ॥३॥

तन्मस्करी[३] संशितमाह तत्त्वं, मलिम्लुचा मत्सरिणो ह्युपेक्ष्याः ।
जोघुष्यमाणा मुनिभिस्तथाप्तैरायुःश्रुतेः सार्वपथीनताऽस्ति ॥४॥

आयुःश्रवोऽनुश्रव एष शाश्वतः, स्वभावसंसाधितलक्षणो मतः ।
भावस्वभावो निखिलोऽपि नित्यो विज्ञानमित्युक्तमहो! न पद्धतिः ॥५॥

पिण्डे तण्याण्डे समताऽस्ति भावे, सर्गस्य सर्वत्र विधानमेकम् ।
इत्याकलय्यैष महानुभावो विज्ञानमेकं श्रयते महीयः ॥६॥

नाभूत्वोत्पद्यते किञ्चिद् यथा पूर्वमकल्पयत् ।
ज्ञेयं यथा तथा ज्ञानं, सर्वं ब्रह्म सनातनम् ॥७॥

स्वामीत्युपाह्वो जयरामदासः पीयूषवर्षी जनताहितैषी ।
शिष्यैः प्रशिष्यैस्सममेधमानो धन्वन्तरिर्वेति जनैर्विभाव्यः ॥८॥

---

३ ज्ञानी परिव्राड् वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरेनास्थित—दादूद्वारे महाराज्ञ्याः श्रीगायत्रीदेव्याः कृते सन्तसाहित्यस्य परिचयं कारयन्तः
श्रीस्वामिमहाभागाः समुपविष्टाः सन्ति

राजस्थानप्रान्तीय—भारत साधुसमाजस्य वार्षिकोत्सवस्यावसरे जयपुरे सम्मेलनान्तर्गत
संस्कृत-साहित्य-सम्मेलनस्य गोष्ठ्यां श्रीस्वामिजयरामदासमहाराजा विराजन्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



वामतो द्वितीयपङ्क्तौ पद्मासने श्रीजयरामदासस्वामिमहाराजो विराजते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनन्दनपद्यानि

श्री पं० राजेश्वरदत्तशास्त्री आयुर्वेदशास्त्राचार्य (बी. एच. यू) डी. एस. सी (ए), प्रोफेसर एण्ड हेड आफ दी डिपार्टमेण्ट आफ आयुर्वेद एण्ड डायरेक्टर आफ आयुर्वेदिक रिसर्च (आर. टी. डी.) एक्स-प्रिंसिपल आयुर्वेदिक कालेज (बी. एच. यू.)

श्रीस्वामी जयरामदास उदितो दिव्यागदङ्कारताऽ-
लंकृत्या कलितो दधद् भुवि लसद् दादूमताचार्यताम् ।
आयुर्वेदरहस्यबोधनविधौ ज्ञानाम्बुधिर्धर्मधी-
र्लक्ष्मीरामगुरूपदिष्टपदवी-मुख्याध्वयायी सुधीः ॥१॥

सौजन्यस्य च शेवधिर्निरवधिश्रेयः स्वशिष्येप्सितं-
बिभ्रद् भूरिदयालुताजलनिधिः पीयूषपाणिः कृतौ ।
आयुर्वेदकृतेऽद्भुते जयपुरे राज्येशसंरक्षितेऽ-
ध्यक्षत्वोच्चपदं श्रयन्निह महाविद्यालये चाधुना ॥२॥

नानावैद्यक-पुस्तकीय-विवृतेर्लेखेऽपि लेखेज्यवल्-
लोके लौकिककृत्यजातमुचितं सम्पाद्य सर्वात्मना ।
सर्वत्रैव जगत्प्रभोर्भगवतः सत्ताश्च जानन्नपि
श्रद्धापूर्णमना जनानपि यजन् स्वं जीवनं यापयन् ॥३॥

वैद्यानामभिनन्दनीयचरितोऽसौ सादरं सुन्दरं
श्रीराजेश्वरदत्तशास्त्रिभिषजा वाराणसीवासिना ।
एतद्भव्यगुणैश्च कृष्टमनसा प्रीतात्मना चात्मना
सत्पद्यैरभिनन्दितोऽत्र लभतां दीर्घायुरत्युत्तमम् ॥४॥

भव्यादर्शपथप्रदर्शनपरस्यास्य श्रियः श्रेयसः
कीर्तेर्धर्ममतेश्च दीनजनतारक्षारतेरुन्नतिः ।
भूयाद्भक्तजनावनोद्यतमनः शम्भोः परानुग्रहात्—
नित्यं लोकमदद्विपेन्द्रदलने शार्दूलविक्रीडितम् ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविधकृतकार्यस्य रसरत्नसमुच्चयदीपिका-लतिकाटीका-विधायकस्य रसेन्द्रसम्प्रदायादिजनकस्य पाटलिपुत्रस्थस्य श्री पं० हजारीलालसुकुलस्य

स्वामिजयरामदासमहोदयानामायुर्वेदाचार्याद्युपाधिविभूषितानां स्थानीयायुर्वेदीयमहाविद्यालयात् प्राप्तावकाशानां

प्रेमास्पदीभूतं दशकम्

दादुप्रकाशेन प्रकाशितोऽसौ भिषग्वरेण्यो विबुधाग्रगण्यः ।
सदासरामो जयशब्दपूर्वो विराजतामेष समस्तकालम् ॥१॥

नानासभाचालनचारुचित्तो मायाधवासाधितमूलवृत्तः ।
रामेण लक्ष्मीसहितेन नित्यं संशिक्षितो नंदितवर्धितश्च ॥२॥

सभाजितो नन्दकिशोरकेण संमानितश्श्रेष्ठिवरैश्च नित्यम् ।
सदासरामो जयशब्दपूर्वो विराजतामेष समस्तकालम् ॥३॥

रामप्रकाशात्मजशोभितश्च शिष्यैः प्रशिष्यैः परितोषितश्च ।
मित्रैः प्रमित्रैः परिमोदितश्च वर्गैरनेकैरवलोकितश्च ॥४॥

विराजितो जयपुरमध्यभागे सुवैद्यविद्यागणकैश्च नित्यम् ।
सदासरामो जयशब्दपूर्वो विराजतामेष समस्तकालम् ॥५॥

आमेरे गौतमे तीर्थे पुष्करे योधजे पुरे ।
उदयस्य पुरे रम्ये गंगासिंहपुरे तथा ॥६॥

इन्द्रप्रस्थे वृकप्रस्थे हैदराबादकेऽपि च ।
भूपालेऽलवरे सौम्येऽजमेरे रोहते तथा ॥७॥

वितन्वन्नात्मजां कीर्ति लक्षालक्षततिं गतः ।
तया तत्या सुसंयुक्तरूपया परिदत्तया ॥८॥

वितन्वंल्लोकजं श्रेयो वंशचर्यासमागतम् ।
भ्राजमानः स्वकृत्यैश्च भ्राजतां भ्राजतां सदा ॥९॥

जैरामदासस्य सुधीरकस्य नैयायिकस्यास्य रसेप्सितस्य ।
भूयाद् भवानीकृपया चिराय चर्यस्य चारश्च चराचरेऽस्मिन् ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

सगद्यपद्यपञ्चात्मकः कुसुमाञ्जलिः

कविराज श्री पं० बालकरामशुक्लशास्त्री आयुर्वेदशास्त्राचार्यः (बी. एच. यू.)
आयुर्वेदाचार्यः, आयुर्विज्ञानाचार्यः [प्राप्तस्वर्णपदकः]

श्रीभारतान्तर्गतवीरप्रसविनीवसुन्धराभूषणीभूतायां राजस्थानराजधान्यां श्रीजयपुराख्यमहानगर्यां प्रतिष्ठापितस्य राजकीयायुर्वेद-महाविद्यालयस्य भूतपूर्वाध्यक्षमहोदयानां चिकित्साशास्त्रपारावारपारीणानां पदवाक्यप्रमाणकानां भूमण्डलमण्डितचिकित्सकप्रवराणां भिषगाचार्यादिभव्यविविधमहापदवीविभूषितानां श्रीमहात्मदादूदयालपथप्रवर्तकनेतॄणां स्वर्गीयचिकित्सकमार्तण्डलक्ष्मीराममहाभागप्रधानशिष्याणां शिष्यप्रशिष्यप्रख्यापितकीर्तिकलापानां सुचिरकालत आयुर्वेदशास्त्राध्ययनशीलानां चिकित्साकर्मपरमदक्षाणामारोग्यशास्त्रीयाधुनिकवैज्ञानिकवैषयिकग्रन्थनिर्माणप्रबुद्धानां निखिलभारतवर्षीयायुर्वेदमहासम्मेलनविद्यापीठादिप्रतिष्ठानसंचालकाग्रचाणां चिकित्सकवंशसमुद्भवानां महामहिमशालिनां प्रियवचनाढ्यानां निरन्तरपरोपकारसंलग्नचेतसां भारतसम्मानितराजकीयायुर्वेद-विश्वविद्यालयपरीक्षकाणां व्यवस्थापकानाञ्च प्रयोगज्ञानविज्ञानसिद्धिसिद्धानामाश्रिताश्रयप्रदायकानां सर्वशक्तिसम्पन्नानां पीयूषपाणिनां श्रीस्वामिजयरामदासमहाभागानामभिनन्दनमहोत्सवे–

शुभाशंसापद्यपञ्चकम्

क्षोणीमण्डलमण्डना निखिलवैद्यवर्गमूर्ध्नि स्थिताः,
शास्त्रोपस्कृतबुद्धयो विविधशिष्यवृन्दविद्याप्रदाः।
आयुर्वेदसुधांशुसेवनपरा भैषजस्य संस्कारकाः,
वेदाचारपरायणाः सविनया रुग्णोपकारक्षमाः ॥१॥

श्रौत्रालंकृतशब्दसुन्दरगिरः विद्वत्सु तेजस्विनः,
सौजन्यामृतसिन्धवः विविधदुःखोदधिसंतारकाः।
आयुष्कामरता विवेकमयदीपज्वालकाः सर्वदा,
नानाशास्त्रविशारदाः परमकारुण्यान्विताः साधवः ॥२॥

लक्ष्मीरामशुभाभिधायुतचिकित्सागारसंचालकाः,
श्रीमद्दादुपथानुगाः सकलदीक्षादीक्षिताः सर्वदा।
स्वास्थ्यज्ञानविकाससवर्धनपराः लोकायुषाम्पालकाः,
विद्वद्वृन्दविदांवराः सुमनसः मान्या वदान्याः सदा ॥३॥

आयुर्वेदहितैषिणः सहृदयाः सौहार्दरत्नाकराः,
वित्तर्द्धिप्रभवा उदारकृतयः कल्याणपूर्णायुषः।
आयुःशास्त्रमहोज्ज्वलध्वजसमुच्छ्रायकाः साम्प्रतम्
वैद्यवृत्तियुताः प्रसन्नमनसो वैद्येषु बद्धादराः ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवर्चस्वयुतस्य सान्त्वनगुरोः शिष्यप्रभावाङ्कितः,
श्रीतीर्थस्य सुपादपद्मयुगलध्यानावधूतांहसः ।
श्रीमन्तो जयरामदासभिषजः साम्राज्यसम्मानिताः
जीवेयुः शरदां शतञ्च सततं संप्रार्थयामो वयम् ॥५॥

श्रीस्वामिनां परिचयः

कविराज श्री पं. अम्बिकादत्तशास्त्री ए. एम. एस. (बी. एच. यू.) एम. ए. (प्री० आगरा) साहित्याचार्यः, साहित्यरत्नं, काव्यतीर्थः, पुराणतीर्थः, भिषग्रत्नं, आयुर्वेदग्रन्थलेखकः भूतपूर्व-प्रिंसिपलआयुर्वेदकॉलेज इन्दौर, रामगढ़, गुरुकुल हरिद्वार, भूतपूर्व प्रोफेसर-आयुर्वेद कॉलेज, जामनगर, प्रधानवैद्यः-कृष्णगोपाल आयुर्वेद भवनं, कालेड़ा (अजमेर)

राजस्थानविशिष्टनगरख्यातिङ्गते जयपुरे
आयुर्वेददिवाकरनिभः श्रीलक्ष्मीरामो ह्यभूत् ॥
तस्याऽसौ पटुशिष्यपदवीलब्धो भिषङ्मानितः
आचार्यो बहुपूजितो बुधवरो जयरामदासः सुधीः ॥१॥

लोकेषुयोऽध्यापितलब्धकीर्तिः सम्प्राप्तसम्मानमहत्पदश्रीः ।
प्रान्ते विभिन्ने बहुसंख्यकाश्च तन्वन्ति शिष्यास्तव शुभकीर्तिम् ॥२॥

रोगैरनेकैः परितप्यमाना आसाद्य स्वास्थ्यं बहवो जनाश्च ।
गायन्ति नित्यं गगनाभिव्याप्तां कीर्ति सुशुभ्रां सततं त्वदीयाम् ॥३॥

पाण्डित्यपूर्णा भिषजां सुमान्याः सौम्यस्वभावाः करुणार्द्रचित्ताः ।
आयुर्विदां शास्त्रसमुन्नतौ हि संचेष्टमानाः सततं सभासु ॥४॥

श्रीरामभक्तिप्रवणाः सदैव भक्तोपदेशामृतवर्षिणश्च ।
श्रीस्वामिवर्या जयरामदासा विराजतां वर्षशतानि भारते ॥५॥

श्रीमेदपाटावनिलब्धजन्मा कृच्छ्राप्तविद्यः किल काशिमध्ये ।
ईर्ष्यापरैः पण्डितमानिभिश्च ह्युपेक्षितो मूर्खशतैश्च नित्यम् ॥६॥

पद्याञ्जलिं हार्दिकभावपूर्णं विरच्य विद्वज्जनरञ्जनार्थम् ।
श्रीस्वामिवर्यस्य करारविन्दे समर्पयेऽहं विदुषां विधेयः ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

दिल्लीस्थ '३७' सप्तत्रिंशत्तमे नि० भा० आयुर्वेदमहासम्मेलस्याधिवेशने
श्रीलक्ष्मीरामवैद्यमण्डलस्य मध्ये

श्रीजयरामदासः स्वामी वेत्रासनमलङ्कुरुते

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-इण्डियन-मेडीसिन-बोर्डः, जयपुरम्

एतत्सदस्यः (१९५६)

श्रीजयरामदासस्वामी विराजते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धाञ्जलिः

कविराज श्री पं० हरिशंकर शर्मा, बी.ए. भिषगाचार्यः (गोल्डमेडलिस्ट) आयुर्वेदप्रवीणः
साहित्यरत्नम्, एच. पी. ए. जामनगरम्

(१)

नमाम्यहं सद्भिषजां वरेण्यं तपःपुनीतं जयरामदासम् ।
आरोग्यदेष्वग्र्यमिमं महर्षि शिष्यप्रशिष्यैरुपगीयमानम् ॥१॥

सदाऽऽयुर्वेदार्थं वचनकरणैर्यः प्रयतते
सहायं सर्वेषां तनुधनमनोभिः प्रकुरुते ।
सपर्याचर्याद्यैर्वरिवसितदेवे विहरते
समग्रे संसारे वरदजयरामो विजयते ॥२॥

गदाक्रांता नित्यं निजगदशमार्थं प्रतिपलं
प्रयाचन्ते रामं गदहरणशूरं शमयुतम् ।
सदाऽऽरोग्यैर्युक्तान् निजसुतनिभांस्तान् नु करुते
दयापूर्णस्तूर्णो वरदजयरामो विजयते ॥३॥

सदाऽऽकल्पान्तं हि प्रवरगुणगानैर्मधुरिताः
सुशिष्योपच्छात्रैर्विशदयशसाऽऽशाः सुरभिताः ।
यथा नक्षत्रेभ्यो वियति तरणिर्भा वितरते
तथोर्व्यां वैद्येभ्यो वरदजयरामो विजयते ॥४॥

दुःखत्रयान्मुक्तिमुपादिशत्सु लोकोपकारादिपरायणेषु ।
श्रद्धाञ्जलिः श्रीहरिशर्मणाऽत्र समर्पितः स्वामिपदाम्बुजेषु ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२)

श्रीदाः पूर्णाः सन्तः
स्वामिप्रवराः सुवैद्यमार्त्तण्डाः ।
मीनध्वजप्रणाशे
जयन्ति शिष्यैः समावृताः शश्वत् ॥१॥

यज्ञे सदा विलीना
राष्ट्रोन्नत्यै स्वतन्त्रतासिद्धयै ।
मर्मज्ञा विश्वेषां
दायादैः सार्द्धमाजीवम् ॥२॥

सफलाः सर्वकलापे
जीवातोर्दानकर्म-सिद्धा ये ।
अस्माकं शिष्याणां
महदुपकारे निमग्नास्ते ॥३॥

रजस्तमोभ्यां मुक्ता
रत्नैः पूर्णाः सुशास्त्रममोंत्थैः ।
हे गुरवो ! निजबिम्बं
वैद्ये वैद्येऽनुगृह्णन्तु॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्पणम्

धन्वन्तरिनिभा भूत्यै प्रख्याता वसुधातले ।
गुरवो जयरामाख्या जीवेयुः शरदां शतम् ॥१॥

श्रीदादूसम्प्रदाये त्वभिनवसुकृती योऽग्रणीर्वैद्यजातेः
स्वाध्यायेऽश्रान्तभावे सततमनुरतः प्रत्यहं चाप्तवीर्यः ।
मित्रेशं जीवमाद्यैर्निजगुणगणनिवहैः स्पर्धयन् शिष्यसंघैः
जप्यः स्तुत्यो महार्होऽवनिगगनतले भ्राजते स्वामिसूर्यः ॥२॥

यस्यान्तेवासिनस्ते निजजनुषि सदाऽऽरोग्यशास्त्रैकनिष्ठाः
राजन्ते रोगहारिप्रभृतिषु पुरुषेष्वात्मवीर्यैर्वरिष्ठाः ।
मन्दाकिन्या समानं सततमनुवहन् तैर्महत्कीर्त्तिपुञ्जम्
दाने स्वास्थ्यस्य शूरैस्तरणिविधुनिभैः शोभते शिष्यवन्द्यः ॥३॥

सत्यङ्कारं जनानां त्रिविधमकुशलं नाशयन्तं गुणेन्द्रं
गुप्तेऽपि क्वापि लेशो न मिलति विकृतेर्जीवने यस्य नूनम् ।
रत्नाधीशं समन्तात् प्रतिदिवसमभिप्रार्थितं वैद्यराजैः
वेदैरुद्गीयमानोऽमृतधर ! कुरु तं दीर्घजीवं सुखाद्यैः ॥४॥

संनद्धो जीवने यः सकलहिततमं शास्त्रमुज्जीवनार्थं
प्रत्याख्यानादिकेषु प्रखरदृढतया शास्त्रयुक्त्योहदानैः ।
त्यक्त्वा पूर्वग्रहादीन् विमलमतमनुप्रेरयन् पोषयंश्च
यः प्राप्तो वेदविद्याभ्युदयनयकृते स्वामिवर्यः स जीव्यात् ॥५॥

प्रेक्षावीर्येण ग्रन्थानरचयदथ तान् प्राभृतान् मुद्रणादीन्
व्यत्वांकोक्तान् प्रकाश्य जयपुरनगरेऽध्याप्य विद्यालये ये ।
ते स्वोद्याने स्वपुष्टे फलपरिणतितः पुष्पगोप्तेव दूरे
त्रप्तारो नैव जाताः समयमधिगता मानवेन्द्रा लसन्ते ॥६॥

ग्रन्थेऽभिनन्दनार्थेऽस्मिन् हरिशंकरशर्मणः ।
स्वामिवर्याः प्रसीदन्तु तत्समर्पणकर्मणा ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनन्दन-प्रसूनाञ्जलिः

(समर्पकः—आचार्यनारायणशास्त्री काङ्करः एम. ए., विद्यालङ्कारः, जयपुरम्)
[श्रीस्वामिमहानुभावानां जयपुरराजकीयायुर्वेदमहाविद्यालयीयाभिनन्दनावसरे समर्पितोऽयम्—सम्पादकः]

श्रीमन्मान्या वदान्याः कलित-गुणगणाः स्वर्भिषक्-स्पर्धि-प्रज्ञा
विद्या-विद्योतितान्तःकरणमुनिजनैर्लब्ध-संविद्-विलासाः ।
शिक्षा-दाक्ष्येण दक्षा निरतिशयमथानन्दथोः पूर्वकं हि
'भीखाभाई'–समेतैरिह सकलसतां श्रीमतां स्वागतं स्तात् ॥१॥

यत्र श्रीयुतप्रेमशङ्करमहाभागा भिषग्भास्करा
आयुर्वेदविभागमुत्तमतया सञ्चालयन्त्यन्वहम् ।
यस्मिन् दौलतरामवैद्यमणयः प्राचार्यतां तन्वते
तस्मिन् वः क्रियते बुधा ! इह महाविद्यालये स्वागतम् ॥२॥

आयुर्वेद-रसाम्बुधिं नव-दृशा भूयो मथित्वा परं
तत्सारामृत-लब्धयेऽथ जगतामारोग्यसंवृद्धये ।
यैराजन्म दिवानिशं प्रयतितं सर्वात्मना तानिमान्
स्वामिश्रीजयरामदासभिषजो ! भक्त्याऽभिनन्दामि वः ॥३॥

सद्वैद्येषु कृतास्पदा नयविदः सौजन्य-रत्नाकरा
आयुर्वेद-प्रसार-कर्मणि सदा सम्प्राप्त-पूर्णोदयाः ।
वक्तारश्च सभासु निर्गत-भया लोकोत्तराः कर्मठा
मान्या श्रीजयरामदासभिषजो ! भक्त्याऽभिनन्दामि वः ॥४॥

विधायायुर्वेदाभिमत–सुचिकित्सोन्नतितति
पराङ्काष्ठामारोपय शुभ-भिषक्तन्त्रमखिलम् ।
सदा श्रीमद्-धन्वन्तरि-चरण-पङ्करुह-युग–
प्रसादाद्दीर्घायुर्भवतु जयरामो भिषगिनः[1] ॥५॥

१ भिषङ्मार्त्तण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिनन्दनाशीः

(महामहोपाध्यायः पण्डितमूर्धन्यः शिवमूर्तिः श्रीमान् पं० गिरिधरशर्मचतुर्वेदमहोदयः)

स्वामिनः श्रीजयरामदासमहोदया यदायुर्वेदशास्त्रमधीतवन्तस्तदाऽहमेव महाराज-संस्कृत-विद्यालयस्याध्यक्षपदे कार्यं कुर्वाण आसम्। तेनैषां बुद्धेश्चमत्कारस्य, विनयसौजन्यादिगुणानाञ्च अस्ति मम सम्यक् परिचयः। एतेषामेवंविधं गुणगणं सुदृढां स्वाभिभक्ति परद्रव्य-सम्बन्धे कदाऽपि स्पृहाभावं चाभिलक्ष्यैव श्रीमद्भिरखिल-भारतप्रसिद्धायुर्वेदनिष्णातैः श्रीस्वामिलक्ष्मीराममहाभागैरेते स्वस्योत्तराधिकारिपदे प्रतिष्ठापिताः। तत्पदमप्येभिः सम्यङ् निर्व्यूढम्। एते संस्कृत-महाविद्यालयात् पृथग्भूतस्यायुर्वेदमहाविद्यालयस्याध्यक्षपदमलङ्कृतवन्तः। चिकित्साचातुर्यञ्चाप्येषां जयपुरप्रान्ते सुप्रसिद्धं गणनार्हं च विद्यते। मयाप्यनेकधा रोगाक्रान्तेन चिकित्सानैपुण्यमेषामनुभूतम्। एते रोगिणोऽनुद्वेजयन्त एव सम्यगाश्वस्य तान् नीरुजो विदधति।

अनेकैर्विद्वत्प्रकाण्डैरेषां सौहार्दमपि सम्यङ् निर्वहति। एवंविधानां गुणगुण-गरिष्ठानां यज्जयपुरीयैर्विशिष्टपुरुषैस्समायोजितं अभिनन्दनं तत्रास्ति मदीयोऽपि बुद्ध्या पूर्णः सहयोगः। अहमप्येतान् महानुभावानभिनन्दयामि। एवमेवैते चिराय जनानुल्लासयन्तश्चिरं जीवन्तु इति च जगदीश्वरादाशासे।

अभिनन्दनाशंसा

(रतनगढ-धन्वन्तरि-मन्दिर-संस्थापक-धन्वन्तरिकल्पाचार्यवर पं० मणिरामशर्मकृतमाशंसनम्)

भारतप्रसिद्धानां सुप्रसिद्धायुर्वेदोद्धारक-स्वर्गीयायुर्वेदमार्तण्ड-श्रीस्वामि-लक्ष्मीराम-महाराजस्योत्तराधिकारिणां राजकीयायुर्वेदमहाविद्यालयस्य सेवानिवृत्ताध्यक्षाणां शान्तप्रकृतीनां श्रीस्वामि-जयरामदासमहाराजानामभिनन्दनमस्मदीयगौरवस्य द्योतकमस्ति।

तत्रभवन्तो भवन्त आयुर्वेदस्य धुरन्धरा विद्वांसः। भवन्त आयुर्वेदमधीयानेभ्यश्छात्रेभ्यश्छात्र-वृत्ति-भोजनादिव्यवस्थां स्वकीयव्ययेन सम्पादयन्ति। भवन्तो न केवलमायुर्वेदस्य कृत एव वदान्याः, प्रत्युत, अन्यप्रतिष्ठानानां कृतेऽपि मुक्तहस्तेन ददानास्सन्ति।

भवतामध्यापनकाले नूनमायुर्वेदस्य भूयसी समुन्नतिरभवत्। भवतां कार्यकाल एव कालेजस्य नव्यभव्यभवन-निर्म्माणस्य कार्य्यमभवत्। अस्ति किलैतत् श्रीमतामतुलप्रभावस्याऽयुर्वेदनिष्ठायाश्च ज्वलन्तमुदाहरणम्।

भवतां विद्वत्ता-परोपकारिता-दानशीलता-प्रभृति-हेतुभ्यो देशस्य प्रत्येकस्मात् कोणाच्छात्राः समागत्य भवद्भ्य आयुर्वेदमधीत्य तदीयप्रचार-प्रसारौ कुर्वन्तः सन्ति। वयमाशास्महे यद् येनानुरागेण श्रीमन्तोऽध्यापनकाले आयुर्वेदस्य निरपवादां गुर्वीं सेवां कृतवन्तस्तथैव भविष्यति कालेऽपि भूयोऽभ्यधिकां सेवां सम्पादयिष्यन्ति। येन वैद्यजगल्लाभान्वितं भवेत्, श्रीमतां पदचिह्नानुसरणञ्च कुर्वीत। भगवान् श्रीमतः स्वस्थान् दीर्घायुषश्च विदध्यादिति मे शुभकामना विद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकित्सकशिरोमणि-पीयूषपाणि-परमादरणीय-प्राणाचार्य गवर्नमेण्ट आयुर्वेदिक कालेज, जयपुर के भूतपूर्व प्राचार्य,

स्वामी श्री जयरामदासजी के

करकमलों में सादर समर्पित स्नेहाञ्जलि

भिषग्वर !

आयुर्वेदमहाम्भोधि का अवगाहन करके आपने अधिकाधिक शिष्य-समुदाय की वृद्धि कर आयुर्वेद के प्रचार व प्रसार की यशःकौमुदी का जो प्रकाश किया है, वह कौन नहीं जानता।

आयुर्वेदिक चिकित्सा व उसकी अभिनव शैली को स्थिर रखने में आपने जिस परम्परा का स्वरूप उपस्थित किया है वह आयुर्वेद के इतिहास में चिरस्मरणीय रहेगा। आपकी उदारता, पाण्डित्य-प्रवरता, व्यवहार-कुशलता की अमिट छाप किसको मोहित नहीं करती।

विभिन्न सम्मेलनों में आपके व्यक्तिगत परिचय का प्रकाशपुंज जो हमें दिल्ली-लाहौर-इन्दौर आदि अधिवेशनों में मिला, वह आज भी चिरस्मरणीय है।

आयुर्वेदीय कन्वेंशन लखनऊ में पधारना और समग्र आयुर्वेद-जगत् के लिए एकात्मक पाठ्यक्रम बनाने में अनवरत हमें जो सहयोग दिया है, वह हमें स्मरण है। आपकी प्रसन्नमुद्रा, शांत व गम्भीर भाव, सरल वचनों में गम्भीर समस्या को हल करने की प्रवीणता का परिचय अनुकरणीय व आयुर्वेदोन्नति का चिर-प्रतीक है।

गत वर्ष स्नातकोतर शिक्षण के छात्रों के साथ जयपुर आने पर आपने छात्रों व अध्यापकों के प्रति जो स्नेह-प्रदर्शन किया है, वह किसे स्मरणीय न रहेगा और ऐसे सुहृद्वर-सद्विचारक-कर्त्तव्यनिष्ठ विद्वान् के अभिनन्दनार्थ किसका शिर प्रेम व श्रद्धा से अवनत न होगा।

येषां शिष्यपरम्पराखिलभुवि व्याप्ता गदध्वंसने,
आयुर्वेदचिकित्सिते गुणभुजो वैद्यान्विलोक्यामहे।
तेष्वादित्यनिभान् सदाऽऽतुरगणैः संसेविताश्वासने,
स्वामिश्री-जयरामदासविदुषः प्रीत्याऽभिनन्दामहे ॥१॥

(आचार्य श्री पं०) विश्वनाथ द्विवेदी,
प्राध्यापक-द्रव्यादिविज्ञानविभाग,
आई० ए० एस० आर०,
जामनगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



नरेनानगरस्थिते दादूद्वारे श्रीसुन्दरजयन्त्यावसरे राजर्षि-श्रीपुरुषोत्तमदास-
टण्डनेन सह शोभन्ते श्रीस्वामिमहोदयाः



भिवानीस्थित—दादूद्वारे सन्तसम्मेलनस्यावसरे वामतः पञ्चमवेत्रासनोपविष्टाः
श्रीस्वामिमहाभागाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीस्वामिलक्ष्मीरामोद्याने स्वतन्त्रताप्राप्तेः पूर्वमायोजितेऽधिवेशने प्रधान-मन्त्रि-जवाहरलालनेहरूमहाभागस्यान्तिके श्रीस्वामिजयरामदासमहाभागा विराजन्ते



राजस्थानस्य भूतपूर्वमन्त्रिणा श्रीटीकारामपालीवालमहाभागेन सह
श्रीस्वामिमहाराजास्तथैतेषां शिष्यः श्रीरामप्रकाशमहोदयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धेय स्वामी श्री जयरामदासजी की सेवा अभिनन्दनपुष्पाञ्जलि

विद्वत्कुलललाम सुप्रसिद्ध वैद्यराज पंडितप्रवर श्रीयुत स्वामी जयरामदासजी महाराज उन विभूतियों में है, जिससे सनातनी जगत् और विद्वत्समाज गौरवान्वित है।

आप उच्चकोटि के विद्वान् होते हुए परम तपस्वी क्रियानिष्ठ तथा शास्त्रीय परम्परा के परम पोषक हैं।

श्री स्वामीजी स्पष्टवादी एवं त्यागशील, लब्धप्रतिष्ठ भिषग्-शिरोमणि तथा स्वतन्त्र भारत के प्रमुख एवं सुप्रसिद्ध कुशल वैद्य हैं। वैद्यचूडामणि श्रीयुत स्वामी लक्ष्मीरामजी महाराज के आप प्रधान शिष्य हैं। आपकी धार्मिक एवं सामाजिक जीवन में भी "परोपकाराय सतां विभूतयः" की दृढ़ भावना सदैव अक्षुण्ण रही है।

श्री स्वामीजी के पवित्र जीवन की गति भागीरथी की स्वच्छ धारा के समान, महर्षितुल्य आदर्शमय जीवन की महत्ता एवं आत्मविश्वास से ओतप्रोत हृदय में अनुराग एवं श्रद्धा उत्पन्न करती है।

श्री स्वामीजी महान् त्यागी, कर्मठ, तपस्वी तथा साधु पुरुष हैं। आपकी धैर्यशीलता प्रशंसनीय है। एक बार आप स्वयं रुग्ण हो गये तथा वैद्यों एवं डाक्टरों द्वारा अचिकित्स्य घोषित करने के बावजूद भी अपनी चामत्कारिक आयुर्वेदिक चिकित्सा से आपने आरोग्य-लाभ किया तथा उस कठिन परिस्थिति में भी आत्मशक्ति की दृढ़ता के फलस्वरूप आप विचलित नहीं हुए। यह स्वामीजी की महत्ता का परिचायक है।

आयुर्वेदमर्मज्ञ श्री स्वामीजी वैद्य-सम्मेलनों के उच्च स्थान पर आसीन होकर सदैव आयुर्वेदोद्धार के लिए यत्नशील रहते आये हैं।

आप वैद्य-सम्मेलनों के अतिरिक्त अनेक प्रमुख संस्थाओं के भी प्रधान नायक हैं। प्राचीन संस्कृति के महान् उपासक एवम् आयुर्वेद के पथ-प्रदर्शक आप सर्वथा अभिनन्दनीय हैं।

मैं आपकी चिरायु के लिए परम पिता परमेश्वर से प्रार्थी हूँ।

समर्पकः

(वैद्यश्री पं०) रामदयाल जोशी, मैनेजिंग डायरेक्टर,
श्री वैद्यनाथ आयुर्वेद भवन, प्रा. लि.,
पटना-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यवृन्दमिलिन्दसम्मानितानां जयपुरमहाराजायुर्वेदकालेजतोऽवकाशग्रहणव्रतां भिषगाचार्य-श्रीजयरामदासस्वामिनां करकमलयोः

श्रद्धाञ्जलिः

दुर्लभं त्रयमेवैतद् देवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥

इह खलु चतुरशीतिलक्षभेदेन विभिन्नानां प्राणिनां मध्ये मनुष्यजातिरेव सर्वाभ्यर्हिततमेति सर्वजनविदितमेव। मनुष्यः खलु निसर्गत एव मननशीलः, मत्वा कर्माणि सीव्यतीति तन्निरुक्तिः। यदाऽयं चिन्तान्तरविमुक्तचेताः सञ्जायते तदा विचारयति च निरतिशयजटिलामिमां विश्वसमस्याम्, कोऽहम् ? कुतोऽहम् ? कस्मादहम् ? इत्येवंजातीयकाम्।

'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'—इति। कुतश्चायम् ? मनुष्याणामेव विशेषज्ञानवत्वात् शास्त्राधिकारसंभवाच्च। अतश्च मानुष्यं नाम भगवदनुग्रहैकफललभ्यमतिदुर्लभञ्च। कथंचिन्मानुष्यकम्प्राप्तवतामपि मुमुक्षुत्वं ततोऽपि दुर्लभतरमेव। किञ्च—आत्मानात्मविवेकात्मकं ज्ञानं हि मानुष्योत्कर्षप्रयोजकम्। इदञ्च सर्वं 'पश्वादिभिश्चाविशेषात्', इति भगवतो भाष्यकारस्य व्याख्यायां स्पष्टमेव स्फुटीभवति। एवं शुद्धतमे ज्ञाने सत्वे अनात्मपदार्थेष्वत्यन्तजुगुप्सापारवश्याच्च संभवात् तादृगनात्मपदार्थेभ्यस्तदाभिमानपारवश्याच्च कदा स्यान्मे मुक्तिरिति मोक्षेच्छा तावदनिवार्या भवति। एवं सद्यः संसारजिहासैव मोक्षहेतुः। एवं मुमुक्षुत्वस्य यथाकथञ्चित्संभवेऽपि तादृशमोक्षस्य आत्मज्ञानैकसाध्यत्वात् आत्मज्ञानस्य च शास्त्रार्थविचारैकसमधिगम्यत्वात्, शास्त्रतत्वविचारान् स्ववशेमुष्या कर्तुमशक्यत्वेन तत्र अनुभविनः कस्यचिदाचार्यस्य अपेक्षा दुर्निवारैव। आचार्यो नाम—"आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मात् तस्मादाचार्य ईरितः" इति। भगवती श्रुतिरपि—"आचार्यवान् पुरुषो वेद आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्" प्रतिपादयति इति। अनया रीत्या शास्त्रार्थप्रवचनपटुः स्वीयाचार-व्यवहारादिभिः परेषामप्याचारादिप्रवर्तको यो भवति महात्मा स एव महापुरुषः। ईदृशमहापुरुषसंश्रयेनैव शास्त्रार्थज्ञानसम्पादनद्वारा मोक्षोपलब्धिः। परं स सर्वापेक्षया दुर्लभतमः। ईदृशायतः, महापुरुषाः विरला एव लोके।

यदि ये केचन तादृशा विद्यन्ते ते नूनं महर्षीणामंशभूता एव। इदानीमञ्जलिनिर्देश्येषु वैद्यवर्येषु जयपुरीयोऽयमाचार्योक्तलक्षणसम्पन्नो विमलविपुलमतिः श्रीजयरामदासः स्वामी स्मृतिपथमायाति।

अयं हि विभिन्नविषयाणां गुरुभ्यः सर्वामतिनिगमागमसरणिं विधिवदधीत्य आयुर्वेदपाथोनिधिमन्थनोत्थां सुधां श्रीरामकृष्णभट्टमहाभागैः प्रौढोक्तिकुशलैः सुभिषक्तमैः प्रकृतेर्निपुणपरीक्षकैः कविप्रवरैरारसयतां नूनमायुर्वेदपारदृश्वनां श्रीलक्ष्मीरामस्वामिमहाभागानां शिष्यः। एभ्य एव साधुदीक्षां भिषगाचार्यविधि वैद्यागमशिक्षाञ्चावाप्य ततः परं स्ववयसा साकमुपचीयमानेन वैद्यातिशयेन अध्यापनेन चिकित्साकर्मणा तपःप्रभावेण च वैद्यमूर्तय इव तपोमूर्तय इव वा सम्प्रति वार्धक्ये राजन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं हि खलु वैद्यसमाजेन बहुतरं समाद्रियमाणः अद्यापि आयुर्वेदसाहित्यरत्नाकरे कयाऽपि प्रोज्ज्वलयाऽऽभया जाज्वल्यमानः समवभासते। इदानीन्तनेषु भारतीयप्राचीनायुर्वेदपद्धतिचिकित्सकमूर्धन्येषु विद्वत्सु एतेषामपिनाम सगौरवमधिगृह्यते। एषां निदानपुरःसरा चिकित्सासरणिः सद्यःफलप्रदा भवति। अनेनैव गुणगरिम्णा दुश्चिकित्स्यव्याधीनां व्याधूननेऽधिगतयशोराशिरयं चरकार्थतत्त्ववेत्ता महाभागश्चकास्ते।

सम्प्रति भूयांसो वैद्यविशारदा अमीषां शिष्याः प्रशिष्याश्च, बहवोऽपि यथाकथञ्चित् स्नेहभाजः सन्तो गौरवान्विताः दरीदृश्यन्ते।

व्यवहारश्चैषामतीव मधुरः, हृदयञ्च परक्लेशहरणतत्परं दयान्वितम्, मनो हरति सुमनसाम्, सान्निध्यमागतवद्भिः सौजन्यमौदार्यं सौशील्यञ्चैषां परितो गीयन्ते। स्वामिपरम्पराऽनुसारेण इमे वैद्यागमस्य संस्कृतस्य प्राचीनसंस्कृतेः संस्कृतविदुषां भिषजाञ्च समुत्कर्षाय परं विविदमानाः सश्रमं समुद्यमन्ति। एषाञ्च हृदीयं सद्भावना—

रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहराः
दृष्टयादीन्द्रियशक्तिसंक्षयकरा सर्वाङ्गपीडाकराः।
धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्
प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम्॥

अत एव लघीयस्सु अस्य भाषणेषु मनोरमवैद्यक-पदार्थगुम्फनमाधुरीणता, सर्वेषां स्वास्थ्यरक्षणम्, आतुराणां रोगनिवृत्तिः, सर्वेषां जीवनधाराणां समुदात्तीकरणम्, आयुर्वेदीयपरम्परायाः वैद्यकमहर्षीणां संस्कृतेश्च आमूलचूडं, अव्यभिचरितं चित्रमनिर्वचनीयम्, भिषग्वुभूषाणाञ्च कृते युगानुरूपसन्दर्भादयः सदुपदेशाः च सयुक्तिकं समुपलभ्यन्ते।

अस्माकं मते तु रसगङ्गाधरे 'रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः' इति गर्वाख्यस्य भावस्य वर्णने 'वाचामाचार्यतायाः पदमनुभवितु कोऽस्ति धन्यस्त्वदन्यः' अस्य स्थाने सम्प्रति भारतीयप्रखरवैद्येषु श्रीमान् स्वामी श्रीजयरामदास एव उदाहरणम्। अन्ते स्वामिप्रवरस्य शताधिकमायुः कामयमानेन मया भगवांच्छ्रीभेडमहर्षि नितरामभ्यर्थ्यते।

एषु क्रमशो मानवोचितगुणाः प्रत्यहं योगवासिष्ठाध्ययनान्मुमुक्षुत्वाकांक्षा, इदं हि जयपुरे प्रत्यक्षं दृष्टम् पूतचरितगुरोः श्रीलक्ष्मीरामस्वामिनो महापुरुषस्याश्रयत्वाच्च पूर्वोक्तास्त्रय एव गुणाः श्रीस्वामिनि सन्तिष्ठन्ते।

सादरं सश्रद्धमभिनन्दनमहोत्सवे **श्रद्धाञ्जलिं समर्पयामि।**

समर्पकः

(श्री) वैद्यः कन्हैयालालभेड़ा, बम्बई

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूज्यस्वामिश्रीजयरामदासानां करकञ्जयोरभिनन्दनश्रद्धांजलिः

अयं महान् प्रमोदावसरो यदद्य विविधशास्त्रनिष्णातविद्वन्मण्डितायामनेकप्रतिष्ठितनागरिकै-र्विद्वद्रत्नै राज्यपुरुषैश्चाधिष्ठितायां पुरा ह्यधुना चानेकदेशरक्षकोद्भटवीरनरकेसरिभिः सुशोभितायां न्याय-व्याकरणसाहित्य–ज्योतिषायुर्वेदाद्यनेकविद्वद्रत्नप्रसविन्यां राजस्थान-राजधान्यां जयपुरनगर्यां "भारती" मासिक-संस्कृत-पत्रिकायाः परिवारसदस्यै रायुर्वेदैकस्तम्भभूत-भारतप्रसिद्ध-प्रकाण्डपण्डितराज-पीयूषपाणिनां पूज्यपादानां स्वर्गीय-राजवैद्य-स्वामिश्रीलक्ष्मीराम-महानुभावानां प्रधानशिष्यपदालङ्कृतानां राजकीया-ऽऽयुर्वेद-महाविद्यालयस्य चानेकवर्षपर्यन्तं प्राचार्यपदसुशोभितानामध्यापितानेकछात्रवर्याणां स्वपीयूष-पाणिनां नीरुजीकृतानेकार्तजनानां संस्कृतसाहित्यायुर्वेदप्रकाण्डपण्डितानां पूज्यवैद्यराजस्वामिश्रीजयराम-दासमहानुभावानामभिनन्दनमुद्दिश्यायुर्वेदाङ्काभिधोऽयं विशेषाङ्कः प्रकाशयितुमुपक्रम्यते ।

अस्मिन् सुवर्णावसरेऽतीव हर्षप्रदोऽयं विषयो यदभिनन्दनसमारोहसमायोजनसमितेरध्यक्षा राजस्थानराज्यस्य शिक्षामन्त्रिणः श्री हरिभाऊउपाध्यायमहाभागास्तथाभिनन्दनसमारोहस्य चाध्यक्षा राज्यस्य महामहिमराज्यपालमहोदयाः डाक्टर–श्रीसम्पूर्णानन्दमहानुभावाश्च श्रीस्वामिनामभिनन्दनार्थं तेषां करकमलयोरभिनन्दनग्रन्थमर्पयिष्यन्तीत्यायुर्वेदविदुषामनुरूपोऽवसरः ।

पुरा जयपुरे कतिचिद्वर्षपर्यन्तं निवसता मयाऽनुभूतानि श्रीस्वामिवर्याणामायुर्वेदस्योद्भटपाण्डित्यं, दयालुहृदयता चिकित्साकौशलमायुर्वेदस्य समुन्नतेरहरहः क्रियमाणः प्रयासः तथाऽनेकप्रान्तसमागतविदुषां समादरोत्साहश्च नैसर्गिकानि तादृशोत्तमगुणनिकरास्पदानां विद्वद्धौरेयाणां श्री स्वामिवर्याणां सुमनस्विनां मानसैः सुमनोभिर्विरचितश्रद्धाञ्जलेरर्पणे परं मनसः कौतुकं नोत्पत्स्यतेऽतश्चाहमपि श्री स्वामि-वर्याणामभिनन्दनार्थं हार्दिकैः कतिपयैः पदैः श्रद्धाञ्जलिं समर्पयन् जगन्नियामकं जगदीश्वरं प्रार्थये यज्जनताजनार्दनसेवार्थमायुर्वेदस्य च समुन्नत्यर्थं श्रीस्वामिवर्याय मार्कण्डेयमुनेरतुलमायुः प्रदद्यादिति ।

समर्पकः

(कविराज पं०) अम्बिकादत्तशास्त्री A. M. S.
(B. H. U.), M. A. (Pr. Agra),
प्रधान सम्पादकः स्वास्थ्य मासिकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्मरणानि

श्रुतिपथातिथीकृत्याभिनन्दनसमारोहवृत्तं तत्रभवतां समर्हणीयानां श्रीस्वामिजयरामदास-महोदयानां परममामोदमावहामि। अस्माकं प्रथमसाक्षात्कारः स्वामिमहोदयैः सह १९२४ ख्रैस्ताब्दे श्रीलंकायां निखिलभारतवर्षीयायुर्वेदमहासम्मेलनस्याधिवेशनावसरे सम्बभूव। यत्र किल चेमे महानुभावा दिवंगतैः परमश्रद्धेयैः श्रीस्वामिलक्ष्मीराममहाभागैः साकमनुगता आसन्। तारुण्ये चैषामेव वैदुषीदीप्तिः शास्त्रपाटवं पीयूषपाणित्वं विचारविमर्शनारीतिश्च सर्वमामायुर्वेद प्रवेशप्रदानाय प्रेरितवतीति चिरन्तनीय प्रेरणाद्यापि समुत्साहयति चित्तं मदीयम्। तत्र समवेतेषु वैद्यकविद्याचणेषु विद्वद्धौरेयेषु सम्मान्यानां परम-श्रद्धास्पदानां श्रीमत्कविराजयोगेन्द्रनाथसेनमहोदयानां श्रीलक्ष्मीरामस्वामिवर्याणामथ चान्येषां विद्वत्तल्ल-जानां महोदधिसदृशानां विदुषां विचारवीचिनिचयैः समन्ताद्बद्धपरिकर आयुर्वेदोदधिमज्जने कृतप्रयासः किलाहमभवम्।

यदा किल १९३६ ख्रैस्ताब्दे स्वर्णभस्मनो राजयक्ष्मणि समुपादेयता इति विषयमवलम्ब्यास्माकं शार्मण्यदेशं प्रति यियासा बभूव तदा सर्वविधः सहयोगोऽधिगतस्तत्रभवद्भ्यो श्रीलक्ष्मीरामस्वामिजयराम-दासस्वामिमहोदयाभ्यां ययोः सहयोगसम्बलमवलम्ब्य मया तत्रानुसन्धानकार्यं मनोयोगपुरस्सरं व्यधायि।

इह मयि केन्द्रीयप्रशासनस्य स्वास्थ्यमन्त्रालये परामर्शदातृपदारूढे बहुष्ववसरेषु वार्तालाप-माध्यमेनायुर्वेदविषयिणी चर्चा काले काले समपद्यत किलैभिः सह यत्र मया सम्यक्शास्त्रीयसारस्यमधि-गतमस्ति।

इमे स्वामिमहोदया उदात्तविचाराः प्रौढविद्या गंभीरधियः प्रेष्ठा यतयः सन्ति। आयुर्वेदस्य श्रीवृद्ध्यर्थं तेषां कृता महती सेवा सर्वथा श्लाघनीया वर्तते। नूनमेव हीमे स्वामिपादाः श्रीलक्ष्मिराम-स्वामिमहोदयानामन्तेवासित्वं शिष्यत्वं छात्रत्वं सर्वथा साकल्येन बिभ्रति। तेषां समग्रो गुणराशिरत्र योग्यपात्राधारो विराजते। आयुर्वेदस्य सर्वाङ्गीणसमुन्नत्यै प्रचाराय प्रशिक्षणाय श्रीस्वामिसदृशास्तपः-स्वाध्यायचिकित्सापरिपूतान्तःकरणा कर्मठविद्वांसोऽपेक्ष्यन्ते साम्प्रतमिह। शतं शरदां स्वामिमहोदया आयुर्वेदपथप्रदर्शकाः सन्तो भगवतस्तुहिनदीधितेः कलानिधेः कला इव प्रवर्तन्तामिति किलास्माकीना शुभकामनाधस्तनेन श्लोकेन–

जयतु जयतु मान्यो वैद्यविद्यासमुद्रः
दिशतु विविधभावैर्वीचिपृक्तः समन्तात्।
भवतु शशधरः पुण्यास्पदः प्राप्य विद्यां
शतशतशरदां श्रीस्वामिवर्यश्च पूज्यः॥

चक्रपाणि द्वारकानाथस्य
आयुर्वेदपरामर्शदातुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२)

कर्मवीर स्वामी जयरामदासजी

राजस्थान की भूमि आयुर्वेद को जीवित रखने एवं उसे उत्तरोत्तर विकसित करने में अपना जीवन अर्पित करने वाले महापुरुषों की जन्मदात्री होने के कारण सारे भारत में प्रसिद्ध है। इसी का परिणाम है कि राजस्थान आयुर्वेद को उसका न्यायोचित स्थान दिलाने तथा उसे सरकार में मान्य और प्रजा में प्रचलित करने के कार्य में भारत के अन्य प्रदेशों की तुलना में सर्वाग्रणी है। आयुर्वेद को यह महनीय स्थान प्राप्त कराने में राजस्थान के जिन महानुभावों का नाम प्रथम गिना जा सकता है, उनमें स्वर्गवासी स्वामी लक्ष्मीरामजी तथा उनकी शिष्यपरंपरा प्रमुख है।

स्वामी जयरामदासजी इसी शिष्य परम्परा के अद्वितीय रत्न हैं। आयुर्वेद को पुनः उच्चपदाभिषिक्त करने के कार्य में भारत के जिन परिगणित विद्वानों तथा कर्मप्राण व्यक्तियों के प्रति हम आशापूर्ण दृष्टिपात कर सकते हैं, उनमें स्वामी जयरामदासजी एक हैं। विद्वत्ता तथा कर्मठता के साथ अभिमानशून्यता उनका विरल गुण है। स्वामी लक्ष्मीरामजी की भावना तथा विरासत आपमें पूर्णतया अवतीर्ण हुई है, इसमें लेशमात्र संशय को अवकाश नहीं।

राजस्थान में आयुर्वेद के सर्वतोमुख विकास में भाग लेने के अतिरिक्त स्वामी जयरामदासजी ने जयपुर के राजकीय आयुर्वेद महाविद्यालय को आदर्श कक्षा तक पहुंचाने में भी पूर्ण योग दिया है।

स्वामीजी का अभिनन्दन करने में स्वयं अभिनन्दकों का ही गौरव है। यह अतीव हर्ष का विषय है कि भारतीय संस्कृति तथा संस्कारों के सुविदित समर्थक राजस्थान के शिक्षामन्त्री श्री हरिभाऊ उपाध्यायजी अभिनन्दन समारोह समिति के प्रधान हैं। यह और भी हर्ष का विषय है कि भारतीयता के अद्वितीय उपासक राज्यपाल महोदय समारोह के अध्यक्ष पद को अलंकृत कर रहे हैं। मैं भगवान् धन्वन्तरि से सहस्रशः अभ्यर्थना करता हूँ कि वे पूज्य स्वामीजी को आयुर्वेद की भूयसी सेवा के लिए सुचिर आयु प्रदान करें एवं उनके स्वस्थ तथा शक्तिमान तन और मन को सदैव स्थिर रखें।

बापालाल वैद्य
आचार्य
श्री ओ० ना० आयुर्वेद महाविद्यालय
सूरत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

अहो महानयं हर्षस्य विषयः सुरभारतीप्रणयिनां विदुषां वैद्यानाम्, यज्जयपुरात्प्रकाशमानाया सुरभारतीकलेवरं परिपोषयन्त्या 'भारती' नाम पत्रिकायाः स्वामी श्रीजयरामदासाभिनन्दनग्रन्थस्यायुर्वेद-विशेषाङ्कः मईमासे प्राकाश्यमेष्यतीति ।

श्रीजयरामदासस्वामी मनीषोन्मेषादारभ्य अद्ययावद् आयुर्वेदसेवयैव आयुः सफलमकरोत् । अयं हि कैशोरं यौवनमुखञ्चायुर्वेदोक्तौषधनिर्माणसहितेनायुर्वेदशास्त्राध्ययनेन विनीय अग्र्येण वयसा जयपुरीय-महाराजायुर्वेदमहाविद्यालये प्रधानपदाधिष्ठितो भाविनो वैद्यान् आयुर्वेदशास्त्रमशिक्षयत् । आयुर्वेदमहाविद्यालयसेवानिवृत्तश्च श्रीलक्ष्मीकृपापात्रतया लक्ष्म्याकृष्टदृष्टिरपि व्याधिपीडितेषु निजोत्तरा-धिकारिणमात्मानमिव द्वितीयं श्रीरामप्रकाशाभिधं स्वामिनं चिकित्सार्थं नियुज्यापि सहजया कृपया व्याधिनिपीडितार्पितमना आयुर्वेदसेवां परां वृत्तिं मन्यमानो जीवनसफलमकरोत् । अनेन हि निजगुरो-रतियशस्विचिकित्सकायुर्वेदशास्त्राम्बुधिपारगामिनो दिगन्तविश्रान्तकीर्त्तेः श्रीलक्ष्मीरामस्वामिनः संगृहीतनिधिना आयुर्वेदस्यातिप्रत्नानि दुर्लभानि ग्रन्थरत्नानि प्रकाश्यायुर्वेदस्य सर्वतोविसारिसेवाया-मेकमादर्शं पदं निहितम् यद्यपि तस्यां दिशि बहुभिः शिष्यतेकरणीयम् । एतादृशस्यायुर्वेदसेवकस्याभिनन्दनं वैद्येषु प्रतिव्यक्ति कर्तव्यम् !

अत्राहमायुर्वेदाङ्कस्य लेख्यविषयसूचीं विलोक्यांशेन प्रासीदञ्च व्यषीदञ्च । अत्र हि सर्वत्र प्रसरन्ती नवीनता लेख्यविषयसूचीं नाजहादिति मे प्रसादस्य हेतुः । अथ चायुर्वेदस्य सर्वास्वपि प्रधान-संहितासु निजविकाराणां मूलभूता हेतवो वातपित्तश्लेष्माणो निर्दिष्टा भवन्तीति आयुर्वेदशास्त्रपरिचितेभ्यो न तिरोहितम् । तथा चाह चरकाचार्यः"—सर्व एव निजा विकारा नान्यत्र वातपित्तकफेभ्यो निर्वर्तन्ते । यथा हि शकुनिः सर्वमपि दिवसं परिपतन् स्वां छायां नातिवर्तते । तथा स्वधातुवैषम्यनिमित्तजाः सर्वे विकारा वातपित्तकफान्नातिवर्तन्ते ।" इति ।

अथ कालार्थकर्मणां हीनमिथ्याति युक्तानां "कालबुद्धीन्द्रियार्थानां योगो मिथ्याति नाति च । द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः ।" इति चरके सर्वरोगोत्पादकहेतुतयोक्तानाम् आयुर्वेदाङ्क-लेख्यविषयप्रकाशितसूच्यां क्वापि संख्या नास्ति ।

आधुनिका अपलोहपथीयचिकित्सका आयुर्वेदशास्त्रं रोगप्रतिघातमार्गशास्त्रमेव मन्यन्ते केवलं न तु स्वास्थ्यमार्गदर्शकमपि तन्नेत्रोद्घाटनाय आयुर्वेदे स्वास्थ्य कारणेषु बहुषूपदिष्टेषु "त्रय उपस्तम्भा इति, आहारः स्वप्नो, ब्रह्मचर्यमिति, एभिस्त्रिभिर्युक्तियुक्तैरुपस्तब्धमुपस्तम्भैः शरीरं बलवर्णोपचयोप-चितमनुवर्तते यावदायुः संस्कारात् संस्कारमहितमनुपसेवमानस्य य इहैवोपदेक्ष्यते ।" च० सू० ११।३५ ।

एवमादि विषयाणामायुर्वेदस्य महत्त्वविख्यापकानां न हि न हि आयुर्वेदस्य प्राणायितानां विष-याणाम् आयुर्वेदविशेषाङ्कलेख्यविषयसूच्यां निर्देशो वैद्यैर्न हातव्य एवेति ममाभिप्रायः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखकेष्वपि संस्कृतभाषायां सर्वथा लेखनीव्यापारवर्जितानामपि कारणान्तरैर्विश्रुतानां नामानि प्रकाशितानि। अथ संस्कृतभाषायां महिमशालिग्रन्थलेखकानां हिन्दुविश्वविद्यालये आयुर्वेदप्राध्यापकानां श्रीदामोदरशास्त्रिणां तत्सदृक्षाणामन्येषामपि च श्री गोडबोलेशास्त्रिप्रभृतिमहोदयानां नामानि प्रकाशित-विषयसूच्यां न सन्तीति–"अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः। त्रीणि तत्र प्रवर्तन्ते दुर्भिक्षं मरणं भयम्" इति अभियुक्तोक्तिः, किमिदं दुष्कृतं क्रियत इति अंगुल्या तर्जनमिव करोति विषयसूची-लेखकानां तदनुमोदकानाञ्चेति मम विषादाय अत्र वस्तुतः सतो दोषान् प्रमार्जयितुमेतल्लिखितं न तु गुणेषु दोषदृष्ट्या पौरोभाग्यमाचरितुम्।

यद्यपि विषयसूचीदर्शनात्प्रकाश्यग्रन्थस्य वैशेष्यं प्रकाशनात्पूर्वमेव रवेरुदयात्प्रागेव प्राच्यां प्रसृतस्योषसः प्रकाशस्येव सन्दृश्यते तथापि मुद्रितग्रन्थस्य सर्वत्र प्रचारः प्रसारो भवतीति तत्कार्यं सर्वथा आलोच्यालोच्य कर्तव्यमित्यलं विशेषज्ञेषु।

भवदीयस्य–

वैद्यरामनारायणस्य

(४)

स्वामिवर्यस्यैका बाल्यकालीना मधुरा स्मृतिः

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, साहित्यरत्नम्, ज्योतिषोपाध्यायः, झालावाडः, राजस्थानम्)

तदानीमहं श्रीमहाराज-संस्कृत-महाविद्यालये जयपुरस्थे, ज्योतिषोपाध्यायकक्षायां, द्वितीयवर्गेऽधीयानोऽभूवम्। मम ज्योतिषशास्त्रप्राध्यापकाः स्वर्गीया दुर्गादत्ताचार्यमहाभागा आसं स्तथा श्रीजयरामदासस्वामिवर्याणां, स्व.नन्दकिशोरप्रभृती-नामायुर्वेदस्य प्राध्यापकाः सुगृहीतनामधेया भारतविख्याता आयुर्वेदमार्तण्डाः पीयूषपाणयो वैद्यराजाः प्राणाचार्या लक्ष्मीरामोदासीना आसन्। यदा कदास्माकं गुरवोऽवकाशं गृहीत्वा विद्यालयं नागच्छन्ति स्म तदाहं ज्योतिषशास्त्रस्य च्छात्रोऽपि सन् स्वामिवर्याणां छात्रेभ्य आयुर्वेदस्याध्यापनं शृण्वानोऽभूवम्। यद्यपि स्वामिनो लक्ष्मी-रामोदासीनमहाभागाः समदर्शिनः कोमलहृदया विद्यालयस्य सर्वेभ्योऽपि छात्रेभ्यः समानं स्नेहभावं ररक्षुस्तथापि नन्दकिशोर-जयरामदासौ तु तेषां पट्टशिष्यत्वेनाधिकाधिकं स्नेहभाजने बभूवतुः। तदानीमायुर्वेदस्य पाठ्यक्रमे चरकसुश्रुताष्टाङ्गहृदय-भावप्रकाशचक्रदत्तसंहितामाधवनिदानादयो ग्रन्था पाठ्यन्ते स्म। अस्माकं ज्योतिषशास्त्रगुरूणां विद्यालयेऽनागमनादहं लक्ष्मी-राममहाभागानामायुर्वेदाध्यापनप्रवचनानि,तत्तत्तत्वनिरूपणानि, व्याख्याभावार्थादीनि तद्गतेन मनसा शृण्वन् कामपि परामास्था-मायुर्वेदशास्त्रे, महतीमनिर्वचनीयां श्रद्धां, नैष्ठिकीं भावप्रवणतां, परमां मुदं, प्रसन्नतामानन्दं चान्वभूवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली-स्वास्थ्यपरिषदः शुभावसरे भारतस्य तदानीन्तन-स्वास्थ्यमन्त्रिण्या श्रीराजकुमारी-'अमृतकौर' महोदयया सह विचारविमर्शतत्पराः श्रीजयरामदासस्वामिनो विलोक्यन्ते



नरेनास्थ-दादूद्वारे श्रीसुन्दरजयन्तीमहोत्सवावसरे मञ्चस्थितैर्भाषमाणैः श्रीबाबूपुरुषोत्तमदास-टण्डनमहाभागैः सह विराजमाना स्वामिजयरामदासमहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निखिल-भारतवर्षीयायुर्वेद-महासम्मेलनस्यावसरे कोट्टकले स्व० श्रीराजवैद्यनन्दकिशोर-महाभागेन सहोपविष्टाः श्रीस्वाम्मिजयरामदासमहोदयाः

निखिलभारतवर्षीयायुर्वेदशास्त्रचर्चापरिषद्, ऋषिकुलस्थायुर्वेदिककालेजः, हरिद्वारम्
वैद्यश्रीस्वामिजयरामदास [illegible] मलङ्कुर्वते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामिमहाभागानां प्रतिभापण्डित्यसदाचारादिगुणैस्तु सुतरां प्रभावितोऽभूवमेव परन्तु नन्दकिशोरजयरामदासयोर्द्वयोस्तेषां पट्टशिष्यत्वे तयोर्व्यक्तित्वे च किमपि महदाकर्षणमिव पर्यलक्षयम्। तयोर्द्वयोः स्वामिवर्यस्य स्नेहभाजनत्वे मम मनसि कापि सात्त्विकी स्पर्द्धेवोदियाय। इत्थं क्रमेणाहं जयरामदासमहाभागानां सम्बन्धे सविशेषं किमपि ज्ञातुं कृतेक्षणोऽभूवम्।

स्वामिनो जयरामदासमहाभागास्तदात्वे तरुणे वयसि वर्तमाना आसन्। स्वदेशीयवस्त्रस्य धौत्रं, तदुपरि सूत्रनिर्मितं कञ्चुकं (कुर्ताख्यं) शिरसि च श्वेतखादीविनिर्मिता टोपिकेत्ययमेव जयरामदासस्वामिनामतीव सरलसरलोऽनाडम्बरो वेशः शुशुभे। अस्यां वेशभूषायां जयराममदासमहाभागः सर्वसाधारणश्छात्र इवाभाति स्म बाह्यतः, परन्तु तस्य तेजस्विनो नेत्रयोर्द्वयोः कनीनिकयोः काप्यपूर्वैव प्रतिभानवत्ताभिजनवत्त्वमन्तस्तेजो, ज्ञानगरिष्ठता, विचारप्रौढता, तत्त्वचिन्तनशबलता, शास्त्राभ्यासनैष्ठिकत्वं, विचारगाम्भीर्यं, श्रमशीलता, कर्मठत्वमित्यादीनां तत्तद्गुणानां पूर्वाभासमहं निपुणमजानाम्। गच्छति काले सोऽयं महाभागो जयरामदासस्वामी स्वजीवने तेषां सर्वेषां गुणानां साधीयांसं विकासं संसाधयामास यानहमितस्त्रिंशद्वर्षेभ्यः पूर्वं तस्मिन् समभानयम्। अत्र कविकुलगुरोः सेयमुक्तिर्मम स्मृतिपथमवतरति—

"महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया····वह्निरेधोऽपेक्षो हुताशनः ॥१॥

तदिह वयं प्रत्यक्षमेव पश्यामोऽनुभवामश्च यदनेन श्रीस्वामिवर्येण जयरामदासमहाभागेन स्वजीवने नानाकार्यक्षेत्रेषु सेयमुक्तिरन्वर्थतां नीतेति। आयुर्वेदे त्वस्य प्रौढं ज्ञानं, रसौषधिसाधने क्रियात्मकं सिद्धहस्तं कौशलं तु महाभागस्यास्योत्तराधिकार एव प्राप्तं निसर्गसिद्धम्। अस्यायुर्वेदशास्त्रेऽसाधारणोऽधिकारः। अतोऽतिरिक्तमसौ संस्कृतवाङ्मयेऽपि च किमप्यद्वितीयं वैदुष्यमावहत्तितमाम्। नानापत्रपत्रिकास्वयं निबन्धादिलेखनैः सुरभारतीं मनोवाक्कायकर्मभिः सिषेवे। अखिलभारतीय-संस्कृत-साहित्य-सम्मेलनस्य बह्वीषु प्रवृत्तिषु मुख्यसदस्यत्वेन कार्यकलापान् तन्मयतया सम्पादयामास। अनेकासु परिषत्सु, सभासु, समितिषु स एषोऽग्रगण्यत्वेन भागं गृह्णन् हि वर्तते। न केवलमेतावदेवापि तु धर्मकार्येषु, विद्योन्नतिविषयकेषु महासमारम्भेषु, विदुषां साहाय्यसम्भावनादिषु सत्कर्मसु, धनहीनानां निस्सहायानां छात्राणां संरक्षणेषु, पात्रत्वेन योग्येषु जनेषु च सोऽयं जयरामदासस्वामिवर्यो मुक्तहस्तं धनं वितरतीत्ययमस्यापरो विशेषो गुणः। सुहृज्जनानां समानशीलगुणानां परमप्रियो मम सखा मित्रं चास्तेऽसौ महाभागः।

तदस्मिस्तदभिनन्दनावसरे वयमिह महाभागस्यास्य हार्दमभिनन्दनं कुर्वाणा भृशं मोदामहे। अस्य श्रीजयरामदासस्वामिवर्यस्य दीर्घायुष्ट्वं, स्वास्थ्यं, सुखं, श्रियमभ्युदयं प्रसन्नतां च परमेशितुः कामयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५)

जयपुरायुर्वेदमहाविद्यालयात् प्राप्तावकाशावसरे 'भारती'संस्कृतपत्रिकाधिकारिभिः स्वामिश्रीजयरामदासमहाभागस्य करकमले अभिनन्दनग्रन्थरूपेण भारतीपत्रिकायाः विशेषायुर्वेदांकोपहारस्य यत्संकल्पं गृहीतं, तदवश्यमेव प्रशंसामर्हति। यद्यपि स्वामिमहोदयेन सह मम प्रत्यक्षपरिचयः नाधिककालव्यापी आसीत् तथापि पूज्यपादस्य मे गुरुदेवस्य सरस्वतीविद्यासागर एम० ए०, एल० एम० एस० महामहोपाध्याय—इत्यादिद्यु पाधिभूषितस्य स्वर्गत-कविराजगणनाथसेनमहोदस्य तथा स्वामिजयरामदासस्य स्वनामधन्याचार्यस्य स्वर्गतस्वामिलक्ष्मीराममहाभागस्य घनिष्ठमित्रत्वं संस्मृत्य प्रथमपरिचयेऽपि आवाभ्यां परमभ्रातृत्वमनुभूतम्।

जयपुरस्थित-आयुर्वेदमहाविद्यालये मम प्रथमागमने अध्यापकानां विशेषेण पूर्वपरिचितस्य पाराशरी इत्युपाह्वस्य श्रीसुदेवचन्द्रस्य आग्रहातिशयेन मया भाषणमेकं प्रदत्तम्। भाषणान्ते अध्यक्षीयवक्तृताप्रसंगेन स्वामिजयरामदासोक्तमिदं "पाश्चात्यपरिच्छदाभ्यन्तरे आयुर्वेदस्य एवंविधो गम्भीरज्ञानभण्डारो वर्तते इति संप्रेक्ष्य चकितोऽस्मिन्। वस्तुतः उक्तिरियं भवतां स्वाभाविकसरलतायाः गुणग्राहितायाश्च परिचायिका आसीत्। अद्यापि मया सहगौरवेण सुसंस्मृतमिदं वचनं भवताम्।

प्राचीनपरम्परयायुर्वेदमधीयानस्य भवतः पाश्चात्यचिकित्साशास्त्रेभ्यः विशिष्टज्ञानाहरणेन आयुर्वेदस्य कलेवरपुष्टिरनुमता। किं बहुना, महत्वाकांक्षया विना आयुर्वेदस्य या मौनसेवा भवता आजीवनं कृता सा अवश्यमेव प्रशंसार्हा। जीवतु भवान् शरदः शतं श्रीभगवदनुग्रहेण आयुर्वेदस्योपकाराय च। इति

भवतां गुणमुग्धः,

सतीन्द्रनाथ वसुः

आचार्यः, आयुर्वेदविश्वभारती,
गांधी विद्यामन्दिर, सरदारशहर,
राजस्थान

(६)

श्री स्वामीजी महाराज के मैंने हरद्वार में अनेक बार दर्शन किये हैं। इनके सामीप्य से मुझे हर बार यही प्रेरणा मिली है कि पूर्ण निष्ठा के साथ अपनी शक्ति के अनुसार ही अपने इस प्राचीन आर्य चिकित्सा विज्ञान के लिए कार्य करते रहना चाहिये। इसमें निराशा या अकर्मण्यता का कोई स्थान नहीं है।

भवदीय

वैद्य निरंजन देव,

प्रिंसिपल
आयुर्वेदिक कालेज,
गुरुकुल कांगड़ी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७)

योग्य गुरु के सुयोग्य शिष्य

(ले०—आचार्य श्री सूर्य्यदत्त शास्त्री, आयुर्वेदाचार्य, काव्यतीर्थ, आयुर्वेदरत्न, साहित्यभूषण)
प्रधान मन्त्री—पटना नगर (जिला) वैद्य मण्डल, पटना सिटी (बिहार)

सन् १९३८ की बात है, मैंने अपनी घुमक्कड़ वृत्ति के उफान में तीसरी उड़ान लम्बी भर दी। पहले मैं दिल्ली पहुंचा, उसके बाद सीधा जयपुर। सुना था जयपुर में महाराजा माधोसिंहजी के जमाने के सुप्रसिद्ध रसवैद्य महाकवि श्री कृष्णराम भट्ट के पट्ट शिष्य परम तेजस्वी महामनीषी सर्वश्री स्वामी लच्छीरामजी महाराज उन दिनों के भारतविश्रुत वैद्यों में शिरमौर और अद्वितीय हैं। उन्हीं की अध्यक्षता में जयपुर की आयुर्वेद की पढ़ाई शास्त्रीय एवं क्रियात्मक दोनों दृष्टियों से अग्रुतम और उत्कृष्ट मानी जाती थी। परिवार से विकर्षण होने के कारण इच्छा थी कि अपने बिहार प्रान्त से दूर किसी महापुरुष के चरणों में बैठ कर कुछ सीखूं। इसी ख्याल से जयपुर जा धमका। पूरी बातें जयपुर-जीवन की लिखूं तो एक अद्भुत और दिलचस्प कहानी ही होगी। परन्तु इस निबन्ध में थोड़ा पुण्य-संस्मरण लिखे बिना मन नहीं मानता।

मैं भूराटीबा के पण्डित वासुदेव शर्मा वकील के यहां ठहरा था। यों तो उनके साथ बातचीत करने में कुछ विशेष रस नहीं मिलता था, पर उनका हमारे प्रति जो वात्सल्य प्रेम उमड़ पड़ा था, वह भुलाया नहीं जा सकता। उनसे मैंने आयुर्वेदिक शिक्षा लेने की बात कही, तो उन्होंने बड़े प्रेम और उत्साह से कहा कि-"थे तो लिच्छीरामजी के उठीने जाओ, थारो काम हो जासी—बाबाजी बड़ो भारी वैद्य छे!" सुनते ही मेरा मन दर्शन के लिए पुनः उद्वेलित हो उठा। जयपुर नगर की दक्षिण ओर बाहर गांव में स्थित लक्ष्मीराम बाग में मैं गया। बाहर फाटक पर ही पता लगाने से मालूम हुआ कि श्री स्वामीजी महाराज कमरे में बैठे हैं। मैं कमरे के दरवाजे पर पहुँच गया और मिलने के लिए निवेदन सम्वाद भेजा। आवाज आई, अन्दर भेज दो। मैंने बड़े कमरे के अन्दर प्रवेश किया। सामने ही चांदी के पांव वाले नेवाड़ की बिछी हुई श्वेत पलंग पर लंगोटी लगाये पालथिया मारे दिव्य विभूति को देख कर मैं टकटकी लगाये हाथ जोड़े किंकर्तव्य विमूढ़ सा हो गया। परम गौरवर्ण, मध्यम कद, हृष्ट-पुष्ट, सर्वाङ्गपुलकित, पद्मराग आभामण्डित, गम्भीर मुद्रा, भौंहें किसी दार्शनिक तत्वचिन्तन में निमग्न, बौद्धिक विपुलता से गौरवान्वित, मन पर स्वशासन स्थापित किये, हृदय की उदारता को विस्तृत और व्यापक बनाये बैठे थे। मालूम होता था कि भव्यता और दिव्यता की होड मची हो। ऐसा लगा, मानो इस सिंहासन पर बैठी स्वर्णकाया के अन्दर मायाछन्न कोई ब्रह्म, महापुरुष, पुरुषोत्तम या चिरन्तन सत्यं, शिवं, सुन्दरम् का प्रतीक प्रतिमा है।

मैं मस्तक टेक अभिवादन कर संगमरमर की जमीन पर बैठ गया। महाराजजी बोले—कहां से आये हो? बिहार से—यह विनम्रतापूर्वक मैंने कहा। यहां क्यों आये हो? मैंने कहा—आयुर्वेद पढ़ने, तुम क्या पढ़े हो? उत्तर में मैंने कहा—काव्यतीर्थ हूं। अरे तो तुम्हें आयुर्वेद पढ़ना था, तो तुम्हारे यहां ही व्रजविहारी चौबे वैद्यजी तो हैं ही। मैंने कहा—हां, हैं तो जरूर पर जिसक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जहां संस्कार फिर आप जैसे महापुरुषों के चरणों का दर्शन जो मुझे उपलब्ध होना था, इसलिये प्रारब्ध ले आया। किन्तु मैं गरीब युवक हूँ अध्ययन करना चाहता हूँ। स्वामी जी बोले बड़े स्नेह और वात्सल्य भरे वाणी में—जाओ तुम नन्दकिशोर से मिलो। मैं उन्हें कह दूंगा। मुझे बड़ी खुशी हुई, देवता ने वरदान दे दिया। दूसरे दिन मैंने उनसे (राजवैद्य पं० नन्दकिशोर शर्मा से) मिला। उनकी उदारता ने मुझे जिस प्यार से जयपुर के प्रवास-जीवन में सहायता दी है, उसे तो मैं जीवनपर्यन्त भूल ही नहीं सकता। पूर्ण आश्वासन देते हुए राजवैद्य बोले—स्वामी जयरामदासजी से मिल लेना। मैंने मन में ही कहा—ये कौन भला मनुष्य है। दर्शन तो दो देवताओं का कर चुका हूँ, अब तीसरे महेश को भी देख लूं। ब्रह्मा और विष्णु का वरदान मिल चुका है। अब महेश की दृष्टि कैसी रहती है? मन में तरह-तरह की काल्पनिक मूर्ति का निर्माण करते जौहरी बाजार में श्री स्वामीजी के निजी दवाखाने में पहुंचा। मकान सुन्दर बना था और देखने से मालूम होता था कि बहुत बड़े लक्ष्मी-पति का ही निवास है। पूछने पर पता लगा कि यही स्वामी लच्छीरामजी का दवाखाना है। यहीं बाहर दवा घोंटते हुये कर्मचारी से बातें करने से पता लगा कि योग्य गुरु श्री स्वामी लच्छीरामजी (लक्ष्मीरामजी) महाराज के सुयोग्य शिष्य भिषगाचार्य श्री स्वामी जयरामदासजी प्राधानाध्यापक आयुर्वेद-विभाग, संस्कृत कालेज, जयपुर—यहीं रहते हैं। मैंने खबर भेजी—मैं मिलना चाहता हूं। मेरी बुलाहट हुई, मैं अन्दर गया। चारों ओर स्वच्छता एवं दिव्यता प्रस्फुटित हो रहीं थी। अन्दर की कुल चीजें बड़ी व्यवस्थित ढंग से रखी थीं। साधु-सन्तों की तरह वातावरण में सौम्यता एवं स्निग्धता छायी थी। दूध सी धुली दिव्य, उज्वल, महीन मलमल के वस्त्रों से आवेष्टित राजस्थानी श्वेत पगडी बांधे, गठीला बदन, भव्य ललाट अचकन पहने, नीचे राजस्थानी ढंग से धोती बांधे, गर्दन में चादर डाले, सौम्य, शान्त एवं गम्भीर ज्ञान गरिमा से ओत-प्रोत, युवावस्था की चंचलता को बरबस दबाये, देखने में ओज, तेज, एवं स्वाभिमान युक्त, बातों में राजस्थानी रूक्षता होते हुए भी बात-चीत करने पर मालूम होता था कि हार्दिक भावों में नवनीत सी कोमलता, नदी सी उदारता एवं हिमालय सी महानता इस नवयुवक महानात्मा के अन्दर हिलोरें मार रही हैं। बड़ी प्रसन्न मुद्रा में हंसते-विहंसते बातें करते, अपनी छोटी-छोटी तीखी आंखों से मिलने वालों के नयनों में घुस कर, उसके मन की अपने प्रति श्रद्धावनत करने की, एक देवी शक्ति श्री स्वामी जयरामदासजी की पुतलियों में थी। मैंने अपना परिचय और स्वामीजी, राजवैद्य श्री आदि से मिलने की बात कह जयपुर निवास की आकांक्षा प्रकट की। उन्होंने बड़े प्रेम से सहयोग सहायता का आश्वासन दिया—मैं प्रसन्न होकर लौटा। उस समय स्वामीजी पूर्ण स्वस्थ युवक थे। अब तो मैं समझता हूं उम्र का तकाजा होगा। स्वामीजी रिटायर होने जा रहे हैं। अवस्था ढलती होगी पर हवा महल के सामने राम मन्दिर में महाराजा संस्कृत पाठशाला थी, जिसे संस्कृत कालेज भी कहा जाता था—उसी में आयुर्वेद विभाग के द्वितीय प्राध्यापक के रूप में गद्दी पर शोभायमान थे, उस समय देखते ही बनता था। एक ओर हमारे परम श्रद्धेय राजवैद्य श्री नन्दकिशोर शर्मा भिषगाचार्य प्रधान पद पर प्रतिष्ठित थे। तीसरी गद्दी पर उन दिनों वैद्यप्रवर श्री नरहरि भट्टजी महाराज विराजमान थे। हमारे परमादरणीय गुरुवर श्री कल्याणप्रसादजी शर्मा भिषगाचार्य उन दिनों रसायनशाला के क्रियात्मक अध्यापक थे। इनकी असीम कृपा की आनन्दमयी वर्षा मुझ पर तब तक होती रही, जब तक मैं जयपुर का प्रवासी बना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रहा। उनसे आयुर्वेद में प्राप्त उपलब्धियों से मैं कृत-कृत्य हुआ हूँ, जो सदा अविस्मरणीय है और रहेगा।

एक दिन की बात है कि भारतविश्रुत महामनीषी और आर्यनेता श्री नरदेवशास्त्री वेदतीर्थ कालेज देखने आये। हम लोग रसायनशाला में (राममन्दिर के बगल में नीचे) औषधियां बनाना सीख रहे थे। देवेन्द्र मुलतानी, च्यवनरामस्वामी बीकानेर, दलपतरामशास्त्री गोया, यमुनाप्रसाद बोहरा, मध्यप्रदेश, ऋषिदेव सोलंकी जोधपुर, ज्वालाप्रसादशर्मा अलीगढ, विनायकरायशर्मा गुजरात, धनेश्वर ठाकुर महाराष्ट्र, गोस्वामी मेवाड प्रभृति सहाध्यायीगण दो ग्रूपों में काम कर रहे थे। उसी समय श्रीनरदेवशास्त्रीजी को साथ लिये श्री स्वामी जयरामदासजी रसायनशाला में आये। शास्त्रीजी रसायनशाला का निरीक्षण करते, सभी चीजों को देखते सुनते हमारे पास आकर ठिठक से गये। मैं उन्हें देखने लगा। वह खूब गौर से और बड़ी भावभंगिमा में मुझे निहारते हुए बोल पड़े–क्या तुम महाराष्ट्री हो? मैंने कहा–जी नहीं मैं बिहारी हूँ। शास्त्रीजी पुनः बोले–तुम तो श्री शिवाजी की तरह मालूम होते हो–मैं शिवाजी की तरह ठुड्ढी पर दाढी रखे बड़ा बड़ा केश बढाये माथे पर शिवाजी की तरह कपड़ा लपेटे हाथ जोड़े नम्रता से खड़ा था—इतने में हमारे गुरुवर वैद्य कल्याणप्रसादजी से नहीं रहा गया—बोल उठे–हां, महाराज! शुक्ल जी (उन दिनों में जातीय उपाधिधारी शुक्ल होने के कारण जयपुर में शुक्लजी के नाम से ही प्रसिद्ध था) तो वीर आदमी हैं। इन्होंने तो छात्रावास में व्यायाम, योगादि का क्लास एवं अखाड़ा संचालित किया है। इनके साथ नवयुवकों का संगठित गिरोह रहता है। हमारे गुरुवर श्री स्वामी जयरामदासजी भी सुन रहे थे, उन्हें यह नहीं मालूम था कि शुक्ल जी माधोविलास (जहाँ उन दिनों आयुर्वेदीय छात्रावास संचालित किया गया था और उसमें रहने वाला मैं ही सर्वप्रथम छात्र था) में एक व्यायामशाला भी संचालित किये हैं। स्वामीजी सुनते ही बड़े प्रसन्न हुए। उस समय श्री स्वामीजी का हृदय इतना भर आया, जिसे मैं शब्दों में व्यक्त नहीं कर सकता। हमारे नजदीक आकर पीठ थपथपाई और बोले—मजे में रहते हो न? मैं उन दिनों जटाजूटधारी ब्रह्मचारी के रूप में था। अध्ययन करना एवं तपस्वी जीवन में रहना ही उन दिनों मेरा उद्देश्य था। स्वयं व्यायामप्रेमी होने के कारण वहाँ भी नियमित व्यायाम का क्रम चलता रहता था और धीरे धीरे व्यायामप्रेमी मित्रों की एक मण्डली बंध गई थी और अखाड़ा भी चलने लगा था। प्रातः कुश्ती-कसरत खूब होती थी। हमारे व्यायामी दल में व्याकरणाचार्य पं० दुर्गादत्तशर्मा मैथिल (बच्चाजी) बलदेव शर्मा न्यायाचार्य, रूपनारायणशर्मा शास्त्री, पं० लक्ष्मीनारायण शर्मा व्याकरण-साहित्याचार्य, पं० गिरिराजशर्मा, श्री मथुराप्रसाद जज के लड़के श्री रूपनारायण वर्मा, गोपीजी, रघुवरदयालशास्त्री पंजाब, तारामणि शर्मा प्रिय कालूरामशर्मा, प्रभृति युवकों की एक संगठित जमात थी। उन दिनों माधोविलास में सुबह ही सभी इकट्ठे हो जाते थे और मालूम होता था कि स्वस्थ एवं गठीले बदनवाले युवकों का टकसाल है। कालेज में भी हम लोगों की गतिविधि की काफी चर्चा हुआ करती थी। सभी लोग प्रभावित थे। उन दिनों प्रधानाध्यापक के पद पर महामहोपाध्याय पं० गिरिधरशर्माजी थे, जिनकी कृपा मुझ पर असीम रहती थी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक दिन स्वामीजी माधोविलास पहुंचे। मैं माधोविलास के पश्चिमी छोटे दर्वाजे पर स्थित एक कोठरी में रहता था। वहाँ ही मैं जटा-जूट खोले खड़ा था। मेरा शरीर उन दिनों खूब गठीला और मांसल था-स्वामीजी मुझे निहारते रहे और बड़ी प्रसन्नता से बोले-सूर्य्यदत्त! तुम्हें कोई तकलीफ तो नहीं है? किसी तरह की कोई बात हो तो कहना-मैं प्रसन्नचित्त हो उनकी कृपा दृष्टि का अनुशीलन करता रहा। स्वामीजी इतने उदार हैं इतने महान हैं कि मुझ जैसे अकिंचन छात्र पर इतनी विशेषानुकम्पा बनाये रहते हैं, निरन्तर ध्यान रखना उनके हृदय की विशालता का लक्षण है, महानता का गुण है। इससे सन्देह नहीं कि स्वामीजी योग्य गुरु के सुयोग्य शिष्य हैं। जैसे स्वर्गीय स्वामीजी आयुर्वेद जगत् के देदीप्यमान सूर्य्य थे, उसी तरह गुरूवर श्री स्वामी जयरामदास जी भी आयुर्वेद संसार के अनमोल रत्न हैं। भारतीय संस्कृति के जाज्वल्यमान प्रतीक हैं। इनके द्वारा निर्मित सैंकड़ों छात्र आज वैद्य बन-बन कर देश के कोने-कोने में छाये हैं। ऐसे सहस्रांशु प्रतिभा वाले श्री गुरुचरणों में हमारी श्रद्धाञ्जलि-पत्रं पुष्पं फलं-के रूप में दो शब्द समर्पित हैं। साथ-साथ जगन्नियन्ता से विनम्र प्रार्थना है कि हमारे श्रद्धेय स्वामीजी शतायु हों, दीघायु हों।

(८)

हरिद्वारीयं संस्मरणं शुभकामना च

नरपतिहितकर्त्ता द्वेष्यतां याति लोके,
जनपदहितकर्त्ता त्यज्यते पार्थिवेन्द्रैः।
इति उभयविरोधे भासमाने समाने
उभयहितविधाता दुर्लभः कार्यकर्त्ता॥

श्रीमतामायुर्वेदपारङ्गतानां, जयपुरस्थ-राजकीयायुर्वेदमहाविद्यालयस्य भूतपूर्वप्रधानाचार्याणां श्री स्वामि जयरामदासमहोदयानां संस्मरणे केवलमहं तेषां हार्दिकाभारमेव प्रकटीकर्तुं समर्थोऽस्मि। येन शब्देनाभारः प्रकटीक्रियते मम समीपे कोऽपि शब्दो नास्ति। अहन्तु तस्य सेवायां केवलमेकस्य संस्मरणस्य भावमेव प्रकटीकरोमि। एक षष्ट्यधिकैकोनविंशतितमे ख्रिष्टाब्दे मईमासस्य अष्टादश तारिकायां हरिद्वारतीर्थे श्रीमतां स्वामिजयरामदासमहोदयानां दादूनाममन्दिरे दर्शनं जातम्। दर्शनं कृत्वा सौभाग्यं मन्यमानेन मया तेषां सेवायां हरिद्वारीयायुर्वेद विज्ञान परिषदो द्वितीय-मासिकाधिवेशनस्य सभापतिपदाय प्रार्थना कृता। उदारचित्तेन स्वामिमहोदयेन स्वीकृतिः दत्ता। तस्मिन्नेवावसरे माननीयायुर्वेदपञ्चानन पं० जगन्नाथप्रसाद शुक्लः, स्वामी मंगलदासः, स्वामी ईश्वरदासो, दन्तविशेषज्ञः श्रीकिशोरदासमहोदयः, स्थानीयायुर्वेदमहाविद्यालयानां प्रधानाचार्याः, बहवः प्राध्यापकगणाः, पञ्चपुरी वासिनश्चापरे वैद्यमहोदया अपि उपस्थिता आसन्। तस्याधिवेशनस्योद्घाटनं श्रीमता वैद्यरामनारायण शर्मणा कृतम्। आयुर्वेदविज्ञानपरिषदः उद्देश्यान् श्रुत्वा स्वामिमहोदयोऽतिसन्तुष्टो जातः। तत्पश्चात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव। अतोऽहं स्वामिमहोदयैर्विषणापूर्वकं भाषणं प्रदत्तम्, संरक्षकत्वञ्च स्वीकृतम्। अद्यावधि परिषदः संरक्षकास्त स्वामिजयरामदासमहोदयानामायुष्यकामनां करोमि।

वैद्यप्रभुः श्री जयरामदासो,
रुजां विनाशे शुचिबोधदक्षः।
याचामहे स्वामिमहोदयाना-
मायुः शतं वै जनताहिताय ॥

शुभेच्छुः-
पं० रामनाथ वैद्यः, प्राध्यापक आयुर्वेद महाविद्यालय
गुरुकुलकाँगडी विश्वविद्यालययस्थः, संयोजक
आयुर्वेद विज्ञान परिषद्, हरिद्वारम्।

दिनाङ्क २०-११-६३

(६)

छात्र वात्सल्य के आदर्श

यह बात आज से २३ वर्ष पूर्व सन् १९४२ की है जब कि मैंने आयुर्वेदोपाध्याय (भिषक्) परीक्षा पास कर भिषग्वर में प्रवेष किया था और भिषग्वर कक्षा में प्रातःस्मरणीय गुरुवर्य श्री स्वामीजी महाराज के चरणों में बैठ कर चरक सुश्रुत का अध्ययन प्रारम्भ करने का सौभाग्य प्राप्त हुआ। यों तो सन् १९३९ से ही जब से कि मैंने संस्कृत कालेज में प्रवेश पाया था सौभाग्य से अपने से बड़ी कक्षाओं के छात्रों का सहयोग निरन्तर प्राप्त किया और इसी कारण उनके साथ पूज्य स्वामी जी महाराज के दर्शनों का लाभ समय समय पर पाता रहा, किन्तु अब तो भिषग्वर कक्षा में अध्ययन के समय निरन्तर ४-५ घन्टे स्वामी जी महाराज के ही चरणों में बैठने का होता था। मै बहुत कम बोलने वाले छात्रों में था, एक तो मैं कक्षा में सबसे छोटी उम्र का छात्र था और दूसरे उस समय जबान भी बहुत अटकती थी इस कारण मुझे सुने हुए विषय पर चिन्तन व मनन करने की आदत अधिक हो गई थी। फिर भी कक्षा में जब मैं कभी कोई भी प्रश्न नहीं करता तो स्वामी जीं महाराज पढ़ाते हुए बीच बीच में पूछलेते थे कि "क्यों विषय समझ में आया या नहीं" और जब मैं कोई उत्तर नहीं देता तो केवल मेरी मुखमुद्रा से हीं वे समझ लेते थे कि "छोरा समझा नहीं हैं" और वे उसी विषय को पुनः बड़े सरल तरीके से समझाते थे।

स्वामीजी महाराज अपने छात्रों के हृदय में कभी भी हीनता का भाव पैदा ही नहीं होने देते थे। वे उनको निरन्तर बढावा देते न केवल पढाई के क्षेत्र में अपितु अन्य खेलकूद, वाद विवाद प्रतियोगिता, वनौषधि परिचय हेतु हरिद्वार गढवाल की यात्रा, औषध निर्माण आदि सभी क्षेत्रों में अपनी प्रत्यक्ष उत्साहवर्धक प्रेरणा देते रहे है। योग्य व निर्धन छात्रों को आपके द्वारा सदा से ही छात्रवृत्ति मिलती रही है। मेरे एक साथी जो छतरपुर स्टेट के थे स्वामी जी महाराज के वहां से ही उपाध्याय से लेकर भिषगाचार्य तक निरन्तर छात्रवृत्ति पाते रहे अपने शिष्यों के प्रति आज भी आपका स्नेह व कृपा उसी तरह की बनी हुई है जैसी की प्रारम्भ में थी। आपकी सरलता व वात्सल्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

में लेशमात्र भी अन्तर नहीं आया है। आपका हृदय बड़ा सरल व करुणामय है जहां प्रत्येक छात्र अपनी सभी बातें हृदय खोलकर निःशंक रूप से निवेदन कर देता था। जब कि यह बिलकुल सत्य है कि न केवल मैं ही अपितु प्रायः उस समय के सभी छात्र स्वर्गीय श्री गुरुवर्य राजवैद्य पं० नन्दकिशोरजी महाराज के पास अध्ययन करते हुए भी निःशंक रूप से कोई भी बात निवेदन करने का कम साहस कर पाते थे, अतः वे अपनी बात श्रीस्वामीजी महाराज के माध्यम से ही राजवैद्यजी महाराज को पहुँचाते और स्वामीजी महाराज ही उसे मनवाने में सामर्थ्यवान् होते थे।

पूज्य स्वामीजी महाराज आज भी अपने छात्रों की परिस्थितियों को जानने की बड़ी चिन्ता रखते हैं। मुझे आज भी याद है कि जब भारत आजाद हुआ और पंजाब के हिन्दुओं को वहाँ से हटना पड़ा तो हमारे साथियों में एक देवेन्द्र शर्मा थे जो कि फुटबाल के बहुत अच्छे खिलाड़ी थे। उनके विषय में महाराज को बड़ी चिन्ता हुई और जब तक उन्हें यह पता नहीं हो गया कि वह सकुशल दिल्ली आ गया है आप बराबर उनके विषय में जानकारी प्राप्त करते रहे।

हम लोगों का सौभाग्य है कि हमें ऐसे सरल एवं वात्सल्य परिपूर्ण हृदय वाले, गुरु, संरक्षक एवं पथप्रदर्शक के रूप में पूज्य स्वामीजी महाराज मिले। भगवान धन्वन्तरि से प्रार्थना है कि आपके आशीर्वाद एवं उत्साहवर्धक प्रेरणायें हमें हमेशा मिलती रहें।

वैद्य ऋषिदेव सोलंकी
निरीक्षक, आयुर्वेद-विभाग,
राजस्थान, जोधपुर

❀ अपर गैंगेज शूगर मिल्स लिमिटेड
❀ दी अवध शूगर मिल्स लिमिटेड
❀ न्यू इण्डिया शूगर मिल्स लिमिटेड
❀ दी न्यू स्वदेशी शूगर मिल्स लिमिटेड
❀ भारत शूगर मिल्स लिमिटेड
❀ गोबिन्द शूगर मिल्स लिमिटेड
शुद्धकणवत्या इक्षुशर्कराया निर्मातारः
मैनेजिंग एजेंट्सः—
दी काटन एजेण्ट्स प्राइवेट लि०
इन्डस्ट्री हाउस
१५६, चर्चगेट रिक्लेमेशन, बम्बई—१

CC-0.-In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्माण्डस्य स्रष्टा वरुणो विष्णुश्च

Varuna-Vishnu the Creator of this Universe

(ले०—डा० श्री गोविन्दहरी मराठे, आयुर्वेदतीर्थः, जनकगंज, लश्कर-ग्वालियर)

त्वं विश्वस्य मेधिर दिवश्च ग्मश्चराजसि ।
स यामनि प्रतिश्रुधि ॥२०॥ (ऋ० मं० १ सू० २५)

हे मेधिर=मेधाविन् ! वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि दोप्यसे । उक्तं च 'वरुण एव सविता आपः सावित्री तदेकं मिथुनं' (सावित्र्युपनिषत् २) 'वरुणमेवाप्येति यो वरुणमेवास्तमेति' (सुबालोपनिषत् ६।४) स तादृशस्त्वं यामनि क्षेमप्रापणे अस्मदीय प्रतिश्रुधि प्रश्रवणम् आज्ञापनं कुरु । रक्षिष्यामीति प्रत्युत्तरं देहि इत्यर्थः ॥

संसृष्टं धनमुभयं समाकृतं अस्मभ्यं दत्तां वरुणश्च मन्युः ॥
भियं दधाना हृदयेषु शत्रवः पराजितासोऽअपनिलयन्ताम् ॥
(ऋ० मं० २० सू० ८४-७)

संसृष्टं अविभागमापन्नम् (अच्छं-एकं), उभयम् उभयविधं धनं समाकृतं सम्यगानीतम् । अस्मभ्यं दत्ताम् कः । (कौ) वरुणश्च देवः मन्युः च । भियं दधाना भयं हृदयेषु दधाना शत्रवः अस्मद्विरोधिनः पराजितासः पराजिताः अप निलयन्तां अपनिलिना भवन्तु ॥

अयं गौः संसृष्टं अविभागमापन्नम् पयः स्रवति । कस्मात् संसृष्टं इति पदं युज्यते । गवां पयः एकस्मिन् समये रसवैलक्षण्यात्-अभावात् क्षाराम्लौ उभयविधं समाकृतं संमिश्रम् पयोधनं स्रवति । एतद्धनं अयं रसाभिमानी देवः वरुणं मन्युरग्निश्च दत्ताम् । 'वरुणायत्तम् हि अम्लत्वं' इति श्रुतिः 'मित्रावरुणयोः अतिशयितः सन्निधिः क्षारसंज्ञःस्यात् ।

The cow milk is Amphoteric उभयविधं क्षाराम्लस्वभावी In its reaction to litmus i. e. it behaves both as an acid and also as an alkali towards an indicator (N. N. Godbole & Sad Gopal Benaras H. University)

H=Hydrogen वरुण (उदान)
O=Oxygen मित्र (प्राण)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदस्य वैशिष्ट्यम्

(ले०—श्रीबापालालवैद्यः आचार्यः सूरत-आयुर्वेदमहाविद्यालस्य)

किं कारणमायुर्वेदं प्रत्यान्तरस्य मे पक्षपातस्येति चेत्—आयुर्वेदोऽयं भारतीयं प्राचीनं शास्त्रमिति कृत्वा वा, गीर्वाणवाण्यामुपनिबद्धोऽसाविति हेतोर्वा, वेदचतुष्टयस्याङ्गभूतोऽसावित्यस्मात्कारणादेव वा न मे पक्षपात आयुर्वेदं प्रति। किं तर्हि ?–

आयुर्वेदो नाम न केवलमौषधमात्रप्रतिपादकं चिकित्साशास्त्रम्, प्रत्युत मानवजीवनस्य सर्वतोभद्रस्योत्कर्षस्य कार्यकारणभावनिरूपकं जीवनशास्त्रम् (सायन्स आॅफ् लाइफ्) अदः, यदनुशीलनेन विश्वमपि जगदभिनवां दृष्टिमभिनवं च पन्थानमुपलभेत—इत्येतस्मादेव हेतोः परा मे प्रीतिरायुर्वेदं प्रति, एतस्मादेव च हेतोरर्चयाम्यायुर्वेदम्।

भारतीयसंस्कृतेः परिपोषकेषु तेषु तेषु शास्त्रेष्वन्यतमं किमपि पदमायुर्वेदस्य। न खलु यस्य कस्यापि देशस्य संस्कृतेः संस्कारसंपत्तेश्च संरक्षणार्थं स्थैर्यार्थं वा तत्तद्देशजा चिकित्सापद्धतिरल्पमुपकुरुते।

अस्मदीयानि शास्त्रान्तराणीव नायमायुर्वेदोऽपि लेखनकण्डूपरिजिहीर्षयैव निबद्धः; किंतु चिरन्तनस्य तपसः प्रभावेण महर्षिभिर्मानसेन चक्षुषा साक्षात्कृतं प्रज्ञया च परीक्षितं सत्यमेवाऽऽत्मनोंऽशभूतकलारूपत्वात्स्वयमेवाऽक्षरात्मना परिणतम्।

यथाऽह प्लेटो, प्रज्ञाया ('इन्ट्यूशन' इति ख्याताया) आविर्भावः सर्वेष्वपि कालेषु पद्यद्वारेणैवाऽजनि। समग्रमप्यायुर्वेदीयं वाङ्मयं पद्यात्मकमेव, यस्मादिदं प्रज्ञाया आविर्भावात्मकमार्षज्ञानमाप्तज्ञानमेव।

Gram : SAMBHAVIT

Phone : 22-7997
22-8179

RADHAKRISHNA BIMALKUMAR

Burmah-Shell Agents & Hire Purchase Financier

18, NETAJI SUBHAS ROAD,
CALCUTTA-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्ययनादिक्रमविषयेऽभिमतानि

सार्वभौमायुर्वेदस्याध्ययनादिक्रमस्य सार्वपथीनसर्वसङ्ग्राहकताविषये वृद्धमुनित्रय (आत्रेय-धन्वन्तरि-कश्यप) स्यैवैदंयुगीनस्य स्वर्यातस्य विद्वत्त्रयस्याभिमतान्यत्रोद्ध्रियन्ते क्रमशः—

(१)

आयुर्वेदमार्त्तण्ड-राजवैद्य-पण्डितलक्ष्मीरामस्वामि-महाभागस्याभिमतम्

नवोनपाश्चात्यविज्ञानाविष्कारसारस्य स्वीकरणं, स्वविज्ञानोन्नत्यै ज्ञानपूर्वकमुपयोगश्च । सर्वाणि प्राचीनार्य्यविज्ञानानि व्यपेतरसानीव स्तब्धानि । यत्र महर्षिभिस्त्यक्तानि तत्रैव पीठे वा गर्त्ते वा सीदन्ति न कालेन पुरः प्रचलन्ति । देशकालप्राणा न तेषु प्रविश्य तान्यनुप्राणयन्ति । केवलमायुर्वेदोऽस्मदीयो जीवति वर्धते च प्रभविष्णुर्वर्द्धिष्णुश्च । नात्र क्वापि विधिलेखा स्थापयतीयत्तामस्य वृद्धौ । भारते समायातानां विदेशीयानां विज्ञाने यत् सारभूतं तदस्माभिरात्मसादकारि, काले काले ग्रीकानामायातानां विज्ञानसारोऽस्माभिर्मन्ये ज्योतिषकैरिव सुविज्ञातः स्वभ्यस्तः स्वस्वशास्त्रकुक्षौ प्रवेशित आत्मीयतां नीतः । आर्वाणां हिकमत् सविवेकमस्माभिश्च लुकिता संस्कृता च मूलसिद्धान्तेष्वप्रतिविम्बितापि चिकित्साप्रयोगे सूपयुक्ता च । अद्यापि बहवः सुगृहीतनामधेया वैद्यास्तां चिकित्सारीतिं स्वीकृतां पालयन्ति । भारते फिरङ्गप्लेगादयो नवनवा बहवो रोगाः कालक्रमेण प्रविष्टास्तथास्मदीयचिकित्सायां नवोपायसृष्टिः स्वाभाविकी, तथैव च देशान्तरागतक्रमाणां स्वीकरणं जीवितविज्ञानलक्षणम् । जीवन्नेव जन्तुराहारादिविभिन्नं पदार्थजातं पाचनक्रियया रसनिर्म्माणेन वृद्धयै आत्मसात्करोति । एवं पाश्चात्यचिकित्सायां यो योंऽशः सर्वोपकारी विज्ञानानुमोदितः स स बलादस्माभिरात्मीयतामुपनेयः, परं केवलं परकीयप्रवाहे नासमर्थैरिवोह्यमानैः स्वपदं त्याज्यम् । प्रत्यक्षशारीरं, शल्यकर्म्म, नवयन्त्रयोजनं, रसायनविद्यया नवरससारादिनिर्म्माणमिति यद् यन्नवं गुणाय तत्तत् सर्वं निजीकर्त्तव्यम् । अन्यत्र स्थितस्य गुणावहस्य ज्ञातव्यस्य हस्तगतीकरणं बुद्धिलक्षणं, सत्तमावशेषार्थे जायमाने जीवनसंग्रामे विजयार्हताचिह्नं च । तद्विरोधश्च यत्रसमस्ततो न पदमग्रे चलिष्याम इति संक्षयलक्षणम् । तातस्य क्षारादेव कूपान्न पितरस्तर्पणीयाः । नवीनकृतीः परीक्ष्य बहूनां प्राचीनक्रियाणामसामयिकत्वमुद्वीक्ष्य ताः संस्करणीयाः । यो हा भूतमिति सोरस्ताडं व्याक्रन्दन्नेव तिष्ठति न तस्य कोऽप्यभ्युदयः सम्भवति । यश्च भूताद् वर्तमानं वर्त्तमानाद्भविष्यं स्वयं जनयति वितन्द्रश्च क्रामन्तं कालमनुयाति स जोवति जीवयति च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२)

महामहोपाध्याय-कविराज-श्रीगणनाथसेनसरस्वतीमहोदयस्याभिमतम्

दृश्यताञ्चेदम् तदुदाहरणम्—शताधिकानि निम्ब-गुडूची-पुनर्नवा-ब्राह्मीप्रभृतीनि मकरध्वजादीनि च प्रकामं गृहीतानि बलादेव पाश्चात्यैः। न च तानि तानि प्रयुञ्जाना भक्तिन्ते स्थापयन्ति वैद्यकशास्त्रे, तत् कथं पञ्चषाणि क्विनैन-कोकेनादि-महाप्रभावौषधानि न गृह्णीमो वयं "तदेव युक्तं भैषज्यं यदारोग्याय कल्पते"—इति प्राचीनमहर्षि-वचनमनुस्मरन्तः। न खलु इयत्तया सीमानिर्देशो व्यधायि पूर्वाचार्यैः, गृहीतानि च भावमिश्रादिभिराचार्यैः चोपचीनीप्रभृतीनि यावनौषधानि अनेकशः।

अत्र च प्रसङ्गे ग्रहणीयानां रोगविज्ञानोपायानामप्यालोचनं श्रेयसे नः। उक्तं हि सुश्रुते—"षड्विधो हि रोगाणां विज्ञानोपायः—पञ्चभिः श्रोत्रादिभिः प्रश्नेन च"—इति। तच्चाप्तोपदेशमनुस्मरन्तः "ष्टेथस्कोप"-(Stethoscope)नाम्ना युग्मनाडीयन्त्रेण उरोरोगेषु विभिन्नश्रुतीनां श्वास-शब्दानां श्रवणं कथं न कुर्याम। ज्वरसन्तापादि-निश्चयाय" त्वाचपरीक्षानुकल्पं तापमानयन्त्रं "थर्मोमिटर" संज्ञं (Thermometer) कथं न प्रयुञ्जीम विशेषप्रतिपत्त्यर्थम्। चाक्षुषीं परीक्षामुपयुञ्जानाः सति प्रयोजने कथं वा सूक्ष्मदर्शनार्थम् "अणुवीक्षण" (Microscope) यन्त्रं भग्नादि-विज्ञानार्थं X-Ray यन्त्रञ्च न व्यवहरेम। कथं वा नोपाददीमहि मूत्रपरीक्षणे तैलबिन्दुपरीक्षया सार्द्धं पाश्चात्यपरीक्षापद्धतिमपि पुष्कलफलाम्।

किञ्च, शल्यचिकित्सायां साक्षाद् अग्नितापेन वा जलीयवाष्पतापादिभिर्वा यन्त्रशस्त्र-पिचु-प्लोतादीनां संशोधनं (Asepsis and Antisepsis), सुरासारादिभिः (With Absolute Alcohal & ०) त्वचां निर्दोषीकरणञ्च साम्प्रतं सर्वथैव ग्रहणीयं वैद्यैः। "अग्नितप्तेन शस्त्रेण"—इति सत्यपि सुश्रुतीयशास्त्रशोधनोपदेशे तस्य नातिस्फुटविस्तरत्वात्। तत्सहकृतशस्त्रकर्मणां निर्बाधारोग्यप्रदता-दर्शनाच्च अविलम्बेनावलम्बनीयोऽयं विधिः। अमुं हि विधिं प्रवर्तयन् "लार्ड लिस्टन्" नामा पाश्चात्य-चिकित्सकप्रवरः पूयोद्भवशङ्कारहितानि शस्त्र-कर्माणि सर्वायत्तानि निराबाधानि चाकल्पयदिति चिरस्मरणीयाऽस्य कीर्तिः, पाश्चात्यचिकित्सकेषु। एष च विधिः सर्वथा पूयादिप्रदजीवाणूनामभावाय भवतीत्येष हि तावदस्य विशेषः।

अस्मिश्च प्रसंगे जीवाणुकारणवादमपि संक्षेपेण वर्णयिष्यामि भिषजामुपकाराय। यद्धि भोज्य-द्रव्यादीनां कालकृतं वैकृतं, दुग्धस्य दध्नि परिणमनं, शुक्तस्य सन्धानं, सुरासन्धानञ्च, तत्तदखिलं विभिन्नजातीयानां जीवाणूनां बीजतया तत्रस्थितानाम् आहितानां वा अभिवृद्ध्यैव। आघातादिनिमित्तेषु अन्येषु च व्रणेषु पूयोत्पत्तिरपि जीवाणुकारणकैव। कुष्ठविषमज्वरफिरङ्गरोगादीनोञ्चोत्पादकाः सन्ति पृथग्विधा जीवाणवः। ते च ते च पृथग्विधा जीवाणवः उपायविशेषैः शक्याः पृथक्कर्तुं मांसयूषादिषु वर्द्धयितुञ्च। परिज्ञेयाश्च ते अभिवृद्धिप्रकार-दर्शनात् सूक्ष्मस्वरूपदर्शनाच्च असहायेन "अणुवीक्षण" यन्त्रसहायेन च नेत्रेण। पुष्कलञ्च पश्यामो मूलं जीवाणुकारणवादस्य वैद्यकेऽपि। तत्प्रदर्शनञ्चास्माभिः सिद्धान्तनिदाने निदानव्याख्यानप्रसंगे यथाऽकारि—तदेव तथा "सिद्धान्तनिदान" ग्रन्थादुद्धृत्य स्थापयामो भवतां पुरतः।

"अथात्र केचिद्विप्रतिपद्येरन्—ननु कोऽयमश्रुतचरो जीवाणुकारणवादो नाम? न हि जीवाणवो रोगकारणानीति क्वापि ऋषिभिरनुमतं पश्यामः, उपलभ्यमानाश्च जीवाणवः कार्याण्येव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषदूष्यविकारजानि स्युर्न कारणानीति न वयं प्रतिपद्यामहे पाश्चात्यमतं जीवाणवः क्वापि रोगकारणमिति। तान् प्रतिब्रूमः। न खलु कल्पनामात्रमिदं केषाञ्चिद् यदेष जीवाणुकारणवादो नाम, प्रत्यक्षप्रमाणोपलब्धेस्तदन्वयव्यतिरेकानुविधायित्वाद्रोगाणामार्षसम्मतिदर्शनाच्च। तत्र प्रत्यक्षप्रमाणोपलब्धिर्यथा संक्रामकरोगेषु कुष्ठयक्ष्मादिषु प्रत्यक्षं दृश्यन्ते सूक्ष्मा जीवाणवः शोणितश्लेष्मादिगताश्चक्षुषाऽणुवीक्षणादियन्त्रसहायेन। पृथग्विधाश्चैते प्रतिसंक्रामकरोगम्। इदञ्चेदञ्च नः प्रत्यक्षं यत्तैस्तैर्जीवाणुभिः प्राण्यन्तरेषु परीक्षार्थे संक्रामितैरुत्पाद्यन्ते ते ते रोगाः। अत्र तदन्वयव्यतिरेकानुविधायित्वं च रोगाणां यथा—यत्र यत्र ते ते संक्रामिणो रोगास्तत्र तत्र ते ते जीवाणवः। यत्र यत्र न ते जीवाणवस्तत्र तत्र न ते रोगा इति। तथा च प्रतिपाद्यते कार्यकारणभावः। आर्षसम्मतिश्चात्रार्थे भूयसी दृश्यते—तथा हि कुष्ठाधिकारे सुश्रुतः—"सर्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि सक्रमीणि च भवन्त्युपग्रसंहतस्तु दोषग्रहणमभिभवात्" इति (सु० नि० ५ अ०)। न च वाच्यं—सहचारित्वमेवेह कृमीणामुपदिष्टं न कारणत्वमिति। यतश्चरकार्थमनुवदन् वाग्भटोऽप्याह—"रक्तवाहिशिरास्थाना रक्तजा जन्तवोऽणवः। अपादा वृत्तताम्रश्च सौक्ष्म्यात् केचिददर्शनाः। केशादा लोमविध्वंसा लोमद्वीपा उदुम्बराः। षट् ते कुष्ठैककर्माणः सहसौरसमातरः" इति। इह कुष्ठैककर्माण इत्युक्तेः स्पष्टमेव जीवाणूनां कारणत्वम्। एवं सुश्रुतोऽपि "रक्ताधिष्ठानजान् प्रायो विकारान् जनयन्ति ते" (सु० उ० ५४ अ०) इति रक्तजकृमीणां प्रायेण रक्ताधिष्ठानजरोगकारणत्वं प्रतिपेदे। दर्शयामास च तांस्तान् रोगान् कुष्ठ-विसर्प-पिडका-मशक-नीलिका-तिलकालक-न्यच्छ-व्यङ्गेन्द्रलुप्त-प्लीह-विद्रधिगुल्मवातशोणितादीन् (सु० सू० २४ अ०)। इदञ्च जीवाणुकारणवादस्य बीजं दर्शयतः सुश्रुताचार्यस्य संग्रहवचनम्—"प्रसङ्गाद् गात्रसंस्पर्शान्निःश्वासात्सह भोजनात्। सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्। कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्" इति (सु० नि० ५ अ०)। यत्र ज्वर इति न सर्वविधो ज्वरः, किन्तु ग्रन्थिकसन्निपातादिरेवेति व्याख्येयम्। शोषो राजयक्ष्मा। औपसर्गिकरोगा मसूरिकादयः। तदेवं सुश्रुतेन संक्रामकरोगाणां संक्रमणकारणसूत्रणाय सम्यग् दिग्दर्शिता। उक्तञ्च "केशादाद्यास्त्वदृश्यास्ते" (सु० उत्तर० ५४ अ०) इति तांश्चाधुना पृथग्विधान् जीवाणूनणुवीक्षणयन्त्रादिसहायेन चक्षुषा पश्यामोऽपि। तस्मादार्षमताऽविरुद्ध एवायं जीवाणुकारणवादः पाश्चात्यैः सम्यग् विस्तारितः परीक्षया ग्रहणीय एव। आहुश्च—"कृत्स्नो हि लोको बुद्धिमतामाचार्य" इत्युपक्रम्य "तस्मादमित्रस्यापि धन्यं यशस्यमायुष्यं लौकिकं वचः श्रोतव्यमनुविधातव्यञ्चेति" (च० वि० ८ अ०)। ननु तर्हि परमर्षिभिरेव सर्वज्ञैः कथं न सम्यङ्गृहीत इति चेत्? उच्यते, सत्स्वपि व्याधिबीजभूतेषु जीवाणुषु तदुपयोगिक्षेत्रमपेक्षितं, तच्च अब्रह्मचर्यादिक्षामं शरीरमेव। न हि सम्यग् यमनियमादिवतामप्रतिहतशक्तीनां किञ्चित्करा रोगजीवाणवः। अस्माकन्तु तादृशयमनियमाद्यशक्तानां शरीरेषु प्रकामप्रसरो जीवाणुप्रभाव इत्यस्ति जीवाणूतत्त्वपरिज्ञानस्य सार्थकता। प्रयोजनं चास्य जीवाणुकारणवादस्य जीवाणूनां संक्रमणप्रतिषेधो निदानपरिवर्जनं चिकित्साविशेषश्चेत्युपरिष्टाद् दर्शयिष्यामो यथास्थानम्।" —इति।

अथ यन्त्रशस्त्राणि प्रायः कार्त्स्न्येन आयुर्वेदादेव गृहीतानि पुरा पाश्चात्यैरिति अदर्शयाम मथुरायां वैद्यसम्मेलने आपरितोषं भवताम्। तदुत्तमर्णा वयं तानि चेदिदानीं सकुसीदं गृह्णीम, न खलु वचनीया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयं विज्ञैः। एवञ्च सर्वाण्येव पाश्चात्ययन्त्रशस्त्राणि यथावद्ग्रहणीयान्येव वैद्यैरिति साहसपुरःसरं प्रतिजानीमः।

एभिश्चोपायैः संवर्द्धितचिकित्सासाधनाः प्राच्यवैद्याः सर्वथैव प्रतिष्ठापयेयुरायुर्वेदस्य विजयवैजयन्तीमिति कस्तावदत्र दूरदर्शी सन्दिहीत।

न चास्माभी रोगविज्ञानेऽपि प्रमदितव्यम्। कालवशेन परिवर्तिता हि नभोमण्डले ग्रहनक्षत्रादीनामपि कक्षाः, किमत्र चित्रं यदिदानीं रूपान्तरिताः केचिद्रोगाः विलुप्ताश्चापरे, प्रादुर्भूताश्च केचन नवीना एव, तस्माच्चेदमुक्तमस्माभिः सिद्धान्तनिदाने प्राचीनवचनमुखेन—

"व्याधयोऽपरिसंख्येया भिद्यमाना भवन्ति हि।
रुजावर्णसमुत्थान-स्थान-संस्थाननामभिः॥"

इत्युपक्रम्य—

"दोषदूष्यगणेऽभिन्ने संमूर्च्छनविशेषतः।
अदृष्ट-देश-कालादि-परिणामादनेकधा॥
पुराणाः प्रविलीयन्ते नवीनाः प्रादुरासते।
विभिद्यन्ते स्थिताश्चाथ नृणां नानाविधा गदाः॥"
इति।

अस्य चार्थः। दोषा वातपित्तकफाः। दूष्याणि रसरक्तादीनि तेषां गणः समूहः, तस्मिन्नभिन्ने सर्वदा स्वरूपतस्तथाविध एव वर्तमानेऽपि। अदृष्टदेशकालादिपरिणामाद्धेतोः;—अदृष्टस्य शुभाशुभकर्मफलरूपस्य, देशानां कालस्य चानेकधा परिणामात् नानाविधविपर्ययात्। कालादीत्यादिपदेन नानाविधमिथ्याहारविहाराणां ग्रहणम्. तथा हि पूर्वं यादृशा मिथ्याहारविहारा लोकैः क्वचित् कदाचिदुपयुज्यन्ते स्म, तानेवेदानीं नियमेनोपयुञ्जते बहवस्ततोऽपि नवनवरोगविशेषसमुद्भव इति भावः। संमूर्च्छनविशेषतः—तथाविधविपर्ययजनित-दोषदूष्यसंघटनप्रकारभेदात्। पुराणाः प्रसिद्धाः प्राचां ग्रन्थोक्ताः प्रविलीयन्ते विलुप्ता भवन्ति, गदा रोगा इत्यन्वयः। नवीना अभिनवाश्च रोगाः प्रादुरासते प्रादुर्भवन्ति। विभिद्यन्ते स्थिताश्चेति—त एव रोगा भिन्नरूपाः सन्तो रोगान्तरवत् प्रतीयन्ते। तत्र पुराणरोगाणां विलोपो यथा शूकदोषकेशसीमंतकज्ज्वरादीनाम्, तथा हि सुश्रुतः "व्याधयस्तत्र जायन्ते दश चाष्टौ च शूकजा" इत्यादि, "असाध्यो बलवान् यस्तु केशसीमन्तकज्ज्वरः" इति च स्थितानां भिन्नरूपत्वं, यथा माधवीयनिदानोद्धृतचरकोक्त-समत्रिदोष-सन्निपातादेः। नहीदानीं प्रायः सन्निपातज्वरे—"कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनं" भवति। नवानां प्रादुर्भावः, यथा फिरङ्गरोग-ग्रन्थिकादीनाम्, अत्र चार्थे प्राचां सम्मतिर्यथा—चरके तत्रैव "विकारनामाकुशलो जिह्रीयान्न कदाचन। न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थिति" रिति। अस्य ह्ययमभिसन्धिः। अनन्ताः खलु रोगा अध्रुवस्थितयश्च, अमी च समुत्पन्नाः समुत्पद्यमानाश्च न तावत्सर्वे शक्या निर्देष्टुमियत्तया नामतः। ये पुनरिदानीं प्रसिद्धास्तेऽस्माभिर्निर्दिश्यन्ते नामलक्षणादिभिः; कालान्तरागामिनस्तु लक्षणादिपरिलक्षणेन सम्यग् वेदितव्याः। न चेदं लज्जास्पदं यदस्मदीयसंहितायामपि केषाञ्चिद्रोगाणां न लभ्येरन् लक्षणादीनीति। निरवधिर्हि कालो विपरिणामी, नियतपरिवृत्तिशीलञ्च जगत्, कथं न्वत्र नियमो ध्रुवसंस्थानलक्षणास्तथाविधा एव सदा वर्तेरन् रोगा इति। अन्यच्चाह सुश्रुतोऽपि—"अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्" इति (सू० सू० ३५ अ०)। अस्य ह्ययमभिप्रायः। बहवः खल्वस्माभिरभिहिता रोगाः, सन्ति चेतरे समुत्पत्स्यमाना ये नेह शक्या विवरीतुम्। उपक्रमस्तु तेषां लक्षणदर्शनाद्दोषसंयोगविशेषानुमानतो दर्शितदिशा तत्तद्दोषप्रशमनाद्युपायविधानेन विधेय इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्वेवमास्तां नवीनरोगसंघो नाम । तथापि यदि सौश्रुतेङ्गितानुसारेण तत्तद्रोगारम्भकदोषानुमानपुरःसर-दोषप्रशमनभेषजादिप्रदानेनैव तत्तद्रोगनिर्वृत्तिः, अलं तर्हि नवीनरोगलक्षणपरिज्ञानप्रयासेनेति चेत्, उच्यते । त्रिविधो हि रोगाणामुपक्रमो भवति—हेतुप्रत्यनीको व्याधिप्रत्यनीक उभयप्रत्यनीकश्चेति । तत्र स्वल्पबलदोषारब्धो हेतुप्रत्यनीकोपक्रमेण, मध्यबलदोषारब्धो व्याधिप्रत्यनीकोपक्रमेण । महाबलदोषारब्धस्तूभयप्रत्यनीकोपक्रमेण, प्रशाम्यति रोगः—इति तत्त्वविदां सिद्धान्तः । वक्ष्यमाणनवीनरोगास्तु प्रायशो मध्यबलदोषारब्धा वा दुरुपक्रमाश्चेति व्याधिप्रत्यनीको हेतुव्याधिप्रत्यनीको वेषां भवितुमर्हत्युपक्रमः । तादृशोपक्रमश्च व्याधिविशेषनिश्चायकात्तच्चिकित्सा--विशेषोपदेशकाच्चागमादृते न शक्यः कुर्तुम् । सौश्रुतोपदेशस्तु स्वल्पबलनवीनरोगेष्वेव चरितार्थो नाधिकबलनवीनरोगेष्वित्यमोघ एवायमभिनवरोगलक्षणपरिज्ञानप्रयासः । किञ्च, अनभ्यस्तनवीनरोगलक्षणविशेषो भिषङ् नवीनरोगेषु परिज्ञातरोगलक्षणसादृश्याऽसादृश्यदर्शनात् संशयानो नैव वा शक्नुयाद् रुजः प्रतिकर्तुम्, हन्याद्वातुरमसमञ्जसोपक्रमणेन । न चायमलं पूर्वत एव प्रतिविधातुं वक्ष्यमाणश्वसनकसन्निपातस्य पञ्चमे, सप्तमे वा दिवसे भविष्यन्तीमकस्माज्ज्वरनिर्मुक्तिं प्रायः प्राणान्तकरीम्, आन्त्रिकाख्ये वा सन्निपाते द्वितीये तृतीये वा सप्ताहे जनिष्यमाणं रक्तस्रावञ्च, तस्मादितोऽपि पुष्कलफलो नवीनरोगलक्षणाभ्यासप्रयासः । अत एवाहुः—तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च । समुत्थानविशेषांश्च बुद्ध्वा कर्म समाचरेत् ॥" इति ।

(च०, सूत्र० १८. अ०) ।

कार्यमधीतायुर्वेदानां भिषजां दुर्दैववशान्नवीनायितेषु, शारीरादिविषयेषु, केषुचिदाहृतनूतनविज्ञानेषु च उपदेशनम् । सन्ति च हन्त ! केचन वैद्या ये उपदिश्यमानाः प्रकुप्येयुः, सर्वज्ञाभिमानेन स्तब्धाश्च उद्विजेरन् नवीनविषयकथामात्रेण । न खलु शक्यं तादृशानुपदेष्टुम् । दिष्ट्या सन्ति चापरे ये शास्त्रज्ञा अपि स्वकीयां न्यूनतां सम्यगवबुध्य स्वगुणसम्पदि प्रयतन्ते । तादृशानां कृते सत्वरं स्थापनीयाः पृथग्विद्यालयाः कुशलैः । सन्तु वा महाविद्यालये एव तादृशाः शिक्षकशिक्षणालयाः येषु वर्षेण वर्षद्वयेन वा नैपुण्यविशेषं कर्माभ्यासञ्चार्जयित्वा विशेषज्ञोपाधिविशेषेण समलङ्क्रियेरन् भिषजः । ईदृशेषु च शिक्षणालयेषु उपदेश्यानि—शारीरपरिचयः, शारीरक्रियाविज्ञानम्, वैकृतशारीरविज्ञानम्, रोगविज्ञानोपायाः, पञ्चकर्मविधयः, शल्यतन्त्रम्, जीवाणुविद्या, नवीनचिकित्साविधयः, व्यवहारायुर्वेदपाश्चात्यागदतन्त्रादयश्च केचन कालोचिता विषयाः । एवं सुशिक्षिताश्च वैद्याः सर्वथा राजपुरुषाणामपि श्रद्धां लभेरन् व्यवहारादिषु इति शक्यं सम्भावयितुम् । एवंविधैश्च शक्यं महाविद्यालये आयुर्वेदपाठशालासु च सम्यक् शिष्यानपि शिक्षयितुम् ।

It has been suggested to me by many Ayurvedic physicians that a number of Western drugs should be incorporated in the Materia Medica of Ayurveda. This appears to be a delicate subject to handle but I see no reason why the question should not be discussed in the Conference. All other countries of the world are drawing upon onr medicinal resources to enrich their medicinal treasuries. Why should we, remembering the great maxim of Charaka (तदेव युक्तं भैषज्यम् & c) as our guide object to use

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Quinine, Morphine, Bromides, Antimony etc., when the necessity becomes urgent ? Many pros and cons may be advanced on this subject but I venture to think that the time has come when this question should not be shelved any more. It is well-known at least amongst ourselves that some Ayurvedic physicians, even of the most orthodox type, use a few Western medicines under, garb of Ayurvedic names. I disapprove this action as such physicians have not made a full and regular study of the action of these drugs. Let us learn before we prescribe and be honest and frank and have the courage to openly advice our patients to take a few doses of Quinine where quinine is necessary or an injection of Morphine and Atropin when the patient's pain must be immediately relieved.

I touch this subject at some risk to my reputation amongst the lay people in the hope that the Vaidyas will calmly think over this necessity and do the needful with the sanction of the All India Ayurvedic Conference and with full knowledge of the action of such drugs. Many Yunani drugs have been taken into our Pharmacopea by Bhavamisra and other authors during the last three or four centuries. Why should we not follow their example ?

Better selection in purchase

is

the need of the day.

For

Durability & Quality

in

Hessian & Bags

ALWAYS RELY ON

PREMCHAND PRODUCTS

Manufacturers.

KANORIA COMPANY LIMITED

9-Brabourne Road

CALCUTTA.

Phone : 22-9121/26 (6 lines.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीस्वामिलक्ष्मीरामोद्याने
आचार्य श्रीयादवत्रिकममहाभागादिभिः सार्धमुपविष्टः
श्रीजयरामदासस्वामिमहाराजः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

अ० भा० हिन्दीसाहित्यसम्मेलनस्य जयपुरीयाधिवेशने कार्यवाहकाध्यक्षरूपेण



मध्ये वेत्रासनासीनाः श्रीस्वामिमहाभागाः

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

आयुर्वेदमार्त्तण्डायुर्वेदोद्धारक-वैद्यश्रीयादवजीत्रिकमजी-आचार्य-महाशयस्याभिमतम्

संप्रत्यायुर्वेदविद्यालयेषु प्रायः कायचिकित्सा-
प्रधानमेव भवत्यध्यापनम्। शल्यशालाक्यप्रसूति-
तन्त्रादीन्यायुर्वेदाङ्गानि प्रायो नैवाध्याप्यन्ते।
शल्यादीनामन्येषामप्यायुर्वेदाङ्गानां ज्ञानमावश्यक-
मेव संप्रति वैद्यानाम्। शस्त्रचिकित्सायामज्ञतया
शस्त्रचिकित्सासाध्यरोगवतां चिकित्सार्थमागतानां
रोगिणामारोग्यविधानमस्माभिरशक्यमिति भवन्ति
प्रेषणीयास्ते शस्त्रचिकित्सानिपुणानां दक्षतराणां
निकटे। एकैकवैद्यसमावेशार्हेषु सार्वजनिकधर्मार्थौ-
षधालयेषु जनतेच्छायाः सत्त्वेऽपि वैद्यानां निर्वाचनं
न भवति, तत्रापि कारणमस्माकं शस्त्रचिकित्सा-
दीनां ज्ञानाभाव एव। अत आयुर्वेदविद्यालयेषु
सर्वेषामप्यायुर्वेदाङ्गानामुपदेश आवश्यक एव।
एतच्च कार्यमायुर्वेदविद्यालयसंचालकानामित्येतद्विषये
तैरवश्यमेव देया दृष्टिः। संप्रति वैद्येष्वेवंभूता
विरला एव वैद्या ये योग्यता (कर्माभ्यास) पूर्वक-
मध्यापयेयुः शल्यशालाक्यादीन्यप्यङ्गानि। तथाऽपि
क्रियमाणे यत्ने स्वल्पेनैव समयेन भवेदेतादृशा-
नामपि वैद्यानां समुपलब्धिस्तावत् सर्वत्रैवंविधैव
भवति व्यवस्था। आरम्भे तु कर्माभ्यासपूर्वके
शल्यतन्त्रादीनामध्यापने शस्त्रचिकित्सानिपुणानां
डॉक्टराणां सहायता भवेदपेक्षिता। कुत्रापि
चिकित्सापद्धतौ व्याधिभेदेन शस्त्रप्रयोगभेदो
नास्त्येव, परन्तु तत्रोपयुज्यमानानां द्रव्याणामस्ति
भेदः। आयुर्वेदविद्यालयेषु शस्त्रचिकित्साध्यापकानां
डॉक्टरमहोदयानां सविधे इयमस्ति मेऽभ्यर्थना—
यत्ते निर्भयाः सन्तः शस्त्रचिकित्सायामायुर्वेदक्रम-
सिद्धानामग्निपक्वानां घृततैलकषायप्रभृतीनामेव
व्यवहारं कुर्वन्तु। सिद्धास्तैलकषायादयोऽग्नि-
पक्वत्वात् पूयोत्पादकक्रिमिरहिता भवन्ति। निर्माणे
चैषां प्रयुज्यमानानि द्रव्याण्यपि भवन्ति कीटाणु-
नाशकानि शोधनरोपणादिगुणसम्पन्नानि च।
शस्त्रचिकित्सायामग्निसंतप्तानामेव द्रव्याणामुपयोग-
विधानमस्ति प्रतिपादितमार्याणां वैद्यकशास्त्रे।
'शुचिसूक्ष्मदृढाः पट्टाः कवल्यः सविकेशिकाः।
धूपिता मृदवः श्लक्ष्णा निर्वलीका व्रणे हिताः'
इति। (वाग्भट, सूत्रस्थान, अध्याय २९, श्लोक
२९)। (अत्र 'धूपिताः' इति 'धूप संतापे' इत्यस्य
रूपम्)। "सुश्रुतेऽपि" "अग्नितप्तेन शस्त्रेण
छिन्द्यात्" (चि० स्था० अ० २ श्लो० ४६) इति
प्रतिपादितम्। 'अतप्तच्छेदने पाकभयं स्यात्' इति
तट्टीकायां डल्हणः। रसरत्नसमुच्चये सूचिकाभरण-
प्रयोगे च 'सूच्याऽतिसूक्ष्मया तोयस्विन्नयाऽति-
प्रयत्नतः' इत्यस्ति लिखितम्। 'शस्त्रचिकित्सायामपे-
क्षितानि यावन्ति द्रव्याण्यग्निसंतप्तान्येवोपयोक्त-
व्यानि, अन्यथा व्रणे पाकः संभवति' इति लॉर्ड-
लिस्टरमहोदयस्य नव्यमाविष्कारं मन्यन्ते प्रतीच्य-
वैद्याः। परमाविष्कारोऽयमार्याणां सहस्रशो
वत्सरेभ्यः प्रागपि संज्ञात आसीदिति दत्तैः प्रमाणैः
स्पष्टमेव प्रतीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गत-श्रीयुतवैद्यरत्न-कैप्टेन जी. श्रीनिवासमूर्ति बी. ए., बी. एल., एम. बी. एण्ड सी. एम्., मद्रास, इत्यस्य महाविदुषोऽभिमतम्

Our immediate need is to train as rapidly as possible, a large number of qualified practitioners of Ayurveda (Wrongly Called Indian Medicine) trained to be efficient in dealing with both Medical and Surgical cases. This means more and well equipped colleges with efficient professors; more and well equipped Hospitals with efficient Physicians & Surgeons, Libraries, Herbgardens and the like.

Then, again, we have other "lovers of Ayurveda" who are deeply distressed because present day Ayurveda of the recent past when it confined itself to medical practice but has now become "defiled" by the touch of Surgery. How delighted they would be to preserve for us for ever the "Pure" Sanskrit Pandit qualified to be appointed as Sanskrit teacher; and to save us from the "hybrid" type.

If a follower of the allopathic school adopts or improves upon certain teachings of Ayurveda (called Indian Medicine) in regard to the treatment of Dysentry or Leprosy, that ofcourse is proof of Scientific open mindedness which is willing to learn from whatever Sourse useful knowledge may come. If, however, an Ayurvedist does likewise in respect of certain teachings of western Surgery, that is prove not of Scientific openmindedness, but of the habit of invading into or poaching up on the preserves of another.

Ayurveda (named as System of Indian Medicine) founded on the solid bed-rock of Tridosh-teaching and practice, would at the same time, incorporate into it, structure what ever has been found useful in other system, the arguments have to be reconsidered in the light of the poet's saying :—

'न हि कस्तूरिकामोदः शपथेन निवार्य्यते'॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धायुर्वेद आयुर्वेदस्यापसंज्ञानम्

SHUDDHA AYURVEDA—A MISNOMER FOR AYURVEDA

(ले०—आचार्यः श्रीसुदेवचन्द्रः पाराशरी जयपुर—राजकीयायुर्वेद—महाविद्यालय-
प्राध्यापकः, आयुर्वेदाङ्क—प्रधानसम्पादकश्च)

शुद्ध आयुर्वेद आयुर्वेदस्यापसंज्ञानमस्ति । यत इदं परम्पराप्राप्तेषु प्रतिसंस्कृतविच्छिन्नप्रायेषु द्वादशग्रन्थेषूपलब्धस्य जडीभूतस्यापूर्णस्य चायुर्वेदस्य कृते प्रतिनियतं प्रयुज्यते । केषाञ्चिदस्मन्मित्राणां अन्यरूढिवाद—जड़ताभ्याम्प्रसूतमिदमायुर्वेदविरोधि-विज्ञानबाह्यममानवीयञ्चाभियानं नितरां नः प्रगतिरोधाय कल्पते । तैर्वयमदो विश्वसितुं विधीयामहे—पुराणायुर्वेददायात्मके स्वल्पग्रन्थकुले यत्किमपि विद्यते, तदेव पूर्णसुशिक्षितायुर्वेदीय-चिकित्सकनिर्माणाय पर्य्याप्तम्; यतो हि नः पूर्वे पुराणर्षयः ज्ञानस्य चरमां पूर्णतामधिरोहन्ति स्म, तेषां ज्ञाने किमपि संवर्धनं संशोधनं वा नापि वाञ्छनीयं; न चायुर्वेदस्य गुर्वीं स्वरूपहानिमकृत्वा सम्भाव्यत एव । एतत्खलु महद्दयनीयं खेदास्पदं च वृत्तं, यत्केचिद् विज्ञाः शास्त्रानभिज्ञा जना राजनीतिनेतारो नीतिनिर्धारकाश्च, (यथा-मन्त्रि-प्रभृतयः) अनेन सिद्धान्तेन परिभूतधियः "शुद्ध आयुर्वेद"—घोषे विश्वासं प्रकटयन्ति ।

आयुर्वेदस्यार्थः 'आयुर्वेदो नाम सुखहितदीर्घञ्जीवितीयस्य रोगप्रतिबन्धप्रतीकारीयस्य च महद् विज्ञानं, कला, शिल्पञ्च; यः खलु विश्वमानवतायाः शाश्वत आदर्शो बोभवीति । "आयुषो वेदः" इत्यस्मिन्नर्थे शाश्वतो निरन्तरविकासशील ईदृगखिलज्ञानसंग्राहकश्च; नात्र देश-कालयोरियत्ता, सर्वकालेषु सर्वस्या मानवप्रजाया हितहेतोरस्योपदेशः । ईदृशं विज्ञानं (आविरभूत, आविर्भवति, आविर्भवन्नस्ति, आविर्भविष्यति) आवि-

Shuddha Ayurveda is a misnomer for Ayurveda, because it implies unsupplemented and stagnated Ayurveda found in half a dozen mouldy books alone which have been handed down to us in disintegrated and thrice-redacted form. It is an anti-Ayurvedic unscientific and unhuman approach impeding our progress greatly by blind conservatism and inertia in some of our socalled orthodox colleagues. Shudha Ayurveda would make us believe that what is found in the relics of Ayurveda is sufficient to make a fully qualified Ayurvedic Physician, that the old Rishis of ancient times had already attained perfection of knowledge and no addition or improvements are desirable or possible without seriously affecting the integrity of Ayurveda. It is a matter of great pity and regret that even some learned laymen (Political leaders and policy makers as ministers etc.) have been misled by this theory and have believed in the shibboleth of "Pure Ayurveda".

Ayurveda means the great science, art and technique of Living and Healing which have ever been the ideal of the world humanity. In this sense (Science of life), It is eternal-ever growing and allpervading of such knowledge irrespective of time and space, meant for all mankind in all ages. Such knowledge (had been, have been and would be) may be discovered anywhere at any age by any body

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्भवितु शक्यते क्वापि, कस्मिन्नपि काले, केनापि च विश्वस्य कस्मिश्चिदपि भागे। "शाश्वतोऽयमायुर्वेदो निर्दिश्यते, स्वभावसंसिद्धलक्षणत्वाद भावस्वभावनित्यत्वाच्च"। "कृत्स्नो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम्"।

सुविदितमेवैतद् यत्–पूर्वस्मात्पूर्वस्मिन्काले चरकंसुश्रुतादिभ्यः प्रागनेके आयुर्वेदीयग्रन्था विविधविषयवर्णनपरा लिखिताः पठन-पाठने प्रचलिताश्चासन्, कालक्रमेण ते विलोपमुपगताः। येषां विचारार्हभागाः – केचिन्मौलिका अप्यंशाः सर्वथा नष्टा न पुनरुपलब्धुं शक्याः। अन्यत्र च पुनः तथोक्तार्षसंहितासु वाग्भट-भावमिश्र-रसाचार्यादिभिश्च सम्प्राप्तौ, द्रव्यगुणविज्ञाने आमयिकभेषजप्रयोगे च बहुतरं नवीनं समायोजितम्। फिरंगरोग-द्वीपान्तरवचा-पारसीकयमानी-मल्ल-रसगन्धादिधातुयोग-मोफरवाप्रभृतयः सुप्रसिद्धानि जाज्वल्यमानान्युदाहरणानि वर्त्तन्ते उत्तरकाले कृतस्य त्रुटिपूर्तिकार्यस्य।

शुद्धायुर्वेदस्यार्थः कः ? अकृतत्रुटिपूरणः यथा स्यात्तथा त्रुटितो रूढः सङ्कीर्णश्चायुर्वेदनामधरो वस्तुतस्त्वायुर्वेदाभास एव। यदि वयं धीरतया साम्प्रतिकविकसितविज्ञानेभ्यः रसायनभौतिकी-रचनाशरीर–क्रियाशरीर–चिकित्सा-शल्य-नेत्रदन्तादिशालाक्यप्रभृतिभ्य आहृतसत्यस्यात्मीकरणं कर्तुं न प्रभवामस्तन्नियतं शोचनीयतया गर्हणीयतया च वैज्ञानिकप्रगतिधावने पश्चात्पदा एव स्थास्यामः, बहिष्कृताश्च भवितुं शक्नुमः। कृतेष्वपि नूनमस्माकं सूत्तमप्रयत्नेषु पुरातत्त्वसंग्रहालय एव नः स्थितिर्भविष्यति !

in any part of the world "शाश्वतोऽयमायुर्वेदो निर्दिश्यते, स्वभावसंसिद्धलक्षणत्वाद् भावस्वभावनित्यत्वाच्च।"–चरकः। The entire world acts as a teacher to a wise and as an enemy to unwise in the words of Charaka. "कृत्स्नो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम्"।

It is wellknown that in the remote past even before existence of Charaka, Sushruta etc. Many treatise of Ayurveda on different subjects had been writeen, read and wiped out and of which considerable portions-even some elementary portions have been lost irrecoverably, on the otherhand many things in pathology, mataria medica and therapelltics have been added to the matter in corporated in the socalled Arsha samhitas by Vagbhatta, Bhava Misra and Rasacharyas. फिरंगरोग, द्वीपान्तरवचा, पारसीकयमानी, मल्ल, रसगन्धादिधातुयोग, मोफरवा etc. which are the wellknown bright examples of the supplementation in later ages.

शुद्ध आयुर्वेद (meaning unsupplemented) therefore means Ayurveda dificient and mutilated. Unless we boldly assimilate the truths from the modern developments of Chemistry, Physics, Anatomy, Physiology, Pathology, medicine, Surgery, opthalmology, Dentistry etc. Ayurveda in real, will lag sadly and badly behind in the race of Scientific progress and may be wiped out or relegated to the archeological museum, all our best efforts notwithstanding.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदा सर्वदायै वयमस्मदीयमनांसि विचारमुं चिन्तयितुं निदिध्यासयाम यद्-ऋषयः सर्वज्ञा आसन्। शास्त्रानुसारं सर्वज्ञता केवलमेकस्मिन्नेव पुंसे (समेषां मतानामीश्वरे) सम्भाव्यते। अत्र विषये सर्वाणि एवार्यदर्शनान्येकमतानि। योगदर्शनं स्पष्टं भणति ईश्वरविषये—"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, तत्र निरतिशयं सर्वज्ञताबीजम्" । अतश्चरमनिष्कर्षस्त्वयम्—ऋषिभिर्महन्ति सत्यानि विज्ञातान्याविष्कृतानि च परन्तु, ते नाभूवन् सर्वज्ञाः।

आप्तोपदेशस्य विश्वसनीयतायाः प्रामाणिकताया वा विषये परमर्षीणां पुण्या सम्मतिश्चरके सूक्तावर्त्तते; तथा हि—

"आप्तागमस्तावद् वेदः; यः कश्चिदपि वेदार्थादविपरीतः परीक्षकैः प्रणीतः शिष्टानुमतो लोकानुग्रहप्रवृत्तः शास्त्रवादः, स चाप्तागमः (च० सू० अ० ११)"। वस्तुतस्तत्रैव चरके आप्तलक्षणमित्थमभ्यधायि परमाचार्य्येण—

"रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुद्धास्ते तेषां ज्ञानमसंशयम्।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः"॥

वाक्यमिदं ऋषिभिराविष्कृतानां सत्यानां निरपवादत्वमसंशयं वक्ति परं न तेषां सर्वज्ञत्वं प्रतिपादयति। वाक्यस्यास्य यथार्थमर्थं हार्दञ्च चरमे पादे सुस्पष्टीकृतमस्ति; तदेवम्—ऋषयोऽसत्यं न वक्ष्यन्ति, नीरजस्तमस्त्वात्। नीरजस्तमास्ते कस्मादसत्यं वक्ष्यन्ति ? तेषामसत्यभाषणस्य न

Once for all, let us rid our minds of the idea that Rishis were omnicient (सर्वज्ञाः) omnicience, according to scripture (शास्त्राणि) is possible only in one (the God of all creeds) Arya Philosophy is unequivocal on this point. The Yoga Darshana says clearly, speaking of Ishwara "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, तत्र निरतिशयं सर्वज्ञताबीजम्" It is only in him that absolute omnicience is possible. The final essence, therefore, must be that the rishis came to know and expounded many great truths, their knowledge and devotion were of the highest order, but they were not omnicient.

There the holy advice of the Rishis about trustworethy or inspired authority (आप्तोपदेश) has been very nicely expressed in the following passage of Charaka-"आप्तागमस्तावद् वेदो यश्चान्योऽपि कश्चिद् वेदार्थादविपरीतः परीक्षकैः प्रणीतः शिष्टानुमतो लोकानुग्रहप्रवृत्तः शास्त्रवादः—स चाप्तागमः (च. सू. अ ११)" । Ofcourse, in the same place in charaka about the Aptas has been cited.

"रजस्तमोभ्यां निर्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रिकालममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुद्धास्ते तेषां ज्ञानमसंशयम्।
सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरजस्तमाः॥

This passage supports well the infall iability of the truths advanced by the Rishis, but does not establish their omnicience. The real object of the passage is clear in the last stenza whieh states that the Rishis could speak no untruth as being free from Rajas and Tamas, they would have no possible motive for telling a lie. In

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजनावकाश इत्याशयः। वस्तुतः, एतादृशा नीरजस्तमा ऋषयो यथार्था विज्ञानिका एव समेषां युगानां; विश्वस्य कस्मिंन्नपि कोणे स्थितास्ते स्वार्थप्रयोजनं विहाय सत्यमाविष्कुर्वन्ति, प्रजाहितहेतोरेवेति तत्त्वम्।

चरकसंहितायाः सूत्रस्थानस्य प्रथमाध्यायेऽस्माभिः पठ्यते-यदृषयो यदा स्वकीयज्ञाने अपर्याप्तिमनुपश्यन्ति स्म तदा हिमवत्पार्श्वे समवेताः पुण्यायुर्वेदकथागोष्ठीश्चक्रुर्लोकहितकाम्यया। तैश्च महर्षिर्भारद्वाज इन्द्रादायुर्वेदाध्ययनार्थं विनियुक्तः। इन्द्रः खलु भारतादतिरिक्ते देशे वसति स्म, तस्याधीशश्चासीत्, सम्भाव्यते खल्वन्यस्मिन्ग्रहे स्वर्गे-इन्द्रलोकापरपर्य्याये वा तिष्ठति स्म। चरकचिकित्सास्थाने त्वेतदपि श्रूयते-यदनारोग्यत्वात्कदाचिदृषयो भारतीयसमतलप्रदेशवासिरुग्णजनार्त्तिहरणाय कारुण्यपरा अपि न समर्था बभूवुरथ च ते पुनरिन्द्रसन्निधौ जग्मुः स्वकीयारोग्यलाभायेति।

वयमेतदपि तत्र चरके पठामो यदृषयो विभिन्नशारीरचिकित्सादिविषयेषु सम्भाषां कुर्वाणा आसन्। तत्र च ते बहुधा वादान्सप्रतिवादान् हि वदन्तो निश्चितानिव परस्परं प्रतिवदन्तो विसम्वादिदृष्टिकोणमुद्गिरन्ति स्म। तेषां विसंवादपरिहारश्च परमर्षिणात्रेयेण क्रियते स्म। एतानि तथ्यजातानि पर्य्याप्तितोऽप्यधिकं साधयितुमलं, यदृषयः स्वात्मानं न कदापि सर्वज्ञत्वेन मन्यन्ते स्म, सदैव हि ते तर्कानुसारिविचारसंशोधनाय सन्नद्धाः पर्यभूवन्।

अग्रेऽस्ति विचारणीयमदोऽपि सत्यश्रुतम्-यत्—चरकसुश्रुतौ साम्प्रतमुपलभ्यमानौ नाग्निवेशसुश्रुतयोः कृती। अपुराणो विश्वसनीयश्च चरकटीकाकृच्चक्रपाणिः, शिवदाससेनश्चैवं-

fact, such नीरजस्तमाः Rishis are the real scientists of all the ages in any corner of the world who stand for discovering the truth without any selfish motive for the good of humanity (जीवदया)।

We read in चरकसंहिता सूत्र० अ० १ that the Rishis held a great conference on the peaks of the Himalaya where finding their own knowledge inadequate for the relief of suffering Humanity they deputed the great sage भारद्वाज to learn Ayurveda from इन्द्र who had been a Head and living in a country other than India perhaps in another plannet called इन्द्रलोक or स्वर्ग। It is also stated in चरक चिकित्सास्थान that the health of the Rishis had broken down in their kindly endeavour to carry succour to the ailing people of the plains of India and they again went up to इन्द्र to have themselves restored to health.

In the same चरक we find Rishis discussing various problems of Physiology and medicine and advancing theories of their own often diametricaley opposed to one another. All theories were eventually reconciled by the great sage आत्रेय पुनर्वसुः। These facts are more than sufficient to prove that the Rishis did not consider themselves omnicient and they were always amenable to reason and correction.

Next lies a fact to consider that the present day चरक and सुश्रुत are not the works of Rishis अग्निवेश and सुश्रुत in their contents, ancient and trust-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विघोऽन्योऽपि सर्वो वृद्धसुश्रुतोद्धरणानि समुदध्रियत स्वस्वटीकासु, यानि किल नैव दृश्यन्ते साम्प्रतिकोपलब्धसुश्रुतसंहितायाम्। बहूनि वृद्धसौश्रुतवचांसि प्रचलितसुश्रुतोक्त तथ्यैस्सह न संवदन्तीति निश्चप्रचम्। डल्हणाचार्योऽपरे चाचार्यास्तेषां तेषां टीकासु सुस्पष्टं निगदन्ति "प्रतिसंस्कर्त्ताऽपीह नागार्जुन एव"। प्रचलिता सुश्रुतसंहिता नागार्जुनेन प्रतिसंस्कृताऽन्येन वा केनापि। ग्रन्थस्यान्तरङ्गपरीक्षया सुप्रमाणितमेतद् यत् सुश्रुतस्योत्तरतन्त्रं विदेहस्यान्येषां च कृतीणां सारसंग्रहरूपः। एवमेव चरकसंहिताऽग्निवेशसंहितायाश्चरककृतं प्रतिसंस्करणमेव। एतद्व्यतिरिच्य, प्रतिसंस्करणमेतद् युगानुक्रमेण प्रक्षिप्तमपभ्रष्टं वाऽपि जातम्। अथ च दृढबलेन पुनरपि प्रतिसंस्करणं विहितम्, चिकित्सास्थानस्यान्तिमसप्तदशाध्यायाः, समग्रे च कल्पसिद्धिस्थाने नूतनतया निर्माय तन्त्रपूर्त्तिश्च सम्पादिता। चरक एव संग्रथितं वर्त्तते—

"अस्मिन्सप्तदशाध्यायाः कल्पाः सिद्धय एव च।
नासाद्यन्तेऽग्निवेशस्य तन्त्रे चरकसंस्कृते॥
तानेतान् कापिलबलिः शेषान्दृढबलोऽकरोत्।
तन्त्रस्यास्य महार्थस्य पूरणार्थं यथायथम्॥

सम्प्रदायमतावलम्बिनेतार इव इमे रूढ़िवादिनो वैद्या एतानि सर्वाण्यपि तत्त्वानि सर्वदा विस्मरन्ति, स्वीकुर्वन्ति च "अद्यतनीयचरक-सुश्रुतयोर्न न प्रत्येक एव शब्दः पुण्याहवाक्"। यद्येदं तर्कविरुद्धन्तथैव दुर्भाग्यपूर्णमपि। 'पाकिस्तान समर्थका इव' इमेऽपि विशिष्टाः शिष्टाः जनास्तरसा कृत्स्नानि तर्काणि प्रमाणानि चैकतोऽपसारयन्ति

worthy commentators like चक्रपाणि, शिवदाससेन etc. have quoted passages of the original वृद्धसुश्रुत which do not occur in the present day सुश्रुत and there are several passages in the current सुश्रुत, which differ with wellknown truths डल्हणाचार्य and others mention clearly in their commentries "प्रतिसंस्कर्त्तापीह नागार्जुन एव current सुश्रुत-संहिता is a work redacted (प्रतिसंस्कृत) by नागार्जुन or some body else. It is well proved by internal evidence also that the last half of सुश्रुत was an abridged form of the works of विदेह and others, probably flourishing long after धन्वन्तरि. In the same way चरक is a redaction of अग्निवेशसंहिता by चरक. Besides that, this redaction became partly extinct and deformed with age, and दृढबल made a further redaction and newly wrote out the last seventeen chapteres of चिकित्सास्थान and all the chapteres कल्पस्थान and सिद्धिस्थान. This fact is clearly incorporated in the body of the present day चरकसंहिता as—

"अस्मिन्सप्तदशाध्यायाः कल्पाः सिद्धय एव च।
नासाद्यन्तेऽग्निवेशस्य तन्त्रे चरकसंस्कृते॥
तानेतान् कापिलबलिः शेषान्दृढबलोऽकरोत्।
तन्त्रस्यास्य महार्थस्य पूरणार्थं यथायथम्॥

Like communal leaders. These conservative vaidyas usually forget all these points and contend that every word of the present day चरक and सुश्रुत is sacrosanct. This is unfortunate as it is unreasonable. Like Pakistan defenders these gentelmen abruptly throw aside all reasons and evidences (प्रमाण) and try hard to save their willful selfish narrow but unhu-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृढतरञ्च प्रयतन्ते स्वकीयाभिनिविष्टस्वार्थमय-सङ्कीर्णघातकाऽमानवीयभावाभिरक्षणाय । नात्र सन्देहः-एतादृशैर्जनैरायुर्वेदीयविज्ञानं ग्लापयद्भिश्छत्रद्मचरैर्भिषगाभासैरायुर्वेदानभिज्ञानामल्पज्ञानां वा समूहः कैतवेनापमार्गे नियोज्यते ।

अयमपि महतो मनोऽभिघातस्य प्रसङ्गो यन्नेतृणां मध्ये केचिद् राजनीतौ शासनप्रबन्धे चाधिगतपदप्रतिष्ठा अपि प्रतिनिविष्टैः पथभ्रष्टा इत्यस्माद्धेतोरेतस्मै किलायुर्वेदविरोधिकृदान्दोलनाय संरक्षणं दत्तवन्तः सन्ति ।

आधुनिकचिकित्साविज्ञानसमर्थका अपि ये खलु नायुर्वेदस्याक्षरमेकमपि जानन्ति, न वाऽस्य विज्ञानिकमानवीयनिधिना सौन्दर्येण च सह कामपि सहानुभूतिमधिरक्षन्ति, ईर्ष्याऽसूयामयो मात्सरिको दृष्टिकोण एवायुर्वेदम्प्रति येषां' ते किलास्य शुद्धायुर्वेदान्दोलनस्य प्रचलनाद्धेतोरतिशयप्राह्लादिता अधुनाऽस्य तथोक्तशुद्धायुर्वेदवादस्योग्रसमर्थका अभिभाषकाश्च तिष्ठन्ति । यतस्ते सम्यग् जानन्ति "अनेनापसंज्ञानेनायमायुर्वेदः परिसीमितो जडीभूतश्च कतिपयैरहोभिः सन् प्रत्यासन्ने भविष्यति काले स्वेनैव मृत्युना मरिष्यतीति" ।

वयं जानीमो विश्वसिमश्च—आयुर्वेदस्तु शाश्वतविज्ञानस्य वेदस्योपाङ्गो न कदापि प्रणाशयितुं शक्यते । मा भूदायुर्वेदस्य नाम्नाऽस्य प्रचलनम्; परं, केनापि अन्य (यथा-आधुनिकचिकित्साविज्ञानाधुनिकविज्ञानादि) नाम्नाऽयम्प्रचलिष्यति' । प्रत्यक्षानुमानोपमानागमयुक्ति प्रमाणैरायुर्वेदस्याभ्युपगमः । एतैः प्रमाणैः कश्चिदपि योऽनुसन्धानाय प्रवर्त्तते, गवेषयति अन्वेषयिष्यति च भूतार्थं सत्यं मानवतोपकाराय स एवायुर्वेदस्य सत्य उत्तराधिकारी भवितेति कृपया दूरदर्शिनो विज्ञा विमर्शयन्तु ।

man and harmful notions. No doubt, such men lack in a wisdom of Ayurveda and are Pseudo–Ayurvedists, misleading mischievously a mob having a little or no knowleage of Ayurveda.

It is a matter of great shock that some of the leaders having positions in politics and administration have been misled by such persons and consiquently are giving patronage to this anti Ayurvedic movement.

The socalled advocaters of moderen medicine who niether know a word of Ayurveda nor have any sympathy with its scientific and human treasure and grace; have an envoious and grudgeful attitude towards it. They are extremely happy due to the start of this शुद्ध आयुर्वेद movement and have become staunch supporters as also staunch advocaters of socalled Shuddha Ayurveda. They know well that under this misnomer "Shuddha Ayurved", it will be limited and stagnated in a few days and then in a near future will die its own death.

We however know and are confident that Ayurveda is a branch of veda-eternal knowledge and hence, it can never extinct however it may not survive by the name of Ayurveda, but by any other name of modern medicine or modern science. "प्रत्यक्षानुमानोपमानाप्तयुक्तिप्रमाणैरायुर्वेदस्याभ्युपगमः" any one who works for discovery with the help of these means of प्रमाणानि will investigate and discover truth for human good and he will be a true inheriter of Ayurveda. The fore-seers learned persons are requested to please think over.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदः त्रैकालिक-सार्वभौम-चिकित्साविज्ञानम्

(ले०—आयुर्वेदाचार्यो श्रीब्रह्मदत्तः शर्मा, आयुर्वेदालङ्कार–बी० ए०–इत्यादिधरः वरिष्ठचिकित्सकः—जामनगरीय-आयुर्वेदान्वेषणसंस्थायाः)

'आयुर्वेद' इत्यायुषो वेदः। आयुर्वेदयतीत्यायुर्वेदः, इति वा। आयुरस्मिन् विद्यतेऽनेन वा वेदः, इति वा। यद्वा हिताहितं आयुर्विन्दतीत्यायुर्वेदः, इति वा। यद्वा हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्, मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते। अथवा-यतश्चायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि वेदयत्यतोऽप्यायुर्वेदः। इति, यथाकथञ्चिदपि निरुच्येत परिभाष्येत वा, एष आयुर्वेदः सर्वथाऽप्यायुषो ज्ञानम्, तत्प्राप्तिसम्पादकं च शास्त्रं तत्साधनं वा। अद्यत्वे यत्किञ्चिद् वर्ण्यते प्रतिवेद्यते वा शास्त्रं 'चिकित्साशास्त्र'-नाम्ना, तत्तु केवलं रोगं तच्चिकित्सां च वर्णयति; तस्मिन्नास्ति स्थानं स्वस्थवृत्तस्य सद्वृत्तस्य च, नापि च दिनचर्य्याया ऋतुचर्य्याया वा–स्यादपि कुतः, तत्तु केवलं रोगशास्त्रं चिकित्साशास्त्रं वा, न खलु आयुषो विज्ञानम्। तद्विपरीतम्, आयुर्वेदस्तु साकल्येन आयुषो वेदः, यः समुपदिशति सर्वथा हिताहितं सुखदुःखमयं चायुः, तस्य हिताहितं द्रव्यादिकं, आयुषो मानञ्च।

'आयुः' अप्यत्र कीदृक्?–शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम् नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते, इति। शरीरेन्द्रियसत्त्वात्मसंयोगमारभ्य यद् आयुः, तस्य तु वर्णनक्षेत्रम् अतिविस्तृतम्–यत्र एकतो वर्तते 'आत्मा' सुखदुःखेच्छाद्वेषप्रयत्नज्ञानादिलिङ्गरूपः, तेन सह संयोगमादधानं 'सत्त्वम्' च मनस्संज्ञकं चिन्त्य-विचार्य-ऊह्य-ध्येय-संकल्प्यानाम् अधिष्ठानभूतं करणभूतञ्च ; अपरत्र च विद्यन्ते 'इन्द्रियाणि' इन्द्रलिङ्गरूपाणि बुद्धीन्द्रियकर्मेन्द्रियेति दशविधानि, 'शरीरम्' अपि चास्ति सर्वेषामेतेषाम् अधिष्ठानभूतम्–तद्, एतेषां भेदानुभेदप्रभेदैर्बहुविधानां संयोगरूपम् 'आयु' अत्र साकल्येन वर्ण्यते।

'संयोग'श्च शरीरेन्द्रियसत्त्वात्मनाम् प्रारभ्यते तस्मादेव कालाद्, यदाऽऽत्मनः शरीरधारणे प्रवृत्तिमात्रं लक्ष्यते; तदनु गर्भे आविर्भावो भवति। तस्मात् कालादारभ्य तावत्पर्यन्तं यदा जीव आत्मा वा निर्याति निर्जीवं च शरीरमवशिष्यते–महत्यस्मिन् विस्तीर्णे काले वर्त्तते आयुषः क्षेत्रम्। गर्भधारणादपि प्राक् शुक्ररजसोः स्वास्थ्यम् प्राशस्त्यं चात्र विचार्यते। एकत्र, परत्र च वार्द्धक्यस्य जराजीर्णतायाश्च अशक्यतानिवारणाय उपाया वर्ण्यन्ते 'रसायनशास्त्र'-नाम्ना–इति एतावत्सुविस्तीर्णं क्षेत्रमायुर्वेदस्य। अत एव न केवलं रोगमात्रं हेतुलिङ्गौषधेति त्रिस्कन्धमुखम् प्रतिपाद्यं विषयजातमस्य, अपि तु आयुर्विषयं समग्रमप्यवलम्ब्य हेतुलिङ्गौषधात्मकं ज्ञानमत्र दीयते।

आयुश्चतुर्विधं हिताहितसुखदुःखात्मकम्। दुःखमायुः रोगात्मकम्, अहितमपि तद्वत् तद्धेतुभूतं वा। सुखं हितं चायुः स्वास्थ्यात्मकम्; तस्य केचन हेतवः स्वस्थवृत्त-सद्वृत्त-दिनचर्या-ऋतुचर्यादयः, विशिष्टानि कानिचिल्लिङ्गानि, कानिचिच्च औषधरूपाणि साधनानि सम्पादकानि च—एवं समग्रस्यायुषो हिताहितसुखदुःखात्मकस्य हेतुलिङ्गौषधात्मकं विज्ञानमत्रायुर्वेदे विद्यते इति सुस्पष्टमेवास्य महत्त्वम्, व्यापकत्वं त्रैकालिकत्वं सार्वभौमत्वं वैश्वजनीनत्वं च। क्वचिदप्यन्यत्र चैतावद् विस्तीर्णत्वं न वर्तते यतोऽस्मिन्विषये, अत एव आयुर्वेदस्य उपादेयत्वं प्रकृष्टतरमन्येभ्यश्चिकित्साशास्त्रेभ्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ वयम्पश्यामो यद् रोगस्यापि निवारणोपायाः द्विविधा अवलम्ब्यन्ते—रोगिणः स्वीयरोगनिवारणशक्तिप्रवर्द्धनेन, बहिस्तो वा रोगनिवारक (नाशक) तत्त्वप्रदानेन। अद्यत्वे यद्यपि द्वितीयः प्रकारोऽधिकतरमुपयुज्यते येन अन्तःप्रवेशितानि रोगनाशक (निवारक) तत्त्वानि स्वयमेव घ्नन्ति रोगकारणं शरीरे, परन्तु तदा रोगिशरीरं तु यथापूर्वं रोगपराजेयमेव अवशिष्यते; अपि च रोगनाशकतत्त्वैः अन्तःप्रवेशितैः शरीरं स्वयमपि निर्बलम् अशक्ततरं च जायते। उदाहरणार्थम्—यदि भारते सर्वे चीनीयैः सह पाकस्थानीयैः सह वा योद्धुम् पातालदेशवास्तव्या वा हरिवर्षीया वा अन्ये च पाश्चात्याः सैनिकाः समानेयाः स्युस्तेन तु भारतस्य न केवलं शक्तिवृद्धिर्न भविष्यति अपितु ध्वंस एव भविष्यति। एवमेव यदा रोगाणूनां विनाशाय कृत्रिम-परकीय-प्रतिपिण्डलसः (artificial foreign immune bodies contained in the serum antiserum)दीयते तदा तेन तु शरीरस्य न केवलं व्याधिक्षमत्वं न वर्द्धते स्वस्मिन्, अपि तु निर्बलत्वमेव जायते। अपि च, यानि शुल्वौषधानि (sulpha-drugs) प्रतिजैविकद्रव्याणि (antibiotics) चाद्यत्वे प्राचुर्येण प्रयुज्यन्ते तानि शरीरे रोगप्रतिरोधकशक्तिं व्याधिक्षमत्वं च विशेषेण घ्नन्ति; यद्यपि तेषाम्प्रयोगेण संक्रमणस्य रोगजीवाणूनां च प्रगतिर्निरुध्यते, तथापि शरीरे निसर्गतो विद्यमानानां रोगप्रतिरोधकराणां तत्त्वानां श्वेतकोशाणूनाञ्चापि नितरां विनाशो ह्रासो वा जायते—येन पुनरपि शरीरस्यैव हानिः भवति, यन्निवारणार्थं च पुनरप्यन्ये प्रयत्ना विधीयन्ते औषधान्तराणि चानिवार्यत्वेन दातव्यानि भवन्ति, यैरपि कदाचित्तु लाभो भवत्येव न। एतत्सर्वं नवीनतमौषधद्रव्याणाम् महत् त्रुटिजातम्, येन तेषाम्प्रयोगक्षेत्रे महानन्तरायः संजायते। आयुर्वेदसिद्धान्तस्त्वत्र विषये एष वर्तते—'यथा हि पतितं पुरुषं समर्थमुत्थानायोत्थापयन् पुरुषो बलमस्योपादध्यात्, स क्षिप्रतरमपरिक्लिष्ट एवोत्तिष्ठेत्, तद्वत् सम्पूर्णभेषजोपलम्भादातुराः' इति। अत्र भेषजप्रयोगः केवलं शरीरस्य साहाय्यार्थमेव क्रियते, न खलु रोगजीवाणुमारणार्थं विषप्रयोगो यः शरीरस्याप्यपकारको मारकश्च। वस्तुतस्तु रोगप्रतिकारो रोगजीवाणुनिवारणञ्च शरीरेण स्वयमेव करिष्यते, तत्र भेषजस्य प्रयोगस्तु केवलम् सहायतार्थमेवापेक्ष्यते। अत एव यानि आयुर्वेदीयद्रव्याणि रोगकारणविनाशकत्वमपि अभिप्रेत्य प्रदीयन्ते तानि न्यूनाधिकत्वेन शरीरस्य शक्तिं व्याधिक्षमत्वं चापि सम्पादयन्त्येव। यानि च द्रव्याणि (विडङ्ग-पलाशबीज - कृष्णजीरिका - दाडिमत्वग्-आदीनि) प्रयुज्यन्तेऽन्त्रस्थानां कृमीणां प्रतिकाराय तानि न तथा घातीनि सन्ति, तथापि यत्प्रतिकुर्वन्ति क्रिमीन् बहिरपसारयन्ति च तत्र अन्त्रकलायाः शरीरस्य च न तथा हानिर्भवति। अपि च, नवीनतमानां केषाञ्चित् प्रबलविषरूपद्रव्याणां तुलनायाम् आयुर्वेदीयकृमिघ्नद्रव्याणि कृमिहरा योगाश्च कृमिनिरसनासमर्थत्वे सत्यपि यत्कृमीन् प्रतिकुर्वन्ति शरीरस्वास्थ्यमनुवर्तयन्ति च (यथा—विडङ्गप्रयोगकाले दरीदृश्यते) तत्रैष एव हेतुः प्रतिभाति यच्छरीरं क्षेत्रापरपर्यायमेवात्र रोगप्रतिकारसमर्थं भवति भेषजप्रयोगश्च तत्सहायतार्थमेव युज्यते। एतदप्यत्रावधेयं यत्कृमयः पराश्रयिणो (parasites) वा शरीरे यदि कथञ्चिदपि प्रविशन्त्येव तदा न सर्वदा सर्वथा च निर्बाधरूपेण पराश्रयितामेव रोगकरतामेव वा भजन्ते। शरीरे कृमीणाम् बहवः स्थितिप्रकाराः सन्ति, तद्यथा—सहजीवनम् (Symbiosis, कस्मिंश्चिद् बृहति शरीरे सूक्ष्मजीवाणूनां कृमीणां सहवर्तित्वं यद्द्वारा बृहदन्त्रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्वाशये मलविभाजक-अपसारक-जीवाणव आनुकूल्यम् भजित्वा प्रतिवसन्ति), परस्परोपकरत्वम् (Mutualism) यद्द्वारा शरणप्रदं शरीरं शरणागता जीवाणवश्च परस्परमुपकुर्वन्ति), उपजीवनम् (Commensalism, यद्द्वारा जीवाणवः शरीरहानिं विनैव स्वार्थलाभं लभन्ते), पराश्रयित्वं (Parasitism, यदा जीवाणवः कृमयश्च स्वात्मलाभार्थं शरण्यमपि शरीरमश्नन्तीव विनाशयन्ति च), च; तत्र शरीराय जीवाणुकृमीणाम् पराश्रयीभवनम् मिथ्याहारविहारजन्यमेव, अतो यदि निदानपरिवर्जनमनुष्ठाय शरीरक्षेत्रबलमाधीयेत पुनरपि तदा पराश्रयिनिवारणमपि भवति शरीरोपचयोऽपि च संजायते—मन्ये विडङ्गमधुयष्ट्यादीनाम् सर्वोपघातशमनीयानां योगानां लाभ एतेनैव विधिना जायते, यतो हि शरीरोपचये सत्यपि न तैर्योगैः सदा निरपवादं कृमिनिष्कासनं भवति। यथाकथञ्चिदपि स्यात्, एतत्, सुबहुपरीक्षितम् अनुभवधनैर्विज्ञैर्वैज्ञानिकैः यद् आयुर्वेदद्वारा चिकित्सितो रोगी प्रायशस्तथा निर्बलो न भवति यथा नवीनतमौषधैश्चिकित्सितः।

'रसायनतन्त्रं' 'वाजीकरणतन्त्रं' चायुर्वेदस्यैव वैशिष्ट्यम्। न कुत्रचिदन्यत्र चिकित्साशास्त्रे प्रतिपादनमेतयोरुपलभ्यते। अद्यत्वे यद्यपि 'जीरियाट्रिक्स (Geriatrios)'—नाम्ना वार्द्धक्यशास्त्रस्याध्ययनं प्रचलितं वर्तते केभ्यश्चिद्वर्षेभ्यस्तथापि न तदपि शास्त्रमायुर्वेदस्य रसायनतन्त्रस्य तुलामपि अधिरोढुम् शक्नोति, किं नाम तदुत्कर्षं लब्धुम्। वाजीकरणतन्त्रं तु सर्वथाऽपि अतिरिच्यते, यत्र न केवलम् भौतिकमेव प्रयोजनम् अपि तु आध्यात्मिकमपि ध्येयम्। एषणात्रितयमभिप्रेत्य या प्रवृत्तिः, तत्रैहिकानन्तरम् आमुष्मिकमपि श्रेयः सम्पादनीयम्; अत एवास्य तन्त्रस्य महत्त्वम्। अपि च, बलवति प्रभवति शरीरे एव बलवतो निधानम् भवति आत्मनः, शुक्रजसोः स्वास्थ्यम् बलं च विना नात्मनो बलवतः समावेशः स्थितिश्च सम्भवति, अतो वाजीकरणतन्त्रस्यायुर्वेदे समुपदेशः। तदेतत्तन्त्रद्वयमपि आयुर्वेदस्य प्रकर्षं प्राशस्त्यं च पुनरपि वर्द्धयति।

अपरञ्च। आयुर्वेदे वर्णितं चिकित्साशास्त्रमपि सर्वथा विस्तीर्णतमम्, विश्वस्य सकला अपि चिकित्सापद्धतीः स्वात्मनि आत्मसात्कर्तुम् प्रभु च। 'चिकित्सा' तूपशयापर्याया। उपशयस्य ये भेदाः वर्ण्यन्तेऽष्टादशविधाः, ते वस्तुतस्तु चिकित्साविषय एव। 'हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् औषधान्नविहाराणामुपयोगः सुखावह' इत्यत्र प्रत्येकः सुखावहोपयोगरूपश्चिकित्साप्रकारः। तद्यथा—हेतुविपरीतम् औषधम्, हेतुविपरीतम् अन्नम् (आहारः) हेतुविपरीतो विहारः, व्याधिविपरीतम् औषधम्, व्याधिविपरीतम् अन्नम्, व्याधिविपरीतो विहारः, हेतुविपरीतार्थकारि औषधम्, हेतुविपरीतार्थकारि अन्नम्, हेतुविपरीतार्थकारी विहारः, व्याधिविपरीतार्थकारि औषधम्, व्याधिविपरीतार्थकारी विहारः, हेतुव्याधिविपरीतम् औषधम्, हेतुव्याधिविपरीतम् अन्नम्, हेतुव्याधिविपरीतो विहारः, हेतुव्याधिविपरीतार्थकारि औषधम्, हेतुव्याधिविपरीतार्थकारि अन्नम्, हेतुव्याधिविपरीतार्थकारी विहारः, इति। विश्वस्य याः काश्चिदपि चिकित्सापद्धतयोऽद्य विद्यन्ते, पुराऽऽसन्, भाविनि वा काले भविष्यन्ति तासां सर्वासामेव समावेशोऽत्र अष्टादशप्रकारे उपशमे भवितुमर्हति। उदाहरणार्थम्—'ऐलोपैथी (Allopathy)'—नाम्ना यच्चिकित्साशास्त्रमद्यत्वे सुप्रचलितं विद्यते तस्य शब्दाभिप्रायस्तु 'विपरीतद्रव्यैः (औषधरूपैः प्रायशः, नान्नरूपैः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकित्सायाः पद्धतिः' इत्येष वर्तते¹, तस्यात्र समावेशो 'हेतुव्याधिविपर्यस्तौषध'–भेदे भवितुमर्हति; 'होम्योपैथी'–पद्धतिः समानद्रव्यैः चिकित्सां शास्ति, तस्यात्र समावेशो 'व्याधिविपर्यस्तार्थकारिणि औषधे' भवितुम्प्रभवति; 'नेचरोपैथी'–पद्धत्याश्चात्र समावेशः 'हेतुविपर्यस्तार्थकारिणि आहार-विहारे' सुशकः, इत्यादि। एवमेव 'हीलियोथैरापी'–'हाइड्रोपैथी'-'यूनानी'-आदि-पद्धतीनामपि समावेशोऽत्र सम्भवति। एतावद्विस्तीर्णं क्षेत्रं नान्यत्र, नान्यस्य कस्यचिदपि चिकित्साशास्त्रस्य ऋते आयुर्वेदात्।

अपि च। आयुर्वेदे चिकित्साभेदास्त्रयः—दैवव्यपाश्रया चिकित्सा, युक्तिव्यपाश्रया, सत्त्वावजयरूपा च। तत्र दैवव्यपाश्रया तु मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि-रूपा। युक्तिव्यपाश्रया पुनराहारौषधद्रव्याणां सयुक्ति योजना। सत्त्वावजयश्च पुनरहितेभ्योऽर्थेभ्यो मनोनिग्रह इति। अत्र, अन्येषु चिकित्साशास्त्रेषु केवलं युक्तिव्यपाश्रया चिकित्सैव यतः कुतश्चिद् भग्नसन्ना समुपलभ्यते, नान्यौ द्वौ चिकित्साभेदौ। परन्तु आयुर्वेदे यतः क्षेत्रं वर्तते शरीर-सत्त्व-आत्मेति-त्रिदण्डरूपं, तस्मात् चिकित्साऽपि त्रिविधा वर्णिता—भयाणामपि आरोग्यसाधनी। तत्र युक्तिव्यपाश्रया तु केवलं शरीरस्य आरोग्यकरी, याऽपि न पूर्णतामेति एकाकिनी चेत्। आत्मनो मनसश्च आरोग्याय यत्प्रतिपादितम् आयुर्वेदेऽहितेभ्योऽर्थेभ्यो मनसो निग्रहरूपम् मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादिरूपं तद् वस्तुतः शरीराधिष्ठितयोरात्ममनसोरारोग्यसम्पादनद्वारा शरीरायैव लाभकरं, तदाधारत्वाद् आशुव्याधिहरत्वाच्च। एतद् वैशिष्ट्यम् आयुर्वेदे एव समुपलभ्यते।

वस्तुतस्तु यतः कुतश्चिदपि दृश्येत विचार्येत वा, आयुर्वेदस्यैव सौष्ठवं, अपितु वरिष्ठत्वं, दरीदृश्यते। अतएवोक्तं यद् 'आयुर्वेद एव त्रैकालिकसार्वभौमचिकित्साविज्ञानम्', इति।

अथ च यद् अद्यत्वे दृश्यते नवनवान्वेषणसमुपलब्धं चिकित्साशास्त्रविज्ञानं नानाविधशस्त्रकर्मपाटवं च सततक्रियापरिश्रमानुभवादिसमर्जितं—तत्सर्वमपि आयुर्वेदे समावेष्टुं सुकरम्, यतो हि आयुर्वेदे चिकित्सायाः क्षेत्रम् अतिविस्तीर्णं वर्तते। अतोऽस्माभिस्तत् साकल्येन सातत्येन चात्मसात्करणीयम्। तत्र आयुर्वेदस्याधिकारक्षेत्रं तु नूनं वर्तते एव, परन्तु आत्मसात्करणाय महतः परिश्रमस्य प्रयत्नस्यावश्यकता भवति; अन्यथा "न हि सुप्तस्य सिंहस्य निपतन्ति मुखे मृगाः।"

संक्षेपेण, यत्किञ्चिद् अद्यत्वे विद्यतेऽन्यासु चिकित्सापद्धतिषु तत्तु सर्वमपि आयुर्वेदे वर्तते एव; यच्चान्यदपि आविष्क्रियमाणमस्ति भविष्यति च भविष्यति आविष्कारिष्यमाणम् आविष्कार्यं वा तत्सर्वमपि आयुर्वेदोदरे समेष्यति समन्ततः। यथा पक्षी परिपतन्त्सर्वतः सर्वमप्यह्रश्छायामत्येति नात्मीयामायुर्वेदं तथेतरत्—आयुर्वेदमतिक्रम्य न किञ्चिदपि भवितुमर्हति चिकित्साशास्त्रे कस्मिंश्चिदपि अन्यस्मिन्। ततोऽप्यधिकम् वर्तते आयुर्वेदे तु। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् चिकित्साविज्ञाने धरित्रीतले वियति वा विश्वस्मिन्। नापि चासीत्, नैव च भविष्यति।

1. Allopathy—The term really means the curing of diseased action by inducing a different kind of action in the body.—'Medical Dictionary' Dorland: 1954, p. 62.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदस्य विकासक्रमः

ले०—वैद्यराजश्रीछेदालालशर्मा शास्त्री ,D. I. M. S. नवाबगंज, बरेली, (उ० प्र०)

आयुर्वेदविज्ञानम् स्वयंभुवा प्रजाहितहेतोः सृष्टेरादौ स्वयमेव निर्मितं तथा च ब्रह्मणः प्रजापतिः प्रजापतेरश्विनौ ताभ्यामिन्द्र इन्द्राद्धन्वन्तरिः धन्वन्तरेश्चौपधेनवादिसुश्रुतप्रभृतयः शिष्याः लब्धवन्तः। तदनु तैः शिष्यपरंपरया सर्वत्र प्रसृतमिति संहिताग्रन्थैर्ज्ञायते । अनेनेतिहासेन भारतभूमावेव सर्वप्रथममायुर्वेदस्य प्रादुर्भावो बभूवेति सिध्यति । पुरातनकाले भारतीयविज्ञानं लोकेऽतीवोच्चतरमासीद् देशान्तरेभ्यश्छात्रा अत्रागत्याध्ययनं कुर्वन्ति स्म, भारतवर्षोऽखिललोकस्य गुरुरासीदिति परम्परागतप्रसिद्धिरद्यापि श्रूयते । सुश्रुतसमयेऽत्र शल्यप्रक्रियाऽतीवोच्चकोट्यामासीत्तदानीन्तनानि शल्यशस्त्राणि केशं मध्याद्विस्फार्य द्विधाकरणशक्तान्यासन्, विविधविमानानां निर्माणमपि प्राचीनकालेऽत्र प्रचलितमासीत् । महाभारते प्रभूतशक्तिसम्पन्न प्रक्षेपणास्त्राणां विविधाग्नेयास्त्राणां प्रयोगाः बाहुल्येन संभूताः । इत्यादिवृत्तै र्भारतीयविज्ञानस्योत्कृष्टता निर्विवादतया प्रमाणिताऽस्ति ।

महाभारतयुगेऽत्र महती क्षतिर्बभूव, प्रायशः सर्वे कोविदाः हताः. सर्वं वैभवं विनष्टं, विज्ञानं विलुप्तं चिकित्साप्रक्रियाऽऽयुर्वेदशास्त्रमपि समाप्तिमगात् ।

यच्च अन्यद् वर्तते आयुर्वेदे सद्वृत्त-स्वस्थवृत्त-ऋतुचर्या-दिनचर्या-आदि-रूपं, रसायनतन्त्र-वाजीकरणतन्त्रादि-रूपं, सत्वावजयरूपं, आत्मतत्त्वचिन्तनरूपं, तिस्रैषणप्रतिपाद्यं, सर्वभूतहितचिन्तादिकं, अरिष्टविज्ञानं, प्रकृत्यादिकं च तत्त् धारयितुं नालं किञ्चिदपि अन्यच्चिकित्साशास्त्रम् । अत एवेदम् बलान् मुखान् निरेति यद्–'आयुर्वेदः त्रैकालिकसार्वभौम-चिकित्साविज्ञानम्' इति ।

कालान्तरे तस्य पूर्ति कर्तुं भारतीयानां शक्तिर्न संजाता ।

दैवदुर्विपाकेन भारतीया वसुन्धरा विदेशीयैराक्रान्ता यवनसाम्राज्ये जाते तैरत्यन्तात्याचाराः कृताः धर्मं क्रूरतया विच्छिन्नं, वैभवं बलादाहृत्य स्वदेशे प्रेषितं, साहित्यं नीतमग्निसाच्च कृतं ।

कालान्तरे आंग्लदेशीयानां सत्ताऽत्र संजाता—ते गौराङ्गाः कुटिला अत्यन्तनीतिनिपुणाश्चासन् । एतैस्तु वेदशास्त्रादिबहुमूल्यग्रन्थाः यत्र यत्रोपलब्धाः सर्वे चातुर्येण स्वदेशं नीताः तत्र च भारतीयान् पंडितान् नीत्वा तत्सहायेन सर्वेषां ग्रन्थानामनुवादाः स्वभाषायां संपादिताः । तदनु तत्र क्रमशो नवीनाविष्काराणां प्रसूतिः प्रारब्धा यस्य प्रभावेण इंलैण्डदेशस्य विज्ञानं भूमण्डले चमत्कृतम् । अधुना सर्वत्र कुतूहलोत्पादके विज्ञाने चिकित्साशास्त्रे शल्यप्रक्रियायां यन्नै पुण्यं दैनंदिनं श्रूयते दृश्यते च तत्सर्वमस्मदीयसाहित्यस्यैव विभूतिरस्ति । अत एव मध्ययुगे यथा रसशास्त्रस्यार्कादि प्रक्रियाणाञ्च सन्निवेशो भारतीयचिकित्सापद्धतौ कृतस्तथाद्यापि नूतनपरिधानपरिष्कृताः एलोपैथी-होम्योपैथीत्यादिनामभिरलङ्कृताः पद्धतयोऽविलम्बेन संग्राह्याः सन्ति । ये शुद्धमिश्रितभेदेन परकीयाः मत्वा तासां ग्रहणेऽसम्मतास्ते तु नूनं कालानभिज्ञाः आयुर्वेदोत्कर्षे, पुनरात्मीयपुरातनशक्तिसंग्रहणे च संबाधकराः सन्ति ।

अत्र विशेषेण संधातव्यमेतदस्ति—यथाऽऽधुनिकपद्धतिसंग्रहणे मूलरूपस्य लोपो न भवेत्—यादृशोऽद्य प्रतिभाति, यदाशङ्क्यैव तदात्मसात्करणेऽसम्मतिः केषांचिद्विदुषामस्ति । अत्रास्मद्दौर्बल्यमस्ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्विचार्य शीघ्रं परिहर्तव्यम् । आधुनिका आयुर्वेद-विद्यालयनिष्णाताः स्नातका आयुर्वेदज्ञानशून्या प्रायशो भवन्ति । एलोपैथी विज्ञानेऽर्धशिक्षिताः वैद्यशब्दे वैद्यसमुदाये च लज्जामनुभवन्तो डाक्टरनाम्नाऽऽत्मानं विज्ञापयन्तो एम० बी० बी० एस० M.B.B.S. पदवीविभूषित-डाक्टरमार्गानुसरणे धन्यं मन्यमाना जनसम्पर्के समुदाये च परिहासं गच्छन्ति । एवमुभयज्ञानविहीनैरेतैरायुर्वेदहितं न संपत्स्यतेऽहितमेव भविष्यति ।

अत्रायुर्वेदपाठनप्रणाली सम्यक् परिमार्गणीयाऽस्ति । आयुर्वेदग्रन्थाः केवलं संस्कृतभाषायामेव सन्ति—एलोपैथिकग्रन्था इंगलिशभाषायाञ्च विरचिताः लभ्यन्तेऽतो विद्यालयेषु प्रवेशकाले छात्राः संस्कृतस्य अंग्रेजीभाषायाश्च ज्ञाने समर्थाः स्युः ।

संप्रति प्रवेशयोग्यता पूर्णमध्यमापरीक्षा इन्टर परीक्षा च स्वीकृताऽस्ति । तत्र इंगलिशज्ञानरहिताः पूर्णमध्यमा परीक्षासमुत्तीर्णाः तथात्र संस्कृतज्ञानरहिताः इन्टरपरीक्षोत्तीर्णाः छात्राः प्रवेशं लभन्ते । ते इंगलिश-ज्ञानशून्या केवलं संस्कृतज्ञाः एलोपैथीग्रन्थेषु, संस्कृतज्ञानशून्या केवलमिंगलिशज्ञाता आयुर्वेदग्रन्थेषु च हतोत्साहाः भवन्ति । तेऽपूर्णाः कथं सुयोग्याः स्युः ?

अत्रावश्यकताऽस्ति प्रवेशनियमे संयमनाय यथा इंगलिश-संस्कृतसहित-पूर्णमध्यमा परीक्षासमुत्तीर्णानां संस्कृत-इंगलिश-सहित-इन्टर-परीक्षासमुत्तीर्णानामेव च छात्राणां प्रवेशो विधेयो नेतरेषामिति पूर्णतया वर्तितव्यम् ।

प्रवेशानन्तरं प्रथमे वर्षे केवलमाधुनिकविज्ञानस्यैव यथावश्यकमध्यापनमनुष्ठेयम् । तत्पश्चात् द्वितीये तृतीये वर्षे चायुर्वेदसंहिताऽध्ययनं आयुर्वेदिकौषधिज्ञाननिर्माणप्रयोगविधिषु प्रगल्भतां कारयेत् । सर्जीकलज्ञाने प्रत्यक्षशारीरे चापि शिक्षणं विधेयम् । अत्र प्रश्नो जायते कथं संहिताग्रन्थानां ज्ञानं वर्षद्वये भविष्यतीति ? चरक-सुश्रुत-वाग्भट्टसंहिताग्रन्थेषु बहवो विषया एकस्मिन्नेव रूपे प्रायो दृश्यन्ते क्वचिद् विस्तारेण क्वचित्संक्षेपतः । यदि तेभ्य आवश्यकविषयान्नीत्वा संग्रहरूपेऽतिरिक्तसंग्रहग्रन्थो निर्मेयो भवेत्तत् सुसमीचीनं स्यात्तस्यैव शिक्षणं देयम् । यावदिदं न क्रियते तावत्तत्संहिताग्रन्थानामंशा एवाध्येयाः पूर्णरूपेणाद्योपान्तम् ।

तदनु वर्षद्वये तुलनात्मकरूपेणैलोपैथिकमेडीसननिदानचिकित्सादिषु पूर्णनिष्णातान् कुर्याच्छात्रान् । एतदर्थे यदि पाठ्यकालेऽधिकसमयस्यापेक्षा भवेत्तदपि नानुपयुक्तम् ।

एवमुभयज्ञानपरिपूर्णाश्चिकित्सकाः सर्वत्र लोके शासने च सम्मानयोग्याः भविष्यन्ति । ते एम० बी० बी० एस० पदवीविभूषितान् हेयं मत्वात्मानं गौरवेण परिपूर्णं मन्यमानाः परिपूर्णभूता एवायुर्वेदोत्थाने सशक्ताः भविष्यन्ति ।

Tele : "WEBMATS" Phone : 22-6851 (9 Lines)

With best Compliments of :—

SHREE HANUMAN JUTE MILLS

Manufacturers of :

JUTE CARPETS, WILTONS, JACQUARDS, DOBBIES, FLOOR RUNNERS AND SCHOOL MATTINGS.

8, Dalhousie Square East,

CALCUTTA-1.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदस्य सर्वविज्ञानोपजीव्यत्वम्

(ले०—श्रीश्रीनिवासशर्मचतुर्वेदः M. A., M. B. B. S., आयुर्वेदाचार्यः
भूतपूर्वप्राध्यापकः राजकीयायुर्वेदमहाविद्यालयस्य, जयपुरम्)

साम्प्रतिकप्रतीच्यविमर्शकेषु लब्धयशाः कार्ल-पीयरसनमहाशयः[1] स्वीये विज्ञानव्याकरणाख्ये ग्रन्थे वैज्ञानिकीं शैलीमेवं व्याचष्टे, "यो जनः कथंविधानपि प्रकारानवलम्बमानान् तथ्यान् वर्गेषु संगृह्णाति, तेषां पारस्परिकं सम्बन्धमवलोकयति, स्वकीयेक्षणस्य परिणामञ्च प्रकाशयति—सः वैज्ञानिकविधि प्रयुञ्जानो वर्तते अस्ति च स्वयं वैज्ञानिकः।"

अनेन विधिना युक्तिसहकृतं भूयोदर्शनजन्यं व्यवस्थितं ज्ञानमेव विज्ञानमुच्यते । तथ्यानामाभ्यन्तरप्रकृतेर्विधिना सुनिरीक्षणमनुष्ठीयते। तेषां चयनं न काकतालीयन्यायेन सम्पाद्यते अपि तु साकल्येन ग्रहणं विधीयते । वैज्ञानिक ईप्सितान् तथ्यान् क्रमशो विभजते, भूयोदर्शनेन स्वनिरीक्षणं मुहुर्मुहुर्द्रढयति, अनन्तरञ्च निष्कर्षमाविष्करोति यच्च समानधर्मभिः परीक्षकैस्संशयराहित्याय पुनरपि परीक्षितो वैज्ञानिकसत्वरूपेण परिनिष्ठाप्यते । वैज्ञानिकः सदैव युक्तिमवलम्ब्य गवेषणायां संनह्यते। विज्ञानविधेरिमां परिभाषामवधार्यातीव-सुगमतया प्रतिपत्तुं शक्यते यत्प्रत्नोऽययस्माकं निधिरायुर्वेदो विज्ञानविधिना परमवैज्ञानिकैर्महर्षिभिर्भूतदयार्थमाविष्कृतः ।

केचिदत्र विप्रतिपद्येरन् यदायुर्वेदीयं दर्शनं तु श्रुतचरमस्माभिर्यस्येतरेभ्यो दर्शनेभ्यस्स्वातन्त्र्थमुद्घुष्यते भिषग्विद्यापारङ्गतैः । तत्कथमस्यायुर्वेदस्याधारभूतं दर्शनं परित्यज्य वैज्ञानिकाधारस्याभिनवा कल्पना क्रियते। अत्र पुनरपि कार्लपीयरसनमहाशयानां सम्मतिरुद्ध्रियते,[2] ज्ञानस्य-प्रतिशाखं सत्यस्यान्वेषणं विज्ञानस्य सीमात अबहिर्भूतम्। नास्ति जिज्ञासायाः कोऽपि विषयो यो विज्ञानाधिकृतक्षेत्राद् बहिस्तिष्ठेत्" । दर्शनविज्ञानयोरधिकारक्षेत्रस्य परस्परसाङ्कर्यं भवति, अत इयमापत्तिर्न केवलमायुर्वेदविरुद्धाऽपि तु यस्य कस्यापि विज्ञानस्य विरुद्धमुत्थापयितुं शक्यते परं प्रत्याख्यानायैव ।

एवं विज्ञानदर्शनयोरन्योन्यानुप्रवेशे सिद्धे तयोर्भूमण्डले सर्वप्रथमं भारते देश आविर्भावः पक्षपातरहितानामितिहासज्ञानां न तिरोहितम् । ये त्वज्ञानतिमिरनिमीलितचक्षुषो यवनदेश[3] एव दर्शनस्य विज्ञानस्य काव्यस्य वोत्पत्तिं साधयितुं दृढव्रतास्तेषां कथा दूर आस्ताम्। न त आप्तपदभाजो भवितुमर्हन्ति। भारतेऽपीतरदर्शनापेक्षयाऽऽयुर्वेदस्य प्राथम्यमाङ्गित्वञ्च। प्रमाणाविर्भावानन्तरमेव प्रमेयसिद्धिः तथाचोक्तमभियुक्तैः 'प्रमेयसिद्धिः

1. Karl Pearson iu his, 'Grammar of Science' Says, "The man who classifies facts of any kind whatever, who sees their mutual relations and describes their sequences is applying the scientific method and is a man of Science.
2. "The scope of science is to ascertain the truth in every possible branch of knowledge. There is no sphere of inquiry which lies outside the legitimate field of Science. Karl Pearson in his 'Grammar of Science'.
3. Greece.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमाणाद्धि' । प्रमाणमेव नैयायिकानां मुख्यो विषयो यस्यारम्भकः न्यायसूत्रकर्ता गौतमश्श्रूयते । अनेन महर्षिणाऽक्षपादेन आन्वीक्षिक्यामन्येषां वेदानां प्रामाण्यमाक्षिप्य पुण्यतमस्यास्यायुर्वेदस्य प्रामाण्यबलेनैव पुनरुपपादितम् ।[4]

गौतमश्च चरकसंहिताया अधमर्णः प्रतीयते । चरक अनुमानस्य त्रैविध्यं[5] किन्तु तेषां नामकरणं 'पूर्ववत्, शेषवत्, सामन्यतो दृष्टवच्च' गौतमेनानन्तरं कृतम् । न्यायस्य पञ्चावयववाक्यशैल्याः वादपरिपाट्याश्च प्रारम्भिकं रूपं चरके दृश्यते । चरके प्रत्यक्षस्य परिभाषा[6] प्रारम्भिकी याऽनन्तरमक्षपादेन[7] परिष्कृता । एवमयमायुर्वेदः प्रमाणशास्त्रं प्रमेयशास्त्रञ्च । प्रमाणाधीनत्वात् सर्वविज्ञानानामस्य समेषां कारणत्वं साधितं भवति । विशेषतो निखिलभूमण्डलस्य चिकित्सा-विज्ञानानामस्योपजीव्यत्वमधस्तात् प्रदर्श्यते ।

[8]"ये च तादृशे पुरातनकालेऽपि आत्मनः शौर्य्येण वीर्येण धनसम्पदा तथा सफलविज्ञानानुशीलेनेनापि अतीवप्रसिद्धि गताः ते खल्वतिमहता प्रयत्नेन क्षतादिशोधनस्य, व्याधिवैकल्यप्रशमनस्यापि अनुशीलनं चक्रुस्तत्तेषां चिकित्साविधिरेव साधयतीति डाक्टर वाइजमहाशयः आचष्टे" ।

केचन प्रलपन्ति यदायुर्वेदस्योपजीव्यं यवनानां शास्त्रम् यतो हि सभ्यताया उद्गमः सर्वप्रथमं यवनदेश एव समपद्यत ।

अत्र विचार्यते यदि भारतीयैश्शारीरशास्त्रं यवनेभ्यो गृहीतम् तदैदद् भवितुमर्हति हैरोफिलस-[9]सम्प्रदायात् पूर्वम्, (यस्य कालः खीष्टपूर्वं चतुर्थशताब्ध्याम्) यतो हि अस्मिन् हैरोफिलस सम्प्रदाये नाडीतन्त्रस्य वर्णनं विशदतरं वर्तते । यदि भवतु हिप्पोक्रेटीज[10]महाशयात् पूर्वं यो हि तैश्चिकित्सा-

4. तथा च सूत्रं "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यं आप्तप्रामाण्यात्" न्या० द० 2. 1. 67 अस्य वात्स्यायनकृतं भाष्यम्, "किं पुनरायुर्वेदस्य प्रामाण्यम् ? यदायुर्वेदेनोपदिश्यते, इदं कृत्वा इष्टमधिगच्छति, इदं वर्जयित्वा अनिष्टं जहाति, तस्य अनुष्ठीयमानस्य तथाभावः सत्यार्थता अविपर्ययः······ दृष्टार्थेन आप्तोपदेशेनायुर्वेदेन अदृष्टार्थो वेदभागः अनुमातव्यः प्रमाणमिति ।

5. प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते । च० 1-11-21

6. आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते । व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निगद्यते । च० 1-11-20

7. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् । न्या० द०

8. A people who had distinguished themselves at such an early age by their power and riches as well as by their successful cultivation of the Scienee, may be supposed to have studied with much care the means of soccouring the wounded and maimed, & alleviating pain and curing diseases, the history of Hindu Medicine moves this to have been the case." Dr. T.A. wise in his 'Commentary on the Hindu system of Medicine' 1845.

9. Herophilus.

10. Hippocrates.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानस्य जनकः कथ्यते, (कालः ख्रीष्टपूर्वं पञ्चमशताब्द्यां)तर्हि आयुर्वेदशारीरं ह्निप्पोक्रेटिजशारीरापेक्षया विकसिततरम् ।

सर्वाधिक आक्षेपो दोषविज्ञानविषये परमत्र ब्रूमः। यवनशास्त्रे दोषचतुष्टयम्[11] परमायुर्वेदशास्त्रे दोषत्रयमेव। यावने तन्त्रे वातस्योल्लेखो नास्ति, भारते च सर्वेषु दोषेषु महत्तरमस्य स्थानम्[12] । रोगाणामुत्पत्तावपि मतभेदः । यवनशास्त्रे दोषवैषम्यं रोगः—दोषाणां मिथो मिश्रणेन रोगारम्भः। आयुर्वेदे तु दोषदूष्यसम्मूर्च्छनाजन्यत्वं व्याधेः । भारतीय त्रिदोषवादो भगवतो बुद्धस्य काले समादृत आसीत्[13] इति विनयपिटिकाज्ज्ञायते। महाभारतेऽपि[14] त्रिधातुवादस्योल्लेखो यस्य प्रत्नता सुनिश्चिता। न केवलं महाभारतेऽपि तु ऋग्वेदेऽपि[15] त्रिधातूल्लेखः। अथर्ववेदे रोगाणामुत्पत्तिर्जलवाय्वग्निभिरीरिता। बीजभूतमेतत् त्रिधातुराद्धान्तस्य ।

सर्वमेतदुपेक्ष्य सिलवन लेवीमहाशयो[16] यवनेभ्यश्चरकस्याधमर्ण्यं साधयति। तत्र पृच्छाम एवं चेच्चरकेण नाडीविज्ञानं कथं नात्मीकृतम् यवनानाम्? यवनेषु नाडीविज्ञानस्योपदेष्टा कास वास्तव्यः प्रेक्सागोरसमहाशयः[17] । हैरीफिलसमहोदयो जलघटिकायन्त्रेण नाडीसंख्यामजीगणत् । गैलेनभिषजः काले तु रोगिपरीक्षायाः महत्वपूर्णं साधनं जाता नाडीपरीक्षा। यदि चरक आधमर्णो यवनानां, सर्वप्रथममेवाग्रहीष्यन्नाडीविज्ञानम् । अहिफेनस्य प्रयोगो यवनदेशे द्वितीयशताब्द्यामक्रियत परमायुर्वेदस्य मूलसंहिताग्रन्थेषूल्लेखो नास्ति । भारते शार्ङ्गधरः प्रथमो लेखको यो नाडीपरीक्षां अहिफेनञ्च वर्णयति ।

वस्तुतो यवना एव भारतीयानामधमर्णाः। हिप्पोक्रेटिजमहाशयश्चतुर्दोषवादं अल्कमियोनतो[19] जग्राह यो हि समभूत् पाइथोगोरस इत्येतेषां सम्प्रदाये। पाइथोगोरसमहाशयश्च भारतीयानां ज्ञानमप्रत्यक्षतया जग्राह[20]। अप्रत्यक्षत्वञ्च मिश्रदेशीयपुरोहितानां मध्यस्थत्वात् । तेषामेव माध्यमेन भारतीयज्ञानगरिम्णो यवनदार्शनिकेषु संक्रमः।[21]

चरकसंहिताया विमानस्थाने व्यापन्नानां देशकालवायुजलानां प्रभावो वर्णितः। महच्चास्य साम्यं हिप्पोक्रेटिजमहोदयेन उपदिष्टेभ्यो वायुजलदेशेभ्यः। एकस्यैव तथ्यस्य विद्वद्द्वयेन पृथक् पृथगवलोकनमवधारणञ्च समाधिरत्र अथवा भारतीयविचाराणां यवनविचारशैल्योपरि प्रभावः ।

इत्यलं दर्शयितुमिङ्गितमात्रेणाऽऽयुर्वेदस्य सर्वविज्ञानोपजीव्यत्वम् विशेषतश्चिकित्साविज्ञानस्य ।

---

11. Blood, Phelgm, yellow bile and black bile.
12. पित्तं पङ्गु, कफः पंगुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ।
13. विनयपिटक (370–360 B. C. Phys Davids).
14. महाभारत XII–343–83–85.
15. ऋ० 1-34-6.
16. Sylvan Levi.
17. Praxagorus
18. त्रयोदशशतके पावरसीया कालस्य—Jolly
19. Alomaeon 20. Hopkins.
21. Dr. T. A. wise in his 'Commentary on the Hindu system of Medicine.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुरोधेन चरकसंहितायाः नवीनसंस्करणम्

(ले०—श्रीअत्रिदेवगुप्तः, विद्यालङ्कारः एम्. ए., आचार्यः, दयानन्द-आयुर्वेदिकमहाविद्यालयः, जालन्धरम्)

यदायुर्वेदे शुद्धमिश्रयोर्विवादः समुपस्थितः, तत एव प्रश्नमिमं विचारयन्नासम्—यदेतस्य विवादस्य समाधानं ग्रन्थप्रणयनमेव न किमु ? अथ च सहस्रद्वयात् पूर्वं प्रणीताः ग्रन्थाः अद्यतनीययुगस्य कृते पर्य्याप्ताः किमु ? किमु च चरकसुश्रुतौ ऋषिप्रणीतौ ? ऋषिप्रणीतौ चेत्, सुश्रुते जातिभेदेन चिकित्साव्यवहारवर्णनस्य को हेतुः ? काश्यपसंहितायाञ्च शूद्राय ब्राह्मीघृतदानस्य निषेधहेतुः कः ? यद्यपि चरके भेषजकल्पसिद्धौ ब्राह्मणभोजस्य विधेरुल्लेखो नास्ति, किन्तु, सुश्रुते वर्तते। विचारयता मया तत्त्वमेकं ज्ञातं, ये खलु शुद्धायुर्वेदस्योच्चैर्घोषं कुर्वन्ति, ये चैतन्निमित्तमतिव्याक्रान्ताः, तैरस्मिन्विषये नैकोऽपि ग्रन्थः प्रदत्तो न वा दातुमुत्सहन्ते। अतो विपरीतं समन्वयपद्धतिपोषकैर्ग्रन्थप्रणयनं विधाय भगवदात्रेयस्य वचनमेतच्चरितार्थीकृतं, "शास्त्रमेवादितः परीक्षेत, एतेन मयाऽधिगतं यदेषा सर्वा राजनीतिः, एते ह्यायुर्वेदात् केवलं यशोऽर्थञ्च प्राप्तुकामा न किमप्यायुर्वेदाय दातुं कामयन्ते। नूनमिमे प्रतिग्रहीतारो ब्राह्मणा एव; दाता तु एक एवासीत् स च दिवंगतः।

बहु विचिन्तयन्नहं पन्थानमेकमाविष्कृतवान्—यतो विवादसमाप्तेराशा बभूव। इतः प्रायस्त्रिंशद्वर्षपूर्वं दिवंगत-कविराज-यामिनीभूषणरायमहाभागेन अष्टाङ्गायुर्वेदमहाविद्यालये ह्यायुर्वेदाऽध्यापनाय विषयानुरोधेन पुस्तकानि विनिर्मितानि। तेन किलैकविषयसम्बन्धीनि पुनरावृत्तिमकृत्वा कृत्स्नानि वचांसि ह्येकस्मिन् स्थल एव संगृह्य पुस्तकानि रचितानि। दुःखाकरोति ह्येतद् यदद्य तानि नापणेषु लभ्यानि कस्मिंश्चित् पुस्तकालये पतितानि सन्तु नाम।

एतद् व्यतिरिच्य वाग्भट्टेन अष्टाङ्गसंग्रहनिर्माणे महत्वपूर्णं वचः समुदीरितम्। आदरणीयस्वर्गीयराजवैद्य—श्रीनन्दकिशोरमहोदयेनात्र योऽङ्गुलीनिर्देशः कृतः स मत्कृते प्रकाशरेखा वर्तते।

वाग्भटेनोक्तम्—"न मात्रामात्रमप्यत्र किमप्यागमवर्जितम्" इति। स एव ग्रंथः, स एव सन्दर्भः संक्षेपाय केवलं क्रमभेदः स्वीकृतः। सर्वमेतन्नूनं युगानुकूलम्।

युगानुरूपसन्दर्भस्यावश्यकतामनुभवता तेन पूर्वेषां वचसामेव क्रमः पुरः पश्चाद्वा विहितः, तस्य चाष्टाङ्गसंग्रहे नाक्षरमपि शास्त्रविपरीतं वर्तते। वचसाऽनेन मे चक्षुरुन्मीलितम्। मया चिन्तितम् कथन्न चरकसंहितायाः नूतनसंस्करणं विषयानुरोधेन संपादयामि ? अद्य या चरकसंहिता समुपलभ्यते, तया सह चतस्रो व्यक्तयः सम्बद्धाः—

१—उपदेष्टा वक्ता वाऽत्रिपुत्रोऽस्ति।

२—तन्त्रस्य प्रथमो निर्म्माताऽग्निवेशो भेलस्य सतीर्थ्यः।

३—प्रतिसंस्कर्त्ताऽस्ति चरकः, योऽर्धचरकसंहितामेव प्रतिसंस्कृतवान्।

४—शेषपूरकश्चास्ति दृढबलः, योऽन्यग्रन्थसाहाय्येन शिलोञ्छवृत्तिना 'कुतश्चिद् वाक्यानि' कुतश्चिच्च समग्रसन्दर्भं संगृह्य ग्रन्थममुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समपूरयत्, परमुत्तरस्थानमवाप्नोतुं सोऽपि नाशकत् ।

इयमस्ति (हं हो ! अस्मदीया शीर्षण्या यदि-ह्यस्ति न तत्क्वचिदिति गौरवेणातिरिक्ता आर्षीकृता परम्प्रमाणीभूताऽद्योपलभ्यमाना) चरकसंहिता ।

स्पष्टमेतद् 'अत्रिपुत्रवचसामेवैष संग्रहः । भेलसंहिताऽति नूनमत्रिपुत्रवचसां संग्रहः' । उभयोरपि संहितयोर्यत्र साम्यं दृश्यते, तत्र वैषम्य-मपि नास्ति न्यूनम्[१] । अनेन स्पष्टमस्ति, यन्नि-र्मातृभिस्संस्कर्तृभिश्च स्वस्मृत्या स्वबुद्ध्या च ग्रन्थो व्यलेखि ।

अपराऽपि महत्त्वपूर्णा वार्त्ता विद्यते, 'वाग्भट-नैषधयोरध्ययनादभ्युपगम्यते यदायुर्वेदज्ञानाय चरक-सुश्रुतौ विपुलप्रचारौ आस्ताम् । न तथा भेलः प्रचरितः । इयमेवात्र विस्मयस्य वार्त्ता:, यद् यश्चरको विपुलप्रचार आसीत्स तु लुप्तः, खण्डितो वा, परं यस्य नासीत् प्रचारः स भेलग्रन्थोऽद्यापि त्रुटितरूप उपलभ्यते ।

उपनिषदो न विलुप्ताः । ब्राह्मणग्रन्था अपि न प्रणष्टाः । चरको यः किलायुर्वेदवाङ्मय एक एव मूर्धन्यग्रन्थ आसीत्, विपुलप्रचारः सन्नपि महादेशाद् भारताद् विलुप्तः सर्वतः । यदाऽमुष्य वचनानि साम्प्रतिकोपलब्धायां काश्यपसंहितायां भूम्ना दृश्यन्ते ।

अत्रिपुत्रस्य वचांस्येवाग्निवेशेन भेलेन च संगृ-हीतानि । यथा-भगवतो बुद्धस्य वचनानां संग्रह-स्तदुत्तरकाले तदीयशिष्यप्रशिष्यैर्व्यधायि । सम्रा-जाऽशोकेन च प्रथमां सङ्गीतिं (बौद्ध परिषदं) आहूय तद्वचनानि विषयानुक्रमेण पृथक्शो निबद्धीकृतानि, येन 'त्रिपिटकं'–त्रयः पिटकाः–निर्मिताः–एको विनयपिटकः, द्वितीयोऽभिधान-पिटकस्तृतीयश्च सुत्तपिटकः । एषु पिटकेषु विषय-क्रमेण भगवतस्तथागतस्य वचसां सन्निवेशो वर्त्तते ।

इमे द्वे वार्त्ते विचारिते मया । वराहमिहरस्य वचोऽपि स्मृतं, यत्—

"म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।
ऋषिवत्तेऽपि पूज्यन्ते किम्पुनर्वेदविद्द्विजः ॥"

विचार्य वेदमेव समुचितमाकलितं, यदुपलब्ध-चरकसंहिताया विषयानुसारि संस्करणं प्रकाशनीय-मस्ति । प्रस्तुतां भेलसंहितां काश्यपसंहितां च सन्तुलयता मया द्रढीकृतोऽयं विचारो भूयसा–यद् वचनेषु परिवर्त्तनमकृत्वा तेषां तेषां विषयानुसारि स्थान परिवर्त्तनेनैव कार्यं सेत्स्यति ।

यथा हि पूर्वाचार्य्यैश्चतुर्णां वेदमन्त्राणां देव-तानुसारं संग्रहं विधाय दैवतसंहिता निर्म्मिता; यस्यां प्रजापतिनाऽश्विभ्यां वा सम्बद्धा मन्त्रा एकस्मिन्नेव स्थले समुपलभ्यन्ते; ये मन्त्रा इतर-स्मिन्वेदे पुनरावर्त्तितास्ते नात्र पुनरुक्ताः । केवलं तेषां प्रतीकः पादटिप्पण्यां प्रदर्शितः । एवङ्करणेन चतुर्णामपि वेदानां मन्त्राणां देवतानुसारमेकत्र संग्रहो द्रष्टुं सुगमः समभवत् । अनया दृष्ट्या मया चरकसंहिताया नूत्नं संस्करणं कर्तुमारब्धम् । चरक संहिताया विमानस्थानस्य जनपदोद्ध्वंसनीयेऽध्यायेऽग्निवेशस्यायम्प्रश्नः प्रसंगेन सह नैव सङ्ग-च्छते । यथा—"किन्तु खलु भगवन् ! ज्वरितेभ्यः पानीयमुष्णं भूयिष्ठं प्रयच्छन्ति भिषजो न तथा शीतम्, अस्ति शीतसाध्यो ज्वरकर इति । एवं खलु विमानस्थानस्य सप्तमाध्याये क्रमीणां, तेषां चिकि-त्सायाश्च वर्णनं प्रकरणेन सह न संवदति ।

मन्ये, एतादृशा अपि पण्डितास्सन्ति, ये वेदेषु 'टेलीफोन, एटमबम' प्रभृति नूत्नाविष्कारजातं

१. अत्रिदेवकृतः, 'सांस्कृतिक दृष्टि से चरकसंहिता का अध्ययन' ग्रन्थोऽवलोकनीयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यन्ति, निरूपयितुं च प्रभवन्ति। वाक्शूरा इमे। एतेषां विषय एवात्रिपुत्रेण प्रोक्तमस्ति—

"दम्भिनो मुखरा ह्यज्ञाः प्रभूताबद्धभाषिणः।
भवन्त्यनाप्ताः स्वे तन्त्रे, प्रायः परविकत्थकाः ॥"

विल्हणकविनाऽपीदृशानधिकृत्य सूक्तमस्ति—

"कर्णामृतं सूक्तिरसं विमुच्य,
दोषे प्रयत्नः सुमहान्खलानाम्।
निरीक्षते केलिवनं प्रविश्य,
क्रमेलकः कण्टकजालमेव ॥"

स्वजीवनस्य त्रिंशद्वर्षाणि एतेषां मध्य एव व्यतीतानि। अत एषां विचारमुत्सृज्य एतादृश-संस्करणकरणस्य निश्चयं कृतवानस्मि।

उदाहरणतः, चरकसंहितायाः सूत्रस्थानस्य द्वितीयाध्याये या यवाग्वास्सन्ति ता अन्नपाताध्यायेत सह गन्तुं संवदन्ति। तृतीय आरग्वधीयोऽप्यध्यायो योगानुसारं विभागमर्हति, तथा हि-कुष्ठसम्बन्धिनो योगाः कुष्ठे, शिरोर्त्तिहरा लेपास्त्रिमर्मीये, उदररोगसम्बन्धिनश्चोदावर्त्ते प्रकरणानुसारं वा निवेशमर्हन्ति; यथाऽष्टाङ्गसंग्रहे सन्निवेशितास्सन्ति।

ऋषिप्रणीतविषयेऽपि तथ्यद्वयं स्पष्टीक्रियते— ऋषयो भारत एव जनिं लप्स्यन्ते, ते हिमालय एव च तपस्यन्ति; हिमवानयं देवभूमिरित्येवम्विधा मान्यता भारतनिवासिनां चेत्स्वाभाविकम्। यूरोप-वासिनोऽमेरिकानिवासिनो वाऽप्येवं स्वीकुर्वन्तु, इति नास्ति कोऽपि शाश्वतो नियमः। 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इत्यभिप्रायकं वचो भारतनिवासिनां कृते यथा महत्त्वशालि, तथैव यूरोप-अफ्रीकावासिनां कृतेऽपि स्वमहत्त्वं न जहाति। भगवत्या भागीरथ्या यन्महत्त्वं भारतीयानां कृतेऽस्ति, तदेव नीलनद्यां माहात्म्यं मिश्रदेशाभिजनानां कृते वरीवर्त्ति।

किञ्च हिमालय एव तपोभूमिरिति कथम्? एको वैज्ञानिकः स्वकीयरसायनशालायां निर्विकल्पयोगेन मानवान्रोगमुक्तान्विधातुं दिवानिशं कार्यं करोति, अन्ते च पेनिसिलीनमाविष्करोति, किमदस्तपः हिमालये गत्वा मन एकाग्रीविधाय समाधिविधानान्न्यूनतरमहत्त्ववत्? किमु, हिमालयस्य ऋषि ऋषिरस्ति, प्रयोगशालायां साधको नर्षिः। "तपःप्रभावाद्दषयः शरण्यममरेश्वरं ददृशु"स्तदा रसायनशालायां दिवानिशं मानव-कल्याणाय (प्रजाहितहिताय) स्वात्मानमुत्सृजन्नपि तपस्वी मनस्वी लौकिकचक्षुषा पेनिसिलीनं पश्यति। यत् प्रतिदिनं लक्षातीतजनतायाः कल्याणं करोति। परमभद्रस्य वाग्भटस्य वचसां सारोऽयमेव—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुखभाग्भवेत् ॥

भगवांस्तथागतः स्वकीयस्य नैकाकिनः कल्याणं वाञ्छति स्म। (नैकः सुखी न सर्वत्र विश्रब्धो न च शङ्कितः, इत्यायुर्वेदः) भगवती श्रुतिर्निगदति—"केवलाघो भवति केवलादी", भगवत्यां गीतोपनिषदि च भगवद्वाक्यम्—"अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्"। अनया दृष्ट्या भारतीयै ऋषिभिर्यूरोपीयैश्च तपस्विभिर्निवातस्थनिष्कम्पदीपेनेव तपद्भिर्जनकल्याणाय ज्ञानप्रकाशः प्रादायि। उभाभ्यामपि ऋषिकर्म कृतम् (ऋषिर्दर्शनात्)। उभावपि मया प्रणम्येते। इदमेवास्ति वराहमिहरस्य वचनम्।

अनया दृष्ट्या समनुपश्यन्नहमन्वभवम्-चरकसंहिताया विषयानुसारिसंस्करणस्यापेक्षाम्, यथासम्भवं; सममेव, पादटिप्पण्यां वा, काश्यपसंहिताया भेलसंहितायाश्च समानार्थकानि वचांस्यपि दातुं युज्यन्ते। एक एवात्र भयोऽस्ति ग्रन्थकलेवरवृद्धेः। उपयोगितायाः सत्त्वेऽपि प्रकाशन-काठिन्यस्यास्ति महान् खल्वार्थिकः प्रश्नः। अस्मा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतोः प्रथममिदं संस्करणं चरकसंहिताया विषयानुसारि कर्त्तुमेव विनिश्चितम् ।

इह खलु विचारणीयमस्ति यत्—तदस्ति, विरोधस्य प्रश्नः' । विरोधस्तु समेषां तत्त्वज्ञातानां भवति—"वेदमन्त्राणां 'हिन्दी' भाषान्तरीकरणस्य," स्वरं विहाय तेषां प्रकाशनस्य, दैवतसंहितारूपे मन्त्रसंकलनस्य च विरोधः समभवत् । अद्यत्वे संस्कृत एम० ए० परीक्षासु सर्वत्र विश्वविद्यालयेषु वेदानामाङ्ग्लभाषार्था एव मान्यास्सन्ति, त एव प्रचलन्ति । एतेषामाधारेणैव मुख्यतोऽनुसन्धानं क्रियते । संस्कृतस्येतिहासोऽपि रसतरकीथस्यैव प्रामाणिको मन्यते । अतः, यदा वर्षमियन्तोऽग्रेसराः समस्तदाऽदः संस्करणमपि नूनमुपयोगितादृष्ट्या विचारार्हम् । अस्तु तावत्—

आर्यभद्रेण वाग्भटेन अष्टाङ्गहृदयस्योपसंहारे वैद्यम्मन्यानां हठधर्मितायाः स्पष्टचित्रणमन्ते कृतमेव, तेनेदं स्पष्टं यद् एतद्विधा एतद्विधवैद्यानां विचारा नोऽद्यतनीया, उत बहुप्राचीनाः । ते खलु न सुभाषितं पश्यन्ति, कर्त्तुर्नाम्नो वा सह संश्लिष्टास्सन्ति । न केवलं वैद्यानां कृत एवायमुपालम्भः; परमन्येषां पण्डितम्मन्यानां सामाजिकानां कृतेऽपि तथाविधः । यतस्ते पुराणपन्थिनो हितस्यापि नूतनस्य विरोधिनः (अन्धानुयायिनः) आसन्, तेषां कृत एव महाकविना कालिदासेन 'मालविकाग्निमित्रे श्लोकोऽयम्प्रोक्तः—

पुराणमित्येव न साधु सर्वं,
न चापि सर्वं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते,
मूढः परप्रत्ययनेयबुद्धिः ॥"

इदमेव तथ्यं स्वर्गताचार्य-श्रीयादवजीत्रिविक्रमजी महानुभावैः स्वजीवन एव स्वनुभूतम् । सम्भवतः आर्षस्यायुर्वेदस्य मिश्रपाठ्यक्रमेत्यभिज्ञयाऽपनामीकृतस्य पक्षपोषकत्वाद् हेतोरेव ते विरोधं सोढुं विवशा अभूवन् । परं (स आसीद् युगद्रष्टा ऋषिः) तेन सत्यानुयायिनाऽऽयुर्वेदार्थं पदन्यासः कृतः । आर्षीयं शिक्षाप्रणाली तस्यैव महर्षेः स्थापना । यतश्चरकसंहिताया विषयानुसारि नूतन संस्करणकरणस्य विचार उद्गतः ।

अहमेतदप्यवैमि—येऽस्य विरोधमाचरिष्यन्ति, ते नैकमपि पुस्तकं, नैकमपि ह्यक्षरं आयुर्वेदवाङ्मयाय प्रदास्यन्ति । तेषा मयं विरोधः, विरोध एव स्थास्यति । रचनात्मकं सक्रियं कार्यं न ते करिष्यन्ति; यथा नाद्यपर्यन्तं तैः कुतोऽपि कथञ्चित् किञ्चिदपि कृतम् ।

(अन्यत्र विनाशाद् विघटनाद् वाऽऽयुर्वेदस्य 'शुद्धायुर्वेद' इत्याख्ये सङ्कीर्णा नार्षाहिताज्ञानात्मकमतवाद प्रचारेण, स्वार्थान्धतया वा, धर्मान्धतया वा, हठधर्मितया वाऽन्धीकृतलोकलोचनप्रयत्नेनेति सन्तो रजस्तमोनिर्मुक्ता आप्ता शिष्टा विबुद्धा असंशयवाक्या देशकालप्राणाः सार्वभौमशाश्वतायुर्वेदपर्युपासनैकव्रता मनस्विनस्तपस्विनो विमर्शयन्तु ।—सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमायुर्वेदप्रचारः क्रियताम् ?

(ले०—श्री श्रीनारायणशास्त्री, ५७, छितवापुर रोड़, लखनऊ)

देशस्य प्रतिशतं नवतिः जनानां कामयते यत् आयुर्वेदस्य समुत्कर्षो भवेत् स च राष्ट्रियचिकित्सापदं लभेत्। पारतन्त्र्यपाशविमुक्तं कर्तुं समर्था देशे सर्वाधिकप्रभावसमन्विता संस्था 'कांग्रेस' नाम्नी राष्ट्रियप्रशासनस्याधिष्ठात्री विद्यते। सैवेयं संस्था या स्वकीये एकस्मिन्नधिवेशने वार्षिके एतदाशयात्मकं प्रस्तावं पारितवती यत् "देशे स्वतन्त्रे जाते आयुर्वेदस्यैव कृते राष्ट्रियचिकित्सापदं दास्यते; तस्य च समुन्नत्यै सम्यक् प्रयासाः करिष्यन्ते! इति।" आयुर्वेदः स्वीयेन वैशिष्ट्येन नैव तत्पदमधिगन्तुमीष्टे। यतः तस्मिन् समस्तचिकित्सापद्धत्यपेक्षया स्पष्टतावैज्ञानिकतौदार्यादयः गुणाः प्रकर्षेण राराज्यन्ते।

विविधगुणगणसमन्विते आयुर्वेदे सत्यपि सामर्थ्ये हन्त! नानेन तादृशं गौरवं समुपलब्धं यदा हि पूर्वोक्तगुणेषु एकोऽपि गुणो यं कमपि समुन्नतिशिखरमारोपयितुं समर्थः। आयुर्वेदस्यानुकूलतां प्रतिकूलतायां परिणमयितुं विविधानि कारणानि कथ्यन्ते यथा हि, शासनतन्त्राधिकारिषु निश्चयं प्रति अपरिपक्वता; कथनप्रयोगयोरसामञ्जस्यम्; शासनचिकित्साविभागस्योच्चपदेषु आयुर्वेदविरोधिनामुपस्थितिः; वैज्ञानिकानुसंधाने तत्प्रचारे च आयुर्वेदज्ञानां स्वल्पतुष्टिः औदासीन्यं च; तथा आयुर्वेदस्य केनचित् प्रकारेण विश्वव्यापकत्वेऽपि तस्यान्ताराष्ट्रियसंघटनाभावादयः।

मया तु अनुमीयते यदुक्तानि सर्वाण्यपि कारणानि स्वेषु स्वेषु स्थानेषु वास्तविकानि। चेदाशु तानि कारणानि न निराक्रियेरन्–तर्हि संभाव्यते यत् पराधीनतायां कथंचित् श्वसन्नप्यायुर्वेदः स्वाधीनतायां म्रियेत।

उक्तानामन्येषां कारणानामकिञ्चित्कररत्वेनाविचारणीयत्वेऽपि प्रधानतमे आयुर्वेदस्यान्ताराष्ट्रियसंघटनाभावरूपे कारणेऽधुना मया मीमांस्यते।

प्रतिष्ठा लोकप्रियता च सुपरिचयमेवापेक्षेते। यतः परिचयाभावे विशिष्टानामपि उपेक्षा जायते। विषयेऽस्मिन् न केषामपि वैमत्यम्। आधुनिके युगे प्रचारस्य महती आवश्यकतास्ति। संसारे अनेकेषां जनानां कल्याणाय आयुर्वेदस्याभिवृद्धये अन्ताराष्ट्रियप्रचारस्तु नितरामपेक्ष्यते। एतादृशाय प्रचाराय क्षेत्रमपि विस्तीर्णं, शोभनावसरोऽपि समुपस्थितः। क्षेत्रन्तु एवंविधं विस्तीर्णम् यत् संसारे अनेके देशाः एतादृशाः सन्ति येषु साम्प्रतमपि आयुर्वेदचिकित्सापद्धतिः केनचिद्रूपेण वरीवर्ति तेष्वपि इमे देशाः भारत-नेपाल-चीन-वर्मा-थाईलैण्ड-श्रीलंका-कम्बुज–लाओस–जापान–इण्डोनेशिया–मलयेशियादयस्तु एवंविधाः यत्र आयुर्वेदेन राष्ट्रियसाहाय्यम् मान्यता च प्राप्ते।

आयुर्वेदस्यैव एकं रूपं यूनानी चिकित्सास्ति या ईरान-ईराक-अफगानिस्तान-मिश्र-लेबनानप्रभृतिषु विविधेषु पाश्चात्येषु एशियायी–अफ्रीकीयदेशेषु प्रसरन्त्यास्ते। अपरञ्च सम्पूर्णे संसारे आयुर्वेदचिकित्सापद्धतेः प्रचारसूत्राणि समुपलभ्यन्ते। प्रायः एतादृश्यः वार्ताः यथासमयं पुरतः समायान्ति। आयुर्वेदस्यान्ताराष्ट्रियसंघटने नायमपि लाभो भवेत् यत् देशेषु–विदेशेषु च आयुर्वेदं प्रति अभिनवा जिज्ञासा कल्याणकामना च समुदीयेयाताम्। येन तत्रत्यं शासनं तत्तद्देशीयजनाश्चाधिकेन मनोयोगेन देशीयचिकित्साविज्ञानं प्रति दत्तावधानाः भवेयुः। यतः आधुनिके युगे कस्याश्चित् अन्ताराष्ट्रियवार्ताया एव विशिष्टं महत्त्वं स्वीक्रियते।

विभिन्नदेशेषु पारस्परिकेण साहाय्येन आन्दोलनस्य आर्थिक्यः समस्याः योग्यानां कार्यकर्तॄणां समस्याः सारल्येन समाधीयन्ते। विश्वस्यानेकेषु देशेषु आयुर्वेदो विद्यते अतः तत्रत्यानां विदुषां स्वीया विविधा बहुमूल्या अनुभवाः भवेयुः। संप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्भावात् तेषां लाभाः व्यापकरूपेण न संजायन्ते । प्रत्येकेनान्ताराष्ट्रियसंघटनेन ज्ञानानां आदान-प्रदानयोः मार्गः प्रशस्तो भविष्यति । अनेन चायु-र्वेदस्योपयोगिताऽपि प्रकामं वर्धिष्यते ।

संघटनेन चानेन विभिन्नदेशेषु वैज्ञानिकक्षेत्रा-तिरिक्तेषु, अन्यान्यविषयेष्वपि सौहार्दमन्योन्याश्र-यत्वं बन्धुभावश्च एधिष्यन्ते । ये देशाः सम्प्रत्यपि केनचित् कारणेन अस्यायुर्वेदविज्ञानस्य अभिवृद्धये न सम्यक् दत्तावधानाः सन्ति तेषामपि विषयेस्मि-न्नुत्साहो भविता ।

अन्ताराष्ट्रियसहयोगेन विज्ञानतरोः विभिन्नासु शाखासु कियता वेगेनोन्नतिः संभवतीत्यस्माभिः प्रायः दृश्यते श्रूयते च । एलोपैथिकचिकित्सापद्धतेः विश्वव्यापकतायाः कारणं पाश्चात्यानां राजनीतिक-विस्तारस्त्वस्त्येव अन्ताराष्ट्रियविस्तारस्य संघट-नस्य च कारणतायामपि नाल्पीयस्त्वम् ।

अन्ताराष्ट्रियसहयोगस्य भावनया रचनात्मक-कार्यक्रमान् संचालयितुं यादृशं सौविध्यमधुना सर्वत्र दृश्यते न तादृशं कदाप्यभूत् । अतः आयुर्वेदस्यापि अन्ताराष्ट्रियसंघटनान्दोलनयोः समुचितोऽवसरो वर्तत एव ।

संघटनमिदं कथं भवेत् केन च क्रियेत इति प्रश्नः समुदेति अत्रोच्यते । कार्यमिदं प्रकारद्वयेन संभाव्यते । शासनपक्षतः सार्वजनीसहयोगपक्ष-तश्च । शासनपक्षविषये विभिन्नानि प्रशासनानि कार्यमिदं कर्त्तुं शक्नुवन्ति । संयुक्तराष्ट्रसंघ अफ्रे-शियायीसंघादयश्चापि आयोजनमिदं पूरयितु-मर्हन्तीरन् । तेषां कृते नात्र काठिन्यं यतः सम्मेलनानि तु जायन्त एव कार्यक्रमे केवलं विषयस्यैकस्य वृद्धिरेवापेक्ष्यते । एतस्य कृते अतिरिक्ताया आर्थिक-व्यवस्थायाः प्रश्नोऽपि न समुदेति । त्रुटिस्तु एता-दृशी एव यत् तत्रत्येषु कार्यकर्तृषु न कोऽपि एवंविधो भवेत् यस्य मनसि पीडितमानवतायाः रक्षणे प्राचीन चिकित्सापद्धतेः कीदृशं सामर्थ्यं इत्यनुमितिर्न जायते । एतेषु स्थानेषु विषयस्यास्य कृते प्रयासः सार्वजनीनपक्षत एव करणीयः । आयुर्वेदोत्कर्षं कामयमानानां जनानां मेलनेन पत्रव्यवहारादिना च प्रयासः आरब्धव्यः ।

श्रीलंकाशासनेन गतवर्षे एव स्वदेशे अन्ता-राष्ट्रियायुर्वेदिकानुसंधानकेन्द्रस्य (श्री भंडारनायक-अन्ताराष्ट्रिय-आयुर्वेदिक-अनुसंधानकेन्द्रं, कोलम्बो) स्थापना विहिता एतस्य महतः कार्यस्य कृते तत् शासनं आयुर्वेदजगतः श्रद्धास्पदम् । विश्वस्य सर्वेषा-मायायुर्वेदानुरागिणां परमं कर्तव्यमिदं यत् ते सर्व-तोभावेन केन्द्रस्यास्य यथाशक्ति साहाय्यं कुर्वीरन् ।

सार्वजनीनपक्षतः एतादृशं संघटनं शक्यते कर्तुम् । तदर्थं संसारस्य विभिन्नैः देशैः मान्यता सहायता च पार्येते विधातुम् । अधुना रेडक्रास, विश्वबौद्धसंघ,-रोटरीक्लब,-वाई० एम० सी० ए०, आर्यसमाज, रामकृष्णमिशनादयः विविधाः संघाः संसारे अन्ताराष्ट्रियस्तरेण संघटिताः कार्यं कुर्वते । आयुर्वेदसंघटनस्य कृते एतेषां सहयोगः लब्धुं शक्यते । विशिष्टां आशा तु तेषां प्रवासिनां भारतीयानां अस्ति ये संसारस्य विविधेषु भागेषु निवसन्ति प्रतिष्ठितं जीवनं च यापयन्ति । यतस्ते विषयेऽस्मिन् सततं सचेष्टाः भवन्ति यत्र भारतस्य भारतीयतायाश्च स्वल्पोऽपि सम्बन्धो विद्यते ।

अत्र मदीयोऽयमनुरोधः यत् कार्यमिदं विधातुं भारतीयचिकित्सापरिषदः (बोर्ड आफ् इण्डियन मेडिसिन) अखिलभारतीयं सम्मेलनं भारतीय-शासनस्यायुर्वेदविभागश्च एकैकशः मिलित्वा वा सार्वभौमायुर्वेदसंम्मेनलस्याह्वानं कुर्वीयाताम् यत्र संसारस्य विभिन्नदेशस्थानामायुवर्दे संघटनानां तदनुरागिणाञ्चोपस्थितिः स्यात् एवमस्या योज-नायाः स्थायित्वं निश्चीयेत ।

मदीयोऽयं द्रढीयान् विश्वासः यत् आयुर्वेदम्य हितं कामयमानाः महानुभावास्तदर्थं विचारयन्तु तदुत्कर्षं प्रति प्रयासं विदधतु । एवं स्यात् तर्हि स्वीयं निबन्धमिमहं कृतार्थं मन्स्ये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यगुण-विज्ञानम्

(ले०—आचार्य श्रीविश्वनाथद्विवेदि B. A. आयुर्वेदशास्त्राचार्याः,
स्नातकोत्तर-प्रशिक्षण-केन्द्र-जामनगर-द्रव्य-गुण-विभागाध्यक्षाः)

परिचयः—द्रव्यगुणविज्ञानं किल द्रव्याणां गुणधर्मतत्वानामध्ययनाय नियतं विस्तृतं शास्त्रम्। देहस्योपरि एकौषधिप्रयोगेण वा जायमानप्रभावा अनेन विज्ञायन्ते।

पुराकाले भारतीयवैद्याचार्यैरस्य सम्यगध्ययनाय रस-गुण-वीर्य-विपाकप्रभावाः पञ्च पदार्थाः प्रकल्पिताः। द्रव्यस्य सामान्यमात्राप्रयोगेण अतिमात्रिकोपयोगेन वा देहे कीदृक्प्रभावः समापततीति तैरधीतम्। एवं चिकित्साकर्मणः प्राक् प्रत्येकेण भिषग्बुभूषुणा रसादिपञ्चकद्वारेण द्रव्यगुणानामध्ययनमनिवार्यमासीत्।

इतः कियतीभ्यः शतीभ्यः केवलं भेषजकर्मणां गुणानां वा अध्ययनं सुपर्याप्तं मन्यमानाः अद्यतनीयाः भिषग्वराः पूर्वेषामाचार्याणामध्ययनशैलीं परित्यजन्ति स्म।

अमुं विषयं साम्प्रतिकपाश्चात्यभिषग्जनाः अपि मैटिरियामेडिका (Materia Madica) इति अभिदध्युः। केषाञ्चिद् भेषजानां कर्मणोऽध्ययनमेव तेषां लक्ष्यमासीत्। कतिभ्यश्चिद् वर्षेभ्यः एतन् फार्मेकोलोजी (Pharmacology) इति संज्ञया व्यवह्रियते–अस्यापि त्रयः प्रविभागाः सन्तिः (१) फार्मेकोडाइनेमिक्स(Pharmacodynamics) (२) थेराप्युटिक्स (Tharaputics) (३) टाक्सिकालोजी (Toxicology) इति।

(१) भेषजकर्मविज्ञानम् (फार्मेकोडाइनेमिक्स)

अत्र भेषजकर्मणां विशिष्य विवेचनं भवति।

(२) आमयिकप्रयोगविज्ञानम् (Therapeatics):—

रोगप्रतिकाराय भेषजप्रयोगोऽत्र अधीयते। अस्यापि विभागद्वयम्:—

(१) भेषजचिकित्सा (Pharmacotherapy)

(२) रसचिकित्सा (Chemotherapy)

१—भेषजचिकित्सा (Pharmacotherapy)

भेषजचिकित्सायाः सम्बन्धः शारीरक्रियया सह वर्तते, यस्याः, मान्द्ये न पुनर्वर्धनं कर्तुं शक्यते, क्रियापरिवर्तनेन व्याधि र्वार्यते।

२—रसचिकित्सा (Chemotherapy)—

देहस्य शत्रून् परोपजीविनो विनाश्य विशिष्ट रोगहेतून् निवारयति।

३—विषविज्ञानम् (Toxicology)—

भेषाजानामनुपादेयाः क्रियाः शरीरोपरि संभाव्यमाना अनेन ज्ञायन्तेतासां प्रतिबंधश्चाभिधीयते। प्राच्यायुर्वेदानुशीलनेन वयमितोऽप्यधिकं ज्ञानमर्जयितुं क्षमाः स्म। भेषजानां देहे कर्म तेषां वीर्यविपाकानुसारं किं भवतीत्यत्र वर्णितञ्चरम्।

पाञ्चभौतिकद्रव्याणि शरीरे पाचकाग्निना विलीय परमाणुषु विभज्य पुनर्नूतनपाक(Chemical Changes) कर्मणा परिवर्तितकर्माणि भवन्ति। कटुतिक्तद्रव्याणि कानिचित् न सन्ति उष्णवीर्याणि केषाञ्चिद् गुणानां परिवर्तनद्वारेण तानि शीतवीर्याणि भवन्ति। शीतवीर्याणि चैवंविधिना उष्णवीर्याणि जायन्ते—ईदृशानि द्रव्याणि रसचिकित्सायां समाविश्यन्ते। इमानि खलु विकृति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषमसमवेतद्रव्याणि भेषजचिकित्साद्रव्याणि तु प्रकृतिसमसमवेतद्रव्याणि । अथ च प्राच्यार्वाच्य-द्रव्यगुण-शास्त्रयोर्न कोऽपि भेदो दृश्यते ।

ऐतिहासिकं विवरणम्:—

नात्र कोऽपि विवादो यत्-आदि मानवेन जीवन-निर्वाहार्थं सर्वप्रथमं वनौषधीनामुपयोगः कृतः । शनैः शनैराहार्यद्रव्याण्यभिज्ञाय तेषान्तेषां लाभहान्योस्तारतम्यमपि तेनाभिज्ञातम् । एशवीयवत्सरात् सहस्राब्दपूर्वमेतदभिज्ञानमातीत् । वैदिक-संस्कृति-काले समुन्नताऽऽसोन्मानवीया सभ्यता । समाज-राज्य-जाति-धर्म-व्यवस्थादिभिस्सह सुशृङ्खल-चिकित्सा-व्यवस्थाऽपि ववृते । वैद्यः समाजस्य सुप्रतिष्ठितश्चाङ्गो बभूव । स भिषगित्युच्यते स्म । देवो द्विजाति मुनिः ऋषिर्वा भिषक् शब्देन सुबहुमानास्पदं गण्यते स्म । विप्रशब्द[१] इव वैद्यशब्दो भिषक्शब्दो[२] वा विशिष्टविद्वदर्थे प्रतिष्ठित आसीत् । क्रमेण ऋग्यजुःसामाथर्व-रूपे वेदविभागे भिषजां गौरवे वृद्धिरजायि । चतुष्प्रकाराया[३] श्चिकित्सायाः वर्णनमथर्ववेदे दृश्यते--आथर्वणी, आंगिरसी, दैवी, मनुष्यजेति । भिषजः सप्तशतेभ्योऽधिकभेषजानां व्यवहारं कुर्वन्ति स्म । भेषजानां गुण-धर्म-प्रयोगः, विविधकृमि-कीट-पतंगादिभिः रोगोत्पत्तिस्तत्परिहारजिज्ञासा, चिकित्सा च तत्र समुपलभ्यते । विश्वस्य कस्मिन्नपि प्राचीनतमे वाङ्मये नेदृग् ज्ञान-संग्रहो दृश्यते । अथर्ववेदकाले मूलिनी[१] फलिनी. पुष्पिणी, अपुष्पा, प्रस्तृणती,[२] विशाखा, एकशृंगा काण्डिनी, पुरुषजीवनी, प्रतन्वती, वैश्वदेवी स्तम्बिनी त्यादि बहुविधमाङ्गिकमभिज्ञानमासोत् ।

वैदिकयुगे ह्येकौषधप्रयोगो भूयान् दरीदृश्यते । उद्भिजप्रयोगमतिरिच्य प्राणिजखनिज योरपि द्रव्ययोः प्रयोगः क्रियते स्म । शंख-मणि-मुक्ताप्रवालविषाण-दुग्ध-धृतादीनां प्राणिजानां, दाक्षायणी-हिरण्य-नाग-वंग यशदताम्र-लौहादीनां खनिजानामभिज्ञानमासीत् । युद्धेषु तैरार्यैः त्रिस्कन्धबज्रप्रयोगः, ध्वाङ्क्षी (अश्रुगैस) शतघ्नी, (बंदूक) कृधुकर्णी (तोप) प्रभृतिभिरयोध्यत । किन्तु बहुतरवैदिक ग्रंथविलोपात् तेषां तेषां निर्माणकलाः' रासायनिकप्रयोगाः भेषजानां मिश्रयोगाश्च विलुप्ताः ।

तदानीं प्रयुज्यमानाः पंचाशदुत्तरशतं काष्ठौषध्यः, तासां गुणोल्लेखश्च प्राप्यते । येषु रोगेषुप्रयोगास्ते तु ह्यधस्ताल्लिख्यिन्तेः- कुष्ठ-प्लेग-गण्डमाला-यक्ष्मज्वर-प्रसूतिज्वर-बालग्रह-कास-श्वासादयः । एषां रोगाणामुत्पादकहेतुना त्रिदोषेण सह सम्बन्धोऽपि ज्ञायते । परन्तु साम्प्रतिक-द्रव्य-गुण-सिद्धान्त-विचारणामनुसृत्य प्रवर्तिते विचारे सङ्कलने चैकौषध-प्रयोगवर्णनमुपलभ्यते । द्रव्यपरिचयसम्बन्धि-साहित्यन्तु प्रभूतं यथाः-द्रव्यरोपण-कृमिसम्बन्धिभू-बीजतुं वपनविधानप्रभृतीणां, पत्र-पुष्प-फल-मूलत्वक्-सार-निर्य्यास क्षीरादीनाञ्च सामान्य प्रयोगोऽपि ज्ञायते । परमेतन्न क्रमबद्धम् प्रत्युत यत्र-तत्र विकीर्णं प्राप्यते ।

वैदिक युगोत्तारसाहित्ये द्रव्यगुणविज्ञानं प्रगतिशीलं दृश्यते । संहिताकालोऽयमत्र भेषजानां साङ्गोपाङ्गं सैद्धान्तिकं ज्ञानं दृश्यते । धन्वन्तरि संहिता, आत्रेय-संहिता अग्निवेश संहिता-भेलसंहिता, जतुकर्ण-

१-२. यत्रौषधी समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषक् रक्षोहा मीवचातनः । ऋक् ।

३. आथर्वणी आंगिरसी दैवी मनुष्यजा उत, वनस्पतयः प्रजायन्ते यदा त्वं प्राण जिन्वसि ।।अथर्व।।

४. या फलिनीर्या अफला अपुष्पा याश्चपुष्पिणी । बृहस्पतिप्रसूतास्ता नो मुंचं त्वं हसः ।।ऋक्।।

५. प्रस्तृणती स्तम्बिनी रेकश्टृंगा प्रतन्वतीरोषधीरातदाभि । अंशुमतीः काण्डिनीर्या विशाखाह्वयामिते वीरुधो वैश्वदेवीरुग्राः ।। अथर्ववेद ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पराशर हारीतक्षारपाणीनाञ्च संहिताः विशेषेणोल्लेखनीयाः ।

एता अपि प्रायो विलुप्ताः । कासाञ्चित् प्रतिसंस्करणानि यथाः-चरक-सुश्रुत-भेल-हारीत-काश्यप-संहिता दृश्यन्ते । उत्तरकाले-अष्टाङ्गहृदयाष्टाङ्गसंग्रहो, भावप्रकाशादयः लोकोपयोगि-सामयिक-संग्रहग्रन्थाः । एतेभ्यो द्रव्यगुणविज्ञानस्थ प्रगतिर्ज्ञायते । मूलसंहितानां स्वरूपज्ञानाभावेऽपि तासु काश्चिद् द्रव्यगुण-विवरण-परा निघण्टव आसन्, इति ज्ञायते । काश्चिद् भेषजनामसंग्रहपराः रोगनाम संग्रहपराश्च कोशा आसन् । परम्परया तज्ज्ञानमधुनाऽपि अध्ययनाध्यापने प्रचलत्येव । अनुशीलनेन द्रव्य-गुण-विज्ञानस्य प्रचलितोऽङ्गविभागस्त्वेवम्ः-(१) द्रव्यपरिचयविज्ञानम्, (२)द्रव्य-गुण-कर्म-विज्ञानम्, (३)द्रव्यकल्पविज्ञानम्, इति ।

द्रव्यपरीक्षाविज्ञानञ्चरककाले प्रौढमासीत् तथाहि-यतश्चायुष्याणि अनायुष्माणि च द्रव्यगुणकर्माणि वेदमतीत्यतो प्यायुर्वेदः- (च. सू. अ. ३०) हेतुलिङ्गौषधज्ञाने हेतुलिङ्गाभ्यां सह भेषजसूत्रेणैवयुर्वेदस्य त्रिसूत्रत्वं संभवति । द्रव्यपरीक्षाविषये चरको वक्ति—

तस्यापीयं परीक्षा—

१-. इदमेवं प्रकृति (द्रव्याकृतिविज्ञानम्)
२- एवंगुणम् (गुणविज्ञानम्)
३- एवंप्रभावम् (प्रभावविज्ञानम्)
४- अस्मिन् देशे जातम् (देशस्थानविज्ञानम्)
५- अस्मिनृतौ एवं गृहीतम्, एवं निहितम् (ऋतुसंग्रहक्रम-संरक्षणम्)
६- एवमुपस्कृतम् (संस्कारविज्ञानं, विभिन्नकल्पनाज्ञानञ्च)
७- अनया मात्रया युक्तम् (मात्रामात्रत्वविज्ञानम्)
८- अस्मिन् व्याधौ एवंविधस्य पुरुषस्य एतावन्तं दोषमपकर्षति उपशमयति वा ।
९- यदन्यदपि चैवंविधं भेषजं भवेच्चानेन विशेषेण युक्तम्-इति ।। (च. वि. अ. ८)

एवंविधमासीत्तदानीन्तनद्रव्यगुणविज्ञानशास्त्रम् । चरकादपि प्रौढतमं विज्ञानं सुश्रुतकाले ह्यवर्तत । सुश्रुते भिन्नाध्यायेषु पृथग् विषयमुद्दिश्य विवरणमुपलभ्यते । प्रस्तुतसुश्रुतमपि नागार्जुनप्रति संस्कृतम् । परं तत्र द्रव्यगुण विज्ञानीयविशेषाः—द्रव्यविशेषविज्ञानीया, द्रव्यसंग्रहणीया, भूमिप्रविभागीया, रसगुणवीर्यविपाकविज्ञानीया, रसविशेषविज्ञानीयाः मिश्रकवर्ग—संशोधन-संशमनीयाश्च विभिन्नाध्यायेषु वर्णिताः सन्ति । वर्गीकरणार्थं विभिन्नकार्मुकाणां गणानां संग्रहो रोगेषु प्रयोगश्च सम्यक् कृतो दृश्यते । चरकसुश्रुतप्रतिसंस्कारकालेऽपि विभिन्नोदाहरणानि विज्ञानस्याऽस्य समुन्नतेर्दृश्यन्ते । एकौषधप्रयोगश्चरकसूत्रस्य चतुर्विंशाऽध्याये दृश्यते । आहारोपयोगि-द्रव्याणां चिकित्सोपयोगिता मदनाऽम्रकपित्थादीनाञ्च प्रमुखचतुश्चत्वारिंशद् द्रव्याणामुल्लेखस्तत्र वर्तते । तेषां गुणप्रभाव दृष्ट्याऽग्रचाणामपि निरूपणं कृतमस्ति ।

कल्पविज्ञानम्ः—भूयोदर्शनेनैव विभिन्नकल्पैः क्रियमाणप्रभावाणामध्ययनं तैः सम्पादितं स्यात् । एतदर्थं तैः कियाञ्छ्रमो धैर्यञ्च स्वीकृतम् इति धीरैरनुमेयम् ।

पञ्चविधकषायकल्पना—कल्पनापञ्चकमपि नैकस्मिन्दिवसे ह्येव तैः सन्धितम् । आर्द्र शुष्कद्रव्याणां क्षीर-मूल-त्वक्-पत्र-पुष्प-फल निर्यासादीनां प्रयोगः, कल्क-स्वरस-शीतफाण्ट-शृताणां मधुराम्लकटुतिक्तकषायाणां कषायाणाञ्च कल्पनाः क्रमश एव कृताः स्युः । चरके पञ्चशत-कषायाः कलिताः रसक्रियाऽवलेह-लेह-राग-षाडवयवागू मण्ड-पेया-विलेप्योदन-घृत-तैलासवानां कल्पना शीतफाण्ट-कषायैरासवारिष्ट-सुरा-वारुणी-शुक्तकाञ्जी-तुषाम्बु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौवीरक-धान्याऽम्लानां गुडेक्षुरसमध्वादिभिः विविधकल्पैस्तैः प्रयोगा कल्पिताः।

सुश्रुते मिश्रकवर्गस्य विविधरोगेषु प्रयुज्यमानगणानाञ्च चरकाद् विशिष्टः संग्रहः। सुराशुक्तभेदा अपि तैर्विज्ञाताः आसन्।

रसशास्त्रिभी रसधातुभस्मसत्वद्रुति कल्पनाः जारण-मारण-क्रामण-वेधन-ग्रास-बीजादि क्रियाश्च सम्पाद्य त्रिदोषसिद्धान्तमनुसृत्य लंघन-बृंहण-रूक्षण-स्नेहनस्वेदनस्तम्भनापतर्पण-संतर्पणादि कर्मणां विनिर्णयो जातः। रस-गुण-वीर्य-विपाक-प्रभाव-सिद्धान्तेन ते ते कल्पाः सुपरीक्षिताः दोषव्याधिशमने प्रयुक्ताश्च।

पाश्चात्यचिकित्सापितुः "हिपोकेटिस"स्य जन्मनः प्राक् ईशातः पञ्चशताब्दपूर्वमेव एष भेषज-संग्रहः सिद्धान्तप्रयोगश्च सुप्रचलित आसीत्।

हास्यास्पदमेतत् यत्केचित् पाश्चात्य-चाकचिक्यान्धीकृतलोचना ऐतिहासिकाः पाश्चात्यदेशानामेव द्रव्यगुण-विज्ञान - विकासेऽग्रगण्यतां प्रतिपादयन्ति।

प्रयुक्तद्रव्याणां पर्यायवर्णनपराः कोशाः गुणवर्णनपराः निघण्टवश्च तत्कालादेव प्रचरिताः प्रचलिताश्च। येषु बहवो यवन-शक-हूण-मुहम्मदीयानामाक्रमणेषु दग्धाः हन्त! विलयं गताः।

साम्प्रतं चरक - सुश्रुत-वाग्भट्टाऽष्टसंग्रहाऽमरकोश - धन्वन्तरि निघण्टु - राजनिघण्टु-मदनपालनिघण्टु - कैय्यदेवनिघण्टु - भावप्रकाश-राजवल्लभनिघण्टु निघण्टुशिरोमणिप्रभृतयो ग्रन्थाः निघण्ट्वात्मकाः। अधुना सर्वश्रीचन्द्रराज "भण्डारी"-बापालालभाई-यादवाचार्य-प्रियव्रत-वामनगणेशदेसाई प्रभृतिभिः केचिद् द्रव्यगुणनिघण्ट्वात्मकाः ग्रन्थाः विलिखिताः सन्ति।

पाश्चात्यद्रव्यगुणशास्त्रस्येतिवृत्तन्तु तत आरभ्यते यत्रायुर्वेदीयद्रव्यगुण-शास्त्रस्य पर्य्यवसानमभूत्। तज्जिज्ञासुभिर्भेषजशास्त्रेतिहासग्रन्थेषु मृग्यम्। नेह विस्तरभिया प्रपञ्चितम्।

ग्राम: CALFLO. Phone: 554232

लक्ष्मी फ्लोर मिल्स
तथा
लक्ष्मी आइल मिल्स

ग्राम: LINORAPOIL. Phone: 55-4232

निर्माता :-
मैनन ब्रान्ड
सुपर फाइन फ्लोर
सूजी, आटा तथा ब्रान
ग्राम: KASTUREE.

२४२-१ आचार्य प्रफुल्ल चन्द्र रोड़
कलकत्ता-४
प्रधान कर्यालय:
बंशीधर घनश्यामदास
११ शिव ठाकुरलेन
कलकत्ता-७

निर्माता :-
बो. जी. ब्रान्ड मास्टर्ड आइल
रा लिनसीड आइल
डी. बाइल्ड लिनसीड आइल
पी. ,, ,, ,,
अलकाली रिफाइल्ड लिनसीड ,,
ब्लाउन रैपसीड आइल
फोन ३३-१२९३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकभौतिकीसिद्धान्तेभ्य आयुर्वेदपदार्थमूलसिद्धान्तानां संवादित्वम्

(ले०—वैद्यश्री विनायक जयानन्दठाकरः ए० एम० एस०, साहित्यशास्त्री काव्यतीर्थः, प्राध्यापकोऽध्यक्षश्च आयुर्वेदीयमौलिकसिद्धान्तसंहितादिविभागस्य, आयुर्वेदीय स्नातकोत्तर प्रशिक्षणकेन्द्रस्य : आइ० ए० एस० आर० जामनगरस्थस्य)

अस्यां शताब्द्यां आयुर्वेदोद्धाराय यावज्जीवं कृतोद्यागानां स्वनामधन्यानां महर्षिकल्पानां विदेहानामपि स्थिरयशोदेहानां स्वर्गतानामपि शिष्यपरम्पया, समुज्ज्वलशास्त्रसेवापरम्परया च आयुः सन्तानवदक्षुण्णसन्ततित्वादमराणां भिषक्तल्लजानामस्ति काऽपि भव्या परम्परा। तस्यामेव परम्परायां संजाता त्रिमूर्त्तिः, पूर्वापरौ तोयनिधी व्याप्य व्यवस्थिता, गणनाथसेन-स्वामिलक्ष्मीराम-यादवजी आचार्याभिधा, भारतीयायुर्वेदस्य मानदण्डायमाना, स्वीयैरवदानैः समुज्ज्वला, पूर्वाचार्यपरम्परां निर्वाहयन्ती विद्योतते स्म। एकैकेन प्रस्थापिता स्वीया यशोवीथिः शास्त्रोद्धारायाविरतचिन्तनपरिश्रमादिभिः वैदुष्य-भैषज्य-सौजन्यौदार्यादिभिश्च। एषु स्वनामधन्यस्वामिश्रीलक्ष्मीराममहाभागानां सच्छिष्याः श्रीस्वामिजयरामदासमहाभागाः स्वाचार्यपरम्परामुद्भासयन्तः आयुर्वेदसेवयैव लोकानुरागमुपार्जयन्तः, गुणनिघ्नैः सादगुण्यसमादरतत्परैः कृतज्ञैर्लोकैः लोकराज्यधूर्वाहकैश्च सहोद्युक्तैः सभाज्यन्ते अभिनन्द्यन्ते च, इति धन्योऽयमवसरः। अत्रावसरे मयापि आधुनिकभौतिकी-आयुर्वेदमूलसिद्धान्तानां संवादित्वप्रदर्शनपर एको निबन्धो लेख्यस्तद्द्वारा च पूर्वर्षीणां तर्पणं, आयुर्वेदस्य चोपस्करणं विदधता शास्त्रसेवयैव शास्त्रसेवैकनिष्ठानां स्वामिमहाभागानां समुचितमभिनन्दनं कार्यमित्यादिष्टोऽस्मि समारोहसमित्या। सोऽहं यथानिर्देशमनुसरामि।

आदिष्टस्य प्रतिपादनं तदैव सुकरं भवेत् यदा १.आधुनिकभौतिकीपदस्य किमभिधेयम्? २. के च सिद्धान्तास्तत्र स्वीकृताः प्रतिपाद्यन्ते च? ३. तथा के पदार्था आयुर्वेदीयाः? ४. के च तद्विषयकाः मूलसिद्धान्ताः? इति सुचारुरूपेणावगतं स्यात्! तदनन्तरं च ५. तेषां परस्परेण तुलनां कृत्वा तेषु कियत् संवादित्वं कियद् वा विसंवादित्वं इति वक्तुं समर्था भवेम। अत एवात्रोद्दिष्टेषु विभागेषु विषयं विभज्य "नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते" इत्यभियुक्तनिर्दिष्टपथा संक्षेपेण किमपि लिख्यते। व्यापको विशालश्चायं विषयो नानाशास्त्रजटिलसिद्धान्ताऽऽविलत्वाद् विषमविगाह्यश्च। अत एवात्र अल्पवक्तव्येन समग्रवस्तुस्वरूपनिर्णयस्याशा दुराशा एव स्यात्। तथापि केवलं दिग्दर्शनमात्रं विदुषामूहापोहस्यावसरप्रदानाय भविष्यति इति लिखितुमुद्युक्तो भवामि।

१. आधुनिकभौतिकी २. तत्सिद्धान्ताश्च

भूतानामिदं भौतिकम्। अर्थात् भूतानां विषये ऊहापोहपूर्वकं वस्तुनिरूपकं शास्त्रं भौतिकम्; विद्या वा इति स्त्रीलिंगशब्दव्युत्पत्तायां स्त्रीप्रत्यये जाते भौतिकीतिशब्दसिद्धिः। सा च विद्या आधुनिकानां वैज्ञानिकानां यथासंमता तथा यत्र प्रतिपाद्यते सा शाखा आधुनिकभौतिकोति। प्राचीनानां मते तु सैव विद्या अपराविद्यान्तर्गता मन्यते।

किन्तु एवं निरुक्तिसिद्धावपि प्रधानतः जिज्ञास्यं वर्तते भूतशब्दः किमभिधेय इति। भू धातोर्भावे क्तप्रत्ययेन निर्वृत्तं भूतमिति पदं, भूयते येन अर्थात् यद् भवति तद् भूतमिति। भवनं किमिति चेत् चक्रपाणिवचनानुसारेण यस्य सत्ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यते यद् वा उत्पद्यते तद् भूतमिति । अर्थात् अस्तित्वविशिष्टानि वस्तुजातानि भूतानीति लभ्यते । तेषु कानिचिद् उत्पादविनाशधर्माणि स्यु, कानिचिच्च नित्यसत्ताशीलानि । अनया व्युत्पत्त्या सकलपदार्थपरामर्शी भूतशब्दः इति लक्षयते अस्तित्वधर्मसामान्यात् । अपरो भूतशब्दः शास्त्रान्तरेषु रूढः पारिभाषिकः खादिपंचमात्रपरामर्शकः । व्युत्पत्तिलब्धेन भूतशब्देन तस्य स्वरूपसाम्यं सदपि प्रवृत्तिनिमित्तविषयको भूयान्भेदो दरीदृश्यते ।

एवं स्थिते आधुनिकानां भौतिकीविदां कतरद् भूतशब्दाभिधेयमभिप्रेतं स्यादिति प्रश्न उपतिष्ठते । अत्र विचार्यमाणे एवं वक्तुं शक्यते यदाधुनिकैः-भूतशब्दः न क्वचिदपि कुत्रापि स्वशास्त्रे व्यवहृतः अत एव न परिभाषितः । अस्माभिस्तेषां विषयप्रयोजनादीनि परीक्ष्य आस्माकीनैः पारिभाषिकैर्भूतैः सह तेषां साम्यं दृष्ट्वा, भूतानां प्रतिपादकमिदं शास्त्रमिति आधुनिक फिजिक्स (Physics) शब्दो भौतिकीशब्देनानूद्यते । किं साम्यं किं च वैषम्यं-इत्येव प्रस्तुतलेखस्य प्रधानविषय इति क्रमेणाग्रे स्फुटं भविष्यति ।

आधुनिकानां फिजिक्सशास्त्रं (Physics) भौतिकी दृश्यस्यकेतमस्य स्थूलजगतः मूलपदार्थानां विभागान्कृत्वा सामान्यविशेषज्ञानपूर्वकं परिचयं कारयति । तेषां पदार्थानां च गुणकर्मरूपान्धर्मान्व्यासतो विवेचयति, तेषां व्यावहारिकीमुपयोगितां प्रदर्शयति । इमे तत्रत्याः यथास्थूलमधस्तादनिर्णीयन्ते ।

१. सम्पूर्णं जगद् द्रव्यस्वरूपं (Matter or Mass) वर्तते [स्थूलम् इन्द्रियग्राह्यमित्यभिप्रेतं वेदवरम् ।]

२. तच्च स्थूलं सदपि, विश्वरूपेण (नानाकारैः) प्रकल्पितमपि, न अवस्थात्रयातीतम् । ताश्च तिस्र अवस्थाः १. मूर्तिः (मूर्तिः काठिन्यमित्यनर्थान्तरम् Solid State) २. (सदागतिः वायवीयावस्था-Gaseous State) ३. द्रुतिः (द्रवावस्था-Liquid State) इति शब्दत्रयाभिशब्दिताः। घनतरलविरलावस्थाः, ध्रुवधरुणधतामिधा अवस्था वा पर्यायशब्देरभिधीयते इति प्राचां संमतम् ।

३. कस्यांचिदप्यवस्थायां वर्तमानमिदं स्थूलं जगत् स्थानसापेक्षं भवति अर्थात् तेषां द्रव्याणामवस्थितिः कंचिद् देशमभिव्याप्यैव भवति । यावन्तं महान्तमल्पं वा देशविशेषं व्याप्नोति स देशः अवकाशरूपोऽभिमतः (Space)

४. एषां सर्वेषां सामान्यो गुणो गौरवं वर्तते आयतनं च । सर्वेष्वल्पमधिकं वा भारशब्दाभिधेयं गौरवं (Weight) वर्तते आयतनं (Volume) च स्थूलाणुस्थानव्याप्त्युपलक्षितम् । उभयमपि परिमेयमिति परिमाणं सामान्यो गुणो वर्तते सर्वेषु ।

५. अवस्थात्रयसन्निविष्टानां समेषां द्रव्याणां स्वरूपं निश्चितं वर्ततेः । (ए) घनानामवयवसंघातोऽतीव दृढः; अत एव तेषां स्वरूपं स्थिरं वर्तते-मूर्तिः । (बी) द्रव्याणामप्यवयवाः परस्परेण संश्लिष्टा वर्तन्ते किन्तु शैथिल्ययुक्ताः, अत एव तेषां नास्ति कोऽपि निश्चित आकारः, तेषां स्वाधारानुरूपं स्वरूपं भवति द्रुतिः, प्रवहणं च संभवति । (सी) ये तु विरलत्वं भजन्ते ते तु सदा गतिशीलाः, अवयवानां संहतिसंश्लेषयोरभावात् । तेषां सर्वेऽप्यवयवाः स्वातन्त्र्येण गतिशीलाः, मिथ अपसारकाः, दूरविसर्पिणश्च । व्याप्नुवन्ति सकलमायतनमिति वैरल्यं तेषां भवति ।

एते सर्वे स्वां स्वामवस्थां परित्यज्येतरावस्थां महता प्रयत्नेन बलपूर्वकमेव व्रजन्ति, न स्वैरमल्पायासेन वा इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. त्रिविधावस्थाविभक्तमपि जगत् पुनः गुणकर्मस्वरूपवैशेष्यात् ९२ संख्येषु तत्त्वाभिधेषु मूलद्रव्येषु विभज्यते।

७. तेषां सर्वेषां मूलद्रव्याणां विभागे क्रियमाणे सति सूक्ष्मातिसूक्ष्मोऽन्तिमोऽवयवः परमाणुः, यस्तत्तद्द्रव्यस्यात्मीयं विशेषं धर्मं गुणकर्मस्वभावं बिभर्ति परमसूक्ष्मश्च। परमाणूनां, संयोगादणुः, तेभ्यश्च स्थूलात्स्थूलतरं द्रव्यं निर्मीयते। परमाणुतोऽग्रे विभज्यमानत्वाभावात् परमाणुरन्तिमोऽवयवः। अत एव कारणात्सोऽविनाशी नित्यश्च। एवं च सर्वेषां द्रव्याणां परमाणुस्वरूपेणाविनाशित्वम्, तेषामेव मिथः संयोगविभागाभ्यामवस्थात्रयेषु द्रव्यस्य एकतोऽपरस्यां परिवृत्तिसहत्वं च स्वीकृतम्। एवं च वस्तुनो नाशो न पारमार्थिकः किन्त्ववस्थान्तरप्राप्तिरेवेति नित्यत्वं न व्याहन्यते।

८. साम्प्रतं तु परमाणूनामविभाज्यत्वमन्तिमावयवत्वं च निरस्तम्। परमाणूनामपि विभाज्यता, तेषामप्यवयवाः अणिष्ठाः स्थानविशेषमाश्रिताः, विशिष्टस्वरूपा विशिष्टधर्माश्च वर्तन्त इति प्रेक्षावद्भिः परीक्ष्य प्रस्थापितम्। ते च अवयवाः इलेक्ट्रोन, प्रोटोन, न्यूट्रोन, पोजिट्रोन, फोटोन, रेडीन इत्यादयोऽवबुद्धाः। परमाणुदेहे प्रोटोनस्यावस्थितिः केन्द्रे, इलेक्ट्रोनस्य च अवस्थानं परिसरे; तथा प्रोटोनस्य स्थिरत्वं, इलेक्ट्रोनस्य निश्चितमार्गे स्वपरिधावेव भ्राम्यमाणत्वं, क्रमशः धनऋणविद्युद्धारकत्वं च तज्ज्ञैर्निश्चप्रचमिति। अपरेषामपि सूक्ष्मांशानां स्थानकर्मादिकं गवेषितं वर्तते। विभिन्नद्रव्याणां परमाणुरूपे समानेऽपि स्वरूपभेदः भारभेदः कर्मभेदश्च एषामवयवानां संख्यापरिणामभेदात् अन्योऽन्यानुग्रहादन्योऽन्याभिभवादन्योऽन्यानुप्रवेशविशेषाच्च भवतीति परीक्षितं विज्ञैः। समानरूपा अपि भिन्नगुणकर्माणः परमाणवः अनेन विशेषेण (Isotopes इति पदेन अभिहिताः विविधपरीक्षणेषु व्यवहृताश्च। एवं पूर्वनिर्धारितानां परमाणूनामविभाज्यता, निरवयवता च निरस्ता। ततश्च नित्यताऽपि निरस्ता। तत्तद्द्रव्यस्य स्वो स्वो विशिष्टो गुणोऽपि तत् नित्य इत्यपि निरस्तम्। यतो हि विशिष्टगुण एकः परमाणुः केषांचिदवयवानामावापोद्वापाभ्यां तत्त्वान्तरे परिणमति भिन्नगुणश्च भवति इति दृष्टचरम्।

९. अतः परमाण्ववयवानां परिवृत्तिसहत्वं ततश्च स्वस्वभावं विहाय तत्त्वान्तरे परिणमनम् भवति इति प्राप्यते। एवं सति न परमाणवस्तत्त्वानि मूलपदार्था वा किन्तु तदन्तर्गताः सूक्ष्मा अवयवा एव भूतलपदार्था इत्यभिप्रेतं भवति।

१०. एषामवयवानां सन्निवेशः विभजनं वा-आवापः उद्वापो वा, संयोगविभागौ वा-महता बलेनैव साध्यते। विभजने च महच्छक्त्युद्रेकः उन्मुक्तो भवति।

११. एत अनयवाः अपि विपरिणामिनो भवन्ति। प्रोटोनस्य न्यूट्रोने, न्यूट्रोनस्य प्रोटोने, उभाभ्यामपि इलेक्ट्रोनस्य परिणतिः संभाव्यते सति प्रवर्तके सबले हेतौ। इलेक्ट्रोनस्य चावस्थाविशेषे स्वरूपं विलोप्य Electromagnetic Field विद्युच्चुम्बकीयावकाशरूपेणाव्यक्तावस्थायां परिणमनम्, विद्युच्चुम्बकीयावकाशरूपाऽव्यक्तावस्थातः पुनः मूर्त्तस्वरूपे सूक्ष्मतमे इलेक्ट्रोनादिरूपे परिणमनम्। एवंविधं परिणमनं अज्ञातहेतुकान्महतो विक्षोभात् संभवति। एवंविधो विक्षोभः अशेषग्रहनक्षत्रादिमण्डितेऽनन्ते ब्रह्माण्डे कुत्र केन कदा किमर्थं प्रारभ्यत इति न ज्ञायत एव।

१२. एषां परमाण्ववयवानामियत्ता इत्यपि नैव शक्यते वक्तुम्। परमाणुवद् तदवयवा अपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचिद् भूयो विभिन्नेषु ततोऽपि सूक्ष्मतरेष्ववयवेषु विभक्ताः स्युश्चेन्न तत्र चित्रम्।

एवं परमाणुरचनाऽपि ब्रह्माण्डवदनेकावयवा, विविधधर्मिभिर्भूयोभिरवयवैर्युगपन्निर्मीयते विघट्यते च इत्यहो विधातुः सृष्टेरनन्तता, अगाधता च, अहो वा मानवप्रतिभायाः सूक्ष्मदर्शिता, पुरुषप्रयत्नस्य चाविश्राम्यता।

१३. एषां स्थूलानामणूनां वा द्रव्याणां गुणकर्मस्वरूपा धर्मा अपि परिज्ञाताः। ते च गुणाः १. भाररूपं गौरवं लाघवं च Weight। २. रूपाभिधेयम् संस्थानमाकृतिर्वा Volume वर्णश्चात्रैवान्तर्गतः Colour। तदुभयमपि परिमेयमिति ३. परिमाणमपि गुणो वर्तते द्रव्ये। ४. एकं द्रव्यमपरस्मात् पृथगिति पृथक्त्वमपि तथा ५. एकावस्थातोऽपरस्यां परिवर्तनं संयोगविभागाभ्यामिति संयोगविभागौ संस्कारश्च। तथा च संख्यापरत्वापरत्वे च इति सामान्यगुणाः द्रव्यवर्तिनः स्वीकृता एव। ६. द्रवेषु द्रवत्वम् (Liquidity) घनेषु च स्नेह इति अवयवसंयोजनकारको गुणः (Cohesion) तस्यैवोनत्वाधिक्याभ्यां लक्षितौ मृदुकठिनौ गुणौ (Hard & Soft) तथा श्लक्ष्णखरौ (Smooth & Rough,) अभास्वरशुक्ल-भास्वरशुक्लभेदेन, सप्रभत्वनिष्प्रभत्वभेदेन वोक्तौ स्नेहरौक्ष्यगुणौ (Lustre-Dullness) स्थितिस्थापकत्वं च (Elasticity) विविक्तपदाभिधेयौ भंगुरसुषिरौ (Brittle-Porosity) तथा स्वाभाविकं शीतोष्णशब्दाभिधेयं सतापत्वमपि (Heat) गुणगणनायां स्वीक्रियत एवाधुनिकैः। अपरं च तापवाहकत्व, शब्दवाहकत्व, विद्युद्वाहकत्वादीनि तदभावाश्च (Conduction or non-conduction of Heat, Sound & Electricity) चुम्बकाकर्षणीयत्वम् (Magnetism) स्वच्छताभिधं पारदर्शित्वं (Transparency) आविलपदाभिधेयं अर्धपारदर्शित्वं—(Translucency) अपारदर्शित्वं (Opacity) च तथा प्रकाशपरावर्तकत्वमपरावर्तकत्वं, प्रकाशवक्रीभवनं (Reflexion, Non-reflexion and Refraction of light) विलेयता (Solubility) घनवर्धनीयता विनाम्यता च (Malleability & Plasticity) इत्येतेऽधिका गुणाः द्रव्यस्वभावपरीक्षातः आधुनिकैः प्रतिपादिताः। तथा च वातवर्गीयेषु, द्रवद्रव्येषु, पतनाभिमुखेषु गुरुषु घनद्रव्येषु चापि परिलक्षितं तथा च शब्द, ताप, विद्युदादीनां गतिषु वेगशब्दाभिधेयं मान्द्यतैक्ष्ण्याभ्यामुपलक्षितं चलत्वं (सरत्वं च) तथेतरेषु स्थैर्यमपि स्वीक्रियते। तथैव गन्धरसावपि नैसर्गिकौ कृत्रिमौ चाभिमतौ।

१४. द्रव्येषु गुणातिरिक्तो धर्मः शक्ति (Energy) पदाभिधेयो वर्तते। स तु स्वभावतः अन्तर्निहितोऽपि यथोचितप्रयत्नमन्तरेण नाभिव्यज्यते। प्रयत्नप्रतिबोधिता सा शक्तिस्तत्तत्कर्मरूपेण परिणता दृश्यते शक्त्यन्तरे वा परिणमति। शक्तेरनन्तरूपतासत्त्वेऽपि तस्याः संहतिरूपेण, बलरूपेण, शब्दरूपेण, तापरूपेण, प्रकाशरूपेण, विद्युद्रूपेण, चुम्बकाकर्षणरूपेण वा परिणामः प्रसिद्धतरः। एषां शक्तिभेदानां परस्परेण सह परिवृत्तिसहत्वमपि स्वीकृतम्। यथा एका एव विद्युत् प्रकाशरूपेण, तापरूपेण, बलरूपेण च परिणमति इति नित्यमनुभूयते। प्रकाशशब्दौ विद्युद्रूपेण परिणतौ ततः पुनः प्रकाशशब्दरूपे परिणतौ अनुदिनं साक्षात्क्रियेते। बलं च शब्दरूपेण, प्रकाशरूपेण, तापरूपेण, विद्युद्रूपेण च विपरिणमति इति सजलानां मेघानां विद्युदर्शनिकर्तृत्वदर्शनात्, जलप्रपातानां च विद्युत्तापप्रकाशबलजनकत्वदर्शनात् प्रसिद्धम्। एकस्याः शक्तेः प्रतिरोधे सति प्रतिक्रियारूपेणावरुद्धा शक्तिः रूपान्तरे परिणमति, महच्च बलं दर्शयति, आरभते विविधं कर्मजातमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च शब्दस्य प्रकाशस्य चोद्गमस्थानाद् वीचितरंगन्यायेन तरंगरूपेण स्थानान्तरे गमनम्; प्रकाशस्य ऋजुमार्गेण एकस्यामेव दिशि गमनं विस्तारो वा भवति; शब्दस्य तु कदम्बमुकुलन्यायेन ऊर्ध्वाधः पूर्वापरसर्वदिक्षु एककालं च व्याप्तिः इत्यादिकं सिद्धान्तितं वर्तते।

एवं संक्षेपेणाधुनिकविज्ञानसंमता विषया ये भौतिकीपदार्थाभिधेयास्ते उपरिष्टान्निर्दिष्टाः।

३. आयुर्वेदीयाः पदार्थाः,

४. मूलसिद्धान्ताश्च:

अथायुर्वेदीयाः पदार्था मूलसिद्धान्ताश्च परीक्ष्यन्ते। पदार्थविवेचनमायुर्वेदीयं प्राचीनैरास्तिकदर्शनैः भूयशः साम्यं दधदपि आत्मनो वैशिष्ट्यमपि प्रख्यापयन्ति। तद्यथा-षट्त्वं पदार्थानां, परमाणूनां च निर्देशः वैशेषिकैः साम्यम् अव्यक्तमूलकारणता, प्रकृतिपुरुषभेदेन विचारश्च सांख्यसिद्धान्तैः साम्यं बिभर्ति। एकस्यैवात्मनः सर्वत्र लोके पुरुषे च विततता तस्यैव च ब्रह्मीभावः इत्यद्वैतता वेन्दान्तेन, वादमार्गपदेषु न्यायपदैः तथा वशित्वसाधनभूतस्य मनस आत्मनि निरोधस्य योगेन सह साम्यं; सद्वृत्तस्य तथा सुखाभिधेयस्य हर्षस्य प्राप्त्यर्थं धर्म्यक्रियाणां सेवनं ततोऽन्यथानां च वर्जनं यदुपदिष्टम् तन्मीमांसोपदिष्टेन कर्मप्राधान्येन साम्यं विभर्तीति स्फुटं परिलक्ष्यते। तथापि आयुर्वेदाचार्याणां स्वतन्त्रदृष्टृवत्त्वमपि वर्तते प्रमाणप्रमेयविषये स्वतन्त्रदृष्टिमत्त्वात्। तथा हि-प्रमाणेषु युक्तेः सन्निवेशः, प्रमेयेषु अव्यक्तस्य ब्रह्मरूपता, पर्ययेणात्मक्षेत्रज्ञशब्दाभिधेयता, तस्यैव च रजस्तमोभ्यामावेशे संसारित्वं विमुक्तत्वे च विमुक्तिः, अष्टौ प्रकृतिषु खादीनां निवेशः, भूतप्रकृतिशब्देनाभिधानम्, स्वभावादीनामशेषामपि प्रकृतित्व (मूलकारणता) प्रतिपादनं, इन्द्रियाणां भौतिकत्वं पुरुषस्य लोकसंमितत्वं, लोकपुरुषयोः सौम्याग्नेयत्वेन द्विविधत्वम्, वातसहितानां तेषां त्रयाणामेव भावाभावकरत्वं, आत्मप्रेरितानामाकाशादीनां भूतानां क्रमिकः पूर्वस्मादपरस्य विकासः, एकोत्तरगुणवृद्धिः, उत्तरोत्तरानुप्रवेशः अन्योऽन्यानुप्रवेशश्चेत्येवमादयो विशिष्टाः सिद्धान्ताः प्रतितन्त्रसिद्धान्तत्वेन प्रतिपादिताः, आयुर्वेदस्य स्वतन्त्रदर्शनत्वं स्थापयन्ति। ततु अप्रासंगिकमित्यलं विस्तरोक्त्या। केवलं प्रस्तुतविषयसमर्थनावश्यकत्वेन संकेतिता एवात्र।

१. लोकपुरुषयोः साम्यम्—

लोकसंमितपुरुषसिद्धान्तः चेतनाचेतनस्य जगतः षडवयवत्वं सूचयति। ते च षडवयवाः मूलपदार्थाः आयुर्वेदे धातुशब्देन परिभाषिताः वैशेषिकैर्विशेषाः। खादीनि पंच, चेतनाधातुश्च षष्ठ इति। षडिमे समानरूपेण लोके पुरुषे च मूलद्रव्यरूपेणावस्थिताः। न केवलं ते षड् किन्तु तेषां संयोगोऽपि लोकस्य पुरुषस्य च हेतुः इति "संयोगापेक्षी लोकशब्द" इति वचनान्निर्दिश्यते।

२. लोकपुरुषयोरग्निषोमीयत्वम्—

पूर्वोक्ते षड्धातुकत्वेऽपि लोके पुरुषे च संघटनविघटनरूपा, सर्जनविसर्जनरूपा, आदानविसर्गरूपा, वृद्धिक्षयरूपा क्रियाऽनवरतं प्रचलति, विरुद्धयोस्तयोः क्रिययोश्चयापचयौ नियमनं च भवति। अत एवंविधयोर्विरुद्धक्रिययोः जनकौ अग्निषोमौ तयोर्नियामकः सहायकश्च वायुरपि प्राधान्येनाध्येतव्या भवन्ति इति तेषां महत्त्वं प्रदर्शयताऽऽचार्येणाग्निषोमीयत्वसिद्धान्तः, तेन साकं वायोः विक्षेपसंहारकरत्वं प्रतिपादितं वर्तते।

३. चतुर्विंशतिकभेदेन, पंचविंशतिकभेदेन वा दर्शनम्—

षड्धातुकस्यैव लोकस्य भूयो सूक्ष्मतत्त्वजिज्ञासायां चतुर्विंशतिधा पंचविंशतिधा व विभागः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं च धातुत्वेनोपदिष्टानां खादीनां पंचानां न मूलपदार्थता, किन्तु ततोऽपि सूक्ष्मतरा भूतप्रकृत्यन्तर्निविष्टाः सूक्ष्माः खादयः, शब्दादितन्मात्रपंचकं वा तेषां मूलपदार्था इति लभ्यते. तेषामपि मूलं तमोगुणबहुलमव्यक्तमेवेति "सूक्ष्मात्सूक्ष्महेतुज्ञानस्याव्यक्ते पर्यवसानं भवति । तन्मात्राव्यक्तयोर्मध्ये बुद्ध्यहंकारयोर्निवेशस्तन्मात्रावस्थायां शब्दादितन्मात्रस्येतरेतरस्माद् पृथक्त्वेनाऽवबोधस्य बीजम् । तन्मात्राणामविशेषत्वमत एव नेन्द्रियग्राह्यत्वं सूक्ष्मत्वेनानुमेयत्वमेव, भूतानामेवेन्द्रियग्राह्यत्वं स्थूलत्वं च । सर्गे चाव्यक्तस्थानां त्रिगुणानां वैषम्यं कारणं, तच्च पुरुषसान्निध्यात्, पुरुषार्थं वा स्वाभाविकं वाऽचेतनस्याऽव्यक्तस्य प्रवृत्तिरिति । प्रलये पुनः साम्यावस्था गुणानां भवत्यव्यक्तता च ।

४. एकधातुकतादर्शनम्—

चेतनाधातुरेक एव अव्यक्ताद् व्यक्ततां सर्गे याति, पुनश्च प्रलये व्यक्ताद् अव्यक्ततां याति । एवं गतागतं, प्रवृत्तिनिवृत्ती, उदयप्रलयौ च रजस्तमोगुणयोरावेशादेव भवति । अर्थात् स एव चेतनाधातुश्चिकीर्षावशान्नानारूपेण परिणमति इति तस्य चेतनस्यैवेदं नानारूपं जगद्विवर्तः । संजिहीर्षावशाच्च नानारूपाणि पुनः आत्मन्येव निगूहति इति ।

एवं प्राचीनमते सूक्ष्मेक्षिकया उत्तरोत्तरं षड्धातुकत्वं, त्रिधातुकत्वं, चतुर्विंशतिधातुकत्वं एकधातुकत्वं च प्रतिपाद्यते ।

५. षड्धातुकत्वपक्षे खादीनां पंचानां भूतशब्दाभिधेयत्वं, तच्च बहिरिन्द्रियश्रोत्रादिविज्ञेयशब्दादिगुणवत्त्वाद् भवति ततश्च स्थूलता भूतानां तद्गुणानां च । शीतोष्णगौरवलाघवादीनां तैः सम्बन्धो नित्यः भावस्वभावनित्यत्वादिति सिद्ध्यति । तेषां चतुर्णां खवर्ज्यानां परमाणवः सूक्ष्मतमा अवयवाः कारणरूपाः नित्यानुमेयाः स्वस्वगुणाधिष्ठानभूताश्च । सर्गे परमाणूनां संयोगानुकूलया क्रियया द्व्यणुकादि स्थूलात्स्थूलतरसृष्टेरारम्भः । ततश्च कार्यद्रव्याणामुत्पत्तिः । तत्रेतरेषामपि भूतानां सहयोगः सोऽन्योऽन्यानुप्रवेशपदवाच्यः पंचीकरणपदवाच्यश्च । एवंभूतेनोनातिरेकेण भूतसन्निवेशेन विविधानां पांचभौतिकानां कार्यद्रव्याणामुत्पत्तिः । प्रलये च विपरीतक्रियया परमाणूनां विभागः भवति । सर्गार्थं प्रलयार्थं वा प्रवृत्तिरीशस्येच्छावशादेव । आयुर्वेदमते तु वायुः, कर्म, कालः, स्वभावश्च परमाणूनां संयोगे विभागे च हेतुः इति विशेषः । परमाणवस्तु "दोधूयमाना स्तिष्ठन्ति" इति परमाणुष्वपि काप्यान्तरिकी कम्पनरूपा गतिः प्रतिपादिता पूर्वाचार्यैः । सामान्या वैशेषिकाश्च गुणा अत्रैव खादिपंचके, संघात, क्लेदन, सौषिर्यादिकं कर्मापि तत्रैव तिष्ठन्ति ।

६. चतुर्विंशतिक पंचविंशतिक धातुवादे—भूतानि न मूलपदार्थाः किन्तु ततोऽपि सूक्ष्मतराः पंचतन्मात्रा अनुद्भूतशब्दादिस्वरूपास्तेषां कारणमिति तेष्वपि पूर्वपूर्वस्य सूक्ष्मातिसूक्ष्मता । उत्तरोत्तरस्य व्यक्ततरता । एभिश्च पूर्वस्मादुत्तरस्य सहयोगादेकोत्तरगुणवृद्धस्य आकाशादिभूतस्योत्पत्तिः । पंचतन्मात्राणामपि त्रिगुणमव्यक्तं मूलमिति ।

७—त्रयो गुणा अव्यक्तस्थाः वैषम्यं क्षोभं वा प्राप्ताः सन्तः सर्गहेतवो भवन्ति, तेषां परिणामविशेषादेव नानात्वं द्रव्याणां, वाह्यभेदाश्च भवन्ति । अर्थात् सर्वे पदार्थाः मूलरूपा कार्यद्रव्यरूपा वा त्रिगुणमया अपि तेषामुत्कर्षापकर्षरूपपरिणामस्यापरिसंख्येयत्वात् पृथक् पृथक् पदार्थत्वेन लक्ष्यन्ते । वस्तुतस्तु सत्त्वरजस्तमोऽतिरिक्तं न विद्यते किमपि तत्त्वान्तरमिति ।

८—एते च गुणा विरुद्धधर्माणोऽपि अन्योऽन्याश्रयाः मिथुनवृत्तयः सर्वदा सहैव तिष्ठन्ति । प्रकाश,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवृत्ति, नियमनरूपं परस्परोपकारकमेव कर्म कुर्वन्ति । कदाचिच्चान्योऽन्याभिभवं, कदाचिदन्यो न्यजननं च कुर्वन्ति । साम्यावस्थायामव्यक्त प्रलीयन्ते, वैषम्यावस्थायां च तारतम्ययोगाद् विश्वरूपेण परिणमन्ति ।

९—यथा समुद्रः बहूनामौदकानां भावानाम-धिष्ठानम् तथैवाव्यक्तम्, उत्पादविनाशौ भजतां बहूनां पिण्डानामधिष्ठानम्, अत एव तद् अखिलस्य जगतः सम्भवहेतुः अधिष्ठानं च। 'प्रकरोति सकलं जगदिति प्रकृतिः', सैवाद्याशक्तिरित्यप्यभिधीयते ।

१०—पुरुषः क्षेत्रज्ञो वा एभ्यः पृथक्सन्नपि चेतनत्वात् सर्वप्रवृत्तिमूलभूतः निर्गुणत्वात् चोदासीनः केवलं स्वसान्निध्यादेव चेतयति प्रवर्तयति च ।

५—प्राच्यार्वाचीनभौतिकविवेचनस्य संवादित्वं न वा ? :—

(ए) संवादित्वम् :

जगद्धेतुभूतानां तत्त्वानां वा भिन्नेऽपि निरूपणे, संख्यादिविभागेऽपि भिन्नतायामसत्यां मूलपदार्थत्वेन साम्यं वर्तत एव । अत एव यः कश्चिद् बाह्यो भेदो लक्ष्येत सोऽपसार्यः, समन्वयश्च साधनीय इति । यत इमे ९२ संख्याकाः ६ संख्याका वा जगतः मूलपदार्था इति स्वीकृतास्ततस्तेषां सामंजस्यं स्थाप्येत चेद् वरम् । ९२ तत्त्वानां सामंजस्यं न चेत्स्थापयितुं शक्यं, ततः सूक्ष्मभौतिकीनिर्दिष्टानां परमाण्ववयवानां भूतैः सह सामंजस्यं परीक्ष्यं, एवमपि साम्यं न दृश्येत तदा तन्मात्रैः, त्रिगुणैरव्यक्तेन च साम्यायोद्योगः कर्त्तव्यः ।

आधुनिकानां यद् (Matter) इति तद् द्रव्यमिति प्राचां मते प्रतिभाति तच्चावस्थात्रयेणावस्थितं, अवकाश (Space) प्रदेशमभिव्याप्य तिष्ठतीति । अत्र च निर्दिष्टोऽवकाशः आकाशप्रतिनिधिभूत इति स्पष्टं प्रतीयते । द्रव्यस्थिताः धर्माः गुणाः कर्माणि च, तत्तद्द्रव्यस्याणिष्ठेऽप्यवयवे परमाणुपदवाच्येऽपि उपलभ्यन्त इति प्राचामर्वाचां च संमतमेव। अत एव प्राचां विशेषलक्षणं "नित्यद्रव्यवृत्तयो व्यावर्तका विशेषा अनन्ताश्च" तथा "विशेषस्तु पृथक्त्वकृत्" इति सङ्गच्छते । नित्यद्रव्याणि च पृथिव्यादीनां परमाणवः अत एव तेष्वपि गन्धवत्त्व-गुरुत्वास्थिरत्वादयो विशेषधर्मास्तिष्ठन्ति, त एव च तेषामन्येभ्यो विजातीयपरमाणुभ्यो व्यावर्तकत्वे हेतवः, सजातीयानां परमाणूनां परस्परव्यावर्तकत्वं तु समानधर्मत्वेऽपि व्यक्तिभेदः संख्याभेदश्च भवति । अत एव चासंख्येयताऽनन्तता च परमाणूनां स्वीकृता प्राचीनैः । तत्र च नाधुनिकानां विमतिः।

द्रव्यस्थितोऽपरो धर्मः शक्तिरित्यभिधीयते आधुनिकैः । सा च शक्तिः स्वस्वप्रभावोन्नेया, विविधरूपेण परिणामात्प्राग्द्रव्यान्तर्गता सुप्तरूपा वर्तत इति । प्राचां कर्मापि तादृगेवेति कर्मशक्त्योः सामंजस्यं साध्यते । शक्तिः द्रव्यस्थितैव सर्वदा न द्रव्यात्पृथगुपलभ्यते । शक्तिः (Energy) विविधरूपेण परिणमन्ती आविर्भवति । तानि च रूपाणि यथा—संहतिः, बलं, तापः, प्रकाशः, गतिः, शब्द इत्यादीनि ।

अवकाशस्य आकाशेन सामंजस्यं पूर्वं निर्दिष्टमेव । Matter द्रव्यस्यावस्थात्रयस्य साम्यं वायुजलपृथ्वीभूतैर्भवितुमर्हति स्थूलदृष्ट्या—वायोः सदागतिमत्वाद् विरलावस्थावस्थितस्य वायुना साम्यम्, द्रवत्वमपां गुणः, अतः द्रवावस्थापन्नद्रव्याणां जलेन साम्यं, घनत्वं च पृथ्वीगुण इति पूर्वावस्थाद्वयव्यतिरिक्तानां पृथिव्यामन्तर्भावः। सुवर्णादीनां तेजोविशिष्टानां तेजस्यन्तर्भावः कथमपि कर्तुं शक्यः किन्तु एवं साम्यं केवलं स्थूलमेव। स्थूलानां च पाञ्चभौतिकत्वं स्वीकृतं प्राचीनैः, अतस्तेषां न पारमार्थिकं वायवीयत्वं, जलीयत्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पार्थिवत्वं वा सिद्ध्यति, केवलमुत्कर्ष एवाभिव्यञ्जको भवतीति ज्ञेयम्।

एतच्च स्थूलेषु द्रव्येषु अणुष्वपि पञ्चानां भूतानां सम्बन्धो दृश्यत एव किन्तु गुणकर्मानुमेय इति। यथा परमाणुगतानां स्थूलाणुकणानां मध्ये वर्त्तते-ऽवकाशः, अत एवाकाशं तत्रास्ति, गतिः, प्रकाशः, आकर्षणं, संहतिर्वा, गौरवं च तत्रापि वर्तन्त एवेति एभिर्गुणैस्तदाधारभूतानां वायुतेजोजलपृथ्वीनां परमाणुष्वपि विद्यमानत्वात् परमाणूनामपि पाञ्चभौतिकत्वं सिद्ध्यति। द्रव्याणां परमाणूनां च वैलक्षण्यं नानाप्रकारत्वं च एषां सूक्ष्मभूतानां सन्निवेशस्योनातिरेकवशादेव भवतीति प्राचां मतं तदाधुनिकैरपि स्वीक्रियत एव, अत एव तैः परमाण्ववयवानां अपकर्षणनिवेशादिभिर्भिन्नगुणा भिन्नस्वरूपाश्च पदार्था निर्मीयन्ते। दृश्यते च प्रकृतावपि Radium नामकद्रव्यात्तेजोभूतापसारात्तस्य सीसके विपरिणाम इति।

आधुनिकसंमतानामेतेषां परमाणुगतानां सूक्ष्मांशानां प्राचीनसंमतैः परमाणुभिः सह साम्यं स्याद् तन्मात्राभिः स्याद् उत वा आयुर्वेदसंमतैः वातादित्रिधातुभिः स्यादथवा त्रिभिः सत्वादिगुणैः स्यादित्येव निर्णेयं वर्तते। दोधूयमानास्तिष्ठन्ति नित्यास्ते परमाणवः" इति वचनानुसारेणातिशयकम्पनशीला येऽन्तिमा स्थिराश्चावयवाः ते परमाणवः इति लक्षणानुसारेण परमाणुगतैः सूक्ष्मांशैरर्वाचीनसंमतैस्तेषां साम्यं दृश्यत एव। गतिगौरवप्रकाशादिधर्मवत्त्वेऽपि रसगन्धादितन्मात्राणां प्रतिनिधिभूताः केऽप्यवयवा नाद्याप्युपलब्धा इति तन्मात्रैः समन्वयः दुःशकः। वातादिभिः त्रिधातुभिः सत्वादिभिस्त्रिगुणैश्च समन्वयः गत्यादिविशिष्टत्वाद् ऊनातिरेकेण परिणमनाद् नानाविधद्रव्योत्पादहेतुत्वाच्च शक्यः समन्वयः विशेषेण त्रिगुणैः। यतो हि एवं सति अव्यक्ते लयः अव्यक्ताच्च पुनरुत्पादः उभावपि संगच्छेते।

(बी) प्राच्यार्वाच्यभौतिकीमतस्य विसंवादित्वम् :—

१. प्राच्या चेतनाख्यं तत्त्वं भूतव्यतिरिक्तं जगदुत्पत्तौ स्वीकुर्वन्ति, आधुनिकास्तु अचेतनमेव जगद् भौतिकीविषयत्वेन मन्यन्ते। आधुनिकभौतिकीविद्यायां चेतनस्य विचारो न वर्तते।

२. आधुनिकानां मते आकाशं (Space) न द्रव्यं किन्तु रिक्तः, अवकाश एव। प्राचीनानां मते आकाशमपि द्रव्यं शब्दगुणाधिष्ठानं च। आधुनिकानां Ether निरूपणेन आकाशमपि द्रव्यतया सेत्स्यतीति प्रतिभाति।

३. आधुनिकानां मते तेजस्तु शक्तिरेव न द्रव्यम्। प्राचीनैस्तु तद्द्रव्यं स्वीकृतम्। आधुनिकसूक्ष्मभौतिक्यां प्रकाश, ताप, विद्युद्, (Radiation) वाहकाः सूक्ष्मकणाः सन्ति इत्यप्यधुनाऽऽविष्कृतम्। एवमेष विरोधो निरस्तो भवति।

४. आधुनिकानां मते जलं न द्रव्यं, किन्तु द्रव्यद्वयसंयोगजं यौगिकमिति। सूक्ष्मभौतिकीविमर्शे तु परमाणुकेन्द्रस्य विघटननिरोधिका संश्लेषिका शक्तिः (Cohesive force-Surface Tension) अपसारणस्य वातकर्मणः प्रतिबन्धिका वर्तत इति विज्ञातम्। तेनैवंविधं कार्यकारिद्रव्यं जलं, यतो हि पिण्डीभावोन्नेयः स्नेहगुणः अपामेव वैशेषिको गुण इति सुप्रसिद्धमेव। एवमयमपि विरोधः परिहृतो भवति।

५. ९२ मूलद्रव्याणि भूतपंचकेषु पूर्वोक्तयुक्तिदर्शनाद् वायौ पृथिव्यां वाऽन्तर्भावनीयानि स्युरिति। आपातत एतत्तथ्यं प्रतीयमानमपि न तथा। यतो हि अर्वाचीनैरेव द्वानवतिर्मूलद्रव्याणां खंडिता परमाणूनां निरवयवता खंडनद्वारा। अस्माकं मतेऽपि ये भारादिगुणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टाः स्युस्ते परमाणवो वायुजातीयाः सन्तोऽपि न मूलद्रव्याणि, किंतु पंचीकृतद्रव्यस्यातिसूक्ष्मावस्था भागा एव। यत्तत्र गौरवं तत्पार्थिवं, यच्चावयवसंश्लेषः स आप्य इत्याद्युन्नेयं भवति । वस्तुतस्तु सूक्ष्मभौतिकीविचारेण प्राचीनसंमतखादिपंचकविचारस्य, चातीव सन्निकर्षो वर्तते।

एवमत्र प्राच्यार्वाच्यविचारस्य सामंजस्यार्थं दिग्दर्शनमात्रं कृतम्। प्राचीनानां दृष्टिः सर्वदा सत्यान्वेषिणी भूतेष्वेव न पर्यवसिता, किन्तु ततोऽपि सूक्ष्मं हेतुजातं जिज्ञासमाना परमाणुषु विश्राम्यन्ती, भूतानां क्रमिकोत्पादं सूक्ष्मात्स्थूलस्य दृष्टवती, तन्मात्रस्वरूपस्य सूक्ष्मकारणस्य गवेषणां कृतवती। ततोऽप्यपरितुष्टा त्रिगुणाहंकारं परामृश्य अव्यक्तान्तं परिचरन्ती तत्रैव स्थितवती । तत्तु अव्यक्तमेव मूलकारणत्वात् प्रकृतिशब्दाभिधेयं, सत्त्वरजस्तमोमयं, अचेतनं सदपि बीजधर्मित्वात् प्रसवधर्मित्वात् चाखिलस्य जगतः संभवहेतुः। गुणवैषम्याद् गुणपरिणामविशेषाच्च नानारूपेण प्रादुर्भवति। गुणवैषम्यं गुणपरिणामश्च पुरुषसान्निध्याद्, पुरुषार्थमेव वा स्वभावाद् भवति अथवा अव्यक्ताभिधस्य वा विद्यारूपमायाशबलितत्वात् विश्वरूपेण विवर्तः । शुद्धबुद्धस्वरूपस्य तस्यैव ब्रह्मीभावे प्रशान्तत्वं निःसृतत्वं च । एवं रसबलोपाधियुक्तस्य, प्रकृतिपुरुषरूपस्य वा शिवशक्तिरूपस्य, अर्धनारीश्वरस्य वा एकदेशेनैव विविधः सर्गः संजायते, एकदेशेन च शुद्धं, शिवं, स्थिरं, निर्विकल्पं, निर्विकारं, वाङ्मनसोरगोचरस्वरूपं विराजते । भौतिकीनिष्ठानामर्वाचां तु अव्यक्त एव विरामो न्याय्य इति शम्।

श्रीराम सिल्क मैन्युफैक्चरिंग कम्पनी,

प्रो:-- हेस्टिंग्स मिल लि०

मैनेजिंग एजेन्ट्स:-- बाँगड़ ब्रदर्स लि०

रजिस्टर, आफिसः-- नेताजी सुभाष रोड़, कलकत्ता-१

सर्वोत्तम व उत्कृष्ट सिल्क बुश शर्टिंग्स

एवं

टेरिलीन सूटिंग्स के निर्माता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवव्यापश्रयचिकित्साया अपूर्वो ग्रन्थः--कर्मविपाकः

(ले०—श्रीप्रियव्रतशर्मा एम. ए. (द्वय) ए. एम. एस., साहित्याचार्यः, स्नातकोत्तरायुर्वेदीयसंस्थानाध्यक्षः, द्रव्यविज्ञानविभागाध्यक्षश्च, काशी हिन्दू विश्वविद्यालयः, वाराणसी)

आयुर्वेदसंहितासु चिकित्सा त्रिविधा प्रतिपादिता-दैवव्यपाश्रयः, युक्तिव्यपाश्रयः, सत्त्वावजयश्चेति। यथाह चरकः—

"त्रिविधमौषधमिति-दैवव्यपाश्रयं, युक्तिव्यपाश्रयं सत्त्वावजयश्च। तत्र दैवव्यपाश्रयं—मन्त्रौषधिमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि; युक्तिव्यपाश्रयं पुनराहारौषधद्रव्याणां योजना; सत्त्वावजयः पुनरहितेभ्योऽर्थेभ्यो मनोनिग्रहः।" —च० सू० ११।

आयुर्वेदस्याष्टांगेष्वन्यतमेऽङ्गे भूतविद्याप्रकरणे दैवव्यपाश्रयचिकित्सायाः बहुलः प्रयोगः। अन्येष्वंगेष्वपि रोगेष्वागन्तुषु विहितोऽस्याः प्रयोगः। विशेषतस्तु उन्मादेऽपस्मारे ज्वरे विविधेष्वेतादृशेषु च रोगेषु दैवव्यपाश्रयचिकित्सायाः समाश्रयो निर्दिष्टः। बालग्रहेषु पूतनादिषु, प्रसवकर्माणि, कुमाररक्षाविधाने शल्यादिप्रसंगेऽनागतबाधाप्रतिषेधार्थं चिकित्सैषा आश्रीयते।

दैवव्यपाश्रयचिकित्साया मूलं कर्मवादः अदृष्टवादो वा। 'न हि कर्म महत् किञ्चित् फलं यस्य न भुज्यते' न्यायेनानेन सर्वेषां ऐहिकप्राक्तनकर्मणां फलं पुरुषेण भोक्तव्यमेव। ऐहिकमिथ्याहारविहाराभ्यां व्याधयस्तु प्रादुर्भवन्त्येव, प्राक्तनमिथ्याकर्मणां परिणामजा व्याधयोऽपि जायन्ते। 'पूर्वजन्मकृतं कर्म व्याधिरूपेण बाधते' इति संप्रधार्य रोगाणामेको वर्गः 'कर्मजः' इति कृत्वा निर्धारितः। अनया रीत्या दैवव्यपाश्रयचिकित्सायाः क्षेत्रं नितरां परिवर्धमानं सत् निस्सीमं अभूत्। परिणामतः कालक्रमेण प्रायशः सर्वेषु रोगेषु आगन्तोरनुबन्धः विषमकर्मणश्च समावेशो लोके प्रचलितः। अद्यापि रोगेषु आत्ययिकेषु रोगाणामात्ययिकावस्थासु चास्तिका जना भिषग्भिः सार्धं मन्त्रतन्त्रज्योतिर्विदां साहाय्यं प्रतीक्षन्ते। विशेषतो युक्तिव्यपाश्रयचिकित्साया असाफल्ये इयमेवैकं शरणम्। येषु रोगेषु च निष्फलान्यौषधानि भवन्ति तेषु कर्मजत्वमनुमीयते दैवव्यपाश्रयचिकित्सा चाश्रीयते। अद्यत्वे तथोक्तवैज्ञानिकयुगे अन्धानुकरणमज्ञानजन्यं रूढिवादित्वं च कृत्वेमां तिरस्कर्त्तुं प्रभवेन्नाम। परं चास्मिन् विषयेऽनुसन्धानस्य परीक्षणस्य च बहुलोऽवकाशः॥

न चिरादेव वाङ्मयशोधप्रसंगे बिहारराज्यान्तर्गतदरभंगामंडलीयघटहोग्रामवास्तव्यानां भिषग्वरपण्डितसुरेन्द्रमोहनभट्टमहोदयानां सविधे कर्मविपाकेतिसंज्ञको हस्तलिखितो ग्रन्थो मयोपलब्धः (एतदर्थं लेखको भट्टमहोदयानामुपकृतः)। एष ग्रन्थः खण्डितावस्थः, द्विसंख्यकपृष्ठादारभ्यैकचतुर्विंशतिपृष्ठानि यावत् तत्र सन्ति। अस्य ग्रन्थस्य विषयो दैवव्यपाश्रयचिकित्सा वर्त्तते। प्राचीनग्रन्थेषु यत्र तत्र दैवव्यपाश्रयचिकित्सायाः बहवः प्रसंगा विकीर्णा अवलोक्यन्ते परं च रोगक्रमेण एतादृशः स्वतन्त्रो ग्रन्थोऽपूर्व एव प्रतिभाति। उपलब्धेंऽशे एकोनचत्वारिंशदध्यायाः सन्ति यथा—

प्रथमोऽध्यायः—वन्ध्यत्वदोषोपशमनम्।

द्वितीयोऽध्यायः—बालमृत्युप्रकरणीयः।

तृतीयोऽध्यायः—वियोगोपशमनम्।

चतुर्थोऽध्यायः—एकनेत्रभंगः।

पञ्चमोऽध्यायः—कुब्जत्वम्।

षष्ठोऽध्यायः—खञ्जत्वगृध्रसीरोगः।

सप्तमोऽध्यायः—छिन्ननासा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमोऽध्यायः—छिन्नहस्तपादः ।

नवमोऽध्यायः—पक्षरोगः ।

दशमोऽध्यायः—छिन्नकर्णः ।

एकादशोऽध्यायः—वैधव्यदोषोपशमनम् ।

द्वादशोऽध्यायः—वन्ध्यादोषोपशमनम् ।

त्रयोदशोऽध्यायः—गर्भस्रवदोषोपशमनम् ।

चतुर्दशोऽध्यायः—मृतभार्यादोषोयशमनम् ।

पञ्चदशोऽध्यायः—बहुपुत्री ।

षोडशोऽध्यायः—दौर्भाग्योपशमनम् ।

सप्तदशोऽध्यायः—सापत्न्यसंभवोपशमनम् ।

अष्टादशोऽध्यायः—जात्यन्तरोगोपशमनम् ।

एकोनविंशोऽध्यायः—मूकरोगोपशमनम् ।

विंशोऽध्यायः—गद्गदरोगोपशमनम् ।

एकविंशोऽध्यायः—मुखरोगकर्णशूलरोगः ।

द्वाविंशोऽध्यायः—गात्रगन्धः ।

त्रयोविंशोऽध्यायः—दारिद्रचधनक्षयः ।

चतुर्विंशोऽध्यायः—सस्वेदपाणिपादः ।

पञ्चविंशोऽध्यायः—माहेश्वरनामकवचम् ।

षड्विंशोऽध्यायः—ज्वरशान्तिः ।

सप्तविंशोऽध्यायः—सप्ताहदानफलम् ।

अष्टाविंशोऽध्यायः—अग्निमान्द्योपशमनम् ।

एकोनत्रिंशोऽध्यायः—अजीर्णशान्तिः ।

त्रिंशोऽध्यायः—अतीसारशान्तिः ।

एकत्रिंशोऽध्यायः—ग्रहणीरोगशान्तिः ।

द्वात्रिंशोऽध्यायः—पाण्डुरोगशान्तिः ।

त्रित्रिंशोऽध्यायः—कामलारोगशान्तिः ।

चतुस्त्रिंशोऽध्यायः—कासरोगशान्तिः ।

पञ्चत्रिंशोऽध्यायः—विपुलगृहदानफलम् ।

षट्त्रिंशोऽध्यायः—धान्यकूटदानफलम् ।

सप्तत्रिंशोऽध्यायः—कासश्वासोपशमनम् ।

अष्टत्रिंशोऽध्यायः—यक्ष्मशान्तिः ।

एकोनचत्वारिंशोऽध्यायः—रक्तपित्तोपशमनम् ।

एष्वध्यायेषु दानेन देवार्चनेन च दुष्कृतक्षयः तत्कृतं च रोगशमनमुपदिष्टम् । यथा—

१. वन्ध्यात्वदोषोपशमने निदानं गोः वत्सस्य वियोजनम्, दक्षिणाहीनं व्रताचरणं, पशूनां मैथुने विघ्नोत्पादनम्, वीर्यविक्रयश्चेति निर्दिष्टम् । चिकित्सा च सौवर्णपार्वतीशंकरकार्त्तिकेयगणेशमूर्त्तिदानं, रजतप्रजापतिदानं सुन्दरवृषोत्सर्गश्चेति प्रतिपादिता ।

२. बालमृत्युप्रसंगे, प्राक्तनजन्मनि वृषार्तगवां जलपाने बाधकत्वं निदानरूपेण प्रतिपादितम् । राजतगोमूर्त्ति पूजयित्वा दानं वर्षैकपर्यन्तं गोसेवनं चैतत्परिहारः ।

३. दीपहरणात् एकनेत्रभंगः । षण्मासान् वर्षैकं वा यावत् विप्रालये देवालये वा दीपदानं तत्परिहारः ।

४. देवद्विजगुरुसाधुजनानां नाभिवादनं कुब्जत्वस्य निदानम् । सद्भावपूर्वकं नरदासीदानं तच्चिकित्सेति ।

५. पादुकाया उपानहश्च हरणं खञ्जतागृध्रसीनिदानम् । राजताश्वस्य दानं तत्परिहारः ।

६. देवद्विजधर्मवेदनिन्दया श्रुतिस्मृतिकथाऽश्रवणेन च पुरुषश्छिन्ननासो भवति । राजतदर्पणदानं तत्परिहारः ।

७. मातृपितृगुरुवृद्धनिरपराधजन्तूनां ताड़नमकारणं छिन्नहस्तपादस्य कारणं भवति । सौवर्णचन्द्रदानं च तत्परिहारः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. युद्धे स्वामिनं विहाय पलायनं, अशस्त्रस्य च वधः पक्षवधस्य निदानम्। राजतगरुड़दानं कृष्णोद्दिष्टं तत्परिहारः।

९. मिथ्यापवादश्रवणेन छिन्नकर्णः। सौवर्ण-श्रोत्रदानं च तत्परिहारः।

१०. पतिनिन्दा तदाज्ञाभंगश्च वैधव्यनिदानम्। सौवर्णोमामहेश्वरमूर्त्तिदानं तत्परिहारः।

एवंरूपेण सर्वेषां प्रकरणोपात्तानां रोगाणां निदानं चिकित्सितं च दैवव्यपाश्रयदिशा प्रतिपादितम्। उपलब्धे ग्रन्थांशे कियन्तो रोगा वर्णिताः परं च वर्णनशैल्या अनुमीयते यत् अन्येषामपि रोगाणां एतादृशं वर्णनं स्यात् सम्पूर्णग्रन्थस्य कलेवरश्च महद् भवेत्। ग्रन्थे द्रोणः, आढकम्, खारीत्यादिमानानां निर्देशो विद्यते। नवधान्य, गन्धद्रव्य, महारत्न, उपरत्न इत्यादि पारिभाषिकवर्गाणामपि निर्देशोऽस्ति। निदाने दोषजन्यविकृतेः समीचीनः संकेतः उपलभ्यते तथा श्वासरोगप्रकरणे वायोः वरुणस्य च पूजनं विहितं तन्नूनं श्वासरोगस्य दोषयोः वातश्लेष्मणोः प्रतीकनिर्देशभूतम्। श्वासप्रकरणे निदानस्यैकः श्लोकोऽप्युद्धृतः। क्षयरोगप्रकरणे चरकदिशैव विषयवर्णनम्। तत् सर्वं ग्रन्थप्रणेतुः आयुर्वेदवैदुष्यं कर्मकाण्डकौशलं च प्रकटयति। ग्रन्थे रचनाकारस्य परिचयः, रचनाकालः, लिपिकारपरिचयः, लिपिकालश्च न क्वापि संकेतितः। अतः कालनिर्णयः दुःशकः। ग्रन्थेऽस्मिन् जात्यन्तरोगोपशमननामकमेकं प्रकरणं विद्यते यस्य निदानं बलात्कारो निर्दिष्टः। अयं कश्चिद् यौनरोगोऽनुमीयते। भावमिश्रेणोक्तः यौनरोगः फिरंगरोगः। इत अनुमीयते यत् अयं ग्रन्थः भावमिश्रात् (षोडशशतोख्रिष्टाब्दात्) प्रागेव निर्मितः। वैदिकवाङ्मये 'जायान्य' शब्दो दृश्यते। मन्ये स एव 'जात्यन्त' शब्देनात्र गृहीतः। इदमेतद् ग्रन्थस्य प्राचीनत्वमभिव्यनक्ति।

ग्रन्थेनानेन तत्कालीनसामाजिकसंस्कृतेरपि विवरणं प्राप्यते। एकस्मिन् प्रसंगे पुरुषाणां वीर्यविक्रमदोषस्य निर्देशः, देवदासीप्रथायाश्चैकत्र स्थले निर्देशः।

अत्र भूयान् शोधोऽपेक्ष्यते। यत्र कुत्रापि अयं ग्रन्थः सम्पूर्णः खण्डितो वा स्यात् स मत्सविधे सूचनीयः प्रेषणीयो वा, इति प्रार्थ्यते।

For Your Home — A Sweet Home
Always Look For
KAMAL BRAND
JUTE
Carpets ★ Floor Runners ★ Dobbies
And
School Mattings
Acclaimed By Millions At Home & Abroad Because They Are Most
★ COMFORTABLE
★ CHEAP
★ DURABLE
&
SUPERB IN DESIGNS
Manufactured By :
Khardah Company Limited
Managing Agents :
M/s. Anderson Wright, Limited.
7, Wellesley Place,
CALCUTTA-1
Telephone : 23-9231 (6 Lines)
Telegram : Amasis

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्लोमविवेकः

(ले०—पं० श्री दामोदरशर्मा गौड़ः, ए. एम्. एस्. सिद्धान्तविभाग-प्रधानः,
स्नातकोत्तरं आयुर्वेदसंस्थानम्, हिन्दुविश्वविद्यालयः, वाराणसी)

ऊर्ध्वमूलाधःशाखस्य वृक्ष इव नानावयवात्मकस्य क्लोम्नः प्राचामभिमतं नव्यसम्मतं च यथार्थस्वरूपं शारीरपरिषदि मदुपस्थापितस्यार्थस्य ग्रहणेन यथा साधु प्रकटितं भवति, न तथाऽन्येन केनाऽप्यर्थग्रहणेन । बह्वर्थसाधकत्वाद् गुणभूयस्त्वयुतश्चायं पक्षः । क्लोमवृक्षस्य अस्मदभिमतोऽवयवप्रविभागस्त्वित्थमनुसन्धेयः—

मूलभूतं क्लोम (Laryngopharynx.)

स्कन्धभूता क्लोमनाडी (Laryngo-trachial Tube.)

(त्रिधा चास्याः प्रत्यंगविभागः)—

कृकाटिकाख्यः कण्ठभागः (Larynx.)

कण्ठनाडी (Cervical Trachea)

हृदयनाडी (Thoracic Trachea)

शाखाभूते हृदयनाडिके (Bronchii)

प्रशाखाभूताः फुफ्फुसनाड्यश्चेति (Bronchial divisions and sub-divisions.)

तत्र निरुक्तिसमन्वयात् स्वरूपसमन्वयात् पर्यायसमन्वयाद् अंगसाहचर्य्यसमन्वयात् प्राकृतवैकृतलक्षणसमन्वयात् सर्वाधिकसन्दर्भसमन्वयाच्च पक्षस्यास्य बह्वर्थसाधकता सुस्पष्टा । न च मनागपि क्वचित् कल्पनाक्लेशप्रसंगः । अनार्षप्रायाणां कतिपयानामेव वचसामसंवादस्तु निर्णेतव्ये जटिलेऽस्मिन् विषयेऽकिंचित्करः । तिलतिलकशब्दौ च क्लोमपर्य्यायौ । द्वादशविधानि चेमानि क्लोमलक्षणानि क्लोमबुभूष्ववयवेषु परीक्षणीयानि भवन्ति, तद्यथा—

(१) उदकवहस्रोतोमूलत्वम्, (२) श्लेष्मस्थानत्वम्, (३) स्नेहनयोग्यत्वम्, (४) तृष्णाच्छादकत्वम्, (५) उच्छ्रितरूपत्वम्, (६) उच्चलावचलत्वम्, (७) तरुणास्थिमयत्वम्, (८) मण्डलसन्धिमत्त्वम्, (९) विद्रधिभूमित्वम्, (१०) तृष्णाशोषगलग्रहहिक्कादिलक्षणानुभूतिस्थलत्वम्, (११) कोष्ठांगत्वम् (१२) हृत्पार्श्ववर्तित्वं चेति ।

सचित्रायुर्वेदे श्रीमता हनुमत्प्रसादशास्त्रिणा हस्तिशुण्डीपर्य्यायं भक्षमार्गनालपर्य्यायं वाऽन्नमार्ग (Oesophagus) क्लोमत्वेनाभिलक्ष्य कृत ऊहापोहविसर्गोऽपि वस्तुतोऽत्राभिमतं पक्षमेवोपोद्बलयति। क्लोममूलमासाद्यापि शास्त्रिचरणाः प्रस्थानकाले वारियरकृतेन क्लोमनालमिति संज्ञासंकेतेन मुधा मुधैव पश्चिमाभिमुखीभूय पूर्वतः स्थितां संवृतरन्ध्रां युक्तलक्षणां क्लोमनाडीं प्रविहाय, पश्चिमतः स्थितां संवृतमुखीं सम्बाधमार्गां लक्षणहीनां चान्ननलिकामाविष्टाः । कोष्ठांगता तु क्लोम्नोऽस्मत्पक्षेऽपि तथैव नाडीरूपेण वक्षोगुहानुबन्धादव्याहता । न च क्लोमकण्ठगलशब्दानामनर्थान्तरत्वमाशंक्य, 'शुष्कक्लोमगलाननः', 'हृदयं क्लोम कण्ठं च समाश्रिता', 'जिह्वातालुगलक्लोमशोषे मूर्ध्नि च दापयेत्'— इत्यादिसन्दर्भेषु मिलितानां प्रयोगदर्शनं पर्यायदशायां विरुध्यते तस्मान्न कण्ठगलपदवाच्ये ग्रसनिकाभागे क्लोमस्थितिरिति वाच्यम्, अधरोत्तरविभागविभक्ताया ग्रसनिकाया अवयवविभागबलादर्थान्तरविवक्षयाऽत्र समाहितुं शक्यत्वात् । साम्प्रतिकास्तु ग्रसनिकाया उत्तरमध्यमाधरभेदेन त्रिविधं विभागं नामभेदं कृत्वा वर्णयन्ति । 'शुष्कक्लोमगलाननः'— इत्यत्रोक्तः स्वाभावसिद्धोऽवयवक्रमोऽपि पक्षेऽस्मिन् संघटते, तद्यथा क्लोम नाम कृकाटिकान्तर्मुखं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परितः स्थितो ग्रसनिकाधरभागः (Laryngo-pharynx), गलो नाम तदुत्तरस्थो ग्रसनिकांशः (Oropharynx), आननं च गलानुबन्धि मुख-कुहरम् (Mouth Cavity proper) इति । कण्ठ-शब्दस्तु रूढ्या गलग्रीवादिवाचकोऽपि यौगिकार्थ-बलात् क्लोमैकदेशस्य कृकाटिकपरपर्यायस्य स्वर-यन्त्रस्यापि (Larynx) वाचको भवितुमर्हति । कणति शब्दं करोतीति क्रियाशारीरोपयोगिनी कण्ठ-निरुक्तिः, कृकं कण्ठमटति=कण्ठे ऊर्ध्वाधो गच्छ-तीति रचनाशारीरोपयोगिनी कृकाटिकानिरुक्तिश्च क्लोकमैदेशस्य स्वरयन्त्रस्य यथार्थस्वरूपं प्रकट-यति । एवमस्मत्पक्षे शास्त्रिमहाभागैरुद्भावितस्य कोष्ठांगत्वाभावोऽर्थान्तरत्वाभावश्चेति दोषद्वयस्य परिहारे शिष्टः सर्वोऽपि तेषां मतान्तरदूषणपुरःसरं स्वमतसाधनाय कृतः प्रयत्नोऽस्मानेवानुगृह्णाति ।

संदर्भसंगमकः क्लोमवृक्षविवरणविस्तरस्त्व-त्यम्—

मूलभूतं क्लोम (Laryngopharynx)—

क्लोममूलमिदं जिह्वामूलस्थः कण्ठमूलस्थो वा मांसमयप्राचीरप्रधानः कूपानुकारः क्लोमाद्यभागः, अन्तर्गलस्याधरांशभूते यस्मिन् पूर्वोर्ध्वतः क्लोम-नाड्याः कृकाटिकाभागस्योर्ध्वमुखं पश्चिमाधरतश्च भक्षमार्गनालसंज्ञस्यान्नमार्गस्य मुखमुन्मुच्यते । एवं श्वासान्नपथाभ्यां तुल्यानुबन्धेऽपि कृकाटिका-पश्चिमतः स्थितस्यान्नमार्गमूलभागस्य संश्लिष्ट-भित्तितया क्लोममूलस्य श्वासपथेनैव विशेषानुबन्ध आपाततो दर्शने प्रतिभातीति विशेषोऽपि न विस्मर्तव्यः **व्यासभाष्येऽप्युक्तम्** — 'जिह्वाया अधस्तात्तन्तुः, ततोऽधस्तात् कण्ठः, ततोऽधस्तात् कूपः । तत्र संयमात् क्षुत्पिपासे न बाधेते' इति । 'कण्ठकूपे क्षुत्पिपासानिवृत्तिः' इति च पातंजल-सूत्रम् । लक्षणानि चात्र क्लोमैकदेशे तरुणास्थिमयत्वं मण्डलसन्धिमत्वं कोष्ठांगत्वं हृत्पार्श्ववर्त्तित्वं च प्रविहाय शेषाण्यष्टावपि समनुयन्ति । शिष्टे क्लोम-भागे त्विदं लक्षणचतुष्टयमपि यथोत्तरं सुसंगतार्थं भवति ।

एष चात्र संगतार्थः सन्दर्भराशि :—

उदकवहानां स्रोतसां तालुमूलं क्लोम च ।
—च० वि० ५।८

उरः कण्ठशिरः क्लोमपर्वाण्यामाशयो रसः ।
मेदो घ्राणं च जिह्वा च कफस्य सुतरामुरः ।।
—वा० सू० १२।३

तिल स्नेहने, तिलति स्नेहयति रूक्षमाणस्रोतां-सीति तिल इति तिलनिरुक्तिः

जलवाहिशिरामूलं तृष्णाच्छादनकृन्मतम् ।
—भावमिश्रः ।

किंचिदुच्छ्रितरूपश्च जायते क्लोमसंज्ञितः ।
—वृ० वा० शा० ५।

क्लुङ् गतौ, क्लवते निगरणक्रियायामूर्ध्वमधो-गच्छतीति क्लोम । तिल गतौ, तेलति उद्-गच्छति क्षुत्पिपासाबोधनायेति तिलम् । इति क्लोमतिलनिरुक्ती । अन्तः कुर्व्वन्ति

विद्रधिम्.... । हृदये क्लोम्नि वा तथा ।।
(Subpharyngeal Abscess)
—सु० नि० ९।१८

जिह्वामूलगलक्लोमतालुतोयवहाः शिराः ।
संशोष्य तृष्णा जायन्ते ......।। वा० नि० ५।४७

जिह्वातालुगलक्लोमशोषे मूर्ध्नि च दापयेत् ।।
—सु० उ० ३९।१८४

शुष्कक्लोमगलाननः । सु० उ० ४१।२१।।
क्लोमजायां पिपासामुखशोषगलग्रहाः ।
—च० सू० १७।१०१ ।

हृदयं क्लोम कण्ठं च तालुकं च समाश्रिता ।
मृद्वी सा क्षुद्रहिक्केति नृणां साध्या प्रकीर्तिता ।।
—च० चि० १७।३७ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता ॥
—सु० उ० ५०।१२

(जत्रुमूलग्रहणेन हृदयक्लोमकण्ठानामपि ग्रहणमिति गयदासः)

जिह्वाताल्वोष्ठकण्ठक्लोमशोषं पिपासां चातिप्रवृद्धां दृष्ट्वा उदकवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात् । —च० वि० ५।८।
तत्र हृदयेऽभिहते कासश्वासबलक्षयकण्ठशोषक्लोमापकर्षणजिह्वानिर्गममुखतालुशोषापस्मारोन्मादप्रलापचित्तनाशादयः स्यु ।
—च. सि. ९।६।

पं० श्री कृष्णशास्त्रिकवडेमहोदयैरपि भागोऽयं क्लोमत्वेन समर्थितः, तद्यथा—'मुखविवरान्तरे तालुसमीपे जिह्वामूलगलकण्ठग्रीवानिकटवर्तिभाग एव क्लोमाभिधोऽवयवः स्थित' इति । वारियरमहोदयैस्तु समग्रग्रसनिकाया एव क्लोमसंज्ञा स्वीकृता । तिलकपदेन तु ते बालग्रन्थिसंज्ञं (Thymus) ग्रन्थिविशेषं गृह्णन्ति ।

स्कन्धभूता क्लोमनाडी (Laryngotracheal tube)—

क्लोमनिबद्धा गलनाडिकेयं ग्रीवायाः पुरस्तादधोवतरन्ती वक्षोमध्यं प्रविश्य प्राक् शाखाद्वये परतश्च प्रशाखानुशाखासु चात्मानं विभजति फुफ्फुसद्वयप्रवेशाय उपर्युपरि संहितैस्तरुणास्थिमण्डलैश्चैषा प्राधान्येन विरच्यते । अस्या उच्छ्रितरूपो मांससाराणां निगूढप्रायश्च मूर्धभागः कृकाटिका (Larynx) संज्ञां लभते । तत्र क्लोमनाड्या ग्रीवागतो भागः कण्ठनाडीसंज्ञः (Cervical Trachea) वक्षोगतोंऽशश्च हृदयनाडीसंज्ञः (Thoracic Trachea) भवन्ति चात्र—

(१) कृकाटिकान्ते छिन्नेऽपि गच्छत्यपि समीरणे । सु० चि० २।३२ ।
(कृकमटति=कण्ठे ऊर्ध्वाधो गच्छतीति कृकाटिका)

(२) कण्ठनाड्यां चत्वारि । सु० शा० ५।१९।

(३) कण्ठनाडीमुभयतश्चतस्रो धमन्यः ।
—सु० शा० ६।२७।

(४) कण्ठहृदयक्लोमनाडीषु मण्डलाः ।
—सु० शा० ६।२७

(५) नाडीषु हृदयक्लोमनिबद्धास्वष्टादश ।
—सु० शा० ५।२७

शाखाभूतं क्लोमनाडीयुगलम् (Two Bronchii)—

क्लोमनाड्या हृदयनाडीसंज्ञो भाग उरसि हृत्समीपे द्वयोः शाखयोर्विभज्यते फुफ्फुसयुगलधारणाय । हृदयनाडिके इति च तयोः संज्ञानम् । उक्तं च डल्हणेन—फुफ्फुसो हृदयनाडिकालग्नः स्वनामख्यातः' इति (शा० ४।२५)

प्रशाखानुशाखाभूताः क्लोमनाड्यः (Bronchial divisions)—

प्रत्येकं हृदयनाडिका नानाशाखासु प्रविभज्य फुफ्फुसान्तस्तरोः प्रशाखानुशाखा इव प्रसरति (Bronchial Tree) फुफ्फुसनाड्य इति तासां संज्ञाविशेषस्तु 'नाडीषु फुफ्फुसक्लोमनिबद्धास्वष्टादश' (शा० ५।२६) इति सुश्रुतस्य पाठान्तरबलादनुसन्धेयः ।

सर्वे चैते स्कन्धशाखाप्रशाखारूपा नाडीविशेषास्तरुणास्थिखचिता मण्डलसन्धिमन्तः श्लेष्मस्राविकलास्तरयुताः पेशीतन्तुमयत्वात् संकोचविकासशीलरन्ध्राश्च भवन्ति । तरुणास्थीनि च पुरतः शैवतिलकपट्टिकानुकारा भासन्ते । तरुणास्थिगर्भत्वादेव नाड्य इमा नियतं विवृतरन्ध्रास्तिष्ठन्ति न तु भक्षमार्गनालवत् संवृतरन्ध्राः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाडीरूपे क्लोमभागे त्वत्र सर्वाधिकक्लोमलक्षणसमन्वयो दृष्टः। क्लोमनाड्या प्रस्तुतविवरणेन यथास्थलं संगतार्थः सन्दर्भराशिस्तु पुनरित्थम्—

(क) क्लोम स्याद् गलनाडिका
क्लोम सरन्ध्रा गलनाडिका

(गिरति शब्दं करोतीति गलः, गीर्यते निगीर्य्यतेऽनेनेति वा गलः, निगरणक्रिया च कृकाटिकोन्नमनव्यापारमन्तरा न सम्भवति)

कण्ठे=गलनलकास्थानि।—डल्हणः
(शा० ५।२६)

कण्ठहृदयक्लोमनिबद्धास्वष्टादश।—डल्हणः
(सु० ५।२६)

(ख) हृदयनाडिकालग्नः फुफ्फुसः स्वनामख्यातः।—डल्हणः (शा० ४।२५)

(ग) (त्रयः कण्ठनाड्यां, नाडीषु फुफ्फुसक्लोमनिबद्धास्वष्टादश—पाठान्तरम्
(सु० शा० ५।२६)

कोष्ठांगानि स्थितान्येषु हृदयं क्लोमफुफ्फुसम्।
(वा० शा० ३।१२)

क्लोम प्लीहा यकृच्चैव फुफ्फुसं हृदयं तथा।
गर्भेण पीडितं ह्येतदूर्ध्वं प्रक्रामति स्त्रियाः॥
—डल्हणोद्धरणम् (नि० ८।१४)

यकृद्हृदयपार्श्वे च क्लोम वक्षः स्थितं विदुः।
—पालकाप्यः।

तस्याधो वामतः प्लीहा फुफ्फुसश्च,
दक्षिणतो यकृत् क्लोम च।
—सु० शा० ४।३१ इति।

एवं च सर्वाधिकं लक्षणसन्दर्भादिसमन्वयाद् यादृशी क्लोमपदयोग्यता निबन्धनिर्दिष्टस्यावयवसमुदायस्य दृश्यते न तादृशी केषांचिदप्यन्येषां क्लोमबुभूषूणामवयवानामिति सुस्पष्टम्। पक्षोऽयं श्रीमतां गणनाथसेनमहोदयानामपि सम्मतः। प्रत्यक्षशारीरस्योपोद्घाते द्वितीयखण्डस्य पादटिप्पण्यां च तैरित्थं व्यवसितम्, तद्यथा—

(१) केचिदामाशयपश्चाद्वर्त्तिनि अग्न्याशयाख्ये यन्त्रे क्लोमपदं प्रयुंजते साम्प्रतिकाः। तत्प्रामादिकम्, यतः शुष्कक्लोमगलानन इत्यादिप्रयोगदर्शनात् टीकाकृद्भिः क्लोम्नः पिपासास्थानत्वेन निर्देशाच्च गलसमीपवर्ती कोऽप्यवयवः क्लोम इति शक्यमुन्नेतुम्। 'क्लोम स्याद् गलनाडिका' इति देवयाज्ञिकभाष्यदर्शनात् सुश्रुतेन मण्डलाख्यास्थिसन्धेः क्लोम्नि इति दृष्टान्तदर्शनाच्च तरुणास्थिचक्रवेष्टितः श्वासपथ एव कण्ठपुरस्थः क्लोमेति निश्चयोऽस्माकम्। श्वासपथश्चायं फुफ्फुसद्वये प्रविशन् द्वेधा विभक्त इत्युरोमध्यतोऽप्यस्य स्थानम्। इति।

(२) क्लोमपदार्थनिर्णये बहुधा विवदन्ते वैद्याः। ......। तत्र क्लोम नाम गलविलवेष्टनोऽवयवो ग्रसनिकेति पं० कृष्णशास्त्रिकवडेमहाशयानां मतं नोपेक्ष्यम्, केषांचिल्लक्षणानां तत्र समन्वयात्। तथापि 'क्लोम स्याद् गलनाडिका' इति कर्काचार्य्यमतमुव्वटमहीधराभ्यां समर्थितं याज्ञिकानां च समादृतं साधीयः प्रतिभाति। याज्ञिका हि गुरुपरम्परालब्धज्ञानेन यज्ञे क्लोम्नि हवनीये गलनाडीमेव क्षिपन्ति। सा च कण्ठे चोरसि चावतिष्ठते, सुश्रुतोक्तमण्डलास्थिसन्धयश्च तस्यामेव। अथ ग्रसनिकासम्बद्धा श्वासनलिका क्लोमेति चेत् कल्प्यते तर्हि सर्वलक्षणसमन्वयः सम्भवति, ग्रसनिकाया विद्रधिस्थानत्वात् पिपासास्थानत्वेन प्रसिद्धेश्च। परं ग्रसनिकाऽन्ननलिकानुबन्धिनी विशेषस्यादिति क्लोम्नि तदन्तर्भावो न युज्यते। इति च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयं तु क्रमो यच्छ्वासान्नपथाभ्यां तुल्यानुबन्धिन्या अपि ग्रसनिकायाः कृकाटिकापश्चिमस्थस्याधरभागस्य संश्लिष्टभित्तितया तदूर्ध्वभागस्य श्वासपथेनैव विशेषानुबन्ध आपाततो दर्शने प्रतिभातीति वस्तुहृदयं न विस्मर्तव्यमिति ।

कतिपयवचसामसंगतिस्तु सर्वथैव चिन्त्या, तेषामनार्षत्वात् प्रामादिकत्वाद् अन्योऽन्यं विरुद्धत्वाच्च । तद्यथा—

(१) वृक्कादूर्ध्वं पिपासास्थानम् (कृकचादूर्ध्वमिति तु साधीयान् पाठः)

क्लोमा उदर्यो जलाधारः । — महीधरः
क्लोमा हि लोहिताधारः ।—हरिहरभाष्यम् ।

(२) क्लोम कालखण्डादधस्तात् स्थितं दक्षिणपार्श्वस्थं तिलकमिति
प्रसिद्धम् — डल्हणः ।

(३) क्लोम्नो ह्यामाशयस्थत्वात् वातकृतक्लोमशोषेण पिपासाम् — गयदासः ।

ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः ।
तस्योपरि तिलं ज्ञेयम्....... ।।—शार्ङ्गधरः ।

कुकिन भोजन में चिकने तत्व नहीं बढ़ाता

कुकिन

शुद्ध किया हुआ सफ्फलावर (करडी) तेल पॉलीअनसेचूरेटेड, (जमाया न हुआ) उत्कृष्ट पौष्टिक पॉलीअनसेचूरेटेड चिकने एसिडों के कारण खून के कोलेस्टरोल तत्व कम होते हैं और दिल की बीमारियों की रोक-थाम व इलाज में तथा उच्च रक्तचाप को काबू में रखने में भी ये लाभकर हैं। ये एसिड सबसे ज्यादा मात्रा में कुकिन में ही हैं—लिनोलिथिक एसिड तो ७६% है, जो कोलेस्टरोल को कम करने वाला ठोस तत्व है। डाक्टर लोग इसकी बहुत ही सिफारिश करते है, इसलिए आज ही कुकिन में खाना पकाना शुरू कीजिये। अपने क्षेत्र के स्टॉकिस्ट को जानने के लिये हमें लिखिये ।

कुकिन से आपकी खून पहुंचाने वाली नसें सशक्त रहती हैं और कोलेस्टरोल तत्व कम हो जाने से आप भी अपनी नसों की तरह सशक्त रहते हैं ।

अहमद मिल्स, बम्बई—८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेध्यरसायनम्

(ले०—वैद्यवर श्री वा० बा० नटराजशास्त्री, आयुर्वेदाचार्यः, तिरुचिरापल्ली-निवासी)

प्रसन्नं दक्षिणामूर्तिं गुरुं ज्ञानमयं शिवम् ।
मेधाकामो हृदि ध्यायन् मेध्यभावांश्चिनोम्यहम् ॥

ननु मेध्यरसायनमिति चेत् कोऽर्थः ? "पूतं पवित्रं मेध्यं च" इति निघण्टुवचनेन 'पवित्र रसायनम्' इत्यर्थो वा ? अथवा, "मेधा बुद्धौ क्रतौ पुमान्" इति कोशेन यागवाचिनं पुंलिङ्गमेधशब्दं गृहीत्वा, मेधाय यागाय अर्हं इति कृत्वा तादृशं रसायनं मेध्यरसायनं इत्यर्थो ग्राह्यो वा ? कोऽर्थो मेध्यशब्दस्य ? किञ्च, रसायनशब्दस्य प्राचीने संस्कृतसाहित्ये दृश्यते एकोऽर्थः । अर्वाचीने तु, अर्थान्तरे अद्यतनैः प्रयुज्यते अयं रसायनशब्दः । अनयोः पदयोरत्र अभिसंहितोऽर्थः कः ?

उच्यते—नानार्थस्य शब्दस्य अर्थनिर्णयः प्रकरणेन सिद्ध्यति । इह आयुर्वेदप्रकरणे रसायनं नाम "वयःस्थापनं आयुर्मेधाबलकरं रोगापहरण समर्थं च" "लाभोपायो हि शस्तानां रसादीनां रसायनम्" इति यत् प्रसिद्धं तदेव ग्राह्यम् । न केवलं औद्भिद-वनस्पतिप्रयोगबहुलेषु आयुर्वेदग्रन्थेषु किन्तु प्राधान्येन पारदादिलोहप्रपञ्चके कृत्स्ने रसशास्त्रेऽपि रसायनशब्दः भेषजादीनां प्रभाववाचक एव, न क्वापि शास्त्रविशेषाभिधायी दृष्टः, यथा लक्षणया वा "रसायनं—Chemistry" इति अनुवदितुं युज्येत ।

सर्वं सामान्यसाहित्यं च आयुर्वेदादिशैव रसायनशब्दं प्रयुङ्क्ते । पश्यत-"निखिलरसायन-महितो गन्धेनोग्रेण लशुन इव "इति रसगङ्गाधरे, "आनन्दनानि हृदयैकरसायनानि" इति मालतीमाधवे, "मनसश्च रसायनानि" इति उत्तररामचरिते च महाकविप्रयोगान् ।

रसायनशब्दस्य शक्तं योगरूढं प्रसिद्धार्थं अविज्ञाय रसायनपदं (Chemistry) वाचित्वेन यदिदानीं कैश्चन पण्डितंमन्यैः प्रयुज्यते तत् संस्कृत-साहित्यस्य सामयिकं दौर्भाग्यमेव ।

वस्तुतो रसायनशब्द एकार्थक एव न नानार्थः । अथापि कृत्वा चिन्तान्यायेन इह रसायनशब्द आयुर्वेदाचार्यै निरुक्तो ग्राह्य इति स्पष्टीकृतम् ।

अथ मेध्यपदं पवित्रार्थकं उत यागहितार्थकं वा ? इति पृष्टं किल, तत्रोच्यते—उभयमिदं न, उभयोः मेध्यरसायनमिति वाक्ये विशेष्येण रसायन-पदेन दुर्घटार्थत्वात् । कोऽर्थस्तर्हि ? "मेधायै हितं मेध्यं" इत्यर्थ एव रसायनविशेषणत्वेन साधुः ।

"मेधृ—मेधाहिंसनयोः सङ्गमे च" इति मेधृ-धातोरर्थास्त्रयः । मेधा मेधः मिथुनं इति स्त्रीपुंन-पुंसकलिङ्गाः शब्दाश्च त्रयः तस्माद् धातोर्निष्पन्नाः । प्रकृते तेष्वादिमं मेधाशब्दं गृहीत्वा—मेधायै हितं, मेधायाः निमित्तं, मेधायां साधु इति तद्धितयत्प्रत्यय-योगनिष्पन्नो मेध्यशब्दो ग्राह्यः । मेध्यं च तत् रसायनं चेति कर्मधारयः । मेधा नाम बुद्धिविशेषः, तस्यै हितं यत् रसायनं तत् मेध्यरसायनम् ।

ननु मा भूत् 'मेध्यं यागहितमिति' यजनीय-रसायनाभावात् । लशुनरसायनात् आमलक-रसायनस्य धर्मशास्त्रेण पूतत्वात् आमलकादि-रसायनप्रस्तावे विशेषणं मेध्यं पवित्रार्थकमेव हि ? न, आयुर्वेदे सर्वत्र मेध्यशब्दस्य मेधाया जनक-त्वेनैव परिभाषितत्वात्, सांप्रदायिकैरेवमेव व्याख्या-तत्वात्, मेध्यं पवित्रमिति मिथो भिन्नार्थकविशेषण-त्वेन युगपत् प्रयोगाणां दर्शनाच्च । तथा हि चरको मात्राशितीये—

मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम् ।
पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः ॥ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलं शब्दार्थविचारेण, प्रकृतमनुसरामः।
"दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।
प्रभावर्णस्वरौदार्यं देहेन्द्रियबलं परं।
वाक्सिद्धिं प्रणतिं कान्तिं लभते ना रसायनात्॥"

इत्यादीनि रसायनस्य प्रयोजनानि बहूनि सन्ति। अतो बहुविधानि रसायनानि आयुर्वेदाचार्यैरुपदिष्टानि। तेषु मेधाकराणि रसायनानि इह यथामति व्याचक्ष्महे।

मेधा नाम का?

मेधा तावत् बुद्धया एव शक्तिविशेषः। बुद्धिस्तावत् प्रकाशप्रवृत्तिस्थितिशीलेषु सत्वरजस्तमस्सु मनसो गुणेषु सत्वगुणप्रभवः शक्तिविशेषः। ऊहः अध्यवसायः स्मृतिः धृतिरितीमे भावविशेषाश्च बुद्धया एव कार्यप्रभेदाः। धीर्बुद्धिश्च पर्यायौ। 'धीर्धारणावती मेधा' इति कोशः प्रसिद्धः। अस्तु, धारणा का? तत्र पातञ्जलाः—मूलाधाराद्यन्यतमस्मिन् नाडीचक्रविशेषे प्रत्यगात्मनि वा चित्तस्य निष्ठा धारणा परा, पञ्चभूत-विजयप्रक्रिया च अपरा धारणा इति द्विविधां धारणां भाषन्ते। परं साधारणतो लोके नवनवोन्मेषप्रतिभाशालिनी सर्वतोऽव्याहता श्रुतधारिणी प्रगल्भा सूक्ष्मतरा सत्वगुणसमुत्था बुद्धिशक्तिः—बुद्धयाः धारणा—सैव मेधा इति प्रसिद्धा। अतः पठन्ति कोशकाराः 'धीर्धारणावती मेधा' इति।

अत्रायं सूक्ष्मविशेषोऽवधेयः—नैव मेधाशब्दः उत्कृष्टबुद्धिचातुर्यसामान्यवाची। चौरवाणिज्यपरप्रतारणादि खलदुष्कृत्यनैपुण्यमपि मनः शक्तिप्रकर्षजन्यमेव। तथाऽपि तादृशी कुटिलदुर्बुद्धिचातुरी नैव मेधाशब्दवाच्या। शुद्धसत्वस्य शुद्धा सत्या या बुद्धिस्तस्या धारणाशक्तिरेकैव मेधा इति कीर्त्यते। तथा ह्याह महर्षिरात्रेयः पुरुषविचयशारीरे—

"शुद्धसत्वस्य या शुद्धा सत्या बुद्धिः प्रवर्त्तते।
यया भिनत्त्यतिबलं महामोहमयं तमः॥
सर्वंभावस्वभावज्ञो यया भवति निस्पृहः।
योगं यया साधयते सांख्यः संपद्यते यया॥
यया नौपैत्यहङ्कारं नोपास्ते कारणं यया।
यया नालंबते किञ्चित् सर्वं संन्यस्यते यया॥
याति ब्रह्म यया नित्यमजरं शान्तमव्ययम्।
विद्या सिद्धिर्मतिर्मेधा प्रज्ञा ज्ञानं च सा मता"॥
इति

इदमायुर्वैदिकं मेधालक्षणं सर्वथा अद्वैतवेदान्तदर्शनानुसारि। अवलोक्यतां "अहं वृक्षस्य रेरिवा ··· ··· ··· सुमेधा अमृतोक्षितः" (कृ० य० तै० आ० ७—१०) इत्युपनिषन्मन्त्रस्य श्री सायणाचार्यभाष्यम्। यथा, शोभना मेधा ब्रह्मज्ञान प्रतिपादकग्रन्थतदर्थावधारणशक्तिः, यस्य मम सोऽहं सुमेधाः। अत एवाहं अमृतेन ब्रह्मानन्दरसेन उक्षितः सेचितः" इति। तथा नारायणीयोपनिषदि उपदिष्टयाः मेधादेवताप्रार्थनपराया ऋचो भाष्यावतारिका पठति ········· "जीवात्मन ईश्वरेण अभेदज्ञानं यदस्ति तस्य ज्ञानस्य नैरन्तर्येण साधनं मेधाऽधीनम्। अतो मेधाऽभिमानिनीं देवतां प्रार्थयितुं एकामृचमाह—'मेधा देवी' इति। उपनिषदुपदिष्टातिगहनब्रह्मज्ञानसंपादनक्षमा एतादृशी मेधासंपत् आयुर्वेदोपदिष्टमेध्यरसायनसेवनेनैव संपादयितुं शक्यते। एवं मनुष्याणां शरीरं सत्वं च ब्रह्मज्ञानसंपादनक्षमं कर्त्तव्यमेव महर्षय आयुर्वेदं उपदिष्टवन्त इति तत्वमिह बोद्धव्यम्।

मेधायाः शारीरविवरणम्

शारीराणामिव मानसानामपि कृत्स्नव्यापाराणां नियन्ता प्रणेता च जीवशक्तिरूपः सर्वप्राणिदेहचरो भगवान् वायुरेव सर्वाध्यक्षः। तथाऽपि वायुना परस्परानुप्रविष्टसमुच्चितधातुत्रयेणैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निखिलशारीरमानसक्रियाऽभिनिष्पत्तिरिति स्थितेः तत्र मनः शक्तिविशेषस्य मेधायाः साक्षात् अनुग्राहको ध्वंसकश्च प्राधान्येन पित्तधातुरेव । आह सुश्रुतः— "रागपक्त्योजस्तेजो मेधोष्मकृत् पित्तं पञ्चधा प्रविभक्तं अग्निकर्मणा अनुग्रहं करोति" इति ।

पित्तपञ्चकेऽपि कतमं मेधाकृदिति भूयो विवृणोति चरकः त्रिशोथीये —"प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्"; "यत्तु साधकसंज्ञं तत् कुर्याद् बुद्धिं धृतिं स्मृतिम्"। बुद्धि मेधाऽभिमानाद्यै रभिप्रेतार्थसाधनात् यत् पित्तं हृदये तिष्ठत् मेधाप्रज्ञाकरं हि तत्" इति ।

तदेवं सत्वबहुलः प्रसादात्मकः पित्तधातुः शारीरधात्वग्नीनामिव ज्ञानाग्नेरपि कर्त्ता भवति । तत्र साधकपित्तस्य भूयः प्रसादसंपादनेन मेधावर्धनोपायो व्याख्यातो भवति ।

प्रयोजनं किम् ?

मनुष्यैः सर्वैः स्वमेधाभिवर्धनपरैः सर्वदा भवितव्यमिति बोधनं नावश्यकम् । पुरुषाणां यथा यथा ज्ञानविज्ञानप्रकृष्टत्वं तथा तथा पूज्यतरत्वमिति व्यवस्थितेः, कः पुरुषः स्वबुद्धिकौशलप्रकर्षं नान्विच्छेत् ? यदि ज्ञानानामुत्तमं ब्रह्मज्ञानं यदि तत् निखिलं वेदशास्त्रविज्ञानमननैकसाध्यं, यदि वेदादिग्रहणमननसामर्थ्यं समुत्कृष्टमेधायत्तं, तर्हि कः प्रेक्षावान् स्वमेधाभिवृद्धये न प्रयतेत ? नाद्रियेत वा तद्वर्धनोपायविशेषान् आगमोपदिष्टान् ? अतिगहना आत्मविद्या अपि मेधया साधयितुं शक्या इति चेत्, भौतिकविज्ञानादौ नैपुण्यं सुमेधसां स्यादिति किमु वक्तव्यं पृथक् ?

न मनागाशङ्कनीयं—ननु मेधाप्रकर्षः सहजः स्वभावसिद्धः । अदृष्टकारणवशात् यदृच्छया वा मनुष्येषु केचन मेधाविनो जायन्ते केचन मन्दमेधाः । दैवायत्तत्वात् मेधाप्राप्तेः, कथमिदानीं मेधावर्धनं कर्त्तुं शक्यं स्वच्छन्दत इति, रसायनसेवनेन इह मेधाभिवृद्धेः प्रमाणसिद्धत्वात् । यदि न स्यात् ऐहिकास्मत्प्रयत्नेन इह परत्र च मेधा शक्यसंपादा, तर्हि मेधाकरत्वेन उपदिष्टानां निखिलवेदशास्त्रप्रयोगाणां पामरप्रलपितत्वापत्तिः । नाराणां कतिपयानां जन्मसिद्धं मेधावित्वं न यादृच्छिकं नाहेतुकम्, किंतु अतीतजन्मानुष्ठितमेध्यकर्मफलमेव तत्, न कोऽपि भावः अहेतुको भवितुमर्हतीति युक्त्यागमसिद्धत्वात् । यथावत् पौरुषप्रयत्नेन समुचितमेध्यरसायनोपासनेन, शरीरपुष्टिरिव ब्रहणान्नसेवनेन, मेधापुष्टिर्नियतं इहैव शक्यसंपादा । एवं भाविजन्मन्यपि मेधाप्रकर्षलाभाय ऐहिकः मेध्यसंस्कारः आवश्यकः उपकारकश्च, अन्यथा, भाविनी जनिर्मन्दमेधा संभवेत् ।

विदुषामिदं सुविदितं यत् अस्मद्भारतीयेषु प्राचीनविद्यास्थानेषु नास्त्येकोपि विद्याविभागो यो स्वस्वसरण्या मेधाप्रकर्षोपायं नोपदिशति विस्तरेण अतस्तेषां दिङ्मात्रप्रदर्शनार्थं संकलनमपि सर्वथा दुष्करम् । अथापि किञ्चित् प्रयत्यते गुरुप्रसादमवलंब्य ।

ऋग्वेदे—(८. ८. ६) 'मेधा मह्यं' इत्यादिको महान् मेधासूक्तमन्त्रः ।

यजुर्वेदे—"यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽप्यमृतात् संबभूव । समेन्द्रो मेधया स्पृणोतु ! अमृतस्य देवधारणो भूयासम्" ! (तै. आ. ७. ४) "मेधा देवी जुषमाणा ····· भ्राजो दधातु" (आ. ४. १) इत्यादि । कृष्णायजुर्वेद संहितायां—कांडेषु १, १, २, १, २, ३, १, ३, १३, १, ४, १, १, ६, १५, ४. १. ६, ५. १. ७, १. २. २, ६, १, २, ४ स्थलेषु च ये मन्त्राः ते सर्वे च धिषणा-मेधा-देवतामन्त्रा एव ।

सामसंहितायां—"मेधामाशास्ते श्रिये"(१.१०१) साममन्त्रब्राह्मणे—'मेधां त अश्विनौ देवौ'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१. ५. ६) "मेघामभिप्रयांसि च" (१. ५. २२) "मेधाऽमृतस्य जगृभ" (१. १५२) इत्यादिका मेधावर्धनमन्त्राः ।

अथर्वणवेदस्य प्रथमं प्रारम्भकं सूक्तं मेधाजननमन्त्रात्मकमेव । "ॐ त्रिषप्ता परियन्ति विश्वारूपाणि बिभ्रतः । वाचस्पतिर्बला तेषां तन्वो अद्य ददातु मे ॥" (का० । अ० । सू० ।) "अस्य आद्यसूक्तस्य मेधा जनने विनियोगः" इति श्री सायणाचार्यभाष्यम् । ऋक्सामयजुरथर्ववेदेषु यथोत्तरं अधिकतरा मेधावर्णनमन्त्राणामुपदेशाः प्रयोगाश्च ।

इदं स्वारस्यमत्रावधारणीयं—श्रुतिमाता मेधाकरमन्त्रमेव प्रथमतया उपदिशति; "शरीरं मे विचर्षणम्" इति आरोग्यसाधकं मन्त्रं द्वितीयतया उपदिशति; 'आवहन्ती वितन्वाना" इत्यादिकं अन्नपानवस्त्रादि श्रीप्रदं मन्त्रं क्रमे तृतीयतया च उपदिशति । आयुर्वेदे धन्वन्तरिरपि "अथ मेधायुष्कामीयमध्यायं व्याख्यास्यामः" इत्याह नायुर्मेधाकामीयमिति । अतः स्फुटमिदं यत् मेधाविहीनस्य आयुरारोग्यैश्वर्यादिकमनर्थाय महते । पुंसां अर्थ्येषु प्रथमा मेधैवेति वेदोपवेदयोस्तात्पर्यमिति च ।

न केवलं पूर्णतो वेदानुगैर्महर्षिभिः दृष्टेषु श्रौतगृह्यधर्मसूत्रेषु स्मृतिग्रन्थेषु मेध्यमन्त्राणां जपहोमकल्पाः उपदिष्टाः, निखिला आह्निका आचारा मेधाहिता एव विहिताः, मेधादूषका आहारादयो निषिद्धाः; न केवलं अंशतो वेदानुसारिभिः तान्त्रिकैः, किंतु वेदबाह्यैर्जैनादिभिरपि मेधाकराणि साधनानि वैदिकशास्त्रेभ्यः स्वीकृत्य स्वनयेन संस्कृत्य अनुष्ठितानि । सावित्री-दक्षिणामूर्त्ति गणपति-सरस्वती-हयग्रीव-नरसिंह-व्यास बृहस्पति-कविकण्ठाभरणेत्यादिसंज्ञका मेधैकफला महामन्त्राः प्रसिद्धाः मन्त्रशास्त्रेषु । श्री शंकरभगवत्पादैः करुणया प्रपञ्चसारे सौन्दर्यलहरीश्रुतौ च मेधार्थिनां समाश्रयणीया अति सरला सरणिः प्रदर्शिता ! ज्योतिःशास्त्रे च मेधाकारकयोर्बुधबृहस्पत्योः पूजनं विहितं मेधालाभाय तथा मेधाविनं सुतं कामयमानयोर्दम्पत्योः तदर्थं संगममुहूर्तविशेषोपदेशश्च कृतः । श्रूयते हि श्रीहर्ष-नारायणोद्दण्डप्रभृतीनां क्रान्तदर्शिनां कवीनां जातिकवित्वं तत् पितृभिरनुष्ठितायाः कविपुत्रकाम्येष्ट्याः फलितमेवेति ।

तदित्थं पौरुषप्रयत्नेन मेधासमृद्धानां प्रजानां सर्जनं शक्यं जनकैः कर्त्तुमिति प्रथममुपदिष्टवती भगवती श्रुतिरेव । अवलोकयत बृहदारण्यकोपनिषदि—यइच्छति पुत्रस्य वर्णविशेषं एकद्वित्रिचतुर्वेदपारगां मेधां, पण्डितां दुहितरं वा, तस्य अभीष्टप्रदान् प्राक्सङ्गमात् पितृभ्यामनुष्ठेयान् प्रयोगविशेषान् (ब्रा० ४, अ० ४, का० १४–१८) श्रौतमुपदेशमेव महर्षयो महर्षिकल्पा आप्ताश्च बहुभिः शास्त्रैः प्रचारितवन्तः । ऋतुसंवेशनपुंसवनजातकर्मोपनयनादिप्रयोगाः सर्वे जनिष्यमाणं जातं च सुमेधसं कर्त्तुमेव विहिताः शास्त्रेषु ।

तत्र आयुर्वेदस्तावत् मेधायाः संवर्धनोपायेषु अतिशेते सर्वाणि शास्त्राणि । इतरदर्शनप्रोक्ताः मेध्यप्रयोगाः सर्वे अस्वस्थेषु अविशुद्धशरीरेषु वा प्रयुक्ता निष्फला एव स्युः । सर्वं खलु मेधावर्धनं प्रकृष्टमनःप्रसादजननात्मकम् । मनः प्रसादश्च दोषधातुमलानां शारीराणां, तत्क्रियाणां च स्थिरसमत्वे एव सम्पद्यते । अत आयुर्वेदः मेधाकराणां रासायनिकविधीनां प्रयोगावसरे शारीरदोषापनयनपूर्वकं कृत्ये देहे विधत्ते प्रयोगान् मेध्यान् सर्वत्र शारीरधातुहितोपहितानेव । तेन रसायनगुणान् यथोक्तान् सर्वान् स समश्नुते आयुर्वेदरीत्या प्रयुञ्जानः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चास्मिन् युगे विशिष्य मन्त्रजपादिभिः मेधासिद्धिर्न भूयसां सुलभा विहितनियमपरिपालनाशक्तत्वात्। ओषधिद्रव्यसेवनेन तु अल्पतरायासेन मेधालाभः [सम्भाव्यते । मेधामन्त्रोपदेष्टारोऽपि मन्त्रजपैः सह ओषधिविशेषैर्होमं, ब्राह्मीशतावर्यादिभिः संस्कृतसर्पिषः समन्त्रकपानं, ओषधीभिः स्नानं चानुष्ठापयन्ति । पूर्वाचार्याः ओषधीभिः शब्दात्मकानां मन्त्राणामपि अधिकतरं वीर्याधानं कर्त्तुं प्राभवन् इति उन्नीयते स्फुटमनेन । आयुर्वैदिकः पुनः मेध्यारसायनक्रमः भूयिष्ठं साधारणजनताया उपकारकत्वात् सर्वदा अल्पतरायाससाध्यत्वाच्च आदरातिशयमर्हति ।

बहुप्रकारं रसायनसामान्यशास्त्रं आयुर्वेदकल्पतरोः महती एका पृथक् शाखा । तत्र मेध्यरसायनानि नित्यं नैमित्तिकं काम्यं संशोधनं संशयनं आहारिकं आचारिकं भैषजं मान्त्रिकं हौमं कायिकं वाचिकं मानसिकं एकद्रव्यं बहुद्रव्यं कुटीप्रावेशिकं वातातपिकं चेति विविधप्रकाराणि । सर्वेषां आचाराहारौषधाख्ये वर्गत्रये भूयः संक्षेपः क्रियते इह वर्णनलाघवाय ।

मेध्यं आचाररसायनम्

आयुर्वेदाचार्याः सामान्येन सर्वेष्वपि विशिष्य मेधाकरेषु रासायनिकप्रयोगेषु न केवला ओषधीः प्रयुञ्जते किंतु आचाराहारनियमसहिता एव, नित्यरसायनात्मकधर्मशास्त्रोक्तसदाचारशीलानामेव नैमित्तिकरसायनानि फलप्रदानि स्युरिति मुनीनामध्यवसायात् । आहुर्हि "आचारहीनं न पुनन्ति वेदाः, न चापि रक्षन्ति रसायनानि" इति ।

औषधवत् आहारवच्च [शरीर सत्वयोः स्वास्थ्य परिपालने व्याधिनिवर्हणे ऊर्जस्करणे च] आचारस्यापि प्रधानहेतुत्वं प्रत्यक्षसिद्धं हि । अत आयुर्वेदः आचारं नित्यरसायनत्वेन प्रशंसति । तदाह चरकः रसायनचतुर्थपादे—"सत्यवादिनमक्रोधं निवृत्तं मद्यमैथुनात् । अहिंसकमनायासं प्रशान्तं प्रियवादिनम् ॥ जपशौचपरं धीरं दाननित्यं तपस्विनम् । देवगोब्राह्मणाचार्यगुरुवृद्धार्चने रतम् ॥ आनृशंस्यपरं नित्यं नित्यं करुणवेदिनम् । समजागरणस्वप्नं च नित्यं क्षीरघृताशिनम् । देशकालप्रमाणज्ञं युक्तिज्ञमनहंकृतम् । शस्ताचारमसङ्कीर्णमध्यात्मप्रवणेन्द्रियम् ॥ उपासितारं वृद्धानामास्तिकानां जितात्मनाम् । धर्मशास्त्रपरं विद्यान्नरं नित्यरसायनम् ॥ इति ॥ सत्वगुणाधायका इमे आचाराः मेधाप्रकर्षकारिणः मेधार्थिभिः सदा सेवनीयाः । सुतरां परिहरणीयाश्च शारीरा इव मानसाश्च मलाः सर्वे ।

यथा क्लिष्टे वाससि आहितो रङ्गयोगो न भाति, यथा न अविशुद्धशारीरमले शरीरे युक्तो रासायनविधिः न भाति, तथैव अविशुद्धमानसमले मनसि कृतं मेध्यरसायनं न भाति कदाचन । अतः "शोकं क्रोधश्च लोभश्च कामो मोहः परासुता । ईर्ष्या मानो विचिकित्सा घृणाऽसूया जुगुप्सुता । द्वादशैते बुद्धिनाशहेतवो मानसा मताः ॥" इति निगदिताः सर्वानर्थमूलमानसा मलाः प्रथमं परिहर्त्तव्या मेध्यं रसायनं सिसेविषुभिः ।

एवं रीत्या आयुर्वेददार्शनिकैः सर्वत्रैव दिनचर्या ऋतुचर्या स्वस्थप्रकरणादिषु देहमनोरसायनाङ्गतया साधारणा आचाराः सङ्कलिता अपि मेधावर्धनानां प्रातिस्विकाचाराणां विशेषविज्ञानं धर्मयोगमन्त्रशास्त्रेभ्यः सम्पादनीयम् ।

मेध्यो भोजनवर्गः

यतो देहे अणोरपि मनसः गुणदोषौ उपचयापचयौ च अन्नपानायत्तावेव, यथा स्थूलानां रसरक्तादीनां धातूनाम्; अन्नपानसारांशस्य अणिष्ठो भागः अन्तःकरणस्य आप्यायकः; भूयिष्ठं शक्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नपानद्वारा सत्वे सत्वगुणं संवर्धयितुम्; अत आयुर्वेद-धर्म-योगशास्त्राणि मेधाप्रकर्षमन्विच्छद्भिरुपासनीयान् परिहरणीयांश्च अन्नपानविधिविशेषान् परिशीलयितुं परिहर्तुं च निर्बध्नन्ति।

विविधेषु भोज्यवर्गेषु मेधायाः शुभानि अशुभानि च शास्त्रेषु तत्र तत्र विस्तरेणोपदिष्टानि। न शक्यते तानीह संग्रहीतुम्। न केवले शाकवर्गे अपितु आमिषवर्गेऽपि यद्यन्मेध्यं तदुपज्ञातवन्तः पूर्वाचार्याः आमिषप्रियाणामपि मानवानामनुजिघृक्षया। उपदिशति चरकः—"दर्शनश्रोत्रमेधाऽग्निवयोवर्णस्वरायुषाम्। बर्ही हिततमो बल्यो वातघ्नो मांसशुक्रलः। मेधास्मृतिकरः पथ्यः शोषघ्नः कूर्म उच्यते"। इति। किन्त्वेवं मद्यव्यसनिनामनुग्रहं कर्तुं मेध्यं किञ्चिन्मद्यविशेषं सन्धातुं न प्राभवन् शास्त्रकाराः। मद्यं मनसो जर्जरीकरणामग्रचमिति, मनः कालुष्यं जर्जरतां च परिजिहीर्षुभिः मद्यदर्शनमपि सर्वथा वर्जनीयमेवेति वदन्ति।

अद्यतनी परिस्थितिः मेधाहितं भोजनं च

मेधाया वर्धनान् आहारान् शास्त्रोपदिष्टान्, अद्य भारते प्रसृत्वरीं परिस्थितिं च पर्यवेक्षमाणानां अस्माकं लेखिनी मेध्यस्य आहारवस्तुनो दौर्भिक्ष्यं दुरवस्थां च अनुल्लिख्य न शक्नोति प्रकृतमनुसर्तुम्।

क्षीरं घृतं च परमं मेध्यं समुद्घोषयन्ति शास्त्राणि। जातानां प्रथमं आहारवस्तु पयः, सात्म्यं भवति च सर्वशरीरिणाम्। पयः समानं भोज्यवर्गे वस्त्वन्तरं, यत् युगपत् सर्वगुणसंपन्नं ईश्वरेण नैव सृष्टम्। पयस्येकस्मिन् द्रवे "जीवनं बृंहणं वृष्यं मेध्यं बल्यं मनस्करम्। वयःस्थापनमायुष्यं सन्धिकारि रसायनम्" इतीमाः सर्वाः आहारसंपदः समृद्धाः। रसरक्तमांसादीनां देहधातूनां आप्यायनं शालिगोधूमशाकादिभिः केवलैः प्रयुक्तैः शक्यते सम्पादयितुम्। सत्वगुणानां यथावत् सम्वर्धनं तावत् क्षीरघृतप्रयोगेणैव साधु सम्पद्यते इति मनुष्याणां मतिवृद्धये क्षीरिण्यो गोमहिष्यादयः सृष्टाः पालकेन भगवता। माहिषं पयः अधिकस्नेहवदपि, गव्यापेक्षया मनःप्रसादनगुणे अतितरां हीनमेवेति प्राचामर्वाचां च पयोगुणगवेषकाणां परीक्षासिद्धम्। अतो मनुष्याणां नित्याहारे पयः प्रधानं विहितं सर्वत्र मेधाकरमिति। श्रूयते च—गाः वटपत्रमात्रवृत्तीः कारयित्वा योगिनः तद्दुग्धवृत्या मेधासिद्धिं कुर्वन्तीति।

आयुर्वेदोक्तेषु मेध्यरसायनभेषजेषु घृतकल्प एव भूयिष्ठः—शते नदत्रंशकः। न केवलं स्वस्थानां मेधास्मृतिशक्तिवर्धनत्वेन सर्पिष्पानं प्रशस्यते। उन्मादापस्मारमदमूर्च्छायगरविषजादिषु मानसिकामयेषु च चिकित्सा ओषधिसंस्कृतं घृतमन्तरा दुर्निवाहैव। "सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत "नित्यं क्षीरघृताशीः स्यात्" इति हि स्तूयते। घृतप्रभावदर्शिनः स्मर्त्तारः अघृतसंस्कृतमन्नमप्रयतमनदनीयं निन्दन्ति।

पुरा निखिला भारतभूमिः गोसम्पत्समृद्धा बभूव। अतो विशुद्धगव्यपयोघृतं मनुष्याणां सुप्रापं आतृप्ति। अद्य तु गव्यं तिरोहितप्रायम्। माहिषमेव बहुलम्। तदपि नैव जनानां पर्याप्तं प्राप्यते नैसर्गिकम्, शुष्कपयश्चूर्णद्रावितं कृतकमेव। क्वापि सुदूरे समाजे दुग्धं क्लेदवारकवस्तुमिश्रणप्रतिसंस्कृतं विगलितस्वाभाविकजीवनीयसारं बहुदिनपर्युषितं कूपिकागुप्तं किमपि शुक्लद्रवमेव समाजे सर्वत्र अशनपाने प्रयोक्तव्यं भवति पयोनाम्ना। परिशुद्धपयसोऽलाभे घृतं शब्दतोऽपि कुतः। तैलमेव, तदपि न शुद्धं विकृतमेव, घृतायतेऽधुना (Vegetable Ghee)। निष्कासितस्वाभाविकगन्धसारं किमपि तैलमेव हि घृतस्थाने प्रयुज्यते गृहे गृहे भूम्ना सर्वविधस्नेहस्थानेऽपि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशुद्धघृतोपसेवनं सांप्रतमस्तंगतप्रायमेव । इत्थं सति कथमिदानीं साध्यं मेधावर्धनम् ?

इदं भूयोनिर्वेदस्थानं यदिदानींतनीनां नारीणां भूयसीनां स्वार्भकेभ्यः स्वकीय स्तन्यप्रदाने अप्रवृत्तिः, अरुचिः, अशक्तिः, अननुकूला परिस्थितिश्च । मानुषं स्तन्यं बुद्धिगुणवर्धनेषु श्रेष्ठम् । यदि न पिबन्ति मानुषाः शिशवः मातृस्तन्यं जन्मादौ न हि ते यथावत् मत्युन्मेषं नैव विन्देयुः इति नव्या अपि वैज्ञानिका निश्चितवन्तः । प्राचीना आयुर्वेद-दार्शनिकाश्च व्यवस्थापयन्ति जातस्य शिशोः आषण्मासं जननीस्तन्यमात्रवृत्तिम् । ऊनषण्मासस्य गव्यमपि नानुमन्यन्त । स्तन्यस्य क्षये स्तन्यवर्धनात्, अशुद्धौ स्तन्यशोधनप्रसादनात् मातरि योजयन्ति । जातस्य केनापि कारणेन स्वमातृस्तन्याभावे धात्रीं स्तन्यप्रदां नियोजयन्ति । शिशूनां षण्मासान्तं स्तन्यमात्रेण पोषणसम्प्रदायः भारते सर्वत्र आसीत् पुरा । अधुना तु सर्वथा विपर्यस्तः । स्तन्यक्षयकृतां दैनिककार्याणामनुसेवनात् अद्यतनप्रसूतिकासु स्तन्यं प्रायः शुष्कमेव । जन्मप्रभृत्येव आपणप्रसारितं कृतकं वा पिष्टक्षीरं शरणीकर्त्तव्यं भवति शिशुपोषणाय । यास्तु नार्यो धनार्जनोद्योगिन्यो भवन्ति ताः प्रसवानुपदं स्तन्यशोषणोपायान् अन्विष्यन्ति । पुरुषापेक्षयाऽपि स्त्रिय इदानीं अधिकतरं अर्थार्जनाय कार्यालयव्यापिका दृश्यन्ते । बालानां बुद्धिविकासः भूयिष्ठं मातृस्तन्याधीनः । समयस्तु इदानीं शिशूनां प्रसवात् अपस्तनीकरणमेव प्रशंसनीयः सभ्यतास्त्रीसमुदाचार इति प्रतियोगी भवति । शिशुषु स्तन्यवञ्चितेषु बुद्धच्युन्मेषः कथं वा प्रतीक्ष्येत ?

आहारशुद्धच्यैव सत्वशुद्धिरिति स्थिरा नीतिः । लोकपरिस्थितिस्तावदिदानीमेवं वरीवर्त्ति यथा नैवोपलभ्यते विशुद्धमन्नपानीयम् । नापि पार्यते परिहर्त्तुं अशुद्धान्ननिषेवणम्, न च प्रभूयते आहारनियमं पालयितुं साधारणतया सर्वैर्जनैः । ननु इदानीं बहुत्र अन्नापणादिषु विज्ञानरीत्या अन्नपानं पच्यते पाल्यते च अकरोपस्पर्शम्, कथमुच्यते शुद्धान्नं दुर्लभमिति ? शास्त्ररीत्या शुद्धच-भावात्, इह शुद्धिरिष्यते न केवला बाह्या, किन्तु शास्त्रीया च । यथा जलं साधारणजनदृष्ट्या स्वच्छमपि वैज्ञानिका रोगकारकजीवाण्वादिराहित्यनिश्चयं विना जलं तत् शुद्धमिति नानुमन्यन्ते, तथा शास्त्ररीत्या च यदन्नपानं शुद्धं तदेव मेधाकरं भवितुमर्हति । आपणे विक्रयाय पक्वत्वादेव अन्नं तत् सर्वथा अप्रयतम् अपवित्रम् ।

किञ्च, यथा आहारे शास्त्रीयनियमपालनमन्तरा सुमेधसं न शक्यते प्राप्तुं तथा शारीरशौच-नियमानुसारणं विना, नैव सत्वस्य शुद्धिः सम्पादयितुं शक्यते । तदुक्तं मुनिना "मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनम् । पादयोर्मल-मार्गाणां शौचाधानमभीक्ष्णशः" इति । अत्रावधेयं शौचगुणेषु मेध्यं प्रथमं गणितम् इति । भारत-समाजस्तावदिदानीं भूम्ना वैदेशिकचर्याऽनुकारी परिभ्रष्ट शौचविधान एव दृश्यते ।

इत्थं आहारेण आचारेण च मेधासंवर्धनस्य सांप्रतं परिस्थितिव्यावृत्तिवशात् दुष्करत्वे सति, आयुर्वेदोक्तते दृष्टफले—मेधावर्धने आदरः अतिशयेन विधेयः ।

मेधाऽभिवर्धना औषधयोगाः

आयुर्वेदाकरे मेध्या भेषजयोगाः द्रव्याणां व्यष्टिप्रयोगाः समष्टिप्रयोगाश्च वर्णिताः बहुप्रकाराः । घृत-लेह-चूर्ण-गुड़-मोदक-वटिका-आसवारिष्ट-तैल-भस्न-कूपीपाकादिषु समस्तविधासु कल्पनासु चेमे भेषजयोगाः सन्धानार्हाः सन्ति यथार्हम् । मेधाजनकतया विश्रुतानां भेषजयोगानां संख्यानं सार्धं उपशतद्वयं (२५०) स्यात् । आकर एव ते योगाः ज्ञेयाः । इह स्थूलसूचनमपि दुष्करम् । मेधावर्धनत्वेन आविष्कृततमानीति स्तुत्वा, यानि द्रव्याणि भूयिष्ठं उपादाय मेध्यानौषधकल्पान् शास्त्रकाराः कृतवन्तः, तेषां द्रव्याणां नाममात्र संग्रहोऽयं क्रियते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र औद्भिदानि

वचा जोतिष्मती ब्राह्मी शङ्खपुष्पी शतावरी मण्डूकपर्णी चित्रकमूल श्रावणी श्वेतबाकुची अपामार्ग गंभारी विदारीकन्द निर्गुण्डी रजनी शङ्खिनी अश्वगन्धा मोचरस अनार केतकीमूल शमी खदिर अजमोदा यमानी लशुन विडङ्ग भल्लातक पिप्पली आमलकी हरीतक्यः भृङ्गराजपत्रं चेति। एतेषु च वचा ब्राह्मी मण्डूकपर्णी ज्योतिष्मती शङ्खपुष्पी श्वेतावल्गुजा इतीमाः षडोषधयः पूजिततमाः। कृता आसां व्यष्टिशः समष्टिशः प्रयोगा भूयांसः सर्वविधेषु घृतादिभेषजकल्पेषु।

भौमद्रव्येषु

पारदः सुवर्णं अभ्रकं अयस्कान्तं वङ्गम् इति पञ्च धातुद्रव्याणि, माणिक्यं नीलं गोमेदं वैडूर्यं तार्क्ष्यमिति पञ्चमहारत्नानि, अर्कीकं सूर्यकान्तं इति द्वे उपरत्ने च उत्तमानि मेधाकराणि धारणेन भक्षणेन च धातुषु कनकस्यैकस्य विशुद्धस्य तथैव आभ्यन्तरप्रयोगोऽपि क्रियते वृद्धवैद्यैः सम्प्रदायतः। "मेधाकामः काञ्चनं सोग्रगन्धम्" इत्युपदेशेन, वचाखण्डे पयसि भावनया मृदूकृते श्लक्ष्णशुद्धसुवर्णशलाकां यवपरिणाहां समाग्रं अनुप्रवेश्य, अथ तं छायाशुष्कं वचाखण्डं सकाञ्चनं खल्वके स्तन्येन घृष्ट्वा मुग्द-माषमितं पिष्टं स्तन्येन आलोड्य शिशुभ्यो दद्यात् प्रत्यहं प्रातः। अयं प्रयोगो बहुशो दृष्टफलः प्रतिभामेधाविवर्धनः।

जांगमेषु

गोरोचनं, समुच्चितं पञ्चगव्यं, पृथक् च गोः क्षीरं नवनीतं घृतं नवं पुराणं च मधु, कस्तूरी कोषः (Silk Pod) प्रवालं मुक्ता गजदन्तश्चेतीमानि महामेध्यानि।

एतेषां कल्पाः शास्त्रेषु समुपदिष्टाः, शास्त्रमर्मविदा दृष्टकर्मणा यथावत् प्रयुक्ताः सर्वदा कालत्रयेऽपि मेधासिद्धिप्रदा भवेयुः।

आयुर्वेददार्शनिकाः दन्तधावनोपयोज्येषु काष्ठेष्वपि इदमिदं मेधाकरमिति परीक्षितवन्तः। तथा ह्युपदिश्यते दन्तधावनप्रकरणे—"कदम्बे तु धृतिर्मेधा चम्पके दृढवाक्श्रुतिः। अपामार्गे धृतिर्मेधा प्रज्ञाशक्तिस्तथाऽसने" इति।

एवं मेधानाशनानि च द्रव्याणि ज्ञातवन्तः—नागवल्लीपत्रशिरा, केवलपूगफलं, गर्दभीक्षीरं, मेषीक्षीरं, मद्यं, विजया, अहिफेनप्रभृतीनि।

यथा दिनचर्यादिशीलनेन रसायनसेवनेन वा स्वस्थस्य स्वास्थ्यदार्ढ्यसम्पदभिवृद्धये अनुदिनं देहव्यायामस्य अनुष्ठानं अतितरामुपयोगि, तथा येनकेनाप्युपायेन लब्धमेधाप्रकर्षः भूयस्तदभिवृद्धये बुद्धिव्यायामं नित्यमनुतिष्ठेत् इत्युपदिशति सर्गे च मेधायुष्कामीयरसायनान्ते भगवान् धन्वन्तरिः

"सतताध्ययनं वादः परतन्त्रावलोकनम्।
तद्विद्याचार्यसेवा च बुद्धिमेधाकरो गणः॥"

इति शिवार्पणमस्तु।

WITH COMPLIMENTS OF

Swaika Vanaspati Products Limited

18–B, Brabourne Road,

CALCUTTA-1

Makers of

FAMOUS "TELEPHONE" AND "SWAIKA" BRANDS VANASPTI

and

"DOG" BRAND REFINED GROUNDNUT OIL

Chairman & Managing Director.
Rai Bahadur G. V. Swaika, J. P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाश्चात्यदेशीयानां वयसोऽपेक्षया भारतीयानामल्पायुष्ट्वे कारणाऽन्वेषणम्

(ले०—कविराज श्रीहरिवक्ष जोशी प्राणाचार्यः कलकत्ता)

श्रूयन्ते तेषु तेषु पाश्चात्यदेशेषु शतवर्षाऽधिकजीविनो बहवः स्त्रीपुरुषा विद्यन्ते। भारतेऽपि शतवर्षाऽधिकं जीविनः केचन सन्त्येव परं च तेषां संख्याऽतीवाल्पीयसी। किञ्चित्कालात्प्रागेव कस्यांचित्सभायां रसीया-राजदूतेन सगर्वमिदमुद्घोषितं यद् रसीया देशे पुरुषाणामायुषोऽनुपातो नवषष्टिवर्षात्मकः ६९। अत्र केंचन विद्वांसस्तस्य देशस्य शीतप्राधान्यं हेतुं मन्यन्ते। कथयन्ति च ते यत् शीतप्राधान्येषु देशेषु प्रायः फलानां पुष्पाणामन्येषामपि खाद्यपदार्थानां पोषो (परिपाकः) महता कालेन जायते। तद्वदेव च तत्रत्यानां पुंसां शरीरपरिपाको जीणता च महता कालेन जायते। तद्देशकृतोऽयं गुणः। नात्र पुरुषव्यापाराऽपेक्षा। भारतवर्षस्योष्णप्रधानत्वात्तत्रत्यानामायुषः परिपाकः स्वल्पादेव कालाद् भवति। इति देशकृतोऽयं वै विशेष इति केषांचिन्मतम्!

वयन्त्वेतन्न साधु मन्यामहे, यतोऽस्मिन्नेवौष्ण्यप्रधाने भारतवर्षे महाभारतीययुद्धे युध्यमानानां महारथानां भीष्मद्रोणादीनामायुः शतात्परमासीत्। महामहोपाध्यायपण्डितहरिदाससिद्धान्तवागीशरचितायां महाभारतटीकायां तेषां जन्मलग्नपुरःसरमायुः प्रमाणं निर्दिष्टमस्ति। तथा हि युद्धकाले भीष्मस्यायुरशीत्युत्तरशतम् १८०, द्रोणाचार्यस्य षष्ट्युत्तरशतम् १६०, युधिष्ठिरस्य त्रिंशदुत्तरशतम् १३०।

वस्तुतः–वैदिकवाङ्मये पुरुषजीवनमुपवर्णितम्। तत्र तस्य काले षोडशोत्तरशतं निर्दिष्टम्। तथा हि–पुरुषो वाव यज्ञस्तस्य चतुर्विंशतिवर्षाणि प्रातःसवनम्। अथ यानि चतुश्चत्वारिंशद् वर्षाणि तन्माध्यं दिनं सवनम्। अथ यान्यष्टाचत्वारिंशद् वर्षाणि तत्तृतीयं सवनम्। छां० उ० ३।१६

मानवस्य सम्पूर्णं जीवनमेव यज्ञः। अस्य प्राथमिकानि चतुर्विंशतिवर्षाणि प्रातः सवनम्। मध्यभवानि चतुश्चत्वारिंशद् वर्षाणि च माध्यन्दिनं सवनम्। पर्यवसानस्याष्टाचत्वारिंशद् वर्षाणि च तृतीयं सवनमुच्यते। अनया रीत्या षोड़शोत्तरं शतं पुंसां साधारणमायुर्निर्दिष्टम्।

आयुर्विज्ञानं यादृशं महर्षीणामासीत्तादृशं नान्यदेशीये साहित्ये। अस्मिन् विषये आयुर्वेदशास्त्रे विशेष-विचारणा कृताऽस्ति। अत एव—

आयुः कामयमानेन धर्माऽर्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः॥

आयुर्नियतकालप्रमाणमुताऽनियतकालप्रमाणम्। यदि तु नियतकालप्रमाणमायुः स्यात्तदा तु न तत्र पुरुषव्यापाराऽपेक्षा। न चायुषो रक्षार्थं शास्त्रेषूपदिष्टा मणिमन्त्रौषधमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनाद्याः क्रिया इष्टयश्च प्रयुज्येरन्, नोद्भ्रान्तचण्डचपलगोगजोष्ट्रखरतुरगमहिषादयः यवनादय दुष्टाः परिहार्याः स्युः, न अप्रपातगिरिविषमदुर्गाम्बुवेगाः, तथा न प्रमत्तोन्मत्तोद्भ्रान्तचण्डचपलमोहलोभाकुलमतयो नारयः परिहार्याः स्युः। कुत आयुषः सर्वस्य नियतकालप्रमाणत्वात्। न चाऽनभ्यस्ताकालभयनिवारकाणामकालभयमागच्छेत्प्राणिनाम्। नापीन्द्रो नियताऽऽयुषं शत्रुं वज्रेणाभिहन्यात्। न चाश्विनावार्ते भेषजेनोपपादयेताम्, तस्मान्न नियतकालप्रमाणमायुः।

शरीरयन्त्रमपि लौकिकघटिकायन्त्रवत्। यथा हि घटिकायन्त्रं यथावत्सुरक्ष्यमाणं नियतकाले कुञ्जिकाप्रदानेन, धूमरजआदिभ्यः सुरक्ष्यमाणम्, उच्चैः प्रपतनादिभ्योऽभिरक्षितञ्च, नियता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽवधि पर्यन्तं निर्बाधं सञ्चलति, एवमेव शरीर-यन्त्रमपि यथावत्पाल्यमानं पूर्णमायुर्निर्बाधं लभते । अत एवोक्तमभियुक्तैर्हितोपचारमूलं जीवितम् । अतो विपर्ययान्मृत्युः ।

अपि च देशकालात्मगुणविपरीतानां कर्म-कर्मणामाहारविकाराणां च क्रियोपयोगं सम्यक्-सर्वातियोगसन्धारणम्, असन्धारणमुदीर्णानां च, गतिमतां साहसानां च परिवर्जनमारोग्यानु-वृत्तौ हेतुमुपलभामहे, उपदिशामः सम्यक् पश्याम-श्चेति ।

अतीवाश्चर्यस्य विषयोऽयं यद् यस्मिन् देशे सर्वप्रथममायुर्विज्ञानशास्त्रमाविर्भूतम् । यत्र च हितमायुरहितमायुःसुखमायुरसुखमायुस्तयोश्च हिता-हितं येन शास्त्रेण बुध्यते तदायुर्वेदशास्त्रम् । तथा हि—हिताहितं सुखं दुःखमायुस्तस्य हिता-हितम् । मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते । यज्ज्ञात्वाऽत्रत्या ऋषयो वर्षसहस्रमायू रसायना-द्युपयोगेन तपसा ब्रह्मचर्यादिसेवनाच्च जराकृतं वैरूप्यमपास्य नवयौवनरूपमाशरीरपातान्तं बभ्रुः । आयुष्कामयमानानां कृते हिताऽऽहारोपयोगमन्तरा-ऽपि, अन्येऽपि, केचनाचाराः समुपदिष्टाः । यान् पालयतां पूर्णमायुर्नान्तरा विपद्यते ।
ते च यथा—

सत्यवादिनमक्रोधं निवृत्तं मद्यमैथुनात् ।
अहिंसकमनायासं प्रशान्तं प्रियवादिनम् ॥१॥

जपशौचपरं धीरं दाननित्यं तपस्विनम् ।
देवगोब्राह्मणाचार्यगुरुवृद्धार्चने रतम् ॥२॥

आनृशंस्य परं नित्यं नित्यं करुण-वेदिनम् ।
समजागरणस्वप्नं नित्यं क्षीरघृताऽशिनम् ॥३॥

देशकालप्रमाणज्ञं युक्तिज्ञमनहंकृतम् ।
शस्ताचार-मसंकीर्ण मध्यात्मप्रणवेन्द्रियम् ॥४॥

उपासितारं वृद्धानामास्तिकानां जितात्मनाम् ।
धर्मशास्त्रपरं विद्यान्नरं नित्यरसायनम् ॥५॥

गुणैरेतैः समुदितैः प्रयुङ्क्ते यो रसायनम् ।
रसायनगुणान् सर्वान् यथोक्तान् स समश्नुते ॥६॥

आगन्तुकव्याधिपरिहारार्थमपि, यथेदानी-मागन्तुकव्याधिप्रतीकारार्थं नवनवानि भेषजान्या-विष्कृतानि, तानि शरीरे निक्षिप्यमाणानि सद्यो-रोगहराणि परिणामे च दुःखावहानि तथा विविध-रोगोत्पादकानि च ।

अस्माकं महर्षिभिस्तु,—आगन्तुकरोगपरिहारार्थं ये चाप्युपायाः प्रदर्शितास्तैः रोगप्रतीकारः स्वास्थ्य-लाभश्च चिरस्थायी सञ्जायते । यथा हि—उक्तं चरके—त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः । देशकालात्मविज्ञानं सद् वृत्तस्यानुवर्तनम् । आगन्तूनामनुत्पत्तावेष मार्गः प्रदर्शितः॥ प्राज्ञः प्रागेव तत्कुर्याद् हितं विद्याद् यदात्मनः । एते च,—उपाया अमोघा दृष्टफलाश्च । तान् विहाय, आधु-निकैराविष्कृतानि केवलानुमानमात्रप्रमाणानि, अदृष्टफलानि भेषजानि ह्यागन्तुकरोगप्रतिकारार्थं बलाद् भारतीयानां पवित्रेषु शरीरेषु विनिक्षिप्यन्ते । तस्य विनिक्षेपस्य परिणामं दृष्ट्वा किञ्चित्कालानन्तरं तैरेवाविष्कर्तृभिस्तत्प्रयोगो निषिद्धचते । परं च तेषां निषेधोऽपि सहस्राधिकसंख्यकपुरुषाणां भेषज-प्रयोगात्कालकवलितानामनुभवजन्यः ।

वस्तुतः भारतीयानामायुषो ह्रासस्य कारणं पराधीनत्वमेव । पूर्वन्तु महाभारते युद्धे प्रायशस्तत्तद् विषयेषु निपुणाः शास्त्रज्ञाः शूरा वीराश्च विनष्टाः । तेषां प्रत्यक्षसिद्धं शास्त्रज्ञानमपि तैरेव साकं नष्टप्रायम्, तथाऽपि तदनन्तरमत्रत्यैर्निस्पृहै ब्राह्मणैः संरक्ष्यमाणं कथञ्चिल्लोकोपकाराय समर्थमासीदेव । आसहस्रद्वयवर्षेभ्यो भारते च विदेशीयानामाक्रमण-मनवरतं प्रचलति स्म । राजानश्च भारतीयाः परस्परं भिन्नाः प्रद्विषन्तश्च स्वीयस्वीयक्षुद्रप्रदेशेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

…कीयां सार्वभौमसत्तामक्षुण्णां मन्यमाना …तन्। अस्य महादेशस्य चैवंभूतां दशां संलक्ष्य …देशिकै राज्यधनलोलुपै र्मुहु र्मुहुराक्रान्तमिदं …रतमासीत्। एवंभूतायामवस्थायां न हि कस्याऽपि …देशस्य ज्ञानविज्ञानाऽभिरक्षणाऽभिवृद्धौ च भवितु …र्हति। बर्बरै र्मोहमदीयैरत्रत्या बृहन्तः पुस्तका- …या अग्निसात्कृता इति विदितचरमेव समेषां …मनीषिणाम्।

अनन्तरं च पाश्चात्यानामाङ्गलानां राज्यमत्र …र्भूतम्। ते च मोहमदानामपेक्षया सुसभ्याः …शिक्षिताश्चासन्। तेषामुद्देश्यमत्र स्वसंस्कृति- …चारपूर्वकं धनाकर्षणं वा भारतीयसंस्कृत्या …लोपकरणम्। तैरत्रागत्य महर्षीणां शिक्षा- …णाली शनैः शनैः क्षयं नीता, शनैः शनैः स्वकीया …क्षा च प्रचारिता। तैः केवलं न भारतीयानां …रीरं विजितम्, अपि तु बुद्धिरपि विजिता। तथा …चोक्तम्-बुद्ध्या हता वै सुहता भवन्ति। तच्छिक्षा- …भावाद् भारतीयजनानां स्वपूर्वपुरुषस्त्रिकाल- …दर्शिभि र्महर्षिभिः प्रचारितेषु ग्रन्थेष्वाविष्कृतं यज् …ज्ञानविज्ञानं तस्मिन्नुपेक्षाबुद्धिरश्रद्धा च समजनि। …योगात्प्राप्तेऽपि स्वशासने तैर्यद् विषबीजमुप्तं …तदेवोद्गतं पल्लवितं पुष्पितं च जातम्। कारणं …त्र ह्येतदेव यत् भारतीयानां हस्ते शासनसत्ता …गता। येषां हस्ते शासनसत्ता समागता, ते …वर्णा आङ्गला एव। अतएव भारतीयज्ञान- …ज्ञानयोरपेक्षा चास्मिन् राज्ये यथापूर्वमेव …र्वर्तति। अस्यैव परिणाम एष यदायुर्वेदशिक्षायाः …चिकित्सायाश्च प्रतिदिनं ह्रासः, आङ्गलचिकि- …त्सायाः समुत्कर्षाऽर्थमपरिमितं द्रव्यं व्ययीक्रियते। …र्षिभिः स्वास्थ्यरक्षोपाया रोगनिवृत्त्युपायाश्च …प्रदर्शिता ते चामोघास्तत्र नास्ति कश्चित्संशय- …ः परन्तु तथाऽपि भारतसर्वकारैस्तेषां महत्यु- …पेक्षा विधीयते, वीक्ष्य चैवं दूयते मनीषिणां चेतः। …नूतनाऽऽविष्कृतानां तीव्रविषाणामाङ्गलौषधानां प्रयोगपरिणाम एष यत्सम्प्रति रक्तचापः, (ब्लडप्रेशरः)=हृद् गतिरोधः, स्नायुदौर्बल्यम् उन्मादादयो रोगा बृद्धिं गताः। भारतस्य पराधीनता काले जनता यथा दारिद्रचपीडिता शरीरस्थितिमात्रप्रयोजकं पौष्टिकमाहारमलभमाना अकालकवलिता अभवन्।

अस्माकं-सर्वकार एवमुद्घोषयति यद् भारतीयानामायुषोऽनुपातः पूर्वोऽपेक्षयाऽधिक सञ्जातः। पूर्वं तु द्वाविंशतिवर्षात्मक आसीदधुना तु चत्वारिंशद्वर्षात्मकः।

एतेन यद्ययमुद्घोषो विश्वासार्हः स्यात्तदा तेनैतदेवाऽनुमीयते यत्स्वराज्यप्राप्तेः प्राङ् महद् दारिद्रचमज्ञानं च प्रजासु प्रसृतमासीत्। तस्मिन् काले विहारप्रान्तीया उत्कलप्रान्तीयाश्च प्रायोऽहोरात्र एकवारभोजनमलभन्त। इदानीं तेऽपि द्विवारं दिवा भुञ्जते। यद्यपि सम्प्रत्यपि भारतीयेभ्यो न पर्याप्तं पौष्टिकं भोजनमुपलभ्यते। कुत; स्वदेशीय गोधूमस्थाने आस्ट्रेलियाऽमेरिकाकनाड़ादिदेशेभ्यः समागता गोधूमा ये कृत्रिमौर्वरक पोषिताः स्वल्पसाराः स्वल्पास्वादाश्च। घृतस्थाने विजिटेबिलं दुग्धस्थाने दुग्धपाउडरनिर्मितं च चायपानं सम्मिलति। मधुरभोजने च्छातु तेषां मनस्येव विलीयते। कुतः— निर्धनभोज्यो मधुररसो गुड़ एव, सोऽपि शर्कराऽपेक्षया महर्घो दुर्लभश्च कृतोऽस्ति। एवम्भूतायामवस्थायां यदि भारतीयानामायुषो वृद्धिः सञ्जाता तदा यदि स्वदेशजातं शुद्धमन्नमेभ्यो मिले तथा गव्यं घृतं दुग्धं च पर्याप्त मात्रायां मिलेच्चेत्सहैव चाचारा विचाराश्चाश्रमानुकूला भवेयुस्तदा भारतीयाः शताऽधिकायुषः स्युर्नास्त्यत्र सन्देहः।

यत्तु, शीतप्रधान देशवासिनामायुः स्वभावतोऽधिकं भवति। उष्णप्रधानदेशवास्तव्यानां स्वल्पमायुः स्वभावत इति कथयन्ति तत्तेषां कथनंन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्तोदक्षमम्। कुतस्त्रिगुणात्मिकायाः प्रकृतेः पूर्णो विकासो यस्मिन् देशे तस्मिन्नेव देशे षड् ऋतवो भवन्ति। यत्र षड् ऋतवस्तत्रैव प्रकृतेः पूर्णो विकासः, क्षयवृद्धी अपि दोषाणां यथाकालं स्वभावत एव भवतः। एकतु प्रधानेषु देशेषु न तादृशी स्थितिः। कुतस्तत्रै कदोषस्यैव प्रधानता प्रायिकी। शरीरं नैक दोषजं त्रिदोषजस्य शरीरस्योपष्टम्भका अपि त्रय एव धातवः। ते च क्षयवृद्धयुपशमादिष्वपेक्षन्ते, ऋतुभेदान् कालभेदान् भक्ष्याऽभ्यवहार्यभेदान्, आचाराभिहारभेदांश्च। तेऽत्र भारतवर्ष एव सुलभा नान्यत्र देशेषु यत्रैको द्वौ त्रयो वा ऋतवो न षड्ऋतुसाम्राज्यम्। अतो भारतीयानां स्वल्पायुष्ट्वे + त्रीण्येव कारणानि, दारिद्र्यमार्यविज्ञानानभिज्ञता स्वाचारपरित्यागश्च। अत एवोक्तं चरके—

समग्रं दुःखमायत्तमविज्ञाने द्वयाश्रयम्।
सुखं समग्रं विज्ञाने विमले च प्रतिष्ठितम्॥

अतो भारतीयानामायुषोऽभिवृद्धये हिताहारोपयोगोऽपेक्षितः। आयुष्याण्यन्नपानानि गव्यानि च पयः सर्पींषि तेषामुपयोगविधिः शिक्षा चातीवावश्यकी कुतः देहो हि-आहारसम्भवः। हिताहारोपयोग एक एव शरीराऽभिवृद्धिकरः किमुत यदि स सदाचारसम्पन्नः स्यात्।

अतः—

न रागान्नाप्यविज्ञानादाहारमुपयोजयेत्।
परीक्ष्य हितमश्नीयाद्देहो ह्याहारसम्भवः।
परिहार्याण्यपथ्यानि सदा परिहरन्नरः।
भवत्यनृणतां प्राप्तः साधूनामिह पण्डितः।

अन्येऽपि केचनायुषो ह्रासकरा भावास्सन्ति। ये च धृतराष्ट्रं प्रति विदुरेण निर्दशिताः। अयमेव धृतराष्ट्रस्य प्रश्नो यत्–शास्त्रेषु शतायुः पुरुष इत्युक्तं तर्हि कुतो न पुरुषः पूर्णमायुः प्राप्नोति। कुतोऽन्तरा विपद्यते।

अस्मिन् विषये विदुरधृतराष्ट्रयोः प्रश्नोत्तररूपा इमे महाभारतीयाः श्लोकाः–

शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा।
नाप्नोत्यथ च तत्सर्वमायुः केनेह हेतुना॥

अतिमानोऽतिवादश्च तथाऽत्यागो नराधिप!।
क्रोधश्चात्मविधित्सा च मित्रद्रोहश्च तानि षट्।
एत एवासयस्तीक्ष्णा–कृन्तन्त्यायूंषि देहिनाम्।
एतानि मानवान् घ्नन्ति न मृत्युर्भद्रमस्तु ते॥

सैंचुरी मिल्स
द्वारा निर्मित प्रसिद्ध फैशन फैब्रिक्स
अवश्य खरीदिये
परमसुख धोती, मल्स, छींट
सेन्चुराईज्ड (प्रीश्रंक) खादी और धारीदार पॉप्लीन
लट्ठा, चादरें, तौलिये आदि आदि
निर्माता
दी सेन्चुरी स्पिनिंग एण्ड मैन्यु०कं०लि०
इन्डस्ट्री हाउस, १४९ चर्च गेट रिक्लेमेशन
बम्बई–१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आध्यात्मिका रोगाः

(ले०—वैद्यः श्रीकन्हैयालालभेड़ा, बम्बई)

जीवच्छरीरे जायमानानां दुःखसंज्ञकरोगाणां प्रथमं विभागत्रयम्। आध्यात्मिक; अधिभौतिकः, आधिदैविकश्च।

आध्यात्मिकः-आत्मनि इति विग्रहे अव्ययं विभक्तिः (पा० २-१-६) सूत्रेण विभक्त्यर्थका-भीत्यव्ययेन नित्याव्ययीभावः। ततः 'अन्तः पूर्व-पदाट्ठक्' इति सूत्रस्थया' 'अध्यात्मादेष्ठञिष्यते' इति भाष्योक्त्या तत्र भव इत्यर्थे ठञि। अनुशतिका-दीनाञ्च (पा० ७-३-२८) इति पूर्वोत्तरपदवृद्धौ आध्यात्मिकं पदं सिध्यति।

अत्र आत्मशब्देन शरीरं भण्यते, आत्मनि अधि वर्तते इत्यध्यात्मं शारीरमानसा दोषाः, तत्र भव-माध्यात्मिकम्, दोषा हि शारीरमानसा जरादि-कामादिविकारव्यापारा दुःखजनका भवन्ति। (चक्रः) नैयायिकमते-आत्मशब्देन जीवात्मनो ग्रहणम्, दुःखस्य तद्गुणत्वात्। सांख्यानां मते-अन्तः करणस्य ग्रहणं, तस्यैव दुःखाश्रयत्वात्। अत्र च प्रमाणत्वेन इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्' (गौ, अ. १ आ. १ सू. १०) इति। अन्तः करणधर्मवत्त्वं धर्मादीनाम्' (सांख्य अ. पू. सू. २५) इति। आत्मनोऽर्थाः-आत्मशब्देन समनस्कं शरीरमुच्यते। (डल्हणः)

आध्यात्मिको द्विविधः-शारीरो मानसश्च। शारीरो वातपित्तश्लेष्मणां वैषम्यनिमित्तः। मानसः कामक्रोधलोभमोहभयेर्ष्याविवादविषयविशेषादर्शन-निबन्धनम्। सर्वञ्चै तदान्तरोपायसाध्यत्वादा-ध्यात्मिकं दुःखम्। इति वाचस्पतिमिश्राः।

यद्वा आत्मानं स्वसङ्घातमधिकृत्य प्रवृत्त-माध्यात्मिकम्, शारीरं मानसञ्च। शारीरं व्याध्या-द्युत्थम्, मानसं मनोमात्रजन्यं (यथा-अनुकूलस्त्री-पान-भोजन-विलेपन-धन-वस्त्रालङ्कारादिविषया-प्राप्तिजन्यम्।

अयं निष्कर्षः—मनःसहितं शरीरं नाम जीवितं प्राणिशरीरम्। आत्मनि रोगोत्पादकानां वातपित्तकफानां शारीरदोषाणां, रजस्तमसोर्मानस-दोषयोश्च अध्यात्म इति नाम। एभिश्च प्रादु-र्भूतानां शारीरमानसव्याधीनामाध्यात्मिक इति संज्ञा।

आध्यात्मिकाश्च त्रेधा भिद्यन्ते। आदिबल-प्रवृत्त-जन्मबलप्रवृत्त-दोषबलप्रवृत्तभेदात्। आदि-बलप्रवृत्ताः—आदिर्जीवोपक्रमः, स च शुक्र-शोणितमेलकः, तस्य बलं प्रकरणाद् व्याधिजनिका शक्तिः, सा च शुक्रशोणितदोषरूपैव, तेनादिबलेन भूता आदिबलप्रवृत्तिः (चक्रः) दुष्टशुक्रशोणितबल-जाताः (डल्हणः) आदिरादिकारणं, जीवावक्रान्त-मन्तर्गर्भाशयगतं शुक्रशोणितमित्येतत्, बलं प्रकर-णाद् व्याध्यभिनिर्वर्तिनी शक्तिः, तेनोत्पन्ना आदि-बलप्रवृत्ताः (हारा) शुक्रशोणितस्थितवातादिदोष-जाताः कुष्ठार्शोमेहक्षयप्रभृतयः। एत एव व्याधयः आनुवंशिकाः, कुलजाः, क्षेत्रियाश्च कथ्यन्ते। तथा च अथर्ववेदसंहिता-क्षेत्रे परक्षेत्रे पुत्रपौत्रादिशरीरे चिकित्स्यः क्षयकुष्ठादिदोषदूषितपितृमात्रादिशरीरा-वयवेभ्य आगतः क्षयकुष्ठादिरोगः क्षेत्रिय इत्युच्यते। (कां० २ अ० २ सू० ८ मं० १) सायणाचार्योऽपि 'क्षेत्रियाणां परक्षेत्रात् मातृपितृशरीरादागतानां कुष्ठापस्मारग्रहण्यादिरोगाणाम्' । (अथर्ववेद २।१४।५) 'जातः प्रमेही मधुमेहिनो वा, न साध्य उक्तः स हि बीजदोषात्। ये चापि केचित् कुलजा विकारा भवन्ति तांश्च प्रवदन्त्यसाध्यान् (च.चि.ह)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बीजदोषादितिप्रमेहारम्भकदोषदुष्टबीजजातप्रमेहित्वादिति चक्रपाणिः । स्वभावतः-आदिबलप्रवृत्तरोगाणां विभागद्वयम्—१. मातृजाः (शोणितजा वा) २ पितृजाः (शुक्रजाः) कुष्ठाद्युदाहरणेषु उपदंशजकुष्ठस्यापि ग्रहणम् । भगवता सायणाचार्येण तु अपस्मारग्रहण्यादिरोगाणामपि निर्देशः कृतः । भगवता श्रीमनुना तु रोगगणनायां श्वित्रमपि निर्दिशवता रोगपीडितकुलेषु विवाहोऽपि निषिद्धः । तद्यथा—

महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ।
हीनक्रियं निष्पुरुषं निश्छन्दो रोमगार्शसाम् ।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ।
(मनु० ३ अ०)

किं वच्मः ? पुराकालिकीमाचार्याणां नियमपालनदृढतां दृष्ट्वा पुनरपि स्मृतिपथमायाति मनोर्वचः—

काममामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।
न त्वेवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ।

चरकीयकुलजाः पितृपितामहादिकारणोद्भूताः, इति । 'मनुष्यबीजं हि प्रत्यङ्गबीजभागसमुदायात्मकं स्वसदृशं प्रत्यङ्गसमुदायरूपपुरुषजनकम्' 'यथा बीजं तथाऽङ्कुरः' (च० शा० ३. सू० २३ टीकायां चक्रपाणिः)

सहस्रावधिवत्सरपूर्वं महर्षि—श्रीयाज्ञवल्क्येनाऽपि इत्थं विचाराः प्रदर्शिताः । 'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् । अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् । इत्यादिना (याज्ञ. १।५२)

अतश्च प्राचीनकालादेव सगोत्रसपिण्डविवाहयोर्निषेधः कृतः । यथा वदति श्रीमनुः-असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति । (मनु ३. ५.) एवं मातापित्रोरार्तवशुक्रयोर्दोषाज्जातासु सन्ततिषु प्रविष्टवतां रोगाणां' आदिबलप्रवृत्तः (सुश्रु०तः) सञ्चारी (याज्ञवल्क्यः) कुलजः (चरकः) सहजः कुलोद्भवश्च (वाग्भटः) प्रकृतिप्रभवः (श्रीभेडः) इत्यादि नामानि दत्तानि ।

अथ च आदिबलप्रवृत्तिः—एष्वपि रोगेषु भवति । तद्यथा कर्कटः (केन्सरः) मेदाऽर्बुदः, शोणितप्रियता (Heamophilia) रक्तपित्तस्य भेदः वधिरमूकता, वातरक्तं, अस्थिभङ्गुरता' (Fragilitas Ossium)
अर्द्धविभेदकः Eozema विर्चचिका ' ' शीतपित्तं, श्वासः, तृणपुष्पाख्यो ज्वरः 'Hay fever ' नासास्रावः । मस्तिष्कदौर्बल्यम्, उन्मादभेदाः, अयतन्त्रकम्, रंगान्धता, अदूरदृष्टिः, लिङ्गनाशः, रक्तभाराधिक्यम् 'High blood pressure, स्थौल्यम्, (अन्तः स्राविग्रन्थीनां दोषजन्यत्वम्) कार्श्यम्, मेदस्विता, आमाशयिकव्रणाः, अन्येऽपि नानाविधाः शरीरव्यङ्गाः ।

चरकेऽपि आदिबलप्रवृत्तानां रोगाणां समुत्पत्तिविषये चेत्थं निर्दिष्टम्- यस्य यस्य अङ्गावयवस्य बीजे बीजभाग उपतप्तो भवति तस्य तस्यावयवस्य विकृतिरुपजायते' (शा० ३) बीजे इति शुक्रशोणिते । बीजस्याङ्गप्रत्यङ्गनिर्वर्तको भागो बीजभागः (चक्रपाणिः) संक्षिप्तेऽस्मिन् वर्णने सुश्रुतीयं सर्वमायाति ।

जन्मबलप्रवृत्ताः— जन्मनि बलं पूर्वजन्मव्यवस्थिता दोषा एव व्याधिजनकाः । अर्थात् मातापित्रोः शुक्रशोणितयोरदुष्टत्वेऽपि सगर्भावस्थायां मातुरहिताहाराचारविहारादिसेवनाज्जातः सन्तत्या रोगो जन्मबलप्रवृत्त इत्युच्यते । तथा च डल्हणः—शुक्रशोणितदुष्टिं विनाऽपि मातुरपचार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलजाताः जन्मबलप्रवृत्ताः। जन्मनो देहधारणात्, आ च योनिर्निःसरणात् बलं येषां दोषाणां, तत्प्रवृत्ता जन्मबलप्रवृत्ता इत्यर्थः (हारा) गर्भावक्रान्तिकालजा व्याधय इति यावत्। इमे द्विविधा भवन्ति, १ अस्वाभाविकवृद्धिः, विकृताकारः, व्यङ्गं वा (Malformations or Developmental error) तथा अस्वाभाविकवृद्धियुक्तो गर्भः, विकृताकृतिः, वियोनिगर्भो वा मान्स्टर (Monster)।

'कथ्यन्ते — 'वियोनिर्विकृताकारा जायन्ते विकृतैर्मलैः। (अ. हृ.)' सर्पवृश्चिककूष्माण्डविकृताकृतयश्च ये। गर्भास्त्वेते स्त्रियाश्चैव ज्ञेयाः पापकृता भृशम् '(सुश्रुतः)' कस्मात् प्रजां स्त्री विकृतां प्रसूते, हीनाधिकाङ्गीं विकलेन्द्रियां वा (चरकः) इमे विकृताकाराः केचन आदिबलप्रवृत्ताः, केचिच्च जन्मबलप्रवृत्ताः सन्तो बहुधा भिद्यन्ते। तद्यथा-अङ्गुलीनां संख्याधिक्यम्, शरीरस्यातिस्थौल्यम्। यमो गर्भः, अङ्गानां न्यूनाधिक्यम्, अङ्गानां विपर्यासः (यथा—हृदयप्लीन्होः दक्षिणार्द्धे, यकृतश्च वामार्धे। गर्भजधातूनां शेषत्वम्। २ मातुरुपसर्गजन्या औपसर्गिकरोगाः यथा फिरङ्गः, आंत्रिकज्वरः, मसूरिकाप्रभृतयः। अनौपसर्गिकरोगास्तीव्रकामला, पाण्डुरोगः नागविषादयश्च। जन्मबलप्रवृत्तव्याधिषु प्रसवकाले आघातादुपसर्गाच्च प्रजातानां 'उपशीर्षक' (Cephal haematoma) अर्दित, नवजातनेत्राभिष्यन्द प्रभृतीनामपि प्रसवजन्यत्वात् (Natal or Parturial) समावेशः।

तथा च सुश्रुतः—'जन्मबलप्रवृत्ता ये मातुरपचारात् पङ्गुजात्यन्धबधिरमूकमिन्मिनवामनप्रभृतयो जायन्ते। तेऽपि द्विविधा रसकृताः, दौर्हृदापचारकृताश्च' इति। रसकृतानामुदाहरणानि चरकशारीरस्याष्टमाध्याये 'मधुरनित्या प्रमेहिणं मूकमतिस्थूलं वा' इत्यादिना बहुवर्णितम्। गर्भानुभवान्मातुश्चतुर्थादिमासेषु—इन्द्रियादि प्रार्थना 'दौर्हृदम्' इत्याचक्षते।' सुदक्षिणा दौर्हृदलक्षणं दधौ' इति रघुः। दौर्हृदस्यापमानिते, अलब्धे वा श्रद्धाविघातान्मनोऽनवस्थानाच्च जायमानानां सर्वेषामेव व्याधीनां समावेशः। 'इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी।' इत्यादिना शारीरस्य तृतीयाध्याये सुश्रुते, 'उपचारः प्रियहितैर्भर्त्रा भृत्यैश्च गर्भधृक्' इत्यादिना वाग्भटे वर्णितमुपलभ्यते।

दोषबलप्रवृत्ताः — वातादिशारीरदोषाणां रजस्तमसोर्मानसदोषाणाञ्च प्रकोपक्षयविकृत्या वैषम्यजाः शारीरमानसविकाराः। 'वायुः पित्तं कफश्चेति शारीरो दोषसंग्रहः। मानसः पुनरुद्दिष्टो रजश्च तम एव च' (चरकः)।

दोषबलप्रवृत्तानां रोगाणां — मिथ्याहारविहाराभ्यां दोषदुष्ट्या साक्षादुत्पन्नाः, प्रकुपितदोषैः पूर्वोत्पन्नरोगैश्चोत्पन्नाः, एवं भेदद्वयं परिकल्प्यते। चरके एषां रोगाणां सोदाहरणं सविस्तरं वर्णनमेभिः पद्यैरित्थं कृतम्—

'निदानार्थकरो रोगो रोगस्याप्युपजायते' इत्यादि। (च. नि. ८) रोगोऽपि रोगान्तरं कुर्वाणो निदानान्तरोपबृंहित बल एव करोतीति (म. को.) ज्वरकारणान्येव हि उष्णादीन्यतिमात्रया ज्वरमभिनिर्वर्त्य रक्तपित्तमपि कारणान्तरवर्धित शक्तीनि जनयन्तीत्याद्यनुसरणीयम्। (चक्र.)

बहुषु स्थलेषु ग्रन्थकर्तारोऽपि रोगोत्पादककारणानां सविशेषं सेवनेन एकरोगाद् रोगान्तरोत्पत्तिं वर्णयन्ति, यथा भगवानग्निवेशः—

पित्तातिसारी यस्त्वेतां क्रियां मुक्त्वा निषेवते।
पित्तलान्यन्नपानानि तस्य पित्तं महाबलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुर्यादुक्तातिसारं तु, रक्तमाशु प्रदूषयेत् ।
तृष्णां शूलं विदाहं च गुदपाकं च दारुणम् ।
(च. चि. १९-७३,७४)

सुश्रुतेनाऽपि उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये-इदमेव शब्दितम् ।

पाण्डुरोगात्कोष्ठकामलोत्पत्तौ चरको ब्रूते-

पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ।
(च. चि. १६. अ.)

इत्थमेव सुश्रुतोऽपि अतिसारप्रवाहिकाभ्यां ग्रहण्युत्पत्तिं दर्शयति—

अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत् ।
(सु. उ. ४०-१६७)

तेऽपि द्विविधाः—आमाशयसमुत्थाः, पक्वाशयसमुत्थाश्च । पुनश्च द्विविधाः—शारीराः, मानसाश्च । शरीरस्थितवातादिरजःप्रभृतिदोषजनितत्वात्, अद्यावधि वर्णिता एते व्याधयः-आदिबलप्रवृत्ताः, जन्मबलप्रवृत्ताः, दोषबलप्रवृत्ताश्च त्रय आध्यात्मिकाः कथ्यन्ते ।

आधिभौतिकाः--

भूतानि बाह्यानि वातादीनि पृथिव्यादीनि च । तेन निमित्तेन भूतमाधिभौतिकम् । (चक्रः) भूतानि प्राणिनः, भूतेष्वधिकृत्य यद् वर्तते तदाधिभौतिकम् । आधिभौतिकत्वं भूतेषु प्राणिष्वधिकृतत्वात् । (डल्हणः) बाह्योपायसाध्यं दुःखमिति । मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम् । भूतानि जरायुजराण्डजस्वेदजोद्भिज्जरूपाणि चराचरजातीयादि अधिकृत्य निमित्तीकृत्य जायमानं दुःखमाधिभौतिकमिति निष्कर्षः ।

आघात – प्रहार – पीडनादिबलेन समुत्पन्ना रोगा आध्यात्मिका भवन्ति । अत एव सुश्रुते चास्य 'संघातबलप्रवृत्ताः' इति संज्ञा । संघातश्चात्ययिकः संसर्गः । अयम्भावः–रोगाणां निजागन्तुकभेदाद् द्वैविध्यमस्ति, शारीरमानसदोषप्रकोपजानां निजत्वेनाभिधानन्तु वर्णितमेव, प्रहार-पतन-दंशादिबाह्यकारणजन्यानामागन्तुकत्वम् । एषामागन्तुकानामेवाऽयं 'संघातबलप्रवृत्त' नाम्ना भेदः ।

इमे चागन्तुका व्याधयः शारीरमानसवाग्भिर्दुर्बलेषु मानवेषु बलवद्विग्रहादिभिः पुरुषैः प्रहारशक्तिभिर्जायन्ते । 'संघातबलप्रवृत्ता य आगन्तवो दुर्बलस्य बलवद्विग्रहात् । (सुश्रुतः) । यद्यपि'—

द भूतविषवाय्वग्निसंप्रहारादिसम्भवाः ।

नृणामागन्तवो गदाः (च. सू. ८ अ.) आगन्तुकरोगाः बहुभिः कारणैर्जायन्ते, किन्तु प्रकृते केवलं सम्प्रहारादिप्रभवा एव रोगा गृह्यन्ते ।

एतेऽपि शस्त्रप्रहारपीडनादिहिंसाप्रधानक्रियाजन्याद, दुष्टप्राणिव्याघ्रसिंहादिक्रूरपशून्मत्तहस्तिसर्पप्रभृतिदंशाच्च शस्त्रकृत–व्यालकृत-भेदाद् द्विविधा भवन्ति । मूले शस्त्रशब्दः पारिभाषिकः, तथा देवीपुराणे "पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गीनखैर्हताः । पतनाशनप्रायैर्वज्राग्निविषबन्धनैः । मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः" इति । एते आधिभौतिकाः ।

आधिदैविकम्—

इदमपि बाह्योपायसाध्यं दुःखम् । आधिदैविकं तु यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम् । (सां.का.) दैवान् यक्षादीन् दिवःप्रभवान् वातवर्षातपशीतोष्णादीन् वा निमित्तीकृत्य जायमानं दुःखमाधिदैविकम् । (बलरामः) दैवं प्राक्तनं कर्माधिकृत्य वर्तत इत्याधिदैवम्, तत्र भूतमित्याधिदैविकेत्युत्पत्तिं ग्रिन्छामः (चक्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधिदैविकाश्च रोगाः कालबलप्रवृत्त-दैवबल-प्रवृत्त-स्वभावबलप्रवृत्तभेदात् त्रिधा भवन्ति । तत्र-शीतोष्णवातवर्षातपप्रभृतिनिमित्ताः, ते पुनर्जाड्य-दाहकम्पादयः, तथा व्रणज्वराश्च । व्यापन्नर्तु-कृत, अव्यापन्नर्तुकृत (कालस्वभावकृतपित्तचयादि-कृत) भेदाभ्यामेतेऽपि द्विविधा भवन्ति ।

आयुर्वेदीयवाङ्मये कालशब्दो बहुत्र व्यापकः, यथा शीतोष्णवर्षलक्षणाः पुनर्हेमन्तग्रीष्मवर्षाः सम्वत्सरः । स कालः । (च. सू. ११) कालः शीतोष्णवर्षलक्षणः षड्ऋतुकः (डल्हणः) कालः पुनः परिणाम उच्यते (च सू ११ अ.)

कालकृताः प्रवातानिवातातपच्छायाज्योत्स्ना-तमःशीतोष्णवर्षाहोरात्रपक्षमासर्त्वयनादयः सम्ब-त्सरविशेषाः (सु. सू. १)

अस्य सम्वत्सरात्मकस्य प्राकृतस्य वैकृतस्या-वावस्थायां स्थितया रोगोत्पादकशक्त्या जाय-मानानां रोगाणां 'कालप्रवृत्त' इति संज्ञा । विषयो-ऽयं चरके सूत्रस्थाने १।५४ टीकायां चक्रपाणिना-विशदीकृतश्च ।

अव्यापन्नर्तुकृताः —अव्यापन्नर्तूनां लक्षणानि सुश्रुते (सू० ह० २१-३६) पद्यमयैर्वचोभिः सुन्दरं वर्णितमस्ति । अत्र वर्णितानां लक्षणानामयोगा-तियोगमिथ्यायोगास्त्रयः, षट्सु-ऋतुषु प्रत्येकस्य त्रयो व्यापत्तयः । एवं समष्ट्या अष्टादश व्यापत्तिभि-र्जायमाना रोगा अव्यापन्नर्तुकृताः कथ्यन्ते । (सु. सू. ह. अ. च. वि. ३-१६-२२ स्पष्टम्)

एतद्भिन्नाश्च व्यापन्नर्तुकृताः । अत एव ऋतूनां व्यापत्तिशब्दस्यार्थः सुश्रुते 'स्वगुणैरति-युक्तेषु विपरीतेषु वा पुनः । विषमेष्वपि वा दोषाः कुप्यन्त्यृतुषु देहिनाम्' (सु सू. ह. ३७) व्यापन्न-र्तूनां सामुदायिक अधर्मः कारणम् (चरके विमाने ३।२३.३२ श्लोकयोः श्रीचक्रपाणिः, सुश्रुते सू. ह. १९–२० श्लोकयोः श्रीडल्हणश्च) अव्यापन्नर्तुकृतानां रोगाणामपि मूलमधर्म एवेत्यपि तत्रैव (च. वि. ३) स्पष्टम् ।

देवबलप्रवृत्तरोगाः—देवानां यक्षप्रभृतीनां, देवकल्पानां, गुरुगोसिद्धानाञ्चावमाननात्, अभि-शस्तकाः पापमूला रोगाः, ये वक्ष्यन्ते नवग्रहाकृति-विज्ञानीयादौ । ऋषीणामाक्रोशजाः, अथर्ववेदप्रणी-ताभिचारिकमन्त्रैः कृता मारणात्मका व्याधयः, ये च पीडितजनसमीत्पोपन्ना ज्वरादयः, ते दैव-बलप्रवृत्तरोगाः—भवन्ति । तेऽपि द्विविधाः–विद्यु-दशनिकृताः, पिशाचादिकृताश्च । (लताकारा तिर्यक्पतन्ती वह्निरूपा विद्युत्, मुशलवधः पतन-शीलो मारणात्मकोऽशनिः) ।

तेऽपि पुनः संसर्गजाः, आकस्मिकाश्च । संस-र्गजाः–औपसर्गिकरोगिसंसर्गजाताः । आकस्मिकाः–संसर्गजव्यतिरिक्ता आधिदैविका अपरिदृश्यमान-हेतुतया आकस्मिका भण्यन्ते (चक्र.) कुष्ठं ज्वरश्च शोषश्च नेत्राभिस्यन्द एव च । औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्' (सु. वि. ५) औपसर्गिकरोगाः शीतलिकादयः (डल्हणः) स्पर्शकाहारशय्यादिसेवनात् प्रायशो गदाः । सर्वेसञ्चारिणो नेत्रत्वघतिकारा विशेषतः । (अ स नि. १४) प्रसङ्गाद् गात्रसंस्प-र्शान्निःश्वसात् सहभोजनात् । सहशय्यासनाच्चैव वस्त्रमाल्यानुलेपनात् । प्रसङ्गादिति प्रसंगेन अभ्या-सेन कृतात् पुनः पुनः कृतादित्यर्थः । (डल्हण) प्रसङ्गात्-प्रसंगेन कृतादत्यन्ताभ्यासेन कृतादित्यर्थः (गयदासः) ।

स्वभावबलप्रवृत्ताः (स्वभाविका इत्यर्थः) ।

अत्र शरीरस्याध्यक्षस्यात्मनः स्वीयो भावः स्वभावो न तु शरीरस्य, अपगते आत्मनि कस्मि-श्चिदपि शरीरे क्षुधादयो न प्रादुर्भवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः" (भा. प.) स्वभावो मानुषशररीस्य जातिप्रतिबद्धोऽदृष्टकृतो भावः (चक्र.) प्रकृतिशक्तिजाता इत्यर्थः। तेच क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः। (सु. सु. १) स्पष्टयति च चक्रपाणिः—स्वाभाविकाः सुखदुःखभाजककर्मारब्धशरीरस्वभावादेव कृताः। तथा क्षुत्पिपासानिद्राः शरीरस्थित्यर्थमेव कर्मणां कृताः। न हि क्षुत्पिपासामन्तरेणाहारपाने, ग्रहारपाको वा, निद्रां विना भवति। जरा तु कर्माधिययुगनियत्नमृत्युपूर्वतनं कार्यं, मृत्युशब्देन चेह मृत्युप्रत्यासन्ना मर्मभेदादयो भण्यन्ते, त एव दुःखजनकत्वेन व्याधिरूपा भवन्ति।

कालजाकालजत्वभेदेन द्वेधा भिद्यन्ते। तथा च सुश्रुतः "तेऽपि द्विविधाः कालकृताः, अकालकृताश्च" इति। तत्र रक्षाप्रयत्ने ये भवन्ति ते कालजाः स्वास्थ्यानुगुणकृताः शाश्वतिकत्वान्निष्प्रतिक्रियाः। कालस्य परिणामेन जरामृत्युनिमित्तजाः। रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः (च शा.१) अत एव कालकृतां नोपचारोऽस्ति। याप्यतैवाऽस्ति भोजनपानरसायनादिभिः, आत्यन्तिकप्रतीकारो वा स्वभावव्याधिचिकित्सितोक्तरसायनविधिना (डल्हण)। अकालकृतास्त्वत्र पानमूलत्वेन शरीरवत् प्रतीकार्या एव। अत एव भवत्यजीर्णेऽपि बुभुक्षेत्यादिना व्याख्यातानामकालकृतानां क्षुधादिव्याधीनां एकान्ततः प्रतीकारमुपदिशन्त्याचार्याः।

अत एव तेषां यथादोषं यथारोगं प्रतीकारः। हाराणचन्द्रोऽपि कालकृतानां तु पुनः पित्तादिवैषम्यजत्वेऽपि न प्रतींकार्यत्वं, नित्यानुबन्धिस्वभावपुरःसरादेव धातुवैषम्यात्तेषामुत्पत्तेः"। इति। एषु दोषाणां वैषम्यादिमे दोषजा अपि कथ्यन्ते। एषु सप्तवर्गेषु सर्वेषां शारीरमानसानाञ्च रोगाणामन्तर्भावः।

निष्कर्षः—आयुर्वेदो व्याधिप्रतीकारव्याख्यानम्, व्याधिश्च पुरुषस्य दुःखं, प्रतिकूलवेदनीयात्मगुणः, तस्य साक्षाज्जनकत्वेन सम्बन्धो यत्र सः। प्रतीकारे दोषा अपि अपेक्षितव्या भवन्ति। अतः एषु सप्तषु वर्गेषु निर्दिष्टः सप्तविंशत्येकादशशतव्याधयो डल्हणदृष्ट्या भवन्ति। एषां कार्यभूतानां वातपित्तश्लेष्माण एव मूलकारणम्। आगन्तावप्यपि वातादीनां रौक्ष्याल्पस्नेहादीनां, तोदकंड्वादीनां कार्याणामपि लिङ्गानि शरीरक्षोभादवश्यं जायन्ते, परं तानि कियन्तमपि कालं वातादिचिकित्साप्रयोजनकानि न भवन्ति, अनन्तरं दोषदुष्टिसंम्बन्धो भवत्येव। एवं दोषधातुमलसंयोगात्, स्थानभेदात्, वातादिदोषाणां निमित्ताद् वा एषां व्याधीनां नानात्वं तथा तास्ताः संज्ञा आपद्यन्ते।

अत एव दोषत्रयात् जातासु आदिबलप्रवृत्तादिषु नानाव्याधित्वमुपपद्यते-तद्यथा–वातादिदोषरसधातुसंसर्गाज्ज्वरादयो रसाधिष्ठानाः, वातादिदोषरसधातुपुरीषमलसंसर्गादतीसारादयः, वातादिदोषरसादिदूष्यमूत्रमलसंसर्गाद् विंशतिर्मेहाः, तथा वातादिदोषरक्तधातुसंसर्गाद् वातरक्तपित्तविद्रधिरक्तगुल्मादयः। एवमेव स्थानभेदादपि-सप्तस्वायतनेषु पंचषष्टिर्मुखरोगाः, चक्षुरिन्दियायतनेषु षट्सप्ततिर्नेत्ररोगाः। दोषाणां निमित्तात्-प्रत्येकं वातादिज्वरास्त्रयः, सान्निपातिक एकः, द्वंद्वजास्त्रयः आगन्तुश्चाष्टमः। एवमन्यदपि निमित्ततो व्याधीनां नानात्वं ज्ञेयम्।

सुश्रुतानुसारं वृद्धवाग्भटे ऽपि रोगाणां सप्त भेदाः सन्ति-सप्तविधा खलु रोगा भवन्ति। सह-गर्भ-जातपीडा-काल-प्रभाव-स्वभावजाः (सू.२२) अत्र सहजादि सप्त क्रमशः सुश्रुतीयादिबलप्रवृत्तादिसप्तानां पर्यायाः। वाग्भटे—एषां प्रत्युत्पन्नकर्मजपूर्वकर्मजभेदाद् द्वैविध्यप्रदर्शने वैशेष्यम्। तेन एते सप्तविधा रोगाः पूर्वजन्मजन्मान्तरपापकर्मभिरिह जन्मकर्मभिर्वा प्रजायन्ते। "त एते पुनर्द्विविधा भवन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्युत्पन्नकर्मजाः, पूर्वकर्मजाश्च । तत्र रोगोत्पत्ति प्रति प्रत्युत्पन्नकर्म यदनेनैव शरीरेण दृष्टमदृष्टं चोद्दिश्याप्तोपदिष्टानां विहितानां प्रतिषिद्धानां चानुष्ठानमनुष्ठानं वा । जन्मान्तरातीतेन तु पूर्वम् । तत्पुनर्दैवाख्यमुक्तं च नियतानियतभेदेन प्राक् । तस्माददृष्टहेतवः प्रत्युत्पन्नकर्मजाः विपरीता दैवजन्मानः । अल्पनिदाना महारुजश्चोभयात्मकाः (अ. स. सू. २२)

पाश्चात्यवैद्यके रोगाणां प्रधानतो विभागद्वयम्, आदिबलप्रवृत्तस्वकृत (उपार्जित) भेदात् । महर्षि भेडेनाऽपि 'प्रकृतिप्रभश्चैव नरस्य स्वकृतस्तथा । ज्ञेयः प्रमेहो द्विविधस्तस्य वक्ष्यामि लक्षणम्" । अनेन इदमेव स्पष्टीकृतम् ।

स्वकृतरोगाणां संघातबल - कालबल-रसायनिक - परोपजीव (Parasites) कारणचातुर्विध्यं मन्यते । आद्यौ द्वौ प्रसिद्धौ, तृतीये अम्ल-क्षार-शत-मल्ल-विषमुष्टि - पारद-धतूरादिविविध - रासायनिक-विषाणां, मल, मूत्र, स्वेदादीनामसम्यगनुत्सर्गाद् देहे समुत्पन्नानामन्तर्विषाणां Outo-intoxication or Endogenous poisons.

पूतिमयपदार्थविषाणां (Ptomain poisons.)

जीवतिक्तीनां (Vitamnis.)

अन्येषामावश्यकपोषकपदार्थाल्पीयस्त्वादीनामपि समावेशः । चतुर्थे-ज्ञाताज्ञातजीवाणुकृमि कीटकादीनां समावेशः । जीवाणवो हि परं सूक्ष्मास्तेषां दर्शनं सूक्ष्मदर्शकयन्त्रेण विनाऽसम्भवि । केचन जीवाणवः सूक्ष्मदर्शकादपि अदर्शनीयाः भवन्ति । आयुर्वेदमहर्षयो जीवाणुभिः, तेषां रोगोत्पादकशक्तिभिश्च परं ज्ञातार आसन्निति तेषां वचोभिः स्पष्टमेव । किन्तु संक्रामकरोगाणां समुत्पत्तौ दैवबलप्रवृत्तमपि कारणं प्रधानतममिति चापि—अनुमतमेव ।

झण्डु

च्यवनप्राश अवलेह

प्रमाणित आयुर्वेदिक शरीर-निर्माता एवं पुनर्यौवनप्रदाता

झण्डु

अशोकारिष्ट

महिलाओं के स्वास्थ्य एवं रोगों के लिए वरदान

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फेफड़ों के विकार

कफ़, खांसी, दमा

जुकाम नाशक

आयु, बल वर्द्धक

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

श्री **बैद्यनाथ**
आयुर्वेद भवन प्राइवेट लि॰

कलकत्ता पटना झांसी · नागपुर इलाहाबाद (नैनी)

नोट: विशेष जानकारी के लिये १० न० पै० का डाक टिकट भेजकर आंवला और 'च्यवनप्राश' नामक पुस्तिका हमारे यहां से मंगाइये।

बैद्यनाथ च्यवनप्राश

अष्टवर्गयुक्त

ताजे आंवलों से तैयार **बैद्यनाथ च्यवनप्राश**
स्त्री-पुरुष बालक वृद्ध और युवा सब के लिये सदा सेवनीय.
पौष्टिक रसायन है।



जब भी च्यवनप्राश लें उसके गुणों का पूरा लाभ उठाने के लिए
सदा **बैद्यनाथ च्यवनप्राश** ही लीजिए।

घर में ही बैद्य

बैद्यनाथ-दवाएँ
घर में बराबर रखने से मौके पर वे
एक बड़े डाक्टर या बैद्य का काम
और अचानक आई हुई बीमारी में प्राणों की
रक्षा करती हैं

बैद्यनाथ दवाएँ
आप के स्वास्थ्य और सुरक्षा की गारंटी हैं,
हमेशा अपने घर में सँभाल कर रखिये।

देशी दवाओं का
सब से बड़ा
और
विश्वासी कारखाना

श्री
बैद्यनाथ
आयुर्वेद भवन
प्राइवेट लि॰

कलकत्ता
पटना
झांसी · नागपुर
इलाहाबाद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुर्माता गुरुस्तातो गुरुर्बन्धुर्गुरुर्धनम् ।
गुरुर्विद्या गुरुः सर्वं, तस्मै श्रीगुरवे नमः ॥१॥

श्वासरोगाः

(ले०—वै० मणिरामशर्मा संस्थापकः श्रीधन्वन्तरि-मन्दिर-रतनगढ़, राजस्थान)

श्वासरोगोऽत्र सर्वेषां रोगाणां मध्येऽतीव कष्टप्रदो व्याधिः प्राणहरश्च । तद्यथा—

कामं प्राणहरा रोगा बहवो न तु ते तथा ।
यथा श्वासश्च हिक्का च हरतः प्राणमाशु च ॥

श्वासस्य पञ्च भेदा भवन्ति, एषु महोर्ध्वच्छिन्नश्वासा असाध्याः । एतेषां त्रयाणामपि चिकित्सा तदात्वे शान्तिप्रदा परिणामेऽसुखावहा । परं तमकक्षुद्रश्वासयोश्चिकित्सा कृता तदात्वे चानुबन्धे च सुखावहा प्रोक्ता ।

तमकश्वासः—

श्वस् प्राणने धातोः श्वासशब्दस्य निष्पत्तिः । शरीरे नासिकया मुखेन वा वायोर्गमनागमनं श्वासः, परं तमकश्वासे प्रयुक्तः श्वासशब्दो विकृतिवाचकः । वातो बहिश्चरः शरीरचरश्च शरीरसंचरणशीलो-वायुरेकोऽपि स्थानभेदेन कार्यभेदेन च पञ्चविधो भवति । पञ्चविधेऽस्मिन्न कः प्राणो नाम वायुरस्ति । अस्य मुख्यं स्थानं हृदि वर्तते । अस्मिन्नेव प्राणवायौ प्राणवहस्रोतःसु तन्मूले च विकृतौ सत्यां श्वासरोगः समुत्पद्यते, आहार-विहारयोरसंयमः केचिच्च रोगाः विकृतेः कारणानि । श्वासरोगे च वातकफौ प्रधानौ दोषौ स्तः । शास्त्रोक्तलक्षणैर्निर्दिष्टोऽयं तात्पर्यत्रेति तमकोऽतिकष्टप्रदस्वरूप एव तमकश्वासो ज्ञेयः ।

चरकेण तमकश्वासस्यैव प्रतमकसंतमकौ द्वौ भेदौ प्रोक्तौ । तमकश्वासस्य सामान्यलक्षणानि यानि शास्त्रे वर्णितानि । तद्यथा—पीनसः, प्रमोहः कासवेगः, तीव्रश्वासवेगः, त्रासः, निश्चेष्टता, उच्छूनाक्षता, भृशार्तिमत्ता, विशुष्कास्यता, मुहुः श्वासिता, अवधमनम्, ललाटस्वेदः, कष्टेन कफनिःसरणम्, श्लेष्मणा गले घरघरशब्दः, शयनावस्थायां पार्श्वग्रहः, कफनिःसरणेन क्षणिको लाभः, कण्ठोध्वंसः, शयने श्वासवृद्धिः, निद्रानाशः, आसनेन किंचिल्लाभः, उष्णकामिता मेघेन वृद्धिः, अम्बुना वृद्धिः, प्राग्वातेन वृद्धिः, श्लेष्मलपदार्थैश्च वृद्धिरिति ।

उपर्युक्तशास्त्रोक्तलक्षणेभ्योऽधिकानि लक्षणानि चेमानि तमकश्वासे दृश्यन्ते । तद्यथा-प्राणवहेषु स्रोतोमूलेषु ध्वनिकृतिः, मलविबन्धः, गलेते ते शब्दश्चेति ।

अथ चिकित्सा

तमकश्वासरोगे संक्षिप्तं पञ्चकर्म

पञ्चानां वमन-विरेचन-निरूहानुवासननस्यानां कर्मणां समाहारः पञ्चकर्म । केचिच्च पञ्चकर्मणि स्नेहस्वेदौ संमेल्य सप्त कर्म वदन्ति तन्न शोभनम् । तयोः स्नेहस्वेदयोः प्रभूतदोषनिर्हरणशक्तिर्नास्ति वमनादिषु कर्मसु प्रभूतदोषनिर्हरणशक्तिरस्त्यतो तौ स्नेहस्वेदौ न पञ्चकर्मणि प्रविष्टौ भवतः यतस्तौ दोषोत्क्लिष्टकरणे शक्तौ न प्रभूतदोषहरणे । अतो वमन-विरेचन-निरूहानुवासन-नस्यानां पञ्चकर्म संज्ञा । प्रभूतदोषनिर्हरणपूर्वकं व्याधिशमनं पञ्चकर्म । तमकश्वासे वमनं विरेचनं निरूहः धूमवर्तिः नस्यं चेति । पञ्चकर्म यद्यपि धूमवर्त्तिरपि प्रभूतदोषहारिणी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति तथापि तमकश्वासेऽस्याः प्रयोगः क्रियतेऽस्माभिः शेषदोषनिर्हरणाय। तमकश्वासेऽनुवासनो वस्तिर्न दीयते आत्ययिकरोगमन्तरा। आयुर्वेदशास्त्रे चैतानि पञ्चकर्मणि समस्तानि व्यस्तानि च क्रियन्ते। समस्तपञ्चकर्मणि मासद्वयं त्रयं वा लगति व्यस्ते दिनद्वयं त्रयं वा। पञ्चकर्मणि दोषोत्क्लिष्टकरणार्थं पूर्वस्नेहस्वेदौ क्रियेते-स्नेहस्वेदमन्तरा पञ्चकर्म न भवति। पूर्वं क्षेत्रीकरणं ततः पञ्चकर्मप्रयोगः।

इदं पञ्चकर्म सर्वरोगाणां चिकित्सा। नास्ति कश्चिदप्येतादृशो रोगो यश्च पञ्चकर्मणा न दूरीभवेत्। केवलश्चैक ऊरुस्तम्भरोगोऽस्ति यश्च पञ्चकर्मणा शान्ति न याति, परमत्रापि पञ्चकर्मोपांग आवस्थिकः स्वेदादिः क्रियते एवेति पञ्चकर्म सर्वेषां रोगाणां चिकित्सा।

स्नेहनम्

स्नेहनार्थं दूष्यं देशं बलं कालमनलं प्रकृतिं वय इत्यनुसारं विचार्य त्र्यहं सप्ताहं वा यावदच्छपानविधिना विचारणाविधिना वा रुग्णं स्नेहं पाययेत्। अच्छपानमात्रा बलानुसारं चतुस्तोलकादारभ्य विंशतितोलकपर्यन्तं देया भवति। विचारणाविधिना तु गोघृतयवागूकृशरागोधूमद्विदलदुग्धादिभिः संमेल्य भोजयेत्।

स्वेदः

तमकश्वासे स्वेदचिकित्सयाऽत्यन्तलाभो भवति। अनया चिकित्सया ग्रथितो कफो लीनश्चापि उत्क्लिष्टो भूत्वा बहिर्गमनमुखो भवति, प्राणवहानि स्रोतांसि मृदूनि संजायन्ते, प्राणो वायुरप्यनुलोमो भवति। उत्क्लिष्टश्च कफकोष्ठमायाति ततस्तस्य कफस्य सुखपूर्वकं बहिर्निःसरणं भवति। स्वेदस्य त्रयोदश भेदाः भवंति। तेष्वत्र श्रीधन्वन्तरिमन्दिरस्यारोग्यशालायां संकरस्वेदः वाष्पस्वेदश्च क्रियते।

संकरस्वेदः—यवगोधूमचूर्णातसीमाषैरंडबीजादीनि तैले संभर्ज्य संयावं निर्माय वस्त्रे बद्ध्वा च यत्र यत्र स्वेदोऽपेक्षते तत्र तत्रैव कारयेत्। अस्माकमारोग्यशालायां काष्ठनिर्मितं वाष्पयन्त्रमस्ति। तत्रोपविश्य रोगी स्विद्यते। सर्वं शरीरं यंत्रे समायाति केवलं ग्रीवैव बहिर्दृश्यते। ग्रीवायाः समन्ताद्वस्त्रं परिवेष्टय यंत्रच्छिन्द्रं च पिधायाग्निस्थजलपात्रसंयुक्तरबरनलिकामुखं वाष्पयंत्रच्छिद्रे विनिवेश्य स्वेदः क्रियते। पञ्चदशभिः क्षणैः सर्वाङ्गस्वेदो जायते। ततो द्वितीयदिने गोधूमद्विदलादि वम्यं रुग्णं संभोज्य वमनार्थं मदनफलादिभेषजं यष्टीमधुक्काथेनाकण्ठं पाययेत्। एवं साधु वमतीति।

यष्टीममधुक्काथविधिः—

कुडवपरिमितं यष्टीमधु चतुष्प्रस्थं च जलं वह्निना संशोष्य प्रस्थं सपादप्रस्थं वावशेषयेत्। अस्मिन् क्काथे मदनफलपिप्पलीचूर्णं गद्याणकतोलकं यावद्वा साधु मन्येत तावत्प्रक्षिप्य संघोल्य च ब्रह्मदक्षेति मंत्रेण पाययेत्। वमने कृतेऽपि यदि स्वल्पः कफोऽवशिष्यते तदा तं धूमपानेन शमयेत्। श्रीधन्वन्तरि–मन्दिरस्यारोग्यशालायामेवं धूमविधिर्विधीयते। एकं लोहसम्पुटकमस्ति। अस्योपरितने पात्रे च्छिद्रमेकं वर्तते। तत्रैका लोहनलिका संयोज्यते। अधस्तने पात्रे कोकिलाग्निस्तस्मिन् रक्तिपरिमितभेषजादारभ्य पंच रक्तिपर्यन्तं भेषजं प्रक्षिप्य लोहपात्रयोर्मुखं संमेल्य नलिकया धूमं पाययते। एवं कृते रोगी लाभान्वितो भवति।

येषां च कफप्रधानानां रोगिणां श्वासस्य तीव्रवेगो भवति। ये च श्वासवेगा आधुनिकैर्भेषजैः शान्ति न यान्ति, तेषां कृते भेषजमिदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीघ्रं लाभकारि दृश्यते भेषजन्त्विदम्। धत्तूर-स्यैको भागः भंगापत्राणां चैको भागः द्वयोश्चूर्णं कलमीशोरकस्य जले भावनीयं शुष्कं चाङ्गाराग्नौ प्रक्षेपणीयम्।

धूमपानेन कण्ठे शुष्के सति सिताखण्डं चूषणार्थं दीयते। अथवा ससितं दुग्धं पानाय प्रदीयते।

विरेचनम्

वमनेन रोगी दुर्बलो भवति। अतोऽग्निबल-वृद्ध्यर्थं संसर्जनादिक्रमः षडहं यावत् क्रियते। ततः प्रकृत्यनुरूपभोजनेन बलप्राप्तौ सत्यां पुनश्च स्नेह-स्वेदौ विधाय द्वितीयं कर्म विरेचनं प्रारभ्यते वमनात् पञ्च दशदिनानन्तरम्।

विरेचनद्रव्यम्

निशोथस्य भागद्वयं हरीतक्याश्चैको भागः सैन्धव-लवणस्यार्द्धो भागः सर्वं संकुट्य संचूर्ण्य प्रकृत्यनुरूपं पणमाषं तोलकं वा दत्त्वाऽधोलिखितः क्वाथः प्रदीयते।

क्वाथश्चायम्

मधुकादिचूर्णं तोलकद्वयं चतुरंगुलस्य मध्यं द्वितोलकं जलं चार्द्धप्रस्थं वह्निना साधयित्वा कुड़-वोऽवशेष्यः। पूर्वं निशोथादिचूर्णं भक्षयित्वोपरि पीयते।

उदरशुद्धेरभावात् पुनरप्युचितमात्रयाऽस्य प्रयोगः क्रियते।

निरूहः

विरेचनात्पञ्चदशानां दिनानामनन्तरं निरूहो बस्तिः प्रदीयते। निरूहमात्रा प्रस्था सपाद-प्रस्था वा ज्ञेया।

नस्यम्

तमकश्वासिनां यदि प्रतिश्यायः शिरोगौरवं वा भवेत्तदाऽपामार्गबीजं त्रिकटुकटफलादिभिः शिरोविरेचकद्रव्यैश्च शिरोविरेचनं प्रदीयते निरू-हात्पंचदशदिनानन्तरम्- इति पंचकर्म। अथ संशमनम् श्रीधन्वन्तरि-मन्दिरस्यारोग्यशालायां संशोधनचिकित्सायाः प्रयोगः संशमनचिकित्सायाश्च प्रयोगो विधीयते। यदि रोगी बलवान् भवेत्तदा संशोधनचिकित्सा क्रियते, यद्यबलश्च तदा संशमनी चिकित्सा। संशमनभेषजम् श्वासशमनं श्वास-कल्पः श्वासशमनपेयादयश्च एतानि भेषजानि स्वतंत्राणि प्रयुज्यन्तेऽथवा शास्त्रोक्तभेषजैः सह प्रयुज्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौक्तिकनामधेयो ज्वरः

(ले०—श्रीलालचन्द्रो वैद्यः, झांसी-श्रायुर्वेद-विश्वविद्यालयः, झांसी)

अस्य खलु ज्वरस्य व्यञ्जनम्-श्वेतपिडकाः याश्च श्वेतश्वेताः, श्लक्ष्णश्लक्ष्णाः, कठिन-कठिना उज्ज्वलोज्ज्वला वसरादेशीयमुक्तासदृशाः सूक्ष्मसूक्ष्माश्च भवन्ति, ज्वरागमनकालतः प्रायः पञ्चसु सप्तसु वा दिवसेषु व्यतीतेषु समुत्पद्यन्ते, ताश्च प्रथमं ग्रीवायां चिबुकादधस्ताद् दृश्यन्ते तदनन्तरं च वक्षसि, उदरे, बंक्षणे ऊरुयुगले च दृष्टिपथमायान्ति, ज्वरश्च प्रतिदिनं वर्द्धमानो हीयमानश्च वर्त्तमानो भवति न तु सर्वथाऽवतरति-प्रशाम्यति वा ईदृशी स्थितिः यथा दोषबलं प्रायः चतुर्दश, अष्टादश, द्वाविंशत् अष्टाविंशत्, षट्त्रिंशत्, चतुश्चत्वारिंशत् दिनानि यावत् प्रचलति, तदनन्तरं ज्वरः प्रशाम्यति इतीयं अस्य ज्वरस्य संक्षिप्ता कथा। विस्तरतस्तु सोऽयं ज्वरः—लोके वेदे च विविधनामभिः प्रसिद्धोऽस्ति। यथा—

१—मन्थरकः—मन्थरगतित्वात्, मौक्तिकज्वरः-मुक्तासदृशपिडकावत्वात्, चरकसंहितायां च कफ-ज्वरलक्षणेषु-शीतपिडकाः-शीताश्च ताः पिडकाः पाकाऽभावात्, तस्यैव पाठस्य (चक्रपाणि टीका-याम्—"तन्त्रान्तरे श्वेतपिडका उच्यन्ते" तच्च तासां श्वेतत्वात् इति वेदे लोके च "मोतीझरा" उच्चारणभेदतः मोती की सी पिडकाओं वाला ज्वर इति, पञ्जाब (ब्) प्रान्तीयभाषायां "पहाड़ी माता" त्रिदिनावधिमत्वात्, पार्वत्यप्रदेशे च शीताधिक्यात्, शिशुषु च विशेषतो दृश्यमानत्वात् तथा शीतलावत् दैवव्यपाश्रयचिकित्सया प्रशमनदर्शनाच्च। काशी-राजस्थान-पञ्जाबप्रभृतिषु प्रदेशेषु तथाविधा एव सर्वसाधारणस्य धारणा भावना च दृश्यते श्रूयते च तत्र तु युक्तिव्यापश्रयचिकित्सा तथा नाद्रियते यथा दैवव्यपाश्रयचिकित्सा इति सर्व-विदितं वृत्तम्।

सोऽयं ज्वरः श्लैष्मिक इति निःसन्देहं वक्तुं शक्यते, यद्यपि अस्मिन् ज्वरे वातजनितं आध्मानं, पित्तजनितश्च अतिसारोऽपि यदा कदा दृश्यते परन्तु तत्सर्वं "न रोगोऽप्येकदोषजः" इति दोष-विचेष्टितमेवास्ति नाऽन्यत् किञ्चित् विलक्षणं कारणान्तरमिति। कादाचित्कं निद्रानाशप्रलापा-दिकमपि ईदृगेव, शेषं च कामादिकं कफजमेव लक्षणं स्यादिति। चिकित्सादृष्ट्याऽपि चायं श्लैष्मिकज्वर एव तद् यथा—अस्मिन् ज्वरे सर्व-प्रथमं अन्यान्यज्वरापेक्षया च समधिकं लङ्घनं क्रियते, पिपासाशान्त्यर्थं लवङ्गाम्बु, ब्राह्मी-लवङ्गाम्बु तथा च वडङ्गपानीयं वा दीयते, औषध-रूपेण च सञ्जीवनी, सिन्दूरमिश्रणं, कस्तूरीभैरवम्, मृत्युञ्जयरसो वा, टंकणमधुयष्टियोगो वा दीयते तत्सर्वं कफनाशकमेषजमेवास्ति ततश्च शर्म अपि सम्पद्यते। सर्वं चैतत् सर्वेषां चिकित्सकानां सर्वथा दृग्गोचरमिति नास्ति संशयलेशः।

पिडकाश्चैतादृश्यः श्लेष्मजा एव सम्भवन्ति नान्यदोषजाः श्वेतत्वं कठिनत्वं श्लक्ष्णत्वं अपाकत्वं च यतः श्लेष्मदोषसाम्यमेवाऽवहति तस्येदृश-गुणकर्मवत्त्वात् च। वृद्धिहानी चात्र काल-स्वभावाद् भवतः। एताः खलु इयत्यः सूक्ष्माः समु-पलभ्यन्ते या हि अणुवीक्षणकाचसहायतया-दृश्यन्ते कदाचित् अथवा अष्टतो द्वादशवर्षदेशीया स्तीव्रदृष्टयो बालका बालिका वा द्रष्टुं शक्नुवन्ति नान्ये दुर्बलदृष्टयो वृद्धा वा ता अपि च प्रायः ग्रीवातः ऊरुपर्यन्तमेव दृश्यन्ते नान्यत्र। परन्तु विद्यन्तेऽन्यत्रापि ज्वरशान्तेरनन्तरं सर्वशरीरात् तनुत्वचाऽवतरणदर्शनादेतत् अनुमानं कर्तुं शक्यते। यदुक्तं भगवता पुनर्वसुना—

"शीतपिडका भृशमङ्गेभ्य उत्तिष्ठन्ति" इति-

च. ति. अ. १-३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विप्रतिवादा अप्यत्र बहुविधाः सन्ति केषांचित् आधुनिकानां लेखलेखकानां पुस्तकप्रणेतृणां व्याख्यानदातृणां च। तद् यथा-केचित् कथयन्ति मनश्चला यत् इमाः पिडका ऊष्मजा एव, नास्ति आसां किञ्चिदपि महत्त्वं निदानकरणे चिकित्सा-विषये च ताः खलु गुरुवस्त्राऽऽवरणादेव समुत्पा-द्यन्ते स्वेदपिडकावत् (अंभौरी के समान) वायु-लगनात् च लुप्ता भवन्ति इति ते स्वयं विचारयन्तु स्वविचारं नास्ति तान् प्रति किञ्चिद् वक्तव्यम् यतो हि ते तथ्यं पश्यन्तोऽपि न पश्यन्ति।

२–केचित् इमं ईदृक्पिडकावन्तं ज्वरं "आन्त्रिकज्वर" इति मन्वते ते च तस्य व्यञ्जकं लक्षणं नाभेः पार्श्वतः अंगुलिपीडनेन वेदनानुभूतिः शोथप्रतीतिश्चेति लक्षणद्वयं कथयन्ति तत्रास्ति युक्तियुक्तम् व्यञ्जनं नाम लक्षणं तु एकमेव भवति यथा गोषु गोत्वं, महिषीषु महिषीत्वं, शृंग-पुच्छादिकं तु लक्षणं भवति न तु व्यञ्जनमन्यत्रापि दर्शनात् दोषापत्तिः स्यात्। तथापि एतल्लक्षणं व्यञ्जनं वा आयुर्वेददृष्ट्या ज्वरे धातुपाकलक्षणम् यदाह श्री भावमिश्रः—भा. प्र. ज्वराधिकारे—

नाभेरूर्ध्वं हृदोऽधस्तात् पीडिते चेत् व्यथा भवेत्।
धातोः पाकं विजानीयात् अन्यथा तु मलस्य च।६१६।

अथवा चैतत् लक्षणम् अन्त्रादानां कृमीणां सम्भवति परन्तु तदपि दीर्घकालिकं भवति नाल्पकालिकमिति विवेचयन्ति विवेचकाः। सा चैषा दशा दारुणा भवति, न च उपलभ्यते सर्वेषु मौक्तिकज्वरपीडितेषु ज्वरितेषु, यदि कदाचित् सोऽयं ज्वरः सान्निपातिको जायते तदा एव एषा दृश्यते। अन्यच्च एषा दशा आसां पिडकानां दर्शना-भावेऽपि दृश्यते सान्निपातिकज्वरेषु यदा-कदा।

३—टायफाइड—ऐलोपैथिकनामधेयानां चिकित्सकानामभिमते तन्नामके ज्वरे रक्तकोठानां दर्शनं नाम लक्षणं व्यञ्जनं वा भवति, तच्च आयुर्वेदमतेन रक्तकोठाऽभिनिर्वृत्तिः (च. ति. अ. १–२८) पित्तज्वरे अथवा—च. चि. अ. ३।

कोठानां श्यावरक्तानां मण्डलानां च दर्शनम्। १०८। सन्निपातज्वरे दृश्यते तदपि केषुचिदेव रोगिषु दृश्यते न तु सर्वेषु। अतोऽपि एतत् तयोः ज्वरयोः लक्षणमेव अस्ति, न तु व्यञ्जनम्।

इत्यतोऽपि तादृक् पिडकावत्त्वाऽभावात् नासौ ज्वरः कथमपि मौक्तिकज्वरसंज्ञां लब्धुमर्हति इति विदितमेवाऽस्ति तद्विदाम्।

इतस्तावत् ऐलोपैथिकाः "क्लोरोमायसीटीन" नामकं औषधं ददति, येन ज्वरोऽवतरति। परन्तु तद् यदि कदाचित् ज्वरप्रशमनकाले प्रदत्तं भवेत् तदा प्रशाम्यति ज्वरः अन्यथा न प्रशाम्यति केवल-मवतरति, कदाचित् दुर्दैववशात् शीतीभवति गात्रं, उपतिष्ठते मृत्युभयम् अपि वा वैचित्यं, अरतिः, ग्लानिः अरुचिप्रभृतीनि च मनस्ताप-लक्षणानि तावत्कालपर्यन्तं वर्त्तमानानि सन्ति यावत् प्रशमनकालो न आयाति, वस्तुतः ज्वरा-वतारणं तु ऐन्द्रजालिकः चमत्कारसंदृशः चमत्कार एव, न तु स प्रशमनोपायः। ईदृशी एव कथा ऐस्प्रीन् नामकस्य भेषजस्य। तदपि स्वेदोत्पा-दनपूर्वकं अवतारयति ज्वरं न तु प्रशमयति अपि च हृदयदौर्बल्यं समुत्पादयति, कुनायन नामकं भेषजं तु महदनिष्टकरं सम्पद्यते, यदि कदाचित् सम्यक् परीक्षणं विना दीयेत, नास्ति अस्माकं तेन प्रयोजनं इति विरमामः। विरताश्च वर्त्तन्ताम् आयुर्वेदीयचिकित्सका अशुद्धेभ्य एतादृशेभ्यो भेष-जेभ्योः नोऽनुचितं एतत्न्निवेदनम्। स्मरणीयमत्र भगवतः पुनर्वसोर्वचनम्। तद् यथा—

प्रयोगः शमयेत् व्याधिं योऽन्यमन्य मुदीरयेत्।
नासौ विशुद्धः, शुद्धस्तु शमयेत् यो न कोपयेत्।
—२७। च० नि० अ० ८

अन्यच्च—एनं मौक्तिकज्वरं "मियादी बुखार" इति कथयन्ति यवनचिकित्सकाः तदपि विचार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णीयम्-मियाद इति कालावधिः तद्वान् "बुखार" इति ज्वरः = कालावधिमान् ज्वरः परन्तु तथा-सति-सन्ततज्वरोपि सप्ताहादिकाऽवधिमान् भवति न तु आवश्यकं एतत् यत् तस्मिन् ज्वरे मुक्ताभाः पिडकाः अवश्यं समुत्पद्येरन् इति । अस्तु यादृशी तेषां विचारसरणिः तादृशी स्यात् इत्यलं परविचारेषु हस्तक्षेपात् तद्विषये विरतिरेव श्रेयसी । पराधिकारे तु न विस्तरोक्तिः शस्ता इति वचनाच्च भिषग्गुरोर्भगवतः पुनर्वसोरात्रेयस्य ।

अन्यच्च—दृश्यते बहुधा यत् एताः पिडकाः पुनः पुनः निःसृत्य विलुप्ता भवन्ति परम्परा च एषा द्वित्रमासपर्यन्तं प्रचलति ततोऽपिप्यधिकं कदाचिद् दुर्भाग्यग्रस्तस्य कस्यचिद् रोगिणः । एतदपि दृश्यते यदस्मिन् ज्वरे अत्यधिका कृशता, दुर्बलता अन्ततो गत्वा केशोत्खातोऽपि सञ्जायते, परन्तु मृत्यु र्न भवति, पुनः स्वस्थीभूय दीर्घजीवितं जीवति मानवः ।

एष च ज्वरः प्रायः शिशुषु समधिकं दृश्यते तेषां श्लेष्मलत्वात्, बाल्ये विवर्द्धते श्लेष्मा इति वचनात् च । वसन्ते च विशेषतः प्रसरति तस्याऽपि श्लेष्मवृद्धिकालत्वात्, दुग्धपानात् च अस्मिन् ज्वरे हानिः भवति तस्याऽपि च श्लेष्मवर्द्धकत्वात्, मोरटश्च लाभकरो भवति दुग्धस्य गुरुत्वादिदोष-रहितत्वात्, लघुत्वात् बलकरत्वात्, रुच्यत्वात् ज्वरजनिततृषाशामकत्वात् च (तत्रा निम्बू-स्फटिकादियोगेन नष्टस्य दुग्धस्य जलीयांशस्य "मोरट" इति संज्ञा (जोकि "फटे या फाडे दूध का पानी कहा जाता है)।

इत्यलमतिविस्तरेण, नातिसंक्षेपविस्तरो हि श्रेयान् इति समाप्यतेऽयं लेखः । ★

कपड़ा खरीदते समय
गणेश बोध चिन्ह
का
अवश्य ध्यान करें
टिकाऊपन के लिए
पुलगांव मिल्स के कपड़े
★ धोतियाँ
★ साड़ियाँ
★ लांग क्लाथ
वगैरह
पुलगांव काटन मिल्स लिमिटेड, बम्बई ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्यप्रतीच्यशल्यसमन्वयः

(ले०—अनन्तराम शर्मा)

केचिद् वदन्ति "क्व चाधुनिकाः शल्यशस्त्रिणः प्रत्यक्षमेव नमस्कुर्वन्तः, क्व च प्राच्या अध्यात्मवादिनः अल्पं हि प्रत्यक्षमनल्पमप्रत्यक्षं मन्यमानाः शल्यकोविदाः", अन्ये स्वीकुर्वन्ति "सामान्याधिकरणं हि तेजस्तिमिरयोः कुतः", एवमेव अपरे 'प्राचिभवस्य प्रतीचिभवेन सह समन्वयः सर्वदासम्भवः' इत्यङ्गीकुर्वन्ति। एते सर्व एव समन्वयसपत्नाः स्वकीयेन सावशेषेणैव शल्यशास्त्रेण सन्तोषमावहन्ति किन्तु समन्वयं 'सङ्करमिति' स्वीकुर्वन्तः सर्वथा अस्वीकुर्वन्ति। अत्रैवैतादृशोऽपि विद्वांसो भिषजो विचरन्ति ये तदेव भैषज्यं मन्यन्ते यदारोग्याय कल्पते, तन्मतौ स एव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत्, तैश्च हि 'न चैव ह्यस्ति सुतरामायुर्वेदस्य पारमिति' मूलमन्त्रमाराध्यते। ये हि प्रतीच्यशल्य शास्त्रमेव सर्वसाध्यसाधनं अपरञ्चावरमिति मत्वा व्यवहरन्ति तेषां विषये न किमप्यत्र प्रतिपाद्यमस्ति।

एवं विवदत्सु विद्वत्सु अविद्वत्सु च, शुद्धाशुद्धाद्यभिनवाभिधानार्णवनिमज्जत्सु सत्सु किमकर्म किं कर्म इति निर्णेतुं तु कवयोऽपि मोहमाप्नुवंति किमुत मद्विधा अबुधाः। तथापि 'अनुपायात् प्रतिपदं सर्वधर्मेषु मध्यमा' मिति ऋषिकल्पवाग्भटनिर्दिष्टां नीतिमनुसृत्य प्राच्यप्रतीच्यशल्ययोः समन्वय एव श्रेयो न तु कैवल्येन प्राच्ये प्रतीच्ये वेति।

इतिवृत्तविदां विदितमेवैतत् यत् प्राच्यस्य प्रतीच्यस्य च शल्यशास्त्रस्य मूलमेकमेवासीत्। आर्यजातिजनाः पुरा एकस्मादेव स्थानाद् विभिन्नेषु भूभागेषु स्वल्पानल्पसमूहेषु प्रविभज्य विविधा दिशो जग्मुः। ते हि सर्वे गुणगणिनः, कलाकुशलाः, विद्याव्यसनिनो यं यं देशमलं चक्रुस्तत्र तत्रैव तेषां विद्याश्चावर्धन्त। इत्थं हि चिकित्साशास्त्रस्य विशेषेण शल्यशास्त्रस्य विकासो यद्यपि विरुद्धासु दिक्षु प्राच्यप्रतीच्यादिषु जातः तथापि आपाततः पृथक् पृथक् प्रतीयमानं चैतत् मूलत एकमेवेति तत्तच्छास्त्राध्ययनेन स्फुटीभवति। यथैकस्यैव बीजस्य विविधजनपदजलवायुवपितस्य आकृतौ फलाद्युत्पादने च नाधिकं विरूपयता जायते तथैवत्रापि बोद्धव्यम्।

प्रतीच्यस्य च शल्यशास्त्रस्य कथं सम्प्रतिकालीनो महानुत्कर्षोऽपकर्षश्च प्राच्यशल्यशास्त्रस्येत्यप्यत्र विचारणीयं वर्तते। एतत्तु सर्वैरेव प्राचीनैरर्वाचीनैश्च विपश्चिद्भिरेकस्वरेण स्वीकृतं यत् "एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" इति मनोरुक्तिः सर्वांशेन सत्या। तथापि स्वसद्मन्येव भारतीय शल्यशास्त्रस्य शोचनीया दशा कथं जातेति आश्चर्यम्। यद्य विचारकैरनेकानि कारणानि भारतीयशल्यशास्त्रसम्पत्तेरधःपतनस्य प्रतिपादितानि तथापि राजनयिकास्थिरतैव प्रधानो हेतुः प्रतीयते। यदि भारते एवंभूता अस्थिरता नाभवत् तदा भारतीयशल्यशास्त्रं पाश्चात्यशल्यशास्त्राद् शतशः सहस्रशश्चोत्कृष्टतममभवत्। यथा एकस्यैव वृक्षस्य बीजमेकमुर्वरायां वसुंधरायां निपतितं सत् बहुशः पल्लवितं, अनेकशः पुष्पितं बहुधा फलितं च भवति किन्तु तदेव यदि अनुर्वरायामुर्व्यां निपतितं स्यात् तदा तस्य कियान् विकासः संभव इत्येतदत्र न विचारणापेक्षि।

एतावद्वर्णनेन स्पष्टमिदं संजायते यत् 'प्राच्यं प्रतीच्यं च शल्यम्' इति नामद्वये सत्यपि वस्तुतः पुरा शल्यशास्त्रमेकप्रकारकमेवासीत् किन्तु देश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदाद् द्विविधमिव प्रतिभाति। एकमधिकं विकसितमपरञ्चाल्पविकसितमिति प्रकारको भेदस्तु सुस्पष्ट एव।

ये बहवो विबुधा एवं प्रतिपादयन्ति यद् प्राच्यस्यायुर्वेदशल्यशास्त्रस्य त्रिदोषसिद्धान्त आधारभूतसिद्धान्तः सर्वसिद्धः किन्तु न तथाविधः कश्चिदपरः सिद्धान्तः प्रतीच्यशल्यशास्त्रे दृक्पथमायातीति कथं समन्वयः संभवः? अत्र हि विनम्रं विनिवेदयामः तथा सुश्रुतसूत्रमेव सुस्मरणार्थं स्वपक्षसमर्थने प्रमाणभूतञ्चोद्धरामो येन शल्यशास्त्रे प्राच्ये त्रिदोषसिद्धान्तः कायचिकित्सार्णवाद् बहिः शैथिल्यमवाप्तवानिति प्रतीयते तथा हि सुश्रुतः—

"तदेभिरेव शोणितचतुर्थैः संभवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति—सु. सू. २१."

अत्र भानुमत्यां चक्रदत्तः—

"रक्तस्यापि शल्यशास्त्रप्रधानव्रणाधिष्ठानस्य परमार्थतो दूष्यस्यापि हेतुलिंगचिकित्सितविशेषप्रयोजकतया प्राधान्यख्यापनार्थं दोषतुल्यतया संभवादि हेतुत्वं नियमन्नाह—तदेभिरेवेति"।

तत्रैव सुश्रुतः पुनः—

नर्ते देहः कफादस्ति न पित्तान्न च मारुताद्।
शोणितादपि वा नित्यं देह एतैस्तु धार्यते॥

अपि च—

रक्तं जीव इति स्थितिः।

त्रिदोषसिद्धान्तः शल्यशास्त्रे शैथिल्यमगमदिति शक्यते प्रकारान्तरेणापि अवगन्तुम्। निखिल रोगवर्णने सर्वत्रैव वातपित्तकफानां पृथक् पृथक् लक्षणादिकं प्रतिपादितम् किन्तु काण्डभग्ने सन्धिभग्ने च आगन्तुजव्रणवर्णनावसरेऽपि न क्वापि वर्णनाय त्रिदोषसिद्धान्तस्य प्रतिपादनं दृश्यते। यद्यत्र अस्य हेतुरेष वर्तते यत् आगन्तुषु रोगेषु दोषानुबन्धः पश्चादेव भवितुं शक्नोति नातः पूर्वं किन्तु ग्रन्थ्यादयोऽनेका एतादृशो रोगाः सन्ति येषां लक्षणादीनां वर्णनं दोषानुसारं कृत्वापि रक्तजस्य लक्षणादिकं पृथगेव वर्णितम्। अस्मिन्नेव ग्रन्थ्याख्यरोगवर्णने वातस्य, पित्तस्य, कफस्य, रक्तस्य, मेदसश्च लक्षणादिकमुल्लिख्य मूत्रवृद्धेरन्त्रवृद्धेश्च पृथगेव वर्णने कोऽभिप्राय इति कुत्रापि अद्यापि न स्पष्टीभूतः। इत्यत एतदेवावगम्यते यत् शल्यशास्त्रे त्रिदोषसिद्धान्तस्य अपवादोऽपि दृश्यते। एवं शक्यतेऽस्माभिः स्वीकर्तुं यत् प्राच्यप्रतीच्यशल्यसमन्वये एषोऽन्तरायः कृत्रिम एव न पुनर्वास्तविकः।

अविकसितस्य भारतीयशल्यशास्त्रस्य समुद्धाराय प्रतीच्यशल्यशास्त्रेण सहास्य समन्वय एवैकमात्रमुपायः, नान्यः पन्थाः। अनयोः समन्वये कृते सति न केवलमायुर्वेद एव प्राच्यशल्यशास्त्रमेव-उत्कर्षं यास्यत्यपि तु पाश्चात्यवैद्यकशल्यशास्त्रस्यापि श्रेयोवृद्धिर्भविष्यति। भारतीये शल्यशास्त्रे शल्यकर्म सम्बन्धिव्याधीनां वर्गीकरणं, तेषां शल्यकर्मसाध्यासाध्यता, शल्यकर्मणः पूर्वकर्म, प्रधानकर्म, पश्चात्कर्म इत्यात्मकस्त्रिविधो भेदः, शल्यकर्तुः (Surgeon) दाक्ष्याशुक्रियतादि गुणाः, शल्यचिकित्सकाय विशिखानुप्रवेशनानिवार्यता, तस्मै योग्या या अवश्यकर्तव्यता (अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यं कारयेत्—सु. सू. ६) सिद्धो प्रयोगज्ञस्य वैशिष्ट्यं (प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः—सु. सू. ६) शास्त्रबहिष्कृतस्य वधार्हता (यस्तु कर्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः। स सत्सु पूजां नाप्नोति वधं चार्छति राजतः—सु. सू. ८), यन्त्राणां, शस्त्राणां, तेषामुपभेदानां च वर्णनञ्चेत्यादिकं तथैव रीत्या प्रतिपादितं यथा पाश्चात्यवैद्यकशल्यशास्त्रे सम्प्रति दृश्यते। इत्यनेन एतदपि सुस्पष्टं संजायते यद् आयुर्वेदीय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...यशास्त्रमेवैतादृग् सर्वत्र संसारे प्रचलितानां ...विधानां शल्यकर्मसम्बन्धिविद्यानां मध्ये विद्यते ...न शक्यते पाश्चात्यशल्यशास्त्रेण सह प्रति-...र्धा कर्तुम् । भारतीयशल्यशास्त्रमेवास्य शास्त्रस्य ...मोपतरं वर्तते । अस्मिन्नेव तानि सर्वाण्यंकुराणि ...नि यानि वृक्षत्वमापन्नानि पाश्चात्यशल्यशास्त्रे । ...दैव वच्मि यत् एतयोर्द्वयोः शास्त्रयोर्मूलमेकमेव, ...केवलं शाखास्वेवान्तरम् । अतो हि आयुर्वेदीय-...ल्यशास्त्रस्य समुद्धाराय पाश्चात्यशल्यशास्त्रेण ...सह समन्वयोऽनिवार्यः ।

...न्योऽप्यत्र हेतुः । सन्त्येवंभूतानि शतशः ...नानि अस्मच्छल्यशास्त्रे येषामर्थावबोधः ...पाश्चात्यशास्त्राध्ययनं विना न संगच्छते । "रुधिरं ...रुधिरेणैवाप्यायते" चरकोक्तेरस्या यादृशी मनो-...हारिणी, सुबोधिनी, सुकरा सफला च व्याख्या ...पाश्चात्यशल्यशास्त्रसंबन्धिषु पुस्तकेषु उपलभ्यते ...र तादृशी केनापि अकारि अद्यापि* । मूत्रवृद्धि-...चिकित्साप्रसंगे चरकः पठति "विपाट्य विशोध्य ...येच्च" किन्तु 'हाइड्रोसील' इत्यपरनाम्नि ...अस्मिन् रोगे विपाटनादिकं कर्म कया रीत्या सम्प-...न्नां यातीति न शक्यते सम्यक्तयाऽवगन्तुमृते ...पाश्चात्यशल्यशास्त्राध्ययनात् । अतोऽस्मच्छ-...ल्योद्धारार्थं अनेन सह समन्वयः समीचीनः प्रति-...भाति ।

सुश्रुतो हि शारीरस्थाने—"पठति शरीरं सर्वथा ...सर्वं सर्वदा वेद यो भिषक्" । तथा च "शरीरे चैव ...शास्त्रे च दृष्टार्थः स्याद् विशारदः" । किं सम्प्रत्यु-...लभ्यं सौश्रुतं शारीरं सम्पूर्णशल्यकर्मणां कृते ...पर्याप्तम् ? यदि प्रश्नस्यास्योत्तरं निषेधात्मकं तदा ...प्रश्नस्यात्मकमुत्तरं किं भवितव्यम् ? पाश्चात्य-...शल्यशास्त्रे यावत् साहित्यं सम्प्रत्युपलभ्यते तेन सह कृतेन समन्वयेनैव अस्माभिः शक्यते अस्मच्छल्य-शास्त्रस्य न्यूनतां दूरीकर्तुं नान्यथा ।

बद्धोदरनिदाने सुश्रुतः "यस्यान्त्रमन्नैरुपलेपि-भिर्वा बालाश्मभिर्वा सहितैः पृथग्वा । संचीयते यत्र मलः सदोषः क्रमेण नाड्यामिव संकरोति" । इत्यस्य वास्तविकोऽर्थः कः, केन प्रकारेण च बाला-श्मभिः शक्यते अन्त्रावरोधः कर्तुम्, न हि कश्चि-दपि अश्मान्यत्ति, तदा किमर्थं ऋषिभिरेवमुल्लेखः कृतः, सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरुजस्तमाः ? यदि पाठकानां जिज्ञासैव तदा तैः श्लोकस्यास्य वैज्ञानिकी व्याख्या पाश्चात्यशल्यशास्त्रपुस्तकेष्व-वलोकनीया । "रौजएन्ड कारलेस" महोदया व्याख्यायन्ति—

Impacted foreign bodies which may cause intestinal obstruction, are of three types: gall-stones, foreign bodies that have been swallowed, or intestinal concretions (enteroliths).

अपि च—Enteroliths are of three classes: (a) calculi of phosphate of lime or inspissated faeces from around some foreign bodies as a nucleus. (b) Masses of indigestible vegetable material may be matted to-gather with inspissated faeces, mucus etc. (c) Calculi have been found consisting of insoluble mineral salts.

अत्र हि उपलेपि अन्नं कया रीत्या अन्त्रमार्गाव-रोधं करोति, बालाश्मभिः कथमन्त्राण्युपरुध्यन्ते ? इत्यात्मकानां सर्वेषां प्रश्नानां या समीचीना व्याख्या

* सम्पूर्णस्यास्य विषयस्य मया स्वपुस्तके स्वयं प्रकाशिते "शल्य-समन्वयाभिधे" विस्तरेण वर्णनं कृत-...मिति जिज्ञासुभिस्तत्रैवावलोकनीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदाद् द्विविधमिव प्रतिभाति। एकमधिकं विकसितमपरञ्चाल्पविकसितमिति प्रकारको भेदस्तु सुस्पष्ट एव।

ये बहवो विबुधा एवं प्रतिपादयन्ति यद् प्राच्यस्यायुर्वेदशल्यशास्त्रस्य त्रिदोषसिद्धान्त आधारभूतसिद्धान्तः सर्वसिद्धः किन्तु न तथाविधः कश्चिदपरः सिद्धान्तः प्रतीच्यशल्यशास्त्रे दृक्पथमायातीति कथं समन्वयः संभवः? अत्र हि विनम्रं विनिवेदयामः तथा सुश्रुतसूत्रमेव सुस्मरणार्थं स्वपक्षसमर्थने प्रमाणभूतञ्चोद्धरामो येन शल्यशास्त्रे प्राच्ये त्रिदोषसिद्धान्तः कार्यचिकित्सार्णवाद् बहिः शैथिल्यमवाप्नवानिति प्रतीयते तथा हि सुश्रुतः—

"तदेभिरेव शोणितचतुर्थैः संभवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति—सु. सू. २१."

अत्र भानुमत्यां चक्रदत्तः—

"रक्तस्यापि शल्यशास्त्रप्रधानव्रणाधिष्ठानस्य परमार्थतो दूष्यस्यापि हेतुलिंगचिकित्सितविशेषप्रयोजकतया प्राधान्यख्यापनार्थं दोषतुल्यतया संभवादि हेतुत्वं नियमन्नाह—तदेभिरेवेति"।

तत्रैव सुश्रुतः पुनः—

नर्ते देहः कफादस्ति न पित्तान्न च मारुताद्।
शोणितादपि वानित्यं देह एतैस्तु धार्यते॥

अपि च—

रक्तं जीव इति स्थितिः।

त्रिदोषसिद्धान्तः शल्यशास्त्रे शैथिल्यमगमदिति शक्यते प्रकारान्तरेणापि अवगन्तुम्। निखिल रोगवर्णने सर्वत्रैत्र वातपित्तकफानां पृथक् पृथक् लक्षणादिकं प्रतिपादितम् किन्तु काण्डभग्ने सन्धिभग्ने च आगन्तुजव्रणवर्णनावसरेऽपि न क्वापि वर्णनाय त्रिदोषसिद्धान्तस्य प्रतिपादनं दृश्यते। यद्यत्र अस्य हेतुरेष वर्तते यत् आगन्तुषु रोगेषु दोषानुबन्धः पश्चादेव भवितुं शक्नोति नातः पूर्वं किन्तु ग्रन्थ्यादयोऽनेका एतादृशो रोगाः सन्ति येषां लक्षणादीनां वर्णनं दोषानुसारं कृत्वापि रक्तजस्य लक्षणादिकं पृथगेव वर्णितम्। अस्मिन्नेव ग्रन्थ्याख्यरोगवर्णने वातस्य, पित्तस्य, कफस्य, रक्तस्य, मेदसश्च लक्षणादिकमुल्लिख्य मूत्रवृद्धेरन्त्रवृद्धेश्च पृथगेव वर्णने कोऽभिप्राय इति कुत्रापि अद्यापि न स्पष्टीभूतः। इत्यत एतदेवावगम्यते यत् शल्यशास्त्रे त्रिदोषसिद्धान्तस्य अपवादोऽपि दृश्यते। एवं शक्यतेऽस्माभिः स्वीकर्तुं यत् प्राच्यप्रतीच्यशल्यसमन्वये एषोऽन्तरायः कृत्रिम एव न पुनर्वास्तविकः।

अविकसितस्य भारतीयशल्यशास्त्रस्य समुद्धाराय प्रतीच्यशल्यशास्त्रेण सहास्य समन्वय एवैकमात्रमुपायः, नान्यः पन्थाः। अनयोः समन्वये कृते सति न केवलमायुर्वेद एव प्राच्यशल्यशास्त्रमेव-उत्कर्षं यास्यत्यपि तु पाश्चात्यवैद्यकशल्यशास्त्रस्यापि श्रेयोवृद्धिर्भविष्यति। भारतीये शल्यशास्त्रे शल्यकर्म सम्बन्धिव्याधीनां वर्गीकरणं, तेषां शल्यकर्मसाध्यासाध्यता, शल्यकर्मणः पूर्वकर्म, प्रधानकर्म, पश्चात्कर्म इत्यात्मकस्त्रिविधो भेदः, शल्यकस्य (Surgeon) दाक्ष्याशुक्रियतादि गुणाः, शल्यचिकित्सकाय विशिखानुप्रवेशनानिवार्यता, तस्मै योग्या या अवश्यकर्तव्यता (अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्यं कारयेत्—सु. सू. ९) सिद्धौ प्रयोगज्ञस्य वैशिष्ट्यं (प्रयोगज्ञस्य वैद्यस्य सिद्धिर्भवति नित्यशः—सु. सू. ९) शास्त्रबहिष्कृतस्य वधार्हता (यस्तु कर्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः। स सत्सु पूजां नाप्नोति वधं चार्छति राजतः—सु. सू. ८), यन्त्राणां, शस्त्राणां, तेषामुपभेदानां च वर्णनञ्चेत्यादिकं तथैव रीत्या प्रतिपादितं यथा पाश्चात्यवैद्यकशल्यशास्त्रे सम्प्रति दृश्यते। इत्यनेन एतदपि सुस्पष्टं संजायते यद् आयुर्वेदीय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शल्यशास्त्रमेवैतादृग् सर्वत्र संसारे प्रचलितानां विविधानां शल्यकर्मसम्बन्धिविद्यानां मध्ये विद्यते येन शक्यते पाश्चात्यशल्यशास्त्रेण सह प्रतिस्पर्धा कर्तुम्। भारतीयशल्यशास्त्रमेवास्य शास्त्रस्य समीपतरं वर्तते। अस्मिन्नेव तानि सर्वाण्यंकुराणि सन्ति यानि वृक्षत्वमापन्नानि पाश्चात्यशल्यशास्त्रे। तदेव वच्मि यत् एतयोर्द्वयोः शास्त्रयोर्मूलमेकमेव, केवलं शाखास्वेवान्तरम्। अतो हि आयुर्वेदीयशल्यशास्त्रस्य समुद्धाराय पाश्चात्यशल्यशास्त्रेण सह समन्वयोऽनिवार्यः।

अन्योऽप्यत्र हेतुः। सन्त्येवंभूतानि शतशः स्थलानि अस्मच्छल्यशास्त्रे येषामर्थावबोधः पाश्चात्यशास्त्राध्ययनं विना न संगच्छते। "रुधिरं रुधिरेणैवाप्यायते" चरकोक्तेरस्या यादृशी मनोहारिणी, सुबोधिनी, सुकरा सफला च व्याख्या पाश्चात्यशल्यशास्त्रसंबन्धिषु पुस्तकेषु उपलभ्यते न तादृशी केनापि अकारि अद्यापि*। मूत्रवृद्धिचिकित्साप्रसंगे चरकः पठति "विपाट्य विशोध्य सीव्येच्च" किन्तु 'हाइड्रोसील' इत्यपरनाम्नि अस्मिन् रोगे विपाटनादिकं कर्म कया रीत्या सम्पन्नतां यातीति न शक्यते सम्यक्तयाऽवगन्तुमृते पाश्चात्यशल्यशास्त्राध्ययनात्। अतोऽस्मच्छल्योद्धारार्थं अनेन सह समन्वयः समीचीनः प्रतिभाति।

सुश्रुतो हि शारीरस्थाने-"पठति शरीरं सर्वथा सर्वं सर्वदा वेद यो भिषक्"। तथा च "शरीरे चैव शास्त्रे च दृष्टार्थः स्याद् विशारदः"। किं सम्प्रत्युपलब्धं सौश्रुतं शारीरं सम्पूर्णशल्यकर्मणां कृते पर्याप्तम्? यदि प्रश्नस्यास्योत्तरं निषेधात्मकं तदा अस्त्यात्मकमुत्तरं किं भवितव्यम्? पाश्चात्यशल्यशास्त्रे यावत् साहित्यं सम्प्रत्युपलभ्यते तेन सह कृतेन समन्वयेनैव अस्माभिः शक्यते अस्मच्छल्यशास्त्रस्य न्यूनतां दूरीकर्तुं नान्यथा।

बद्धोदरनिदाने सुश्रुतः "यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा सहितैः पृथग्वा। संचीयते यत्र मलः सदोषः क्रमेण नाड्यामिव संकरोति"। इत्यस्य वास्तविकोऽर्थः कः, केन प्रकारेण च बालाश्मभिः शक्यते अन्त्रावरोधः कर्तुम्, न हि कश्चिदपि अश्मान्यत्ति, तदा किमर्थं ऋषिभिरेवमुल्लेखः कृतः, सत्यं वक्ष्यन्ति ते कस्मादसत्यं नीरुजस्तमाः? यदि पाठकानां जिज्ञासैव तदा तैः श्लोकस्यास्य वैज्ञानिकी व्याख्या पाश्चात्यशल्यशास्त्रपुस्तकेष्ववलोकनीया। "रौजएन्ड कारलेस" महोदया व्याख्यायन्ति-

Impacted foreign bodies which may cause intestinal obstruction, are of three types: gall-stones, foreign bodies that have been swallowed, or intestinal concretions (enteroliths).

अपि च—Enteroliths are of three classes: (a) calculi of phosphate of lime or inspissated faeces from around some foreign bodies as a nucleus. (b) Masses of indigestible vegetable material may be matted together with inspissated faeces, mucus etc. (c) Calculi have been found consisting of insoluble mineral salts.

अत्र हि उपलेपि अन्नं कया रीत्या अन्त्रमार्गावरोधं करोति, बालाश्मभिः कथमन्त्राण्युपरुध्यन्ते? इत्यात्मकानां सर्वेषां प्रश्नानां या समीचीना व्याख्या

* सम्पूर्णस्यास्य विषयस्य मया स्वपुस्तके स्वयं प्रकाशिते "शल्य-समन्वयाभिधे" विस्तरेण वर्णनं कृतमिति जिज्ञासुभिस्तत्रैवावलोकनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृता सा नाद्यापि अन्यत्र कुत्रापि दृष्टा । अतोऽत्र हि अस्माकं दृढा आस्था शल्यसमन्वये संजायते ।

चरको हि वृषणस्वेदननिषेधं करोति, अल्पस्वेदनं वेत्युपदिशति (स्वेदयेद् मृदुनैव वा–च. सू) कोऽत्र हेतुरिति न केनापि प्राचीनतमेनापि टीकाकारेण व्यक्तीकृतम् । किमदो मर्मस्थलमित्यतः स्वेदननिषेधः ? किन्तु मर्मस्थलानामपि स्वेदनं श्रूयते संहितासु । शङ्कामिमामुत्तरितुं सम्पन्नटिप्पणमिव पाश्चात्यवैद्यकस्य शल्यशास्त्राध्ययनमेवैकमात्रमुपायः । वृषणस्य प्रजनकर्मणि समर्थाः कोषाएव उष्णतां प्राप्य विनाशतां यान्ति । जन्मसमये केचिज्जना अण्डरहितवृषणकोषवन्तोऽपि दृश्यन्ते । तेषामण्डा उदर एव कुत्रचिद् निरुद्धाः स्थीयन्ते । एतादृशा जनाः प्रजाजनने प्रायेण असमर्था भवन्ति । यतो हि तेषामण्डानां प्रजननसामर्थ्यं उदरपेशीलब्धयोष्णतया क्षीणतां भजते । एवं हि "वृषणौ हृदयं दृष्टिः स्वेदयेन्मृदुनैव वा" इति चरकोक्तेः संगतिर्भवति ।

येषां वृषणौ उष्णताधिक्येन प्रणष्टप्रजननसामर्थ्यौ भवतः तेषु जनेषु शुक्रधातोरुत्पत्तिरपि न जायते अल्पा वा जायते । वृषणशल्यामयवर्णनप्रसंगे 'लव एन्ड बेली' महोदया वर्णयन्ति यत् सर कूपरमहोदयस्य पाश्चात्यजगतः प्रसिद्धस्य दार्शनिकस्य एकः शिष्यो रात्रावुत्थाय येन केन प्रकारेण निजप्राणान् तत्याज । मरणोपरान्तकृतया शवपरीक्षया तस्य द्वावेव वृषणौ वृषणकोषाद् विलुप्तावास्ताम् । यद्यपि प्राणत्यागेन सह रिक्तवृषणकोषस्य कः सबन्ध इति न तत्र स्पष्टीकृतः किन्तु अस्याध्ययनेन अधोलिखितं सौश्रुतं सूत्रं तस्य डल्हणकृता व्याख्या च सुगमतया शक्यते अवगन्तुं । तथा हि—

"शुक्रं धैर्यं च्यवनं प्रीतिं देहबलं हर्षं बीजार्थं चेति—सु. सू. १५" अत्र डल्हणः—

"धैर्यं शौर्यं शूरत्वं, अत एव क्लीबा अधीरा भवन्ति" ।

स शिष्यः—वृषणरहित अत एव शुक्रधातुरहितः तेन हि अधीरो भूत्वा आत्मानं जघान ।

अतो हि संहिताग्रन्थानां क्लिष्टार्थकसूत्रार्थमवगन्तुं प्राच्यप्रतीच्यशल्यसमन्वय एव समर्थः ।

शल्यद्वयस्य समन्वये कृते सति आयुर्वेदीयशल्यशास्त्रमेव समृद्धिं यास्यतीति न समीचीना धारणा, अनेन हि पाश्चात्यशल्यशास्त्रस्याप्युत्कर्षो भविष्यतीति निश्चप्रचम् । यथा—

(i) अश्मरीपीडितानामौषधचिकित्सा—

इति तु सर्वविदितमेव यत् अश्मरीरुग्णानां शल्यकर्म एवैक उपायः । न हि औषधमेकमपि अश्मरीघ्नं ज्ञातमस्ति पाश्चात्यवैद्यके किन्तु प्राच्यशल्यशास्त्रे शतश एतादृशा योगा उल्लिखिताः सन्ति येषामुपयोगेन रोगः समूलं नाशं यातीत्युक्तम् । "त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतम्, अविक्षीरेण सप्ताहमश्मरीभेदनं पिबेत्" सु. चि. ६ । इत्यादि ॥

अर्शसानामपि शस्त्रचिकित्सैव प्रायेण प्रयुज्यते किन्तु चरकः शस्त्रचिकित्सां निन्दति । दृश्यते च प्रत्यक्षं शस्त्रचिकित्सितस्य रोगस्यास्य पुनर्भवः (पुनर्विरोहो रूढानां क्लेदो भ्रंशो गुदस्य तु । मरणं वा भवेच्छीघ्रं शस्त्रक्षाराग्निविभ्रमात् । च. चि. १४) एतदर्थं हि चण्याद्यं घृतं, पिप्पल्याद्यं तैलं, दन्त्यरिष्टः, पिच्छाबस्तिः, सुश्रुतोक्तो भल्लातककल्पश्च (मासे मासे च प्रयोगे वर्षशतं आयुषोऽभिवृद्धिर्भवति ; एवं दशमासानुपयुज्य वर्षसहस्रायुर्भवति- सु. चि. ६) बहुशः साफल्येन प्रयुज्यते ।

(ii) रोगस्य रुग्णस्य च मनसा सह संबंधः—

पुरा कालादेव भारतीयाश्चिकित्सका मनसो महत्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ममन्यन्त रोगापहरणौषधैः सह। पुरातनसाहित्याध्ययनेन प्रतीयते यत् यदि कश्चिद् रुग्णोऽभूत् तदा तदानींतनाश्चिकित्सका रोगिणा किं भुक्तं पीतञ्चेति न तथा रोगहेतुत्वेन स्वोचक्रुः, अपि तु रोगिणो मनसि किमासीत्, किमनेन पापं विचारितं, किञ्च पापकर्म कृतमित्यादि मनोऽवस्थामेव प्राधान्येन विचारितवन्तः।

चरकेण पठितं 'ग्लानि र्न शस्यते तस्य भग्नविश्लेषकृद्धि सा' अर्थात्–यदि भग्न (काण्डभग्न= Fracture, संधिभग्नः Dislocation) पीडितस्य मानसिकी स्थिति र्न स्वस्था तदा सम्यक् स्थापनायां कृतायामपि भग्नस्य पुनर्विमोक्षोऽसंभवो न। अर्शसा सह चिन्तायाः कियान् सम्बन्ध इति सुविदित एव। स्वास्थ्यसंरक्षणायापि प्रसन्नचित्तता न चिरमुपेक्षणीयेति इदानींतनैः प्रतीच्यैश्च चिकित्सकैराब्धं चिन्तयितुम्। कैंसराभिधामयेन शोकाकुलताया अपि संबंध इति मन्यन्तेऽद्याधुनिकाः।

(iii) **वैयक्तिकस्वास्थ्यमहत्त्वम्**–पाश्चात्ये वैद्यके सामूहिकस्वास्थ्यसंरक्षणाय अनेके उपाया विस्तरेण वर्णिताः सन्ति येषामवलम्बने कृते सति वस्तुत अनेके जनपदोध्वंसकरा मरका मरणमवापाः। किन्तु यदा-कदा यत्र-तत्र अल्पानल्पकालाय एवंभूतानां विध्वंसकराणामामयानां आक्रमणं श्रूयत एव। कोटिशो धनव्यये कृतेऽपि कथं नैते रोगा कथावशेषतां नीताः। यतो हि व्यक्तिगतस्वास्थ्यमहत्त्वं न तथा स्वीक्रियते पाश्चात्यचिकित्सकैः यथा प्राच्या भिषजः स्वीकुर्वन्ति। शल्यकर्मसाध्यव्याधिनां विषयेऽपि एतदेव दृश्यते यत् व्यक्तिगतस्वास्थ्यसम्पत्तौ सम्प्राप्तायां सत्याम् अर्शः- प्रभृतिरोगा उत्पन्ना एव न भवन्ति। सूर्योदयात्पूर्वं शय्यात्यागः, प्रभाते परमात्मनःस्मरणं, नित्यकर्म कृत्वैव जलान्न सेवनं, बब्बूलादि हरितनुशाखया प्रत्यहं दन्तधावनं, जिह्वानिर्लेखनं, उषःपानं, भुक्त्वा पादशतं गमनं, "न पापेऽपि पापी स्यात्; आत्मवत्सततं पश्येदपि कीटपिपीलिकान्" इत्याद्युपदेशानामाजीवनं अनुकरणमित्यात्मकैरनेकैरुपायैः स्वच्छहृदयान् रोगा आक्रमन्त्येव न।

(iv) **शल्यामयानां वैशेषिकी चिकित्सा**—

अर्शोऽङ्कुराणां क्षारपातनद्वारा निर्मूलीकरणं (मृदुप्रसृतावगाढान्युच्छ्रितानि क्षारेण—सु. चि. ६); व्रणचिकित्सोक्तेषु षष्ट्युपक्रमेषु त्वग्सवर्णीकरणरोमसंजननादीनां ग्रहणं; भगन्दरचिकित्सायां वर्णितानि विविधानि गोतीर्थकादीनि शस्त्रकर्माणि (गतिमन्विष्य शस्त्रेण छिद्यात्खर्जूरपत्रकम्। चन्द्रार्धं चन्द्रचक्रं च सूचीमुखमवाङ्मुखम्—सु. चि. ८); पर्शुकास्वथभग्नासु तैलपूर्णे कटाहे द्रोण्यां वा शयनं, हनुसंधौ विसंहतौ वातघ्नमधुरैः सर्पिः सिद्धं तस्य च सेवनं; मस्तुलुंग स्रुतौ खादेन्मस्तिष्कानन्यजीविनामित्यस्य उपयोगः, गृध्रसीत्यादि रोगेषु जलौकापातनम्, नाडीव्रणचिकित्सायां क्षारसूत्रप्रयोगः, भग्ने गन्धतैलस्योपयोगिता, अपचीनां निवृत्तये मणिबन्धोपरिष्टाद्दहनम्, इन्द्रलुप्तचिकित्सायां प्रच्छानं गाढं च गुञ्जाकलेपनमेवमादीनि वर्णनानि यदि पाश्चात्यशल्यशास्त्रे सम्मिलितानि समन्वयीकृतानि वा भवेयुस्तदा निश्चयेन तस्य श्रेयोवृद्धिर्भवेत्।

अतः प्राच्यपाश्चात्यशल्यशास्त्रस्य एकमूलतां, सम्मिलितसमृद्धौ निरन्तरायतां, द्वयोः शास्त्रयोः प्रतिपाद्यविषयस्य वर्णनैकरूपतां, आयुर्वेदीयक्लिष्टस्थलानां सम्यगर्थबोधाय पाश्चात्यशल्यशास्त्रसामर्थ्यं तथा बहुभिरायुर्वेदीयवर्णनैः पाश्चात्यशल्यशास्त्रस्य समृद्धिमभिसमीक्ष्य शक्यते अस्माभिः निःसंशयेन वक्तुं यत्—

शल्यशास्त्रप्रकर्षायोभयोः प्राच्यप्रतीच्ययोः।
समन्वय एक एव नान्यः पन्था मतो ध्रुवम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वै० श्रीरामनारायण रचितग्रन्थस्यारोग्यप्रकाशस्य स्वास्थ्यप्रकारणात्

आहारः स्वास्थ्यस्य मूलम्

"अन्नं वै प्राणिनां प्राणाः तदयुक्त्या हिनस्त्यसून् ।" प्राणाः सर्वेषां प्राणिनामति प्रियाः ते चान्ने प्रतिष्ठिताः सन्ति । तदेवान्नं युक्तियुक्तं परिपालकं प्राणानाम्, अयुक्तियुक्तन्तु तदेव प्राणघातकं प्रपद्यते । अतः प्राणरक्षार्थं स्वास्थ्यरक्षार्थञ्चान्नस्य युक्तिः पर्येष्टा भवति ।

अन्नं बहुविधं भवति । तत्र सम्पूर्णमहोऽश्रमभञ्जकानां क्षेत्रीकरणार्थं केदारेषु शीतातपवर्षाव्यूढानां कृषकाणाञ्च रात्रिन्दिवं कठिनं परिश्राम्यतामन्नं, त्यक्तशारीरश्रमाणाञ्च मस्तिष्कव्यापारप्रवणानामन्नमेकविधं समयोगक्षेमकरं स्यादिति प्रेक्षावान् कः स्वीकुर्यात् । किञ्च-परबलनिवर्हणानां मल्लानां न्यायालये जटिलान् विवादग्रन्थीन् सुखं निगमयतां न्यायाधीशानां च शक्तिर्भोजनाभावाद् विलीयते । अहोरात्रोपवासेन भोजनस्य महत्त्वं प्रत्यक्षमायाति । जन्मना त्रिचतुर्भरिण प्रस्थैः परिमितोमनुजो दैर्घ्येण हस्तमात्रमितो यदेकभारतुलितः सार्धत्रयहस्तपरिमितो भवति तदन्नस्यैव माहात्म्यम्-असङ्ख्यकोषाभिनिर्मितमिदमस्माकं शरीरमन्नोत्पन्नकौषिकम् । शारीरेण मानसेन वा येन केनापि श्रमेण ह्यणवो नाम क्षुल्लकावयवा धारया संविलीयन्ते धारया च समुत्पद्यमाना ह्यणुकास्तत्स्थानपूरका भवन्तीति अन्नस्यैवायं महिमा । शरीरं स्वसञ्चालितमेकं यन्त्रं नाम अन्नं च तदर्थमिङ्गालस्य स्थानं प्रपूरयति, यत् प्रज्वलितं सत् शक्तिमौष्ण्यं च सङ्घटयति । एषा शक्तिरेवास्मत्काये कूर्दनोक्रीडनयो विनोदोत्साहयोश्च स्रोतसो मूलम् । यथा दैनिकव्ययादायेऽतिरिक्ते सति तस्य कोषः सुरक्षितः सञ्चीयते यत्समये समयेऽतिरिक्तव्ययावस्थायां कार्यवाहकः सम्पद्यते तथा शरीरमपि दैनिकाहारलब्धातिरिक्तशक्तिं सञ्चिनोति रोगोत्पत्तिपरिहारकाले पूर्वसञ्चितशक्त्यैव कार्यं निर्वाहयति । अतः शरीरमिदमन्नमय-कोषाख्ययाभिहितं वैदिके साहित्ये ।

तदित्थं शरीरस्योपचयः,क्षतेः पूर्त्तिः उष्णीकरणं, शक्तेः सञ्चयश्चेति प्रधानानि कार्याणि आहारस्य सम्मतानि । "सामान्यं वृद्धिकारणम्" इति हि सामान्यलक्षणं सडिण्डिमघोषमुदघुष्यत आयुर्वेदविद्भिर्महर्षिभिः । समानगुणधर्मशालिभिः पदार्थैर्वृद्धिर्जायत इति हि तदर्थः । तस्मादाहारः पूर्वोक्तचतुर्गुण द्रव्यवान् पूर्णः सम्पद्यत इति निर्गलितोऽर्थः येन शरीरमुपचीयेत, तस्य क्षतिः पूर्येत, औष्ण्यं शक्तिश्चोत्पद्येतां सङ्कटकालार्थमतिरिक्तशक्तिश्च सञ्चीयेत ।

तथा च भोज्यपदार्थानामुपरिष्टान्निर्दिष्टा विभागा कर्तुं शक्यन्ते—

१—ते पदार्था येषु शरीरस्य स्नायूनामुपचयकारकतत्वानि भूयांसि उपलभ्यन्ते तत्र द्विदलानि मांसानि च प्राधान्येनाख्यायन्ते । तानि प्रोटीनप्रधानानि द्रव्याणीत्याधुनिकाश्च भिषजः ।

२—ते पदार्था येषूपचायकानि तत्त्वानि मुख्यतो न सन्ति, सन्ति तु औष्ण्यस्य च शक्तेश्चोत्पादकानि तत्त्वानि तत्र तन्दुलशर्कराऽऽलूकानि मुख्यानि तथाविधानि चान्यानि कार्बोहाइड्रेट तत्त्वं तत्र विशेषेणोपलभ्यत इत्याधुनिकै भिषग्भिरभ्युपेयते ।

३—ते पदार्था ये शरीराऽतिरिक्तां शक्तिमुत्पादयन्ति सञ्चिन्वन्ति च ते च स्नेहा इत्याख्यायन्ते । तेषु हैयङ्गवीनं घृतं तैलं वसा चेति नामभिश्चत्वारः स्नेहा अन्तर्भवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततोऽपि जलं खनिजद्रव्याणि चास्माकीन-आहारे विशिष्टं स्थानं प्राप्नुवन्ति । प्रोटीन, कार्बोहाइड्रेट, स्नेहविटामिन्स इत्येवमादिद्रव्याणि साम्प्रतिकभोजनविज्ञानेन सुसूक्ष्मं व्याख्यातानि । मानवशरीरे के के पदार्थाः कियन्मात्रया वर्तन्त इति निर्णीय समानगुणधर्मणां केषां पदार्थानां कियती कियती मात्राऽस्मदाहारे अनिवार्येत्यपि सुनिश्चितम् । एतादृग्भोजनमद्यत्वे सन्तुलित-भोजनशब्देन व्यवह्रियते ।

आधुनिकविज्ञानेन बहुभिः परीक्षणैरिद-मुपयुक्तं ज्ञानमर्जितम्; किन्तु भारतीयं भोजनं तज्ज्ञानप्रभावादद्यावधि सर्वथा अस्पष्टमेवास्ति फलमपि च तस्य सुस्पष्टमेव आहारोऽस्माकं सुपरिवर्तनशून्य एवेति ।

तत्रायं प्रश्न उदेति यदस्माकं देशे सन्तुलितं भोजनमेव न लभ्यते तद्विधभोजनस्य सर्वथा ज्ञानं वा नास्तीति । प्रश्नमिमं वयं भारतीयरीत्या आलोचयिष्यामः ।

भारतीयपद्धतिरनुभवाधीना प्रवर्तते । अनुभवाच्चेदं प्रसिद्धमेवास्ति यत् सन्तुलिताहारस्यापि पाचनं प्रचूषणं सात्म्यीकरणं वा सम्यग् यदि न भवति "तदा तदपार्थमेव केवलमित्येव" न शरीर-स्योपघातकमपि भवति । वरीयसो भोजनस्य उदरप्रवेशमात्रं लाभान्वितं न करोति किन्तु तत्पाचनं प्रचूषणं सात्म्यीकरणं च लाभान्वितं करोति अन्यथा तद्द्रव्यं महानिधिप्रबन्धकहस्तगत-कोटिद्रव्यं स्वत्वाधिकारशून्यमिव भवति । तद-भिलक्ष्यैवास्माकमायुर्वेदो निर्णेति यदाहारस्य श्रेष्ठता साधुपाकेन परिणतरसस्यैव सम्पद्यते ।

मात्राप्रमाणं निर्दिष्टं सुखं यावद्विपच्यते । इति । तदेव सन्तुलितं भोजनं यत्सुखेन जीर्येत इति हि तदर्थः । आहारस्य पाचनप्रचूषणसात्म्यी-करणं केन प्रकारेण साधु भवतीति उपरिष्टाद् विस्तरेण विचारयिष्यामः । इह तु सन्तुलिताहार-मभिप्रेत्य भारतीयभोजनमाचक्ष्महे ।

अस्मद्देशे दैनिकाहारे गोधूमस्य, दाल्यास्तण्डूलानाञ्च प्राधान्यम् । दरिद्राणान्तु भोजने जब्बरवज्रान्ने प्रधाने भवतः तत्र गोधूमजब्बर-वज्रान्नानि करपट्टिकान्नानि भवन्ति, दाल्यां स्नैहिकं-घृतं तैलं वाल्पमात्रयापि त्यक्तं भोजनस्य कोष्ठतासाधनायालम् । ये ओदनमाहरन्ति केवलं ते आहारदृशा हीनभोजना भवन्ति । ओदनं हि प्रचुरसूपोपस्करं भुक्तं सन्तुलिताहारश्रेणिमधि-रोहति कथञ्चित् ।

करपट्टिकादाल्यौ वा दाल्योदनं वा स्याद् उभयत्रापि पोषकं द्रव्यमावश्यकमेवास्ति । पोषक-तत्त्वेषु घृतस्य श्रेष्ठत्वम् । दुग्धं तु अमृतेन समानम् । दुग्धस्यैव रूपान्तरं दधि अस्ति । तत्र पौष्टिका-तत्त्वाद्धिन पाचकरसा अपि भवन्ति उद्धृत-हैयङ्गवीनं दुग्धमुदास्विच्चापि पाचकतत्व-बहुले द्रव्ये भवतः मात्रया तु प्रभूते अपेक्ष्येते । पोषकतत्त्वदृशा मांसस्य मत्स्यानां अण्डानाञ्चोप-योगः साधुः । अस्मद्देशे बहुत्र मत्स्योपस्कारेणौदन-माह्रियते तत्पोषणायालं भवति ।

तथापि भारतीया मांसमत्स्याण्डानि प्रायः परिवर्जयन्ति तदर्थं तद्भोजने घृतदुग्धयोः प्राधान्य-मावश्यकं भवति । आह च "क्षीरघृताभ्यासो रसायनानां श्रेष्ठतमः" इति सोऽयमायुर्वेदीयः सिद्धान्तः । स्वास्थ्यकरभोजनस्यास्मद् देशेऽविच-लोऽयं सिद्धान्तः । अत्र कदापि परिवर्तनं न जातम् । भारतवर्षे यदा घृतदुग्धयोर्न्यूनता नासीत्तदा भारतीयाः सर्वथा स्वस्था उन्नताश्चासन् । अद्यापि घृतदुग्धप्रचुरे क्षेत्रे क्षेत्रान्तरनिवासिभ्यः स्वस्थतराः सन्ति मनुष्याः । विभिन्नप्रान्तेषु पञ्चाप-प्रान्तीयाः श्रेष्ठं भुञ्जते । क्लिन्नोद्वासित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...टस्य गोधूमी करपट्टिका, माषस्य दालिः, घृत-
...योराढ्यता च तेषां भोजने नियता । जल-
...मपेक्ष्य राजपुत्रप्रदेशीया अपि पञ्जाप-
...न्तीयेभ्यः स्वास्थ्ये ह्रसिता न भवन्ति तथापि
...भोजनालाभात् ते पञ्जापप्रान्तीयान् नाप्नुवन्ति ।
...वायुश्रेष्ठभोजनापेक्षया उत्तरप्रदेशो द्वितीयस्थान-
...करोति । अत्रत्यं भोजनं मुखप्रियत्वे तु राजपुत्रीय-
...ञ्जापीयभोजनाद् दूरमतिक्रान्तं भवति तथापि
...घृतदुग्धयोः कृती अपेक्ष्य तस्य पूर्णभोजनेष्ववशक्य-
...स्थानम् । जलवाय्वोस्तुलनायां बिहार-
...प्रान्तः श्रेष्ठोऽपि दरिद्रजनता भूयिष्ठतया श्रेष्ठाहार-
...स्याभावात् जनःस्वास्थ्ये हीनो जायते । तत्रापि
...न्तुलितभोक्तारः संयतं जीवनं यापयितारो
...व्यायामेन वर्तयितारश्च पञ्जापप्रान्तीयेभ्यो-
...न्यूना न भवन्ति, वङ्ग मद्रासामवासिनश्चौदन-
...मात्रोपजीविनो मत्स्यभोजनाधीना दुग्ध-
...पानाभ्यासा वा भवन्ति यद्विना तेषामवृत्तेः ।
...महाराष्ट्रेषु च चायपानतैलाभ्यवहाराभ्यां
...दुग्धभोजनाभिरुचिर्ग्लपितप्राया फलत-
...स्तेषां स्वास्थ्यमपि रोदिति । चायपानेन दुग्धपान-
...चारो यथा ध्वस्तस्तथा नान्यपानेन । तदेवं
...प्रान्तं स्वास्थ्यं भोजनाधीनमिति साधु पश्यामः
...त्र भोजनं घृतदुग्धादिपोषकतत्त्वबहुलं तत्र
...स्वास्थ्यमपि समीचीनं येषां च भोजनं घृत-
...दुग्धादिपोषकतत्त्वैर्यदनुपातने हीनं तेषां
...स्वास्थ्यमपि तदनुपातेन पतितं दृश्यते । स्वास्थ्य-
...आहारशास्त्रविचक्षणाः सर्व एवास्मिन् विषये
...सम्मताः; पोषकतत्त्वप्रधानं भोजनमेव पुष्टिजन-
...नां प्रकृष्टतममिति ।

मांसाद् अण्डेभ्यश्चापि दुग्धाभावः पूरयितुं
...शक्यः तथापि मत्स्यमांसाण्डानि मदनोल्लास-
...कराणि असात्त्विकानि चेति अस्मद्देशीया तानि
...जनाः परिवर्जयन्ति । वैद्यकशास्त्रन्तु अण्डानि
...भोजनविषये दुग्धप्रतिस्पर्धीनि, आमाण्डानि तु

अतिक्षिप्रपाकानि भवन्ति स्वल्पव्ययलभ्यानि । कुक्कुटी-जलकुक्कुटीपालने धनव्यय एव कश्चिन्नानुभूयते । अस्मद्देशे अजाकुक्कुटीजलकुक्कुट्याधारेणैव दरिद्रा मोंहमदीया हरिजनाश्च स्वशरीरस्वास्थ्यमक्षुण्णं स्थापयन्ति । धर्मदृष्ट्या समालोच्यापि महात्मा गांधी स्वनिर्मितायाम् "आरोग्य की कुञ्जी" नाम पुस्तकायाम् "अण्डे सामान्यतः मांसाहार में गिने जाते हैं, मगर दरअसल वे मांस नहीं हैं । आजकल तो अंडे ऐसे तरीके से पैदा किये जाते हैं कि मुर्गी मुर्गे को देखे बिना ही अण्डे देती है । इन अंडों में चूजा (जीव) कभी बनता ही नहीं है । इसलिए जिन्हें दूध पीने में कोई सङ्कोच नहीं है, उन्हें प्रकार के अंडे खाने में भी कोई सङ्कोच नहीं होना चाहिए ।"

आहारे दुग्धस्य तत्कृतीनां च कियती आवश्यकता इत्यपि तेन महात्मना पूर्वोक्तपुस्तिकायां लिखितम्—"मैं शाकाहार का पक्षपाती हूँ । (गांधीजी के मत से दूध शाकाहार नहीं है, प्राणिज भोजन है ।) मगर अनुभव से मुझे यह स्वीकार करना पड़ता है कि दूध और दूध से बनने वाले पदार्थ जैसे मक्खन, दही वगैरह के बिना मनुष्य शरीर पूरी तरह टिक नहीं सकता । मैं १९१७ में सख्त पेचिश का शिकार बना । शरीर हाड-पंजर हो गया । मैंने हठपूर्वक दूध या छाछ लेने से इन्कार किया । शरीर किसी तरह धकता ही नहीं था । जो भी हो, बकरी का दूध तुरन्त आया और मैंने वह लिया । लेते ही मुझ में नया चेतन आया, शरीर में शक्ति आई और मै खाट पर से उठा । इस तरह से और ऐसे अनेक दूसरे अनुभवों से में लाचार होकर दूध का पक्षपाती बना हूँ" ।

दुग्धाद् अण्डेभ्यश्च अनन्तरं पौष्टिकपदार्थेषु घृतस्याति महिमा । घृतं हि वृष्यमायुष्करञ्चास्ति । मस्तिष्ककार्यकाराणाममृतेन तुल्यम् घृताभावो अनुद्धृतस्नेहं दुग्धं, तक्रं चापि तत्पूरकं द्रष्टव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिदिनं घृतस्य पलमात्रभोजनेन शरीरापेक्षितस्नेह-मात्रा पूर्यते।

पौष्टिकेषु द्रव्येषु दालीनामपि विशिष्टं स्थान-मस्ति। दालींषु माष-चणकतुवरिमकुष्ठमसूरराज-माषादीनां दाल्यः प्रोटीनतत्त्वपूर्तिविचारे मांसा-दपि भूयो बलवत्तमा भवन्ति किन्तु तत्कणोपरि एकतन्वी आवृत्तिर्विरूढा भवति या शारीरैः पाचक-रसैरति दुर्जरा भवति तस्मात् दालिकणानां शरीरे पाचनं प्रचूषणं सात्म्यीकरणं च सम्यक् स्यादित्यर्थं दालीनां क्लिन्नतायै चिरमग्नि-संयोगोऽपेक्षितो भवति। प्रचुरवारियुक्ता दाल्यो द्विहोरां यावदग्निपक्वाः सुमन्थनैश्चालोडिताः दधीव मथिताः प्रायोद्रुताः सम्पाद्याः। ताः द्वित्रितोलक-तुलितत्यक्तघृताः करपट्टिकाभिरोदनैश्च भुक्ताः सन्तुलितभोजने सङ्ख्याता भवन्ति।

पौष्टिकभोजने समाख्यातानां दाल्यादीना-मोदने प्रभूतोपयोगः कर्त्तव्यो भवति, यत ओदने पोषकतत्त्वानि अल्पमात्राणि भवन्ति इति। औष्ण्य-प्रधानं तत्। तदपेक्षया ज्वारबज्रान्ने ततोऽपि च गोधूमाः स्वास्थ्याय विशेषोपयुक्ता भवन्ति। अन्नेषु राजा भवति गोधूमः। अत एव देशे प्रदेशेषु च सर्वाधिकमशनं गोधूमस्यैव भवति। तद्गुणाकृष्ट-स्तत्प्रचारो दैनन्दिनमेधमानो विलोक्यते। सप्ताष्ट-होरा मास्तिष्ककार्यव्यापृतानां गोधूमोऽतीवोप-योगी। अस्मद्देशे उत्तरप्रदेशे राजपुत्रप्रदेशे गुर्जर-प्रदेशादिषु च बुद्धिजीविनो गोधूमाहारप्रधाना भवन्ति। रसास्वादपरिवर्तनायैवौदनमश्नन्ति।

औष्ण्योत्पत्तये शक्त्युत्पादनाय यावत् कार्बो-हाइड्रेट तत्त्वमपेक्ष्यते तावद् गोधूमौदनदादिभ्यो लभ्यत एव, शेषन्तु शर्करया पूरणीयम्। तथा चाहारे शर्कराया अपि स्थानं महत्त्वपूर्णमस्ति अद्यत्वे नगरेषूपयुज्यमाना शर्करामात्रा तु हानि-जनन्येव। दुग्धादिषु सर्वशो ग्रहणाद् मिलितायाः शर्करायाः अधिकतस्त्रिचताः कर्षाः प्रत्यहं ग्राह्याः। तत्र मधुनः श्रेष्ठत्वेपि दौर्लभ्यम्। पुराणो गुडो मधुनोऽवरोभवति। गुड़े पीतिमोपेतस्य पदार्थस्य महती उपयोगिताऽस्ति। शर्करायां तदपवृज्यते इति शर्करा गुडाद् गुणतो हीयते। वङ्ग विहाराश्च खर्जूरात्तालाच्च गुडं निर्वर्तयन्ति तदैत्त्वाद् गुडाद् गुणाधिक्यं भवति। तालीयो गुडः सिता च तालीया आतुरेभ्यो ग्लूकोजस्थाने दातुं शक्यते। ग्लूकोज-पदार्थस्य तत्र भूयसी मात्रा प्राप्यते।

आहारे खनिजद्रव्याण्यपि महदुपयोगीनि भवन्ति तेभ्यो रक्तादिधातवः प्रजायन्ते। खनिजानि हि द्रव्याणि पाचनप्रचूषणसात्म्यीकरण-सहायानि भवन्ति। तेषु लवणं प्रधानम्। प्रतिदिन-मध्यर्द्धकार्षिकी खनिजानां द्रव्याणां मात्रा-स्मत्पूर्णाहारपूर्त्यै अपेक्षते। तेष्वर्धपैचवीमात्रालव-णस्य। अन्यानि खनिजद्रव्याणि दालिदुग्धौदनशाक-मांसादिभ्य उपेयानि भवन्ति। लवणन्त्वेतेषु प्रायो न भवतीत्युपरिष्टादपि गृहीतं भवति। मांसाहारि-भ्योऽतिरिक्तं लवणमुपरिष्टादनावश्यकं भवति। मांसे स्वाभाविकी लवणमात्रा प्रचुरोपलभ्यते। शाकाहारिभ्यो दाल्यां शाकेषु गोधूमादिपिष्टचूर्णे च लवणस्य मात्राऽर्धकर्षमितोपरिष्टान्मिश्रणे प्रतिदिन-मपेक्ष्यते एव तदभावाद् बहुविधा रोगाः प्रजायन्ते।

ततोऽतिरिक्ता अपि सूक्ष्मपदार्था बहवो नूतन-परिभाषिता विटामिन्स इत्याख्याताः सन्तुलिताहारे मात्रया अपेक्ष्यन्ते। निरामिषाहारे विटामिन्स-द्रव्याणां मात्रा प्रचुरा उपलभ्यते। सद्यस्केषु शाकेषु फलेषु च विटामिन्स तत्वानि लभ्यन्ते, दुग्धे-चाण्डेष्वपि च पुष्कलानि सन्ति मांसेषु तु तानि ह्रसितानि भवन्ति। मांसाहारस्यैतन्न्यूनतापहाराय तदाहारप्रधानप्रदेशेषु भोजने शाकोपयोगः प्रचा-र्यते। निरामिषाहारेभ्यस्तु भोजने प्रचुरशाका-भ्यवहारो नात्युपयोगी। तत्कृते त्वनग्निपक्वस्य यत्किञ्चित्सद्यस्कशाकस्य हरितशाकीयकल्कस्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपस्य व्यञ्जनादिरूपेणोपयोगो वरीयान्। पलाण्डु-हरितधान्यक, पुदीन, मूलकपत्र, लूनी शराद-पत्राणां कृमिहरवारिधौतानां तिलशः खण्डितानां कल्कीकृतानां वा लवणमिश्रितानां निम्बुक-रसदिग्धानामल्पाल्पहरितमारिचखण्डव्यतिषक्तानां दृषत्पिष्टः कल्क उपयोज्यः भिण्डी, वृन्ताक, कूष्माण्डालाबुगोजिह्विकपुष्पिकाकन्दगोजिह्वका-पत्रगोजिह्वाशोभाञ्जनशाम्बिका- प्रभृतिशाकान्यपि स्वल्पमात्रया रुचिवर्द्धनाय भोज्यानि। फलेषु आमलकानि सूक्ष्मत्वङ्निम्बुकानि चातिश्रेष्ठानि। आहारदृशा रसालान्यपि सूत्तमानि अवशेषाणि तु फलानि अच्छसद्यस्कानि यथालाभमल्पमुपफल-योज्यानि स्वास्थ्याभिवृद्धयै। कर्कटिकोर्वारुकाम-रुदादिफलं तु आममेवोपयोज्यम्। शुष्कफलेषु मेवा-ख्येषु वातादाभोषुकनिकुचाक्षोटराजादनादीनि श्रेष्ठपौष्टिकानि। एषु विटामिन्सतत्वानि अल्प-मात्रयोपलभ्यन्ते। आलुक-शक्करकन्द-कदली-फलादिषु तेषां सर्वथा अभाव एव। एतानि फलानि ओदनतुल्यानि वक्तुं शक्यन्ते किन्तु एतान्यति-निकृष्टानि भवन्ति। कदलीफलं दध्ना दुग्धेन वा भुक्तं भवेद् योगक्षेमौ निर्वोढुम्।

शाकानां फलानां वा स्वास्थ्यमूलत्वेन कल्पना अर्थात् तन्मात्रवर्तनेन स्वस्थशरीरस्य कल्पना त्वति-कल्पनैव। आहारस्य केवलं विटामिन्स तत्वमेव सार इत्येषा कल्पनापि साम्प्रतं केषाञ्चिद् भ्रान्ति-भित्तिमेवाधिक श्रयते। यूरोपीयान्धानुकरणाद् अस्मद्देशवासिबहुचिकित्सकलेखकैर्विटामिन्स-तत्वानि व्यर्थमेव महत्त्वशिखरमारोपितानि। अद्यत्वे विटामिन्सतत्त्वानि भारतीयभाषासु आहार-तत्व-भोजनसार-खाद्यौजःप्रभृतिसमानार्थक-संज्ञाभिरभिधीयन्ते एतन्नामाकर्षणेनास्मद्देशीया बहवो युवानो दिग्भ्रष्टाः सञ्जाताः। ममैकस्य भ्रातु-ष्पुत्रस्योदरं पाचने विषमामभ्युपेतमवस्थाम्। स कस्माच्चिदपि पुस्तकात् एरण्डकर्कटीमौदर-रोगाणां रामबाणमौषधमित्युपेयिवान्, तेन सः पक्ष-मेकमेरण्डकर्कट्यं वोत्स्विन्नयाऽवर्तयत्। तद्गृहीत-वृत्तान्त एवाहं तमन्नमाशयम् किन्तु तदात्वे एरण्ड-कर्कट्याः प्रभावेणस्यौदर्यो जातवेदाः अतिमात्र-मग्लासीत् एकादशवर्षाणि व्यतीतानि तस्य पाचकं पित्तमद्यावधि प्रक्षोणमेव चलति। तादृग्भि-र्बह्वीभिरहं बाढं परिचितोऽस्मि घटनाभिर्याभिर्वि-चालितानां यूनां बहवो मूलकपत्रैरेव केवलैः गृञ्जन-दलैर्वा अद्वितीयैः पालकीपत्रैरेव वोत्स्वन्तैनैरास्वि-नैवात्मनो वृत्तिं कल्पयन्ति पृथक् पृथक्। पयोऽन्नं त्र भोजनेऽतिह्रासवन्ति सर्वथा वा परित्यजन्ति मासान्। फलतः शरीरमस्थिचर्मावशिष्टं प्राकृत-चिकित्सकेभ्योऽर्पयन्ति। प्राकृत चिकित्सका अपि जीवतिक्ति (विटामिन्स) दृढभक्ता भवन्ति तेषां चिकित्सितं विपरीतं भवति स्वास्थ्यं च गर्त्तोन्मुखं भवति।

विटामिन्सतत्वानि निरर्थकानि सर्वथा महिम्नो भ्रष्टानीति ममाभिप्रायो नास्ति। अहमपि तानि स्वास्थ्यकृदाहारस्यावश्यकाङ्गत्वेनाङ्गी-करोमि। फलाहारस्यास्मद्देशे चिरकालान्महत्त्वं स्वीकरोति। रोगनिवारणाय फलाहारस्य श्रेष्ठ्यं मन्यन्ते अहन्तु विटामिन्सतत्वानि बलपुष्टिकरा-णीति जनमानसे प्रसृतां भ्रान्तिमुत्सारयामि। विटामिन्सवटिका चर्वणात् पत्रपुष्पफलाहाराद्वारा प्रमल्लताप्राप्तेः स्वप्नादुन्निद्रिता भवन्त्विस्येता-वद्वाञ्छामि। अन्यथा त्रिवेदः कश्चिदात्मने चतु-र्वेदत्वमाकाङ्क्षमाणस्त्रिवेदत्वमपि व्यपाहारयदि-त्याभाणकं सत्यापयितुमेवायमायतिः इत्येतावद् ब्रवीमि। घृतदुग्धान्नप्रधाना एव बलपुष्टिकरा भवन्ति आहाराः। मैथिलाः कर्मकराः प्रतिदिनं केवलं पादोनप्रस्थसक्त्वाहारेण द्वादशमासान् गमयन्तोऽपि आहितसार्धद्विमनभारबोरान् उच्चा-वचं स्थानं नयन्ति। परतो विटामिन्सतत्वाहारा-नपि पश्यत तद्दृष्ट्या मैथिलकर्मकराणान्तु जीवन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लीलैव विरता स्यात् यतः पत्रपुष्पफलेषु एकमपि तेन दुष्प्रापम्। पादोनप्रस्थसक्तूस्ते बाढमाहरन्ति।

'वेजिटेरियन्' शब्दो युरोपदेशवासिभिः कस्मिन् अर्थे प्रयुज्यत इत्यपि अस्माभिर्विचिन्त्य द्रष्टव्यम्। युरोपीयाः कन्दमूलफलाशनामेव वेजीटेरियन् व्याहरन्तीत्येव नाभिमन्तव्यं यावदन्नाहारा नपि ते 'वेजोटेरियन्' इत्येव वदन्ति। मांसप्रधानं तेषां भोजनं भवति। केवलेन मांसेन वर्तयतां प्रायो विष्टब्धा जीर्णं जायते। तत्र शाकाहारो विशिष्य लाभप्रदो भवति अतं एव स्वदेशे ते शाकाहारप्रचारबहुला भवन्ति। वयन्तु केवलं शाकाहाराः स्मः शाकप्रधानं वा भुञ्ज्महे। गोधूमाः ओदनं दालिरिति सर्वः शाकाहारे समाविशति। तथापि केवलपत्रैर्वृ त्ति कल्पयन्तो वयं कति दिनानि जीविष्यामः? मांसं हि चतुःपञ्चहोरा यावद् वह्न्याश्रितं पक्वं भवति तच्चैरण्डकर्कटीनिःक्षेपेण तदर्धकालेनैव परिपच्यते। शाकाहारान् प्रति तु एरण्डकर्कट्यास्तादृशो महिमा नास्ति। मया स्वयं परःसहस्ररुप्यकाणामेरण्डकर्कटी भुक्ता किन्तूल्लेखनीयः कोऽपि लाभो न जातः। अस्मद्देशे तु पाश्चात्यदेशविपरीतः प्रचार आवश्यकः अर्थात् घृतं पयो मासं मत्स्या अण्डानि चाहारे प्रचारयितव्यानि तैरेवास्मद्देशवासिनां शरीराणि सुपुष्टानि भविष्यन्ति। अत एवास्मद्देशे घृतदुग्धयोरुत्पादनं वर्द्धयितव्यं तथा प्रचारः कारणीयो यथा घृतदुग्धयोः वृद्धिः स्यात्। साम्प्रतन्तु अन्नमपि बुभुक्षाशान्त्यै न पूर्यते। न्यूनतो न्यूनोऽपि यो व्ययः कर्तुं शक्यते स दुग्धघृतयोरेव कर्तव्यः। पञ्चषाणामाणकानां दुग्धेन शरीरे पुष्टेर्दर्शनं भारवृद्धिश्च नियता स्यात्। फलाहारे व्ययितानान्तु भस्मनि घृतहोमो भवेत् तेन शरीरे पुष्टिः भारे वृद्धिश्च न स्यातामिति भावः।

अन्नस्य दुग्धस्य वा स्वल्पेनापि सहकारेण फलाहारे शक्यते स्थातुम्। उदाहारणार्थम्-आम्राहारेण दुग्धयुक्तेन देहपुष्टिः सम्यक् सञ्जायते। दध्ना भुक्तानि कदलीफलान्यपि शरीरभारवृद्धावतुल्यानि। किन्तु केवलैः कदलीफलैर्न शुभं फलं स्यात् दधि तु केवलमपि शारीरं वर्द्धयेद् भारम्। त्रिप्रस्थान्न्यूनं पयः शरीरस्य सन्तुलितभारसंरक्षणाय नालं किन्तु पलैकमात्रेणापि अन्नेन सम्भुक्तं प्रस्थैकं पयः तत्परिरक्षणे पर्याप्तम्।

सारांशतः—भारते, आहारे वनस्पतीनां प्राधान्यात् शाकाहारः प्रचारवृद्धिन्नापेक्षते। स्नेह एवाहारस्य स्पृहणीयः सारस्तस्यैवास्मदाहारे न्यूनता। तत एवास्माकमायुषोऽनुपातः प्रहीणः सञ्जातः। अस्मत्पूर्वजाः पूर्णस्वस्था दीर्घायुषश्चासन् इत्यस्य तेषामाहारे घृतदुग्धयोः प्राधान्यमेव रहस्यम्। आहारे घृतदुग्धयोः प्राचुर्यात् तेषां शरीरे समुत्पन्नाया जीवनीयशक्तेरक्षयो भण्डारः समचीयत, तद्बलेन तच्छरीरे प्रथमतो व्याधिर्नोदपद्यत उत्पन्नेऽपि व्याधौ त्रिचतुरहोभिर्भेषजं विनैव अर्थात् निजजीवनीयशक्तेः प्रभावादेव नैरुज्यमलभन्त अद्यतना युवान इव द्वित्र्याह्निकेन ज्वरेण क्लिष्टास्ते राजयक्ष्मगृहीता इव वालक्ष्यन्त। ग्रामेषु घृतदुग्धनित्याः श्रमशीलाः कृषका अद्यापि दीर्घायुषो भवन्ति। वयं च बुद्धिजीविनो विटामिन्सतत्त्वाधाराः सन्तो भारतीयभोजनसारं घृतं दुग्धं च विस्मृत्य व्याधिसहनशक्त्यभावात् क्षुद्ररोगाक्रान्ता अपि दुःसाध्यव्याधिगृहीता इव पदे पदे विशिष्टैश्चिकित्सिता अपि स्वसदृशान् बन्धुबान्धवान् रुदतो विहाय असमये कोनाशं शरणमास्महे। कथमपि जोवामश्चेदसाध्यरोगाक्रान्ता विशिष्टभिषगादेशवश्याः केवलेनौषधाधारेण, श्वासप्रश्वासगतीर्धारयामः। सेयं पतितस्य स्वास्थ्यस्य पराकाष्ठा, शरीरे जीवनीयशक्तेर्न्यूनतैवास्या मौलिकं कारणम्। तेन विटामिन्सतत्त्वाहारभ्रममपनीय भारतोयभोजनतत्त्वानि स्वीकृत्यैव तन्मूलकारणमपनेयम्।

अद्यत्वे भारतीय भोजने अन्नमात्राया न्यूनता नास्ति; न्यूनताऽस्ति केवलं पोषकपदार्थानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्नादपि घृतदुग्धयोर्मात्रा परमावश्यकी 'अधिकमन्नमुत्पादयत' अस्य स्थाने सम्प्रति 'अधिकं घृतं समुत्पादयत' इत्यान्दोलनं कर्तव्यम् । स्नेहसाहाय्येन अन्नस्य मात्रा स्वयमेव ह्रसिता स्यात् । पलपरिमितघृतस्य प्रस्थपरिमितस्य दुग्धस्य वा नियतसहयोगेन अन्नस्य विंशत्या तोलैरपि मानवं जीवनं सम्यग् स्वस्थं गच्छति ।

स्वस्थजीवनवर्तनाय घृतं दुग्धं च भोजने परमावश्यकम् । दुग्धं पूर्णाहार इत्यवोचाम । दुग्धाहारमात्रेण जीवनं शक्यते यापयितुम् । अन्येन केवलमेकेन द्रव्येण जीवनयात्रा दुःशका । बालस्य वर्द्धिष्णो देहाभिवृद्धयेऽधिकाधिकमपेक्ष्यते दुग्धम् । अल्पवयस्कस्य बालस्य द्वित्रप्रस्थपरिमितदुग्धस्यापेक्षा भवति । न्यूनतः प्रस्थं तु नितान्तमावश्यकमेव ।

निर्धनता घृतदुग्धप्राप्तौ बाधिकेति लोको मन्यते किन्तु 'सिनेमा, सिगरेट, बीडी, चाय, तेल, स्नो, साबुन, उपन्यास' इत्यवमादिविलाससम्भूत्यां प्रतिनगरं सहस्राधिकानि रूप्यकाणि प्रतिवासरं स्वाहा भवन्ति । विलसन्मणिबन्धघटिका, स्फुरच्चञ्चत्स्वयंभरणलेखनी (फाउण्टेनपेन) क्रयकाले दारिद्य क्व विलीयते । भारते निर्धनतावश्यं नग्नेव क्रीडति किन्तु न्यूनान्न्यूनमपि यद्धनमस्ति तस्यांशोऽपि घृतदुग्धयोर्न वीयते । तच्च तद्विलाससामग्रीव्यये दुरुपयुज्यते । भारते सर्वतः प्रथमं घृतदुग्धयोर्धनव्ययीभावः कर्तव्यः । परमोपयोगि पुस्तकानामपि अवरं स्थानं पयोघृत्याहारात् । दुग्धघृतोपयोज्यस्य प्रस्वेदेनार्जितस्य द्रव्यस्य "उपन्यास की किताबें, सिनेमा बाजार की चाट, कुल्फी, सेंट, पाउडर" एवमादि बाह्यचाकचिक्यप्रदर्शकवस्तुषु व्ययः स्वयमेव स्वपादयोः कुठाराघातेन तुल्यो भवति ।

दुग्धमपि गव्यं पेयम् । भारतवर्षे अद्यावधि सनातनी प्रथा प्रचलति यद् 'गौर्मातेति तद्दुग्धं चामृतमिति ।' सदैव स्वस्थजीवद्वत्साया गोः पयो वर्तनीयम् तत्र धारोष्णं दुग्धं पाने सर्वोत्तमम् । परिमार्जिते पात्रे निर्मलवस्त्राच्छादिते निष्पूतं पयोऽनग्नितप्तमपि पीतमदोषावहं पञ्चदश कला विंशतिः कला वा स्थितशीतं पयस्तु पानात् पूर्वं वह्निशृतं कर्तव्यम् । दुग्धस्य झटिति विकारग्राहित्वात् शीते दोषाणवः सञ्जाता भवन्ति । वह्नौ सकृत् स्विन्नं जीवाणुविलीनं दुग्धं शीतीकृतं पाने अदुष्टं भवति । अधिकोत्स्विन्नं नष्ट गुणं नष्टजलीयांशं गाढं पयो दुर्जरं जायते ।

अद्यत्वे पण्यदुग्धं घृतं च मनःसन्तोषायैव केवलं भवेत् । वस्तुतः पण्यानि द्रव्याणि रोगावहानि भवन्ति, तथापि तानि चायपेयादत्यन्तं वराणि । दुग्धपानार्थं तु गृहे गोरक्षणं विधेयम् । स्वहस्ताभ्यां तद्व्यवसायं श्रमः कर्तव्यः । तेन इह लोके एव गृहे स्वर्ग्यसुखं क्रीडच्छक्यते विलोकयितुम् । इयं कामगवी भवते दुग्धं, दधि, हैयङ्गवीनं, घृतं, तक्रं, छच्छिका, गोमयोपलानि शुद्धानि नित्यं प्रसोष्यति स्वास्थ्यं च वर्षिष्यति । गोरक्षायामसामर्थ्ये अजैव द्वित्राणकव्ययेन पालनीया तत्पालनेनापि एकं प्रस्थं दुग्धस्य सुखेनोपलब्धं स्यात् । तत्राप्यसामर्थ्ये तु कस्माच्चिद् गोपालकात्, गोशालाया वा नित्यक्रीतस्य दुग्धागमस्य प्रबन्धो विधेयः ।

ग्रामेषु उद्धृतस्नेहादुर्वरितस्य छच्छितत्त्वस्य बहिः प्रक्षेप इत्येक एव मार्गोऽवलोक्यते उत्सारित स्नेहस्य पयसोऽप्येवम् किन्तु तद्बहूपयोगिकम्, कदाचिदपि न प्रक्षेप्यम् । मन्दाग्नीनान्तु एतत्सर्वं बहुलाभकरम् । उद्धृतस्नेहे दुग्धे स्नेहांशस्य नाममात्रावशिष्टस्य जरणे यकृतोऽधिक आयासो न जायते । मन्दाग्नीनां शुद्धदुग्धदुष्पचानां पुरुषाणाम् आमाशयसमुत्पन्नाधिकवातानियतानां च पुरुषाणामतीव सुपाच्यं तद्भवति । समुत्सारितसरं दध्यप्येवम् । अत्र तु पौष्टिकद्रव्यापेक्षया पाचकरसाणामाधिक्यं भवति । उष्णजलवायुकाले तु इदमेव विशेषादुप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेते किन्तु सम्प्रति उष्णजलवायुविशिष्टे काले देशेऽपि च जना अत्युष्णञ्चायपेयं पिबन्ति ज्येष्ठ-वैशाखयोर्मध्याह्ने प्रचण्डौष्ण्येऽपि ऋतौ। सर्वथा विपरीतं कार्यमपि प्रचारेण साधयितुं सुशकम्। भारते तस्य चायपानं श्रेष्ठमुदाहरणम्-तदन्यदुदाहरणमतिदुलर्भम्। तादृगेव प्रचारोऽस्माभिर्दुग्धदधिघृतानां कर्तव्यः।

दुग्धाद्दध्नोऽपि चायद्रव्यमिश्रणरहितात् शुद्धस्य घृतस्य प्राप्तिराश्चर्यकरीव जाता। सर्वथा विशुद्धं घृतं तु गृह्यात्, विशुद्धदुग्धात् स्वनेत्रयोः पुरस्तादुद्धृतं घृतमेव विशुद्धं घृतम् शक्यते वक्तुम्। अन्यस्य शुद्धतां शतसहस्रसन्देहा बाधन्ते। धूमशकटीस्थानात् षोडशयोजनान्तरेण विशुद्धग्रामटिका मम जन्मभूस्तत्र वनस्पति (कृत्रिम) घृतं राजनियमात् प्रतिषिद्धप्रवेशम् तत्रापि ग्रामीणा जनाः सम्मिश्रितवनस्पतिदुग्धं दध्ना परिणीय तन्निर्मन्थेनोत्थहैयङ्गवीनजातविक्रीतघृतेन प्रतिवेशिनं छलन्ति। एवं स्थिते नगरनिगमयोर्विशुद्धघृतप्राप्तेः कथैव विदूरमपेता।

तदेवं घृतनाम्ना धनव्यये बुद्धि र्न निहिता विशुद्धघृतदौर्लभ्ये शुद्धतैलस्नेहेन कार्यं कार्यम्। यथा मांसपरित्यागेऽपि तच्छक्तिर्माषैः पूर्यते तद्वत्। यद्यपि सा पूर्तिर्निकृष्टैव घृतस्य तैलेन पूर्तिरपि निकृष्टा भविष्यति, कृत्रिमघृतस्थाने विशुद्धं तैलं लप्स्यत इति श्रेष्ठम्। वनस्पतिघृतनाम्ना यत् तत्त्वं पण्यवीथ्यां प्राप्यते तदपि तैलस्यैव परिणतं रूपम्। तथापि तद्रूपापादने या क्रिया कर्तव्या भवति तया तैलगुणा बहवो विनश्यन्ति अवगुणाश्चोत्पद्यन्ते। घृतरूपेण दर्शनपथमवतीर्णस्य तैलस्य कस्येदं तैलं कियत् पुराणमिति संज्ञानमपि दुर्घटमिभिपद्यते। एतस्य कृत्रिमघृतस्य तावन्तो दोषाः पुर आयाता यद् विशुद्धतैलस्य दुष्प्राप्तौ सत्यां रूक्षशुष्कमशनं कृत्रिमघृताशनाद् विदूराद् वरम्। तैलेषु तिलभवस्नेहस्यैव श्रैष्ठ्यम्। तदभावे सार्षपं तैलं मूंगफलीतैलमपि व्यवहरन्ति। तैलान्यपि मिश्रितापद्रव्याणि प्राप्यन्ते।

अधस्तात् कृतेन विवेचनेन खाद्यावश्यकद्रव्याणां ज्ञानं जायते, तथापि इदं मानवं शरीरं लवणोपहितसक्तुपिण्डेनापि स्वस्थं निर्वोढुं शक्यत इति ज्ञानमावश्यकं अस्य स्वसञ्चालितयन्त्रस्य वैशिष्ट्यमेतत् यद् इदं यथोपलब्धेन येन केनापि द्रव्येण स्वकार्यनिर्वाहाय समर्थम्। लक्षाधिका मनुष्याः केवलं वज्रान्नं ज्वारं वाऽऽधारीकृत्य स्वस्था जीवन्ति निर्धना भारतीयाः। तस्मात् सन्तुलितभोजनमेव स्वास्थ्यस्यैको हेतुरित्यपि न विचारसहम् तदतिरिक्तां स्वस्थजीवनस्य के के हेतव इति यथाप्रसङ्गमुपवर्णयिष्यामः।

आहारसर्वस्वम्

(ले०—वि०गो० साण्डू उपसम्पादक साण्डू त्रैमासिक, बम्बई)

प्राणिनां पुनर्मूलं आहारः बलवर्णौजसां च। आहारं कुर्यात् प्राणसंधारणार्थम्। 'मात्राशी सर्व कालं स्यात्' इत्यादिभिर्वचनैः आहारस्योपयोगिता वर्णिता भवति। आहारशब्दस्य लौकिकोऽर्थः खाद्यपेयविशेषं किंचिद्वस्तु इत्येव व्यवहारे गृह्यते। अयं च रुढार्थः परं शास्त्रे यौगिकोऽपि अर्थो गृह्यते। यौगिकोऽर्थो नाम अवयवशक्तिसहकृतसमुदायशक्त्या अर्थप्रतिपादितत्वं समुदायेनापि व्यज्यमानोऽर्थः गृह्यते। अत्रोदाहरणं परंतपः। परान्शत्रून् तापयति-पीडयति इति परंतपः=अर्जुनः। तथैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रापि आहारशब्दस्य निर्वंचनं क्रियते। आ इत्युपसर्ग पूर्वकात् 'हृ' धातोरिदं रूपम्। तस्यार्थस्तु आ-ह्रीयते-इत्याहारः। आ सकाशात् ह्रीयते नीयते इत्याहारः। अनया व्युत्पत्त्या अर्थो व्यापको भवति। लौकिकार्थस्तु केवलं भक्षणादिकं तदेवापेक्षितम्। अयं तु एकदेशीयः अर्थो यद्वस्तु तदैव गृह्यते। आदानकर्मा प्राणः न केवलं अन्नं कोष्ठे प्रकर्षति अपि तु घ्राणेंद्रियेण गंधं, चक्षुरिंद्रियेण रूपम्, त्वगिंद्रियेण स्पर्शं अपि च श्रोत्रियेन्द्रियेण शब्दं अंतः प्रकर्षति। प्राणवायोः यनि कार्याणि प्रदर्शितानि तत्र 'प्राणोऽत्र सूर्धगः। उरः कंठचरी बुद्धिहृदयेंद्रियचित्तधृक्''। अस्मिन् श्लोके प्राणवायुना इंद्रियाणामपि च मनसः तांस्तान् इंद्रियार्थान् प्रकर्षं कृत्वा अंतः प्रापणं क्रियते। अनेन आहारशब्दस्य व्यापकेनार्थेन शरीरांतर्गतपचनव्यापारे अंतर्निगूढानां व्यापाराणामुद्घाटनं भवति।

"इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम्।
व्यापिनामपि जानीयात् कर्माणि च पृथक् पृथक्॥

अस्मिन् श्लोके अविकृतानां दोषाणां यानि कार्याणि स्थूलत्तया प्रदर्शितानि तान्येव सकलानि सूक्ष्मातिसूक्ष्मशरीरांशेऽपि भवंति इति निश्चीयते।

आदौ तावत् कोष्ठे आहारस्य पचनं कथं भवति तत् पश्यामः। आहारवस्तु मुखे यदा गृह्यते तदा मुखविवरे केचन संस्कारा भवंति। ते च यथा—मुखविवरे पार्श्ववर्तिनः लालापिंडा वर्त्तन्ते। यदन्नं मुखे प्रविशति तदा तेभ्यः पिंडेभ्यः उत्पन्ना सृणिका स्रोतोमार्गेण अन्नसमीपे आगच्छति। तेन अन्नं द्रवीभूतं भवति। अपि च मुखे दंतैः अन्नस्य चर्वणं क्रियते। तेन च अन्नघटकस्य अंशा विदलिता भवंति। चर्वणं यथा च धान्यदलनं क्रियते तथैव रीत्या उर्ध्वदंष्ट्राऽपि अधो दंष्ट्रयोः मध्ये अन्नं चूर्णितं भवति। पश्चात् तच्चूर्णं स्नेहेन एकीभूय प्राणवायुना गलनाड्यां प्रविष्टं आमाशये प्रविशति। आमाशये क्लेदककफेन पुनरपि तस्य द्रावणं क्रियते। येन भाविनि संस्कारे योग्यं भवति। अत्र आहारपरिणामकरा भावा वर्तन्ते। उष्मा वायुः क्लेदः स्नेहः कालः समयोगश्च। क्लेदेन अन्नसंघातः क्लिद्यते। स्नेहेन मार्दवं गच्छति। उष्मा द्रव्यान्तरं करोति नाम पाको भवति। अस्मिन् स्थले आमाशये पांचभौतिकस्य अन्नस्य द्वे भूते वियुक्ते भवतः, ते च पृथ्वी-जले। पचनव्यापारश्चरकोक्तरीत्या वर्णितः स च यथा—

"अन्नं आदानकर्मा यः प्राणः कोष्ठे प्रकर्षति।
तद् द्रवैर्भिन्नसंघातं स्नेहेन मृदुतां गतम्॥
समाने-नावधूतोऽग्निरुदर्यपवनेन तु।
काले भुक्तं समं सम्यक् पचत्यायुर्विवृद्धये॥"
"आदौ षड्रसमप्यन्नं मधूरीभूतमीरयेत्।
फेनीभूतं कफं यातं विदाहादम्लतां गतम्॥
परं तु पच्यमानस्य विदग्धस्याम्लभावता।
आशयात् च्यवमानस्य अच्छपित्तमुदीर्यते।
पक्वाशयं तु प्राप्तस्य शोष्यमाणस्य वह्निना।
परिपिंडितपक्वस्य वायुः स्यात् कटुभावतः॥

एभिः श्लोकैः कोष्ठस्य पचनव्यापारो वर्णितः अयं च स्थूलो व्यापारः अनेनैव व्यापारेण सर्वत्रापि सूक्ष्मसूक्ष्मतमे भागे अस्य व्यापारस्यैव स्वरूपं सूक्ष्मतया वर्तते। अतः प्रथमं तावत् स्थूले स्वरूपव्यापारो यत्र यत्र पित्तव्यापारो भवति। तत्र तत्र सर्वत्रापि स्थूलस्वरूपं यथा वर्त्तते तथैव व्यवस्था भवति। गृहीतादाहारात् दोषाणामुत्पत्तिः अन्नवहस्रोतसे एव भवति इति स्पष्टतया उक्तं वर्तते।

व्यापारश्चं द्विविधः स्थूलः सूक्ष्मश्च। स्थूलः कोष्ठे अन्नवहस्रोतसे भवति, सूक्ष्मश्च सूक्ष्मधातुषु साक्षात् परंपरया च मानसप्रदेशे यथा कोष्ठे पाचकं पित्तं तथा सूक्ष्ममानसदेशे साधकं पित्तं वर्तते। तेन अयमेव हि पचनव्यापारः क्रियते। अत एव हि लोके बुद्धिविशेषेऽपि बहवः प्रकारा दृश्यन्ते। अतो यथा कोष्ठे पचनव्यापारो भवति तथैव मानसप्रदेशेऽपि व्यापारो भवति इति अनुमीयते। स च पुरस्ताद्वक्ष्यामः। ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्र–नेत्रदान--प्रशस्तिः

"तमसो मा ज्योतिर्गमय"

—उपनिषत्

गर्भस्था विवशा रुदन्ति तमसो ज्योतिर्नयास्मान् प्रभो !
तज्ज्योतिर्बहिरेत्य नेत्रयुगलैर्द्रष्टुं भवन्ति क्षमाः ।
नेत्राभ्यां रहिताः सदैव तमसि प्रेता यथा दुःखिता–
स्तस्मान्नेत्रमिदं समस्तवपुषि श्रेष्ठं बुधैर्मन्यते ॥१॥

इन्दुः स्निग्धकरः सहस्रकिरणो विद्युत्प्रभा निर्मला
विश्वेऽस्मिन् बहुरम्यवस्तुनिचयं प्रोद्भासयन्त्योऽनिशम् ।
नेत्राभ्यां रहितस्य किञ्चिदपि न प्रोद्भासयन्ति प्रभा-
स्तस्मादन्धजनः सदैव तमसि स्थित्वा सदा दुःखितः ॥२॥

प्राज्यं राज्यमथो सुरम्यभवनं वस्त्राणि रम्याणि च
भार्या रूपवती सुरम्यतनयाश्चित्रं मनोमोहनम् ।
ये चान्ये भुवि सन्ति रूपबहुला अन्धो न तान् पश्यति
तस्मादन्धजनान्न सन्ति भुवने भाग्येन हीना जनाः ॥३॥

न हि जीवितदानाद्धि
दानमन्यद्विशिष्यते ।
नेत्रदानं ततः किञ्चि-
देव न्यूनं प्रकथ्यते ॥४॥

—श्री उपेन्द्रनाथदासः, देहली ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वास्थ्यसंरक्षणोपायाः

(ले०—श्रीचन्द्रभानुशास्त्री, श्रीवैद्यनाथ-आयुर्वेद-भवनं, झांसी)

तच्च नित्यं प्रकुर्वीत स्वास्थ्यं येनानुवर्तते ।
अजातानां विकाराणामनुत्पत्तिकरञ्च यत् ।

ननु आयुर्वेदो यदि चिकित्साशास्त्रमात्रम् तदा व्याधिगृहीतानामेवोपकारकं तत् न तु स्वस्थेभ्योऽपि; एवञ्च यत्किञ्चिज्जनहितसाधकं स्यान्न सर्वजनोपकारकम्, इति प्राप्ते—

उच्यते—आयुर्वेदशास्त्रं न चिकित्साशास्त्रमात्रम्। चिकित्सा तु आयुर्वेदस्य एकदेशः। एतत् शास्त्रम्-स्वस्थातुरपरायणम् आतुराणां व्याधिप्रतीकारमुपदिशति स्वस्थेभ्यश्च स्वास्थ्यरक्षणोपायान्—मातृवच्च, पितृवच्च, गुरुवच्च, आचार्यवच्च, बन्धुवच्च, बान्धववच्चोपदिशत् अशेषजनोपकारकं शास्त्रं वेदितव्यम्। स्वास्थ्यरक्षणोपायान् कांस्कानुपदिशतीति किञ्चिदिह प्रस्तूयते। तत्र ऋतुचर्या, दिन-रात्रिचर्या रोगिचर्या स्वस्थचर्येति सङ्ग्रहेण। स्वस्थचर्या स्वास्थ्यरक्षणाय। स्वस्थचर्या आयुर्वेदे नास्तीति अज्ञानाज्जनो मन्यते तन्निरासाय आयुर्वेदीयस्वास्थ्यप्रकरणात् स्वस्थचर्येह अंशेनोद्धरामः—

ब्राह्मे मुहूर्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ॥१॥

अर्कन्यग्रोधखदिरकरञ्जककुभादिजम् ।
प्रातर्भुक्त्वा च मृद्वग्रं कषायकटुतिक्तकम् ॥२॥

कनीन्यग्रसमस्थूलं प्रगुणं द्वादशाङ्गुलम् ।
भक्षयेद्दन्तपवनं दन्तमांसान्यबाधयन् ॥३॥

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत् ।
चक्षुस्तेजोमयं तस्य विशेषात् श्लेष्मतो भयम् ॥४॥

योजयेत्सप्तरात्रेऽस्मात्स्रावणार्थं रसाञ्जनम् ।
ततो नावनगण्डूषधूमताम्बूलभाग्भवेत् ॥५॥

अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा ।
दृष्टिप्रसादपुष्ट्यायुः स्वप्नसुत्वक्त्वदार्ढ्यकृत् ॥६॥

शिरःश्रवणपादेषु तं विशेषेण शीलयेत् ।
व्यायामनित्यो मेधावी भवेन्नियमतत्परः ॥७॥

लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः ।
विभक्तघनगात्रत्वं व्यायामादुपजायते ॥८॥

अर्धशक्त्या निषेवेत बलिभिः स्निग्धभोजिभिः ।
शीतकाले वसन्ते च मन्दमेव ततोऽन्यदा ॥९॥

तं कृत्वाऽनुसुखं देहं मर्दयेच्च समन्ततः ।
उद्वर्तनं कफहरं मेदसः प्रविलायनम् ॥१०॥

स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम् ।
दीपनं वृष्यमायुष्यं स्नानमूर्जा बलप्रदम् ॥११॥

कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित् ।
उष्णाम्बुनाधः कायस्य परिषेको बलावहः ॥१२॥

तेनैव तूत्तमाङ्गस्य बलहृत्क्लेशचक्षुषाम् ।
जीर्णे हितं मितं चाद्यान्न वेगानीरयेद्बलात् ॥१३॥

न वेगितोऽन्यकार्यः स्यान्नाजित्वासाध्यमामयम् ।
न वेगान् धारयेद्धीमान् जातान्मूत्रपुरीषयोः ॥१४॥

न रेतसो न वातस्य न छर्द्याः क्षवथोर्न च ।
नोद्गारस्य न जृम्भाया निःश्वासस्य श्रमेण च॥१५

इमांस्तु धारयेद्वेगान् हितार्थी प्रेत्य चेह च ।
साहसानामशस्तानां मनोवाक्कायकर्मणाम् ॥१६॥

लोभशोकभयक्रोधमानवेगान् विधारयेत् ।
नैर्लज्ज्येर्ष्यातिरागाणामभिध्यायाश्च बुद्धिमान्॥१७॥

परुषस्यातिमात्रस्य सूचकस्यानृतस्य च ।
वाक्यस्याकालयुक्तस्य धारयेद्वेगमुत्थितम् ॥१८॥

देहप्रवृत्तिर्या काचिद् विद्यते परपीडया ।
स्त्रीभोगस्तेयहिंसाद्या तस्या वेगान् विधारयेत्॥१९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यशब्दो विपाप्मत्वान्मनोवाक्कायकर्मणाम् ।
धर्मार्थकामान् पुरुषःसुखी भुङ्क्ते चिनोति च ॥२०॥

आहाराचारचेष्टासु सुखार्थी प्रेत्य चेह च ।
परं प्रयत्नामातिष्ठेद् बुद्धिमान् हितसेवने ॥२१॥

देहवृत्तौ यथाऽऽहारस्तथा स्वप्नः सुखो मतः ।
स्वप्नाहारसमुत्थे च स्वास्थ्यास्वास्थ्ये विशेषतः॥२२

आहारस्वप्नव्यायामान् ब्रह्मचर्यं यथाविधि ।
सेवते यो नरः स्वस्थः शतं सोऽब्दानि जीवति ॥२३॥

यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः ।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः ॥२४॥

निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीबता मानमज्ञानं जीवितं न च । ॥२५॥

अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी पराकुर्यात् कालरात्रिरिवापरा । ॥२६॥

सैव युक्ता पुनर्युंक्ते निद्रा देहं सुखायुषा ।
पुरुषं योगिनं सिद्धया सत्या बुद्धिरिवागता । ॥२७॥

ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात् प्रकुप्यतः ।
श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते ॥२८॥

ग्रीष्मे त्वादानरूक्षाणां वर्द्धमाने च मारुते ।
रात्रीणाञ्चाति सङ्क्षेपाद्दिवास्वप्नः प्रशस्यते ॥२९॥

एवं प्रातर्जागरणादारभ्य रात्रौ शयनान्तानि स्वस्थवृत्तानि सङ्क्षेपेणोद्धतानि ऋतुचर्याध्याये ऋतुकालमपेक्ष्य यानि विहितानि देशोत्पत्तिप्रचारावपेक्ष्य यानि सात्म्यासात्म्यापेक्षया देशविशेषं संल्लक्ष्योक्तानि तेषामशेषेणोदाहरणे तु एकः स्वतन्त्रो ग्रन्थः संगृहीतो भवेत् तत्सर्वालोचनेन आचरणेन च मनुष्यः सदा स्वस्थः शतं वर्षाणि जीवेदिति असन्दिग्धं वचः । अद्यत्वे स्वस्थजीवनगतिर्व्याधिमहागर्तैर्यत्र पदे-पदे निरोधमायाति तत्र आयुर्वेदीयस्वस्थवृत्तापवर्ग्येण रोगाणामितोऽपि बलीयस्त्वे का गतिः स्याज्जीवनस्येति विचिन्त्य-

उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु ।
भविष्यतीत्येव मनः कृत्वा संयतमात्मनि ॥

आयुर्वेदशास्त्रोपदिष्टधर्माचारणम् (सद्वृत्तम्)

(ले०—वैद्य श्री ऋषिदेवः सोलंकी, भिषगाचार्यः, निरीक्षकः, आयुर्वेदविभागः, जोधपुरम्)

सर्वेषां सांसारिकमनुष्याणां सुखप्राप्त्यर्थं स्वाभाविकी अभिलाषा भवत्येव । तत्र किं नाम सुखमिति न्यायशास्त्रमते—आत्मनोऽनुकूलवेदनीयं सुखं, प्रतिकूलवेदनीयं दुःखमिति अर्थात् याभिः क्रियाभिः किं वा पदार्थैर्मानवो सुखमनुभवति ता सर्वा अपि सुखसंज्ञकम् । अनेन भिन्नभिन्नव्यक्तिषु भिन्नभिन्नस्वरूपात्मकं सुखं भवत्येवेति संभाव्यते । किन्तु सामूहिकरूपेण आचार्यायत्सुखं प्रवदन्ति, तत्तु आयुर्वेदशास्त्रानुसारेण--आरोग्य-शब्देन व्यवह्रियते । यथा हि चरके—सुखसंज्ञकमारोग्यं विकारो दुःखमेव च—इति । अत्रापि आत्यन्तिकैकान्तिकसुखप्राप्तिस्तु योगावस्थायां किंवा मोक्षावस्थायामेव संजायते । यथा हि उक्तं चरकेण—योगे मोक्षे च सर्वासां वेदनानामवर्तनम्—इति । तथापि सांसारिकजीवने यैः कारणैः सुखस्योपब्लिधर्भवति, तैस्तु केवलं धर्ममूला एव सर्वाः प्रवृत्तयः सन्ति । यथा हि कौटिल्यसूत्रे—सुखस्य मूलं धर्मः—इति सर्वप्रथमसूत्रे आचार्येण कथितम् ।

आयुर्वेदशास्त्रानुसारेण अत्र धर्मो नाम—सद्वृत्तम्—सदाचार इत्यर्थः । तस्यैव अस्मिन्निबन्धे किंचित् समासेन वर्णनं विधीयते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शारीरकस्वास्थ्यसंरक्षाणार्थं स्वस्थवृत्तस्य विवेचनं प्रायः सर्वेषु ग्रन्थेषु विशदरूपेण अस्त्येव, अत्रापि दिनचर्या-रात्रिचर्या-ऋतुचर्यादीनां वर्णनं पाठका अन्यनिबन्धेषु पठिष्यन्त्येव । तासां चर्याणामनुपालनेन शरीरे दोषाणां वातपित्त-कफानां, धातूनां रसरक्तादीनां किंचाग्नेः साम्या-वस्था संजायते, तेन च शारीरकरूपेण मनुष्यो स्वस्थतामनुभवति, किन्तु तत्रापि पूर्णस्वस्थता तु यदा हि-आत्मेन्द्रियमनसां प्रसन्नावस्था तु रज-स्तमोभ्यां निवृत्ते किंच सत्त्वगुणोदये एव संभवति, यतो हि रजस्तमसी द्वौ मनोदोषौ स्तः, तयो निवार-णार्थं सद्वृत्तस्यानुपालनमावश्यकम् । यथा हि चरके तस्मादात्महितं चिकीर्षता सर्वेण सर्वं सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयम्— अस्यानुपालनेन पूर्णारोग्यलाभः किञ्च जितेन्द्रियता भवति ।

चरकमतानुसारेण सद्वृत्तमित्थं, तद्यथा— देवगोब्राह्मणगुरुमातापित्रतिथिवृद्ध (विद्यावय-बल-एवं पदवृद्ध) सिद्धतपस्व्याचार्यानर्चयेत् । प्रातःसायं यज्ञमुपाचरेत् । औषधीः प्रशस्ता धारयेत् । यथा ऋतु द्वौ कालौ उपस्पृशेत् । मलायनेष्वभीक्ष्णं पादयोश्च वैमल्यमादध्यात् । त्रिःपक्षस्य किंच वर्तमानसमये तृतीयदिने केशश्मश्रुलोमनखान् संहारयेत् । नित्यमनुपहतवासाः, सुमनाः, सुगन्धिः, स्यात् । समयोचितसाधुवेशः, प्रसाधितकेशः मूर्ध-श्रोत्रघ्राणपादतैलनित्यो, गृहागतः किंवा सम्मुखे प्राप्तः पूर्वाभिभाषी कुशलक्षेमपृच्छकः स्यात् । प्रसन्नवदनः दुर्गेष्वभ्युपपत्ता, अतिथीनां पूजकः, समयप्राप्ते हितमित-मधुरार्थवादी, जितात्मा, धर्मात्मा, उन्नतिहेतावीर्ष्युः स्वयमपि तस्मिन् मार्गे अग्रेसरः स्यात्, न तु फले ईर्ष्युः । निश्चिन्तः निर्भीकः धीमान्, आहारे व्यवहारे त्यक्तलज्जो-भवेत्, अन्यत्र लज्जाशीलः महत्त्वाकांक्षी (महत्त्वा-कांक्षया विना सत्कार्येष्वपि प्रवृत्तिर्न भवति) महोत्साही, लौकिककार्येषु दक्षः, सर्वप्राणिषु दयालु-भावः, कुपितेष्वपि स्वकीयमृदुस्वभावानुरूपकरणे दक्षः, भीतानामाश्वासयिता, दीनानामभ्युपपत्ता, सत्यसन्धः, सामप्रधानः, धीरः, यथा हि—विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः— एतादृशः धीरः परपुरुषवचनसहिष्णुः क्रोधरहितः, प्रशमगुणदर्शी, रागद्वेषहेतूनां हन्ता च ।

नानृतं ब्रूयात्, नान्यस्वमाददीत, नान्यस्त्रियम-भिलषेत्, न चान्यश्रियम् । न वैरं रोचयेत, न कुर्या-त्पापं (पापं हि परपीडनं), न पापेऽपि पापी स्यात्, नान्यदोषान् ब्रूयात्, नान्यरहस्यमागमयेत्, नाधामि-कैर्नराज्यद्विष्टैः सहासीत् तथा न मैत्रीं कुर्यात्, नोच्चैर्हसेत्, न शब्दवन्तं मारुतं मुंचेत्, नासंवृतमुखो जृम्भाक्षवथुं हास्यं वा प्रवर्तयेत् । न नासिकां कुष्णियात्, न दन्तान्, विघट्टयेत् । न नखान् वाद-येत्, नास्थीन्यभिहन्यात्, न भूमौ विलिखेत्, न छिन्द्यात्तृणम् । न पापवृत्तान् स्त्रीमित्रभृत्यान् भजेत्, न विगुणमंगैश्चेष्टेत, न हुंकुर्याच्छवम्, नोत्तमै-र्विरुद्ध्येत् । नावरानुपासीत, नानार्यमाश्रयेत् । न भयमुत्पादयेत्, नाविगतक्लमोना नाप्लुतवदनो न नग्नशुपस्पृशेत् न स्नानशाट्या स्पृशेदुत्तमांगम् ।

भोजनमपि पितृभ्यो नादत्त्वा गुरुभ्यो नातिथि-भ्यो नोपाश्रितेभ्यो नापुण्यगन्धेनाप्रक्षालितपाणि-पादवदनो नाशुद्धमुखो न विमना नाभक्ताशिष्टा-शुचिक्षुधितपरिचरो, नापात्रीष्वमेध्यासु, नादेशे नाकाले न प्रतिकूलोपहितमन्नमाददीत ।

न स्त्रियमवजानीत, नातिविश्रम्भयेत्, न गुह्यमनुश्रावयेत्, नाधिकुर्यात्, न सतो न गुरून् परिवदेत्, न सन्ध्यासु अभ्यवहाराध्ययनस्त्रीस्वप्न सेवी स्यात्, न बालवृद्धलुब्धमूर्खक्लिष्टक्लीबैः सह सख्यं कुर्यात् । नैकः सुखी, न दुःखशीलाचारोपचारः न सर्वविश्रम्भी, न सर्वाभिशंकी, न सर्वकाल-विचारी । न कार्यकालमतिपातयेत्, प्रकृतिमभीक्ष्णं स्मरेत् । नापवादमनुस्मरेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपर्युक्तसद्वृत्तस्य स्मरणं यदि प्रतिक्षणं स्यात्तर्हि तु मानवो कदापि शारीरिक-मानसिक-रोगग्रस्तो नैव स्यात्। आधुनिकपाश्चात्य-अमेरिका-योरोपनिवासिनो जनास्तु—केवलमर्थमेव समग्र-सुखस्य एकैमात्रकारणं मन्यन्ते, तत्र तु अर्थस्या-भावो नैव विद्यते। अनेकानि वैज्ञानिकानि उपकर-णानि तत्र सन्ति। भौतिकरूपेण ते सर्वसाधन-सम्पन्नाः सन्ति तथापि तेषां कृते न पूर्णं सुखं विद्यते। तथा च अनेकमहारोगग्रस्ताः सन्ति यथा—रक्तचापवृद्धिः (हाईब्लडप्रेशर) उन्माद, अपस्मार, हृद्रोग, पक्षाघात, रक्तार्बुद (कैंसर) प्रभृतयः। अतः यदि उपर्युक्तसद्वृत्तानु-सारि तेषां जीवनं स्यात्तर्हि तु निश्चयेन सुखस्या-वाप्तिर्भवेत्।

अस्मिन्नेव प्रसंगे निम्नलिखितानि शास्त्रीय-पद्यानि सन्ति तेषां स्मरणं किंच अनुपालनं सर्वदैव कुर्यात्:—

आर्द्रसन्तानतात्यागः कायवाक्चेतसां दमः,
स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सद्व्रतम्।
नक्तं दिनानि मे यान्ति कथम्भूतस्य सम्प्रति,
दुःखभाङ् न भवत्येवं नित्यं सन्निहितस्मृतिः।
त्यागः प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः,
देशकालात्मविज्ञानं सद्वृत्तस्यानुसेवनम्।
आगन्तुनामनुत्पत्तावेष मार्गो निर्दशितः,
प्राज्ञः प्रागेव तत्कुर्यात् हितं विद्यात् यदात्मनः।
आप्तोपदेशविज्ञानं प्रतिपतिश्च कारणम्,
विकारानामनुत्पतौ उत्पन्नानां च शान्तये।
पापवृत्तवचः सत्वा स्वका कलहप्रियाः,
मर्मोपहासिनो लुब्धाः परवृद्धिद्विषः शठाः।
परापवादरतयश्चपलारिपुसेविनः,
निर्घृणास्त्यक्तधर्माणः परिवर्ज्या नराधमाः।
बुद्धिविद्यावयःशीलधैर्यस्मृतिसमाधिभिः,
वृद्धोपसेविनो वृद्धा स्वभावज्ञा गतव्यथाः।
सुमुखा सर्वभूतानां प्रशान्ताः संशितव्रताः,
सेव्याः सन्मार्गवक्तारः पुण्यश्रवणदर्शनाः।
तदात्वे चानुबन्धे च यस्य स्यादशुभं फलम्,
कर्मणस्तन्न कर्तव्यमेतद् बुद्धिमतां मतम्।
इत्याचारः समासेन यं प्राप्नोति समाचरन्,
आयुरारोग्यमैश्वर्ययशोलोकांश्च शाश्वतान्।

स्वास्थ्य-सुधा:—

स्थौल्यं प्राकृतिक-सौन्दर्यं नास्ति

(ले०—आयुर्वेदाचार्यः श्रीराजकुमारः 'गोयल')

स्थौल्यं नाम कीदृशो दुःखदायको दुःसाध्यो घृणितश्च रोगः ? येन ग्रस्तो जनः स्वजीवने कदा अपि प्रगतिं कर्तुं न शक्नोति, स्वस्थूलकायं स भारस्वरूपं मन्यते। स्थूलकायो जनः न सम्यक् प्रकारेण क्रीडितुं शक्नोति, धावितुं वा तथा भोजनशयनादौ अपि पर्याप्तां कठिनतामनुभवति। स्थूलकायाः अल्पायुष एव, विविधभयंकररोग-पीडिताश्च बोभूयन्ते। प्रायः स्थूला पुरुषा नपुंसकाः तथा स्थूलस्त्रियो वन्ध्या भवन्ति। तथा एते हृदयावसादस्य कारणाद् अकस्मात् मृत्युं लभन्ते। ईदृशात् कष्टदायकरोगात् मुक्ति-प्राप्तये प्राकृतिकचिकित्सां विहाय अन्या कापि चिकित्सापद्धतिः न सफला। शतशो जनैः प्रथमं आयुर्वेदीया ऐलोपैथीया वा चिकित्सा कारिता किन्तु कोऽपि लाभो न संजातः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थौल्यस्य कारणानि—

अयं रोगो मेदोवृद्धेः कारणाद् भवति । ये सज्जनाः बुभुक्षायां अत्यधिकं भुञ्जते, वित्त बुभुक्षया वा भुञ्जते तेषां शरीरे शुद्धरक्तस्य अपेक्षया वसा अत्यधिकं वर्धते । ये जनाः गरिष्ठं, स्निग्धं आहारं कुर्वन्ति परन्तु परिश्रमं न कुर्वन्ति तेषां वसा दिने दिने द्विगुणा चतुर्गुणा भवति । इयमेव च वसा तेषां आयुः, स्वास्थ्यं, सौन्दर्यं, अन्यान्यपि शारीरिक-सुखानि च नाशयति । अस्या एव कारणाद् एषां जीवनं नीरसं भारस्वरूपं च भवति ।

उपचारः—

लङ्घनं

लङ्घनं द्विविधं भवति, लघु दीर्घञ्च । लघु लङ्घनं एकस्मात् दिनात् एकसप्ताहपर्यन्तं; एवं दीर्घलङ्घनं एक-सप्ताहात् त्रिचतुःसप्ताहपर्यन्तं भवति । लघुरोगेषु तु लघु-लङ्घनं कर्तव्यं, महा रोगेषु च दीर्घ-लङ्घनम् । ज्वरातिसार-कोष्ठबद्धता-जीर्णशिरोवेदनाऽरुचि – प्रतिश्याय – दन्तरोगादिषु लघु-लङ्घनं एव पर्याप्तं भवति; किन्तु दीर्घरोगेषु स्थौल्यक्षयार्शग्रहणीभगन्दरश्वासपक्षाघातामवातादिषु दीर्घ-लङ्घनमेव कर्तव्यम् । एषु रोगेषु लघु-लङ्घनात् तावान् लाभो न भवति, यावान् दीर्घ-लङ्घनेभ्यो भवति । अतः स्थूलकायैः दीर्घ-लङ्घनं कर्तव्यम् । लङ्घनस्य दिनेषु स्वच्छ-शीतल-जलपानं अतीव लाभप्रदं भवति । स्वच्छवायोः सेवमावश्यकमस्ति । यदि काऽपि कठिनता दृष्टिगोचरा स्यात् तदा शीतलस्थाने विश्रामः कर्तव्यः । उपवास-भंग-समये भोजनादेः व्यवस्थायां पर्याप्ता सावधानता व्यवहर्तव्या । उपवासभंगाद-नन्तरं द्रव पदार्था एव सेवनीयाः । तेष्वपि च मधुराम्लफलानां रस एव सर्वोत्तमः । नारंगक-टमाटर-अनन्नासादीनां रस एव प्रारम्भे सेवनीयः । एषः पूर्वंयाल्पमात्रायां एव ग्रहणीयः । येन अंगानि स्वस्वक्रियां समीचीनतया कर्तुं शक्नुयुः । कतिपयानि दिनानि रसानां उपयोगं कृत्वा पश्चाद् भोजनं करणीयं यत् साधारणं स्वच्छं अल्पमात्र-कञ्च भवेत् ।

वस्तिः

वस्तिः मलशुद्धये अतीव उपयोगि यन्त्रमस्ति । यदि जनः प्रतिसप्ताहं उपयोगं कुर्यात् तदा सः सर्वेभ्योऽपि रोगेभ्यो विमुक्तो बलवान् तेजस्वी च भवेत् । वस्तिक्रिया प्रातःकाले एव श्रेष्ठा मन्यते, वस्तिक्रियायाः करणात् सर्वं सञ्चितं मलं बहिः निःसरति तथा अन्त्रणां प्रक्रिया सुचारुरूपेण प्रवर्तते । यदि जनः देशस्य समाजस्य, परिवारस्य स्वस्य च कल्याणं वाञ्छति तदा स लघु, अल्पञ्च भोजनं कुर्यात्, यतः लघ्वल्पाहारो जन एव स्वस्थः, सुगठितः, स्फूर्त्तिशाली परिश्रमशीलश्च भवति । तथा यस्मिन् एते गुणा भवन्ति स एव अग्रे उन्नतिं कर्तुं शक्नोति ।

व्यायामः—

मनुष्यस्य जीवनयात्रार्थं यथा भोजनपान-शौचदिकमावश्यकमस्ति तथैव व्यायामोऽपि । व्यायामाद् भुक्तं पीतं च सम्यक् जीर्यति । वसा न वर्धते । असामयिकी निर्बलता, आलस्यं वार्धक्यं न जायते । अतो मनुष्यस्य दैनिकजीवनं स्वस्थं प्रसादनैरुज्यार्थं, व्यायामस्य महत्त्वं न्यूनं नास्ति ।

आतपः—

आतपसेवनं दैनिकजीवने अतीव उपयोगी भवति । आतपसेवनाद् हि (विटामिन् D) पौष्टिक तत्त्वस्य प्राप्तिर्भवति ।

शुद्धवायुसेवनाद् रक्तस्य शुद्धिर्भवति । एवं हृदये मस्तिष्के च स्फूर्तिः संजायते । वसां नाश-यित्वा शरीरं प्राकृतिकीमवस्थां प्राप्नोति ।

उपरि लिखितानां सर्वासमपि क्रियाणां सम्पादनात् पूर्व-संचिता वसा नश्यति अग्रे च वसा न वर्धते, तथा शरीरं स्वस्थं, प्रसन्नं, सुसंहतं सुन्दरञ्च जायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृच्छूल में मृगश्रृंग का उपयोग

(ले० पं० श्री सोमदेव शर्मा सारस्वत साहित्यायुर्वेदाचार्य, एम० ए०, ए० एम० एस०
प्रिंसिपल गवर्नमेण्ट आयुर्वेदिक कालेज रायपुर (म० प्र०)

वैदिक काल से ही हृद्रोग (हृच्छूल) में मृगश्रृंग का उपयोग होता आया है। आयुर्वेद के आधारभूत अथर्ववेद के निम्नलिखित मंत्रों में मृगश्रृंग द्वारा हृद्रोग (हृच्छूल) नष्ट करने का स्पष्ट निर्देश मिलता है—

१—हरिणस्य रघुष्यदोऽधिशीर्षणि भेषजम् ।
स क्षेत्रियं विषाणया विषूचीनमनीनशत् ।।
(अथर्ववेद काण्ड ३ सूक्त ७।१)

अर्थ—तीव्र गति वाले हरिण के शिर में औषधि है। वह हरिण अपने शिर के सींग (मृगश्रृंग) से रोगी के क्षेत्रिय रोग अर्थात् हृदय में माता-पिता से प्राप्त अथवा जन्म से हुए हृदय के रोग (हृच्छूल) को नष्ट कर देता है ।।

२—अनु त्वा हरिणो वृषा पद्भिश्चतुर्भिरक्रमीत् ।
विषाणे विष्य गुष्पितं यदस्य क्षेत्रियं हृदि ।।
(अथर्ववेद, काण्ड ३, सूक्त ७।२)

अर्थ—हे हरिण के सींग तेरे गुणों के अनुसार तेरे प्रभाव को दिखलाता हुआ बलवान हरिण चारों पैरों से चलता है। इस रोगी के हृदय में जो क्षेत्रिय रोग (माता पिता से प्राप्त अथवा जन्म से उत्पन्न हुआ रोग) अर्थात् हृद्रोग (हृच्छूल) है उसको तू नष्ट कर दे।

उपर्युक्त दोनों मंत्रों में हृद्रोग (हृच्छूल) को नष्ट करने के लिये मृगश्रृंग का उपयोग किये जाने का उल्लेख मिलता है। अत्यन्त प्राचीनकाल में हृद्रोग से हृच्छूल (हृदय में होने वाले शूल) ही समझा जाता था। क्योंकि उस समय आज की भाँति हृदय के विविध प्रकार के रोगों की जानकारी नहीं हो पाई थी।

यद्यपि मुनिवर चरक, सुश्रुत, कश्यप, भेल तथा आचार्य वाग्भट द्वारा रचित संहिताओं में हृद्रोग (हृच्छूल) में मृगश्रृंग का उपयोग नहीं मिलता है क्योंकि उनमें प्रधानतया वनस्पतियों के पत्ते, फल, फूल, डाल, जड़ और निर्यास तथा दूध आदि का ही औषधि के रूप में प्रयोग हुआ है, तथापि पश्चात्कालीन आयुर्वेदिक संग्रह-ग्रन्थों में से नवम शताब्दी में विद्वद्वर श्री माहुक द्वारा विरचित प्राकृत भाषा के 'हरमेखला' नाम के ग्रन्थ में सर्वप्रथम 'हृच्छूल' में मृगश्रृंग के उपयोग का स्पष्ट निर्देश मिलता है, जैसा कि उसके प्राकृत भाषा के पद्य के रूपान्तरस्वरूप संस्कृत भाषा के निम्नलिखित पद्य से ज्ञात होता है—

दग्धमनिर्गतधूममृगश्रृंगं गोघृतेन सह पीतम्।
हृदयपृष्ठवर्ति शूलं हरति शिखी दारुनिवहमिव ॥

(हरमेखला, चतुर्थ परिच्छेद, श्लोक १६६)

इसका आशय यह है अन्तर्धूम विधि से जलाकर भस्म किये गए हरिण के सींग को गोघृत के साथ सेवन करने से वह हृदय के शूल तथा पीठ के शूल को उसी प्रकार शीघ्र दूर कर देता है जिस प्रकार अग्नि लकड़ियों के ढ़ेर को जलाकर शीघ्र नष्ट कर देती है।

मृगश्रृंग के उपर्युक्त पद्य में निर्दिष्ट हृच्छूल नाशक गुण का अनुमोदन आयुर्वेदिक चिकित्सा के सुप्रसिद्ध ग्रन्थ बंगसेन, चक्रदत तथा शार्गंधर संहिता के निम्नलिखित श्लोकों से भी होता है—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१—पुटदग्धं हरिणशृंगं पिष्टं गव्येन सर्पिषा पिबतः।
हृत्पृष्ठशूलमचिरादपैति शान्तिं सुकष्टमपि ॥
(बंगसेन, हृद्रोगधिकार श्लोक ४८)

२—पुटदग्धमश्मपिष्टं हरिणविषाणंतु सर्पिषा पिबतः
हृत्पृष्ठशूलमुपशममुपयात्यचिरेण कष्टमपि ॥
(चक्रदत्त हृद्रोगाधिकार श्लोक १७)

३—शरावसम्पुटे दग्धं शृगं हरिणजं पिबेत् ।
गव्येन सर्पिषा युक्तं हृच्छूलं नाशयेद्ध्रुवम् ॥
(शार्गंधरसंहिता, मध्यमखंड, अ० १, श्लोके ४३) ।

इन उपर्युक्त तीनों श्लोकों से ज्ञात होता है कि मृगश्रृंग की पुटपाक द्वारा बनाई गई भस्म को गो-घृत के साथ पीस कर चाटने से भयंकर हृच्छूल (हृदय का शूल) निश्चित रूप से नष्ट हो जाता है।

भस्म बनाने के लिये ग्राह्य मृगश्रृंग—

मृगश्रृंग की भस्म बनाने के लिये युवा बारहसिंगा का भारी, मजबूत और अनेक शाखाओं से युक्त बड़ा सींग लेना चाहिये, किन्तु कीड़ों द्वारा खाया हुआ, खोखला तथा हलका सींग कभी भी नहीं लेना चाहिये ।

मृगश्रृंग भस्म की निर्माण विधि—

१—उत्तम मृगश्रृंग को सर्वप्रथम एक स्वच्छ कपड़े से रगड़ कर साफ करके आरी से काट कर छोटे-छोटे टुकड़े बना लेना चाहिये और फिर उनको शराव संपुट में बन्द कर गजपुट में रखकर अग्नि देकर भस्म बना लें। यदि सींग का कोई टुकड़ा काला या कच्चा रह जाय तो फिर उसको शराव संपुट में बंद कर गजपुट में फूंक देना चाहिये। गुणवृद्धि की दृष्टि से जले हुए सींग के टुकड़ों को अर्कदुग्ध से भावना देकर तथा टिकिया बनाकर धूप में सुखा दें और फिर शराव संपुट में बंद कर तीन बार गजपुट में रख कर फूंक देने से श्वेत-वर्ण की उत्तम श्रृंगभस्म बन जाती है।

यदि अर्क दुग्ध न मिले तो बारहसिंगे के टुकड़ों के वजन से चार गुने अर्कपत्रों को कूटकर लुगदी बना ले और फिर इसमें से आधी लुगदी मिट्टी के शराव य हाँडी में रख कर ऊपर से बारहसिंगा के छोटे-छोटे टुकड़ों को रख दें और उनके ऊपर शेष आधी अर्कपत्रों की लुगदी रखकर शराव से ढक मुख सन्धि बंद कर धूप में सुखाकर गजपुट में रख कर फूँक देने से श्वेत-वर्ण की श्रृंगभस्म बन जाती है। यदि कुछ टुकड़े काले रह गये हों तो उनको खरल में पीस अर्कपत्र स्वरस से मर्दन कर टिकिया बना धूप में सुखा कर शराव संपुट में बंद कर गजपुट में रखकर फूंक देने से श्रृंगभस्म बन जाती है। इस विधि से अर्कदुग्ध या अर्कपत्र स्वरस के योग से बनाई हुई श्रृंगभस्म उग्रवीर्य होती है।

२—घृतकुमारी का गूदा बारहसिंगा के छोटे-छोटे टुकड़ों के नीचे तथा ऊपर रखकर और शराव सम्पुट में बंद कर गजपुट में रखकर अग्नि दें तो दो या तीन पुट देने से श्वेत-वर्ण की श्रृंगभस्म बन जाती है, यह सौम्य होती है। ज्ञातव्य—शार्गंधर संहिता में पुटपाक के प्रकरण में पुटपाक विधि से मृगश्रृंग को जलाने का उल्लेख है तथा उसकी दीपिका व्याख्या के रचयिता श्री आढमल्ल ने श्लोक में आये हुए दग्ध शब्द का अर्थ पुटपाक विधि से दग्ध (दग्धमिति पुटपाक युक्त्येत्यर्थः), अर्थ लिखा है। इसी प्रकार चक्रदत्त के प्रसिद्ध टीकाकार श्री शिवदास सेन भी पुटदग्धा शब्द का अर्थ 'हरिश्रृंगं कुशेन संवेष्ट्य मृदा प्रलिप्य च गोमयाग्नौ निर्धूमागारे वां दग्ध्वा' अर्थात् पुटपाक विधि से हरिण के सींग के टुकड़ों को कुशों से लपेट कर तथा ऊपर से मिट्टी का लेप कर और धूप में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखाकर जंगली उपलों के धूम रहित अङ्गारों की अग्नि से भस्म करना लिखा है। इससे यह ज्ञात होता है शिवदास सेन के समय तक पुटपाक विधि से शृंगभस्म बनायी जाती थी, किन्तु बाद में गजपुट में रखकर अग्नि देकर शृंगभस्म बनाने की प्रथा चल पड़ी और वह ही आज कल प्रचलित है।

मात्रा तथा अनुमान-शृंगभस्म की मात्रा २ रत्ती है इसको गोघृत के साथ मिला कर देने से यह हृदय के शूल, पीठ के शूल और पार्श्व शूल को नष्ट करती है तथा शहद के साथ देने से कफ की खांसी (तर खांसी) और राजयक्ष्मा की खांसी और श्वास रोग को नष्ट करती है।

बारहसींगा के टुकड़े को पानी के साथ पत्थर पर चन्दन की भांति घिसकर गर्म कर के छाती पर लेप करने से वह पार्श्व शूल को नष्ट करती है।

उपयोग :-शृंगभस्म, हृद्य तथा हृच्छूल, पृष्ठ-शूल, पार्श्व शूल, प्लूरिसी निमोनिया, वातश्लेष्म ज्वर ज्वर (ईन्फ्लूंजा) और कफज कास में लाभदायक है।

राजस्थान वित्त-निगम
सभी प्रकार के उद्योगों को
औद्योगिक विकास के लिये
१५ हजार रुपये से १० लाख रुपये तक के ऋण देने में आपकी सहायता करने को सदैव तत्पर है।
(पब्लिक लिमिटेड कम्पनियों तथा रजिस्टर्ड सहकारी समितियों को २० लाख रुपये तक का ऋण दिया जा सकता है)
निगम द्वारा होटल एवं ट्रांसपोर्ट उद्योगों को भी ऋण दिया जाने लगा है।
ऋण के नियम तथा शर्तों के लिये निम्न पते पर मिलिये अथवा लिखिये :—
प्रबन्ध संचालक
राजस्थान वित्त-निगम
"सूर्य निवास"
सी-१८ भगवानदास रोड़,
जयपुर
टेलीफोन नं० तार का पता
प्रबन्ध संचालक—४८३६ "RAJFINCO"
सचिव ,, —३७०८

अनुभूत प्रयोग

(ले० वैद्य श्री राधेश्याम शर्मा आयुर्वेदाचार्य, विशाला, (जयपुर)

१. **नहरुआ** (स्नायुरोग) पर कबूतर की बिष्ठा, पुराना गुड़, दोनों के समभाग गोमूत्र में पीसकर नहरुवा पर कुछ दिन लेप करने से आशातीत लाभ होता है।

२. **रक्तविकार** गंधक, सैंधा नमक, हल्दी, सुहागा, नीला थोथा प्रत्येक को सममात्रा में लेकर बारीक चूर्ण बना कर रखलें। आवश्यकतानुसार गोमूत्र या शुद्ध सरसों के तेल में मिलाकर लगाने या मर्दन करने से दाद, खुजली एवं छाजन आदि शीघ्र नष्ट होते हैं।

३. **अपस्मार** (मृगी) गधे की हड्डी को जला कर भस्म बनालें और ४ रत्ती प्रतिदिन प्रातः सायं सेवन करने से उक्त रोग शीघ्र दूर होता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्त दान

(ले० डा० श्री रामकुमार अग्रवाल, एम० बी० बी० एस० एम० एस०, सिविल एसिसटेंट सर्जन)

आजकल कितने ही प्रकार के दान चल पड़े हैं। एक ओर सन्त विनोबा भावे और उनके साथी गण भूमिदान को लेकर भारत के कोने-कोने का भ्रमण कर रहे हैं, तो दूसरी ओर हमारे नेता गण हम सबसे आये दिन श्रमदान करने की मांग कर रहे हैं। विद्यादान, सम्पत्तिदान, गोदान और कन्यादान तो हम सबके लिये बहुत पुराने हैं जो युगानुयुग से चले आ रहे हैं। गत ५० वर्षों में एक नया दान जो चल पड़ा है वह है रक्तदान। इसका महत्त्व सब प्रकार के दानों से सर्वोपरि है यह वह दान है जो उचित समय पर मिलने न मिलने से रोगी के जीवन-मरण का प्रश्न बन सकता है।

यह बहुत कम मनुष्यों को पता है कि आवश्यकता होने पर वे अपना थोड़ा रक्तदान कर दूसरों के प्राण भी बचा सकते हैं। आये दिन व्यवहार में हम एक दूसरे से कहते सुनते हैं कि हमें एक दूसरे की तन, मन, धन से सहायता करनी चाहिये परन्तु वास्तव में तन और मन से सहायता करने वाले बहुत कम मनुष्य दिखाई देते हैं। तन और मन से सहायता कितने ही प्रकार से की जा सकती है। उनमें एक तरीका अपना रक्तदान भी है। यह दान अपने बीमार भाई-बहिनों के प्रति अटूट सहानुभूति का परिचायक है। वास्तव में देखा जावे तो इस दान के बराबर दूसरा कोई दान नहीं है।

रक्तदान क्या है ?

क्या हम भी रक्त-दान दे सकते हैं? आदि प्रश्नों का उत्तर ढूंढने से पहले हमें मोटे तौर से यह समझना आवश्यक है कि रक्त में क्या-क्या तत्त्व हैं, वह कहां-कहां बनता है, हमारे शरीर में यह कितनी मात्रा में है और एक बार में हम कितना रक्तदान कर सकते हैं।

रक्त क्या है ?

रक्त में दो प्रकार के तत्त्व होते हैं (१) ठोस- (२) तरल। ठोस तत्त्वों में लाल कण, सफेद कण एवं रक्त चक्रिकायें होती हैं। तरल तत्त्व जिसे प्लाजमा कहते हैं जल, लवण, विटामिन, शर्करा, बसा और प्रोटीन का घुलन है। इसमें ठोस तत्त्व तैरते रहते हैं। १८ वर्ष से ६० वर्ष तक की आयु वाले स्त्री, पुरुषों में साधारण तौर पर ५ सेर रक्त होता है। इसका ४५ प्रतिशत भाग ठोस है तथा ५५ प्रतिशत भाग तरल है। हमारे शरीर में रक्त तीन स्थानों पर बनता है। (१) अस्थियों की मज्जा (२) यकृत् (३) तिल्ली श्वेत कण हमारे शरीर के रक्षक हैं जो रोग के कीटाणुओं से लड़कर हमारी रक्षा करते हैं। लाल कणों से हवा के तत्त्वों का आदान-प्रदान होता है। श्वास क्रिया में जो प्राणवायु (ऑक्सीजन) फेंफड़े में जाती है वह इन्हीं लाल कणों के द्वारा शरीर के अन्य भागों में भेजी जाती है और इन्हीं कणों द्वारा शरीर से गन्दी हवा कार्बन-डाई-ऑक्साइड फेफडों तक पहुंचाई जाती है। इस प्रकार इनका दो तरफा कार्य है। अच्छी हवा को अन्दर पहुंचाना और खराब हवा को बाहर निकालना। हमारे शरीर का लाल रंग इन्हीं कणों की संख्या पर निर्भर है।

एक बार में साधारण तौर पर सारे रक्त का १६वां भाग पानी औसतन ५ सेर रक्त में से ५ छटांक रक्त बिना किसी नुकसान के दान दे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकते हैं। इस प्रकार हम एक बार ही नहीं अपितु हर तीसरे महीने रक्तदान देकर रोगी के प्राण बचाने में सहायता कर सकते हैं। हम रक्तदान देवें अथवा नहीं देवें वह तो हर तीसरे महीने टूटता रहता है एवं नया भी बनता रहता है।

रक्त-दान क्या है ?

एक मनुष्य की शिराओं में से एक निश्चित मात्रा में रक्त निकालकर दूसरे मनुष्य को जिसको इसकी आवश्यकता होती है, रक्त दे देने को ही रक्तदान कहते हैं। रक्तदान ठोस एवं तरल तत्त्वों के आधार पर तीन रूपों से दिया जाता है।

प्रथम—ठोस तथा तरल तत्त्वों युक्त पूर्ण रक्त (Whole Blood)

द्वितीय—सिर्फ ठोस तत्त्व (छाने हुए कण) (Packedcalls)

तृतीय—सिर्फ तरल पदार्थ (प्लाजमा) (Plasms)

तरल पदार्थ अधिक समय तक नहीं ठहर सकता इसलिये इसे यंत्रों द्वारा पाउडर में बदल दिया जाता है और आवश्यकता पड़ने पर इसमें जल का अंश मिलाकर रोगी की शिराओं में दे दिया जाता है।

रक्त-दान क्यों ?

हमारे जीवन में अनेक ऐसे अवसर आते हैं जबकि हमें रक्तदान लेना पड़ता है। उचित समय पर रक्तदान नहीं मिलने से रोगी को प्राणों से भी हाथ धोना पड़ता है। रक्तदान निम्नांकित अवसरों पर विशेष तौर पर दिया जाता है—

(क) हम में से अधिकतर मनुष्यों का भोजन संतुलित नहीं होता है। इसलिए बहुतों को रक्त की अल्पता (Anaemia) हो जाती है। यह कभी जब साधारण होती है तो इसके विशेष लक्षण नहीं होते है। अतः हम इसका इलाज भी नहीं कराते हैं। इसका परिणाम यह निकलता है कि धीरे धीरे रक्त की अल्पता बढ़ती जाती है और ऐसी एक स्थिति आ जाती है जबकि रक्त की विशेष कमी हो जाती है और रोगी का जीवन खतरे में पड़ जाता है। ऐसे अवसर पर सिर्फ दवाइयों से काम नहीं चल सकता है। अतः ऐसे रोगियों के प्राण बचाने के लिए सिर्फ रक्तदान अत्यावश्यक हो जाता है।

(ख) बहुत-से मनुष्यों को केन्सर एवं क्षय रोग हो जाता है। अब तक तो इन भयंकर रोगों की कोई विशेष चिकित्सा नहीं होती थी परन्तु मानव के अथक प्रयत्नों से शल्य-चिकित्सा में काफी सुधार हुआ है। नई नई जीवनदायिनी औषधियों की खोज हुई, उन सबके परिणामस्वरूप शरीर के अधिकतर भागों को जिसमें ऐसी बीमारियां होती हैं काटकर शरीर से अलग कर दिया जाता है। इन सब प्रकार के ऑपरेशनों में अधिक समय लगता है और शरीर से काफी मात्रा में रक्त बाहर निकल जाता है जिसकी पूर्ति बाहर से रक्त देकर ही की जा सकती है। यदि इस प्रकार समय पर रक्त नहीं दिया जावे तो रोगी की ऑपरेशन टेबल पर ही मृत्यु हो सकती है।

(ग) स्त्रियों में रक्त-अल्पता विशेष रूप से देखी जाती है। इतना ही नहीं अक्सर प्रसवकाल में अधिक मात्रा में रक्त स्राव हो जाता है जिसके कारण माताओं का जीवन संकट में पड़ जाता है। यदि समय पर उनके शरीर में रक्त दे दिया जावे तो प्राण भी बच सकते हैं।

(घ) यह हम सब जानते हैं कि आज के युग में हमारा दैनिक जीवन कहीं अधिक जटिल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन गया है। आये दिन कितनी ही आकस्मिक दुर्घटनाएं होती हैं। जिनमें कई स्त्री-पुरूष एवं बच्चे घायल हो जाते हैं और उनका जीवन संकट में पड़ जाता है। ऐसे कई अवसरों पर रक्तदान दिये बिना घायल मनुष्यों के प्राण बचाना मुश्किल हो जाता है।

(घ) बवासीर (Piles) अन्त्रक्रृमि, (Intestianl worm) पैतृक रक्त स्राव (Haemophelia) आदि रोगों में भी कई बार रक्त-दान देना पड़ता है।

(ङ) वर्तमान समय में जबकि चीन हिमालय को लांघ कर भारतवर्ष को झड़पने का प्रयत्न कर रहा है, रक्त-दान अपना एक विशेष महत्व रखता है। युद्ध में घायल सैनिकों की प्राणरक्षा के लिए देश के चोटी के नेताओं ने रक्तदान के लिए बार बार आग्रह किया हैं।

इस प्रकार हमें पता चलता है कि रोगियों को जीवनदान देने वाली औषधियों में रक्तदान अपना एक महत्त्वपूर्ण स्थान रखता है। यह वह औषधि हैं **जो मानव शरीर से ही बनकर तैयार हो सकती है**। रक्तदान में किसी प्रकार का कोई खतरा नहीं है। रक्तदान के बाद किसी भी प्रकार की कमजोरी अथवा बेहोशी नहीं आती है और अपना दैनिक कार्य बिना किसी कष्ट के कर सकते हैं। आम जनता का यह भ्रम है कि रक्तदान के बाद मनुष्य कमजोर हो जाता है, यह कतई सत्य नहीं है।

रक्तदाता कौन ?

१८ वर्ष से लेकर ६० वर्ष तक के स्त्री-पुरुष साधारणतौर पर रक्तदाता बन सकते हैं। उनको सुविधा के अनुसार ४ श्रेणियों में विभक्त कर सकते हैं—

(क) वे मनुष्य जो बीमार के रिश्तेदार होने के नाते रक्तदान देने को सहमत होते हैं।

(ख) वे मनुष्य जो रोगी के रिश्तेदार नहीं हैं परन्तु उसके साथ सहानुभूति रखते हैं। इस प्रकार के मनुष्य यदि चाहें तो अपना रक्त निःशुल्क भी दे सकते हैं। अथवा ५ छटांक रक्त देने पर एक निश्चित राशि (२० से लेकर ५०) रुपये तक प्राप्त करने के अधिकारी भी बन सकते हैं। इन रुपयों का प्रबन्ध रोगी को अथवा उनके रिश्तेदारों को करना पड़ता है। यदि दोनों ही यह रकम देने में असमर्थ हैं तो रोगी के प्राण बचाने हेतु आवश्यकता होने पर अस्पताल अपने दानकोष (Donation Fund) में से यह रुपये दे देता है। अस्पताल दानकोष में वृद्धि करना भी अप्रत्यक्ष रूप से रक्तदान देने में सहयोग देना ही है।

(ग) जेल के कैदी रक्तदान के उपलक्ष में इन्हें विशेष आहार-सुविधा और कैद की अवधि में कटौती देने का नियम हैं।

(घ) वे मनुष्य जिनकी जीविका का अधिकतर भाग रक्तदान देकर प्राप्त होने वाली आमदनी पर ही निर्भर करता है उनको **व्यावसायिक रक्तदाता** कहते हैं (Professional Donor)। इनमें अधिकतर तैलगू, तामिलनाड और मद्रास प्रान्त के रहने वाले होते हैं। इनका काम जगह जगह घूमकर रक्तदान देकर जीविका कमाना है। रक्तकोष का अधिकतर काम इन्हीं लोगों से चलता है। इस वर्ग में अधिकतर बेरोजगार साधु और भिक्षुक आदि हैं। इनका भी ५ छटांक रक्त ३ महीने के अन्तर से ही लिया जाता है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तकोष का योगदान :

रक्तदान देने से पहले प्रत्येक रक्त-दाता को अपनी निम्नाङ्कित जांच करवानी आवश्यक होती है।

(क) अपने रक्त वर्ग (Blood Group) का पता लगाना।

(ख) अपने रक्त की मात्रा एवं गुण का पता लगाना।

(ग) ऐसी बीमारियों का पता लगाना जो रक्त के द्वारा दूसरों को हो सकती हैं।

यह सब काम अस्पताल के एक विभाग में होता है जिसको **रक्तकोष** अथवा **रक्त भंडार** कहते हैं। ऐसा विभाग भारतवर्ष के ही नहीं बल्कि संसार के मुख्य मुख्य सभी अस्पतालों में पाया जाता है। प्रत्येक रक्तकोष को बहुत बड़ी जिम्मेदारियां होती हैं जैसे रक्तदाता की अच्छी प्रकार जांच करना, उसका सफाई के साथ रक्त इकट्ठा करना, रोगी के रक्त वर्ग का पता लगाना और उससे सही तरीके से इसका मिलान करना, रोगी को रक्त देने से कोई प्रतिक्रिया न हो इसके लिए पूरी सावधानी रखना और रक्तदाता से लिये हुए रक्त को किसी प्रकार से खराब नहीं होने देना आदि।

रोगी को रक्त उसी अवस्था में दिया जाता है जब कि दिया जाने वाला रक्त रोगी के रक्त में सुरक्षित रूप से मिल जाता है और उसके कारण उसके शरीर में कोई प्रतिक्रिया होने की संभावना नहीं हो। इस कार्य में तनिक भी भूल होने से वह रक्त जो मनुष्यों को जीवनदान दे सकता है, उनके जीवन को समाप्त करने का कारण भी बन सकता है।

रक्तदान देने-लेने की विधि

योग्य रक्तदाता को एक टेबुल पर लिटा दिया जाता है और उसके एक बाजू पर रक्तचाप यन्त्र इस प्रकार लगा दिया जाता है कि बाजू से रक्त तो नीचे उतरता रहे परन्तु शिराओं में वापिस नहीं लौट पाये। इसके पश्चात् कुहनी के पास की शिरा में एक सूई लगा दी जाती है जिसमें लगी रबर की नली द्वारा रक्त एक बोतल में इकट्ठा होता रहता है। इस बोतल में ग्लुकोज (Glucose) और सोडियम साइट्रेट (Sodium citrates-3.8%) नाम की दवा पहले से ही रख दीजाती है जिसके सम्पर्क से रक्त जमने नहीं पावे और तरल ही बना रहे। इस क्रिया में ३ से ५ मिनट का समय लगता है। रक्तदाता को सूई चुभने के साधारण दर्द के सिवा कुछ भी नहीं मालूम पड़ता है। इस रक्त की शीशी को ठंडी मशीन (Refrigerator) में रख दिया जाता है जिससे वह खराब नहीं होता है और आवश्यकता पड़ने पर ३ सप्ताह तक काम में लिया जा सकता है। इस अवधि के बाद लाल कण इतनी अधिक संख्या में टूटने लगते हैं जिससे वह खराब हो जाता है। इस अवस्था में भी इसके कणों को छानकर तरल पदार्थ (Plasma) को काम में लिया जाता है। रक्तदाता १० मिनट के लिए आराम करने के पश्चात् चल-फिर सकता है। शारीरिक अथवा मानसिक सारा कार्य कर सकता है। रक्तदाता को रक्तदान देने के बाद दूध आदि पौष्टिक तत्वों का साधारण नाश्ता दिया जाता है।

रक्तदान देने से हमारे शरीर में दौड़ने वाले रक्त में जो कमी आ जाती है वह तत्काल हमारे यकृत्, तिल्ली, और मज्जा के गोदामों से पूर्ति हो जाती है। गोदामों की कमी को साधारण खुराक १०-१५ दिन में पूर्ति कर देती है। इस प्रकार हम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीन मास के अन्तर से अपना रक्तदान सुरक्षित रूप से दे सकते हैं।

ठंडी मशीन में रखे हुए रक्त को आवश्यकतानुसार रबर की नली और सुई द्वारा रोगी की शिराओं में धीरे धीरे चढ़ा दिया जाता है। साधारण तौर पर ५ छटांक रक्त २ घंटों की अवधि में रोगी को लगता है।

रक्त-वर्ग (Blood Group)

गत ५० वर्षों में एक दूसरे के रक्त को मिला कर देखने की विधि से यह जानकारी प्राप्त हुई है कि समस्त मानव समाज को बिना किसी जाति व लिंग भेद के रक्त वर्ग के आधार पर चार भागों में विभक्त किया जा सकता है। इनके नाम इस प्रकार है :—

(१) ए० बी० (२) ए० (३) बी० (४) ओ०

गर्म प्रदेशों में **बी और ओ** वर्ग के मानवों की संख्या अधिक है। जबकि शीत प्रदेशों में ए० और **ए० बी०** वर्ग के मानवों की संख्या अधिक है।

कौन किनसे रक्त ले सकता है :

(१) ए० बी० वर्ग के नर-नारी अपने वर्ग के मनुष्यों के अलावा विशेष परिस्थितियों में दूसरे वर्ग के मनुष्यों से भी रक्तदान ले सकते हैं इसलिए इस वर्ग के मनुष्य सर्व खून के उपर्युक्त मनुष्य कहलाते हैं।

(२) ए० और बी० वर्ग के नर-नारी क्रमशः अपने अपने वर्ग के अतिरिक्त आवश्यकता होने पर ओ० वर्ग के मनुष्यों से ही रक्त ले सकते हैं।

(३) ओ० वर्ग के नर-नारी सिर्फ ओ० वर्ग के मनुष्यों से ही रक्त ले सकते हैं।

कौन किसको रक्त दे सकता है :

(१) ए० बी० वर्ग के नर-नारी सिर्फ ए० बी० वर्ग के रोगी को ही रक्त दे सकते है अन्य वर्गवालों को नहीं।

(२) ए० और बी० वर्ग के रक्तदाता क्रमशः अपने अपने वर्गवाले रोगियों के आलावा ए० बी० वर्ग के रोगी को भी रक्त दे सकते हैं।

(३) ओ० वर्ग के रक्तदाता न केवल अपने वर्ग के रोगी को ही रक्त दे सकते हैं परन्तु आवश्यकता होने पर सब रोगियों को चाहे उनका कोई वर्ग क्यों नहीं हो सुरक्षित रूप से रक्त दे सकते हैं इसलिए इस वर्ग वाले मनुष्य सर्व-**रक्तदाता** कहलाते है।

यह सब नीचे दी गई तालिका से स्पष्ट हो जाता है:—

(क)

रक्तदाता का वर्ग	**रोगी का वर्ग जो इनसे रक्त ले सकता है**
(१) ए० बी० (AB)	(१) ए० बी० (AB)
(२) ए०	(२) ए० ओ० ए० बी० (A B)
(३) बी०	(३) बी० ए० बी०(AB)
(४) ओ०	(४) ओ० ए० बी० ए० बी० (A B)

(ख)

रोगी का वर्ग	**किस रक्तदाता से रक्त ले सकता है**
(१) ए बी	(१) एबी, ए०, बी०, ओ०
(२) ए०	(२) ए०, ओ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) बी०	(३) बी०, ओ०
(४) ओ०	(४) ओ०

जहां तक संभव हो प्रत्येक रोगी को अपने अपने वर्ग का ही रक्त दिया जाना चाहिये। इस नियम का पालन करने से रक्त देने के पश्चात् रोगी के शरीर में प्रतिक्रिया होने का कम से कम अवसर आता है। परन्तु तात्कालिक आवश्यता के समय ऊपर दी गयी तालिकाओं के अनुसार रक्त दे सकते हैं।

चेतावनी

अत्यन्त खेद का विषय है कि समाज के बहुत-से व्यक्ति जिनको अच्छा पौष्टिक भोजन मिलता है जिनका स्वास्थ्य एकदम अच्छा है और जो समाज के प्रतिष्ठा के ठेकेदार माने जाते हैं, इस मानवीय कार्य के प्रति पूर्ण उदासीन हैं। इतना ही नहीं अपने रिश्तेदारों को रक्तदान देने की अवश्यकता होने पर खुद रक्तदान नहीं करेंगे। परन्तु समाज के उन व्यक्तियों से जो गरीब हैं, जो खुद रुग्ण हैं, जिनके पास तन ढकने को पूर्ण वस्त्र नहीं हैं और जिनको पेट भरने के लिए पूरी रोटी नहीं मिलती, रक्तदान लेने में तनिक भी हिच-किचाहट नहीं करेंगे, समाज का यह अङ्ग हम सबके लिए बहुत ही बड़ी चुनौती है। यह सब कलियुग का प्रभाव नहीं है तो और क्या है? एक समय वह था जबकि हम हँसते हँसते पशु पक्षी के जीवन के लिए भी अपने शरीर का कुछ भाग ही नहीं परन्तु प्राण तक दे देते थे। आज अपने बच्चों, जीवन साथी और पूजनीय गुरुजनों के प्राणों पर बन आती है और थोड़ा सा रक्तदान देने में भी आगा-पीछा सोचते हैं। मैं अपने निजी अनुभव के आधार पर आप सबको विश्वास दिलाता हूँ कि रक्तदान देने से तनिक भी नुकसान नहीं होता, सिर्फ मानसिक डर होता है, वह भी जब तक रक्त नहीं दिया तब तक। आपको यह जानकर आश्चर्य होगा कि एक स्त्री १५ से लेकर ४५ वर्ष तक मासिक धर्म में प्रति महीने औसतन ३ छटांक रक्त देती हुई जीवन में करीबन पौने दो मन रक्त पृथ्वी माता के अर्पण कर चुकती है जबकि पुरुषों के जीवन में एक भी ऐसा अवसर नहीं आता कि उन्हें अपने शरीर से रक्त देना पड़े। वास्तव में पुरुष समाज के वे अङ्ग जो इन विशेष अवसरों पर भी रक्त देने में पीछे हटते हैं वे मेरे विचार से स्त्रियों से कई हद तक नीचे गिरे हुए हैं यह हमारे लिए कितनी लज्जा की बात है कि जिन माता-पिता के खून से हम बने हैं उनके लिए आवश्यकता पड़ने पर रक्त का कुछ भाग भी देने में हम आगा-पीछा करते हैं। यदि हम स्वजनों के लिए भी रक्त देने में तैयार नहीं तो अन्य व्यक्तियों के लिए तो आशा करना ही व्यर्थ है।

प्रत्येक रक्त कोष उन सब ही व्यक्तियों का हार्दिक स्वागत करता हैं जो अपना रक्त-दान के रूप में देना चाहते हैं। इस प्रकार प्रत्येक रक्तदाता एक वर्ष में रक्तदान करके कम से कम चार रोगियों के प्राण बचाकर उन्हें स्वस्थ कर सकता है अर्थात् नया जीवन दे सकता है। वास्तव में रक्तदान सबसे बड़ा दान ही नहीं, अपितु बहुत बड़ा त्याग भी है जिसके बराबरी का दूसरा कोई त्याग नहीं है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान में आयुर्वेदिक-योजना का एक प्रारूप

(प्रस्तोता—वैद्य श्री भागीरथ जोशी, आयुर्वेदाचार्य, उदयपुर)

प्रास्ताविक

राजस्थान, आयुर्वेद के विकास एवं जीर्णोद्धार की दृष्टि से, भारत में प्रमुख है। यहां आयुर्वेद आदि के विकासार्थ सभी साधन उपलब्ध हैं। आयुर्वेदीय हस्तलिखित एवं प्रकाशित विलुप्त ग्रन्थ भी यहां अनेकों पुस्तकालयों तथा घर-घर में प्राप्त हो सकते हैं। अरावली पर्वतश्रेणियों में अनेकानेक जड़ी-बूटियां, खनिज एवं रत्न प्रचुर मात्रा में पाये जाते हैं। दूध, घी, मक्खन, दही, छाछ तथा जीवनीय-तत्वों से परिपूर्ण खाद्य सामग्री की भी यहां कमी नहीं है। भारत के विभिन्न नगरों से भी अनेक दीर्घकालीन रोगी यहाँ आकर आयुर्वेदीय कल्प-चिकित्सा से पूर्ण रोगमुक्त हो रहे हैं। इसके अतिरिक्त वर्तमान राज्य सरकार भी आयुर्वेद विकास के लिए अन्य प्रान्तों के समकक्ष कुछ अधिक ही अनुकूल है। इसके अतिरिक्त आज राजस्थान का सौभाग्य है कि राजस्थान की आयुर्वेद, संस्कृत एवं ज्योतिष आदि विषयों के मर्मज्ञ एवं उद्‌भट विद्वान् माननीय डा० सम्पूर्णानन्द जैसे राज्यपाल का सुयोग्य नेतृत्व मिल रहा है। डा० सम्पूर्णानन्द ने उत्तर प्रदेश में अपने मुख्यमन्त्रित्व काल में आयुर्वेद एवं संस्कृत की जो सेवा की है, वह किसी से छिपी नहीं है। यह हर्ष का विषय है कि राजस्थान में भी इनके सुयोग और निरन्तर प्रेरणा के फलस्वरूप राज्य सरकार ने भी प्राच्य विश्व-विद्यालय की आवश्यकता अनुभव की और इस कार्य हेतु रिपोर्ट प्रस्तुत करने हेतु एक कमेटी की स्थापना की घोषणा की तथा साथ ही राजस्थान में आयुर्वेद फैकल्टी के निर्माण की घोषणा की। देश में सर्वप्रथम संस्कृत विश्वविद्यालय की स्थापना का श्रेय भी डाक्टर साहब को ही है। ऐसे आयुर्वेद एवं प्राच्य विद्याओं के प्रबल समर्थक राज्यपाल के सान्निध्य में आयुर्वेद को अष्टांगपूर्ण बनाने हेतु तथा इसके प्रत्येक अङ्ग को विकसित कर आयुर्वेद को राज्य चिकित्सा पद्धति घोषित कर राजस्थान की प्रगति में एक नवीन कदम बढ़ाना आवश्यक है।

कारण आज के इस युग में मिथ्याहार-विहार द्वारा विभिन्न रोगों से आक्रान्त एवं आडंबरपूर्ण अन्य खर्चीली चिकित्सा पद्धतियों से ग्रस्त जनता जनार्दन के स्वास्थ्य की समस्या अभी हल नहीं होने पायी है। समस्या के समाधान के लिए एवं स्थायी रोगमुक्ति एवं स्वास्थ्य-संरक्षण की दृष्टि से कम खर्च में अधिक लाभ देने वाली आयुर्वेद-चिकित्सा पद्धति का आज विकसित होना आवश्यक ही नहीं, अत्यन्त अनिवार्य भी है। वर्तमान संकट-काल में आयुर्वेद राष्ट्र का राष्ट्रिय आदर्श बन सकता है।

आज इस अनुकूल परिस्थिति में यह परमाव-श्यक है कि राजस्थान में आयुर्वेद को सर्वांगपूर्ण बनाने के लिए सर्वप्रथम राज्य सरकार द्वारा वर्तमान में चलाये जा रहे आयुर्वेद कालेजों, औषधालयों एवं रसायन शालाओं के स्तर को समुन्नत किया जाय। इसके साथ ही साथ प्रान्त में बड़े पैमाने पर आयुर्वेद–अनुसंधान कार्य भी प्रारम्भ करवाया जाय। इसी प्रकार आयुर्वेदीय स्वस्थवृत्त एवं सद्वृत्त प्रचार विभाग की स्थापना भी, अनिवार्य आवश्यक समझी जाकर, की जाय। यदि यह कहा जाय तो अनुचित नहीं होगा कि वर्त्तमान के चिकित्सालयों, कालेजों एवं रसायन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शालाओं की स्थिति सन्तोषजनक नहीं है रंगपति जो क्लीनिकल रिसर्च के नाम से उदयपुर एवं जयपुर में आयुर्वेद अनुसंधान कार्य राज्य सरकार द्वारा शुरू करवाया जा रहा है, वह सराहनीय तो है लेकिन केवल पिष्टपेषण मात्र और एकांगी रूप में हो रहा है। इसकी आड़ में विलुप्त अङ्गों एवं वनस्पतियों पर वास्तविक अनुसंधान नहीं हो सकेगा। इसी प्रकार सौ वर्ष तक पूर्ण स्वस्थ रख सकने का जिसका दावा है, उस आयुर्वेदिक सदाचार पर आधारित स्वस्थवृत्त के पालन का प्रचार-प्रसार सर्वदूर नहीं करवाने के कारण शारीरिक, मानसिक एवं आध्यात्मिक स्वास्थ्य रक्षा की दृष्टि से प्रान्त की महान् हानि हो रही है। अस्तु, भविष्य में प्रान्त एवं राष्ट्र के शारीरिक-सांस्कृतिक, नैतिक, चारित्रिक एवं आर्थिक उत्कर्ष हेतु निम्नांकित प्रकार से आयुर्वेद के विकासार्थ क्रिया प्रारम्भ की जानी अपेक्षित है। यह साधिकार कहा जा सकता है कि यदि उपर्युक्त निर्णय लिया जाकर क्रिया प्रारम्भ कर दी गई तो निकट भविष्य में ही राजस्थान प्रान्त अन्य सभी राज्यों एवं केन्द्र को भी आयुर्वेद विकास के माने में सही मार्गदर्शन कर सकने की स्थिति में होगा। राजस्थान के अतिरिक्त अन्य सभी राज्य सरकारों व केन्द्रीय सरकार द्वारा भी इस दिशा में निम्न सुझावानुसार क्रिया की जाना अनिवार्यतः आवश्यक है—

१. विभागीय शासन-व्यवस्था

सर्व प्रथम विभागीय शासन-व्यवस्था में ही परिवर्तन वांछनोय है। वर्तमान व्यवस्था में अनेक कमियां प्रतीत होती हैं, इसी कारण वर्षों तक अनेक औषधालयों के निरीक्षण नहीं हो पाते एवं औषध तथा साधन-सामग्रियां भी अनेक औषधालयों में समय पर नहीं पहुंच पातीं। छोटी-छोटी एवं तत्काल करने योग्य बातों के लिए सबसे बड़े अधिकारी से स्वीकृति लेना एवं इन्सपेक्टरों के अधीन उनकी निरीक्षण कर सकने की क्षमता से अधिक, औषधालय देना वर्तमान व्यवस्था में बड़ा भारी दोष है। आयुर्वेद की प्रतिष्ठा एवं आयुर्वेद विभाग के विस्तार हेतु वर्तमान इन्सपेक्टर पद जो गजेटेड नहीं हैं अनुपयोगी मानकर समाप्त किया जाय और अधिकारों का विकेन्द्रीकरण कर विभागीय शासन व्यवस्था के अन्तर्गत अधिकारियों की नियुक्तियां निम्न प्रकार से की जाय—

१. डाइरेक्टर १ (एक)

२. डिप्टी डाइरेक्टर २ (दो)

३. असि० डाइरेक्टर ६ (छः) जनपदों (डिविजनों) में

४. जिला आयुर्वेदाधिकारी। ५० औषधालयों पर एक (गजेटेड)

५. कालेज चिकित्सालयों के प्रबंधक (सुपरिन्टेन्डेन्ट) (४) डिप्टी डाइरेक्टर के समकक्ष। इसके अतिरिक्त जितने भी शिक्षक व चिकित्सक विभाग के अन्तर्गत कार्य कर रहे हैं उन सभी के वेतन स्तर को, जो सम्प्रति अत्यन्त निम्न होने के कारण निन्दनीय कहा जा सकता है, शीघ्रातिशीघ्र समुन्नत किया जाय। इस सम्बन्ध में लम्बे अर्से से प्रांतीय वैद्य सम्मेलन एवं मूक रूप से सरकारी वैद्यवर्ग द्वारा बराबर माँग की जा रही है किन्तु न जाने क्यों राज्य सरकार इस ओर उदासीन है। एक चिकित्सक को कम से कम २००) रु० दो सौ रुपया मासिक तो मिलना ही चाहिये ताकि वह निश्चिन्त होकर सेवा कार्य में रत रह सके।

आयुर्वेदीय शिक्षण व्यवस्था के सम्बन्ध में

सही माने में आयुर्वेद का शिक्षण एवं प्रशिक्षण देने के लिए यह परमावश्यक है कि प्रान्त में सर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथम एक आयुर्वेद युनिवर्सिटी की स्थापना की जाय। कुछ समय पूर्व कलकत्ता में धन्वन्तरि परिषद् के शिष्टमण्डल के समक्ष भारतीय कांग्रेस के अध्यक्ष भू० पू० श्री ढेबर ने एवं दिल्ली में शास्त्र चर्चा परिषद् की बैठक में भारतीय लोकसभा के भू० पू० अध्यक्ष श्री अयंगर ने भी आयुर्वेद को सर्वांगपूर्ण बनाने के लिये पृथक् आयुर्वेद युनिवर्सिटी की आवश्यकता पर बल दिया था जिस प्रकार इन्जिनियरिंग और एग्रीकल्चर के विश्वविद्यालय पृथक् कायम किये जा रहे हैं उसी प्रकार भारत के प्राचीन विज्ञान, कला और भाषा आयुर्वेद की भी युनिवर्सिटी स्वतन्त्र रूप से स्थापित की ही जा सकती है। युनिवर्सिटी के तत्वावधान में वर्तमान के दोनों प्रांतीय आयुर्वेद कालेजों को अष्टांगपूर्ण एवं साधनसम्पन्न बनाया जाय। मेडिकल कालेजों की ही भांति आयुर्वेद कालेजों में मूल **आयुर्वेदाध्यपन के साथ ही साथ सर्जरी का कर्माभ्यास भी अनिवार्य रूप से करवाया जाय**। इसी प्रकार वर्त्तमान में राज्य सरकार द्वारा चलाये जा रहे धात्री उपवैद्य प्रशिक्षण पर आयुर्वेदीय परिचर्या की दृष्टि से अधिक ध्यान देने के अतिरिक्त सरकारी एवं सहायता प्राप्त कालेजों में विभिन्न विषयों के विशेषज्ञ नियुक्त कर निम्न अङ्गों में स्नातकोत्तर प्रशिक्षण प्रारम्भ करवाये जाय। विद्यार्थियों के अलावा डिग्री कोर्स सम्पूर्ण कर कार्यक्षेत्र में जाने के बाद वैद्यों को भी विभिन्न विषयों में विशेष योग्यता प्राप्त करवाने हेतु सुविधाएं प्रदान की जायं।

१. पञ्चकर्म चिकित्सा
२. प्रसूतितन्त्र एवं स्त्रीरोग-चिकित्सा
३. कौमारभृत्य एवं बालरोग-चिकित्सा
४. शल्यतन्त्र की विशेष योग्यता
५. शालाक्यतन्त्र की विशेष योग्यता
६. भूत विद्या एवं मानस रोग-चिकित्सा
७. अगद तन्त्र एवं विष-चिकित्सा
८. रसायन एवं वाजीकरण विधि
९. रस चिकित्सा
१०. यूनानी चिकित्सा

२. चिकित्सालयों की व्यवस्था

जनता में आयुर्वेद की प्रतिष्ठा एवं आस्था प्रस्थापित करने के लिए यह आवश्यक है कि आयुर्वेदिक औषधालय सुव्यवस्थित एवं साधन-सम्पन्न हों। वर्त्तमान में सरकार के तत्वावधान में चलने वाले औषधालय यदि यह कहा जाय तो अनुचित नहीं कि सर्वसाधनविहीन एवं अव्यवस्थित हैं। न सर्वत्र निजी भवन हैं और न साधन-सुविधाएं व पर्याप्त औषध ही। रोगी शय्याओं की कमी एवं अभाव भी इन औषधालयों के प्रभाव को जनता में कम किये हुए हैं। अतः अच्छे से अच्छा स्टाफ, भवन एवं साधन देकर औषधालय निम्न प्रकार से व्यवस्थित किये जायं, ताकि अनेक रोगों की सफल चिकित्सा के आंकड़े बराबर राज्य सरकार को प्राप्त होते रहें। इन आंकड़ों के प्राप्त होने पर हमारे क्लीनिकल रिसर्च का कर्त्तव्य विभिन्न रोगों के सम्बन्ध में स्वतः ही पूर्ण होता रहेगा।

१. कालेज चिकित्सालय
(जयपुर एवं उदयपुर में)
३०० रोगी शय्याओं के

२. जनपद चिकित्सालय
(प्रत्येक डिविजन में एक)
१०० रोगी शय्याओं के

३. मंडल चिकित्सालय
(प्रत्येक जिले में एक)
५० रोगी शय्याओं के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. तहसील चिकित्सालय
(प्रत्येक तहसील में एक)
२५ रोगी शय्याओं के

५. ग्राम चिकित्सालय (अ श्रेणी)
(पांच हजार की जनसंख्या पर एक)
१० रोगी शय्याओं के

६. ग्राम चिकित्सालय (ब श्रेणी)
(तीन हजार की जनसंख्या पर एक)
५ रोगी शय्याओं के

७. साधारण चिकित्सालय
(बाकी के सब)
बिना रोगी शय्याओं के

विशेष

साधारण चिकित्सालयों को भी साधनसम्पन्न बनाया जाना अपेक्षित है। कम से कम एक साधारण चिकित्सालय की ५००, पांच सौ रुपया मासिक की औषधियां स्टाफ व साधनों के साथ दी जानी चाहिये।

३. औषध निर्माण

आयुर्वेद विकास की दृष्टि से आयुर्वेदीय-काष्ठौषधियां एवं सिद्धौषधियों का बड़ा महत्त्व है। शास्त्र विधि विधान से बनी औषधियों के बिना चिकित्सा में सफलता मिलना कठिन है। इसी प्रकार पारद के संस्कार करवाये बिना तथा ताजी एवं समय पर ग्रहण की हुई वनोषधियों के अभाव में सिद्धमकरध्वज सहस्रपुटी अभ्रक लोह तथा अन्य सिद्धौषधियों का ठीक ठीक निर्माण हो सकना असम्भव है। यह बात लम्बे अर्से से दुःख के साथ अनुभव की जा रही है कि राज्य सरकार द्वारा चलाई जाने वाली रसायनशालाओं में सुसंस्कृत पारद तथा ताजी वनौषधियों के अभाव में टेन्डर से खरीद कर औषध निर्माण किया जा रहा है। प्रकृति की असीम अनुकम्पा से प्रयुक्त की जाने वाली औषध कुछ न कुछ तो लाभ करती ही है। पर आयुर्वेद के गौरव को ध्यान में रखकर भविष्य में इस प्रकार के अपूर्ण निर्माण को बन्द किया जाकर निम्न सुझावानुसार इस दिशा में शीघ्रातिशीघ्र कदम उठाया जाना नितान्त अपेक्षित है।

(क) रसायनशालाओं के एकीकरण की बात, जो वर्षों से चलाई जा रही है, अब अधिक लम्बी नहीं की जाकर अविलम्ब सभी निर्माणशालाओं का एकीकरण कर लिया जाय।

(ख) टेण्डर प्रथा को एकदम समाप्त कर दिया जाय क्योंकि यह प्रथा आयुर्वेद की जड़ को खोखला करने वाली है। इसके लिए राज्य सरकार को नया विधेयक भी पास करवाना पड़े तो करवाये किन्तु इस प्रथा का अन्त तो होना ही चाहिये।

(ग) एक वृहद् औषध संग्रहालय की स्थापना की जाकर ताजी काष्ठौषधियों एवं खनिजों को शुद्धरूप में सीधा खरीद कर एकत्र किया जाय। मधु का शुद्ध रूप में मिल सकना आज दुर्भर है अतः इस संग्रहालय में असली मधु भी मंगवाया जाकर इकठ्ठा किया जाय।

(घ) आयुर्वेद एवं वैद्यों को बदनाम करने वाली नकली केसर-कस्तूरी, अम्बर, गोरोचन, वंशलोचन, शिलाजीत आदि द्रव्यों को खरीदना बन्द कर, जहां कहीं से भी ये असली रूप में उपलब्ध होती हों, वहां से सीधी मंगवाये जाने की व्यवस्था की जाय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ङ) रसौषधियों व कूपीपक्व रसों का निर्माण बिना पारद के संस्कार किये, नहीं करवाया जाय। पारद के संस्कार करवाने की दिशा में शीघ्र ही कदम उठाया जाय। इसी प्रकार सहस्रपुटी अभ्रक व लौह के घांण डलवाना भी अत्यावश्यक है।

(च) औषध संग्रह ग्रन्थ (फार्मीकोपियां) विस्तृत रूप में पुस्तकाकार प्रकाशित करवाया जाय। इसमें प्रत्येक रोग के अव्यर्थ योगों के घटक, मात्रा, अनुमान एवं पथ्य आदि का स्पष्ट और सरल भाषा में अङ्कन हो।

(छ) भस्मों एवं रसों में जिन २ द्रव्यों के स्वरसों की भावना दी जाने का निर्देश हो, उनको ताजे रूप में ही मंगवाये जाने की व्यवस्था की जाय, ताकि औषधियों में अणुशक्ति का अधिकाधिक उत्पादन हो सके।

(ज) गोमूत्र के बजाय पानी का उपयोग बन्द किया जाकर गोमूत्र ही काम में लिया जाय। यदि संभव हो सके तो उस वृहती रसायनशाला के तत्त्वावधान में एक गौशाला की स्थापना की जाय ताकि गोघृत-गोदुग्ध, गोमूत्र एवं गोमय आदि अनिवार्य आवश्यक औषध द्रव्य शुद्ध प्राप्त हो सकें।

(झ) पंसारियों पर निर्भर रहने के कारण आयुर्वेद की प्रतिष्ठा पर बराबर आघात पहुंचाता आ रहा है, अतः रसायनशाला के अन्तर्गत प्रान्त के वनस्पतिबहुल जनपदों में आयुर्वेदीय वनस्पति उद्यानों का श्रीगणेश अविलम्ब किया जाय। एग्रीकल्चर विभाग एवं वन विभाग से इन उद्यानों के लगवाने में पूर्ण सहयोग प्राप्त किया जाय। इस व्यवस्था से न केवल फार्मेसियों को शुद्ध एवं सम्पन्न औषधियां ही प्राप्त होंगी, अपितु आयुर्वेदीय छात्रों को भी वनस्पतिस्वरूप परिचय करवाने में बहुत लाभ हो सकेगा।

स्वस्थवृत्त एवं सद्वृत्त प्रचार

केन्द्रीय सरकार एवं राज्य सरकारों द्वारा करोड़ों रुपये व्यय कर व्यक्तिगत एवं सार्वजनिक स्वास्थ्य संरक्षण के लिए सैंकडों बहु वेतन भोगी हैल्थ ऑफिसरों और उनके सहयोगियों को पूर्ण साधन सामग्री देकर बराबर क्रिया की जा रही है। इतनी विपुल धनराशि खर्च करने के बावजूद भी यदि यह कहा जाय तो अनुचित नहीं कि सरकार राष्ट्र के नागरिकों की स्थाई स्वास्थ्य रक्षा कर सकने में पूर्ण असफल हो रही है। प्रमाण स्वरूप, बालकों की आंखों पर चश्मे, नौजवानों के सफेद बाल, प्रायः प्रत्येक स्त्री को प्रदर और पुरुष को प्रमेह, हार्ट फेल होकर अकाल मृत्युएं, महा व्याधियों एवं नित्त नये २ रोगों का प्रादुर्भाव यत्र यत्र सर्वत्र दृष्टिगोचर हो रहा है। शरीरावयवों के साथ साथ इन्द्रियां भी नष्टप्राय हो रही हैं। इसी प्रकार पागलखानों की संख्या में भी वृद्धि हो रही है।

राजस्थान में प्रान्त एवं राष्ट्र की उपरर्युक्त स्थिति से रक्षा करने हेतु आयुर्वेद विभाग के अन्तर्गत पूर्णायु तक स्वस्थ रखने का जिसका दावा है, उस आयुर्वेदीय सदाचार पर आधारित स्वस्थवृत्त के पालन का सर्वदूर प्रचार प्रसार करवाने के लिए एक पृथक स्वस्थवृत्त एवं सद्वृत्त प्रचार विभाग स्थापित किया जाय। उसके अन्तर्गत विभिन्न कार्यक्रम अपना कर स्थायी स्वास्थ्य रक्षार्थ क्रिया की जानी चाहिये। यह साधिकार कहा जा सकता है कि जब तक आयुर्वेदीय स्वास्थ्य चर्याओं के आधार पर राष्ट्र के नागरिकों का रहन-सहन एवं खान-पान नहीं होगा तब तक स्वास्थ्य रक्षा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

की दिशा में प्रगति हो सकना असंभव है। इस आयुर्वेदीय स्वास्थ्य विभाग के अन्तर्गत १॥ या २ घण्टे तक दिखाई जा सके ऐसी एक सिनेमा रील तैयार करवाई जाय। इस रील में शतायु तक पूर्ण स्वस्थ रहने के लिए ब्राह्म मुहूर्त में उठने से लेकर रात्रि पर्यन्त एवं रात्रि से प्रातः उठने तक तथा ऋतु के अनुसार आहार-विहार का प्रभाव पूर्ण प्रदर्शन एवं चामत्कारिक घरेलू उपचारों द्वारा शिशुओं एवं माताओं की आये दिन घरों में होने वाली बीमारियों से, मुक्ति दिखाई जाकर सद्वृत्त पालन से नैतिक एवं चारित्रिक उत्कर्ष भी रोचक ढंग से प्रदर्शित किया जाय। इसी प्रकार नशीली चीजों के सेवन, गन्दे साहित्य के पठन तथा अश्लील ढंग के सिनेमा देखने से होने वाली हानियों का भी नग्न सत्य प्रदर्शित किया जाय। जनपदोध्वंस एवं संक्रामक रोगों के फैलने के कारण तथा उनसे बचने के उपाय भी बताये जायँ। इस सांगोपांग रील को हर रविवार के दिन सभी परिवारों को दिखाये जाने की व्यवस्था की जाय। इसको दिखाने तथा स्वास्थ्य रक्षा सम्बन्धी चार्ट्स मोडल, दीवाल पत्र तथा भाषण आदि द्वारा स्वस्थवृत्त पालन का प्रचार—प्रसार करने हेतु प्रत्येक डिवीजन में एक एक प्रचार वाहन मय स्टाफ एवं साधन-सामग्री के, दिये जाने की भी व्यवस्था की जाय। जयपुर से राजस्थान रेडियो द्वारा भी समय समय पर स्वस्थवृत्त और घरेलू उपचारों का प्रचार बराबर करवाये जाने की व्यवस्था की जाय।

सम्प्रति आयुर्वेदीय विद्यालयों के अतिरिक्त कहीं भी इन स्वास्थ्य चर्चाओं का ज्ञान नहीं करवाया जा रहा है। अतः प्रान्त के समस्त विद्यालयों में पढाये जाने वाले हाईजिन एवं पब्लिक हैल्थ विषय के साथ आयुर्वेदीय सद्वृत्त एवं स्वस्थवृत्त अनिवार्य रूप से पढाया जाना अपेक्षित है एतदर्थ शालेय पाठ्य ग्रन्थों में इसका समावेश करवाया जाय और एक विद्यालय स्वास्थ्य सेवा अभ्यासक्रम प्रारम्भ किया जाकर समस्त स्वास्थ्य शिक्षकों के लिये उसे पूर्ण करना अनिवार्य कर दिया जाय। इसी प्रकार एक सार्वजनिक स्वास्थ्य शिक्षण अभ्यासक्रम भी चालू कराना वांछनीय है। इस अभ्यास क्रम को नगरों एवं ग्रामों में स्वास्थ्य संरक्षण कार्य करने वाले समस्त कार्यकर्ताओं द्वारा अनिवार्य रूप से पूर्ण करवाया जाना भी नितान्त आवश्यक है। इन दोनों अभ्यास क्रमों में आधुनिक स्वास्थ्य रक्षा के सभी उपकरणों को ग्रहण कर आयुर्वेदीय स्वस्थवृत्त पढाया जाय।

५. आयुर्वेदिक अनुसन्धान

प्रान्त में अनुसन्धान की समुचित व्यवस्था आयुर्वेदीय महाविद्यालयों में तत्तद् विषय के प्रोफेसरों के तत्त्वावधान में की जाकर राजस्थान एवं भारतवर्ष के विभिन्न विषयों के विशेषज्ञ गुदड़ी के लालों को जो अपने मस्तिष्कों में भरे हुए ज्ञान भंडार को साथ ही लेकर धीरे धीरे हमारे बीच से चले जा रहे है, आर्थिक चिन्ताओं से मुक्त कर नियुक्त किया जाय उनके द्वारा विभिन्न राष्ट्रिय अनुसंधान-केन्द्रों एवं अरावली पर्वत श्रेणियों और हिमालय को तराई के अतिरिक्त चीन, तिब्बत कौर रूस आदि विदेशों में भी उभयज्ञ वैद्यों की विभिन्न टोलियाँ भेजी जाकर अनुसन्धान कार्य की प्रगति के आंकड़े और लुप्त वनस्पति एवं दिव्यौषधियों की शोध खोज कर जानकारी प्राप्त करने के साथ ही साथ विशाल पैमाने पर अनुसन्धान करवाने हेतु अनेक सहयोगी और साधन देकर प्रान्त में निम्न बिन्दुवार विभाग स्थापित किये जाय।

(क) संदिग्ध वनस्पति एवं खनिज निर्णय:

इसके अन्तर्गत जिन वनस्पतियों एवं खनिजों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

के सम्बन्ध में यत्किंचित् भी सन्दिग्धता हो उनका सही निर्णय करवाया जाय।

(ख) हस्तलिखित एवं प्रकाशित विलुप्त-ग्रन्थों की शोध-खोज

इसके अन्तर्गत जिनमें दीमकें लगती जा रही है या जो बाढों में बहे जा रहे है उन लुप्त ग्रन्थों की खोज करवाई जाकर प्रकाशन करवाया जाय यदि एतदर्थ कुछ मुआवजा भी देना पड़े तो दिया जाय।

(ग) दिव्यौषधियों की उपलब्धि तथा लोकोपचारों का प्रचार

इसके अन्तर्गत उन सभी अप्राप्य संजीवनी, विशल्यकरणी, चेतकी, सोमलता, सहदेवी एवं लक्ष्मणा आदि दिव्यौषधियों को खोज करवाई जाकर विश्व को चमत्कृत किया जाय। इसी प्रकार कौडियों के खर्च में महाव्याधियों को समूल नष्ट कर सकने में सक्षम, पहाडों में विचरण करने वाले साधुओं तथा अनुभवी वृद्धों एवं दादियों और नानियों के भी नुस्खों को प्राप्त कर सर्वजन हिताय उनका प्रचार प्रसार एवं यदि सम्भव हो सके तो उनको तैयार कर निर्धनों में वितरण भी किया जाय।

(घ) कुष्ठ एवं क्षय पर आयुर्वेदिक अनुसंधान

इसके अन्तर्गत त्रिफला, नीम और पीपल के वृक्षों के बीच लेबोरेटरी आदि की पूर्ण सुविधा देकर पृथक् पृथक् कुष्ठ एवं क्षय के दो आयुर्वेदीय चिकित्सा केन्द्र खुलवाये जायं। इस केन्द्रों में इस बोर्ड द्वारा शत-प्रतिशत लाभप्रद निर्णीत औषधियों का निर्णीत अनुपान एवं पथ्य के आधार पर प्रयोग करवाया जाय। भारत के आयुर्वेदीय कुष्ठ एवं क्षय विशेषज्ञों से मुआवजा दिये जाने का एलान किया जाकर अव्यर्थ योग मांगे जायं और परीक्षण कर लेने के पश्चात् प्रयुक्त किये जायं।

(ङ) आयुर्वेदीय पुस्तक प्रकाशन

इसके अन्तर्गत आयुर्वेद एकेडमी की स्थापना की जाकर वेदों तथा अन्य साहित्यिक ग्रन्थों में आयुर्वेद के विकीर्ण विषयों का संकलन एवं दर्शन से आयुर्वेद के मूलभूत सिद्धान्तों की संपुष्टि करने हेतु मौलिक पुस्तकों का प्रकाशन करवाया जाय।

(च) आयुर्वेदीय द्रव्यगुण अनुसंधान :

इसके अन्तर्गत तपोधन महर्षियों द्वारा प्राणि मात्र पर दया कर किये गये द्रव्यों के संधान, रस-गुण-वीर्य-विपाक और प्रभाव पर आगे अनुसंधान करवाया जाय, यदि सम्भव हो सके तो एलोपैथिक औषधियों का भी वात, पित्त, कफ एवं रस-गुण के आधार पर आयुर्वेदीकरण करवा लिया जाय ताकि इनके प्रयोग से जो रोगरूप बदल रहे हैं, वे वश में आने लग जायं।

(छ) विश्वचिकित्सा पद्धतियों की तुलनात्मक विवेचना

इसके अन्तर्गत विभिन्न चिकित्सा पद्धतियों के विशेषज्ञों को एक साथ बिठा सभी पद्धतियों की तुलनात्मक विवेचना करवाई जाकर आयुर्वेद मे अन्य पद्धतियों (समुद्र में नदियों) को आत्मसात करवाया जाय। यह साधिकार कहा जा सकता है कि मानव के सुखाय एवं हिताय सर्व लाभ प्रद एवं सर्वोपयोगी चिकित्सा पद्धति विश्वचिकित्सा पद्धतियों के मूल स्रोत, भारत के जीवन विज्ञान आयुर्वेद में मन्य चिकित्सा पद्धतियों को आत्मसात् करने के बाद ही सामने आ सकेगी, अतः इस दिशा में ठोस कदम उठाया जाना नितान्त अपेक्षित है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपसंहार

अन्त में यही कहा जा सकता है कि यदि अधिकारहीन वर्त्तमान आयुर्वेद को पूर्ण अधिकार-सम्पन्न बनाकर राज्य सरकार उपर्युक्त प्रकार से विकास हेतु सही माने में कदम बढ़ायेगी जो निस्संदेह राजस्थान स्वस्थों के स्वास्थ्य रक्षार्थ एवं व्याधि-पीड़ितों की स्थायी रोगमुक्ति की दृष्टि से भारत ही नहीं अपितु विश्व की भी कुछ सेवा करने में पूर्ण समर्थ हो सकेगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औद्योगिक सहकारी समिति बनाकर अपना आर्थिक अभ्युदय कीजिये

शोषण से मुक्ति

संयुक्त रूप से लाभ के भागीदार बनिए

प्राय: ऐसा होता है कि लोग किसी प्रकार के छोटे तथा कुटीर व ग्रामोद्योग प्रारम्भ करना चाहते हैं तो धन व साधन की कमी महसूस की जाती है। इस काम को सहकारी आधार पर चला कर आप लाभ के भागीदार तथा देश की औद्योगिक उन्नति में सहायक बनिये।

आप निम्न उद्योगों के लिए औद्योगिक सहकारी समिति बनाइयें:—

शकर मिल, खादी, तेल घाणी, चर्म रंगाई, गुड़ तथा खन्डसारी, हाथ का कागज, ताड़ गुड़, अखाद्य तेल साबुन, रेशम, मिट्टी के बर्तन, कुटीर दियासलाई, मधुमक्खी पालन, हाथ चावल कुटाई, हस्तकला उद्योग, रस्सी उद्योग, हाथ कर्धा अन्य लघु स्तर के उद्योग।

औद्योगिक सहकारी समितियां बनाने से आपको क्या मिलेगा ?

राजस्थान सरकार के सम्बन्धित विभागों तथा अखिल भारतीय स्तर पर निर्मित विभिन्न बोर्डों व आयोगों द्वारा ऋण, अनुदान व तकनीकी सहायता, संयुक्त लाभ के भागीदार देश की औद्योगिक उन्नति में आप का सहयोग।

औद्योगिक समितियों को सहायता अखिल भारतीय स्तर पर निर्मित निम्न बोर्डों व आयोगों की स्वीकृत योजना के अनुसार प्राप्त होती है

★ (१) लघु स्तर उद्योग बोर्ड

★ (२) अखिल भारतीय हाथकर्धा बोर्ड

★ (३) खादी एवं ग्रामोद्योग बोर्ड

★ (४) केन्द्रीय बोर्ड

★ (५) रस्सी बोर्ड

★ (६) अखिल भारतीय हस्तकला बोर्ड

विभिन्न प्रकार की औद्योगिक सहकारी समितियों को अलग-अलग तरह के ऋण अनुदान व तकनीकी सहायता की सूचना उक्त बोर्डों या सम्बन्धित विभागों द्वारा प्राप्त करें।

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

(ले०—वैद्य: श्रीबद्रीप्रसादशर्मा शास्त्री, जयपुरम्)

स्वास्थ्य-सुधा

नरो दिनादिचर्याभिर्यो,
न वर्तेत नित्यशः ।
स एव लभते रोगं,
ततः पथ्यं समाचरेत् ।।१।।

जो मनुष्य प्रतिदिन दिनचर्या एवं रात्रिचर्या के नियमों का यथाविधि पालन नहीं करते हैं, वे ही सदा रोगी रहते हैं । अतः उनको सदा परहेज से रहना चाहिये ।।१।।

ब्राह्मे मुहूर्ते बुध्येत,
स्वस्थो रक्षार्थमायुषः ।
तत्र सर्वाघशान्त्यर्थं,
स्मरेच्च मधुसूदनम् ।।२।।

जो स्वस्थ पुरुष आयु की वृद्धि (रक्षा) चाहता हो, उसको ब्राह्ममुहूर्त में ही उठ बैठना चाहिये और समस्त पापों की शान्ति के लिये प्रथम भगवान् मधुसूदन का ध्यान करना चाहिए ।।२।।

आयुष्यमुषसि प्रोक्तं,
मलादीनां विसर्जनम् ।
तदन्त्रकूजनाध्मानोदर-
गौरववारणम् ।।३।।

ब्राह्ममुहूर्त में उठकर मलमूत्र का त्याग करना आयुवृद्धि के लिये उत्तम है । प्रातः मलादि विसर्जन करने से आंतों की कूजन तथा आफरा व पेट का भारीपन ठीक होता है ।।३।।

प्रक्षालनं हि पाण्योश्च,
पादयोः शुद्धिकारणम् ।
मलश्रमहरं वृष्यं,
चक्षुष्यं राक्षसापहम् ।।४।।

शौच जाने के उपरान्त हाथ-पैर (व मुंह) को अच्छी तरह से धोना चाहिये । इससे मल श्रम (थकावट) दूर होकर बल की वृद्धि तथा नेत्रों की ज्योति बढ़ती है, भूत बाधा दूर होती है ।।४।।

दन्तशोधन-चूर्णेन,
दन्तमांसान्यबाधयन् ।
क्षौद्रत्रिकटुकाक्तेन,
तैलसिन्धुभवेन वा ।।५।।

मसूढ़ों को बाधा न पहुँचाते हुए प्रतिदिन कोई 'दन्तमंजन' करना चाहिये, अथवा सूंठ, मिरच, पीपल के चूर्ण को शहद में तथा सैंधा नमक को तैल के साथ मंजन करना चाहिए ।।५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्रोतोञ्जनमतः श्रेष्ठं,
विशुद्धं सिन्धुसम्भवम् ।
दृष्टेः कण्डूमलहरं,
दाहक्लेदरुजापहम् ॥६॥

नेत्रों की कण्डू (खुजली) मल, दाह, क्लेद को दूर करने के लिये स्रोतोञ्जन, जो सिन्धुनदी से उत्पन्न होता है वह शुद्ध एवं नेत्रों के लिये उत्तम है ॥६॥

लाघवं कर्मसामर्थ्यं,
विभक्तघनगात्रता ।
दोषक्षयोऽग्निवृद्धिश्च,
व्यायामादुपजायते ।
व्यायामदृढगात्रस्य,
व्याधिर्नास्ति कदाचन ॥७॥

व्यायाम करने से शरीर में हलकापन व कार्य करने की क्षमता उत्पन्न होती है, तथा शरीर के प्रत्येक अवयव मजबूत हो जाते हैं इसके साथ साथ दोषों का क्षय और अग्नि की वृद्धि होकर किये हुए भोजन का सम्यक् परिपाक होता है। व्यायामसेवी समस्त रोगों से मुक्त रहता है ॥७॥

अभ्यङ्गमाचरेन्नित्यं,
सर्वेष्वङ्गेषु पुष्टिदम् ।
शिरः श्रवणपादेषु,
तं विशेषेण शीलयेत् ॥८॥

व्यायामसेवी पुरुष को व स्वस्थ पुरुष को तैल मालिश करना चाहिये, क्योंकि इससे समस्त शरीर में बल का सञ्चय होता है, विशेषतया शिर एवं पैरों की मालिश अधिक गुणवर्धक है। कान में तैल डालने से कान के रोग उत्पन्न नहीं होते हैं ॥८॥

दीपनं वृष्यमायुष्यं,
स्नानमोजोबलप्रदम् ।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाह,
पाप्मनुत् ॥९॥

प्रतिदिन स्नान करने से बल और आयु की वृद्धि होती है तथा कण्डू, मल, श्रम और स्वेद (पसीना) का शमन होता है तथा प्यास तन्द्रा (ऊंघनी) एवं दाह (जलन), पाप दूर होकर तत्काल ओज की वृद्धि होती है ॥९॥

उष्णाम्बुनाधः कायस्य,
परिषेको बलावहः ।
तेनैव तूत्तमाङ्गस्य,
बलहृत्केशचक्षुषाम् ॥१०॥

(यों तो स्नान प्रतिदिन शीतल जल से ही करना हितकर है। किन्तु कोई व्यक्ति शीतल जल से स्नान करने में असमर्थ हो) तो गरम जल से स्नान करना भी उत्तम है। गरम जल से किया हुआ स्नान भी बल को बढ़ाने वाला है। किन्तु गरम जल शिर के नीचे के अङ्गों को ही लाभ देने वाला है। शिर पर डाला गया गरम जल बालों एवं नेत्रों की ज्योति को नष्ट करता है ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुभुक्षितो न योऽश्नाति,
तस्याऽहारेन्धनक्षयात् ।
मन्दीभवति कायाग्नि,
र्नाग्निर्वर्धेन्निरन्धनः ॥११॥

समय पर सदा भोजन करना हितकर है। यदि समय पर भोजन न किया गया हो तो अग्नि स्वयं क्षीण हो जाती है और क्षीण हुई अग्नि फिर उस किये गये भोजन को भी पचाने से असमर्थ हो जाती है ॥११॥

बहु स्तोकमकाले वा,
ज्ञेयं तद्विषमाशनम् ।
आलस्यगौरवाटोप-
शब्दांश्चकुरुते गदान् ।
हीनमात्रं तनोः कार्श्यं,
करोति च बलक्षयम् ॥१२॥

भोजन का अधिक करना, कम करना व असमय में सेवन करना यह विषमाशन कहलाता है। इस विषमाशन से शरीर में आलस्य और भारीपन तथा गुड़गुड़ाहट और अनेक प्रकार के पेट में शब्द उत्पन्न होने लगते हैं जो स्वास्थ्य के लिये हानि-प्रद है।

बहुत कम भोजन करने से भी शरीर कृश और बलहीन हो जाता है ॥१२॥

कुक्षेर्भागद्वयं भोज्यैस्तृतीये,
वारि पूरयेत् ।
वायोः सञ्चारणार्थाय,
चतुर्थमवशेषयेत् ॥१३॥

उदर में कूख के दो भागों को भोजन से पूर्ण करना चाहिये तथा कूख के तीसरे भाग को जल से पूरित करना और चौथे भाग को वायु के सञ्चार के लिये खाली रख लेना चाहिये ॥१३॥

भुक्तस्यादौ जलं पीतं,
कार्श्यमन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं,
श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥१४॥

भोजन के पहले पीया हुआ जल शरीर को कृश (दुबला) बनाता है और अग्नि को मन्द करने वाला है। भोजन के बीच में पीया हुआ जल अग्नि को बढ़ाने वाला तथा श्रेष्ठ है। और वही जल भोजन के बाद स्थूलता (मुटापा) करने वाला तथा कफ को बढ़ाने वाला है ॥१४॥

काले हितं मितं सत्यं,
संवादि मधुरं वदेत् ।
भुञ्जीत मधुरं प्रायः,
स्निग्धं काले हितं मितम् ॥१५॥

समय पर हितकारी और कम तथा सत्य मीठा बोलना चाहिये तथा भोजन यथासमय मधुर और स्निग्ध (घृतादि से युक्त) तथा परिमित भोजन करना चाहिये ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेगान्न धारयेत्किंचित्,
मनोवेगान्विधारयेत् ।
न पीड़ियेदिन्द्रियाणि,
न चैतान्यतिलालयेत् ॥१६॥

मनुष्य को मलमूत्रादि के वेगों को कभी धारण नहीं करना चाहिये, किन्तु मन के वेगों को धारण करना चाहिये । अपनी इन्द्रियों को कभी पीड़ा न पहुँचाये और न उनका कभी लाड ही करे । अर्थात् अपनी इन्द्रियों को सदा वश में रक्खे ॥१६॥

आयुष्मन्तो मन्दजराः
वपुर्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च,
भवन्ति स्त्रीषु संयताः ॥१७॥

स्त्री प्रसंग में संयमी पुरुष, आयुष्मान् (दीर्घ उम्र वाले), देर में बुड्ढे होने वाले, शरीर में वर्ण और बल से युक्त तथा कठिन और स्थिर मांस-पेशियों वाले होते हैं ॥१७॥

रिपोरन्नं न भुञ्जीत,
गणिकान्नमपि क्वचित् ।
प्रतिभूर्न भवेत्क्वापि
न च साक्ष्यं वृथा वदेत् ॥१८॥

शत्रु का अन्न कभी भी न सेवन करे और न कभी वेश्या का अन्न सेवन करे । कहीं जामिन न बने और न किसी की झूठी गवाही देवे ॥१८॥

एतानि पञ्च कर्माणि,
सन्ध्यायां वर्जयेद्बुधः ।
आहारं मैथुनं निद्रां,
संपाठं गतिमध्वनि ॥१९॥

प्रत्येक मनुष्य को संध्याकाल में वर्जित इन पांच कर्मों को नहीं करना चाहिये, जैसे आहार, मैथुन, शयन, पढ़ना और रास्ते चलना ॥१९॥

दिवास्वापं न कुर्वीत
यतोऽसौ स्यात्कफावहः ।
ग्रीष्मवर्ज्येषु कालेषु,
दिवास्वापो निषिध्यते ॥२०॥

दिन में कभी सोना नहीं चाहिये, क्योंकि दिन में सोने से कफ की वृद्धि होकर नाना रोग उत्पन्न हो जाते हैं । किन्तु ग्रीष्म ऋतु में सोने से अधिक नुकसान नहीं है, क्योंकि ग्रीष्मकाल में कफ का क्षय हो जाता है ॥२०॥

इत्याचारं समासेन,
भाषितं यः समाचरेत् ।
स विन्दत्यायुरारोग्यं,
प्रीतिं धर्मं धनं यशः ॥२१॥

इस प्रकार जो आचार संक्षेप से कहा गया है उसी का प्रत्येक पुरुष को यथावत् पालन करना चाहिये, क्योंकि उक्त नियमों का पालन करने से प्रत्येक मनुष्य उम्र, नीरोगता, प्रसन्नता, धर्म, धन और यश को सहज ही प्राप्त कर लेता है ॥२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकटकाल में आपका सहयोग

देश सेवा का अवसर सभी के लिए

किसान :

★ अधिक उत्पादन करें
★ ग्राम-रक्षा दल के सदस्य बनें
★ श्रम बैंक में योग-दान करें

मजदूर :

★ खूब उत्पादन बढ़ायें
★ हड़ताल न करें
★ विवादों को बातचीत से सुलझायें

व्यापारी :

★ मुनाफाखोरी न करें
★ माल का अनुचित संग्रह न करें
★ कीमत न बढ़ायें

महिलायें :

★ फिजूलखर्ची न करें
★ स्वर्ण दान करें
★ गृह-उद्योगों में भाग लें
★ बालकों को राष्ट्रप्रेम सिखायें

सामान्य नागरिक :

★ होम गार्ड के सदस्य बनें
★ सेना में भरती होवें

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टानि

ॐ नमो ब्रह्मप्रजापत्यश्विबलभिद्भरद्वाजकश्यपात्रेयधन्वन्तर्यग्निवेशसुश्रुतचरकदृढबलनागार्जुनप्रभृतिभ्यः ।

स्वस्ति श्रीमल्लक्ष्मीरामस्वामिचरणारविन्दमकरन्दास्वादनपरकमनोमधुपानाम्, सततशास्त्रानुशीलनशुद्ध-मनस्सुमनस्सुविराजितपुरसरस्वतीसेवाहेवाकिनाम्, आयुःशास्त्रानुकूलचेतश्चमत्कारिहारिभावालोक-मार्गप्रवर्त्तिताशेषशिष्यशेमुषीकाणाम्, सङ्घटनशालिशालीनजनमानसमरालानाम्, जनसेवाव्रतैकपरा-यणपरिषत्प्रधानानाम्, चिकित्साचातुरीचर्चितचेतनाचतुरस्रचेतसाम्, हैयङ्गवीनमसृणहृत्पटला-नाम्, जितहस्तानाञ्जितात्मनाम्महात्मनाम्प्राणाभिसरवैद्यरत्नानाम्, आचार्य (प्रिंसिपल) वर्य्याणां श्रीमतां जयरामदासस्वामिभिषगाचार्याणां करकमलयोरिन्दिन्दिरायताम्—

राजस्थानराजकीयायुर्वेदमहाविद्यालयाध्यक्ष्यप्रशासनसेवाविरामग्रहणावसरे समायोजित-प्रशस्तिसुमनोऽञ्जलि-समर्पणक्षणे सादरं सगौरवं सभक्तिश्रद्धञ्च विश्राणितमिदम्

अभिनन्दन-पत्रम्

परमसम्मान्याः श्रीस्वामिमहोदयाः !

समेषामस्माकं महाविद्यालयीयपारिवारिकाणां पुरतः सोऽयं भवद्वियोगपरिसूचितसकलमनः-सन्तापार्णवविरसीकृतः समयः समुपस्थितः, स्मारं स्मारं यं नितान्तं परिखिन्नमानसा अपि भवद्गुण-गणावलीस्मरणशीकरार्द्रां तनुं भावोद्रेकरोमाञ्चितां सम्यगनुभवन्तः कामपि वचोऽतिगां मनो-व्यापारवैधुरीमुपगताः केवलं तत्रभवतां दिव्यावदानानुरणनपरायणमेव स्वान्तःकरणमभिरूपभूयिष्ठ-पारिषद्यमाकलयामः। फलतः कानिचिदेव भावावेशलेशसमर्पकाणि प्रस्खलन्ति पदानि भवत्सेवाया-मुपायनीकुर्मः ।

भिवानिनगरस्थस्वामिकल्याणदासमहोदयद्वारा श्रीमद्दादूदयालुपथानुयायिनां समाजे दीक्षितैः, वाराणस्यादिषु विविधविद्यापीठेषु शब्दशास्त्रादिसंसूचितसांख्यवैशेषिककाणादादिदर्शनविभास्वद्धृदयाजिरैः श्रीमदाद्यवैद्यभगवद्धन्वन्तर्युपम-पीयूषपाणि-सद्गुरुवर्य्य-श्रीलक्ष्मीराम-स्वामितल्लजपाणिपल्लवच्छाये-जय-पत्तनस्थमहाराजसंस्कृतकॉलेजस्यायुर्वेदविभागे प्रपठद्भिः सर्वभूतदयान्वितस्य चेतःस्वच्छन्दचर्यापरिणत-करुणारामविश्रामधाम्नः खल्वायुर्वेदस्य प्रेष्ठस्तत्तादृशः प्रकाशः सात्विकभावाप्यायितात्मभिर्भवद्भिः समासादितो येन दृष्टिम्पीयूषवृष्टिम्मधुरमधुरसस्यन्दिनीं सिद्धवाणीम्पाणी चामीकरवपुःप्रकर्षकरसुधाकर-श्रेणी समासादयद्भिस्सत्यश्चन्द्रानुकारस्समाविष्कृतः। 'आदानं हि विसर्गाय सतां वारिमुचामिवेति कविकुलगुरोस्सुप्रसादाभिवर्षिणीं वचःकादम्बिनीमनुकुर्वद्भिर्निरन्तरमस्मिन्महाविद्यालय एव प्रवक्तृ-प्राध्यापक-प्रायोगिकविभागाधीक्षकपदान्यलङ्कुर्वद्भिः श्रीमद्भिर्विद्यार्थिजनमानसकुसुमविकासाय मनसा वाचा कर्मणा कामं परिश्रान्तम् । ततोऽनेकवर्षतपःपरिपूताध्यापनराजमार्गं दिदर्शयितुमिवाध्यक्षरूपेण प्रशासकत्वमप्यङ्गीकृतम् । विविधोत्तरदायित्वपूर्णे धूर्वहेऽस्मिन्पदे व्यापृतमनस्कैरप्यध्यापनप्रियता न विरहिता । किम्बहुना-छात्राणाम्बुद्धिविवर्द्धनाय निकषभूता वाग्विवर्द्धिन्योऽनेकाः परिषदोऽपि भवद्भिः सदैवायोजिताः, किञ्च तेषामभावाभियोगप्रदर्शनाय, तान् सङ्घबद्धताञ्च शिक्षयितुमिव छात्रसङ्घस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्माणमपि कृतम्, अपरञ्च मन्दाल्पायुर्मतित्वाद्विशालायुःशास्त्रावशीलनशिथिलितोत्साहान्विद्यार्थीन् प्रतियोगितामिषेण शास्त्रश्रमाय समावर्जयितुं राजस्थानप्रान्तीयसम्मेलनमञ्चे स्वीयव्ययेन श्रीमतां स्वर्गीय-श्रीस्वामिलक्ष्मीरामाचार्याणां स्मारयित्रीञ्चलविजयोपहाररूपिणीं भगवतो धन्वन्तरेः पञ्चशत-तोलकमानमितां राजतीं प्रतिमामवतारयद्भिः-'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! अभ्युत्थान-मधर्मस्य तदात्मानं सृजाम्यहम्' इति भगवद्वचः सत्यापितमेवेत्यहो भवतां श्लाघनीयता। एवमेव काशीहिन्दूविश्वविद्यालयेऽपि छात्रसङ्घस्य निर्माणाय प्रेरणा बीजरूपेण भवद्भिरेव प्रत्ता।

आयुर्विद्यासङ्क्रमणपरम्परा सुविशुद्धा नियमबद्धा सत्पात्रे विन्यस्ता विद्येव फलवती भवे-दित्यर्थं प्रवर्त्तितासु वाराणसी-जामनगर-गुरुकुल-कांगडी-बिहार-दिल्ली-राजस्थानादिप्रान्तीयानेकोपाधिपरी-क्षासु परीक्षकत्वमङ्गीकृत्य सम्यक् पात्रालोचनं प्रकुर्वद्भिर्विद्याया वीर्यफलवत्तासंरक्षणं साध्वेव कृतं श्रीमद्भिः।

राजस्थान-राज्यप्रवर्त्तितायुर्वेदविकासमण्डल (बोर्ड) सदस्यरूपेण भारतीयभैषज्यमण्डल (बोर्ड) स्य राजस्थानप्रान्तीयस्य सदस्यरूपेण चायुर्वेदविकासाय सर्वतोभावेन योगदानं प्रकुर्वद्भिरपि विशेषतः शिक्षणक्रमनियामिकासु परिषत्सु परीक्षासमितिषु चाद्ययावत्प्राप्तप्राचीनग्रन्थाध्ययनाध्यापनं साकल्येन संस्कृतवाङ्मयमाध्यमेनैव भवेदिति-आयुर्वेदपोषणाय चिरात्प्रवृत्तां सुस्पष्टां विचारधारां निर्भीकतया प्रवाहयद्भिर्भवद्भिर्नवीनापूर्णविज्ञानपरायणैकमात्रायुःशास्त्राध्यापनपक्षपातिविचारान्ध-कारध्वंसो यथा कृतस्तथैव 'कृत्स्नो हि लोको बुद्धिमतामाचार्यः' इति चरकोक्त्यनुसारान्नवीनज्ञाना-वर्जनतो वामतापि न स्वीकृता। फलतः श्रीमद्भिः सुसंस्कृता सेवामायुर्वेदशिक्षास्रोतस्विनी सरसयति सम्प्रत्यायुःशास्त्रमहीरुहमित्यपूर्वोऽयं क्रमो भवतश्चमत्कारयति सर्वानेव सुविदुषः। परं सैषायुर्वेद-पोषणशैली-ऋते विश्वविद्यालयप्रवेशमसुकरा संरक्षितुमिति मनसिकृत्य सर्वप्रथमं भवद्भिरेवो-दयपुरीयाधिवेशने राजस्थानप्रान्तीयवैद्यसम्मेलनाध्यक्षपदात् 'राजस्थानविश्वविद्यालये स्वतन्त्रायुर्वेद-व्यवस्थापकसमिति (फैकल्टी)-निर्माणं त्वरितमेव विधेय'मिति प्रस्तावितेन हार्देन विश्वविद्यालय-योजनाविर्भावकस्तात्कालिको जयपुरराज्यप्रधानामात्यः सर मिर्जा इस्माइलमहोदयः शिक्षामन्त्री श्रीपण्डितदेवीशङ्करतिवारिमहोदयश्च शिष्टमण्डलेन सह गत्वानतिवेलमेव परिचायितः। इत्यहो श्रीमतां कार्यसम्पादिनी बद्धपरिकरता।

राजस्थाने शतवर्षतोऽपि चिरात्प्रवृत्तोऽयमायुर्वेदशिक्षणक्रमः स्वातन्त्र्येण विकसिते महा-विद्यालय एव पुष्पितः फलितो भविष्यतीति पूर्वानुवृत्तविचारपूरको जयपत्तनस्थमहाराजसंस्कृतकॉलेजा-त्पृथगायुर्वेदमहाविद्यालयारम्भोऽपि भवतां महत्साहाय्यमलब्धेति न तिरोहितमत्रत्यानां सुविदुषा-ञ्चक्षुष्मताम्। तथारूपे परिणता चेयं कामदुघायुर्वेदशिक्षणपरम्परा भवतामाध्यक्ष्य एव नवीनभवन-कलेवरधारणकर्मणि प्रवृत्ता बाह्यं सुस्वरूपमप्यलभतेति स्पृहणीयतमा भवद्भाग्यशालिता। महाविद्या-लयस्यान्तरिकमुपबृंहणमपि बहुष्वंशेषु भवत्साधितमेवाभिवीक्ष्यते—आयुर्वेदस्याष्टानामप्यङ्गानां विभा-गशोऽध्यापनायाध्यापकानां संख्यावृद्धया—स्वतन्त्रसंस्कृताध्यापनपरम्परया—प्रायोगिकशिक्षणायानिवार्य-पञ्चाशत्संख्याकरोगिशय्यावृद्धया—कतिपयप्रमुखरोगपरिजिहीर्षया चिराभिलषितानुसन्धानशालायाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वातन्त्र्येण चत्वारिंशद्रोगिशय्यासहितायाः संस्थापनया साह्लादं सगौरवञ्च। इत्थञ्चिरादायुर्वेदाध्यापनात्मकेऽस्मिन् ब्रह्मयज्ञे भवद्भिः प्रायः सहस्रद्वयी शिष्यप्रशिष्याणां दीक्षिता। स्नातकाश्च ते सम्प्रति चिकित्सनकर्मणा—अध्यापनकलया—प्रशासकपदेन—भेषजनिर्माणपरम्परया—नवनवोन्मेषशालिन्यान्वेषणप्रणाल्या च विश्वोपकारकन्तमिममायुर्वेदपुरुषं सम्यगुपसेवन्ते—इति सत्यं गुरोरानृण्यम्भवद्भिर्निष्पादितम्।

भवद्धृदयेऽहर्निशमायुर्वेदोन्नतेर्विचाराः परिस्फुरन्ति। यथा हि-आयुर्वेदशिक्षादीक्षिताः सर्वेऽपि वैद्या अभिनिवेशपूर्वकमेतदीयसिद्धान्तानूरीकृत्यैव रोगाणान्निदाने तन्निरसने च यतेरन्-एतद्वर्णितान्यौषधान्येव सर्वाणि शास्त्रोक्तरीत्या संगृह्य निर्माय च दोषदूष्यादिकल्पनासम्यग्विकल्पितोचितानामेव योगानां विनियोगं कुर्वीरंस्तदा निश्शङ्कमेवायुर्वेदपताका दोधूय्येत विश्वस्मिन्नपि विश्वेऽस्मिन्। कर्मणोऽस्यनिर्वाहार्थं शिक्षणक्रमो यथा भवद्भिः स्वयमभ्यस्य नियमितस्तथैवौषधानामागमार्थं भवद्भिरनेका वनयात्रा अपि सोत्साहं समायोजिताः। रसायनशालायामनेके सिद्धयोगा अपि सपरिश्रमं विनिर्मिताः।

आधुनिकनवीनविज्ञानचाकचक्यलुब्धा नव्यशिक्षादीक्षिता लोकाः शासकाश्च न विश्वसन्ति सरणिमिमाम्। अतोऽनागतबाधाप्रतिषेधार्थं समापतत्प्रत्यूहप्रतिवारणाय च निखिलभारतीयायुर्वेदमहासम्मेलनस्य कर्णधारेषु-अग्रगण्यता भवन्तमप्यनुसरति। प्रायः सर्वेष्वपि महासम्मेलनाधिवेशनेषु सत्यनिश्चितसिद्धान्तस्य प्रतिपादनाय यथा भवद्भिः प्रयत्यते-विविधासु शास्त्रचर्चापरिषत्सु च यथा शास्त्रकोटीनां समुदीरणपुरस्सरमाशयस्फोटः क्रियते, तथा दर्शन्दर्शममन्दमादरभृतो वः प्रीतीरुत्पद्यते।

भारतव्यापिन्यायुर्वेदसङ्घटने केचन नेतृत्वाभिलाषिण आत्मश्लाघायै यतमाना आविलयन्ति लोकतन्त्रसिद्धान्तान्। समेषान्तेषामावर्जनं सर्वजनीनविश्वासभूमिभूतमात्मानमाविष्कुर्वद्भिरप्यप्रकम्पितैर्भवद्भिः—ऋते सत्पक्षहानेर्यथा क्रियते तथा प्रकम्पनमूलभूतामसिधाराप्रचलनसमां मनसः स्थिरां शान्ति सर्वत्र प्रचारयितुकामाः—लाहौर—बड़ौदा—राजकोट—दिल्ली—मद्रास—कोट्टाक्कल्—कोलम्बोप्रभृतिषु नगरेषु गतागतं कुर्वाणा भवन्तो भगवतस्तथागतस्य सम्यग्बुद्धस्य बुद्धस्येव शान्तां स्मितविराजितां मूर्त्ति प्रत्यक्षमिवानुभावयन्ति। बड़ौदानगरे मध्येसभमायुर्वेदस्य 'सन्तविनोबा भावे' पदवाच्यं महापुरुषं समुपस्थापयितुं-सोऽयमेव प्रभावो भवतामालोकितचरः।

लोकयात्रायां सर्वथा स्वगुरुचरणानुसरणं कुर्वद्भिर्भवद्भिस्तत्प्रतिष्ठापित 'श्रीस्वामीलक्ष्मीरामट्रस्ट' इत्याख्येन समाजसेवकानुष्ठीयमानेषु सर्वेषु शुभारम्भेषु महता प्रयत्नेन तद्भावनाः परिपाल्यन्ते। एवमेव समाजस्य सर्वेषामपि वर्गाणां समानरूपेण संस्कृतशिक्षणाय समुपक्रान्तस्य दादूमहाविद्यालयस्य नियतम्परिचालनम्, धन्वन्तर्यौषधालयस्य सर्वास्वपि प्रवृत्तिषु नियतत्वम्, श्रीमद्दादूदयालुसम्प्रदायस्य सर्वतोमुखसमुन्नतिकामनया स्थापितायाः श्रीमद्दादूदयालुमहासभायाः परिचालनञ्चेत्यादि-कार्यजातम्भवतां सहजां समाजसेवाभावनां प्रदर्शयत्येव।

भावनयानया भावितैरेव भवद्भिः श्रीमद्दादूदयालु महात्मनां समभावप्रवर्त्तकेन सहजमार्गेणैव सामान्यजनतायाः सामाजिकीमाध्यात्मिकीञ्च समुन्नतिङ्कामयमानैः 'श्री दादूचतुश्शताब्दीमहोत्सवसदृशाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समारोहा अपि समायोजिताः । एवमेवेन्द्रप्रस्थीय-बनवारीलालायुर्वेदमहाविद्यालयस्य स्वर्णजयन्ती-महोत्सवोऽपि भवत्साभापत्य एव-समभूदिति का गणना भवताम्बुद्धचनुमेयश्रमस्य ।

'धर्मादर्थश्च कामश्च स किमर्थन्न सेव्यते' इति सन्देशवाहकैर्भवद्भिर्धार्मिकसंस्थानानां संरक्षणाय, तद्द्वारा च भौतिकवादविजडितेऽस्मिन्भारते भवेत्पुनराध्यात्मिकजागरणम्, सर्वेऽपि साधवः परकार्यसाधनेन सत्यम्भारतीयप्राचीनसंस्कृतेः संरक्षका अभिवर्द्धयितारश्च भवेयुरिति सदुद्देश्यसिद्ध्यर्थं निखिलभारतीयसाधुसमाजस्य सङ्घटने महान् प्रयासः कृतः । तस्यैव च राजस्थानशाखायाः सभापतिपदेन महान् संस्कृतिपोषः कृतः–इति नाविदितचरं साधूनां समदृशाम् ।

संस्कृतिसंरक्षणाय समायोजनीयेषु बुद्धचनुमेयकार्येषु भाषायाः स्थानं सर्वोपरि मन्वानैर्भवद्भि-र्भगवत्याः सुरभारत्यास्तद्दुहितृभूताया हिन्दीभाषायाश्च समुन्नतयै या भावना प्रदर्श्यते कार्यरूपे चानुष्ठी-यतेतामेव सूचयति सम्यक्समये समये संस्कृतसाहित्यसम्मेलनस्य निखिलभारतीयस्य जयपुराधिवेशने स्वागतमन्त्रित्वम्, अत्रैव हिन्दीसाहित्यसम्मेलनस्योपस्वागताध्यक्षत्वम्, अत्रत्याया एव संस्कृतवाग्-विवर्द्धिन्याः परिषदः संरक्षकत्वम्, संस्कृतरत्नाकरपत्रस्य नैकवर्षाणि स्वीयसाहाय्येन प्रकाशनम्, 'भारती' नामकस्य पत्रस्य साहाय्याचरणम्, राजस्थानसंस्कृतसाहित्यसम्मेलनस्य सर्वास्वपि प्रवृत्तिषु साधिकारं क्रियाशीलता चेत्यादीनि कार्यजातानि भवतांल्लोकातिशायि हार्दं प्रकटयितुमलमस्मिन् क्षेत्रे । तथैव राजनैतिकदृष्ट्याभिनिवेशवर्जं सर्वेषां दलानां सत्कार्येषु सदा दर्शितसमग्रसमुद्यमैः श्रीमद्भिः सर्वभूतहिते-रतत्वमायुर्वेदज्ञस्य सत्यापितमेव । तस्यैवोदर्करूपायितमेतद्यत्-सुदूरं बम्बई-कलकत्तादिनगरस्थिताः समस्त-भारतप्रतिनिधिभूताः सुविदुषो वैद्या भवन्तन्नैकवारमभ्यनन्दन्निति विदितचरमेव समेषामायुर्वेदज्ञानाम् ।

धर्मैकतानमतयः सत्साधवः !

परमसौभाग्यशालिभिर्भवद्भिर्निरन्तरम्महता श्रमेणार्त्तजनसंसेवया निष्क्रयभूतं यद् द्रव्यजात-मवाप्तम्–तस्योचितोपयोगाय भवन्तो वीतशङ्कं दानधारां प्रवाहयन्तो 'दानभोगनाशात्मिकासु' तिसृष्वपि प्रवृत्तिषु प्रथमाङ्गतिमेवोत्तमां परिकल्पयन्तो लक्षरूप्यानुमितद्रव्यराशेः समये समये विनियोगमकुर्वन्, किञ्च वीतरागाणां महात्मनान्निर्मक्षिकमध्यात्मसाधनभूतं विश्रामस्थानमपि भवद्भिर्गङ्गाप्रवाहसमीपे कनखले दादूबागनामके स्थाने निर्मापितमिति कियद्वा वक्तव्यम् । न स्वल्पेन कालेन भवद्गुणगणौघो वर्णयितुं सुशकः ।

मान्याः ।

अन्ते च नानोपकारैर्विश्वशरीरं विराजं पुरुषं समुपसेवमानैर्भवद्भिः सम्प्रति यः कार्योपरामः समारब्धः, तमपि 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम्' इत्यनुसारम्भगवत्कैङ्कर्यमेवाधारयद्भिः सर्वेऽपि प्राणिनः स्वकीयदीर्घजीवनानुभवोपदेशैः सत्पथेनैव प्रवर्त्तनीयाः–इत्याशंसाना वयं कृतकृत्यं भवन्तं मुहुर्मुहुरभिनन्दयन्तो महाविद्यालयतत्सेवाविरतेभ्यो भवद्भ्यो विरहिताः प्रमोषितचिन्तामणिरत्नाः कान्दिशीका इव तरलितचित्तभूमिपरिवर्त्तनविलुलित-मनसस्तृषितचातका इव चेत्कालेऽभिवर्षुकैः प्रावृषेण्यैः पयोदैरिवान्तरिकभावैः समूढां कादम्बिनीमिव भवदनुकम्पामाकलयिष्यामस्तर्हि पुनरप्यचलशैलशिखरायितास्माद्दृशव्यामुग्धजनस्पर्शमात्रेणैव वर्षन्तीभि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रम्बुधाराभिरिवास्मदभिमुखीभूतप्रवृत्तिभिः संसिक्तामृतलतिकामिवाङ्कुरितामस्मन्मतिवल्लरीमनुभविष्यामः। फलतो नवोन्मिषितास्माकम्प्रतिभा निरन्तरम्भास्वद्रत्नप्रसवित्री भविष्यति, तत्प्रकाशे च निरन्तरमस्यायुर्वेदमहाविद्यालयस्योपबृंहणं भविष्यत्येव। आशास्महे च यद्भाविन्यां जीवनयात्रायामायुर्वेदधूर्वहानामभारतप्रसिद्धानां श्रीलक्ष्मीरामाचार्याणामुत्तराधिकारितां याथातथ्येन निर्वाहयद्भिः समस्तेऽपि भारते सम्यगायुर्वेदोद्धारायायोजनीयेषु साम्प्रतिकेष्वागामिषु च शुभारम्भेषु मनसा वाचा कर्मणा प्रयत्नो विधास्यते। तदर्थञ्च भगवन्तं धन्वन्तरिं याचामहे भवतां शाश्वतिकम्भद्रम्। तद्भावनायुक्ताश्चैकत्र समवेताः स्वरेणैकेन व्याहरामो यत्—

भिषजां साधुवृत्तानां भद्रमागमशालिनाम्।
अभ्यस्तकर्मणां भद्रं भद्रं भद्राभिलाषिणाम्॥

राजकीयायुर्वेदमहाविद्यालयः	दिनांकः—	इति भवद्गुणाकृष्टचेतसो
माधवविलासोपवनम्	**मार्ग.शु.वि.रं. २०२०**	राजस्थान-राजकीयायुर्वेद-महाविद्यालयपरिवारस्य
जयपुरम्	३०-११-१९६३ ई.	समेऽपि सदस्याः।

आयुर्वेद-मार्त्तण्ड, भिषगाचार्य, वैद्यरत्न, प्राणाचार्यादि, विविधोपाधि-
विभूषित विद्वद्वर्य अखिल श्री विभूषित—

स्वामी श्री जयरामदासजी महाराज के

कर-कमलों में सादर सर्मपित

अभिनन्दन-कुसुमाञ्जलि

आचार्य प्रवर !

सरलता की आप साक्षात् मूर्ति हैं, अभिनिवेश की आप में गन्ध तक नहीं है। निश्छल व्यवहार के कारण आप सर्वप्रिय तथा अजातशत्रु कहे जाते हैं। आपकी गुणगरिमा को शब्दों द्वारा व्यक्त करना कठिन है। आपकी विमल अवदात यशोराशि भारत के प्रत्येक प्रान्त में शिष्य-प्रशिष्यों द्वारा व्याप्त है। यह आप ही की अप्रतिम प्रतिमा का आकर्षण है कि सुदूर प्रान्तों के अनेक छात्र आज भी यहाँ उपस्थित हैं।

आपकी आयुर्वेद में प्रगाढ़ भक्ति, श्रद्धान्वित धर्मपरायणता, छात्रों पर अतुल स्नेह, निर्भ्रान्त शास्त्रीय ज्ञान, विमल चरित्र, समदृष्टि अपूर्व त्याग, एकान्त निष्ठा, निष्पक्ष सद्भावना, विनीत सौजन्य आदि एक से एक उत्कृष्ट गुण अवर्णनीय हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेद के अनन्यव्रती !

संस्कृत कालेज से ही आयुर्वेद विभाग की आप सेवा करते आ रहे हैं। एक प्रवक्ता से लेकर प्रायोगिक विभागों के अध्यक्ष, प्राध्यापक और प्रधानाचार्य का कार्य पूर्ण मनोयोग और सबके चिरस्मरणीय सन्तोष के साथ आपने किया। आपमें अधिकार का मद कभी नहीं रहा। अपने अधीनस्थ स्टाफ व कर्मचारियों को आपने सदा अपने परिवार का सदस्य समझा, आत्मीयों जैसा व्यवहार किया। छात्रों को आप सदा अपने पुत्रवत् समझते रहे।

अद्भुत समाजसेवी एवं विद्या व्यवसायव्यसनी !

कालेज में शैक्षणिक प्रवृत्तियों के संचालन के अतिरिक्त सार्वजनिक एवं आयुर्वेद क्षेत्र में आपकी सेवायें सर्वजनविदित है। राष्ट्रीय स्वाधीनता संग्राम के समय आपने आर्थिक तथा अन्य प्रकार मे सक्रिय सहयोग दिया है।

आयुर्वेद कर्णधार !

प्रादेशिक एवं निखिल भारतीयायुर्वेद-महासम्मेलन के आप अन्यतम सदस्य और अनेक बार पदाधिकारी भी रहे हैं। आपने सम्मेलन में दलबन्दी को दूर कर एकता स्थापित करने के लिए अपने व्यक्तित्व का उपयोग किया है।

आयुर्वेदज्ञों की आपसी फूट और मतविरोध से आपको बड़ा क्षोभ होता है। आयुर्वेद का शिक्षण-विश्वविद्यालयीयस्तर पर हो, ऐसी आपकी कामना लम्बे अर्से से रही है और इसका मुख्य उद्देश्य आयुर्वेदशिक्षा, वैद्यों व स्नातकों के उच्चस्तरीकरण का होना है, इसलिए राजस्थान विश्वविद्यालय में आयुर्वेदफैकल्टी निर्माण हो और राज्य के उन्नतस्तर के कालेज उससे सम्बद्ध हों और आयुर्वेद स्नातकों को वही मान्यता मिले जो अन्य चिकित्सा पद्धति के स्नातकों को मिलती है। इसके लिए आपकी भावनात्मक लगन है। केन्द्र में आयुर्वेद कौंसिल बनकर एक रीति-नीति से आयुर्वेद शिक्षण, अनुसंधान, चिकित्सा एवं विभागीय प्रशासन, औषध निर्माण एवं रजिस्ट्रेशन का कार्य हो, जिस तरह इन्डियन मेडिकल कौंसिल के निर्देशानुसार आधुनिक चिकित्सापद्धति के क्षेत्र में होती है। तभी आयुर्वेद के मानदण्ड और स्नातकों व उनकी उपाधियों के मानदण्ड एवं राजकीयायुर्वेद सेवाओं के मानदण्ड में उच्चता एवं एकरूपता आ सकेगी।

श्री लक्ष्मीराम स्वामी ग्रन्थमाला से अमूल्य आयुर्वेदिक एवं धार्मिक साहित्य का प्रकाशन आपके ही निर्देशन में हुए हैं, जो साहित्य के निधि हैं।

धार्मिक समन्वयवादी सन्त !

दादूपन्थी होते हुए भी आपकी भावना सभी धर्मों व सम्प्रदायों के प्रति अत्यन्त उदार है। आप जैसे विरक्त साधु, गुरु और प्रशासक के वियोग से हम सबको क्लेश होना स्वाभाविक है, परन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यह एक नियत घटना है। अतः इसे नियति का विनियोग मानकर आत्मसन्तोष करना ही पड़ता है। हम इस अवसर पर श्रीमान् का हार्दिक अभिनन्दन करते हुए यह सुरभिविहीन पुष्पाञ्जलि हार्दिक श्रद्धा एवं गद्गद वाणी से श्रीमान् के कर-कमलों में समर्पित करते हैं, और आशा करते हैं कि आप अपने अकिंचन शिष्य-समुदाय की बाल-सुलभ त्रुटियों को क्षमा करते हुए उन्हें सदा अपने हृदय में स्थान देंगे। परमपिता परमेश्वर से प्रार्थना है कि वह आपको पूर्ण शतायु बनावें और आप स्वस्थ एवं शक्ति-सम्पन्न रहकर आयुर्वेद एवं मानवता की अधिकाधिक सेवा करते रहें।

दादुपथ-लक्ष्मी-मानस हंस, वैद्यकुल के उज्ज्वल अवतंस।
हृदयगत भावों के अनुकूल, समर्पित यह अभिनन्दन फूल।

हम हैं आपके विनीत शिष्य
राजकीय आयुर्वेद महाविद्यालय जयपुर के छात्र

चिकित्सकचूड़ामणि, आयुर्वेदरत्न, आचार्यप्रवर, श्रद्धेय श्री स्वामी जयरामदासजी भिषगाचार्य के करकमलों में समर्पित

अभिनन्दन पत्र

श्रद्धेय आयुर्वेद-दिवाकर !

आपके चरणों में बैठ कर शाश्वत आयुर्वेद विज्ञान का ज्ञानार्जन करने वाले आपके शिष्य-प्रशिष्य रूपी किरणों से आज राजस्थान का आयुर्वेद-जगत् प्रकाशमान है। उनके मानस में आपकी सहज सौम्य मुखाकृति निरन्तर विद्यमान रहकर कठिन परिस्थितियों में उन्हें मार्ग-दर्शन करती है। वे आपके द्वारा प्रदत्त आयुर्वेद विज्ञान की ध्वजा को अहर्निश उत्तरोत्तर ऊंची करते हुए फहरा रहे हैं एतदर्थ शिष्यवर्ग की ओर से आपको शत शत अभिवादन।

चिकित्सा विज्ञानाचार्य !

दूर दूर से आपके यशोगान सुनकर आपके पास चिकित्सार्थ आये हुए आतुरों का आधा रोग आपके दर्शन मात्र से ही मिट जाता है। इसके बाद आपके पीयूषवर्षी करकमलों द्वारा जब चिकित्सा व्यवस्था होती है तो आपके आयुर्वेद विज्ञान के असीम सैद्धान्तिक व क्रियात्मक ज्ञान से रोग के समूल नष्ट होने में समय नहीं लगता। इस प्रकार शतशः आधुनिक चिकित्सकों द्वारा प्रतिख्यात रोगी समुदाय ने आपसे दीर्घजीवन, आरोग्य एवं बल प्राप्त किया है। अतः हे आयुर्वेद वैजयन्ती के परिधारक ! रोगीवर्ग की ओर से आपके चरणों में शतशः प्रणिपात।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्य जगत् के प्रकाशस्तम्भ !

जब जब वैद्य समाज सामयिक आपदाओं से किंकर्तव्यविमूढ़ होकर दिग्भ्रान्त हुआ है तब तब आपने उसे मार्गदर्शन दिया है। आप वैद्य जगत् की डगमगाती नौका के सुदक्ष मांझी हैं। आपने भगीरथ प्रयत्नों, निरन्तर संघर्षों एवं शाश्वत श्रमशील रहकर राजकीय आयुर्वेद महाविद्यालय को वर्तमान स्वरूप दिया है। धन्वन्तरि औषधालय को आदर्श आयुर्वेद चिकित्साकेन्द्र बना सम्पूर्ण भारतवर्ष के सामने आदर्श स्थापित किया। अतः आयुर्वेद के अनुयायियों तथा श्रद्धालुओं की ओर से आपका जय जयकार।

मानवता स्वरूप !

आपके द्वारा संचालित सामाजिक, शैक्षणिक एवं चिकित्सा विषयक प्रवृत्तियों की संपूर्ण सफलता, आपकी श्री, ज्ञानगरिमा तथा समृद्धि का आपको लेशमात्र भी गर्व नहीं है। आप पूर्ण वीतराग सन्त हैं। करुणा सदा आपके नयनों से स्रवित होती है। अतः शुद्ध-बुद्ध स्वरूप गुरुवर्य ! पुनः पुनः आपका अभिनन्दन करने में हम सब अकिंचन गौरव अनुभव करते हैं।

शाहपुरा
९-१२-६३

हम हैं आपके
जिला वैद्य सभा, जयपुर के समस्त सदस्य

जयति सत्यं ज्ञानमनन्तं ब्रह्म आयुर्वेदश्च।

आयुर्वेदोद्धारव्रतानां राजस्थानमौलिमुकुटीभूतजयपुरस्थराजकीयायुर्वेद-महाविद्यालयप्रधानाचार्याणां यतिवर्यधुर्याणां

श्रीमतां स्वामिजयरामदासमहाभागानां

करसरोरुहयोः

सादरं सश्रद्धं सस्नेहं समर्पितम्

अभिनन्दनपत्रम्

हृद् यस्य श्रितवान्निरङ्कुसरलं देवी गिरामीश्वरी
लक्ष्मीश्चापि विहाय चञ्चलमयीं स्वीयां प्रवृत्तिं तथा।
भेजे शीतलनिर्मलञ्च सततं रामोऽप्यरामाश्रयं
लक्ष्मीरामभिषग्वरो विजयते संन्यस्तविश्वामयः ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छैलीं परिवर्द्धयन् विरचयन् नव्यां प्रणालीं तथा
छात्रव्रातनिषेविताङ्घ्रिरतुलां श्रद्धां समुत्पादयन् ।
अज्ञानान्धमधोदधद्धितमिताभाषी समुज्जृम्भते
स्वामी श्रीजयरामदाससुमतिस्तत्पट्टशिष्योऽधुना ॥२॥

रोगव्याप्ततनूननूनविकलानुल्लासयन्मानवान्
व्याधिध्वंसधियो भिया विरहितानध्यापयंश्छात्रकान् ।
गच्छत्स्वच्छवचः प्रवाहविगलत्पीयूषपूरैर्जनान्
धन्यान् संविदधत्सुधीर्विजयते विद्यच्चक्रचूडामणिः ॥३॥

जेता रुजां सिद्धसुधस्तपस्वी
नेता बुधां शान्तिधनो मनस्वी ।
यशस्विवर्चस्विवचस्विवर्यः
स्वामी सुधीः श्रीजयरामदासः ॥४॥

यस्य प्रसन्नेन्दुकलामलं मनः
सदैव सद्वैद्यसमुन्नतौ रतम् ।
तमद्य सम्प्राप्य दृशोः पुरः स्थितं
दैवीं कृपां कामपि सुष्ठु चक्ष्महे ॥५॥

विभिन्नपाखण्डजलाविलेऽधुना
विषीदति क्षीणतमा भिषक्तरिः ।
परं वयं शान्ततमा यतो भवान्
पटूत्तमो नाविकभूमिमाश्रितः ॥६॥

मा गा विषादं गण मा विवादं
प्रसादमासादय सर्वभावम् ।
प्रवादमुद्भेदय लोकवादं
वैद्याः सदावर्गवियोगरागाः ॥७॥

स्वं रक्षितुं वर्द्धितुमीहमाने-
यं संस्कृतिः खिद्यति भारतीया
विरौति दीना ससुतापि हीना
किं कश्चिदास्ते नु ममापि सेवकः ? ॥८॥

विचक्षणः सक्षण उज्ज्वलात्मा
भावादृशः सक्षम उन्नयाय ।
एषा हि शैली किल भारतीया
विपन्नवित्राणकरो महात्मा ॥९॥

११ जनवरी १९६१
माघकृष्ण ९ बुधे २०१७ विक्रमः
५ ए, कलाकार स्ट्रीट, कलकत्ता-७

वयं स्मः
श्रीधन्वन्तरिपरिषदः सदस्याः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीधन्वन्तरये नमः

आयुर्वेद मनीषी वैद्यवर्य श्रीजयरामदासजी स्वामी-भिषगाचार्य वाइसप्रिंसिपल-गर्वमेन्ट आयुर्वेद कालेज जयपुर (राजस्थान) की सेवामें-सादर सप्रेम समर्पित–

अभिनन्दन-पत्र

मान्यवर महोदय ?

भारतप्रसिद्ध, स्वनामधन्य, आयुर्वेदमार्तण्ड स्व० स्वामी लक्ष्मीरामजी महाराज, जयपुर के उत्तराधिकारी के रूप में आपने अपनी कुशाग्रबुद्धि, गुरुशुश्रूषा व गुणगरिमा द्वारा वैद्यजगत् में अपना अपूर्व स्थान प्राप्त किया है। स्वामीजी महाराजके पदचिन्हों पर चलकर उनके द्वारा निर्दिष्ट मार्गका आप अक्षुण्ण पालन करते हैं।

विद्वद्वर ?

आप विगत अनेकों वर्षोंसे आयुर्वेदाध्यापन द्वारा शतशः शिष्य-प्रशिष्योंको ज्ञानामृतपान कराते रहे हैं। जन-कल्याणकी भावनासे, चिकित्साशैली भी आपकी सुपरिष्कृत व शास्त्रीय आधार पर स्थिर है।

त्यागमूर्ति ?

आपने अनेक संस्थाओं में सक्रिय सहयोग प्रदान किया है। श्री स्वामी लक्ष्मीराम ट्रस्ट, श्रीधन्वन्तरि औषधालय, श्री दादू महाविद्यालय तथा बहुत-सी सांस्कृतिक प्रवृत्तियोंके आप अधिकृत पदाधिकारी एवं प्रमुख संचालक हैं।

महामना !

राजस्थान वैद्य सम्मेलन, उदयपुर में अध्यक्षपद से आयुर्वेदोद्धार के लिए आपने संकेत दिया था, वह हमें स्मरण है। आपका सहज सौजन्य, संयम, त्याग, तप, सरलता तथा विद्वत्ता आदि विशेषताओं से हम प्रभावित हैं।

आप जैसे कर्मठ, विरक्त नेता आयुर्वेद-क्षेत्रमें अनुकरणीय तथा अन्यत्र असुलभ ही कहे जा सकते है। हम आशा करते हैं कि भगवान धन्वन्तरि की अनुकम्पा से आप चिरकाल तक आयुर्वेद शास्त्र की सेवा तथा वैद्यों का पथप्रदर्शन करते रहें।

दिनाङ्क १७ मार्च १९५४
युनिवर्सल हेल्थ इंस्टीट्यूट
बम्बई

हम हैं आपके—
मुम्बई वैद्य सभा
आयुर्वेद हितैषिणी सभा
श्री राजस्थान आयुर्वेदिक सोसायटी तथा
बम्बई आयुर्वेदिक-सोसायटी के
सदस्यगण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ श्री धन्वन्तरये नमः ❀

श्रीमान् परमसम्मानास्पद, आयुर्वेदमार्तण्ड, प्राणाचार्य, वैद्यरत्न, सरलहृदय, सर्वत्रप्रशमगुणदर्शी निर्भीकवक्ता, सुचिकित्सक, आयुर्वेदाम्नायसंरक्षण-परायण, शिक्षकशिरोमणि, सहजसौजन्यदान दाक्षिण्यादिगुण-गणविभूषित, परमोत्साहसम्पन्न, स्नेहमूर्ति श्री जयरामदासजी भिषगाचार्य के करकमलों में सादर समर्पित

अभिनन्दन-पत्र

परम आदरणीय—

परमश्रद्धेय स्वनामधन्य स्वामी श्री लक्ष्मीरामजी महाराज के सान्निध्य में रह कर जब से आने सर्वभूत हितैषी आयुर्वेद की दीक्षा ली, तब से आज तक निरन्तर जिस अदम्य उत्साह और स्नेह से आपने आयुर्वेद की सेवा की है। वह वस्तुतः अनुकरणीय है। आपकी दूरदर्शिता और संगठन-प्रियता का ही उज्ज्वलतम प्रतीक यह जयपुरीय सद्वैद्य सभा आपके द्वारा ही उन्मिषित होकर अद्यावधि आयुर्वेदीय जगत् की महती सेवा करती रही है।

आज श्रीमान् के शिक्षा जैसे गुरुतर कार्य से विराम ग्रहण करके, आयुर्वेद की सर्वतोमुखी प्रवृत्तियों के सम्वर्धन रूपी विस्तृत क्षेत्र में पदार्पण करने की शुभवेला में उत्तर भारत के अनुपम शिक्षा-केन्द्र इस जयपुर में आयुर्वेद के सम्प्रदाय को सुरक्षित रखने एवं उसके सिद्धांतों की अक्षुण्णता को सहज रूप से ही हृदयंगम कराने वाले आप सदृश सफल शिक्षकशिरोमणि की हम किन शब्दों में कृतज्ञता प्रकट करें? आप द्वारा शिक्षित सुचिकित्सक, व्यवस्थापक, औषध निर्माणपटु, शास्त्राशय विवरणपरायण विद्वान् अध्यापक, आयुर्वेद की महत्ता को सर्वभूत दयान्विततता की दृष्टि से निश्छल सेवा मार्ग द्वारा जनताजनार्दन तक पहुँचाने वाले शिष्यों के समुदाय से उपकृत जनसमूह ही आपके सद्गुणों का वास्तविक उद्गाता है। आत्मसदृश आदर्श शिष्य आयुर्वेद की सेवा के लिए तैयार करने के महान् कार्य में संलग्न रहते हुए भी आपने आयुर्वेद क्षेत्र की विभिन्न समस्याओं के समाधान में जिस प्रकार सर्वात्मना तन-मन-धन से सकल सहयोग दिया हैं वह आयुर्वेद संसार से तिरोहित नहीं। निखिल भारतवर्षीय आयुर्वेद महासम्मेलन जैसे आयुर्वेद के एकमात्र हितकर संघटन की विविध प्रवृत्तियों में जिस उत्साह और विवेक-बुद्धि से आपने योगदान किया है। उसी का सुफल है कि आज महासम्मेलन का संघटन अनेकं आन्तरिक और बाह्य आघातों को झेलकर भी अप्रकम्प्य है। इसी तरह अनेक राजकीय परिषदों में भी आयुर्वेद की सनातन मर्यादा की जो रक्षा आपने अपने पूर्वाचार्यों द्वारा प्रवृत्त दृढ़ विचारों के बल पर की है वह आपको सन्तुलन बनाये रखने की क्षमता का ही प्रतीक है। सर्व प्रथम राजस्थान में आयुर्वेदपरम्परा की कल्पान्त रक्षा का शुभानुष्ठान विश्वविद्यालय में फेकल्टी निर्माण कर संयोजित करने का पारिजातोपम अभीष्ट सिद्धिप्रदायक प्रस्ताव भी आपकी दृढ़ आयुर्वेद निष्ठा का परिचायक है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्य वर्य—

आपने अपने प्रयास से आयुर्वेदोत्थान के लिए क्या नहीं किया ? शिक्षा, चिकित्सा, ग्रन्थ लेखन प्रेरण और सम्पादन कार्य संचालन सभो में अग्रणी रहे हैं। आपने आयुर्वेद को उठाया, बढाया, विकसित किया। संपूर्ण आयुर्वेद जगत् आपके महान् उपकारों से उपकृत है। आपकी सादगी, पाण्डित्य, बहुविज्ञता, चिकित्सानैपुण्य, सरलता धर्मनिष्ठा, उदारता तथा वात्सल्य आदि अनेक दैवी गुण स्पृहणीय हैं। आयुर्वेद के औचित्य की स्थापना तथा स्वरूपरक्षापूर्वक अभिवृद्धि के लिए अभी बहुत कुछ करना शेष है। आपके पथ-प्रदर्शन से उसकी पूर्ति हो, यही भगवान् से प्रार्थना है। आपकी तपस्या का आनृण्य सम्भव नहीं। हम सद्वैद्य सभा के सदस्य इन टूटे फूटे शब्दों में आपका क्या अभिनन्दन करें ? आप तो स्वयमेवाभिनंदित हैं। हम तो केवल निम्नोक्त शब्दों में भगवान् धन्वन्तरि से आपकी मंगल कामना करते हैं—

आयुःशास्त्रसुधारसेन सततं संसिच्य छात्राशयं, विश्वस्मिन्नुपकारबुद्धिरधुना यः सेवया भावय-
त्यात्मानं नियतं सदाखिलगुरौ वेदे सुखायुःप्रदे, नित्यं शं लभतां स वैद्यकगुरुर्जयरामदासः सुधीः ॥

धन्वन्तरि भवन, जयपुर।

देवोत्थापन्येकादशी, सं० २०२०, दि० २७-११-६३ ई०

हम हैं विनयावनत-

सद्वैद्य सभा के सभी सभ्य

राजस्थान के सुप्रसिद्ध पीयूषपाणि सुचिकित्सक राजकीय आयुर्वेद कालेज जयपुर के अध्यक्ष सम्माननीय स्वामी श्री जयरामदासजी भिषगाचार्य के कर-कमलों में सादर समर्पित

अभिनंदन-पत्र

आदरणीय !

हम आज आपका इस नवनिर्मित धन्वन्तरि मन्दिर के प्रांगण में अभिनन्दन करते हुये महान् प्रसन्नता का अनुभव कर रहे हैं।

आयुर्वेद गौरव !

राजस्थान की अनेकानेक आयुर्वेदिक प्रवृत्तियों के सफल संचालक के रूप में आप की सतत जागरूकता केवल राजस्थान प्रान्त में ही नहीं अपि तु सारे भारतवर्ष में सुप्रसिद्ध है। आपके योग्यतम स्नातकगण ही सर्वत्र आपकी नैपुण्यपूर्ण सुचिकित्सा एवं वैदुष्यपूर्ण अध्यापनपटुता का प्रसार करते हुए जन जन में आयुर्वेद की प्रतिष्ठा का सम्वर्धन कर रहे हैं।

चिकित्सकशिरोमणे !

वर्तमानकालीन संघर्षमय चिकित्साजगत् में सर्व साधन सम्पन्न पाश्चात्य चिकित्सा की चकाचौंध मे टिमटिमाते हुए आयुर्वेद दीपक को निरन्तर स्नेह प्रदान कर आपने अखण्ड रूप में प्रज्वलित रख कर आयुर्वेद की अपूर्व सेवा की है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणाभिसर !

आपने भारतप्रसिद्ध स्वनामधन्य स्वर्गीय पूज्य श्री लक्ष्मीरामजी महाराज के द्वारा संस्थापित श्री धन्वन्तरि औषधालय जयपुर, श्री लक्ष्मीरामोद्यान जयपुर, श्री दादू महाविद्यालय जयपुर आदि विभिन्न संस्थाओं का योग्यतापूर्वक संचालन कर अपने उत्तराधिकारीपन को पूर्णरूपेण सफल बनाया है। इन संस्थाओं में आपका निरन्तर प्रयत्न स्तुत्य एवं सर्वतोभावेन प्रशंसनीय है।

सम्माननीय प्राणाचार्य !

आपने मधुर एवं ललित वक्तृत्वकला, प्रबन्धपटुता, सौजन्यवृत्ति, सरल गम्भीर एवं उदार स्वभाव आदि अनेक गुणों से ही राजस्थान के आयुर्वेदज्ञों में मूर्धन्य स्थान प्राप्त किया है। अतः आयुर्वेद-संसार आपका चिर कृतज्ञ रहेगा।

अन्त में हम पुनः आपका अभिनन्दन करते हुए आशा करते है कि इस धन्वन्तरि मन्दिर के विकास में आप तन मन धन से सहायता प्रदान करेंगे।

हम हैं आपके–

रतनगढ़ के नागरिक एवं धन्वन्तरि-मन्दिर के कार्यकर्ता

आयुर्वेदमार्त्तण्ड विद्वन्मूर्धन्य वयोवृद्ध स्वामीजी श्री जयरामदासजी भिषगाचार्य के कर-कमलों में सादर समर्पित

अभिनन्दन-पत्र

पीयूषपाणि !

सीकर जिला वैद्य सम्मेलन के द्वितीयाधिवेशन के पावन अवसर पर श्रीमान् का हार्दिक अभिनन्दन करते हुए हम परम हर्ष का अनुभव कर रहे हैं। राजस्थान में आयुर्वेद के गौरव को अपनी असीम सेवा-परायणता, लगन एवं निष्ठा-पूर्वक प्रतिष्ठापित करने वाले वयोवृद्ध स्वामिवर्य श्रीलक्ष्मीरामजी महाराज की शिष्यपरम्परा को भली भांति निभाते हुए आपने अपने व्यक्तित्व को द्विगुणित आभान्वित किया है।

श्रद्धेय गुरुदेव !

राजस्थान आयुर्वेद कालेज के आचार्य पद को सुशोभित कर श्रीमान् ने अनेक कुशलधी वैद्यों को जन्म दिया है जो आज महत्वपूर्ण पदों पर कार्यरत रहते हुए न केवल आपके यशस्वी नाम को ही उज्ज्वल कर रहे हैं, अपितु आयुर्वेद की शोधपूर्ण सेवाओं एवं उसमें नवीन प्राणों का सृजन भी कर रहे है। श्रेष्ठतम आचार्यत्व के जिन गुणों के आप मूर्त्तरूप हैं वह केवल अनुभवगम्य ही है, उन्हें शब्दप्रमाण द्वारा कथन करना दुर्लभ-सा ही है। अगाध विचार-वैभव रखते हुए भी आपकी सरलता, सौजन्य एवं चिकित्साकुशलता अवर्णनीय है।

श्री धन्वन्तरि से श्रीमान् के शतायु होने की कामना के साथ सम्मेलन हेतु प्रदत्त आपके अमूल्य सहयोग के लिए हम विनम्र आभार प्रदर्शन करते हैं।

भवदीय

दिनांक १७-११-६१ **सीकर जिलावैद्यसभा एवं नागरिक, श्रीमाधोपुर**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदीयग्रन्थमाला श्रीदादूमहाविद्यालयश्च

(ले०—श्री मंगलदासः स्वामी, जयपुरम्)

आयुर्वेदीयग्रन्थमालाप्रकाशनम्—

१९९०तमे वैक्रमेऽब्दे यदा जयपुरस्थ-राजकीय-संस्कृत-महाविद्यालयस्य आयुर्वेदविभागप्रधानाध्यापकपदात् गृहीतावकाशा आयुर्वेदमार्त्तण्डाः पूज्य-प्रातःस्मरणीयाः श्री स्वामिलक्ष्मीराममहाभागाः स्वकीये लक्ष्मीरामोद्यान एव निवासमास्थितास्तदा कृतस्तैर्निश्चयः चिरसङ्कल्पितस्य "आयुर्वेदीय-पारिभाषिकशब्दकोष" निर्माणस्य । आयुर्वेदे विभिन्नप्रकरणेषु विभिन्नार्थबोधकतया प्रयुज्यमानानाम् पारिभाषिकशब्दानां प्रसंगानुसारं सम्यगर्थ-प्रकाशकः आवश्यकः शब्दकोषविशेष इत्यासीत् तेषां चिरेण चिन्तारूढः संकल्पः । कोषनिर्माणस्य रूप-रेखा संक्षेपेण निर्दिष्टा तैः राजवैद्य—श्रीनन्द-किशोर-भिषगाचार्यान् प्रति । तदनुरूपञ्च शब्द-संग्रहस्य कार्यभारो निक्षिप्तः श्रीस्वामिमहाभागानां शिष्येषु आयुर्वेदाचार्य–श्रीसीतारामशर्मसु । किञ्चित् कालानन्तरम् अंशतः संगृहीतोऽयं कोष उपस्थापितो विलोकनाय श्रीस्वामिनां समक्षे । किन्तु नासीदयं तेषां सन्तोषावहः । तदा तैराहूता एतत्कार्यार्थम् खुर्जावास्तव्याः वैद्याः श्रीनारायणदत्तमहोदयाः । श्रीनारायणदत्तमहोदया हि श्रीस्वामिनां विद्व-च्छिष्याणामन्यतमाः । श्री स्वामिनामाह्वानसूचनां प्राप्य शीघ्रमेव समागता जयपुरम् नारायणदत्त-महोदयाः । कोषरचनास्वरूपं सम्यगवगम्य कार्या-रम्भात् पूर्वं खुर्जानगरे स्वसम्बन्धितकार्याणां व्यवस्थाविधानाय ते प्रतिनिवृताः खुर्जानगरम्, किन्तु तत्र ते सहसा सञ्जाता रोगाक्रान्ताः, किञ्चित् कालान्तरमेव सञ्जातं तेषामसामयिकं स्वर्गारोह-णम् । तेषाम् सहसा निधनेन आसीत् श्रीस्वामिनाम् महान् मानसिक आघातः । अवरुद्धश्चैवं तेषां कोषनिर्माणस्य संकल्पः । तदनन्तरम् श्रीस्वामि-महाभागैः नियतीकृतः स्वस्थापिते "श्री स्वामि-लक्ष्मीरामट्रस्ट" धर्मस्वनिधौ २५०००) पञ्चविंशति-सहस्ररूप्यकराशिः आयुर्वेदीयग्रन्थप्रकाशनार्थम् । अयमेव आयुर्वेदीयग्रन्थमालायाः श्रीगणेशः ।

उक्तधनराशितो लभ्यमानं वार्षिकवृद्धिराशिम् (ब्याज) वर्षत्रयं यावत् सङ्गृह्य संग्रहानुसारमारभ्यते प्रकाशनकार्यम् । साम्प्रतं हि कतिचित् वर्षेभ्यः कर्गलमूल्यस्य मुद्रणव्ययस्य च महर्घतावशात् प्रकाशनकार्ये सञ्जातं व्ययाधिक्यम् । धर्मस्वनिधि-स्थापनातः अद्यावधि "आयुर्वेदीयग्रन्थमाला" ऽन्तर्गतत्वेन प्रकाशितानि पञ्च विशिष्टपुस्तकानि । सुश्रुतस्य सूत्रस्थानोपरि तथा वाग्भटस्य उत्तरतन्त्रोपरि प्रकाशितं प्राचीनटीकाद्वयम्—(१) सुश्रुतसूत्र-स्थानस्य "भानुमती" नाम टीका, (२) वाग्भटस्योत्तरतन्त्रस्य "तत्त्वबोध" टीका च ।

सुश्रुतसूत्रस्थानस्य "भानुमती" टीका विर-चिता सुप्रसिद्धैश्चरकटीकाकारैः श्री चक्रपाणिदत्त-महोदयैः । "भानुमती" टीकाया मूललिपेः प्रति-लिपिः सप्रयत्नं समधिगता लन्दनस्थ "इण्डिया-लाइब्रेरी" पुस्तकालयात् । तदस्याः अलभ्य-व्याख्याया प्रकाशनेन सुश्रुतसूत्रस्थानस्यानेकेषु प्रकरणेषु सम्प्राप्तो नवीनः प्रकाशः । व्याख्ययाऽनया प्रकटीभवति श्री चक्रपाणिमहोदयानां विपुल-मायुर्वेदज्ञानम् । समग्रस्यापि सुश्रुतस्य "भानुमती" व्याख्या श्री चक्रपाणिमहोदयेनेति यद्यपिश्रूयते किन्तु नाद्यावधि प्राप्यते सा । "भानुमती" ग्रन्थस्य सम्पादकास्तावत् वर्तमानयुगे आयुर्वेदो-द्धारकाः पूज्यस्वर्गत—श्रीयादवजीमहाभागाः । भूमिकालेखकाश्च संमान्याः श्री गणनाथसेन-महोदयाः येः खलु शरीरविज्ञानविषये प्राचीन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवीनोभयमतसमन्वयपूर्वकं संस्कृतभाषया उपनिबद्धः "प्रत्यक्षशारीरम्" नाम महानुपादेयो ग्रन्थः।

द्वितीयं तावत् प्रकाशनम् अष्टाङ्गहृदयोत्तरतन्त्रस्य व्याख्यानं "तत्त्वबोधो" नाम। "तत्त्वबोध" व्याख्यानं हि विरचितं श्री कविराजशिवदाससेनमहोदयेन। श्री शिवदाससेनमहोदया हि आसन् मर्मज्ञा विद्वांस आयुर्वेदस्य। "चक्रदत्त"नाम्ना प्रसिद्धस्य श्री चक्रपाणिविरचितस्य "चिकित्सासारसङ्ग्रह" ग्रन्थस्य "तत्त्वचन्द्रिका" व्याख्याकाराः खलु श्री शिवदाससेनमहोदयाः। "तत्त्वचन्द्रिका" हि प्रख्यापयति सेनमहोदयानां व्यापकमायुर्वेदशास्त्रज्ञानम्। अष्टाङ्गहृदयस्येयं "तत्त्वबोध" टीका प्रमाणान्तरं तेषामायुर्वेदवैदुष्यस्य। तदस्य ग्रन्थस्य सम्पादका उपोद्घातलेखकाश्च कलिकातावास्तव्याः श्रीज्यौतिषचन्द्रसरस्वतीमहोदयाः।

अथ तृतीयं प्रकाशनं "अभिनवप्रसूतितन्त्रम्" नाम आयुर्वेदीयाष्टाङ्गमध्ये बालतन्त्रान्तर्गतमेव प्रचलितमासीत् प्रसूतासम्बन्धिविज्ञानम्। आसीच्चैतत् चिरेणोपेक्षितप्रायम्। अद्य केवलं "काश्यपसंहिता" मात्र उपलभ्यते बालतन्त्रस्य प्रमुखो ग्रन्थः, सोऽपि च खण्डितोऽनेकेषु स्थानेषु।

बालतन्त्रोपाङ्गस्य प्रसूतिविषयस्य साङ्गोपाङ्गं वैशद्येन विवेचकमिदं "अभिनवप्रसूतितन्त्रम्" पुस्तकं मौलिको ग्रन्थः। ग्रन्थस्यास्य प्रणेतारो वैद्यवराः ए० एम० एस० श्री दामोदरशर्मगौड़महोदयाः।

श्रीयादवजीमहाभागानां प्रेरणया गौड़महोदयैरतीव श्रमेण प्रणीतोऽयं प्राच्यप्रतीच्योभयसिद्धान्ताश्रयोऽभिनवो ग्रन्थविशेषः। ग्रन्थेनानेन निराकरिष्यते आयुर्वेदे प्रसूतिविज्ञानस्य चिरन्तनोऽभावः। संस्कृतोपनिबद्धोऽयं ग्रन्थो भविष्यति छात्राणामध्यापकानां चोभयेषामपि ज्ञानसंवर्धकः। विषयविशेषाणां सम्यगवबोधनाय समायोजितान्यत्र शताधिकानि चित्राणि। २००६ मिते वैक्रमे ईशवीये च १९५० तमे वत्सरे प्रकाशितस्यास्य ग्रन्थस्य प्रस्तावनालेखकाः मान्याः श्री डा० भास्कर गोविन्द घाणेकर बी० एस० सी०, एम० बी० बी० एस० महोदयाः। मुद्रितश्चायं ग्रन्थः "इण्डियनप्रेस" मुद्रणालयस्य वाराणसेयशाखातः।

चतुर्थं हि प्रकाशनम् "आयुर्वेदीयपदार्थविज्ञानम्" नाम। ग्रन्थस्यास्य सम्पादकाः कच्छभुजनिवासिनो वैद्यवरा श्रीबलवन्तशर्ममहोदयाः। चरकसुश्रुताष्टाङ्गसङ्ग्रहादिग्रन्थेषु विभिन्नप्रकरणगतानां दार्शनिकविषयाणां सङ्ग्रहपद्धत्या सम्यक् प्रतिपादनपरोऽयं ग्रन्थः। आयुर्वेदीयदार्शनिकविषयाणामध्ययनाध्यापनकाठिन्यं निराकर्तुं सौकर्यञ्चात्र छात्राणामध्यापकानाञ्च सम्पादयितुं आयुर्वेदीयसंहितासु विभिन्नप्रकरणेषु प्रकीर्णानां दार्शनिकविषयाणां विषयानुसारमेकत्र कृतः सङ्ग्रहः श्रीबलवन्तशर्ममहोदयेनास्मिन् ग्रन्थे। संयोजिताश्चात्र स्थाने स्थाने विषयाणां विशेषेण स्पष्टीकरणाय टिप्पणीविशेषाः विरचितश्च हिन्दीव्याख्यानमपि सहैव। तदित्यम् ग्रन्थस्यास्याधिकाधिकामुपयोगितामाधातुं प्रशंसनीयतरो ग्रन्थकारस्य प्रयासः। स्वयं ग्रन्थकारलिखितया विस्तृतभूमिकया तथा राजवैद्य-श्रीनन्दकिशोरभिषगाचार्यलिखितलघुप्रस्तावनया च समन्वितोऽयं ग्रन्थः प्रकाशितः २००७ तमे वैक्रमे ईशवीये च १९५१ संख्याते संवत्सरे।

पञ्चमं खलु प्रकाशनम् हिन्दोभाषोपनिबद्धम् "प्रसूतितन्त्रम्"। ग्रन्थस्यास्य प्रणेतारो हिन्दूविश्वविद्यालये आयुर्वेदप्राध्यापकाः आयुर्वेदाचार्य-वैद्य - श्रीपटवर्धन ए०एम०ए०महोदयाः। "अभिनवप्रसूतितन्त्र"स्यैव निर्माणोद्देश्यमनुगतोऽयं ग्रन्थः। प्रसूतिविषये अद्यावधि यदपि गवेषणाजातं समन्नं तत् सर्वमपि सङ्कलितमत्र प्राचीनविज्ञानेन सह। प्रसूतिशारीरविज्ञानेन सह गर्भविज्ञानम्, गर्भिणीविज्ञानम्, गर्भव्यापदः, प्राकृतिकः प्रसवः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूढ़गर्भप्रसवः, प्रसवकलाविज्ञानम्, सूतिकाविज्ञानम्, सूतिकाव्यापदश्चेति सर्वेषामपि सम्बन्धितविषयाणामत्र विहितं सम्यक् विवेचनम् प्रसवव्यवस्थासु यानि खलु यन्त्रोपयन्त्रशस्त्रोपशस्त्रादीनि प्रयोगार्हाणि तान्यपि सुनिरूपितानि ग्रन्थस्यान्तिमे प्रकरणे। तदित्थं नवप्रकरणग्रथितोऽयं सचित्रो ग्रन्थः आवहति हिन्दीभाषाया आयुर्वेदीयसाहित्यवैभवम्।

तदेवमायुर्वेदीयग्रन्थमालायां पञ्चपुष्पाणि प्रकाश्य आयुर्वेदस्याभावनिराकरणार्थं "श्री स्वामिलक्ष्मीरामट्रस्ट"निधिना या खल्वायुर्वेदस्य विशिष्टा सेवा सम्पादिता नास्ति तस्य महत्त्वं प्रमाणान्तरापेक्षम्। प्रशंसनीयतमोऽयं श्री स्वामिनो धर्मस्वनिधेः। आशास्यते च यत् निधेरयम् आयुर्वेदीयसाहित्यप्रकाशनकार्यक्रम यथावद्भविष्यत्यग्रेसरो येन सम्भवेत् आयुर्वेदविज्ञानस्य साकल्येन विकासः। इति शम्।

श्री दादूमहाविद्यालयः, जयपुरम्

१९७६ तमे वैक्रमेऽब्दे नरायनावार्षिकसम्मेलनावासरे तदानीन्तनैः श्रीदादूसम्प्रदायाचार्यपीठाधीश्वरैः श्रीस्वामिदयारामजी महाराजैः समायोजितं वृहत् साधुसम्मेलनम्। अवसरेऽस्मिन् प्रमुखतः श्रीदादूसम्प्रदायस्य विशेषतश्च सर्वेषामपि राजस्थानीयसाधुसम्प्रदायाणां सेवामुद्दिश्य शिक्षासंस्थाविशेषस्य स्थापनायाः सङ्कल्पो निवेदितः पूजनीयदिवङ्गतायुर्वेदमार्त्तण्डश्रीस्वामि लक्ष्मीराममहाभागानां पुरतः। श्रीस्वामिमहाभागैः सहर्षं स्वीकृतोऽयं सङ्कल्पः, समेताश्च ते तदेवोद्देश्यं पुरस्कृत्य नरायनासम्मेलनम्। तत्र तेषां प्रभावशालिप्रयत्नैः स्वीकृतः खलु "श्रीदादूदयालुमहासभाया अधीनत्वे शिक्षणालयस्थापनायाः प्रस्तावः समारब्धश्च तत्र तदानीमेव शिक्षणालयस्थापनार्थमर्थसङ्ग्रहकार्यक्रमः।

१९७७ तमे वैक्रमेऽब्दे ज्येष्ठशुक्लपक्षे १० दशम्याम् (गङ्गादशमी" शुभतिथौ छात्रावासानुबन्धिनो विद्यालयस्य स्थापनाया निश्चय आसीदङ्गीकृतः। विद्यालयस्य कृते स्थानप्राप्त्यर्थमभ्यर्थिता जयपुर वास्तव्याः सन्तश्रीकेशवदासस्वामिमहाभागाः, प्रदत्तश्च तैः सहर्षम् विद्यालयसञ्चालनार्थम् राजकीय-सार्वजनिक-रामनिवासोद्यानस्य पृष्ठतो वर्त्तमानस्य स्वकीयस्य श्रीरतिरामोद्यानस्य सभवनः स भागो यत्रेदानीं सञ्चाल्यते एन. सी. सी. प्रधानकार्यालयः।

तदित्थं १९७६ वैक्रमवर्षीयनरायनामहासम्मेलने फाल्गुनशुक्लपक्षे ५, ६, ७ तिथिषु श्रीदादूदयालुमहासभाया अधिवेशने बीजारोपितस्य श्रीदादूदयालुछात्रावासानुबन्धिको विश्वविद्यालयस्य समुद्घाटनसंस्कारः समपद्यत १९७७ वैक्रमवर्षीयज्येष्ठशुक्ल १०मतिथौ तदनुसारमीशवीये १९२० तमे वर्षे मई मासे पूजनीय-ब्रह्मनिष्ठजीवन्मुक्तपरमहंस— विद्वत्प्रवरश्रीस्वामिनारायणमुनिमहाभागानां शुभकरकमलैः श्रीरतिरामोद्यानस्य भवनाङ्गणेषु। समुद्घाटनसमारोहेऽस्मिन् समवेताः श्रीदादूसम्प्रदायस्यानेके प्रमुखाः सन्तो महात्मानः, स्थानीया विशिष्टा नागरिकाश्च।

आदौ तावत् १३ त्रयोदश छात्राश्छात्रावासे प्रविष्टाः, सङ्गृहीतश्च १४००) चतुर्दशसहस्ररूप्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काणां स्थायिकोषः। नवलगढ़निवासिनः पंडित-श्रीहीरालालशर्मणो नियुक्ता विद्यालयस्य प्रथमाध्यापकाः। शनैः शनैः प्रगतिमगात् संस्थायाः कार्यम्, सञ्जाता च द्वितीयवर्षे ३० त्रिंशत् पर्यन्त-छात्रसंख्या।

अर्थसङ्ग्रहोद्देश्येन पूज्यश्रीस्वामिलक्ष्मीराम-महाभागानां प्राधान्ये यात्रामकार्षीत् शिष्टमण्डल-मेकं जमात-उदयपुर-जमात-चानसेन-सांभर-सीकर-नारनौल-चरखीदादरीप्रभृतिषु स्थानविशेषेषु। कृतेष्वपि विविधप्रयासेषु यदा नाशंसिता व्ययोचिता धनागमस्थितिस्तथा आर्थिककाठिन्यनिवृत्तये वीत-रागपरमहंसैः दिवङ्गतमहात्मभिः श्रीसेवादास-स्वामिमहाभागैः प्रेरिताः श्रेष्ठिप्रवराः श्रीयुगल-किशोरविडलामहोदयाः, श्रीघनश्यामदासविडला-महोदयाश्च। श्रीपरमहंसस्वामिमहाभागानाम् आदेशानुवर्तिभिर्विडलाबन्धुभिः २००) द्विशतरूप्य-काणि मासिकं साहाय्यं स्वीकृतं विद्यालयस्य कृते। सञ्जातश्चानेन साहाय्यानुग्रहेण सुचारुतया विद्या-लयस्य कार्यसञ्चालने सौकर्यम्।

शनैः शनैरुन्नतिमगात् संस्थायाः कार्यम्, सञ्जाता च छात्रावासे चत्वारिंशत्-पञ्चाशत्पर्यन्तं छात्रसंख्या। शिक्षाक्षेत्रेऽपि यथा यथा समुत्तीर्णा-श्छात्राः प्रथमामध्यमाकक्षाः, समारूढाश्च शास्त्र्या-चार्यकक्षाणामध्ययनाध्यापनव्यवस्थाऽपि। तदित्थं वर्धिता विद्यालये अध्यापकसंख्या समारूढश्च विद्यालयोऽपि महाविद्यालयपदवीम् पं० श्रीरामचन्द्र-शास्त्रिमहाभागानाम् प्रधानाचार्यत्वे।

सर्वप्रथम् १९२४ तमे ईशवीयवत्सरे प्रविष्टा अष्टौ छात्राः वाराणसयेप्रथमपरीक्षायाम्, उत्तीर्णाश्च पूर्वेऽपि प्रशस्तश्रेणिषु। ततः प्रभृति साम्प्रतं यावत् प्रतिवर्षमेव प्रविशन्ति बहवश्छात्रा विभिन्नासु परीक्षासु, प्रशंसनीयः खलु समुत्तीर्णच्छात्राणां श्रेणीलाभः सन्तोषावहं च वार्षिकपरीक्षापरि-णामस्य प्रतिशतम्।

छात्रावासे अधिकांशतश्छात्राः समागता जयपुरतो बाह्यस्थानेभ्यः। राजस्थानस्य विभिन्न-प्रदेशेभ्यस्तथा पाञ्चालसौराष्ट्रोत्तरप्रदेशादिराज्ये-भ्योऽपि छात्राः समागच्छन्, तस्मात् सम्बन्धितोऽयं विद्यालयो वाराणसेयपरीक्षाभिः, स्वीकृतश्चायं विद्यालयो वाराणसीतः व्याकरणसाहित्यवेदान्त-दर्शनसांख्ययोगविषयेषु शास्त्र्याचार्यपरीक्षापर्यन्तम्। अर्थोपधायकविद्योद्देश्येन यथावसरं व्यवस्थापितो विद्यालये आंशिक आयुर्वेदविभागोऽपि प्रविशन्ति च छात्रा देहलीस्थनिखिलभारतीयायुर्वेदविद्यापीठ-स्यायुर्वेदपरीक्षासु। एतदतिरिक्तम् भारतीय-पद्धत्या व्यायामशिक्षा सङ्गीतशिक्षा चापि छात्राणां कृते समारब्धा विद्यालये याद्यावधि यथावत् प्रवर्तमानाऽस्ते निरन्तरम्।

१९८६ तमे वैक्रमेऽब्दे समायोजितो विद्यालयस्य प्रथमो विशेषोत्सवसमारोहो यस्मिन् प्रदर्शितम् छात्राणाम् वादविवादकौशलम् व्यायामाभ्यास-पाटवञ्च। चौमूसामन्ता ठा. श्री देवीसिंहजी-महोदयाः समलञ्चक्रुर्विशेषोत्सवस्य सभापतिपदम्। ब्रह्मनिष्ठा महात्मानः श्रीस्वामिनारायणमुनि-महोदया आसन् विशेषोत्सवस्य सम्मान्या विशिष्टो-पदेष्टारः, प्रवृत्तानि च चत्वारि दिनानि यावत् वेदान्तविषयमधिकृत्य तेषामुच्चकोटिकानि प्रवचनानि।

जयपुरराज्यपण्डितप्रवराणाम् महमहोपाध्याय-श्रीमधुसूदनजी-ओझा-वेदवाचस्पतिमहोदयानां तथा पूज्यपाद—श्रीलक्ष्मीरामस्वामिमहाभागानामभि—नन्दनोत्सवसमारोहेषु तदितरेषु च संस्कृतसम्मे-लनादिविशेषप्रसङ्गेषु प्रवर्तन्ते स्म राजकीयं संस्कृतविद्यालयीयच्छात्राणाम् एतद् विद्यालय-च्छात्राणां च परस्परं शास्त्रार्थप्रसङ्गा यत्र प्रायशो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विजयालिङ्गिता विद्यालयस्यैव छात्राः। अद्यापि राजस्थान संस्कृतशिक्षणालयानां वार्षिक-शैक्षणिक प्रतियोगितासमारोहेषु हिन्दीसंस्कृतान्त्याक्षरी-वादविवादकार्यक्रमेषु प्रायेणैतद्-विद्यालयस्यैव छात्रा अलंक्रियन्ते विजयपारितोषिकैः।

१९४० तमादीशवीयवत्सरात् सम्प्राप्तो विद्यालयेन जयपुरराज्यशिक्षाविभागत आर्थिकसाहाय्यानुग्रहः, प्रदत्ता च शिक्षाविभागेन शास्त्राचार्य-पर्यन्तं कक्षाणाम्मान्यता तदीयपरीक्षास्वीकृतिश्च। ततः प्रभृति राजकीयशिक्षाविभागीयसंस्कृत-परीक्षास्वपि प्रवेष्टुमारब्धा विद्यालयस्यास्य छात्राः। साम्प्रतं तु राजस्थानराजकीयशिक्षा-विभागीयसंस्कृतपरीक्षास्तरमेव प्रचलति विद्यालयेऽस्मिन् प्रमुखः संस्कृतशिक्षा पाठ्यक्रमः।

विद्यालयस्य कार्यविस्तारमनुरुध्य नाभवत् पर्याप्तं श्रीरतिरामोद्यानस्य स्थानम् ततश्च विद्यालयस्य स्वातन्त्र्येण स्वकीयस्थाननिर्माणाय जयपुर-राज्यतो मोतीडूंगरीसमीपे समूल्यं भूभागमधिगम्य तत्र निर्मापितानि छात्रावासानुरूपाणि भवनानि यानि समलंकृतानि मध्यतः समन्दिरेण वृहता सभाभवनेन।

तदस्य नवीनस्थानस्यष्ठाधिानावसरे १९९५ वैक्रमसंवत्सरे फाल्गुनशुक्ल १२, १३ दिवसयोः तदनुसारञ्च ईशवीये १९३९ तमे वर्षे मार्चमासस्य ३, ४ तारिकयोः "उद्घाटनोत्सव" नाम्ना समायोजितो द्वितीयो महोत्सवसमारोहः। समारोहेऽस्मिन् प्रथमदिवसे प्रातः समायोजितः श्रीदादूदयालुमहावाणीग्रन्थस्य रथयात्राकार्यक्रमो यः खलु जयपुरराज्यगुरुमहन्तश्रीगङ्गादासस्वामिमहाभागानां जयपुरीय-विद्याधरमार्गस्य निवासस्थानादारम्य त्रिपोलिया बाजार, बड़ी चौपड़, जौहरी बाजार, सांगानेरीद्वारमार्गेण प्रवर्तमानः सम्प्राप्तो विद्यालयस्य नवीनं स्थानम्। तदानीन्तना जयपुरराज्य-शिक्षामन्त्रिणो जोबनेरसामन्ताः ठा० श्रीनरेन्द्रसिंह-महोदयाः सम्पादितवन्तो विद्यालयस्य नवीन-स्थानस्य समुद्घाटनसंस्कारम्। दिवसान्तरे च प्रदर्शितानि छात्राणां शास्त्रार्थसम्भाषणव्यायामाभ्यासकौशलानि, सम्पादितश्च छात्रेभ्यः पुरस्कारवितरणसंस्कारस्तदानोन्तनैर्जयपुरराज्यशिक्षा विभागसञ्चालकैः श्रीओवेन्सम‌होदयैः स्वकीय-करकमलैः।

सौन्दर्येण समतीतेषु विद्यालयस्य पञ्चविंशति-वर्षेषु सङ्कल्पितं छात्रवर्गैर्विद्यालयस्य रजतजयन्ती-समारोहस्य समायोजनम्। किन्तु तदानीं द्वितीय-विश्वयुद्धप्रसङ्गेन समयकाठिन्यमनुरुध्य स्थगितोऽयं सङ्कल्पश्चरितार्थितो विद्यालयस्य ३४ चतुस्त्रिंशत्तमे वर्षे। २००९ विक्रमवर्षे फाल्गुनशुक्ल-पक्षे १२, १३ तिथ्यनुसारम् १९५४ ईशवीयवत्सरे १४-१५ फरवरीदिवसयोः सम्यक् सम्पन्नोऽयं रजत-जयन्तीमहोत्सवः। प्रथमदिवसे रामनिवासोद्यानस्य संमुखस्थाद् रामलीलाप्राङ्गणात् प्रारभ्य श्रीदादू-दयालुमहावाणीग्रन्थस्य रथयात्राकार्यक्रमो यः खलु चौडारास्ता, त्रिपोलिया बाजार, जौहरी बाजार, सांगानेरीद्वारमार्गेण प्रवर्तमानः सम्प्राप्तो विद्यालयस्य मोतीडूंगरीस्थानम्।

राजस्थानराज्यस्य तदानीन्तना उपमुख्य-मन्त्रिणो माननीया श्रीटीकारामपालीवालमहोदयाः सम्पादितवन्तो रजतजयन्तीमहोत्सवस्य समुद्घाटनसंस्कारं, राजस्थानराज्यजनसेवाऽयोगस्य तदानीन्तनध्यक्षाणां पं० श्रीदेवीशङ्करत्रिपाठि-महोदयानां सभापतित्वे। श्री त्रिपाठिमहोदयैरेव च सम्पादितो विद्यालयाभिनन्दनग्रन्थसमर्पण-संस्कारोऽपि।

तदित्थमेतत् संस्थासंस्थापकानां श्रद्धेय-श्रीलक्ष्मीरामस्वामिमहाभागानां संकल्पानुसारं संस्थायाः संस्कृतशिक्षाप्रचारकार्यमद्यावधि निरन्तरं प्रवर्तमानमास्ते। साम्प्रतं हि विद्यालयस्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुश्चत्वारिंशत्तमं वर्षं समाप्तिपरम्। दीर्घेऽस्मिन् काले विद्यालयस्यास्य शतशः स्नातका अवतीर्णाः शिक्षाचिकित्सोपदेशदेशधर्मसमाजलोकसेवादिविविधेषु सामाजिककार्यक्षेत्रेषु, निर्वहन्ति च ते प्रशंसनीयतया स्वकीयकर्तव्यानि।

राजस्थानस्य संस्कृतशिक्षणालयेषु विशिष्टं स्थानमावहन्नयं महाविद्यालयः सम्प्रति सञ्चाल्यते "श्रीदादूमहाविद्यालय—छात्रावाससञ्चालनसमिति नाम्ना राजस्थानराज्यद्वारा पञ्जीकृतायाः सञ्चालनसमितेरवधानपरम्परासु, सततञ्चाग्रेसरः संस्कृतशिक्षाप्रचारकार्ये देशस्य समाजस्य च पवित्रसेवासु। आशास्यते यथावसरं शीघ्रमेव समायोजयिष्यतेऽस्य महाविद्यालयस्य स्वर्णजयन्तीमहोत्सवो विशिष्टेन समारोहेणेति शम्।

आवश्यकं निवेदनम्

१

अयि सम्मान्या मनीषिणः!

सहर्षमिदं निवेद्यते यज्जूनमासस्य 'भारती' मासिकस्यांको भाविनो जगद्गुरुश्रीशंकराचार्यस्य वर्तमाने च महाराज-संस्कृतकालेजाध्यक्षस्य श्री चन्द्रशेखरद्विवेदिमहाभागस्याभिनन्दनात्मकः "श्रीचन्द्रशेखरद्विवेदाभिनन्दनाङ्कः" इति नाम्ना "भारती" द्वारा प्रकाश्यमेष्यतीति।

एतदर्थं तत्रभवन्तो भवन्तः प्रार्थ्यन्ते यत् श्री द्विवेदिमहाभागमुद्दिश्य तथा जगद्गुरुशंकराचार्यपरम्परामनुसृत्य च स्वकीयान् लेखान् कविताः संस्मरणानि च जूनमासस्यागामिनो १७ तारिकापर्यन्तं भारती–कार्यालयस्य संकेते अवश्यं संप्रेषयन्तु—

दिनाङ्कः
२१-५-१९६४

२

तथा च पूज्याः सम्पादका भट्टश्रीमथुरानाथशास्त्रिणोऽद्यावधि 'भारती' मासिकस्य सम्पादनकार्यं समनोयोगं प्रशंसार्हञ्च सातत्येन कुर्वाणा आसन्, परमिदानीं स्वल्पात् कालात् शरीरस्यास्वस्थतया ते 'भारती' सम्पादनं कर्तुं मनीशाः संवृत्ताः। अत एते महानुभावाः सद्यः स्वास्थ्यं तथा दीर्घमायुश्च लभन्ताम्-एतदर्थमहं परमात्मानञ्च हृदयेन प्रार्थये।

अत एवैषामेव श्रीभट्टमहोदयानां सम्मत्याऽस्मादङ्कात्परं कविवरो विद्वद्वरः 'आशुकविः' श्रीहरिशास्त्री भारत्याः सम्पादनात्मकं कार्यं विधास्यतीति च निवेदयति—

भवदीयो
गिरिराजशर्मा शास्त्री
प्रबन्धसम्पादकः,
"भारती"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Insurance is a Social Service

With best Complements & Greetings

form

RUBY GENERAL INSURANCE Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.		Rs. 1,00,00,000
Paid up Capital.	...	Rs. 32,00,000
Assets Exceed.	...	Rs. 3,21,00,000
Nett Premiums in 1962.	...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA

FOREIGN BRANCHES & AGENCIES :

Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala Nairobi, Penang, Rangoon, Singapore & San Fernando.

Head Office :

"INDIA EXCHANGE"

India Exchange Place, Calcutta-1

राजा बहादुर मोतीलाल पूना मिल्स लि०

कार्यालयः]२७५६६७]२५२६५८ तडितपत्रम्ः—रामोपून

आर. बी. चिह्नितवस्त्राणां

धौतानि, सुन्दर जैकार्ड वस्त्राणि, पुष्पांकितशाटी, लम्बवस्त्रम्, मलमल्लवस्त्रम्, नवपद्धतिपुष्पाङ्कितानि वस्त्राणि, अतिविशिष्टानि

मैनेजिंग एजेन्ट्स—

मुकुन्दलाल बंसीलाल एवं पुत्राः

विक्रयाभिकर्त्तारः—

पित्ती एजेंसीज़ प्राइवेट (सीमितम्)

हमाम हाउस, हमाम स्ट्रीट फोर्ट, बम्बई १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* ग्रीटिंग कार्ड
* कुंकुम-पत्रिका
* दीपावली कार्ड
* विजिटिंग कार्ड
* विवाहोत्सव कार्ड
* दीपावली पत्रिका

आदि

के थोक व खेरूंज विक्रेता

तथा

संस्कृत, हिन्दी और अंग्रेजी पत्र-पत्रिकाओं

के

सुन्दर व शुद्ध मुद्रण का

एकमात्र स्थान

श्री शङ्कर आर्ट प्रिण्टर्स

त्रिपोलिया बाजार, जयपुर (राज०)

NATIONAL ENGINEERING INDUSTRIES LTD., JAIPUR

ALWAYS
STANDS
FOR
NATION'S PROSPERITY AND GOODWILL
BEING
MANUFACTURERS
OF
PRECISION BALL & ROLLER BEARINGS
STEEL BALLS
SPINDLE INSERTS
AND
AXLE BOXES FOR RAILWAY'S WAGONS & LOCOS

तीन असाधारण पत्रिकाएँ—प्रत्येक परिवार हेतु—
नवजीवन-साहित्य और संस्कृति से परिपूर्ण

भवन्स जनरल	एक प्रति का	३० न.पै.
	वार्षिक शुल्क	६ रुपये ५० न.पै.
(आंग्लभाषा पाक्षिक)	अर्धवार्षिक	३ रुपये ५० न.पै.
भारती	एक प्रति का	३० न.पै.
	वार्षिक शुल्क	६ रुपये ५० न.प.
(हिन्दी पाक्षिक)	अर्धवार्षिक	३ रुपये ५० न.पै.
समर्पण	एक प्रति का	३० न.पै.
	वार्षिक शुल्क	६ रुपये ५० न पै.
(गुजराती पाक्षिक)	अर्धवार्षिक	३ रुपये ५० न.पै.

प्राप्तिस्थान—स्थानीय समाचारपत्र-विक्रेता—
रेल्वे पुस्तक-विक्रेता अथवा सीधा निम्न पते से—

भारतीय-विद्या भवन-बम्बई—७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्य साहित्य के प्रकाशन

राजस्थान सरकार का महत्वपूर्ण योग

राजस्थान प्राच्य विद्या प्रतिष्ठान, जोधपुर के

सात संग्राह्य नये प्रकाशन

राजस्थान पुरातनग्रन्थमाला-प्रधान सम्पादक-मुनिजिनविजय, पुरातत्त्वाचार्य

१. **काव्य प्रकाश**–भट्ट सोमेश्वर विरचित संकेत सहित · जैसलमेर ग्रन्थ-भण्डार से प्राप्त प्राचीनतम प्रति के आधार पर प्राध्यापक रसिकलाल छोपरिख द्वारा सम्पादित अन्यतम संस्करण (दो भागों में) मूल्य-प्रथम भाग १२.००, द्वितीय भाग ८.२५।

२. **वस्तुरत्न कोश**–अज्ञात कर्तृक नाना वस्तु प्रतिपादक विशिष्ट कोश-ग्रन्थ सम्पादिका-प्रिय बालाशाह एम० ए० पी० एच० डी०, डी० लिट्। मूल्य– ४.००।

३. **मुंहता नेणसी ख्यात भाग**–जोधपुर के प्रधानामात्य मुंहता नेणसी लिखित मूल भाषा में राजस्थान का इतिहास सम्पादक–बदरी प्रसाद साकरिया।
मूल्य ८.५० न.पै.

४. **भगतमाल**–चारण ब्रह्मदास विरचित राजस्थानी काव्यमय भक्त चितरावली। सम्पादक–उदयराज उज्वल। मूल्य १.७५ न.पै.

५. **रघुवर जस प्रकाश**–चारण कवि किसना जी आढ़ा निर्मित राजस्थान भाषा में काव्य-शास्त्र सम्बन्धी ग्रन्थ।
सम्पादक–सीताराम लालस। मूल्य ८.२५ न. पै.

६. **राजस्थान हस्तलिखित**–ग्रन्थों की सूची। भाग १ मूल्य ४.५० न.पै.

७. **राजस्थान प्राच्य**–विद्या के प्रतिष्ठान के हस्तलिखित ग्रन्थों की सूची। भाग २—मूल्य १२.००।

प्राप्ति स्थान—राजस्थान प्राच्य विद्या प्रतिष्ठान, रेजीडेन्सी रोड़, जोधपुर।

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तर प्रदेश में
आयुर्वेदिक एवं यूनानी तिब की प्रगति

दीर्घ आयु चाहने वाले मनुष्य को धर्म, अर्थ और सुख को देने वाले आयुर्वेद के उपदेशों का परम आदर करना चाहिए।
--आचार्य वाग्भट्ट

(१) २१ जुलाई १९६१ से प्रदेश में पृथक आयुर्वेदिक निर्देशालय स्थापित होगया है।

(२) उत्तर प्रदेश में ६६२ राजकीय तथा इतने ही अर्ध राजकीय आयुर्वेदिक एवं यूनानी चिकित्सालय प्रतिवर्ष लगभग दो करोड़ रोगियों का उपचार कर जनता जनार्दन की सेवा कर रहे हैं।

(३) आयुर्वेद को राज्य प्रोत्साहन देने के हेतु सरकार की ओर से निजी वैद्य, हकीम, चिकित्सालयों तथा शिक्षा संस्थाओं को प्रतिवर्ष लगभग सात लाख रुपये का अनुदान दिया जाता है।

(४) राजकीय आयुर्वेदिक एवं यूनानी औषधि निर्माणशाला, उत्तर प्रदेश, लखनऊ, विशुद्ध एवं प्रमाणिक औषधियों के निर्माण की दिशा में महत्वपूर्ण कार्य कर रही है।

(५) राज्य सरकार द्वारा संचालित राजकीय आयुर्वेदिक कालेज लखनऊ तथा १० अन्य राजकीय सहायता प्राप्त निजी महाविद्यालय प्रदेश में कुशल एवं प्रशिक्षित चिकित्सकों के अभाव को दूर करने में प्रयत्नशील हैं।

(६) प्रदेशीय सरकार द्वारा स्थापित आयुर्वेदिक एवं यूनानी तिब्बी एकेडेमी, लखनऊ सद्साहित्य के निर्माण एवं उन्नयन की दिशा में महत्वपूर्ण कार्य कर रही है।

(७) आयुर्वेदिक विभाग बनारस हिन्दू विश्व विद्यालय, बाराणसी तथा तिबिया कालेज मुस्लिम विश्व विद्यालय अलीगढ़ केन्द्रीय सरकार द्वारा प्रदत्त आर्थिक सहायता के आधार पर आयुर्वेद एवं यूनानी तिब में अनुसन्धान कार्य प्रारम्भ कर इन चिकित्सा पद्धतियों के उन्नयन में महत्वपूर्ण योगदान देरहे हैं।

आयुर्वेद एक परीक्षात्मक विज्ञान है जो व्यक्ति को स्वस्थ रखते हुए उसकी दीर्घ आयु बनाने का प्रयत्न करता है।

—राष्ट्रपति डाक्टर राधाकृष्णन्

निर्देशक आयुर्वेद उत्तर प्रदेश, लखनऊ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



श्रीमत्पण्डितमूर्द्धन्याश्चन्द्रशेखरशास्त्रिणः ।

विजयन्तां मनोनीतशङ्कराचार्यका श्रमी ॥

म् १४

ङ्कः ८

वार्षिक मूल्यम् चतस्रो मुद्रा ४)

एकप्रतेः चत्वारिंशत् नवपणाः(४० न.पै.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन डिस्ट्रीब्युटर्स लिमिटेड

१४ नेताजी सुभाष रोड़

कलकत्ता १

★

'टाईगर ब्रांड' कागज

के

प्रमुख विक्रेता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

428

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुर
राजस्थान
९ जून, सन् १९६४

सन्देश

मुझे यह जानकर अत्यन्त प्रसन्नता हुई है कि महाराजा संस्कृत कालेज के प्रिन्सिपल श्री चन्द्रशेखर द्विवेदी के सम्मान में आप एक अभिनन्दन ग्रन्थ का प्रकाशन कर रहे हैं। श्री द्विवेदीजी जगत गुरु श्री शंकराचार्य के गौरवशाली पद को सुशोभित करने जारहे। इससे राजस्थान का सम्मान बढ़ा है। उन्होंने संस्कृत के प्रचार के क्षेत्र में जो सेवाएं एवं सहयोग राज्य को दिया है उसके लिए हम सदा उनके आभारी रहेंगे। मैं इस अवसर पर उनको बधाई देता हूं और आपके अभिनन्दन ग्रन्थ की सफलता की कामना करता हूँ।

मोहनलाल सुखाडिया
मुख्य मंत्री

Governor's Camp,
UTTAR PRADESH
Naini Tal.
June 13, 1964

Few are the people that are blessed. A reput scholar and a recognised authority on Vedas and Vedanta, ripe with matured experience and with a conviction all his own, Pandit Chandrasekhar Dwivedi gets the opportunity as the Shankaracharya of the Gobadhan Math of Puri--the reputed Jagannath Dham of the Hindu world. The great Adi-Shankara had set up four Maths in the four corners of India—Jyotimath near Badrinath, Gobardhan Math at Puri, Shringeri and Dwarka Dham--to propagate his philosophy and his way of life. The famous Gobardhan Math, where once the Adi Shankara lived and taught his disciples, now needs renovation. The Shankaracharyas, that have so far come in succession, are scholars of reputation, ripe with experience and knowledge and devoted sanyasis, commanding respe t of millions. Be it noted here that all the great religious leaders of India, including Shri Chaitanya Mahaprabhu, Ramanuja, Nanak, Kabir and the rest have spent part of their lives in Puri. The new Shankaracharya's association with Puri-a place of culture and learning and the heart of Hindu India-is hailed with joy and animation by the people of the south-eastern zones of India, who have an active and direct link with Puri. Let me hope that Puri, one of the greatest cultural centres of India, is strengthened and harnessen further to carry on and to propagate the philosophy and the way of life of Lord Shankara, imparting renunciation as the means and the way of enjoyment and thus save the world from annihilation.

Biswanath Das
Governor, U. P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रम संख्या	विषयाः	लेखकाः	पृष्ठ संख्या
१	शुभसन्देशाः		
२	मङ्गलम्	मधुपः, जयपुरम्	१८५
३	संक्षिप्तः परिचयः	दीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१८६
४	अभिनन्दनम्	श्रीनवलकिशोरकाङ्करः, जयपुरम्	२०२
५	श्रद्धाकुसुमाञ्जलिः	श्रीजगदीशचन्द्रशास्त्री, जयपुरम्	२०४
६	अस्मद्गुरुचरणाः	श्रीकालीचरणभट्टाचार्यः, जयपुरम्	२०५
७	शङ्कराचार्यः	श्रीदेवकीनन्दनशास्त्री, जयपुरम्	२०७
८	अभिनन्दनम्	श्रीदीनानाथशर्मा शास्त्री सारस्वतः, देहली	२०८
९	प्रणामाञ्जलिः	आचार्य श्रीनारायणशास्त्री काङ्करः जयपुरम्	२११
१०	नमामश्चन्द्रशेखरम्	श्रीदेवकीनन्दनशास्त्री, जयपुरम्	२१२
११	देवदत्त ! पुत्रस्ते जातः कन्या ते गर्भिणी	श्रीभवदत्तशर्मा मैथिलः, जयपुरम्	२१३
१२	अभिनन्दानाशीः	आचार्यश्रीचन्द्रशेखरद्विदमहोदयः, जयपुरम्	२१५
१३	सहसम्पादकीयम्	सहसम्पादकः, जयपुरम्	२१७
१४	किञ्चिन्निवेदनम्	श्रीगिरिराजशास्त्री प्रबन्धसम्पादकः, जयपुरम्	२१९
१५	शुभसन्देशाः		२२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

सम्पादकः
आशुकविः
श्रीहरिशास्त्री
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
महाराज-संस्कृत-कॉलेजः,
जयपुरम्

भारती

संस्कृतमासिकस्य
श्रीचन्द्रशेखरद्विवेदाभिनन्दनाङ्कः

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १४ | जूनमासः, सन् १९६४ | अङ्कः ८

मङ्गलम्

सत्यासक्तस्तथोवाह यो गंगां सविनायकः ।
सर्वदो माधवः पायादपायात्कामदः स नः ॥

यः सर्वमङ्गलोपेतो भक्तानन्दकरः सदा ।
विभूतिभूषितं सिद्ध्यै भजे तं चन्द्रशेखरम् ॥

वेदार्थानामतिविशदया व्याख्यया शिक्षया वा,
पूतात्मानो जगदिदमलं ये समुद्धर्तुकामाः ।
धन्या मान्याः प्रथितयशसो भाविनो वन्दनीयाः,
नम्यन्ते ते भुवनगुरवः शङ्कराचार्यवर्य्याः ॥

वेद-वेदान्त-निष्णाता मीमांसामर्ममण्डिताः ।
सांख्य-योगमहायोग्या ये व्याकरणपण्डिताः ॥

अध्यक्षाः परमा दक्षा धर्म-तर्क-विचक्षणाः ।
जयन्त्येते सुधीवर्य्या आचार्याश्चन्द्रशेखराः ॥

—मधुपस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ स्वस्ति श्रीमद्विद्वद्वरमानसराजहंसानां श्री-विद्या-यशोविराजमानौदीच्यभूसुरवंशावतंसानां विद्याभूषण-दर्शनवागीशप्रभृतिविविधविरुदावलिविभूषितानां पण्डिततल्लजानां पदवाक्यप्रमाणपारावारपारीणानां निखिलनिगमागमविद्याविद्योतितान्तःकरणानां विविधविशिष्टव्याख्यानविख्यातपरमपाण्डित्यानां शास्त्रार्थकलाकलापकुशलकोविदानां विपश्चिदपश्चिमानां महामान्यानां धन्यानां वदान्यानां वर्तमाने जयपुरीय-महाराज-संस्कृतमहाविद्यालयाध्यक्षाणामचिरादेव च भाविनां श्रीजगद्गुरुशङ्कराचार्यवर्य्याणां गुरुवर्य्याणां परमादरणीयचरणानां प्रातःसंस्मरणीयाचरणानां

श्रीचन्द्रशेखरद्विवेदिमहाभागानाम्

संक्षिप्तः परिचयः

अयि सम्माननीया मनीषिवर्य्याः !

सुविदितमेवेदं विदितवेदितव्यानां तत्रभवतां भवतां विपश्चितां यत्समस्तसच्छास्त्रसागरकृतावगाहानामेषां श्रीद्विवेदिमहाभागानां परमं पावनमनन्तमपारं तथातीवदुर्बोधं जीवनचरितं वर्णयितुं मन्दमतौ मयि यद्यपि नास्ति सामर्थ्यम्, तथाप्येतेषामेव श्रीमतां गुरुवर्य्याणां सदनुग्रहाद् यथामति समासतो निवेदयितुं किञ्चित् संप्रति प्रयत्यते मयेति।

जन्मस्थानम्

अस्ति किल निखिलावनिवलयशिरोभूषणीभूतं व्यासवसिष्ठादिमहामहिममहर्षिसमुत्पत्ति-परिपूतमसकृद्गृहीतभगवदवतारं सदाध्यात्मविद्यागारं सनातनधर्मप्रकर्षं भारतवर्षम्। तत्राप्यसंख्यसंख्यविख्यातशौर्यप्रभावभूपतिमणीनां वीररमणीनाञ्च जन्मस्थानं राजस्थानम्, तत्रापि सुरसरस्वतीसमाराधनासक्तसूरिप्रचुरं जयपुरं नाम पुरम्। एतस्माद् दक्षिणपूर्वभागे मनाग् दूरे च वर्तते खलु टोडाभिधं तपस्विभूसुराणां रमणीयं पावनमेकमैतिहासिकं नगरम्।

तत्र वाप्यो ह्रदश्च

तत्र हि—असंख्या वाप्यः कूपाश्च वर्तन्ते। वृद्धा वदन्ति यदिह सार्धसप्ततिशतसंख्यामिताः साकल्येन वाप्यो विद्यन्ते। तासां मध्ये च सुदीर्घा दीर्घिका तु 'जगन्नाथवापी' इत्याख्ययास्ति प्रसिद्धा, यस्यामेकसहस्रमपि जना युगपत् स्थित्वा सहभोजनं कर्तुं शक्नुवन्ति—इति। श्रूयते च तत्र चौरवाप्यां सार्धद्विशतमिताः सोपानपंक्तयो विलसन्तीति।

एवं तत्र 'बुद्धिसागरः' इति नाम्ना च प्रसिद्धः सुमहानेको ह्रदोऽपि विराजते। यथा हि—

तत्रैव शीतमधुराच्छजलोतिहृद्यो,
नित्यं कदम्बकुटजादिसुशाखिशाली।
यो बुद्धिसागर इति प्रथिताभिधानो
'ग्रामान्तिकेऽस्ति सुभगः स महाह्रदोऽपि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निदाघकालेऽपि कदापि याति यो,
न शुष्कतां सन्नपि देवमातृकः ।
हृदोत्तमस्तत्र स बुद्धिसागरो,
विभाति पूर्णः सलिलेन सन्ततम् ॥

ततः पयः स्वादु समानयन्ति,
नित्यं नराः स्नान्ति, मुदं वहन्ति ।
तत्रापि सन्ध्यादिकमाचरन्ति,
वृद्धास्तु तं तीर्थमतो भणन्ति ॥

वस्तुतो नगरमिदं कालाद् बहोरेव नित्यं ब्रह्मपरायणानां विद्याध्ययनाध्यापनतत्पराणां विद्वद्वराणामाकर एवाभूत् । यत्र च हिन्दीरसगङ्गाधरलेखकाः संस्कृतसाहित्यस्य सुमर्मज्ञा विज्ञाः कवयो लेखकाः कुशलसम्पादकाश्च स्वर्गीयपण्डितश्रीपुरुषोत्तमशर्मचतुर्वेदिसाहित्याचार्यमहानुभावा अपि जन्म लेभिरे । यथा हि—

काशीनरेश-वर-राजमनीषिणो ये
विद्याप्रदीप्तमतिकोविदवृन्दराजाः ।
ये लेखकाः सुकवयोऽपि च तेऽपि पूज्याः,
जाता इहैव गुरवः पुरुषोत्तमाख्याः ॥

औदीच्यभूसुराणां सिद्धपुरादागमनं जयपुरराज्ये तन्निवासश्च

सिद्धराजस्य सोलङ्कीत्युपाह्वस्य पाटनराज्यस्याधिपतेः समये पूर्वमौदीच्यब्राह्मणाः सहस्रशः समागत्य गुजरातदेशे न्यूषुः । तदानीं पाटनमेव गुजरातराज्यस्य बभूव राज्यधानी । महानुभावः सिद्धराज एव पुरा भगवत्याः सरस्वत्याः सरित्तटे सिद्धपुरं निवासयामास । तस्मादेव च ततो जयपुरमहीमहेन्द्रस्य श्रीजयसिंहनृपतेः समये समागत्यात्र जयपुरेऽसंख्याः संख्यावन्त औदीच्यब्राह्मणा न्यवात्सुः । तेषामेव चैकतमं कुटुम्बं जयपुरात् टोडारायसिंहाभिधं नगरमिदं गत्वोषितवत् ।

किञ्चात्र—

भागे च तत्रैकतमेऽर्बुदाद्रेः
सुदुर्गमं संप्रति दुर्गमेकम् ।
पुरातनं शौर्यसमुद्भवं तद्,
आविष्करोत्यप्रतिमप्रभावम् ॥

अधित्यकायामिह पर्वतस्य,
हस्तत्रयप्राप्यजलास्तु कूपाः ।
ये भूगतास्ते तु महागभीराः,
विचित्रतैषापि विलोक्यतेऽत्र ॥

श्रीमद्द्विवेदिपूर्वजपरिचयः

श्रीद्विवेदिवंशस्य मूलपुरुषस्तु माननीयो मनीषिमूर्द्धन्यः **श्रीगोपीरामद्विवेदि**महानुभावो बभूव किल, यः श्रौत-स्मार्त-कर्मपरायणस्त्रिकालदर्शी चासीत् ।

तदात्मजश्च प्रकाण्डपण्डितो **हरिकृष्ण**महोदयो बभूव । तस्माच्च पुनर्**लक्ष्मीकृष्ण**ाभिधो महाबुधो जनिं लेभे । स च तन्त्रमन्त्रशास्त्रवित्, वैदिकानुष्ठानविद्यायामतिनिपुणो विशेषतश्च गारुडविद्यापारङ्गतः समासीत् । विद्वद्वरः स गगनात् तत्र स्थितानि नक्षत्राणि मन्त्रविद्याबलेन भूतले समाकृष्य पुनर्यथास्थानं प्रापयति स्म । एवमन्यान्यपि महदाश्चर्यजनकानि कार्याणि निजमन्त्रशक्तिसामर्थ्येन स चकार—इत्यपि श्रूयते ।

अथ तस्मान्महाविदुषः **श्रीमग्नीराम**ाभिधो बुधः प्रबभूव, यो ज्यौतिषशास्त्रस्यातिविलक्षणो विचक्षणो ववृते । स महाभागः केवलं मनुष्यस्य यस्य कस्यापि चित्रस्य दर्शनेन तस्य जन्मपत्रं, तथैवं जन्मपत्रस्य चावलोकनेन तदीयमापादमस्तकं चित्रञ्चापि चित्रयितुं शशाक । एवंविधो ज्यौतिषशास्त्रस्य विषयेऽद्भुतश्चमत्कारः संप्रति न क्वापि समवलोक्यते श्रूयते वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तरञ्च ज्योतिर्विदां वरिष्ठस्य गुणगण-गरिष्ठस्य मग्नीराममहाराजस्य तस्य सुयोग्यास्त्रय-स्तनया बभूवुः। तेषां **फतेहशङ्करो** ज्येष्ठः, **श्रीजगन्नाथ**नामा द्वितीयस्तथा **केदारनाथश्च** तृतीयः, स च स्वल्पतम एव स्वस्य जीवनसमये ब्रह्मीभूतः।

तत्र श्रीजगन्नाथद्विवेदिप्रवरः सुधीवरस्तन्त्र-ज्यौतिष-कर्मकाण्डकुशल आसीत्। स च महाभागो व्याकरणस्याध्यापनविधौ सर्वतः प्रथममष्टाध्यायीं ततः सिद्धान्तकौमुदीञ्च पाठयाम्बभूव। तथा स भोजनवस्त्रादीनां सुव्यवस्थामपि विधाय दश पञ्च-दश वा ब्राह्मणबालकान् स्वगृह एव नियमेन प्रत्यहमध्यापयाम्बभूव। किञ्चैवं पूर्णरूपेण वर्ण-मालानभिज्ञानपि ग्राम्यान् ब्राह्मणबालकान् स वर्षद्वयेनापि ज्यौतिषकर्मकाण्डविषयेऽतिकुशलान् कर्तुं प्रबभूव। एतद् वैचित्र्यञ्च वर्तते तस्य महानु-भावस्य विशिष्टाध्यापनपद्धत्या एव।

ततश्च श्रीफतेहशङ्करद्विवेदी स्वधर्मपत्न्यां चतुरः सुयोग्यान् सुतानुत्पादयामास। तथा हि— तेषां प्रथमः **शिवचन्द्र**सुधीः समासीत्। स च कविस्तथा ज्यौतिषकर्मकाण्डपण्डितः सन्नपि मल्ल-विद्यायामपि महाकुशल आसीत्, परमनपत्य एव स्वस्यायुषो द्वाविंशतितमे वर्षे स्वर्गं जगाम। एवं द्वितीयश्च तदात्मजो **मथुरानाथद्विवेदी** सम-भूत्। यथा हि—

सुतो द्वितीयो मथुराद्यनाथः,
सन्तत्यभावेन च सन्ततं यः।
मुनिर्यथैकान्तनिवासनिष्ठो
बभूव स श्रीहरिभक्ति लीनः॥

ततश्च तृतीयस्तनयः **श्रीमोतीलालो** महा-मनीषी ज्यौतिष-कर्मकाण्ड-न्यायवेदान्तादिशास्त्राणा-मद्वितीयो बभूव विद्वान्। स हि जयपुरीय-वैद्यराज-स्वामिश्रीलक्ष्मीराममहाभागस्य गुरोः श्रीनारायण-मुनेः सकाशाद् वेदान्तशास्त्रं तथान्यायशास्त्रञ्च सम्यक् पपाठ। तथा च स महाभागो वृद्धावस्थाया-मपि वेदान्तविद्यामध्येतुं प्राप्तमार्थिकलाभमपि परित्यज्य ग्रामादतिदूरेऽपि नियमेन प्रयाति स्म। तदानीं च महाभागः स स्वगुरुणा श्रीमुनिराजेन च 'मौक्तिकरामः' इति नाम्नोच्यते स्म। तथा च सहैव निजपैतृकपरम्पराप्राप्तं निःशुल्कमध्यापन-ञ्चकार। अतश्च कर्मकाण्डकुशला ज्योतिर्विदश्च तदीयाः शिष्या अनेकेऽद्यापि राज्येऽत्र विराजन्ते। तस्यापि परं कापि सन्तति र्न बभूव।

अनन्तरञ्च **श्रीगणेशलालद्विवेदि**महानुभावः फतेहशङ्करद्विवेदिनश्चतुर्थः पुत्रो जातः। ज्यौतिष-कर्मकाण्डकोविदस्य तस्य महाभागस्य वैदिकविष-यकं वैदुष्यं सुप्रसिद्धमेव वरीवर्ति। अतो नात्र तद्विषयेऽधिकं किमप्युच्यते संप्रति।

ततो व्यावरगमनम्

अथ चैते चत्वारोऽपि भ्रातरः 'स्थानमुत्सृज्य गच्छन्ति, सिंहाः सत्पुरुषाः ……'इत्यादि वृद्ध-वचोनुसारेण स्वविद्यायाः सम्यक् प्रचाराय प्रसाराय च टोडातो व्यावराख्यं नगरं गत्वा तत्र सुखेन न्यूषुः। अचिरादेव च तेषां महानुभावानां तत्र सर्वत्र सुप्रभावः प्रसारमवाप। तथा हि—

सर्वे व्यावरवासिनोऽपि धनिनोऽशेषा अपि ब्राह्मणाः,
लोका येऽपि च शासनैकनिरता उच्चाधिकारे स्थिताः।
एवं तत्र सुखेन साधु वसतां तेषां तदा धीमताम्,
सच्छास्त्रीयविवेकतः समभवन् कामं प्रभावान्विताः॥

चरितनायकस्य जन्मादिकम्

ततश्च परमात्मनोऽनुकम्पया पण्डितप्रवरस्य ऋग्वेदस्य शाङ्खायनशाखीयस्य श्रीगणेशलालद्विवेदि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभागस्य गृहे प्राणा इवातिप्रियाः पञ्च पुत्रा जनिमलभन्त । तेषां ज्येष्ठो विदुषां वरिष्ठो गुणैर्गरिष्ठश्च सोऽयं श्री।चन्द्रशेखरद्विवेदमहानुभावः शैलरसाङ्कभूमिमिते वैक्रमे वत्सरे (१९६७) आश्विनकृष्णपक्षे १४ रविवारे वृश्चिकलग्नवेलायां समुदपद्यत । श्रीमातुश्च शुभं नाम 'श्रीरम्भादेवी' इति समवर्तत । महानुभावस्यास्य जन्मग्रहाणां स्थितिविषये च यथा—

एषां महा-परमभागवतोत्तमाना-
मेकादशाख्यभवनञ्च गता ग्रहाः षट् ।
सन्न्यासयोगमपि ते खलु सूचयन्ति
बोधाय संप्रति तथेह विलिख्यतेऽधः ॥

शुभैषा जन्मकुण्डली



किञ्च महानुभावस्यास्य **यथाक्रमनुजाः सहोदराः श्रीदामोदर-गिरिवरधर-शिवल्लभश्री-विश्वनाथा** विद्यासनाथा विद्यन्ते साम्प्रतम् ।

प्रारम्भिक-शिक्षणम्

परमश्रद्धेयाः श्रीद्विवेदिवर्य्याः प्रथमं गृहे वसन्त एव बुधोत्तमात् स्वस्यैव पूज्यज्येष्ठपितृव्यपादात् श्रीमोतीलालद्विवेदिनो लघुसिद्धान्तकौमुदीं, समग्रामप्यष्टाध्यायीं तथाऽमरकोषञ्चाध्यगीषत ।

अध्ययनप्रचयः

ततश्च महानुभावोऽयं-व्यावरस्थ-सनातनधर्मपाठशालायां खण्डेलाग्रामवासिनः श्रीगोविन्दनारायणशास्त्रिणः, मेरठवास्तव्यात् पण्डितश्रीमुरारिलालमहाभागात् तथा मुरादाबादमण्डलान्तर्गतकाँठग्रामनिवासिनः पण्डितवर-श्रीरामेश्वरत्रिवेदिमहाभागादेवं वदायुवासिनः श्रीप्यारेलालशर्मव्याकरणाचार्याच्च व्याकरणशास्त्रिप्रथमवर्षपर्यन्तं सम्यगध्ययनं कृतवान् । तदानीं तत्र समधीयानस्य श्रीद्विवेदिमहाभागस्यास्य विभिन्नविषयकभाषणप्रतियोगितायां शास्त्रार्थे च विशिष्टाभिरुचिः समवर्तत । अत्राध्ययनकाले च श्रीमति द्विवेदिवर्येऽस्मिन् समेषामपि विदुषां गुरूणामेषां सुमहान् स्नेहः समासीत् । यथा—

दृष्ट्वैव सर्वे गुरवस्तदाऽस्मिन् -
द्विवेदिवर्य्ये प्रतिभां विशिष्टाम् ।
ते वर्धमानां पठने रुचिञ्च-
स्नेहं महान्तं युगपद् व्यभार्षुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टमध्ययनं विद्यागुरवश्च

तदनन्तरं व्याकरणशास्त्रिपरीक्षाया द्वितीयवर्षात्समारभ्यैव व्याकरणाचार्य-पोष्टाचार्य-परीक्षापर्यन्तं श्रीद्विवेदिमहाभागानां विशिष्टमध्ययनं गवर्नमेण्टसंस्कृतकॉलेजे (क्विसकालेजे) अद्यत्वे च वाराणसेयसंस्कृतविश्वविद्यालयेति नाम्ना विख्याते-प्राचलत् ।

तत्र च तदानीं 'मोकाटे'त्युपाह्वपण्डितश्रीगणपतिशास्त्रिणो व्याकरणं मीमांसाशास्त्रञ्च, महामहोपाध्याय-श्रीहाराणचन्द्रभट्टाचार्यमहाभागात् तथा म० म० श्रीहरिहरकृपालुद्विवेदिमहोदयाच्च वेदान्तविद्यां, नृसिंहापरनाम्नो नारायणशास्त्रिणः श्रीसूर्यनारायणन्यायव्याकरणाचार्यमहाभागाच्च न्यायशास्त्रं, तथा तपोनिधिमहाशयश्रीरामयशशास्त्रिपाठिनश्च व्याकरणस्य विशिष्टमध्ययनं कृतवानयं श्रीद्विवेदिमहाभागः । एवमेव पोष्टाचार्यपरीक्षायाञ्च वर्षत्रयं यावत् म० म० कविराजश्रीगोपीनाथमहाराजतो न्यायं तथा वेदान्तशास्त्रं समधीत्य चरितनायकः सोऽयं वेदान्त-न्याय-सांख्य-तीर्थपरीक्षाश्च समुत्तीर्णवान् ।

अध्यापनादिकार्यकलापः

[१]

ततश्चैवं भारतप्रसिद्धेभ्यो महापण्डितेभ्यो गुरुभ्यः सर्वाण्यपि प्रायः शास्त्राणि समधीत्य समभ्यस्य च सोऽयं द्विवेदिमहाभागो वारवह्निग्रहभूमिते (१९३७) ईशवीये वत्सरे च वाराणस्यां साङ्गब्रह्मविद्यालये सर्वतन्त्रस्वतन्त्र-श्रीरघुनाथद्विवेदिमहानुभावानां स्थानमलंकृत्य तत्र वेदान्तशास्त्राणामध्यापनं कृतवान् ।

[२]

अनन्तरञ्च श्रीमन्त एते द्विवेदिमहाभागाः गुजरातमण्डलान्तर्गतपेटलादनगरस्थिते नारायणमहासंस्कृतविद्यालये चात्मनोऽनुपमस्य वैदुष्यस्य प्रभावेण प्रधानाचार्यपदमुपलब्धवन्तः ।

[३]

ततश्च वर्षद्वयं यावत् स्वगृह एव प्राचीनपरिपाट्या प्रचलिते विद्यालय एव च विविधानां परीक्षाणां सञ्चालनं विधाय विभिन्नविषयेषुच्छात्रानध्यापयन्नेते मनीषिणामपि माननीया गुरुमहाराजाः विशेषतया चात्रच्छात्रा इव बहवोऽध्यापकशिष्या अप्यपाठ्यन्त श्रीमद्भिर्द्विवेदिभिरेभिः ।

[४]

तत एव च श्रीमन्तो द्विवेदिमहोदया एतेऽखिलभारतीयधर्मसंघे पूज्यपाद-श्रीकरपात्रिमहाराजस्य चरणसरोजयुगले स्वकीयं जीवनमेव समर्पितवन्तः । अध्ययनकाल एव चैतेषां श्रीकरपात्रिमहाराजैः सह सम्यक्तया सञ्जात आसीत् सुपरिचयः । तथा चैभ्यः स्वामिमहाराजेभ्य एव खण्डनखण्डखाद्यम्, अद्वैतसिद्धि तथा योगभाष्यञ्चाध्यगीषत श्रीद्विवेदिनः । एवं १५ पञ्चदशवर्षाणि यावत् सातत्येन संस्थायामस्यामेव विभिन्नानि कार्याणि कुर्वन्त एवावर्तन्त सम्मान्या अध्यक्षवर्य्या एते ।

[५]

अथ तस्मिन्नेव कार्यकाले च धर्मशिक्षामण्डलस्य निरीक्षकास्तथा दिल्लीतः काश्याश्च प्राकाश्यमुपगच्छतो हिन्दीदैनिकस्य 'सन्मार्ग'पत्त्रस्य कुशलाः सम्पादकाश्चाप्यभूवन्निमे महानुभावाः ।

[६]

इत्थमेव श्रीद्विवेदिनश्चैते—अखिलभारतीयरामराज्यपरिषदो मन्त्रित्वमपि महता कौशलेन निरवहन् ।

[७]

अथातः परञ्च पूज्यपादश्रीकरपात्रिमहाराजस्यैवाज्ञया हरिद्वारस्थिते ऋषिकुलब्रह्मचर्याश्रमे वत्सरद्वयं यावदध्यक्षपदमलंकृतवन्तः श्रीमन्त एते । तथा चास्मिन्नेवान्तराले ऽनेकशतमुखकोटिहोम-पञ्चलक्ष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(च)ण्डीप्रयोगाश्चापि समपाद्यन्त महद्भिर्विद्वद्भि-र्रेभिः।

[८]

ततश्च वत्सरमेकं यावत् केन्द्रीयशासने जाम-नगरे चायुर्वेदानुसन्धानविषयेऽपि-आयुर्वेदमुख्याङ्ग-वर्णनिश्चय- प्रकृतिनिर्णयादीनि कार्याणि साधु कृत-वन्त एते श्री द्विवेदिमहाभागाः।

[९]

किञ्च सहस्रत्रयपद्यात्मिकाया व्याख्यानमालाया गम्भीरविचारपूर्णो हिन्द्यामनुवादोऽपि महाभागै-रेभिः कृतो विद्यते। सिहोरनगरे (गुजरात) च सत्सङ्गमण्डलेन संप्रति तस्याः प्रकाशनं विधीयते। व्याख्यानमालायाः संग्रहकर्ता च बभूव ब्रह्मीभूत आत्मारामः स्वामी।

[१०]

अनन्तरञ्चैते महामान्याः श्रीद्विवेदिमहाभागा जयपुरीय-महाराजसंस्कृतकॉलेजे ऽध्यक्षपदमल-ङ्कृत्य स्वपदानुरूपमेव शोभनं प्रशासनं कुर्वन्त एव विभिन्नविषयेषु विभिन्नशास्त्राणि समुचितपाठन-पद्धत्यनुसारेण च्छात्रान् पाठयन्तो ऽद्यावधि विद्यन्ते। तथा हि—

वेदान् व्याकरणं तथोपनिषदः षड् दर्शनान्येव च,
मीमांसामपि धर्मशास्त्रमनिशं वेदान्तशास्त्रं तथा।
शिष्यान् पाठितवान् पुराणमपि यो विद्यानिधिः सद्गुरुः,
सोऽयं**श्रीयुत चन्द्रशेखरमहारजः** सदा राजताम्॥

किञ्च—

एषां यद्यपि शासनस्य समये प्राप्तास्तु विघ्ना अपि,
किन्त्वीशातिदयावशात्स्वयमहो सर्वेऽपि ते कुत्रचिद्।
सम्प्राप्ता विलयं, न चालमभवन् बाधासमुत्पादने,
बाध्यन्ते हि न जातु केनचिदपि प्रायः प्रभोः सेवकाः॥
एभिः पूज्यतमैश्च संस्कृतसमुद्धारे सदा तत्परैः,
आधिक्येन भवेद्यथा सुरगिरां सम्यक् प्रचारस्तथा।
स्वातन्त्र्येण च पाठका अपि समध्येतुं यथा शक्नुयुः,
प्रातः सायमतोऽत्र पाठनविधिः सञ्चालितोऽभूत्तदा॥

कालद्वयेऽपि कालेजमागत्यातो द्विवेदिभिः।
पाठ्यन्ते स्म सदा शिष्याः कुर्वद्भिः सत्प्रशासनम्॥

इत्थमत्र महाराज-संस्कृतमहाविद्यालये प्रात-स्तथा सायञ्चाप्यध्ययनाध्यापनविधेः परिचालनस्य फलन्तु प्रेक्षावतां विपश्चितां प्रत्यक्षमेव वर्तते। तथा हि—

अस्याचार्यवरस्य कार्यसमये सद्यत्नयोगाञ्चिते,
ग्रन्थान् सम्यगधीत्य चात्र बहवश्छात्रास्तथाऽध्यापकाः।
आचार्यप्रमुखासु योग्यविधिना नानापरीक्षास्वपि,
सानन्दं प्रतिवत्सरं सफलतां संप्राप्तवन्तस्तदा॥

[११]

अपि च नववर्षात्मके ऽस्मिन्नेव कार्यकाले ऽखिलभारतीय-वैदिकसर्वशाखासंमेलनस्यापि मन्त्रि-त्वमङ्गीकृत्य यथामति सुचारुविधिना सम्मेलनस्य कार्यजातमन्वतिष्ठन्नेते श्रीद्विवेदिनः।

विविधपदवीलाभः

[१-२]

अथ श्रीमद्भिरेभिर्द्विवेदिभिः समये-समये सम-नुष्ठितानां विशिष्टानां सेवानां निमित्तादेव काशी-सम्मेलनस्याध्यक्षाः श्रीजगद्गुरुशङ्कराचार्याः 'दर्श-नवागीशः' इत्युपाधिना, धर्मसङ्घस्य तदानीन्तना अध्यक्षाः स्वामिनः श्रीपरमानन्दसरस्वतीमहा-राजाश्च **'महामहोपाध्यायः'** इतिपदवीप्रदानेन च श्रीमन्तमेनं व्यभूषयन्।

[३-४]

इत्थं वाराणसेय-धर्ममण्डलञ्च धर्मशिक्षा-राज-नीति-सामाजिकसेवाभिश्च सुप्रसन्नं भूत्वाचार्या-नेतान् श्रीद्विवेदिवर्य्यान् **'विद्याभूषणम्'** 'विद्या-लङ्कारः' इति पदवीद्वयेन सादरमलङ्कृतवत्।

[५]

किञ्चैवं श्रीजगद्गुरुशङ्कराचार्यः श्री द्वारका-पीठाधीश्वरश्चैतत्परमपाण्डित्यप्रीतः सन् श्री द्विवेदि-महानुभावाय **'पण्डितमार्तण्डः'** इति पदवीं ससम्मानमयच्छत्। तथा हि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीद्वारकाधीशो विजयते। श्रीशारदाम्बा विजयतेतराम्। श्रीचन्द्रमौलीश्वरो विजयतेतमाम्।

श्रीद्वारकाशारदा-पीठम्

प्रशस्तिपत्रम्

श्रीमत्परमहंसपरिव्राजकाचार्य-पदवाक्यप्रमाणपारावारीण-यमनियमासनप्राणायामप्रत्याहारध्यान-धारणासमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ-तपश्चर्याचरणचक्रवर्ति-अनाद्यवच्छिन्नगुरुपरम्पराप्राप्तषण्मत-स्थापनाचार्य-सांख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्र-निखिलनिगमागमसार-हृदय-श्रीमत्सुधन्वसाम्राज्यप्रतिष्ठापनाचार्य-व्याख्यानसिंहासनाधीश्वर-श्रीमद्राजाधिराज-गुरुभूमण्डलाचार्य-चातुर्वर्ण्यशिक्षक-गोमतीतीरवासि-श्रीपश्चिमाम्नायश्रीद्वारकाशारदा-पीठाधीश्वरश्रीमज्जगद्गुरुशङ्कराचार्य—

अभिनवसच्चिदानन्दतीर्थस्वामिभिः

अत्यन्तप्रियशिष्य-पण्डितचन्द्रशेखरशास्त्रिणः प्रति प्रत्यग्ब्रह्मैक्यानुसन्धान-समन्वित-श्रीनारायणस्मरणसंसूचिताशिषः समुल्लसन्तुतराम्। श्रीजगद्गुरूणां महेश्वरापरावतारश्रीमच्छङ्करभगवत्पूज्यपादाचार्याणां श्रीशारदापीठगोचरा भक्ति-रनवधिकश्रेयोदानमिति सार्वजनीनमेतत्।

साम्प्रतं स्वधर्ममर्यादासंरक्षणे बद्धपरिकराणां भवतां नैकदर्शनवैशारद्य-मवलोक्य प्रमुदितान्तःकरणा वयं भवद्भ्यः

दर्शनवागीशः

इति प्रशस्तिं सम्प्रयच्छामः। इदं च श्रीद्वारकाधीशशारदाम्बाचन्द्रमौली-श्वरप्रसादरूपं सत्पदं सुवर्णे रत्नमिव स्वनाम्ना संयोजितं भवद्भिर्यत्नेन संरक्षणीय-मिति शिवम्।

श्रीमच्छङ्करभगवत्पादाचार्याणां
अवतारशकाब्दाः २४२७
विक्रमशकाब्दाः २०१४
तिथिः चैत्रशुक्लपूर्णिमा
क्रमाङ्कः ५०५
वाराणसी

श्रीः

श्रीमज्जगद्गुरुशङ्कराचार्याः

मुद्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारत-धर्म-महामण्डल-प्रधान-कार्यालयः, काशी

महतस्तमसः पारे पुरुषं ह्यतितेजसम् ।
यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः ॥

संस्कृत—

विद्यामानपत्रम्

श्रीयुक्तपण्डितचन्द्रशेखरद्विवेदिव्याकरणवेदान्ताचार्य !

औदीच्य, ब्यावरनगरम् (राजस्थानम्)

ज्ञानस्य जननी विद्या । अविद्यारूपं तमो यया निरस्यते सा विद्या । पारमार्थिकञ्च तस्याः स्वरूपं संस्कृतां देवगिरं द्वारीकृत्यैव जगति प्राकाश्यत । साम्प्रतमधःपतितायामार्यजातौ सद्विद्यां पुनः प्रचार्य्याज्ञानोद्यमराहित्यादिदोषजातञ्च दूरीकृत्य यावदस्यां धर्मशक्तिर्न पुनराविर्भाव्यते तावदस्या जीवनरक्षा कर्तुं न शक्यते । इत्यत आदिशिक्षितायामादिमननशीलायामादिविज्ञान-विदि जगद्गुरुत्वेनाभिमतायामार्य्यजातौ सद्विद्यायाः पुर्नविकासार्थं सनातनधर्मस्य पुनरभ्युदयसाधन पुरस्सरं जगत्कल्याणकारिण्या धर्मशक्ते राविर्भावार्थञ्च सकलधर्मसभाधर्मालयानां समष्टिरूपायाः श्री भारतधर्ममहामण्डलाख्याया विराड्धर्मसभायाः स्थापनमभूत् ।

तत्र ये केचित् श्रीसरस्वतीदेव्याः कृपास्पदीभूताः संस्कृतज्ञा विद्वांसो विद्योन्नतौ रतास्ते सर्वेऽप्यस्याः स्वजातीयविराड्धर्मसभायाः प्रेमभाजनानीति भवतः संस्कृतविद्याया योग्यतया प्रसन्ने यं स्वजातीयधर्ममहासभा सद्विद्यायाः सम्मानवृद्ध्यर्थं भवन्तं **विद्याभूषण**—विद्योपाधिरूपा-लङ्कारेणाऽलङ्कृत्य परमं प्रमोदमश्नुते । सर्वज्ञानमयस्य सर्वशक्तेः परमेश्वरस्य चरणकमलयोः सविनयं प्रार्थयते च भवत आध्यात्मिक्युन्नतिर्भूयादिति शम् ।

श्रीकाशीधाम्नि
श्रीभारतधर्ममहामण्डल—
प्रधान-कार्यालयः
५ तिथौ शुक्लपक्षे माघमासे १९९६ वर्षम्
रमेशदत्तपाण्डे बी. ए. विद्यारत्नं
रिटायर्ड होम सेक्रेटरी, काश्मीरगवर्नमेण्ट
प्रधानमन्त्री

श्रीकामेश्वरसिंहः
आनरेबल सर महाराजाधिराजमिथिलाधिपतिः
के. सी. आई, ई. एल. डी, लिट्—इत्युपाधिकः
प्रधानसभापतिः
श्रीभारतधर्ममहामण्डलस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीद्वारकाधीशो विजयते । श्रीशारदाम्बा चन्द्रमौलीश्वरौ विजयेतेतराम् ।

श्रीद्वारकाशारदा-पीठम्

पदवीप्रदानपत्रम्

श्रीमत्परमहंसपरिव्राजकाचार्य-पदवाक्यप्रमाणपारावारपारीण-यमनियमासनप्राणायामप्रत्याहारध्यान-धारणासमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ-तपश्चर्याचरणचक्रवर्ति-अनाद्यवच्छिन्नगुरुपरम्पराप्राप्तषण्मत-स्थापनाचार्य-सांख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्र-निखिलनिगमागमसार-हृदय-श्रीमत्सुधन्वसाम्राज्यप्रतिष्ठापनाचार्य-व्याख्यानसिंहासनाधीश्वर-श्रीमद्राजाधिराज-गुरुभूमण्डलाचार्य-चातुर्वर्ण्यशिक्षक-गोमतीतीरवासि-श्रीपश्चिमाम्नायश्रीद्वारकाशारदा-पीठाधीश्वरश्रीमज्जगद्गुरुशङ्कराचार्य—

श्रीमदभिनवसच्चिदानन्दतीर्थस्वामिभिः

अत्यन्तप्रियशिष्य-पण्डितश्रीचन्द्रशेखरशास्त्रिणः प्रति प्रत्यग्ब्रह्मैक्यानुसन्धान-समन्वित-श्रीनारायणस्मरणसंसूचिताशिषः समुल्लसन्तुतराम् । श्रीजगद्गुरूणां महेश्वरापरावतारश्रीमच्छङ्करभगवत्पूज्यपादाचार्याणां श्रीशारदापीठगोचरा भक्ति-रनवधिकश्रेयोनिदानमिति सार्वजनीनमेतत् ।

साम्प्रतं स्वधर्ममर्यादासंरक्षणे बद्धपरिकराणां भवतां पाण्डित्यविशेष-मालोक्य प्रमुदितान्तःकरणा वयं भवद्भ्यः

पण्डितमार्तण्डः

इति प्रशस्ति सम्प्रयच्छामः । इदं च श्रीद्वारकाधीशशारदाम्बाचन्द्रमौली-श्वरप्रसादरूपं सत्पदं सुवर्णे रत्नमिव स्वनाम्ना संयोजितं भवद्भिर्यत्नेन संरक्षणीय-मिति शिवम् ।

श्रीमच्छङ्करभगवत्पादाचार्याणाम्
अवतारशकाब्दाः २४२०
विक्रमशकाब्दाः २००७
ता० ११-१०-५१
तिथिः आ० शु० ११
क्रमाङ्कः २०७
डाकोरः

श्रीः

श्रीमज्जगद्गुरुशङ्कराचार्याः

मुद्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च 'विद्वान् सर्वत्र पूज्यते' इति वृद्धजनोक्त्यनुसारेण विविधसंस्थाभ्यो महद्भ्यो विद्वद्भ्यश्च सभासम्मेलनादीनां विशिष्टेष्ववसरेषु ससम्मानमभिनन्दनपत्राण्यपि बहूनि समये-समये श्रीद्विवेदिमहाराजैः समुपलब्धानि । उदाहरणरूपेण चात्र साम्प्रतमेकमभिनन्दनपत्रमुद्ध्रियते यथा हि—

श्रीचन्द्रमौलीश्वरो विजयतेतराम्

असारवा वेबिनवर्क्स संस्थासंस्थापकमिस्त्रिलक्ष्मीचन्द्रामथारामगज्जरमहानुभावायोजितसप्ताहपारायणार्थकश्रीभागवतमहामण्डपे प० प० पूज्यपाद-जगद्गुरुश्रीद्वारकाशारदापीठाधीश्वरकरकमलैः समर्पितं श्रीमतां विद्यावारिधीनां पण्डितमार्तण्डानां

श्रीचन्द्रशेखरमहानुभावानां कृते

सम्मानपत्त्रम्

अयि धीधना महानुभावाः !!

अत्र भवन्तो भवन्तो भूमण्डलमण्डनायमानभारतभूललामभूते गुर्जरप्रदेशे 'उदीच्या ऋषयः सर्वे' इत्युक्तिप्रसिद्धोदीच्यविप्राणां वेदवेदाङ्गविदां विदुषां प्रसिद्धे कुले लब्धजन्मानः सकलविद्याध्ययनक्षेत्रे परमपवित्रसलिलाया भगवत्या भागीरथ्याः परमपावनतटे श्रीविश्वनाथनगर्यां श्रीकाशीक्षेत्रे कृतवसतयो व्याकरण-न्याय-वेदान्त-साहित्यादिविविधशास्त्रपारदृश्वश्रीगुरुचरणसेवालब्धसमस्तविद्याः प्राप्तस्वर्णरौप्यादिपदकाश्च विराजन्त इति महत्सौभाग्यमस्माकं गौर्जराणां विदुषां जनानाञ्च ।

अध्यापकप्रवराः !!

पुष्टाचार्याः सन्तः काश्यां साङ्गब्रह्मविद्यालये वेदान्ताध्यापनाचार्या अपि यतिचक्रचूडामणीनां श्रीकरपात्रिमहाराजानां प्रसादादधीताद्वैतसिद्ध्यादिसमस्तवेदान्ताकरग्रन्थाः पेटलाद-हरिद्वार-वियावरादिस्थानेषु संस्कृतमहाविद्यालयेषु प्रधानाचार्यत्वमलंकृत्य प्रकृष्टाध्यापनशैल्या छात्रसंसदि लब्धकीर्तयोऽधुना जयपुरस्य महाराज-संस्कृतमहाविद्यालयेऽध्यक्षपदमलंकुर्वन्तीति विदितमेवास्ति विश्वविदितं वैदुष्यमत्र भवतां विद्वद्धौरेयाणाम् ।

शास्त्रार्थमहारथिनः श्रुतिपथप्रदर्शकाश्च !

विश्ववन्धुजगदुद्धारकश्रीकरपात्रिमहाराजायोजितानेकलक्षचण्डीमहायागेषु तदन्यत्र प्रसंगेषु च सनातनधर्मपरिपन्थिजनैः सह विवादावसरे प्राप्तविजया धर्मसङ्घ-रामराज्यपरिषदादिसंस्थासु सम्पादितप्रवरप्रचारकार्याः सांख्य-योग-ज्योतिष-कर्मकाण्डायुर्वेद-दर्शनशास्त्रादिसमस्तवाङ्मयवार्धौ कृतावगाहास्तत्तद्विषयोपदेशदानेन सन्मार्गप्रदर्शकाः सर्वज्ञकल्पाश्चेत्यनुपमोऽयं गुणगणः सर्वानत्येति गुणिजनान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मान्या विरागिणः !

यद्यपि जायापुत्रादिपरिवारे मनोमोहजनके वैभवे च सत्यपि संसारासारताविदां संख्यावतां श्रीमतां गुणगणैराकृष्टाः पूर्वाम्नायगोवर्द्धनमठाधीश्वराः प० प० पूज्यपादा अनन्तश्रीविभूषिता ब्रह्मीभूताः श्रीभारतीकृष्णतीर्थमहाराजाः स्वोत्तराधिकारार्थं भवन्नामनिर्देशमकार्षुः स्वान्तिमाशयनिवेनपत्रे तत्कार्यसम्पादनार्थमाज्ञापयामासुश्च श्रीद्वारकाशारदापीठाधीश्वरानित्युचितमेवौचित्यविदां तेषां मतम् ।

उद्धारकाः !

अचिरादेवास्मिन् वर्षे विरजाहोमादिविधिपूर्वकं प्राप्तसन्न्यासदीक्षाः पश्चिमाम्नाय-श्रीशारदापीठद्वारकासंस्थानाधीश्वर-जगद्गुरुश्रीशङ्कराचार्यवरदहस्ताभिषिक्तास्तदीयकार्यमनुसरन्तो जगदुद्धरिष्यन्त्येवेति समाशास्महे, पूर्वपश्चिमपीठयोः सुयोगोऽसौ सनाथानस्मान् करिष्यतीति हर्षविशविलुप्तमतयो वयं भवच्चरणसरोरुहेषु वाक्यपुष्पाञ्जलिमिममर्पयित्वा विरमामः, प्रार्थयामहे च भगवन्तं चन्द्रमौलीश्वरमस्यै कार्यसिद्धयै सुतरामिति ।

विनीताः—

अनूपरामसदाशिवशास्त्रि (धर्माधिकारी, विद्यावाचस्पतिः, दैवज्ञमार्तण्डः, दर्शनकेसरी) प्रभृतयोऽहमदाबादस्थाः समस्तविद्वांसः, लक्ष्मीचन्द्रामथारामगज्जरप्रभृतयो नागरिकास्तथा माईमण्डलादिविविधमण्डलसदस्याश्च ।

असारवा अहमदाबादः

शुभतिथिः—
२०१९–२० वै०,
शकः १८८५,
शुद्धाश्विनशुक्ले १३ सौम्ये
दिनाङ्कः ३०–१०–६३

कुमारेश — लिवर और पेट की बीमारियों में
सालफा-डारमिन — जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रार्थः

(१) ब्राह्मणभागोऽपि वेद एव

माननीया एते श्रीद्विवेदिवर्य्याः समये-समये शास्त्रार्थेष्वपि बहुवारं भागमगृह्णन् । तत्रोदाहरणार्थं किञ्चिदिह निवेद्यते । यथा हि दिल्ल्यां सम्पन्ने अखिलभारतीयवैदिकसर्वशाखासम्मेलने खरसाङ्कभूमिते (१९६०) ईशवीये वत्सरे 'ब्राह्मणभागस्य वेदत्वम्' इति विषयेऽस्मिन् श्रीबुद्धदेवेन सह श्रीद्विवेदिमहाभागानामेवं शास्त्रार्थः प्रावर्तत ।

आर्यसामाजिका हि जनाः केवलं मन्त्रसंहिताभागमेव वेदं मन्वते, न तु ब्राह्मणभागमपि । अत एव तदानीमार्यसमाजपक्षतः श्रीबुद्धदेवमहोदयोऽप्यभाषत यद् 'ब्राह्मणभागो वेदो न भवितुमर्हती'ति ।

तदैभिः श्रीद्विवेदिभिः प्रोक्तम्-'श्रीमन् ! यदि ब्राह्मणभागं श्रीमन्तो वेदरूपेण नाङ्गीकुर्वते, तर्हि भवद्भिरथर्ववेदसंहिता पूर्वमवश्यं द्रष्टव्या ? तत्र च यो मन्त्रो विद्यते सो ऽपि श्रीमता श्रूयताम्—यथा हि-"ऋचः समानि छन्दांसि पुराणं यजुषा सह" । इति ।

मन्त्रस्यास्य भाष्ये च भवतामेव मान्येन स्वयं दयानन्दस्वामिना 'पुराण' शब्दस्यार्थः 'ब्राह्मणग्रन्थः' इत्युक्तो वर्तते । अत एतत् सुस्पष्टं सिद्ध्यति यत् संहिताभिः सहैव ब्राह्मणभागो ऽपि परमात्मनः सकाशात्प्रादुर्बभूव ★ । एवञ्च ब्राह्मणभागोऽपि वेद एवास्तीत्यत्र न मनागपि शङ्काकलङ्कावकाशः ।

किञ्च-उक्तमन्त्रे 'यजुषे' त्यत्र 'सहयुक्तेऽप्रधाने' इति व्याकरणसूत्रेणाप्रधानेऽर्थे तृतीयाया विधानात् पुराणस्य(ब्राह्मणभागस्य) प्राधान्यं यजुषश्च गौणत्वं मन्त्रः स्वयं साधयति । अर्थादेवं भवन्मतेऽपि ब्राह्मणभागस्य प्राधान्यं मन्त्रभागस्य (यजुषः) चाप्राधान्यं मन्त्रोक्तेन 'यजुषे' ति पदेन सुस्पष्टं सिध्यति ।

इत्येवमुक्त्वा च श्रीद्विवेदिमहाभागैस्तत्पुस्तकमपि तदानीं प्रदर्शितम्, यत्र दयानन्दस्वामिना पुराणशब्दस्य 'ब्राह्मणभागः' इत्यर्थः कृतो विद्यते ।

ततः श्रीबुद्धदेवोऽवोचत्–'ब्राह्मणभागो न कथङ्कारमपि वेदो भवितुमर्हति ?, यतो हि ब्राह्मणभागे केवलमितिहासः कथाश्च सन्ति वर्णिताः, अतः स न वेदः, अपि तु स वेदभाष्यमस्तीति वक्तुं शक्यते' इति ।

पुनः श्रीद्विवेदिभिर्भणितम्-'महाशय ! मदुक्तस्य प्रमाणस्य भवता क्रियतां खण्डनम्, अथवा वेदमन्त्रेणैव साध्यतामेतद्यत्-ब्राह्मणभागो वेदो नास्तीति' । अनन्तरं स श्रीबुद्धदेवमहानुभावः केवलं पुनः पुनरुक्तिमेव यदा कर्तुं प्रावर्तत, तदा समुचितोत्तरदानेऽसमर्थं श्रीबुद्धदेवमभिवीक्ष्य मध्यस्थैर्विद्वद्भिः स शास्त्रार्थो ऽवारुद्धो ऽभूत् ।

(२) मूर्तिपूजा

एवमलीगढमण्डलान्तर्गते कचोरानामके ग्रामे ऽप्यकेदा श्रीरामस्वरूपमिश्रप्रभृतय आर्यसामाजिका विद्वांसो मूर्तिपूजाविषये शास्त्रार्थं कर्तुं यदा समाह्वानं कृतवन्तस्तदानीं तत्र पूज्यपादाः श्रीकरपात्रिमहाराजास्तथा जगद्गुरुशङ्कराचार्या ज्योतिष्पीठाधीश्वराः श्रीकृष्णबोधाश्रममहाराजाश्च विराजन्ते स्म । एवमुच्चसिंहासनासीनानेतान् आचार्यप्रवरान् विलोक्य सकैतवं श्रीरामस्वरूपमिश्रमहोदय एवं प्राह-

'यद्येतावन्ममापि स्यात् सिंहासनं समुन्नतम् ।
शास्त्रार्थन्तु तदैवाहं कुर्यां नैवात्र संशयः' ।।

★ तथा हि· 'अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः, इतिहासः पुराणम् । (वाजसनेयिब्राह्मणोपनिषत्), इतिहासपुराणं पञ्चमं वेदानां वेदम् । (छान्दोग्योपनिषद्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा श्रीद्विवेदिमहानुभावैरुक्तं यदाचार्यचरणा एते शास्त्रार्थं नैव करिष्यन्ति, अपित्वेषामेवातितुच्छेन शिष्येण मया भूमिस्थेनापि भवता सार्धं शास्त्रार्थो विधास्यते– इति।

इत्येवं प्रभावपूर्णमेतेषां वचः श्रुत्वा मिश्रप्रभृतय आर्यसामाजिकास्ततः सभामण्डपात् शास्त्रार्थं परित्यज्य स्वास्थानकं प्रति गन्तुं प्रवृत्ताः समभूवन्। अत्रान्तरे च पुनः श्रीद्विवेदिभिः समुद्घुष्टं यत् 'संप्रति शास्त्रार्थं कर्तुमहं भवतामन्तिके समागच्छामि। तत्र नालिकामप्यधिष्ठाय भवद्भिः सह शास्त्रार्थं कर्तुं प्रभविष्यामि' इत्यभिधाय चैते महानुभावा आर्यसमाजस्य सभामण्डपमगुः, परं तत्र गत्वा च साधारणातिथिसमुचितमपि स्थानं यदैभिर्न लब्धं तदा राजमार्गस्थितैरेव श्रीद्विवेदिभिः शास्त्रार्थः समारभ्यत। अयि मिश्रमहोदयाः!

मूर्तिपूजाविषये भवता स्वामिदयानन्दस्य 'आर्याभिविनयग्रन्थे' पूर्वमेष मन्त्रः समवलोक्यतां कृपया–

'घृतेन सीता मधुना समज्यताम्' इति।

अस्य मन्त्रस्य भाष्ये च स्वामिदयानन्दमहोदयेन निगदितमस्ति यत् 'क्षेत्रे भूसमीकरणार्थके काष्ठपट्टे यो मधुघृतादेस्त्यागो वर्णितो वर्तते, स (मधुघृतादेस्त्यागः) एव तत्पूजनमस्ति। न च तत्र काष्ठपट्टे चिक्कणताकरणार्थक एवायं विधिरिति वाच्यम्, तैलेनापि तथा संभवात्। अर्थात् तत्र चिक्कणतासम्पादनविधौ तैलमेवास्त्युपयुक्तं, न तु मध्वादिकम्। अतः सर्वमपीदं पूजननिमित्तकमेव विद्यते लिखितम्। तथा चैवमुच्यते—

यदि चिक्कणतैवेष्टा मध्वादीनां निपातनात्।
तदा सा केवलं तत्र तैलादपि सुसम्भवा॥

अतस्तत्र घृतादीनां पातः पूजनहेतुकः।
दयानन्दमतेनापि मूर्तिपूजा सुसिध्यति॥

दयानन्दमहाभागैः सम्मान्यैर्भवतां यदा।
पूजनं काष्ठपट्टस्य साधितं वेदमन्त्रतः॥
मूर्त्या भगवतः पूजा तदास्माभिस्तु साध्यते।

एवमेव तेषामेव ग्रन्थेभ्योऽन्येऽपि मूर्तिपूजासमर्थकाः कतिचन मन्त्राः श्रीद्विवेदिभिस्तदानीं समुपस्थापिताः।

वस्तुतो मिश्रमहोदयेन तदानीं मूर्तिपूजाखण्डनविषये न कोऽप्यनुकूलस्तर्कः प्रमाणरूपेण मन्त्रो वा कश्चित् प्रोक्तः। केवलमेतदेवाह मिश्रमहोदयो यत् 'मूर्तिपूजा ब्राह्मणैरेव वर्तते कल्पिता, सारभूतमत्र किमपि नास्ति तत्त्वम्। काष्ठपट्टे च या चिक्कणता मध्वादीनां त्यागेन समुत्पाद्यते, सा तु विद्यते केवलं काष्ठपट्टस्य चिरस्थायित्वहेतुकी। नानया रीत्या मूर्तिपूजा सिध्यति' इत्यादि निगद्य व्यरमत्स मिश्रमहोदयः। एवं तत्र तदा वस्तुतः समाधानं न जातम्। सोऽयं शास्त्रार्थोऽप्यवारुद्धोऽभूत्। एवमेव श्रीद्विवेदिवर्य्याणामेषां समये-समये विपक्षिपक्षप्रविष्टैर्जनैः सह विभिन्नविषयेषु शास्त्रार्था अन्येऽपि सञ्जाताः। तत्र किञ्चिदिह प्रदर्शितं विदुषां मनोविनोदाय केवलं मयका।

भव्यभाषणानि

अखिल–भारतीयसर्ववेदशाखासम्मेलनस्यावसरे च कानपुरे, काश्यां, प्रयागे, दिल्ल्यामकोलानगरे तथा कलिकातामहानगर्य्याञ्च वेदस्वरूपम्, वेदानामपौरुषेयत्वम्, वेदस्य विज्ञानवादित्वम्–इत्यादिषु विभिन्नविषयेषु गम्भीरविचारपूर्णानि च श्रीमतामेषां द्विवेदिनां भव्यानि भाषणान्यभूवन्।

तदानीं तत्र भारतवर्षस्य प्रकाण्डपण्डिता अपि समुपस्थिताः समासन्। यथा हि–महामहोपाध्याय अनन्तकृष्णशास्त्रिणः, म० म० श्रीगिरिधरशर्मचतुर्वेदमहाभागाः, पूज्यपादश्रीकरपात्रिमहाराजास्तथैवमन्येऽपि सनातनधर्मधुर्य्या विद्वद्वर्य्याश्चापि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेवार्यसमाजस्यापि महीयांसो विद्वांसः ब्रह्मदत्तजिज्ञासु-युधिष्ठिरमीमांसक-जनमेजयविद्यालङ्कारप्रभृतयोऽपि तत्रोपस्थिताः समभूवन् ।

उपसंहारः

श्रीमतामेषां द्विवेदिवर्य्याणां शुभो विवाहश्च ...लाङ्कभूमिते (१९७८) वैक्रमे वत्सरे मार्गशीर्ष-...पक्षे ४ चतुर्थ्यां समपद्यत । इदानीमेतेषाञ्च ...भागानां गृहे चतस्रः पुत्र्यस्त्रयश्च पुत्राः सन्ति । ... पुत्राश्च यथाक्रमं यथा–१—पण्डित–श्रीचन्द्र-...न्तः, २—श्री हरिशर्मा, ३—रश्मिकान्तश्च । ...त्र ज्येष्ठस्तनयः पण्डित–श्रीचन्द्रकान्तमहोदयो ...करण-सांख्ययोग-सर्वदर्शनाचार्यः, 'एम् ए' ...भूषित इदानीमेव समुपजातविवाहश्च संप्रति ...रकापीठ-विद्या सभाकालेजे (द्वारकापुर्यां) प्रवक्ता ...र्तते ।

तथा च संप्रति श्रीमानेष द्विवेदिमहाभागः—

...ष्येष्वात्मजनिर्विशेषमिह यः स्वान्तेऽनुरागं वहन्,
स्वीयं यश्च समाप्य कार्यजातमखिलं धर्म्यं
नयञ्चाश्रयन् ।
...लेजादचिरादितो गुरुवरो विश्रान्तिमासादयन्,
मान्योऽयं जगतां गुरुः स भविता श्रीशङ्करा-
चार्यकः ॥

साम्प्रतञ्चादरणीयानामेषां श्रीद्विवेदिमहा-...भागानां पूज्यवरगुरुभिः **श्रीरामेश्वरत्रिवेदिमहा-**...नुभावैः प्रहितस्य सदुपदेश–परिपूर्णस्य पत्त्रस्य ...रोप्यत्र समुपस्थाप्यते—

पत्त्रम्

वा० ९⁸⁄₃ ⁷⁄₅ डिप्टीगञ्जः,
मुरादाबादः
१८–५–१९६४

ॐ

प्रिय चन्द्रशेखर !

आशीः । कांठतः कार्यभाराद् गृहीतविश्रामस्य मम वर्षद्वयं व्यत्यगात् । मुरादाबादे मया भवनमेकं निर्मापितम् । प्रायोऽत्रैव वसामि । कदापि-कदापि हसनपुरमपि प्रयामि । तत्रोद्यानं भवनानि च सन्ति । सम्पन्ने च ग्रीष्मावकाशे ह्यः कांठस्यैकोऽध्यापकस्तावकं पत्त्रं मह्यं दत्तवान् । हृदयं तदा मम सगद्गदमभूत् । तव सर्वा अपि स्मृतयः सहसा समुद्बुद्धाः समजायन्त । त्वदीया सौम्या विनीता च मुखाकृतिर्ममाक्ष्णोः पुरः प्रास्फुरत् । प्राचीनानि च तानि सर्वाण्यपि स्नेहबन्धनानि जागरितानि जातानि । इदानीमहं त्वां तद्रूपे एव पश्यन् अस्मि ।

सौम्य !

अध्यापकानामस्माकं सम्पत्तिर्हि-अस्माकं छात्र-वर्ग एव भवति । तैरेवास्माकं कीर्तिस्तैरेव चास्माकं योग्यता वर्तते । यदि कृष्णसदृशं योग्यं शिष्यं सान्दीपनिर्न प्राप्स्यत्, तर्हि संसारे तं कोऽज्ञास्यत् ? द्रोणाचार्यस्य सर्वमपि कौशलं वर्ततेऽर्जुनस्य कारणादेव । अद्याहमपि त्वां समुन्नतं सुप्रतिष्ठितञ्च दृष्ट्वात्मानं धन्यमाकलयामि । तव सौम्यतायाः सुशीलतायाश्च स्नेहदाम्ना पूर्णरूपेणाबद्धोऽस्मि ।

जुलाईमासस्य २ तारिकायां तव शङ्कराचार्य-स्य पीठेऽभिषेकः सम्पत्स्यते । समाचार एष हर्ष-प्रकर्षप्रदः । निःसन्देहं भारतीयधार्मिकमण्डले शङ्कराचार्यपीठं प्रतिष्ठायाः समुन्नतेश्च चरमसीमा विद्यते । भाग्योदयोऽयं प्रशंसार्हः समभिनन्दनीयश्च विद्यते ।

परन्तु वत्स ! पदस्यास्योत्तरदायित्वमपि नास्ति साधारणम् । परिपूर्णं ब्रह्मचर्यं, प्राणिमात्रे च सम-दर्शिता वर्तते ऽस्य मुख्यौ स्तम्भौ । रागद्वेषादि-सरीसृपैरस्पृष्टस्य जगतो हितचिन्तनमेवास्य स्थायि-त्वमस्ति । त्वं स्वयं योग्योऽसि । तथापि सहजस्नेह-जन्यमृदुभावनाभिव्याप्तेन मया सर्वमपीदं लिखि-

CC-0: In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तम् । समस्ता अपि मम शुभाशिषः सर्वदा त्वया सहैव सन्ति

तव शुभचिन्तको

रामेश्वरत्रिवेदी

अयि मान्याः !

यद्यपि महामहिमशालिनां श्रीद्विवेदिमहाभागानामेतेषां साकल्येन जीवनचरितं वर्णयितुं मन्दधीधनो मादृशो जनो न कथङ्कारमपि प्रभवति, तथापि यत्किमपि समासतः संप्रति मया लिखितं, तदेव पुष्पोपहाररूपेणाङ्गीकर्तुमवश्यं कृपां विधास्यन्ति मयि दीनेऽनाथे जने कृपालवो गुरुवराः श्रीद्विवेदिमहानुभावाः । किञ्च–

मामकं न किमप्यत्र वर्तते हे दयानिधे !
त्वदीयं वस्तु गोविन्द ! तुभ्यमेव समर्पितम् ॥
अन्ते च परमात्मानं प्रार्थये भवतां सदा- ।
क्रियात्स सफलान् कामान् करुणावरुणालयः ॥

शिष्यमण्डलम्

वेदादिशास्त्रागमलब्धबोधाः,
विभिन्नविद्याकुशलाश्च धीराः ।
शिष्या अनेके विलसन्त्यमीषां
श्रीमद्द्विवेदिद्विजपुङ्गवानाम् ॥
तथापि तेषां प्रमुखत्वभाजां,
सतां सुधीनां महतामिदानीम् ।
अन्तेसदां कानिचिदेव चात्र
लिखानि नामानि समासतोऽहम् ॥

१—पण्डितश्रीशशिधरशर्मा न्याय-साहित्य-वेदान्त-दर्शन-व्याकरणाचार्यः, अनेकतीर्थः, एम्. ए., महाप्रौढसंस्कृतवक्ता, लेखकः, सम्पादकः, शाङ्करसर्वस्वप्रणेता, अ० भा० सं० साहित्य-सम्मेलने शलाकापरीक्षाप्राप्तविजयश्च । व्याख्याता चण्डीगढः, पञ्चनदविश्वविद्यालयः, प्राच्यविभागः ।

२—श्रीरामानन्दः स्वामी वेदान्ताचार्यः ।

३—श्रीसच्चिदानन्दो ब्रह्मचारी अध्यक्षः (महन्तः)

४—श्रीरामनाथशास्त्री, जामनगरम् ।

५—श्रीभाईशङ्करपुरोहितः, परीक्षाधिकारी, भारतीविद्याभवनं, मोहमयी ।

६—श्रीगौरीशङ्करमोतीरामशास्त्री, संस्कृतशिक्षकः, गवर्नमेन्टविद्यालयः, उमरेटः (गुजरात)

७—श्रीमुक्ताशङ्करमणिशङ्करशर्मा, संस्कृतप्राध्यापकः, पेटलादः (गुजरातप्रान्तः) ।

८—श्रीनरेन्द्रकुमारः कथावाचकः, स्तम्भतीर्थः (खम्भात) ।

९—श्रीवेणीमाधवशर्मा धर्माधिकारी मीमांसाचार्य, जयपुरम् ।

१०–श्रीमधुकरशास्त्री (स्वतन्त्ररूपेण) मीमांसाचार्यः साहित्याचार्यः ।

११–श्रीचन्द्रधरशर्मा यजुर्वेदाचार्यः, ऋग्वेदशास्त्री, जयपुरम् ।

१२–श्रीमहीधरशर्मा ऋग्वेदशास्त्री, ऋग्वेदाचार्ये समधीतवान्, जयपुरम् ।

१३–श्रीप्रभुलालशर्मा यजुर्वेदाचार्यः, भारतवर्षे च सर्वप्रथमोऽथर्ववेदाचार्यः, जयपुरम् ।

१४–श्रीराधेश्यामशर्मा सामवेदशास्त्री सामवेदाचार्ये च समधीतवान् जयपुरम् ।

१५–श्रीनानगरामशर्मा यजुर्वेदाचार्ये समधीतवान्, जयपुरम् ।

१६–श्रीरामकृष्णशर्मा यजुर्वेदाचार्ये समधीतवान्, जयपुरम् ।

१७-श्रीगोविन्दानन्दः स्वामी वेदान्ताचार्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८-श्रीरविकिरणदासः वेदान्तशास्त्री वेदान्ताचार्ये ऽधीतवान्, जयपुरम् ।

१९-श्रीरामजीलालशर्मा पुराणेतिहासाचार्ये समधीतवान्, जयपुरम् ।

२०-श्रीकालीचरणभट्टाचार्यः व्याकरणाचार्यः, दर्शनाचार्येऽधीतवान्, जयपुरम् ।

२१-राजगुरु-कथाभट्ट-श्रीजगदीशचन्द्रशास्त्री वेदान्तमधीतवान्, जयपुरम् ।

२२-राजगुरु-श्रीकन्हैयालालचक्रपाणिः वेदान्तमधीतवान् स्वतन्त्ररूपेण जयपुरम् ।

२३-श्रीदीनानाथत्रिवेदी 'मधुपः' दर्शनशास्त्री, न्यायसाहित्याचार्यः, काव्यतीर्थः, आसां पंक्तीनां लेखकश्च, महाराजसंस्कृतकालेजः, जयपुरम् ।

अन्ते च कामयते—

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥"

श्रीमतामेवैकतमः शिष्यः

दीनानाथत्रिवेदी 'मधुपः' जयपुरम्

Insurance is a Social Service

With best Complements & Greetings

form

RUBY GENERAL INSURANCE Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.	Rs. 1,00,00,000
Paid up Capital. ...	Rs. 32,00,000
Assets Exceed. ...	Rs. 3,21,00,000
Nett Premiums in 1962. ...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA

FOREIGN BRANCHES & AGENCIES :

Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala, Nairobi, Penang, Rangoon, Singapore & San Fernando.D.L.M.S.,

Head Office :

"INDIA EXCHANGE"

India Exchange Place, Calcutta-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगन्नाथपुरीस्थित-जगद्गुरु-श्रीशंकराचार्य-सिंहासन-ग्रहणावसरे-निरवद्य-विद्या-विद्योतितान्तःकरणानाम्, अशेष-दर्शन-विमर्शन-भास्वर-प्रतिभा-विशेषाणाम्, प्रखरतरप्रतिभ-प्रतिवादीभ-गण्डयुगदलनकण्ठीरवाणाम्, धिषणा-प्रतिस्पर्धिधिषणानाम् प्रलयघनरवन्यक्कारिगम्भीर-घोषणानाम्, भव्यमूर्त्तीनाम्, जयपुरमहाराज-संस्कृत-महाविद्यालयाध्यक्षाणाम्

आचार्य-श्रीचन्द्रशेखर-द्विवेदि-महाभागानाम्

अभिनन्दनम्

राकाशारद-शर्वरीशविमलं यस्यास्ति शुभ्रं यशः,
वैदुष्य-प्रखरप्रताप-विलसत्तेजश्च यस्यास्त्यहो ।
यो विश्वेश-कृपाप्त-सन्ततिसुखः, सौभाग्यमालोज्ज्वलः,
मान्यं तं बुध-चन्द्रशेखरमिमं भक्त्याभिनन्दाम्यहम् ॥

येनाद्यापि निजान्वये श्रुतिसृतिर्यत्नैरलं पाल्यते,
यस्यापूर्ववचोभिरत्र धिषणः प्रत्यक्षमेवेक्ष्यते ।
यत्ताम्बूल-लसत्-स्मितास्य-प्रभया कामः सदा स्मर्यते,
सोऽयं श्रीयुत-चन्द्रशेखरबुधो मूर्ध्ना जनैर्नम्यते ॥

नम्राः प्राञ्जलयो विनीतवचना वन्दारवो विन्दवो
विद्वांसः कवयश्च यस्य भवने तिष्ठन्ति रात्रिन्दिवम् ।
यं लक्ष्मीश्च सरस्वती च सततं तुल्यात्मना सेवते
सोऽयं जीवतु चन्द्रशेखरमहामान्यः समानां शतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं प्रावृट्समयं विचिन्त्य तुमुलं मेघा ध्वनिं कुर्वते
किं वा व्याकुपितो गिरीन्द्रतनया-कण्ठीरवो गर्जति ।
किं कैलाश-महीधरे पशुपतेरुक्षा महान् नर्दति,
अस्याकर्ण्य सभासु भाषणमहो शङ्कन्त एवं जनाः

कार्य-व्यापृतितां, मनोभिलषितां शारीरिकीं भव्यतां,
शास्त्रार्थक्षमतां, गिरां मधुरतां, सौजन्यनिर्व्याजताम् ।
लोकं लोकमलौकिकीं च धिषण-प्रस्पर्द्धिनीं वैदुषीं
यस्मै शाङ्करमर्प्यते गुरुतरं सिंहासनं, तं स्तुमः ॥

विद्वन् ! सद्भावदीपो मम हृदि भवता योऽप्यपूर्वः प्रदीप्तः
स्नेहाभावान्न सोऽयं विलयमलमियाच्चिन्त्यमित्येव नित्यम् ।
श्रीमत्कल्पा बुधेन्द्राः सहृदयमणयस्तूच्चसंस्थानमाप्य
यातेऽनेहस्यनन्तेऽपि न निजमनसो बान्धवान् विस्मरन्ति ॥

द्विजराज ! कथं वर्ण्या भवेत् ते पक्षपातिता ।
यन्नृत्यति यथाकामं विनालम्बनमप्यहो ॥

प्रखरप्रतिभः श्रीमान् द्विवेदी चन्द्रशेखरः ।
जगद्गुरोः शङ्करस्य पीठमासाद्य मोदताम् ॥

श्रीमद्वशंवदः—

काङ्कर कुटीरः, जयपुरम् ।

३।६।६४

नवलकिशोरकाङ्करः
संस्कृतविभागप्रधानः, पारीक डिग्रीकालेजः,
जयपुरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूज्यचरणयुगलयोः श्रद्धाकुसुमाञ्जलिः

(ले० कथाभट्टः श्रीजगदीशचन्द्रशास्त्री)

अमरभारतीवाङ्मयस्य जाज्वल्यमानरत्नं गुरुवरश्रीचन्द्रशेखरमहाभागं विविधोपाधिविभूषितं निवेदये प्राक् यदस्मदादीन् वियोगमग्नान् विहाय संन्यासाश्रममलंकर्तुं कृतनिश्चयं श्रीमन्तं किं निवेदयामो नह्यत्र वाग्विलासावसरः। यदि नाम स्वार्थपरवशा वयं मार्गावरोधं कुर्मस्तदा लोकेऽस्मिन् उपहासास्पदा भवेम, यतो हि जगत्सेवाव्रतमनुतिष्ठतस्तव लक्ष्यं महत्तमं वर्तते। महाभारते महर्षिणा व्यासेन समुपदिष्टम्–

'यद् भूतहितमत्यन्तं तत्सत्यमिति धारणा''

भूतहिते प्रवर्तमानो भवान् अभिनन्दनीयः, श्लाघनीया च भवतां प्रवृत्तिः। या हि धारणा बाल्यात् प्रभृति त्वया धृता, सैवाद्य मूर्तिमती जाता। अधुना बहवो भारतीयाः क्लिश्यमाना दरीदृश्यन्ते। अचिरादेव पूर्वस्यां दिशि भारतीयानां महत्कदनं संजातम्। प्रतिवेशिनां राज्येन ते भृशं पीड्यन्ते। न हि तेषां दुर्दशा श्रवणमात्रेण अपनेतुं क्षमा। तेषां दशापरिवर्तनं केनापि कर्मठेन प्रभावशालिना च जनेन कर्तुं शक्यते। धर्मत्राता जगद्गुरुपीठाधिष्ठाता एव तेषां दुर्दशां दूरिकर्तुं कल्याणं च विधातुं समर्थो भवष्यतीति द्रढीयानस्माकं विश्वासः।

सर्वकारस्य पुनर्वासविभागेन केनापि नेत्रा वा न सा दशा संभालयितुं सुलभा। सर्वसुखत्यागी कश्चित्संन्यासी एव तत्कर्म कर्तुं सक्षमः। लोके गृहस्थाश्रमवर्तिनां जनानां सन्ति बहूनि कर्तव्यानि। नियमनियन्त्रिता सर्वकारेण ते उचितमपि कार्यजातं कर्तुं सर्वथा असमर्था भवन्ति। यतो हि सामान्यजनाः उदरदरीपूरका दासवृत्तयश्च भवन्ति। भारते भारतधर्मस्य दैशिकत्वमपरेषां देशान्तरादागतानां च धर्माणां च न स्वाभाविकत्वम्। परन्तु सहनशीला अस्मद्देशीया सर्वधर्मान् तेषु तेषु क्षेत्रेषु वृद्धिंगतानपि विलोक्य न गर्हन्ते तान्। भवन्ति ईदृशा अपि आततायिनो ये हठात् स्वधर्मं विजितेषु आरोपयितुं प्रयतमाना भवन्ति-असूयन्ते च विजितधर्मेषु। अस्माकं संस्कृतेः सभ्यतायाश्च मूलोच्छेदनाय ते अहर्निशं यतन्ते। अस्मिन् विषये अस्मद्देशीयाः निस्पृहाः साधवः एव समर्थाः सन्ति-यत्ते नाशोन्मुखीं संस्कृतिं नश्यन्तं च धर्मं रक्षेयुः।

साधुभिः परकार्यसाधने जनकल्याणे च सर्वथा यत्नो विधेयः, यतो हि ते निष्परिग्रहा विश्वमात्रकल्याणाभिलाषिणः। अद्यत्वे यद्यपि साधुसमाजोऽपि दलनीतिसमर्थकः स्वार्थसाधकश्च दृश्यते। परन्तु एवंभूतविचारपरायणा नटादीनामिव कृत्रिमवेषधारिणः साधवो न कदापि लोके प्रतिष्ठाभाजो भवन्ति। साध्नोति परकार्यमिति साधुः-व्युत्पत्तिमिमामाचरन्तः सर्वलोककल्याणाभिनिवेशिन भवादृशा एव पूजनीयाः साधवो भवन्ति।

आवेदयामि सन्नेतृत्वं कर्तुं भाविनं जगद्गुरुं द्विवेदिमहाभागं यत्नेन प्रच्छन्नलिंगिनामेषां शुद्धिः करणीया। वस्तुतस्तु ये भारतधर्मत्यागमुररीकृतवन्तस्तेषां पुनः शिक्षा दीक्षा विधेया। भारतसेवाकार्ये च तेषां नियोगः परमावश्यकः। पुरा यादृक् कर्म भगवता आद्यशङ्कराचार्येण पाखण्डमुखमर्दनरूपकं कृतम्, तथैव अद्यापि स्वकीयेन कर्मणा भवतापि करणीयम्। ये ह्यसाधवः साधुरूपधारिणस्तेषां विनियोगः प्रार्थनया धर्मरक्षाकार्ये कर्त्तव्यः इति साधुसमाजेषु भवदुद्घोषणमावश्यकम्। सर्वकारेण साधुसमाजनाम्नी या संस्था संघटिता-तया किमपि विहितम् ? महत्सम्मेलनमंत्रिभाषणादिकर्म प्रतिवर्षं कुर्वद्भिरपि तैः न किमपि सदुपार्जितम्। गृहाश्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मद्गुरुचरणाः

(श्रीकालीचरणभट्टाचार्यः, जयपुरम्)

कतिपयवर्षादयं प्रसङ्गः प्रचलति यदस्मद्-गुरुचरणाः श्रीचन्द्रशेखरद्विवेदिमहाभागा गोवर्द्धन-पीठाधीश्वरत्वमलङ्करिष्यन्तीति । इदानीं स कालः समुपस्थितः, यदा सर्वमैहलौकिकं सम्बन्धं परित्यज्य गच्छन्ति ते तत्र । यद्यपि ते मोहबन्धनविमुक्ता भारतीयपरम्परामेवानुसरन्ति, नहि केवलमनुसरन्ति, अपि तु तस्याः संरक्षणे एव अवशिष्टं जीवनं नियोजयितुं प्रयान्ति, तथापि वयं हर्षवियोगविमोहिताः । तद् इदानीं च गुरुचरणानां पुण्यस्मरणेन आत्मानं पुनीमहे ।

राजस्थानस्य सम्मान्यब्राह्मणकुलावतंसभूता-गुरुचरणा बाल्यत एव प्रखरप्रतिभा आसन् । तदानींतनीयपण्डितमूर्द्धन्यविदुषामन्ते – वासित्वम-ङ्गीकृत्य वाराणस्यामेव विविधविषयाणामध्ययनं समाप्य तत्रैवाध्यापनमङ्गीकृतवन्तः । कतिपय-दिवसैरेवैतेषां प्रतिभया प्रभाविताः शास्त्रेषु एतेषां वैदग्ध्यं बुधा अमन्यन्त । शास्त्रार्थेषु एतेषां स्वपक्ष-प्रतिपादनक्षमतामवलोक्य चकितास्ते विद्वांसो न कदापि अकल्पयन् यत्कदाचिद् एते चतुर्थमाश्रममव-लम्ब्य शंकराचार्यपरम्परया वैदिकधर्मावलम्बिनां नेतृत्वं विधास्यन्तीति ।

यौवने प्रौढे च वयसि शिक्षाक्षेत्रे धर्मक्षेत्रे, राजनीतौ पुनश्च शिक्षाक्षेत्रे स्वस्य उत्कृष्ट-प्रतिभायाः परिचयं प्रदाय गृहस्थाश्रमे एव यतीयन्ति । वेषभूषया, आकृत्या, वाचा, कर्मणा च वैदिक-मूर्द्धन्यानां प्रातिनिध्यं कुर्वन्तो मनुवर्णितमानव इव प्रतिभान्ति ।

व्यावहारिकजीवनेऽपि गुरुचरणा निपुणतया स्वकर्तव्यस्य निर्वाहमकुर्वन् । लघुरपि बालो न कदाचिदुपेक्ष्यत एभिः, न च भयात् लोभेन वा

मिणो यावदुद्विग्नाः परेषां विकर्मभिः तावन्तोऽपि साधुवेषधारिणो न भवन्ति खिन्नाः । नास्ति अद्यापि चैषां किमपि सांप्रदादियकं संघटनं स्वदलनेतृत्वं च । पुरा रामानन्दीयसम्प्रदाये साधूनां निर्वाणनामको-पदलानां गिरिपुरीणां च महत्सैद्धान्तिकं संघटन-मासीत्, परमद्य कुम्भादिस्नानविग्रहे एव तेषा-माविर्भावो हग्गोचरीभवति न पुनः समाजसेवायां देशहितसाधने वा । यदि अद्य सन्यस्तानामात्मोद्धा-रादन्यत् नास्ति किमपि करणीयं तदा अस्ति भारते हिमालयो नाम नगधिराजः–तत्र गत्वा कुर्वन्तु ते स्वाराधनम् । नगरेषु नगरेषु वीथीषु वीथीषु तेषां चङ्क्रमणमशोभनमेव । अन्यधर्मदीक्षितैः धर्माध्यक्षैः साधुभिश्च स्वदेशधर्मरक्षायै कियन्महदनुष्ठितम् । तेषां सुदृढां कार्यप्रणालीमवलोक्य अद्य बहवोऽस्म-द्देशीयास्तेषामनुयायिनः संवृत्ताः । अद्यत्वे भारते सद्धर्मस्य नितरां ह्रासः । अतो हि भारतधर्ममण्ड-लस्य अभिरक्षायै कृतसंकल्पं द्विवेदिमहाभागं प्रणता निवेदयामो यदहरह आत्मक्लेशमविगणय्यापि भवान् अस्मद्देशधर्मरक्षायै ध्रुवं यतिष्यते ।

या पूर्वकालिकी जीवनपरिपाटी भवादृशामा-सीत्, यैश्च प्रयत्नैरस्मद्देशधर्मरक्षा प्राणसंकटाव-स्थायामपि भवता कृता, तैर्वयं विनिश्चिनुमो यत् जगद्गुरुपदमलंकुर्वाणेनापि भवता सहजं कर्म महताग्रहेण विधास्यते । तेन च अस्मद्देशधर्मानुया-यिनां वस्तुस्थितिः प्राग्वत् सत्याचरणशीला भविष्य-तीत्यस्माकं विश्वासः ।

अन्ते च क्षमां याचे व्यावहारिके काले 'सखेति मत्वा प्रसभं यदुक्तम् अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि, तत् क्षमस्व, क्षमस्वेति निवेदयति भवदनुग्रहाभिलाषी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकारप्रमत्तो राजपुरुषोऽपि अभिनन्द्यते स्म। गृहागतानामतिथीनां सत्कारे तान् नारायणमिव मन्यन्ते। वृद्धानां पितृपितृव्यानां सम्मुखे सुपुत्राः, बन्धुजनानां बान्धवाः, मित्राणां सुहृदः, पुत्रपुत्रीणां पितरः, शरणागतानां सहायकाः सर्वजनसुलभाश्च अस्माभिः सर्वदा अवलोकिता एते।

छात्राणां कृते साक्षाद् बृहस्पतिरिव रात्रिं दिवं अक्लान्ता सन्त अध्यापने एव आनन्दमनुभवन्तः तेषां प्रार्थनां च परिस्थितिनिरपेक्षाः सन्त आकर्णयन्ति। विगतवर्षेषु महाराजसंस्कृतकालेजस्याध्यक्षपदे समासीना अहर्निशं परिश्रमं कुर्वन्तः एते अदृश्यन्त। प्रातःकालादारभ्य सायं पर्यन्तं तेषां सविधे विद्यार्थिनां जिज्ञासूनां च पंक्तिः केनापि प्रत्यक्षीकर्तुं शक्यते। विविधविषयाणां विभिन्नायुषां विभिन्नस्तराणां श्रेणीनां च विद्यार्थिन एतान् सर्वदा परिक्रम्य तिष्ठन्ति।

यदि कश्चन विद्वान् एतान् शास्त्रार्थेषु आह्वयति तदा रात्रिं दिवसं च अगणयन्त तस्याह्वानं स्वीकुर्वन्ति। तत्र शास्त्रीयपक्षस्थापने चैतेषामगाधं वैदुष्यं दर्शनीयमेव भवति। कदाचित् सभासु कमपि जटिलं विषयमवलम्ब्य श्रोतॄन् मोहयन्त एव गुरवो दृश्यन्ते।

किन्तु सर्वेभ्योऽधिकं गुरुचरणानां परमात्मनि विश्वासः, सनातने धर्मे च रतिः, देवेषु श्रद्धा, धर्मग्रन्थानामध्ययने रुचिश्च प्रतीयन्ते। एते च कदाचिद् देवाराधननिरताः, कदाचिद् देवमन्दिरे भावविह्वलिताः, कदाचिद् रामायणमहाभारतादिग्रन्थेऽवगूढाः कदाचिच्चाचारधर्मव्याख्यानरता दृश्यन्ते।

इदानीं ते अस्मादपि गुरुतरं कार्यं निवोढुं प्रयान्ति संन्यासाश्रमम्। वयं भारतीया एतानधिकं कामयामहे। स्वयं भगवताद्यशंकराचार्येण गोवर्द्धनमठाम्नाये अनुशासितमस्ति—

पूर्वाम्नायो द्वितीयः स्याद् गोवर्द्धनमठः स्मृतः।
भोगवारः सम्प्रदायो वनारण्ये पदे स्मृतः॥
पुरुषोत्तमस्तु क्षेत्रं स्यात् जगन्नाथोऽस्य देवता।
विमलाख्या हि देवी स्यादाचार्यपद्मपादकः॥
तीर्थं महोदधिः प्रोक्तं ब्रह्मचारी प्रकाशकः।
महावाक्यं च तत्र स्यात् प्रज्ञानं ब्रह्म चोच्यते॥
ऋग्वेदपठनं चैव काश्यपो गोत्रमुच्यते।
अङ्गवङ्गकलिङ्गाश्च मगधोत्कलवर्वराः॥
गौड़ाः सुह्माश्च पौण्ड्राश्च लौहित्यादिसमन्विताः।
गोवर्द्धन-मठाधीना देशाः प्राची-व्यवस्थिताः॥

उक्तानुशासनानुसारेण गोवर्द्धनमठस्य क्षेत्रं निश्चितम्। तच्च क्षेत्रमङ्गः वङ्गः, कलिङ्गः, मगधः उत्कलः वर्वरः, गौड़ः, सुह्मः, पौण्ड्रः तथा लौहित्यश्चास्ति। इदानीं प्रत्येकदृष्ट्या इदं क्षेत्रं संकटापन्नमस्ति। सुह्मे, पौण्ड्रे लौहित्ये च चीनानामाक्रमणं जातम्। आदिवासिनश्च तत्रत्या धर्मोपदेशकानां चाभावे ख्रिष्टीयधर्मं स्वीकुर्वन्तो राष्ट्रस्यैकतां विघटयन्ति। एतत्क्षेत्रीया जना धर्मविमुखाः सन्तो भौतिकवादितामङ्गीकर्तुं समुत्सुका इव परिलक्ष्यन्ते। अत्रत्यानामुपरि पाश्चात्यानां कुप्रभावोऽपि अधिको दृश्यते। अत एव तत्रत्या धार्मिकाः सनातनीया जनाः कमपि प्रेरणायाः स्रोतोभूतमपि अन्वेष्टुं तत्परा आसते। विघटनकारिणी विदेशीया शक्तिरपि तत्र अहर्निशं कार्यरता अस्ति। तत्र धर्म एव तस्या अनपेक्षिताया ऐक्यप्रतिरोधिकायाः शक्तेर्निराकरणे प्रभुः। अत एव गोवर्द्धनपीठस्य आचार्यत्वेन महतां धर्मप्रवक्तॄणां गुरुचरणानामाह्वानं कोऽस्य्यवधिजनैः पुनःपुनरपि क्रियते।

इदमेव कारणं यदस्याः संसारे आकर्षणभूताया वासनाया परित्यागं विधाय महाविद्यालयाध्यक्षस्य प्रतिष्ठितमपि पदं परित्यज्य चतुर्थमाश्रमङ्गीकर्तुं समुद्यताः श्रीमद्गुरुचरणाः। भगवान् राम एतानस्मद्देशधर्महितसाधने समर्थान् शतायुषश्च कुर्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्कराचार्यः

(रचयिता—कविरत्नं पं० देवकीनन्दनशास्त्री, अध्यापकः, महाराजसंस्कृतकालेजः, जयपुरम्)

[१]

विद्यापीठाध्यक्षोऽविद्यासंसारवासनाक्लृप्तः ।
निजपरिवारैर्भुक्तो मुक्तो वा शङ्कराचार्यः ॥

[२]

दुर्धर्षो दुष्टानामुद्धर्ता सदाचरणचरितानाम् ।
स्थिरवासो वा विप्रोऽस्थिरवासः शङ्कराचार्यः ॥

[३]

सिद्धो जगति प्रसिद्धो ज्ञाता ध्याता च वेदशास्त्राणाम् ।
गृहवासी वा विप्रो वनवासी शङ्कराचार्यः ॥

[४]

मण्डनविजयी खण्डनकारी मिथ्यापाखण्डमार्गाणाम् ।
विषयसुखानां भोगी योगी वा शङ्कराचार्यः ॥

[५]

श्रुतिवचनानां ध्यानी मानी व्याकरणधर्मशास्त्राणाम् ।
स्वयं विकासी किम्वा सन्न्यासी शङ्कराचार्यः ॥

[६]

परिमितभोजनकारी विस्तारी वेदवचनतत्त्वानाम् ।
प्रेमविहारी किंवा परिहारी शङ्कराचार्यः ॥

[७]

किं वरणं किं शरणं किं सौख्यं किल धर्मप्राणानाम् ।
इति षट्पदी मदीये वदनसरोजे सदा रमते ॥

[८]

देवकीनन्दनप्रोक्तं श्रुत्वेदं निष्क्रियं वचः ।
बालचापल्यमालक्ष्य प्रसीद परमेश्वरः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीद्विवेदमहोदयानामभिनन्दनम्

(ले० श्रीदीनानाथशर्माशास्त्रीसारस्वतः, विद्यावागीशः, विद्यानिधिः, प्रिंसिपल रामदल संस्कृतमहाविद्यालय, दरीबाकलां, देहली ६)

इदमतिशयितप्रमोदस्थानं यद्-व्याकरणाचार्य्य-श्रीमत्पण्डितचन्द्रशेखरशास्त्रिद्विवेदाः 'पुरी'जगद्गुरु-शङ्कराचार्य्यपदमधिष्ठास्यन्तः सन्तीति।

भगवतः श्रीशङ्कराचार्य्यस्य अवतरणं किमर्थं जातम्-इति शास्त्रविदो विदो विदुरेव। वेदस्य पुरा महान् प्रचारः समजनिष्ट। दैत्याः शूद्राश्च प्रैक्षन्त यद्-ब्राह्मणादिजनतायां वेदधर्म्मस्य प्रचारातिशयोस्ति। अधिकारिणश्च वैदिकयज्ञान् कृत्वा देवान् सम्यक् तर्प्पयन्तः सन्ति। तेन च ते विविधानि सुखानि भुञ्जाना विद्यन्ते। देवा यज्ञैस्तृप्ताः सन्तः प्रजायां सामयिकवृष्ट्यादिना विविधभोगसर्ज्जनेन च शान्तेः प्राज्यं साम्राज्यं * चेक्रीयमाणाः सन्ति। एतेन अशान्तिप्रियाणां दैत्यानां शूद्राणां च चिन्ता-सन्तानवितानैकतानमनस्कता समजनि। एतत्फल-स्वरूपे देवासुरसंग्रामाः पौनःपुन्येन प्रावर्त्तिषत, यदीयः संकेत ऋग्वेदे (४।२८।३, ३१।२१, ५।२९।६) तथा शतपथब्राह्मणादौ दरीदृश्यते। अन्ततो देवानां प्रतियोगितायां दैत्याः, ब्राह्मणानां च प्रतियोगितायां शूद्राः पराजिग्यिरे, देवा ब्राह्मणाश्च विजिग्यिरे। अत्र प्रजायां देवबलं वेदबलञ्च विजयस्य प्रधान-कारणं दैत्यैः शूद्रैश्च समन्वभावि। तदानीं दैत्यैः शूद्रैश्च एतद्बलश्लथिम्ने ब्राह्मणानां रूपं धृत्वा तत्र प्रवेशः कृतः।

दैत्या जानन्ति स्म यद्—देवाः शूद्राणामन्नं नाश्नन्ति। तद् यदि शूद्रा यज्ञान् कुर्य्युः, तदा तान् यज्ञान् अनश्नन्तो देवाः स्वयं निस्तेजस्का भवेयुः। अतस्तैः शूद्रेषु तादृशी प्रेरणाऽकारि। ततः शूद्राः षड्यन्त्रेण ब्राह्मणानां रूपं धृत्वा, शिखायज्ञोपवीते परिधाय देवयज्ञान् प्रक्रान्तवन्तः। यथा च भविष्य-पुराणे प्रतिसर्गपर्वणि संकेतितम्—'मिश्रदेशोद्भवा म्लेच्छाः (अपभाषिणः) काश्यपेनैव शासिताः। संस्कृताः शूद्रवर्णेन ब्रह्मवर्णमुपागताः। शिखा-सूत्रं समाधाय पठित्वा वेदमुत्तमम्। यज्ञैश्च पूजयामासुर्देवदेवं शचीपतिम् (२०।७२-७३)। दैत्याश्च ब्राह्मणा भूत्वा वेदानामीदृग्विधधूर्तताभिरर्थान् कर्तुं प्रचक्रमिरे, अनर्गलहिंसां च प्रचारयामासुर्येन सर्वसाधारणा जना वेदेष्वश्रद्धालवः स्यु। वेदेभ्यश्च जुगुप्सां विधाय तान् जह्युः, वेदस्य चोच्छेदो बोभूयेतेति।

देवेभ्यो दैत्यदलस्य इयं धूर्तता न तिरोहिताऽतिष्ठत्। इतश्च देवाः शूद्रयज्ञान् प्राश्नन्ति स्म। तैर्विष्णवे इदं विवरणं (रिपोर्ट) दत्तम्। यथा च भविष्यपुराणे इन्द्रो विष्णुं ब्रवीति—'शूद्रसंस्कृत-मन्नं च खादितुं न द्विजोऽर्हति। तथा च शूद्रजनितैर्यज्ञैस्तृप्तिं न चाप्नुयाम्। मम शत्रुर्बलिर्दैत्यः कलिपक्षमुपागतः। निस्तेजसाश्च यथाऽहं (इन्द्रः) स्यां तथा वै कर्तुमुद्यतः' (प्रतिसर्ग० २०।७४-७७)। मनुस्मृतावपि प्रोक्तम्—दैवपित्र्यातिथेयानि तत्—[शूद्रा] प्रधानानि यस्य तु। नाश्नन्ति पितृ-देवास्तद् न च स्वर्गं स गच्छति' (३।१८)।

एकस्मिन् वर्गे यदा अन्यो विरोधिवर्गः प्रविशेत् स च प्रथमवर्गानुसारि कार्यं कृत्वा, तत्र स्वप्रभावं वर्धयित्वा, पुनस्तत्र स्वेच्छानुसारं परिवर्तनं कुर्वाणः स्यात्, [पूर्ववर्गीयांश्चापि स्वविचारवतः कुर्यात्, तदा अर्वाचीनवर्गस्य तत्राऽन्वेषणं काठिन्य-

* चेक्रीयमाणाः। यङन्ते शानचि रूपम्। कृत रीङ्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नावहति। तत्र पूर्णं ज्ञानं न जायते, यत्–कतमोऽत्र वास्तविको वैदिकः, कतमश्च कृत्रिमः। तदा तत्र नीतेरावश्यकता जृम्भते। तत्रेयं नीतिर्यद्—येन बलेन ते प्रवृद्धाः सन्ति, तद् बलमेव शिथिलीक्रियेतेति। एतद् विविच्य श्रीविष्णुना बुद्धावतारो धृतः।

श्रीविष्णुना चिन्तितं यद्—वैदिकधर्मिनाम्ना आत्मानं प्रसिद्धं कुर्वाणा एते वस्तुतः शूद्रा दैत्याश्च सन्ति। एतेषां वस्तुतो वेदे श्रद्धा नास्ति, परं वेदं विध्वंसयितुमभिलाषुकाः सन्ति। एषु वेदश्रद्धालुर्वैदिको वर्गोऽप्यस्ति। तत् कथममी नीरक्षीरन्यायेन पृथक् क्रियेरन्? ततो भगवता बुद्धावतारं धृत्वा वेदस्य निन्दा प्रक्रान्ता, नास्तिकता च प्रचारिता। इयं वेदरक्षाया नीतिरासीत्। अनया नीत्या लाभोऽयं जायते यत्—नीरं पृथग् भवति, क्षीरं च पृथक्। वेदस्य वास्तविकाः प्रेमिणः कृत्रिमश्रद्धाधारिणश्च सम्यक्तया ज्ञायन्ते। ये वास्तविका भक्ता भवन्ति, ते निन्दायामपि कृतायां तद् वस्तु न त्यजन्ति। यथा वर्णिरूपधारिणा शङ्करेण शङ्करानुरागवत्याः पार्वत्याः समक्षं शङ्करस्य अतिशयिता निन्दा व्यधायि, परं सा ततो न विचिलिताऽभूत्। अस्मिन्नवसरे कृत्रिमास्तद्वस्तुनिन्दया निन्दकं प्रभावशालिनमवसाय प्राक्तनवर्गं विहाय तदीयवर्गे प्रविष्टा जायन्ते। एतेन पूर्वस्य वास्तविकवर्गस्य शुद्धिर्जञ्जन्यते।

अनया नीत्या बुद्धावतारेण दैत्याः शूद्राश्च ब्राह्मणवर्गे निलीना ब्राह्मणवर्गतः पृथक् कृताः। ते च बौद्धाः अभूवन्। ततश्च 'वेदनिन्दां पुरस्कृत्य बौद्धशास्त्रमचीकरन्। तेभ्यः [शूद्रेभ्यः] वेदान् समादाय मुनिभ्यः प्रददुः सुराः' (भविष्यपुराणे ३।४।२०,८०–९१)। बौद्धैः सद्भिस्तैर्वेदास्त्यक्ताः। एवं सनातनधर्मस्य शुद्धिर्जाता। वेदाश्च मुनिभ्यो-ऽदीयन्त। दैत्यनीतिर्विफला जाता। शूद्राणां यज्ञैश्च अतृप्ता निस्तेजस्काश्च जाता देवा पुनर्ब्राह्मणानां यज्ञैस्तृप्तास्तेजस्विनश्च समजनिषत। एवं जाते बुद्धरूपिणा श्रीविष्णुना स्वकीयैहिकलीलासंवरणं कृतम्।

यदा एवं बौद्धसम्प्रदायस्य बलं प्रवृद्धम्, तदा तैर्वेदनिन्दां कृत्वा धर्मविप्लव आरब्धः। ततो धर्मविप्लवं भवन्तं दृष्ट्वा ब्रह्मेन्द्रादयो देवाः शङ्करपार्श्वे जग्मुः, अथकथँश्च तम्—'विज्ञातमेव भगवन्! विद्यते यद् हिताय नः। वञ्चयन्...... सुगतान् बुद्धवपुर्धारी जनार्दनः (शङ्करदिग्विजय १।३०) अर्थाद्—अस्माकं हितायैव विष्णुभगवता बुद्धेन भूत्वा नीत्या बौद्धान् वञ्चयित्वा ते वैदिकेभ्यः पृथक् कृताः। वेदानां स्वेच्छानुसारेण अशुद्धार्थकर्तॄणां तेषां पार्थक्ये जाते वेदा अपि शुद्धा जाताः, इदं युक्तमस्ति, परमिदानीं तस्य श्रीबुद्धस्यैव सम्प्रदायो वेदधर्मस्य नाशं कुर्वन्नस्ति, तद् अमुं वेदधर्मं पुनस्त्रायस्वेति। एवं प्रार्थितेन श्रीशङ्करेण जगद्गुरुशंकराचार्य्यस्य अवतारं धृत्वा पुनर्वेदमतस्य स्थापनं कृतम्। वेदविरुद्धाँश्च बौद्धान् पराजित्य ते भारताद् बहिष्कृताः। ततस्ते चीनजापानादिदेशेषु प्रोषिताः' (शङ्करदिग्विजय १।४०–४१)। एतस्मिन् विषये विशिष्य जिज्ञासव आस्माकीन 'श्रीसनातनधर्मालोक'ग्रन्थमालायास्तृतीयं सप्तमं च पुष्पं प्रेक्षन्ताम्।

भगवता श्रीशङ्कराचार्येण त्रीणि कार्याणि कृतानि। प्राक् तु प्रच्छन्ननास्तिकैर्बौद्धैः सह शास्त्रार्थाः कृताः। ततो वेदान्तदर्शनस्य शारीरकभाष्यं, वेदस्य उपनिषद्भागस्य व्याख्या, ततश्च सनातनधर्मप्रचाराय चतसृषु दिक्षु मठानां निर्माणं कृतम्। एवं स्वकीयजगद्गुरुत्वं प्रख्यापितम्। इत्थममुना भगवता स्वल्पायुष्येव इदं सुमहत् कार्यं कृत्वा तत ऐहिकलीलासंवरणं कृतम्। ततस्तत्कालादारभ्य तत्पदचिह्नानुसारिणः सुयोग्याश्च महीयांसो भूसुरमणयो विद्वांसो नियोज्यन्ते तत्पदे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीमस्माभिः श्रुतं यत्—'पुरी'शङ्कराचार्याणां पौरस्त्यपाश्चात्योभयविधभाषानिष्णातानां सनातनधर्म्ममर्मज्ञानां संस्कृतमहाविदुषां श्री१००८ भारतीकृष्णतीर्थस्वामिचरणानां शिवलोकप्राप्त्या तत् स्थानं रिक्तमासीत्। तत्स्थान इदानीं पं० श्रीचन्द्रशेखरद्विवेदशास्त्रिमहाभागाः प्रतिष्ठाप्यमानाः सन्ति। मद्विचारे त एतत्पदयोग्याः सन्ति। प्रच्छन्नबौद्धैः सह शास्त्रार्थे ते नदीष्णतां भजन्त एव–इति वेदशाखासम्मेलनेषु मया समनुभूतम्। तस्मिन् समये तेऽन्यस्य साहाय्यं नापेक्षन्ते। स्वकीयैः सहापि पूर्वपक्षोत्तरपक्षसंवादादिषु परमकुशलतां वहन्ति ते। व्याकरणे, दर्शने, साहित्यादिसर्वविषयेषु परं पटिमानं भजन्ते ते। लेखन्यपि चैतेषां सिद्धतां कलयति। इतश्च भगवदुपासनायामपि ते निरताः सन्ति। विदुषां सम्मानेनेपि ते सोत्कण्ठास्तिष्ठन्ति। वाक् चापि नवाम्भोधरगम्भीरा, विविधकार्यपाटवं, व्यवहारनैपुणी, प्रबन्धसौष्ठवे चातुरी, पराकृतज्ञाने प्रवीणता एवं विविधगुणगणा एषु विराजन्ते। अन्येषां विदुषां सम्मानमपि कारयन्ति ते, एतेन ते प्रसन्नतासन्नतां कलयन्ति। अतएवाहमेषामेतत्पद प्राप्तौ परमप्रसन्नोस्मि।

द्वित्र × वार्ताश्च स्मारयाम्येतान्, यद् अद्यत्वे सनातनधर्महसिमा दरीदृश्यमानो वर्वर्ति। एते जगद्गुरुशङ्कराचार्यपदं प्राप्य तदीयसाहित्ये उन्नतिं कृत्वा तत्राऽप्रतिभटतामासाद्य तदीय—ह्रसिमो दूरीकरणे प्रयतन्ताम्—इति प्रथमा वार्ता। अद्यत्वे अद्वैतसिद्धान्ते (स्वा० शंकराचार्यप्रतिष्ठापिते) अद्यतनानां साम्प्रदायिकानां निशितधारकठोरकुठारप्रहारा जञ्जन्यमानाः सन्ति। ते ईदृशीं ग्रन्थमालां प्रचालयन्तु, यत्र अद्यतनानाम् अद्वैतवादे स्वामिशङ्कराचार्ये च क्रियमाणा आक्षेपाः सुगमशैल्या निराक्रियेरन्–इति द्वैतीयीकी वार्ता। तार्तीयीकी वार्ता त्वेषा यद्–आस्माकीन'श्रीसनातनधर्मालोक'-ग्रन्थमालां ते मा विस्मार्षुः। तस्याश्च संरक्षका यथासमयं तत्साहाय्यकर्तारश्च बोभूयन्ताम्–इति स्मारयित्वा च तान् एतत्पदप्राप्तौ अभिनन्दन् विरमामि।

अन्त एतदनुभवामि यद्—एतैरेतत्पदप्राप्त्यै गृहस्थाश्रमो हेयो भवेत्, पुत्रदारादीनां मोहस्त्यक्तव्यो भवेत्, परं स्वार्थत्यागे कृते य एभिः परार्थोऽनुष्ठेयः स्यात्, जनतायाश्च धर्मे प्रवृत्तिर्जागरूका कारयितव्या भवेत्, जगद्गुरुश्रीशङ्कराचार्याणां च स्मृती रूढमूला क्रियेत, तदिदं सुमहत् कार्य्यम्। प्रभुः प्रार्थ्यते यत्—तत्राप्येते इदानीमिव विनयमूर्तयः, तपोमूर्तयः, सनातनधर्मबद्धश्रद्धाश्च बोभूयेरन्निति निवेद्य विरमाम्यधिकाक्षरक्षरणात्।

× द्वित्राः। बहुव्रीहिसमासे डच्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगन्नाथपुरीस्थ-जगद्गुरु-श्रीशङ्कराचार्य-सिंहासनग्रहणवेलायां परमपूज्यानां, निखिलानवद्यहृद्यविद्या-विलासिनां, सौजन्यसुधाकूपाराणां, दिव्याचरणलब्धभव्यवैभवानां, व्याख्यानवाचस्पतीनां, भारतीयसंस्कृतसंस्कृतिसंरक्षकाणां पण्डितपुरन्दराणां, जयपुर-महाराजसंस्कृतकालेजाध्यक्षाणाम्

आचार्य–श्रीचन्द्रशेखरद्विवेदि-महानुभावानां

प्रातःस्मरणीयचरणसरोरुहेषु सश्रद्धं समर्पितः

प्रणामाञ्जलिः

कानीनप्रतिभः प्रभूत-धिषणः प्रज्ञावतामाश्रयः,
दीनानाथजनोद्धृतौ कृतमतिर्व्याख्यान-वाचस्पतिः ।
शेमुष्यां दिविषद्-गुरोरपि मदोन्माथी, प्रमाथी द्विषां
विद्वद्वृन्दशिरोमणिर्विजयते श्रीमान्‘द्विवेदी’बुधः ॥

संसन्मोहनदक्षता, मधुरता वाचो, मुखस्मेरता
काये वामनता निसर्गजनिता वैदुष्यतेजस्विता ।
व्याख्याने पटुता नितान्तशुचिता शास्त्रेषु मर्मज्ञता
सर्वस्तिष्ठति ‘चन्द्रशेखरगुरौ’ सोऽयं गुणानां गणः ॥

कदाप्यभूतप्रतिपक्षिभीतिः
सदा समासादितचित्रनीतिः ।
चिरं कृतार्थीकृतलोकरीतिः,
जीव्याद् ‘द्विवेदी’विदुषां विभूतिः ॥

रुचिरतरशरीरो यः सुमनः-सुमनो-मानसरश्चारी ।
स विविधगतिशीलः, जयति‘चन्द्रशेखरो’हंसः ॥

पुरीस्थशङ्कराचार्य-जगद्गुरुमहासनम् ।
अधिष्ठाय सतां ‘चन्द्रशेखरः’शेखरायताम् ॥

विद्या-वैभव-चिज्जुजुषां सुविदुषां निर्दूषणान् वो गुणान्
नालं वाक्पतिरप्यहो कथयितुं द्राघीयसाऽनेहसा ।
वक्तुं स्तान् कथमस्मि सक्षम इति ‘श्रीमन् द्विवेदिन् गुरो !’
तच्छ्रद्धातिशयात् प्रणम्य भवतो मन्ये हि धन्यं जनुः ॥

काङ्करकुटीरः,
सुमेरुकर्णमार्गः, रामगञ्जः
जयपुरम् (राजस्थाने)

विनीतः—

आचार्यनारायणशास्त्री काङ्करः एम० ए०, विद्यालङ्कारः
संस्कृतसाहित्यविवेचकः-राजकीयायुर्वेद-महाविद्यालयः, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमामश्चन्द्रशेखरम्

ले० पण्डितदेवकीनन्दनशास्त्री, महाराज-संस्कृत-कालेजः, जयपुरम् ।

निधानं सर्वधर्माणां प्रधानं धर्मधारिणाम् ।
शेखरं वैखरीवाचां नमामश्चन्द्रशेखरम् ॥

व्याकरणकारणं तस्माद् वेदशास्त्रोपकारिणम् ।
शिखरं धर्मशैलानां नमामश्चन्द्रशेखरम् ॥

दिग्नागवस्त्रं दधतं कमनीयं मृदौ तनौ ।
दिगम्बरमिवाभान्तं नमामश्चन्द्रशेखरम् ॥

कामारिं दुर्धियां भीमं सुधियां हर्षवर्धनम् ।
प्रवणं तारणे सन्तं नमामश्चन्द्रशेखरम् ॥

येन पूता धरा पूर्णा येन पूतं निजं कुलम् ।
झङ्कृता येन हृत्तन्त्री वन्दे तं चन्द्रशेखरम् ॥

सम्मुखं धर्मकार्येषु पापेषु च पराङ्मुखम् ।
प्रमुखं यज्ञकृत्येषु नमामश्चन्द्रशेखरम् ॥

धर्षकं हतवृत्तानां लोके पापापकर्षकम् ।
घर्षकं कामवृत्तीनां नमामश्चन्द्रशेखरम् ॥

हर्षकं राज्यपालानां राज्येपश्चाङ्गदर्शकम् ।
वर्षकं मोदविन्दूनां नमामश्चन्द्रशेखरम् ॥

अरतं क्रूरकृत्येषु सर्वभूतहिते रतम् ।
खरारिमनुगायन्तं नमामश्चन्द्रशेखरम् ॥

भगीरथप्रयत्नानां मूर्ति देवापगाञ्च यः ।
शिरसा श्लाघते नित्यं तं वन्दे चन्द्रशेखरम् ॥

महाविद्यालयाध्यक्षं करुणावरुणालयम् ।
शङ्करं शङ्करं नृणां नमामश्चन्द्रशेखरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'देवदत्त ! पुत्रस्ते जातः कन्या ते गर्भिणी'

(ले० श्री भवदत्तशर्मा मैथिलः)

संस्कृत साहित्ये सुखदुःखयो युगपदेव यत्रानुभवो भवति-तत्रेदं वाक्यं प्रयुज्यते । जयपुरनगरं विहाय जगद्गुरुशङ्कराचार्यपीठं समलंकर्तुं गन्तुकामस्य श्रीचन्द्रशेखरमहोदयस्य यात्रा प्रसंगे सेयमुक्तिः संस्कृतानुरागिणां मनांसि हठात् सुखखेदोदवति ब्रुडयन्ति । संस्कृतभाषाविषये जयपुरनगरमपरां काशीं मन्यते स्म देववाणीविशारदाः । भारतीप्रतिरूपाणां मधुसुदनझामहाभागानां वैयाकरणशिरोमणीनां वीरेश्वरशास्त्रिमहाशयानां विद्वन्मूर्द्धन्यानां दुर्गाप्रसादद्विवेदिनामुपस्थितौ इयं (अपरा काशीरूपा) भणितिः समीचीनैव आसीदित्यत्र न मनागपि सन्देहावसरः । दिवमलंकुर्वत्सु तेषु पण्डिप्रवरेषु म. म. गिरिधरशर्ममहाभागानां विद्वमण्डल्या साधु गोपायितं तज्जयपुरगौरवास्पदं पाण्डित्यम् । म. म. गिरिधरशर्ममहाभागैः सममेव तन्मण्डलान्तर्गतैरन्यैरपि विद्वद्वरेण्यैर्महाराजसंस्कृतविद्यालयात् विश्रमग्रहणानन्तरं तत्तेजस्विपाण्डित्यं अस्तोन्मुखमिव संजातम् । परं महाराजसंस्कृतविद्यालयस्य अध्यक्षीयां धुरं वहतानेन एकाकिनैव चन्द्रशेखरमहाभागेन जयपुरनगरस्य गौरवभूतं तत्पाण्डित्यं साधु रक्षितम् । द्विवेदमहोदयः संस्कृतवाङ्मयस्य अन्यतमो मार्मिकः सुधीरत्र न कस्यापि विपश्चितो वैमत्यम् । महाभागस्यास्य यथा पाणिनीयशास्त्रे अन्तस्तलस्पर्शिनी गतिरस्ति तथैव न्याय-साहित्य-दर्शनादिशास्त्रेष्वपि बुद्धिरस्य अप्रतिहतप्रसरैव । वेदसदृशे गहने ऽपि विषये कृतभूरिपरिश्रमोऽयं परमं प्रामाणिकत्वं भजते । व्याकरणसाहित्येभ्यः सर्वथा पृथग्भूते ज्यौतिषशास्त्रेऽप्यस्य कियत्तलस्पर्शिज्ञानमभूदिति दीपावली-विजयादशम्यादि-निर्णयार्थं प्रचलिते ज्योतिर्विदां विवादे सर्वैरपि नगरनिवासिभिः प्रत्यक्षीकृतमेव । प्राक्तनविद्वद्भ्यो महाभागस्यास्य एकमपरमपि वैशिष्टयमस्ति-यदयं पाश्चात्यभाषाया अपि सुवेत्तास्ते । अद्यत्वे वैज्ञानिके युगे संस्कृतविदुषां समुचितसम्मानाप्राप्तेरिदमेव कारणमस्ति-यत्ते आंग्लभाषानभिज्ञा भवन्ति । आधुनिके युगे प्रचलितेन विज्ञानेन साकं न ते प्राक्तनसंस्कृतसाहित्यस्य समन्वयं स्थापयितुं प्रभवन्ति । परमस्माकं चरितनायको द्विवेदमहाभाग आंग्लभाषाया अपि विद्वानस्ति । अतः संस्कृतवाङ्मयसिद्धान्तानयं सुकरतया नव्यशिक्षादीक्षितानामपि मनःसु सम्यक् स्थापयति-संस्कृतभाषां प्रति च तान् अनुरागिणः श्रद्धालूंश्च विदधाति । महाशयेऽस्मिन् अपूर्वा वाक्शक्तिरस्ति-संस्कृतभाषायामयमनवरतं व्याख्यानं दातुं सक्षमो वर्तते । आंग्लविश्वविद्यालये धार्मिकसाहित्यादिसमारोहेषु महाभागोऽयं मुख्याव्याख्यातृरूपेण सादरमाहूयते यदि नाम संक्षिप्य ब्रूमस्तदेदं निश्चप्रचं वक्तुं शक्यते यदस्य महाभागस्य प्रतिभा सर्वतोमुखी वर्तते । न केवलं राजस्थानस्यैव अपि तु भारतवर्षस्यायं पण्डिपरत्नमस्तीति निर्विवादम् ।

एवं भूतस्य प्रकाण्डविद्वद्वरेण्यस्य वियोगः कस्य खलु संस्कृतानुरागिणो मनो न दुनुयात् । भवता सनाथीकृता अत्रत्या विद्वन्मण्डली अनाथा संवृत्ता । सलिलान्निसारिता मीना इव रात्रिवियुक्तं चक्रवाकमिथुनमिव, भ्रष्टमणिरुरग इव अद्य वयं किमपि कष्टदायकं वियोगमनुभवामः । शकुन्तलाविरहितस्य वनवासिनो निस्पृहस्य महर्षेः कण्वस्यापि चेत् तादृशी मोहावस्था संपन्ना तदा गृहिणामस्मदादीनां वियोगव्याकुला मनःस्थितिरनुभवविषयैव न पुनर्वर्णनविषया । सुधीजनाप्यायकं द्विवेदमहा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भागस्य पाण्डित्यं स्मारं स्मारमस्माकं चेतांसि सहस्रशो विखण्डयति। द्विवेदमहाभागेन संव्यूढा धूः केन वक्ष्यत इति न कोऽपि तत्सदृशो व्युत्पन्नो विपश्चिन्नयनपथमवतरति। 'सर्वः स्वार्थं समीहते' इति न्यायानुसारं स्वार्थपरैरस्माभिर्यत् किमपि भणितं तत्सर्वमपि भवत्प्रगाढप्रेमनिर्बद्धैरेवेति न तत्र कापि विचारणा कार्या। कालोऽह्ययं निरवधिर्विपुला च पृथ्वी' इति भर्तृहरिवाक्यं संस्मरद्भिरस्माभिरपि सन्तोष आलम्ब्यते।

द्विवेदमहोदयस्य वियोगो यथास्माकं मनांसि दुनोति-तथैव भारतवन्दनीयस्य जगद्गुरुशङ्कराचार्यपीठस्य भवतामारोहणमस्माकं शिरांसि गौरवेण उन्नमयति। राजस्थानकृते परमगौरवस्यायं विषयो वर्तते यत् अत्रत्यो विद्वान् समस्तस्यापि भारतवर्षस्य पूजनीयो भवेत्। द्विवेदमहोदयसदृशः सार्वदेशिको विद्वान् केवलं राजस्थानस्यैव निधिर्भवेत्-इति असंगतमिव प्रतिभाति स्म। अधुना तु तस्य स्वरूपानुकूला समुन्नतिः संजातेति परमप्रमोदास्पदमेव।

द्विवेदमहोदयस्य आस्तिकता बहुप्रथिता वर्तते। महाशयेनानेन शास्त्रानुकूलं गृहस्थाश्रमं संसेव्य कैवल्यदायकं यत्संन्यासपदमंगीकृतं तदपि सर्वमस्य धर्मप्राणतामेव द्रढयति। दुस्तरं परिवारपरिजनमोहं परित्यज्य जनकल्याणकारकं संन्यासधारणं द्विवेदिनां सदाशयतां प्रकटयति। परमपूज्यानां करपात्रिमहोदयानां चरणयुगलं श्रीमता पञ्चदशवर्षपर्यन्तमासेवितम्-धर्मसंघसंस्थां द्वारीकृत्य च समग्रेऽपि भारते धर्मप्रचाराय प्रयत्तम्। अधुना श्रीमता स एव चिरपरिचितः पन्थाः अवलम्बित इति परमश्लाघनीयोऽयं विषयः।

जगद्गुरुपीठमासीनैः श्रीमद्भिः संस्कृतवाङ्मयस्य स्तुत्यार्चना करिष्यते, भारतीयां संस्कृतिं सनातनधर्मं चोपेक्षमाणा जनाः पुनः सन्मार्गगामिनो विधास्यन्त इति दृढं विश्वसिमः। अन्ते च सर्वशक्तिमन्तं भगवन्तं भूतभावनं प्रार्थयामो यत् स श्रीमते अदम्यं साहसमतुलां क्रियाशक्तिं सुदृढं च स्वधर्मानुरागं प्रदद्यात्।

"संस्कृत भाषा का प्रचार प्रसार करने वाली संस्थाओं और व्यक्तियों के प्रति शुभ कामनाओं के साथ"

दी इन्दौर मालवा यूनाइटेड मिल्स लिमिटेड

पता

मिल प्रेमीसेस, इन्दौर, (मध्य भारत)

फोन :—जनरल आफिस ६०६३

तार :—मालवामिल

फोन :—सेल्स मैनेजर— ७००७

रजिस्टर्ड आफिस—सेक्सरिया चेम्बर्स १३९, मेडोज स्ट्रीट, फोर्ट, बम्बई—१

फोन :—२५-२२१४-५-६

तार :—इन्दौरमिल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याभूषण-विद्यालङ्कार-पण्डितमार्त्तण्ड-दर्शनवागीश-व्याख्यानवाचस्पति प्रभृति-
विरुदावलि विभूषितानां जयपुरीय-महाराज संस्कृतमहाविद्यालया-
ध्यक्षाणां पूज्यवर - मनोनीत - श्रीजगद्गुरुशङ्कराचार्याणां
श्रीमताम् आचार्य--
श्रीचन्द्रशेखरद्विवेदिमहाभागानां
'भारती' संस्कृत-मासिकस्य कृते

अभिनन्दनाशीः

भारती भारते भातु
भारतान् भारतान् सदा
कुर्वन्ती विदुषाम्मोदं
प्रमोदं सर्व कर्म्मणाम् ॥१॥

पक्ष – प्रमित – वर्षेभ्यः
सेवामेषा सुसंस्कृतेः ।
संस्कृतस्य तथा नित्यं
करोतोति मुदावहम् ॥२॥

अतोत्र विदुषां ध्यान-
माकृष्टं चेद् भवेद् ध्रुवम्
कल्याणं निश्चितं तर्हि
समेषामीप्सितं भवेत् ॥३॥

तिथिः
आषाढकृष्णपक्षे १
सं० २०२१

—चन्द्रशेखरद्विवेदः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

सुविदितमेवैतद्यदखिलेऽपि भूमण्डले भारतवर्षमिदं धर्मप्रधानमस्ति । तथान्यान्यदेशापेक्षयाऽतिपवित्रतमेऽस्मिन् देशे एव भगवान् परमेश्वरोपि "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इति श्रीगीतावाक्यानुसारेण सनातनधर्मस्य संस्थापनाय साधूनां संरक्षणाय च समये-समये नैकवारमवतारं जग्राह, निजग्राह च वेदविरुद्धमतप्रवर्तकान् सज्जनोत्पीडकान् दुष्टान् जनानिति ।

अत एव पुरा हि यदा वेदोदितस्य धर्मस्य समुच्छेदाय तथा नास्तिकमतस्य प्रचाराय प्रसाराय च बद्धपरिकराणामधर्माचरणपरायणानां जनानामिह भारते प्राबल्यमेधाम्बभूव, तदा गृहीतशङ्करावतारः किलाऽऽद्यशङ्कराचार्यो दुर्वादिजनानां मतं शास्त्रप्रमाणयुक्तिभिः खण्डयित्वा सनातनधर्मं पुनः प्रतिष्ठापयाम्बभूव । एवञ्च न पुनः कदापि वेदविरुद्धमतानामत्र भारते प्रचारः प्रसारश्च भवेत्—एतदर्थमाद्यशङ्कराचार्येण भगवता भारतस्यास्य चतसृषु दिक्षु द्वारका-शृंगगिरि-बदरी-जगन्नाथ-शारदा-शृंगेरी-ज्योति-र्गोवर्द्धनाख्या मठाः संस्थापिताः । तत्र गोवर्द्धनपीठाधीश्वराः पूज्याः श्रीभारतीकृष्णतीर्थमहाराजा ब्रह्मीभूताः कियतोऽपि कालात् प्राक् ।

अतो गोवर्द्धनाख्यं तत्पीठं संप्रति परमादरणीया जयपुरीयमहाराज-संस्कृतमहाविद्यालयाध्यक्षाः श्रीचन्द्रशेखरद्विवेदमहाभागाः समलङ्करिष्यन्तीति महतः प्रमोदस्यायमस्त्यवसरो राजस्थानवासिनां समेषामपि जनानाम्, परमेते श्रीद्विवेदिवर्या जयपुराद् जगन्नाथपुरीं प्रयान्तीत्यतो जयपुरवासिनां जनानां महत्सौभाग्यं विशेषतो नूनमवर्णनीयमेव वर्तते ।

अतः श्रीद्विवेदिमहानुभावाः सर्वथा समभिनन्दनीयाः सन्ति । अत एव मनोनीतशङ्कराचार्यनेतान् समभिनन्दितुममन्दमानन्दमनुभवन् भारतीपरिवारोऽपि स्वकीयं परमं सौभाग्यं मन्यमानः एतमङ्कं 'श्रीद्विवेदाभिनन्दाङ्कः' इति नाम्ना पाठकानां पुरतः समुपस्थापयति ।

अङ्के चात्र प्रकाशनार्थं यैरपि विद्वद्भिः स्वकीया लेखाः कविताश्च प्रेषिताः, तेभ्योऽपि सादरं धन्यवादान् समर्प्य विरमति विस्तरादिति शम् ।

—सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चिन्निवेदनम्

सुमहान् हर्षस्य विषयोऽयं वर्तते यदद्य महाराजसंस्कृतमहाविद्यालयस्याध्यक्षाः पण्डितश्रीचन्द्रशेखरद्विवेदिमहाभागा उत्कलस्थजगन्नाथपुर्याः जगद्गुरुश्रीशङ्कराचार्यस्य पीठमलंकर्तुं प्रयान्तीति। भारतवर्षस्य बदरिकाश्रमादिक्षेत्रेषु त्रिकालज्ञेन भगवताऽऽद्यशङ्कराचार्येण संस्थापितं पीठचतुष्टयं विगताद् बहोरेवकालाद् देशस्य कृते मार्गप्रदर्शनं कुर्वत्सत्प्रेरणायाः स्रोतोरूपेण विद्यते। तत्र जगद्वन्द्याया भारतमातुश्चतुष्कोणेषु विद्यमानेषु पीठेषु विराजमाना आचार्या देशकालपरिस्थित्यनुसारमेव अनादि-परम्पराप्राप्तां राष्ट्रियतां संरक्षितुं सुमहान्तं प्रयासं कृतवन्तः। यद्यपि देशे गाणपत्यानां द्वादश गणपतिमन्दिराणि, द्वादश सूर्यमन्दिराणि, शैवानां द्वादश ज्योतिर्लिङ्गानि, शाक्तानां द्विपञ्चाशत् शक्तिक्षेत्राणि तथा वैष्णवानां सहस्रशः तीर्थक्षेत्राणि सन्ति, तथापि भारतवर्षस्य चतुर्षु दिक्षु प्रमुखपीठ–चतुष्टयं संस्थाप्य भगवान् आद्यशङ्कराचार्यः—'देशस्य सर्वापि जनता नियन्त्रिता तथा धर्मानुप्राणिता तिष्ठेत्—एतदर्थं सफलं प्रयासं चकार। अत एव देशे सर्वत्र व्याप्तो बुद्धधर्मः अनावश्यको भूत्वा तथा हिन्दुधर्मश्च केवलं कर्मकाण्डपण्डितानामेव वस्तु न भूत्वा, अपि तु साधारणजनानामभ्युत्थानभूतः। ततः प्रभृत्येव देवतात्मनो हिमालयस्य शिखरावस्थितस्य बदरिकाश्रमस्य पवित्रं मन्दिरं देशस्य सर्वसंप्रदायानुयायिनोऽपि जना निःसंकोचं व्रजन्ति। राष्ट्रियसंघटनस्य कृते सञ्जीवनीभेषजतुल्यः तत्र वर्तमानस्य भगवतः श्रीजगन्नाथस्य भक्त (भात) प्रसादः सर्वैरपि विनैव भेदभावनया गृह्यते। तद्वदेव द्वारकापुरीं गत्वा महान्तो महान्तः शाक्ता अपि भगवतः श्रीकृष्णस्य चरणारविन्दयोः श्रद्धावनता जायन्ते।

किञ्च जगन्नाथपुर्याः प्रसिद्धे तीर्थस्थले यत्राद्यशङ्कराचार्यः स्वस्य परमप्रियं शिष्यं पद्मपादं संस्थापयामास। ततश्चैवं परम्परया सुयोग्यैः पीठाधीश्वरैरेव तत्पीठमलंकृतमभूत्। पूर्वं तत्रैव च पीठे विद्यमानैः पूज्यश्रीभारतीकृष्णतीर्थमहाराजैः अस्माकं भारतीयानां धर्मस्य संदेशः अनेकवारं अमेरिकामपि गत्वा संश्रावितः, तत्रत्याश्च विज्ञा जना भारतीयधर्मस्य वैशिष्ट्यं श्रुत्वा प्रभाविताः सन्तः तस्य मुक्तकण्ठं प्रशंसां कृतवन्तः।

एतत्पुर्यामवस्थितं पीठं जयपुरस्थ-महाराजसंस्कृतविद्यालयस्य प्रधानाचार्याः पूज्यश्रीचन्द्रशेखरशास्त्रिमहाभागाः समलङ्करिष्यन्तीति अमन्दानन्दप्रदोऽयं शुभ उदन्तः। श्रीद्विवेदिमहाभागाः वेदवेदान्तव्याकरणादिविषयाणान्तु प्रकाण्डपण्डिताः सन्त्येव, सहैव ज्यौतिषशास्त्रेऽपि श्रीशास्त्रिणामेषामद्भुतं पाण्डित्यं विद्यते। अत्र च विगतेषु दिनेषु च अधिकमास–दीपावल्यादि-विषये सुमहान् यो विवादः प्राचलत्, तत्र श्रीद्विवेदिनः शोभनया शास्त्रार्थशैल्यासशास्त्रप्रमाणं विषयं साधु प्रतिपादितवन्तः। एवं महाराजस्य श्रीद्विवेदिनः शास्त्रीयं तथा व्यावहारिकं च उभयविधमपि ज्ञानं नूनमपूर्वमद्भुतञ्च विद्यते।

अपि च दशवर्षात्मके कार्यकालेऽत्र जयपुरे विद्यमानानामेतेषां श्रीद्विवेदिनां प्रायः सर्वेष्वपि सामाजिकेषु कार्येषु सक्रियः सहयोगः समवर्तिष्ट।

किञ्च श्रीमतामेषां द्विवेदिनामेव प्रयासेन जयपुरीय-संस्कृतकालेजे रात्रिकक्षा अपि समचाल्यन्त। अतःकारणादेवात्र समधीत्य अन्यान्य-कर्मपरायणाः सन्तोऽपि अनेके जना शास्त्र्याचार्यपरीक्षोत्तीर्णाः सञ्जाताः।

अपि च श्रीद्विवेदिनां प्रधानाचार्यत्वकाले एव महाविद्यालयादस्मात् अधिकाधिकसंख्यायां जनाः शास्त्र्याचार्यपदवीविभूषिताः समभूवन्। एतावति परिमाणे नातः पूर्वं कदापि छात्राः उत्तीर्णाः समजायन्त।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ च श्रीमान् द्विवेदिमहाभागः स्वकार्यकाले संस्कृतमहाविद्यालये अध्ययनाध्यापनसम्बन्धिनीं व्यवस्थां सुचारुरूपेण कृतवान्। ये केचन जनाश्च राज्याश्रयजातगर्वा औद्धत्यमाचरन् तेषामपि गर्वमपहर्तुं प्राभवदेष महाभागः!

अपि च द्विवेदिमहानुभावानां यदैषु दिनेषु रा० स्व० संघसरसंघचालकैः सह समजायत समागमः तदा तैः प्रोक्तं यत्—सर्वेषामपि सम्प्रदायानामाचार्याः सम्भूय वर्तमान सामजिक-समस्यासु-विचारविमर्शम् कुर्युः,ये चात्र दोषाः संप्रति दृग्गोचरीभवन्ति तान् यत्नेन अपसारयेयुरिति सहैव च चत्वारोऽपि जगद्गुरुशङ्कराचार्यपीठासीनाः आचार्याः यदि स्वस्वपीठेषु सुसंस्कृतान् बालकान् संरक्ष्य समुचितरीत्या च तान् शास्त्राणि पाठयेयुः, येन ते बाल्यकालादेव तपश्चर्याचरणपूतात्मानः सन्तः तत्तत्स्थानान्यलङ्कुर्युस्तर्हि महत् शोभनं स्यादिति विद्यते मामकिनो मनोरथः।

तदा श्रीद्विवेदिमहानुभावैः स्वाभिप्राय एवं प्राकाश्यत-यत्-सर्वेषामपि सम्प्रदायानामाचार्यान् एकत्र स्थाने समाहूय-एकस्या आचार्यपरिषदः समायोजनं विधास्यते पीठेषु सुयोग्यशिष्यपरम्पराया व्यवस्थां कर्तुञ्च प्रयतिष्यते।

अपि च श्रीशास्त्रिमहाभागोऽयं जयपुरनगरे तथान्यत्रापि संघादिसंस्थाभिः समायोजितेषूत्सवेषु तथान्यान्यसभासम्मेलनादिषु च सदैव सोत्साहं भागं गृहीत्वा समुपस्थितेभ्यो जनेभ्य :सदुपदेशानयच्छत्।

अस्माकमयं वर्तते सुदृढो विश्वासो यत् पूज्यश्रीद्विवेदिमहाभागा एते गोवर्द्धनपीठाधीश्वरत्वमासाद्य देशस्यास्य सर्वसम्प्रदायानां मिथ एकतां स्थापयिष्यन्ति तथा इदानीन्तनभौतिकवादसमाकुलस्य स्व-कर्तव्य-विमुखस्यास्य समाजस्य कृते पथप्रदर्शकाः सन्त भारतमिदं पुनः भारतं विधातुं प्रयतिष्यन्ते। वस्तुतो द्विवेदिनो महाभागाः अभिनन्दनीयाः एते। अत एव अभिन्दनाख्य एव अङ्कः प्राकाश्यत।

विनीत :—
प्रबन्धसम्पादकः

अब केवल मेट्रिक बाट और पैमानों का प्रयोग ही कानूनी है

... आदि में लेन-देन न कीजिए

केवल

लिटर में खरीदिये

DA 63/443

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षा और



विकास का काम



साथ साथ चलता है

रक्षा-प्रयत्नों में भरपूर मदद देने के लिए यह जरूरी है कि प्रत्येक गांव का एक-एक कृषि उपज कार्यक्रम तैयार किया जाए।

नीति सम्बन्धी तालमेल रखने और खेतों में पैदावार बढ़ाने के लिए एक उच्च अधिकार प्राप्त केन्द्रीय कृषि उपज बोर्ड बनाया गया है। वर्तमान संकट को ध्यान में रखते हुए कृषि-उत्पादन बढ़ाने, आयात कम करने और विदेशी मुद्रा को रक्षा सम्बन्धी जरूरतों के लिए बचा कर रखने की हर संभव कोशिश की जा रही है।

कृषि पैदावार बढ़ाने के अभियान में आप मन, वचन और कर्म से पूरा-पूरा सहयोग दीजिए।

योजना को सफल बनाइये

भारत की रक्षा-व्यवस्था को सुदृढ़ कीजिए

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमत्परमहंसपरिव्राजकाचार्यवर्येत्यादि समस्त विरुदांकितैः श्री दक्षिणाम्नाय
श्री शृंगगिरि-मठाधीश्वरैः श्रीजगद्गुरुशङ्कराचार्यैः
श्रीमदभिनवविद्यातीर्थ-महास्वामिभिः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्येत्यादि समस्त विरुदांकितैः श्रीपश्चिमाम्नाय-
श्रीद्वारकामठाधीश्वरैः श्रीजगद्गुरुशङ्कराचार्यैः
श्रीमदभिनवसच्चिदानंदतीर्थस्वामिभिश्च संभूय

श्रीकल्याणपुरी-विराजमाने श्रीशङ्करमठे क्रोधिसंवत्सरीय-चैत्र कृष्णषष्ठ्यां भानुवासरे (ता. ३-५-१९६४) श्रीशङ्करसदसि विश्वकल्याणाय

अनुगृहीतः दिव्यसंदेशः

भगवतः सकल-कल्याण-गुणनिधानस्य परमेश्वरस्य करुणादृष्टिसमुन्मेषमात्रेण समुत्पन्नेऽस्मिन् जगति सर्वजंतूनां मानव एव वरिष्ठ इति निश्चप्रचम् । अत एव सर्वेषां कल्याणं कलयन्नेव इतरजनिमतां श्रेष्ठतमः योग्यो जीवेत् सदा मानवः । सांप्रतं हि जगत्यां विश्वतोऽपि संप्रवृद्धायाः आसुरसंपदो वैभवतः परस्पर-विद्वेषणघर्षणादिदुष्टपरिणामभूतेयं अशांतिः किल प्रतिपदं तांडवनृत्यं नृत्यंती सर्वतोऽपि सुदुःसहदुःखं आहितवतीति सुविदितं लोके ।

अत्र च इमानि कारणानि—अधुना अस्य जगतः ईश्वरपराङ्मुखीभूय, अयथाभूतं वैषयिकसुखं यथाभूतमिति विश्वस्य, तस्यैव अनुसरणं, तथा स्वयं सर्वेभ्यो वरीयानिति आत्मनि संभावनं, इतर-परीभावकरणं चेत्यादीनि भवन्ति । इदानीमपि वा प्रबुध्य, ईश्वरपरायणो-भूय प्रागभिहितनीचगुणान् परिधूय, दैवीमेव संपदं आत्मसात्कृत्य, आत्मशांत्यै विश्वशांत्यै च अश्रांतं प्रयतनमाधेयं सर्वैः, आवश्यकं च पूर्वतोऽपि अत्यधिकमिदं नः ।

आत्मनः श्रेयसे च "तमेवैकं जानथ आत्मानम् अन्या वाचो विमुञ्चथ" तमात्मानं ये नु पश्यंति धीरास्तेषां सुखं शाश्वतं नेतरेषां" इत्यादीनामुपनिषदां तत्वं बोधयितुं, "ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति परमतत्त्वोपदुश-वितरणेन भीतभीतं लोकमिमं भवसागरतः समुद्धर्तुं च किल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साक्षात् परमशिवः श्रीशंकर-देशिकेंद्ररूपेण लीलामानुषविग्रहेण केरलेषु कालटीक्षेत्रे अवतीर्य विश्वतो दिग्विजय-यशःश्रियं प्रकाश्य च क्षेत्रोत्तमे केदारनाथे अंतरधात् ।

"धर्मो विश्वस्य जगतः प्रतिष्ठेति"–श्रुति–भणितिवत् जगत्-प्रतिष्ठा-हेतुभूतस्य सनातनस्य वर्णाश्रम-धर्मस्य आचारणं, वेदांतप्रतिपादिताद्वैत-ब्रह्मनिष्ठा च निरंतरमन्योन्यं ओतप्रोत-भावेन देदीप्येतामेत इति सत्संकल्पतः चतसृषु दिशासु चतुर्भिः वेदमहावाक्यरत्नैः विभ्राजितानि चत्वारि आम्नाय-पीठानि मणिमय–दीपस्तंभानिव भगवत्पादाः स्थापयामासुरितीदं सर्वं अखिल-भुवनविश्रुतं । तानि इमानि पवित्र-पीठानि धर्मप्रचारादि–निर्दिष्ट-कार्याणि निर्वहंति राराजन्ति ।

"स्वे स्वे कर्मण्यभिरतः संसिद्धि लभते नरः" "स्वकर्मणा तमभ्यर्च्य सिद्धि विंदति मानवः" इति भगवद् गीतावत् सर्वेऽपि स्वस्वाधिकारोचितकर्माणि अनुतिष्ठंतः स्वस्वेष्ट-देवताश्च आराधयन्तः अभ्युदयनिःश्रेयसे यथा भजेरन्, यथा च अखिल-भारतस्य विश्वस्य च समस्तैः कल्याणैः सह पूर्णाशाश्वती च शान्तिः स्थिरी-भवेत् तथा श्रीचन्द्रमौलीश्वरः अनुगृह्णात्विति आशास्महे ।

सर्वेऽपि सुखिनः संतु सर्वे संतु निरामयाः ।
सर्वे भद्राणि पश्यंतु मा कश्चिद् दुःखभाग्भावेत् ॥

नारायणस्मरणम् । नारायणस्मरणम् ।

त्रयाणां श्रीजगद्गुरूणां शुभसन्देशः

अयि भारतीयाः ! विदितचरमेवेदं समेषां यदिह पुरा कलिपराक्रमसमाक्रान्ते सर्वस्मिन् भूतले क्रमेण वैदिकधर्ममार्गे विलुप्तप्राये ज्ञानमार्गे च विविधदुर्वादिजनविवादास्पदतया दुर्बलीभूते तदुभय-समुद्दिधीर्षया भगवान् कैलासाचलवासी परमेश्वरः स्वयमेव श्रीशङ्कराचार्यविग्रहं परिजग्राह, निजग्राह च सर्वतो दुर्वादिगणान् अनुजग्राह च साधुलोकमिति, परमेश्वरावतारभूता एव भगवत्पादाः—इति नात्र खलु मात्रयापि विप्रतिपद्यन्ते भारतदेशलब्धजन्मानो मनुजतनुजन्मानः ।

अयि आस्तिकशिखामणयः !! तत्तादृशां भगवत्पदानां द्विविधा हि मूर्तिः पुरा भारतभूतल-मिदं भूयस्तरां भूषयामास । तत्र पाञ्चभौतिकी एका मूर्तिः भारतमातुः पादस्थानीये अन्वर्थनाम्नि कालटीक्षेत्रे प्रादुर्बभूव, अन्ततः केदारक्षेत्रे च तिरोदधे । अन्या तु वर्णमयी मूर्तिः तन्मुखाम्बुज–विनिर्गतप्रस्थानत्रयभाष्यप्रकरणस्तोत्रप्रबन्धादिरूपिणी अधुनाप्यस्मन्नयनपदवीमवगाहते इत्यहो महदिदं भागधेयं भारतीयानाम्, तदीयावतारस्थल्यां कालट्यां तदीयमूर्तिः प्रतिष्ठापिता यथा विराजते तथैव तदीयमुक्तिस्थले केदारक्षेत्रे अमृतशिलामयी मूर्तिः प्रतिष्ठापिता अद्यापि विद्योतते, यत्किल स्थानं कैवल्यधामनाम्ना प्रथते भारतमातुः शिरोभागे हिमाचले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP-6
"Licenced to Post
without Prepayment

दीर्घदर्शिनो हि ते भगवत्पादा भाविनीं धर्मग्लानिं प्रागेव पर्यालोच्य तत्परिजिहार्षाप्रगुणान्तरङ्गाः सन्तो ब्रह्मप्रचारौपयिकानि विद्यापीठानि चतसृष्वपि दिशासु समुचिततत्तदाम्नायमहावाक्यादिव्यवस्थापूर्वकं तत्र तत्र स्थापयामासुः येष्वेकतमं पीठमचिरेणैवारोक्ष्यन्त्यस्मच्चरितनायका गोवर्द्धनाख्यं पूर्वप्रदेशस्थम्, यदुपज्ञा च वैदिकधर्मब्रह्मविद्याप्रचारप्रक्रिया प्रावर्त्तिष्ठ समस्ते भारते। यद्येते भगवत्पादास्तदात्वे स्वयं नावतरिष्यन्. यदि च तदा विप्लुतं वैदिकधर्मं नोदजीवयिष्यन्, यदि वा अद्वैतराद्धान्तप्रतिपादनप्रक्रियां न प्रासारयिष्यन्, तदा तु नायमविच्छिन्नसम्प्रदायो वेदः स्मर्तुमप्यलप्स्यत, तथा च कुतोऽस्माकं धर्मस्वरूपयाथात्म्याधिगमः, कुतस्तरां कर्मानुष्ठानप्रवणता, कुतस्तमाञ्च मुक्तिमार्गानुचिन्तनसंरम्भो वा प्राप्तावसरः स्यात् ? इत्यहो महती लोकानुग्रहव्यसनिता भगवत्पादानाम्।

अयि धार्मिकाग्रेसराः ! भगवत्पादीयशिष्यप्रशिष्यपरम्परागता वयमिति एकमेवालमस्माकं महते गौरवाय। अतः तादृशभगवत्पादमूर्तिमिव तदीयसूक्तिमपि सर्वे साम्प्रतं संस्मरन्तु। वयमपि नान्यत्किमप्यपूर्वमुपदेक्ष्यामः, अपि तु 'वेदो नित्यमधीयतां तदुचितं कर्म स्वनुष्ठीयताम्' इत्यादि-रूपेण भगवत्पादमुखारविन्दविसृत्वरीमुपदेश—परम्परामेव भूयो भूयः स्मारयामः, तच्च यथाधिकारं भारतीयैरनुष्ठीयतामिति।

अयि शिष्यप्रवराः !! भगवत्पादप्रतिष्ठापितपीठचतुष्टयमध्ये पुरीगोवर्धन ज्योतिर्द्वारकापीठशिष्या अत्र समवेताः परस्परसहयोगिनो यथा दृश्यन्ते, तथैव दक्षिणाम्नायपीठच्छात्रवरैः साकं मेलने सति महत्तरमैकमत्यं स्यादिति सुदृढं प्रतीमः, तादृशमवसरञ्च प्रतीक्षामहे सादरम्।

अयि भारतीयाः !!! 'एतद्देशप्रसूतस्य' इत्यादिमानवचनानुसारेण यदि सर्वाधिकां समुन्नतिमपेक्षध्वे तर्हि सद्य एव सङ्घटध्वम्, सर्वप्रयत्नेनापि विचारयध्वं वैदिकधर्माणां परिस्थितिम्, अनुचिन्तयध्वं तदुन्नयनोपायान्, परिशीलयध्वं गैर्वाणीं वाणीम्, पर्यवेक्षध्वं भारतीयताया गरिमाणम्, प्रचारयध्वं सत्सम्प्रदायान्, प्रबोधयध्वं साधुजनान्, सन्दर्शयध्वं सर्वमतसामरस्यम्, ऊरीकुरुध्वं साधुसदादर्शम्, दूरीकुरुध्वं परमतविद्वेषम्, उपेक्षध्वं पाश्चात्यानुकरणदासताम्, अपेक्षध्वं धार्मिकस्वाराज्यम्, प्रार्थयध्वं परमेश्वरम्, आश्रयध्वं पुरुषकारम्, प्रतीक्षध्वञ्च भाविनो मङ्गलमयान् दिवसान्। अथवा किं बहुना—

'सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्'—इत्येतावदेवोक्त्वा विरमामो विस्तरात्। अस्मदाराध्यदेवता अखिलानपि भारतीयान् संरक्षन्तु—इति सन्ततं प्रार्थयामहे नारायणस्मरणानि च सर्वेभ्यः।

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



बाल्यमारभ्य यो लोकसेवी नीतिधुरन्धरः ।
प्रधानमन्त्री भात्येष सोऽयं लालबहादुरः ॥

[वर्ष]म् १४
[अङ्क]ः १०

वार्षिक मूल्यम् चतस्रो मुद्रा ४)
एकप्रतेः चत्वारिंशत् नवपणाः (४० न॰पै॰)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रमसंख्या	लेखाः	लेखकाः	पृष्ठसंख्या
१	यशोदाकृतप्रभातवर्णनम्	श्रीहजारीलालशास्त्री, नवलगढः	२६५
२	अन्ताराष्ट्रियशिक्षा	श्रीस्वामी भीमानन्दशास्त्री, देहरादूनः	२६६
३	प्रश्नोत्तराणि	श्रीकालीचरणदीक्षितः, शाहजहांपुरम्	२६८
४	डा० श्रीजयन्तविष्णु नारलीकरः	श्रीनारायणशास्त्रीकाङ्करः, जयपुरम्	२६९
५	गुर्जरभाषा तत्साहित्यं च	श्री गणेशरामशर्मा, झालावाडः	२७१
६	शिवराज्योदयं महाकाव्यम्	श्री श्रीधरभास्करवर्णेकरः, नागपुरम्	२७५
७	ऋतुविलसितम् (खण्डकाव्यम्) वर्षाविलासः	श्रीलक्ष्मीनारायणद्विवेदी	२७९
८	निवेदनम्	श्रीराधाकृष्णशास्त्री, बांदीकुई	२८१
९	संस्कृतज्ञान् प्रति	श्रीरामस्वरूपशास्त्री, तालबेहाटस्थः	२८२
१०	स्वर्गतः डॉ० सी० कुञ्जनराजः	श्रीमाधवकृष्णशर्ममहोदयः, जयपुरम्	२८३
११	सुरभारती	श्रीसीतारामशास्त्री, ओदिनी	२८५
१२	पण्डितराजाभिमतं काव्यलक्षणम्	श्रीरामगोपालशास्त्री, जयपुरम्	२८६
१३	महाराजतिलकजीवनस्य उच्चादर्शः	श्रीमती कृष्णाकान्ता गुप्ता, जयपुरम्	२९०
१४	समानाधिकृतिर्धर्मे मनुष्यास्ति नवा ?	श्रीअभयशङ्कर पुरोहितः, अहमदाबादः	२९१
१५	श्री जवाहरशोकषोडशी	श्रीजगन्नाथवासिष्ठः, काश्मीरः	२९३
१६	विश्वशान्ति-समस्या	श्रीशारदाशङ्कर, पाण्डेयः	२९४
१७	सम्पादकीयम्	सहसम्पादकः	२९७
१८	लघुकथा	स्व० भट्ट श्रीमथुरानाथशास्त्री, जयपुरम्	३००
१९	सूक्तिसुधा	श्रीदीनानाथत्रिवेदी, जयपुरम्	३०२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकविः
श्रीहरिशास्त्री
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी
भागीरथीव भावाढ्या भारते भातु भारती

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १४ | श्रावणः, विक्रमाब्दः २०२१ (अगस्तः १९६४) | अङ्कः १०

यशोदाकृतप्रभातवर्णनम्

लेखकः—श्रीहजारीलालशास्त्री, नवलगढः ।

याथाकथं निशिजविप्रवियोगखेदं निस्तीर्य सौख्यमलभत् प्रियचक्रवाकः ।
आनन्दकन्दमनिशं नलिनी गता यत् संयोगमेत्य दिवसेशकरैरजस्रम् ॥१॥
सौगन्ध्यलोभमधुपानकृतप्रवृत्तिर्वृत्तिं गतो मधुकरः खलु दण्डितानाम् ।
अस्तं गते दिनकरेऽभ्युदिते च तस्मिन् सम्प्रत्ययं प्रमदपुञ्जमवैति हृष्टः ॥२॥
उद्यद्दिनेशकरतापपलायितं यन्नैशं तमः क्वचिदपि स्थितिमेति नाद्य ।
द्रव्यादिचौर्यकरणाहितदुष्टवृत्तिः प्राप्नाश्मानववरे कथमेति वासम् ॥३॥
सूर्योदये मृगयवो मृगयां विधातुं नीत्वा धनूंषि सशराणि प्रयान्त्यरण्यम् ।
सिंहादयोऽपि गहनं विपिनं प्रविश्य भक्ता यथा हरिमवाप्य भवन्त्यभीताः ॥४॥
नीडात् विहाय ततपक्षतयो विहंगा व्योम्नि प्रयान्ति प्रयता निजजीविकार्थम् ।
गावश्च दुग्धपयसश्चरितुं व्रजन्ति दृष्ट्वा मनोहरमिदं बुध ! सुप्रभातम् ॥५॥
एते त्वदीयसुहृदो निजबालवत्सान् अग्रे विधाय ननु यान्ति च चारणाय ।
उत्तिष्ठ वत्स ! मधुरं कुरु प्रातराशं वत्सांश्च मोचय विलोकय सुप्रभातम् ॥६॥
त्वं तात ! तोषय चिरं विरहोत्सुकं ते तातं त्वयि प्रहितप्रेममयं द्विनेत्रम् ।
आनन्ददं भुवनमानुषजङ्गमानां नन्दं, विमुच्य शयनं समभूत्प्रभातम् ॥७॥
एतास्त्रियो व्रजप्रिय ! व्रजवासिनां यद् भाण्डे निधाय दधिमन्थनदण्डमागुः ।
त्वद्दर्शनाय गृहकार्यमपि प्रहाय दत्तादरास्त्विह विलोक्य च सुप्रभातम् ॥८॥
वंशीमनोहर-रवश्रवणातिकामा वन्या मृगाः प्रहितनेत्रचयाश्चिराय ।
पश्यन्ति मार्गमधुनातिजिघत्सवोऽपि त्यक्त्वा तृणं, भुवि तृणीकृतजीवनार्थाः ॥९॥
भ्राता बलो बलिभिरद्य सुहृद्भिरार्यः साकं, न सज्जति वनाय कृताशनोऽपि ।
उत्तिष्ठ, याहि बलिना हलिना समं त्वं कुर्याः समस्य भुवनस्य सुखं विभातम् ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ताराष्ट्रियशिक्षा

लेखकः—श्रीस्वामिभीमानन्दशास्त्री 'उदयः' हृषीकेशः देहरादूनः

अज्ञानान्धापहारिणीं विदुषां कण्ठभूषणम् ।
भारतीं वेदमातरं वन्दे ऽहं तां सुभाषिणीम् ॥

ब्रह्मानन्दस्वरूपं तं सच्चिदानन्दरूपकम् ।
वेदान्तज्ञमहं वन्दे गोपालानन्दयोगिनम् ॥

सर्वत्राद्य सर्वान् महानुभावान् रात्रिदिवं शिक्षाया जटिलतमा समस्या बाधते, यतः सर्वेषु देशेषु जना अशान्तिपूर्ण–खेदेन वा दारुणदुःखेन दुःखिताः सन्ति, कश्चिदन्नाभावेन स्वोदरवह्नेरुपशान्तये, कश्चित्तन्वाच्छादनार्थे वस्त्राप्तये, कश्चिद्धनप्राप्तये, कश्चिद् विद्यालाभायापरो जनमताप्तये यतते, परञ्चाऽभिलषितं वस्तु न कोऽप्याप्नोति, दुःखानां जननीमिच्छामेवानुमन्ये, 'ध्यायतो विषयान्' इत्यादि भगवताऽनाथनाथेन कृष्णेन गीतायामुपदिष्टं, तथापि वयमद्य शास्त्राण्यधीत्यापि मृगवद् जगति परिभ्रमामः, तस्मात्तस्य दुःखस्य समाप्त्यर्थं कतिचन परोपकारपरायणा राष्ट्रकर्णधारा उपदेष्टारः समाजसुधारेच्छवश्च देशे देशे सभां कुर्वन्ति कारयन्ति च, एवं कृतासु अपि सभासु सन्तोषप्रदं साफल्यं ते नाप्नुवन्ति–अस्मात् कारणात् अपि दुःखं नितरामनुवन्नि ।

सर्वेषां प्राणिनां हार्दिकोऽभिलाषो यद् दुःखस्य निराकरणं सुखस्याप्तिश्च भवेत् । तथा गच्छन् स्वपन् लपन्ननुभवामि, पश्यामि, परञ्च नाद्यावधि कश्चिन्महानुभावस्तादृग् जगत्यां जातो येन कथमपि दुःखस्य पूर्णरूपेण निराकरणमपनयनं वा कृतं भवेत्, यतो हि जीवनं संघर्षपूर्णं, द्वन्द्वमोहसमन्वितं, जराव्याधिसंयुक्तं, ईर्ष्याद्वेषयुक्तमेव तेन परात्परपरमेश्वरेण निर्मितम् । सुखस्य प्राप्तिर्मनोनिरोधेनेच्छायाः सर्वथा परित्यागेन भवति, य इच्छामत्यक्त्वैव वा विना मनोनिरोधेनैवाकांक्षते स प्रमत्तकरिणं सुकोमलमृणालतन्तुना बद्धुमिच्छति । यस्य मनस्याधिपत्यं स सम्राट्पदं भजते, कथितञ्च श्रीमच्छङ्कराचार्येण प्रश्नोत्तर्याम् 'जितं जगत्केन मनो हि येन'। 'आशाया ये दासास्ते सर्वलोकस्य दासाः । 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' 'योगश्चित्तवृत्तिनिरोधः' ।

अत्रास्मिन् प्रबन्धे चेष्टे यत्केनप्रकारेण संसारस्य शिक्षायाः प्रबन्धो भवेत्, कथं जनानां योगक्षेमौ भवेताम्, कया पद्धत्यार्तानां शिक्षणं, पोषणं भवितुं शक्नोति ? अत्र किञ्चिन्निवेद्यते आर्याः पाठका ! अध्यापका राज्यकर्णधारा व्यापारिण उद्योगपतयः सचिववर्या राचनीतिपटवः साहित्यरचितारः कविकोविदाः कर्षकाः (कृषिकर्मनिरताः) सर्वसाधारणव्यक्तयश्च विशेषतः समाजसुधारकाः, धर्मोपदेष्टारः, ते अध्यात्मवादमनुसरन्तु । आध्यात्मिकशिक्षया विना न कोपि विधिरस्माकं दुःखान्यपहरिष्यति, यतः स विधिः मानवकल्याणं भूतकाले कृतवान् करिष्यति च । अध्यात्मवादिनः सर्वेषां प्राणिनां भद्रमिच्छन्ति, अध्यात्मवादस्य वास्तविकपरिभाषा दीयेत चेत्तर्हि क्रियात्मककर्मणोऽनुष्ठानम् । कर्मयोग एवाध्यात्मवादस्यापरं नाम-इत्यनुमन्ये कर्मकरणमेवेश्वरपूजनम् । भगवता कृष्णेनापि कथितम् 'योगः कर्मसु कौशलम्' । इति

यदि वस्तुतः श्रीमन्तः सुखमाप्तुकामास्तर्हि कर्मयोगमनुसरन्तु । कर्मयोगेनात्र स्वार्थः परमार्थश्च बोद्धव्यः । प्रथमा योगपद्धतिः सीमिताऽपरा व्यापका विस्तृता बहुजनहिताय च मुनिभिः कल्पिता । सकामः योगी स्वार्थसम्पदनाय यतते, तस्मात्तदीयं कार्यक्षेत्रं सीमितमेकदेशीयञ्च, परञ्च निष्कामकर्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगी यत् किञ्चिदपि करोति पारकार्थिकदृष्ट्यैवातो हि तदीयं कर्मक्षेत्रं विस्तृतं, व्यापकं बहुजनहिताय च। तस्य 'वसुधैव कुटुम्बकम्' इत्येव भावना भवति। तस्मादेव प्रजानामेकत्वमपि भजते, परोपकरणमेव हृद्देशे येषां, जयन्ति ते सर्वत्र। विश्वबन्धुत्वेन क आचरति ? क अन्येषां दुःखेन व्यथते। स एव महापुरुषो यो निष्कामभावनया चन्द्रदिवाकर-नदीतरुवज्जनान् सेवते। केनापि कविना साधूक्तम्-बहुजनसुखाय च प्रकाशते निशापतिः। प्रयोजनं महात्मानो वदन्ति कर्मसाधनम्॥ नदी जलाय कल्पिता काननानि फलानिवै। उपकाराय भास्करः प्रकीर्तितः पिनाकिना॥ परोपकारकर्मणि रता सर्वेसुपुरुषाः। आप्नुवन्ति सुखं जनाः सुखरूपान् नमाम्यहम्।

अन्ताराष्ट्रियशिक्षा वेदान्तानुसारेण न यावत् कालपर्यन्तं भविष्यति, तावद् दुःखान्तो भवितुं न शक्ष्यति। वेदान्तदर्शनस्याध्ययनाध्यापने एव न पर्याप्ते, अपि तु तदनुसारेण जगतः कल्याणाय प्रयत्नोऽपि विधेयः। अर्थात् क्रियात्मरूपेण वेदान्तः पठ्यताम्, यथा पूर्वाचार्यैराचरितम्। स्वामिरामतीर्थस्यासीत् क्रियात्मको वेदान्तः।

अधुना सर्वत्र शिक्षापदेन बौद्धिकज्ञानमेव गृह्यते। छात्रेभ्यो या शिक्षा विद्यालयविश्वविद्यालयेषु वर्तमानसमये दीयते साऽपूर्णैव, यत एकाङ्गिनी सा विलोक्यते पुस्तकानामध्यापनन्तु विशिष्टवुद्धया भवति परन्तु तद्दृते न किमपि, यस्मात्कारणात् ते परीक्षोत्तीर्णाः छात्राः कार्यकाले साफल्यं नाप्नुवन्ति। पुस्तकशिक्षायामपि परिपूर्णत्वं न लभन्ते। यदि सर्वे महानुभावाः प्रजायाः कल्याणमभिलषन्ति तर्हि सर्वतोमुखीं शिक्षामध्यायप्रयितुमद्य व्रत्वर्यताम्।

सर्वप्रकारेण छात्राणां भद्राय प्रयत्नो विधेयः। ये छात्राः सत्यप्रतिष्ठितां शिक्षां न लभन्ते त एव विचारमूढा भवन्ति। समाचारपत्राणि-अस्मान् बोधयन्ति यत्कोरियाभिधे देशे स्वार्थलोलुपानि राष्ट्राणि निर्द्वेषान् मानवान् पशुवद् घ्नन्ति। अधुना सर्वेषां देशविदेशपत्राणामध्ययनेनानुभूयते यत्सर्वाणि राष्ट्राणि स्वेच्छानुसारेण तिष्ठन्तु, परन्तु लेखनादृते न तत्र किमपि तथ्यम्। एकं राष्ट्रम् अपरं पराजेतुमिच्छति। इत्थं सर्वत्र सकरुणं क्रन्दनं श्रूयते। तन्निवारणाय कतिपयमहापुरुषा यत्नशीलाः सन्ति।

भारतीयभाग्यविधात्रा जनप्रियनेत्रा प्रधानमन्त्रिजवाहरलालनेहरुणा जनहितरक्षणाय स्वाज्ञापालकाः पुरुषाः कोरियानामनगरं प्रति प्रेषिताः पुरा। भारतीयाः प्राचीनयुगत एव मानवभद्राय प्रयतामाना विराजन्ते। भारतीया जना एव शान्तिस्थापने साफल्यं लप्स्यन्ते।

संस्कृतसाहित्याध्ययनेनैव सहानुभूतेरुदयो भवितुं शक्नोति, यतो हि जनाः संस्कृते शिक्षां प्राप्य ज्ञास्यन्ति यत्सर्वा मानवजातिः स्वकीया, न तु परा। सर्वे संस्कृतजगति वसेयुः। सर्वे परमार्थिनो भवेयुः। सर्व अध्यात्मवादिनो भवेयुः।

अध्यात्मिकशिक्षा शान्तिसाम्राज्यं संस्थापयिष्यति। अतः—

जननी सर्वभाषाणां ख्याता सर्वत्र सर्वदा।
पूज्या पण्डितवर्याणां सर्वैर्ध्यानेन पठ्यताम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नोत्तराणि

लेखकः— पं० श्रीकालीचरणदीक्षितः "कवीशः" शाहजहाँपुरम्, (उ० प्र०)

प्रश्नः– भक्तौ ज्ञाने च को भेदः ?

उत्तरम्:— भक्तिर्माता ज्ञानम् च पुत्रः, स्वेष्टदेवं सर्वसुन्दरम् अविनाशिनं सर्वज्ञं सर्वशक्तिमन्तम् मत्वा श्रद्धाविश्वासपूर्वकम् क्रियते भक्तिः। भक्तिरेव भगवद्दर्शनस्य सर्वश्रेष्ठं साधनम्, ज्ञानं विवेकेन भवति, ज्ञानं सच्चिदानन्दमयस्य परमात्मनः चित्स्वरूपम्। अयमेव भेदः

प्रश्नः– भजनम् किम् ?

उत्तरम्— अन्तःकरणवृत्तेः भगवदाकारत्वं भजनम्। भजनस्य द्वितियोऽर्थः सेवा।

प्रश्नः– भजनम् कथं कुर्यात् ?

उत्तरम्— भगवान् सर्वेषां गुणानाम् निधानम्, महतो महीयान्, सेवकः सेव्यस्यैव गुणान् गृह्णाति। अत एव प्रभोर्भजनेन जनः गुणवान् महाँश्च भवति।

प्रश्नः– भगवतो दर्शनम् कथं भवेत् ?

उत्तरम्— जीवने चैतादृशीमाकुलतामुत्पादयेत्, यया विना मनुष्यः न जीवनम् धारयेत्, एतादृश्या तीव्रेच्छया भगवद्दर्शनम् भवति।

प्रश्नः– वस्तुतः मनुष्यः कः ?

उत्तरम्— यशस्वी, परोपकारी एव मनुष्यः।

प्रश्नः– का पुत्रवती नारी धन्या ?

उत्तरम्— यस्याः पुत्रो दानी, वा शूरो वीरो वा भगवद्-भक्तो वा भवेत्।

प्रश्नः– कः परमभाग्यवान् को वा भाग्यहीनः ?

उत्तरम्– भगवद्भक्तः, सद्ग्रन्थानाम् चाध्येता-एतादृशो जनः परमभाग्यवान्, यतः तस्य सर्वं वस्तु सुलभं सुप्राप्यं च। विषयानुरक्तो भगवद्भक्तिविहीनः च जनः परमभाग्यहीनः।

प्रश्नः– का मुक्तिः ?

उत्तरम्— दुखस्यात्यन्तिकनिवृत्तेरनुभवः शाश्वतिकाखण्डानन्दप्रदसुखमयजीवनानुभव एव मुक्तिः। विषय विरक्तिश्च मुक्तिः। जन्ममरणसांसारिकबन्धनविनिर्मुक्तो भूत्वा जीवस्य परमात्मनि लय एव मुक्तिर्वा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुत्वाकर्षण-सापेक्षतावादयोर्नवसिद्धान्तस्य संस्थापकः

भारतीय-नवयुवक-वैज्ञानिकः

डा० श्री जयन्तविष्णु-नारलीकरः

लेखकः-व्याकरण-साहित्य-सांख्य-योगाचार्यः श्री नारायणशास्त्री काङ्करः एम. ए. विद्यालङ्कारः, संस्कृतसाहित्यविवेचकः, जयपुरम् ।

भारतभूमेर्महत्त्वं यथा जगति आध्यात्मिकतया वरीवर्त्ति, तथैव आधिभौतिकवैज्ञानिकदृष्ट्यापीति वक्तुं न कमपि सङ्कोचमञ्चति चेतः । अत्रत्यानामेव श्रीजगदीशचन्द्रवसु-सी. वी. रमण-मेघनाद-प्रफुल्लचन्द्रप्रभृतिविश्वविख्यात – वैज्ञानिकानां पङ्क्तौ भविष्णुर्विपश्चिद्वरः श्रीजयन्तविष्णुनारलीकरोऽद्य देदीप्यमानं रत्नमिव विद्योतते । पञ्चविंशतिवर्षायुष्मतोऽस्य नवयुवक-नारलीकरस्य अभूतपूर्वगवेषणया सम्प्रति समग्रमपि वैज्ञानिकं जगद् विस्मयसागरे निमग्नमिव दरीदृश्यते ।

मानवीयज्ञानस्याद्वितीयरूपेण संवर्द्धकमिदं शोधकार्यं श्रीमता नरलीकरेण ब्रिटिशवैज्ञानिक-श्रीयुत डा० हायलमहानुभावस्य निर्देशकत्वे रात्रिंदिवा सुपरिश्रम्य सम्पादितमस्ति । आधुनिकवैज्ञानिकगुरुत्वेन परमप्रसिद्धस्य श्रीमत आइन्स्टाइन महाभागस्य गुरुत्वाकर्षणसापेक्षतावादसिद्धान्तावेव श्रीनवयुवकनारलीकरमहोदयेन नवीन-संशोधित-रूपे विश्वसमक्षं संरक्षितौ स्तः । यद्यपि संशोधित-रूपायास्मै मान्यतालाभः समयं समपेक्षते, तथापीदं जगद् महदुपकरिष्यतीति वैज्ञानिकानां विश्वासः । आइन्स्टाइन - महाशयो गुरुत्वाकर्षणं समयस्य स्थानचक्रस्य चाभिव्यक्ति स्वीकरोति—एतदनुसारमूर्ध्वं प्रक्षिप्तस्य पदार्थस्याध आगमनमावश्यकं वर्तते । किन्तु श्रीनारलीकरद्वारा सम्पादितायां नवगवेषणायां गुरुत्वाकर्षणं पदार्थेन सम्बद्धं भवति । एतदनुसृत्य विस्तारशीले ऽस्मिन् ब्रह्माण्डे नवस्थानं पूरयितुं निरन्तरं नूतनपदार्था नक्षत्रानर्द्धक्षत्रादिरूपे बोभूयमानाः सन्ति, गुरुत्वाकर्षणञ्चैतानेव पदार्थानवलम्बते । पदार्थाभावे गुरुत्वाकर्षणाभावः सञ्जायेतेति श्रीनारलीकरस्य हार्दिकाभिप्रायः । श्रीनारलीकरस्य गुरोः प्राध्यापक-हायलमहानुभावस्य मते तु अर्द्धपदार्थानामपि अभावो गुरुत्वाकर्षणं प्रभवेत्, अनेन च सूर्यः शतगुणितस्तेजस्वी सञ्जायेत, मनुष्यस्य च भारो द्विगुणः सम्पद्येतेति ।

श्रीमन्तं चिरायुष्मन्तं चिन्तनशीलं नारलीकरं वैज्ञानिकं तनयमासाद्य अद्य भारतमातेयं सत्यमेवात्मानं सगौरवामनुभवति, कैम्ब्रिजसदृशाः समस्ता अपि विश्वविद्यालयाः आत्मनः सबलाननुभवितुं प्रावर्त्तन्त । १९३८ ख्रिष्टाब्दे जुलाई मासस्य १९ दिनाङ्के महाराष्ट्रे कोल्हापुरं स्वजन्मना श्रीनारलीकरः समलङ्कृतवान् । वाराणस्यां समधिगतशिक्षः तत्रत्यविद्यालयत एव केवलमष्टादशवर्षाणामायुषि विशेषयोग्यतया समं B. Sc परीक्षोदधिमुदतारीत् । ततस्तत्कालमुच्चशिक्षायै इंग्लैण्डमुपेतोऽयं प्रथमं फिट्ज-विलियमकालेजे गणित-भौतिकशास्त्रादिगहनविषयान् महता मनोयोगेन समधीतवान् । १९६३ ख्रिष्टाब्दे सम्पादिताद्वितीयशोधकार्योऽयं 'डाक्टर' पदव्या पुरस्कृतो वर्षेऽस्मिन् १९६७ ख्रिष्टवर्षपर्यन्तं प्रभावशालिनीं किंगजकालेजे फैलोशिपमासाद्य विराजते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारलीकरस्य सर्वापीयं शैक्षणिकी प्रतिभा पैतृकी सम्पत्तिर्वरीवर्त्ति। पूर्वं प्रच्यावार्च्योभय-विद्यापारङ्गताः तदीयाः पितृपादाः V. V, नारलीकरमहानुभावा वाराणस्यां हिन्दुविश्वविद्यालये प्रथितयशसो गणितस्य प्राध्यापका आसन्-साम्प्रतञ्चैते अजयमेरौ राजस्थान-लोकसेवायोगस्य प्रतिष्ठितमध्यक्षपदं विभूषयन्तः सन्ति। सुपुत्रस्यास्य जननी चापि मुम्बापुरीस्थ--विश्वविद्यालयतः सम्प्राप्त B.A. पदवीका संस्कृतविदुषी अतीव धन्य-धन्या वर्तते। तदित्थमायुष्मान् डा० श्री जयन्तः पारिवारिकप्रेरणां सततं सर्वथा सम्प्राप्नुवन् परमोच्चपदमद्य समधिगतवान्। अथवा किमधिकं कथयामोऽस्य विषये? उच्चविचार-सरलजीवनयोरनुयायी वैज्ञानिकवरः प्रसन्नवदनोऽयं नवयुवक-नारलीकरः स्वविषयाध्यापनादतिरिक्तं यदा कदा कानन डायल-पी. जी. वुड्हाउसविदुषां केषाञ्चनान्येषाञ्च लेखकानामुपन्यासानामनुशीलनं प्रकृतिप्राङ्गणे च स्वच्छन्दं विचरणं भृशमभिरोचयति। लन्दनस्य विलासमय-नृत्य--प्रदर्शनादि — मनोरञ्जककार्यक्रमा नास्मै रोचन्ते। सात्त्विकवृत्तिर्विप्रश्चिद्वरोऽयं महोदयो धूम्रपान–मदिरा–सेवनाभ्यान्तु सुदूरं तिष्ठति।

अस्य योग्यतया सन्तुष्टान्तःकरणेन भारत-शिक्षामन्त्रिमहानुभावेन स्वदेशे यस्मिन् कस्मिन्नपि विश्वविद्यालये गणितप्राध्यापकतामङ्गीकर्त्तु-मिमं समामन्त्र्य स्वगुणग्राहकताया यः परिचयः प्रदत्तः स सर्वथा समुचित एव। किन्तु सम्भाव्यते, असौ महाशयः फैलोशिप-समयं समाप्यैव समायास्यतीति।

वयमस्य गुणगणगरिष्ठस्य भविष्णोर्नवयुवक-भारतीयवैज्ञानिकस्य कुशलमनामयञ्च कामयामहे।
V.V, नार्लिकरः शक्रः, विष्णुर्नार्लिकरी शची।
तयोः पुत्रो जयन्तोऽयं, जयन्त इव राजताम्॥

Insurance is a Social Service
With best Complements & Greetings
form

Ruby General Insurance Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.	Rs. 1,00,00,000
Paid up Capital. ...	Rs. 32,00,000
Assets Exceed. ...	Rs. 3,21,00,000
Nett Premiums in 1962. ...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA
FOREIGN BRANCHES & AGENCIES:
Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala, Nairobi, Penang, Rangoon, Singapore & San Fernado. D.L.M.S.,
Head Office:
"INDIA EXCHANGE"
India Exchange Place, Calcutta-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुर्जरभाषा तत्साहित्यं च

(सामान्यपरिचयः)

पूर्वतोऽनुवृत्तम्:- (ले० विद्याभूषणः श्रीगणेशरामशर्मा, झालावाडः (राजस्थानम्)

अथ महीपतिरामस्य 'वनराजचावड़ो,' 'इङ्ग-लैण्डयात्रा,' दुर्गाराममेहतामहाशयस्य जीवनचरित्रम्, तथा 'कर्षणदासस्य जीवनम्' इत्याद्या रचना अतीव प्रसिद्धाः सन्ति। 'वदूषकत्वसंग्रहः 'इत्याख्यं ग्रन्थं सम्पाद्य लोके प्रचलितानां विदूषककर्मणां कलाकौशलं सर्वजनसमक्षं ग्रन्थरूपेण संस्थापयामास। गुर्जरभाषासाहित्यस्य प्रथमोपन्यासः 'करणघेलो' इत्थाख्योऽस्मिन्नेव कालखण्डे शिक्षाविभागस्य निरीक्षकस्य श्रीरसेलनाम्नो महाशयस्यांग्लजनस्य प्रेरणया नन्दशङ्करमेहतामहाभागद्वाराऽलिख्यत।

रणछोड़भाई—उदयरामः
[सन् १८३७-१९२३]

स एष महाशयोऽस्मिन्नेव समये नाटकलेखनमारेभे। अस्य रचनासु विलियमशेक्सपीयरद्वारा प्रणीतयोर्नाटकयोराधारे लिखिते 'ललितादुःखदर्शकम्,' 'जयकुमारीनाटकम्' चेति द्वे नाटके विशेषेणोल्लेखमर्हतः। सोऽयं गुर्जरभाषाया नाट्यसृष्टेर्मूलाधारशिलां निदधे। नाटकेभ्योऽतिरिक्तमसावन्यानपि कांश्चन विविधप्रकारान् ग्रन्थाँल्लिलेख येषु 'लघुकौमुदीभाषान्तरम्' तथा 'रणपिङ्गलसंग्रहः' इत्येवंविधा ग्रन्थाश्चापि वर्तन्ते।

अस्मिन्नेव कालखण्डे कैश्चित् पारसीजातीयैर्लेखकैश्चापि विशुद्धायां गुर्जर्यां भाषायां साहित्यरचनाऽक्रियत। तलवारखानमहाशयस्य 'रत्नलक्ष्मीः' तथा 'कुलीनामुद्राश्च' इत्यस्य शोभने उदाहरणे स्तः।

अथ गुर्जरभाषायाः साहित्येतिहासे सन् १८५५ वर्षतः १९१५ वर्षपर्यन्तः कालखण्डो 'गोवर्द्धनयुगः' इति नाम्ना परिचितोऽस्ति।

गोवर्धनरामस्त्रिपाठी
[सन् १८५५-१९०१]

स एष नड़ियादनगराभिजनो नागरब्राह्मण आसीत्। अस्य प्रारम्भिकी शिक्षा मोहमय्यां तथा माध्यमिकी शिक्षा च नड़ियादनगरे समभूत्। सोऽयं स्वकीये विंशतिवर्षात्मके वयसि एलफिस्टन-कालेज इति महाविद्यालये स्नातकपरीक्षोपाधि (बी० ए०) विजिग्ये। अथ सन् १८८३ ईशवीये वर्षे वाक्कीलत्वव्यसायमारेभे। मध्ये चतुर्वर्षप्रायं समयं स खलु भावनगरराज्यस्य प्रधानामात्यस्य सचिवत्वेन कार्यं सम्पादयंस्तस्थौ।

पञ्चदशवर्षप्रायं समयमसौ गोवर्द्धनरामस्त्रिपाठी वाक्कीलत्वव्यवसायं कुर्वाणः स्वपित्रा कृतमृणमपाचकार तथा स्वजीवनस्य द्विचत्वारिंशद्वर्षमिते स्वायुषि हेतुपूर्वकं साहित्यिकं जीवनं व्यतीतुं विनिश्चिकाय। ततः स स्वजन्मस्थलं नड़ियादनगरमाजगाम। तत्रागत्य गोवर्द्धनरामः साहित्यसेवां कुर्वाणस्तस्थौ। स एष १—सरस्वतीचन्द्रः (चतुर्भागात्मकः), २— स्नेहमुद्राकाव्यम्, ३— लीलावतीजीवनकला, ४— दयारामस्यावधृतो देहः (दयारामनो अवधर देह) ५- साक्षरजीवनम् (निबन्धात्मकोऽपूर्णो ग्रन्थः) तथा Classical Poets of Gujarata इत्यादीन्यनेकानि पुस्तकानि लिलेख।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोवर्धनरामस्य सर्वश्रेष्ठो ग्रन्थः सरस्वतीचन्द्रो (उपन्यासः) वर्तते । अस्य ग्रन्थरत्नस्य लध्व्यो महत्यो वा यावत्यः समीक्षा बभूवुस्तावत्यः कदाचिदेवान्यस्य कस्यचिद् गुर्जरभाषायाः साहित्यिकग्रन्थस्य भूताः स्युः ।

मणिलाल-मनुभाईद्विवेदः

[सन् १८५८......]

अयमपि च नड़ियादनगरवास्तव्यो बभूव । स एष हि 'कान्ता' नामकमेकं स्वतन्त्रं नाटकं लिलेख तथा चोत्तररामचरितस्य गुर्जरभाषान्तरं चक्रे । स खलु कानिचित् प्रकीर्णानि काव्यानि तथा 'गुलाबसिंह' नामकमुपन्यासं प्रणिनाय । स हि 'प्रियम्वदा' 'सुदर्शनं' इत्यनयोर्द्वयोर्मासिकपत्रयोः सम्पादनं चक्रे । गद्यलेखकत्वेन तत्त्वज्ञदार्शनिकत्वेनासौ महतीं ख्यातिं वव्रे । भारतदेशाद्बहिर्विदेशेष्वप्यस्य कीर्तिः प्रससार । तस्य गद्यं विशेषतो निबन्धा अतीवोच्चस्तरीया मन्यन्ते । साहित्यस्य समीक्षादिकमप्यसौ शोभनं चकार । तस्य गद्यलेखाः 'सुदर्शन-गद्यावल्यां' सङ्कलिता विद्यन्ते । सौऽयं द्विवेदमहाभागः प्राचीनसंस्कृतेः पक्षपाती बभूव ।

नरसिंहराव-भोलानाथदिवेटिया

[१८५९-१९३७]

साराभाई महाशयस्य सूनुर्भोलानाथो वस्तुतोऽहमदाबादनगरवास्तव्योऽभूत् किन्तु राजकीय सेवाया निवृत्तोऽसौ मोहमयीं गत्वाध्युवास । आंग्लशिक्षायाः फलतोऽस्य प्रथमः काव्यसंग्रहः 'कुसुममाला' सन् १८८७ वर्षे प्राकाश्यं जगाम । वर्ड्स्वर्थशैलीप्रभृतीनामांग्लकवीनामिवास्य गीतिकाव्यानि गुर्जरभाषाकाव्ये नवयुगं प्रवर्तयामासुः । अमीषां काव्यानां स्वागतमपि चानेकैः प्रकारैर्बभूव । मणिलालमनुभाईमहाशयोऽस्य काव्यकृतीर्निर्गन्धानि वैदेशिकानि पुष्पाणीवाघोष्य निनिन्द, परन्तु रमणभाईनीलकण्ठोऽस्य काव्यैर्मुग्धो भृशं शशंस । सोऽयं नरसिंहरावस्तथाविधौ द्वावन्यावपि काव्यसंग्रहौ 'हृदयवीणा', 'नूपुरझङ्कारः' इत्याख्यौ लिलेख । पुत्रवियोगेन प्रेरितस्यास्य 'स्मरणसंहिता' इत्याख्यं काव्यं श्रेष्ठं मन्यते । काव्येऽस्मिन् कवेरस्य मानसे–आंग्लकवेः टेनिसनस्य In Memorium अस्याः कृतेः सघनच्छायाबिम्बमास्त इत्यपि च मन्यते । नरसिंहरावो महानेव विद्योपासकोऽभूत् । साहित्यसमीक्षात्मकं, संशोधनात्मकं, निबन्धात्मकमित्यादि विविधविधं तस्य साहित्यं वर्तते । तद्द्वारा भाषितानि गुर्जरभाषाविषयकाणि 'विलसनफाइलोलॉजिकल लेक्चर्स' विषयेऽत्रातीव महत्त्वपूर्णानि गण्यन्ते । अस्य समस्तं जीवनमध्ययनाध्यापने साहित्यसर्ग एव व्यतीयाय । 'मङ्गलमन्दिर खोलो' इत्यस्य गीतिकाव्यस्य महात्मनो गान्धेः स्वीकारात्–निखिलेऽपि देशे प्रसिद्धिर्बभूव । एडविड़–आरनॉल्डद्वारारचितस्य Light of Ashia इत्यस्य ग्रन्थस्य 'बुद्धचरितम्' इति नाम्ना कियत्स्वंशेषु सुन्दरमनुवादमप्यसौ चकार ।

केशवहर्षदध्रुवः

[सन् १८५९-१९३८]

महाशयोऽयं संस्कृतवाङ्मयस्य, विशेषतो ललितसाहित्यस्यातीवरसिको बभूव । स खलु संशोधनकर्मणि प्रभूतं मनोरुचिमादधे । स हि गीतगोविन्दामरुकशतकादिसंस्कृतकाव्यानां तथा मुद्राराक्षस–विक्रमोर्वशीययोर्भासस्य च नाटकानां सुन्दरमनोहराननुवादान् विदधे । अस्य भाषायाः संस्कृतप्रचुरत्वादनेनानूवादितानि नाटकानि दुर्बोधानि वर्तन्ते नामावश्यम् । तस्य भाषान्तराणां मौलिकानां च नाटकानां प्रस्तावनाः संशोधनदृशातीव महत्त्वपूर्णा वर्तन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमणभाईनीलकण्ठः
[१८६८-१९२९]

नवलरामादनन्तरं साहित्यसमीक्षाविधौ सविशेषं योग्यतामापन्नः ख्यातिं गतश्चायं रमणभाई-महाभागो महीपतिरामरूपरामस्य सुपुत्रोऽभूत्। समतुला नाम तस्य साहित्यस्य विशेषो गुण आसीत्। सोऽयं प्रार्थनासमाजानुयायी, समाजसुधारकश्चाभूत्। स एष सत्यां धार्मिकीं वृत्तिं दधानो बभूव। स हि 'भद्रं भद्रम्' इति सामाजिकमुपन्यासं लिखित्वा रूढिवादिनां सनातनधर्मानुयायिनामतीवोपहासविड़म्बनां चक्रे। तेन प्रणीतं 'राईनो पर्वत' नाटकं गुर्जरभाषासाहित्ये सविशेषं महत्पदमातिष्ठति। तस्य गद्यलेखनं विपुलं तथोच्चकोटिकमास्ते। 'कविता साहित्यं च' तथा 'धर्मः समाजश्च' इति तस्य सङ्ग्रहग्रन्थौ प्रसिद्धिं जग्मतुः। वर्षाणि यावत् स 'वसन्त' इत्याख्यस्य पत्रस्य सम्पादनमपि कृतवान्। अहमदाबादनगरस्य नागरिके जीवने तस्य महत् प्रतिष्ठितं स्थानमभूत्।

कविकान्तः (मणिशङ्कररतनजीभट्टः)
(सन् १८६७-१९२३)

अस्य व्यवसायः शिक्षकत्वमासीत्। असौ शिक्षणशास्त्रस्येतिहासं लिखितवान्। यद्यप्यस्य काव्यं परिमाणे स्वल्पमास्ते तथापि तस्य गुणसम्पत्सौन्दर्यं च प्रभूतं वर्वर्ति। भावानुसारिभिर्विविधैर्वृत्तैः संयोजितान्यस्य खण्डकाव्यानि गुर्जरभाषासाहित्ये शाश्वतं स्थानं प्रापुः। 'वसन्तविजयम्' 'क्रौञ्चमिथुनम्' तथा 'कचदेवयानी' त्यस्य सुप्रसिद्धानि काव्यानि सन्ति।

कविः कलापी [सूरसिंह मोहिलः]
(१८७४-१९००)

सौराष्ट्रप्रदेशस्यैकस्य लघुराज्यस्याधिपतिः सामन्तोऽसौ बभूव। नमुभाईसकाशात्तथा कान्तकवेश्चायं साहित्यप्रेरणामवाप। स एष कविवरः षड्विंशति-सप्तविंशतिवर्षप्राये स्वल्पायुष्येव स्वर्गं गतवान् किन्त्वस्मिन् स्वल्पावधावेव प्रभूतं साहित्यं विरचयामास। अस्य काव्यसंग्रहः 'केकारवः' इति नाम्ना सुप्रसिद्धो लोकप्रियश्चास्ते। अस्य काव्यानां स्थायिभावः करुणो विद्यते। काव्येष्वस्य भावनाऽऽवेगोऽपि प्रबलोऽस्ति। अस्य कवेर्जीवनेऽपि च करुणादितत्त्वानां प्रभावो भूयस्तरां पपात। प्रकृतिसौन्दर्यवर्णनमसौ प्रचुरं चकार 'केकारवे' संगृहीतेभ्यः काव्येभ्योऽतिरिक्तमयं 'काश्मीरप्रवासवर्णनम्' काँश्चन सम्वादान्, पत्राणि च लिलेख। अस्य पत्राणां लेखनशैली सरला सरसा चित्ताकर्षिणी चास्ते।

आचार्य आनन्दशङ्करो ध्रुवः
[सन् १८६९-१९४२]

स एष ध्रुवमहाभागो धर्मस्य, तत्त्वज्ञानस्य च सतताभ्यासशीलः संस्कृतज्ञो महापण्डितो दार्शनिको विद्वांश्चासीत्। महात्मनो गान्धेर्विशेषाग्रहादसौ वाराणसेयहिन्दुविश्वविद्यालयस्योपकुलपतेः पदं स्वीचकार। इत्थमयमखिलभारतीयां प्रख्यातिं लेभे। 'वसन्त' इतिमासिकपत्रमस्य विचाराणां वाहकमासीत्। धर्मस्य नीतेश्च स लघुमहतश्चतुरो ग्रन्थाँल्लिलेख। अस्य 'हिन्दुधर्मस्य बालपुस्तकम्' समधीत्य राष्ट्रपिता महात्मा गान्धिरतितरां प्रसन्नो बभूव। 'स्वधर्मः' (आपणो धर्म) इत्याख्यं पुस्तकमस्य सर्वश्रेष्ठो ग्रन्थो मन्यते। संस्कृतप्रचुराप्यस्य भाषा क्लिष्टतां नावहति। आंग्लभाषासाहित्येऽस्य भूयस्तरामभिरुचिर्बभूव। 'वसन्त'-मासिकपत्रस्यान्तिमे पृष्ठेऽस्य स्वाध्यायात् संगृहीता आंग्लभाषायाः सरसाः सूक्तयः प्रकाश्यन्ते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलवन्तरावः क० ठक्कुरः

[१८६९–१९५२]

अयं महाशयः काव्यानि, नाटकानि, निबन्धान्, साहित्यसमीक्षा, इतिहासादीन् विरच्य साहित्यस्य सर्वास्वपि विधासु स्वयोगदानं प्रार्पयत्। अष्टाशीतिवर्षायुष्कोऽप्यसौ साहित्यसर्गविधौ तरुणान्नवयुवकादप्यधिकमुत्साहं दधे। काव्येऽसौ विचार प्रौढतायामर्थगाम्भीर्ये च सविशेषं बलमर्पयामास।

छन्दःस्वयं कांश्चन प्रयोगान् कृतवान्। पृथ्वीच्छन्दस्यसौ काश्चन चतुर्दशपदीर्लिलेख। स खल्वनेकेषां तरुणकवीनां नवयुवकानां साहित्यसेविनां च मार्गदर्शनं चक्रे। स्वयमात्मनः काव्यं भाषायां च स रोचकतत्त्वमतीवाल्पाल्पमिव प्रतीयमानं मन्यते। अयं हि ठकुरमहाभागः परमः साहित्योपासको विद्यानुरागी चावर्तत।

अत्र प्रसक्तानुप्रसक्तं–अरदेशरफरामजी खबरदारमहाभागस्य नामोल्लेखस्तावदावश्यकः प्रतिभाति नः। स एषः पारसीकज्ञातीयः साहित्यसेवको वर्तते। विश्वविद्यालये संस्कृतस्याध्ययनाद् गुर्जरभाषायां यद्धि नवीनं तत्त्वं प्रविवेश तथा गुर्जरभाषातः पारसिकी गुर्जरीभाषेति पृथगेका नव्या भाषोदपेदे, तां परिवर्ज्यायं विशुद्धगुर्जरभाषायां काव्यरचनां कृतवान्। अस्य भाषा मधुरा सालङ्कारा प्रसादगुणयुक्ता च विद्यते। अस्यानेके काव्यसङ्ग्रहाः सुप्रसिद्धाः सन्ति, तेषु 'राष्ट्रिका' नाम्नि काव्यसङ्ग्रहे स्वदेशाभिमानसम्बन्धीन्यनेकानि सुन्दराणि चारूणि च गीतानि वर्तन्ते।

कविनानालालदलपतिरामः

[सन् १८७७–१९४६]

अस्य कवेः साहित्यसृष्टिर्विपुला सुन्दरी च वर्तते। अनेन विरचितानि लघुलघूनि रासकाव्यानि, गरबीत्याख्यानि गीतानि तथान्यान्यानि लघुकाव्यान्यतीव लोकप्रियाणि सन्ति। एवं विधैर्लघुकाव्यैरेवासौ साहित्यक्षेत्रे पदार्पणं कृतवान्। उदात्तानार्यभावानुदात्तयैव तादृश्या भाषयाभिव्यक्तीकरणस्य विरलविरलं सामर्थ्यं सः प्रकटितवान्। अस्य कृतिषु 'जयाजयन्तः', 'इन्दुकुमारः', विश्वगीता' तथा च लघुकाव्यानि गुर्जरसाहित्ये स्थायि पदं प्रापुः। स्वस्यान्दोलनशीले गद्ये सोऽयं यथाविधां शब्दयोजनां कृतवान् तत्र स एव हि भूयस्तरां सफलतामवाप। सत्यप्येवं तस्य शैली नानुकरणीयास्ते। काश्चिद्गीराजकीयाभिर्घटनाभिः स एषः कविवरः केवलं ध्येयवादमङ्गीकृत्य कल्पनाविहारे विचचार तथा यथार्थजीवनस्य वास्तविकतातो दूरमपजगाम। किन्त्वस्य साहित्यविषयिणी भक्तिर्निष्ठा चामरणान्तमखण्डिता तस्थौ। तस्य साहित्यसर्गप्रवाहोऽन्ततोऽविच्छिन्नं प्रवाहशीलोऽभूत्। अस्य गद्ये बहुषु स्थलेषु शब्द प्राचुर्यमर्थबाहुल्यं च दृश्यते। आर्य भावानां सुन्दरशैल्याऽभिव्यक्तेरङ्गतां कलामसौ प्राप्तवान्। पुराणेभ्य इतिहासाच्च प्रसङ्गान् गृहीत्वा तान् सजीवरूपे प्रस्तोतुं समर्थोऽभूत्। अनेन प्रयुक्ताः केचन शब्दा वाक्यांशा वाक्यानि च गुर्जरभाषाया वाग्धाराप्रवाहे रूढतां जग्मुः।

स एष परिचयोऽतीव संक्षिप्तरूपोऽत्र प्रदत्तः। नतावता समग्रस्य गुर्जरभाषासाहित्यस्य पूर्णः परिचयो भवितुमर्हति पाठकमहाभागेभ्यः। यतो व्यतीतेषु पञ्चाशद्वर्षेषु गुर्जरभाषाया वाङ्मयस्य–विशेषतां गद्यसाहित्यस्य–विभिन्नासु विधासु कोऽप्यभिनवो महान् हि विकाशो जात्तोऽस्ति तथाधुनापि च जायमानोऽस्ति। अद्य तु तावदत्रैव विरम्यते लेखविस्तृतिभयात्। पुनः कदाचित्प्राप्तावसरं विषयेऽत्र किमपि वक्ष्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवराज्योदयं महाकाव्यम्

दम्पतीमतभेदो नाम षष्ठः सर्गः

कवि :- श्रीधरभास्करवर्णेकरः, नागपुरवासी ।

तं तथा तनुमनोमतिस्थितै-
रुज्ज्वलोर्जितगुणैः प्रभासितम् ।
श्रीशहाजिरवलोक्य नन्दितो-
राजकार्यनिरतो निरन्तरम् ॥१॥

आत्मजस्य मुखचन्द्रदर्शनं
सर्वमातृपितृनेत्रतर्पणम् ।
तत्र सद्गुणविशेषशालिनो
नात्र चित्रममृतायते यदि ॥२॥

मल्लकेलिषु परिश्रमोद्गत-
स्वेदलिप्तमृदुरेणुरूषितम् ।
स्वात्मजस्य वपुरुन्मनाः पिता
निर्भरं स परिरभ्य निर्वृतः ॥३॥

द्वन्द्वयुद्धसमये निजात्मजं
सर्वदा जयिनमेव दर्शिवान् ।
हर्षगर्वभरमत्तमानसो
गर्जति स्म हरिगर्जमेदुरम् ॥४॥

वीक्ष्य सायमवनम्रमस्तकं
पादयोः स च तमात्मनः सुतम् ।
सुप्रसन्नमनसाऽतिमङ्गला
आशिषः शतसहस्रशो ददौ ॥५॥

तं विनीतमतिमात्रसंस्कृतं
स्वात्मजं यवनराजसन्निधौ ।
नेतुमैच्छदभिवादनाय सः
रम्यभव्यभवनं विजापुरम् ॥६॥

प्राह तत् स सहधर्मचारिणीं
कल्पितं स्वकमनुत्तमं रहः ।
धीमतोऽपि पुरुषस्य भार्यया
मन्त्रणा समुचितेति चिन्तयन् ॥७॥

साऽपि भर्तुरवगत्य कांक्षितम्,
अप्रसन्नहृदयाऽऽस मानिनी ।
म्लेच्छराजपुरतः स्वमात्मजं
नो समैहत नतं कथञ्चन ॥८॥

अप्रशस्तमपि भर्तुरीप्सितं,
शृण्वती स्मितमुखी पतिव्रता ।
मन्दनिःश्वसितपूर्वमाकुला
संरुरोध विनयोदितैः पदैः ॥९॥

लोकरीतिनिपुणस्य धीमतो-
राजनीतिकुशलस्य ते पुरः ।
अल्पशिक्षितधिया स्त्रिया मया
भाष्यतेऽनुचितमेव तत् खलु ॥१०॥

हन्त किन्तु हतधीरियं मम
निस्त्रपेव हि सखी बलादिव ।
प्रेरयत्यहह वक्तुमल्पकं
मामभाषणपरां पुरस्तव ॥११॥

वन्दते दयित ! वन्दनोचितान्
देवतान् तव ममापि यः पदे ।
सज्जनांश्च भगवत्परायणान्
म्लेच्छराजपुरतः स किं नमेत् ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालभास्करमिवोदयोन्मुखं
बालमप्यमुमिमे महौजसः ।
आनमन्ति शिवदर्शनं शिवं
दृष्टमात्रमतिभक्तितो जनाः ॥१३॥

किं न पश्यसि मुखेन्दुमण्डले
पाणिपादकमले च गोचरम् ।
जन्मसिद्धमिव पुत्रकस्य ते
छत्रपत्युचितलक्ष्मजालकम् ॥१४॥

म्लेच्छराजसदनुग्रहामिषे
अप्रवृत्तिरितरो जनोऽस्त्वयम् ।
हन्त तत्र हि कथं प्रवर्ततां
सिंहशावचरितः सुतस्तव ॥१५॥

म्लेच्छराजनगरीमवेक्ष्य तां
देवमन्दिरविनाकृतामिव ।
तोयमात्रमपि नो पिबेदसौ
तत् क्षमेत कवलग्रहे कुतः ॥१६॥

म्लेच्छराजनगरे जनाकुले
हन्यते पथि चतुष्पथेऽपि गौः ।
दृक्पथे यदि पतेदमुष्य तत्
वेत्सि नाथ ! स किमाचरिष्यति ॥१७॥

म्लेच्छराजनगरेऽङ्गनाजनः
पीड्यते क्वचिदपोह्यते क्वचित् ।
स्त्रीजनापदसहिष्णुराक्रमेत्
भीमवत् स सहसा सुतस्तव ॥१८॥

हिन्दुराजपदसंश्रितां श्रियं
म्लेच्छराजकवशंगतामिव ।
संशृणोति स तवात्मजो यदा
स्वान्तमस्य दहतीव हि क्रुधा ॥१९॥

तां तथा स सहधर्मचारिणीं
भामिनीमननुकूलवादिनीम् ।
कर्तुमैच्छदनुकूलवर्तिनीं
लोकरीतिमुपदिश्य कामपि ॥२०॥

वाग्मिनि ! त्वदुदितं सुसंस्कृतं
पुत्रसद्गुणसुधारसान्वितम् ।
सन्निपीय हृदयंगमं परं
तृप्तिमेव हृदयं न मे गतम् ॥२१॥

भाग्यवानिह न कोऽपि दृश्यते
मादृशः सदृशदारसंग्रही ।
काव्यसम्मिततयोपदिश्यते
कान्तया य उचितोचितं नयम् ॥२२॥

स्वाभिमानिनमवैषि पुत्रकं
त्वं यथाऽहमपि तं तथैव च ।
भारतीयसुपरम्परोद्भव-
क्षत्रियस्य स गुणः स्वभावजः ॥२३॥

आनमन्ति यदिमं सुतं तव
दृष्टमात्रमपि ते महौजसः ।
नात्रचित्रमयि किं ब्रवीमि ते
मस्तकं नमति मेऽपि तद्गुणैः ॥२४॥

ईदृशं गुणगणान्वितं सुतं
वन्दयामि यदि राजपादयोः ।
तोषमेष्यति स सर्वथा परं
कल्पवृक्ष इह तोषितोऽधिपः ॥२५॥

मङ्गलं नृपतिवक्त्रदर्शनं
श्रेयसेऽत्र नृपपादवन्दनम् ।
राजलोचनकटाक्षवीक्षितं
धन्यमेव नरजीवनं भुवि ॥२६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यापितं नृपति पणिपल्लवे
यौवनं खलु तदेव यौवनम् ।
विद्धि भामिनि ! तदन्यथा पुन-
र्यौवनं तदपि नाम वार्द्धकम् ॥२७॥

भूभृतो हि सदनुग्रहस्य चेत्
पात्रतां सुत उपैति तावकः ।
देवदुर्लभतरं लभेत सः
भागधेयफलमत्र भूतले ॥२८॥

सा कुशाग्रमतिरुत्तमा सती
भर्तुरीप्सितमवेत्य तादृशम् ।
प्रस्फुरत्तरविलोचनाधरा
हृद्गतं स्फुटमवोचदात्मनः ॥२९॥

हृद्गतस्य तव नाथ हृद्गतं
वेद्मि चानुदितमप्यहं सदा ।
क्षम्यतां प्रिय वदामि चेत् स्फुटं
यत् प्रियं तव ममाप्रियं हि तत् ॥३०॥

सर्व एव नरवीरमानिनः
स्वाभिमानमपहाय निस्त्रपम् ।
यापयन्ति हतजीवितं स्वकं
म्लेच्छराजपदकिंकरा इव ॥३१॥

क्षत्रियस्य च गुणः स्वभावजो
यस्त्वया निगदितो ममाऽधुना ।
हन्त हन्त हतभारतेऽधुना ।
क्षत्रिये क्वचन नावलोक्यते ॥३२॥

वन्दनीयचरणा जनाधिपाः
यन्मतं तव ममापि तत्तथा ।
किन्तु तेषु निजधर्मशत्रवः
नैव नैव मम ते तथा मताः ॥३३॥

राजलोचनकटाक्षवीक्षितं
धन्यमेव नरजीवनं यदि ।
हिन्दुराजपदमाप्य तावकः
पुत्र एव हि तथा करिष्यति ॥३४॥

लभ्यते नृपतिपाणिपल्लवं
संश्रितैर्यदिह भूतले जनैः ।
प्राप्तभूपतिपदस्य लभ्यतां
मत्सुतस्य शुभपाणिपल्लवे ॥३५॥

श्रेयसे नृपतिपादवन्दनम्
आत्थ यत् तदपि सम्मतं मम ।
मत्सुतस्य पदवन्दनं तथा
राजपीठमधितिष्ठतो भवेत् ॥३६॥

म्लेच्छभूमिभृदनुग्रहार्जितात्
वैभवादपि वरीयसी मम ।
आत्मबाहुबलमात्ररक्षिता
मानिनो वनसदः स्वतन्त्रता ॥३७॥

तां प्रकोपविततेद्धलोचनां
द्यामिवोष्णसमयार्कभास्वराम् ।
वह्निसम्भृतशमीलतोपमां
दर्शिवान् स पतिरास विस्मितः ॥३८॥

या मदर्थमतिविप्रियं निजं
सुप्रियं चिरममन्यत प्रिया ।
साऽधुना बत न साधु मन्यते
मद्वचस्तनयमङ्गलास्पदम् ॥३९॥

तत्पुनः किमुपदिश्यतामियं
ईषदुग्रवचनैर्मया प्रिया ।
चिन्तयन्निति निमीलितेक्षणः
वीक्षितः स हि शिवेन तत्क्षणम् ॥४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तातमामिलितलोचनं तथा
मातरं च तरुणारुणेक्षणाम् ,
वीक्ष्य विस्मयविकस्वरेक्षणः
स क्षणादुपगतः सुलक्षणः ।।४१।।

संनमय्य विनयेन मस्तकं
रत्नकुण्डलविशेषशोभितम् ।
चन्दनालिखितचारुचन्द्रकं
संजगाद स शुचिस्मितः शिवः ।।४२।।

अम्ब ! तात ! किमिदं स्थिताविह
मौनिनाविव रहस्युभावपि ।
किं विचिन्तयतमर्थमाकुलौ
ब्रूतमद्य मम किं करोमि वाम् ।।४३।।

मन्द्रमेदुररवोदितं रहः
पुत्रवाक्यममृतप्रसाददम् ।
संनिशम्य सहसैव तावुभौ
प्रापतुः प्रणयिनौ परां मुदम् ।।४४।।

उन्नमय्य चिबुकं सुतस्य च
प्राहतुः सपदि तावुभावपि ।
जीव ! जीव चिरमार्कतारकं
चिन्तितस्त्वमसि चेतसा यतः ।।४५।।

तं पिता पुनरुवाच सस्मितं
यामि राजनगरीं मनोहराम् ।
किं न वाञ्छसि निरीक्षितुं च तां
देवराजनगरीमिवोज्ज्वलाम् ।।४६।।

भान्ति यत्र सुमनश्चयोज्ज्वलाः
वाटिका विविधवल्लरीयुताः ।
तोययन्त्रसुसमुच्छलत्पयः
शीतलानिलविकीर्णरेणवः ।।४७।।

यत्र राजपुरुषा महाधनाः
सुप्रदीप्तनवरत्नमण्डनाः ।
तुङ्गचञ्चलतुरङ्गमस्थिताः
यान्ति सत्वरमितस्ततः पथा ।।४८।।

यत्र सन्ति मदमत्तदन्तिनः
क्लिन्नगण्डविवशीकृतालयाः ।
यैः स्वमन्थरगतैर्निरोधिताः
सम्भ्रमन्ति पथि चञ्चला हयाः ।।४९।।

मण्डलाकृति चमत्कृतिप्रदं
तत्र पश्यसि महालयं मुदा ।
यत्र मन्दमुदितं पदं ध्रुवं
श्रूयते पृथगिवाष्टधा जनैः ।।५०।।

तं तादृगुत्सुकमवेक्ष्य सुतं जिजापि
ह्यह्लाय विस्मृतवती प्रतिकूलभावम् ।
प्रायेण तत् प्रियतमं सुतवत्सलानां
पुत्रस्य यत् प्रियतरं परमप्रियस्य ।।५१।।

अयं महालयः 'गोलधुमट' 'गोलगुम्बज' इति वा नाम्ना सुप्रसिद्धः साम्प्रमपि विराजते विजापुरे ।

इति वर्णेकर कुलोत्पन्न-भास्करात्मज-श्रीधरकविविर-चिते शिवराज्योदये महाकाव्ये 'दम्पतीमतभेदो' नाम षष्ठः सर्गः समाप्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतुविलसितम् (खण्डकाव्यम्)

वर्षा विलासः

लेखक :– पण्डित श्री लक्ष्मीनारायणजी द्विवेदी, साहित्याचार्यः
व्याख्याकार :– डॉ॰ हरिदत्तपालीवाल 'निर्भयः', एम. ए. पी. एच. डी.

उपागमत्प्रक्षपयन्निदाघजं
रजः प्रतापं तटिनीमदार्धनः
महाधनो वारिधनो जनावनः
शिवाय वर्षासमयो मुदावहः ॥१॥

उपागमदिति-निदाघजं–ग्रीष्म जनितं रजः–प्रतापं; रजश्च प्रतापश्च तयोः समाहारोरजः–प्रतापं, रजो रेणुः ग्रीष्मे तद्बाहुल्यात्, प्रतापः, प्रतापः प्रकृष्टतापो ऽत्युष्णता, अन्यत्र रजोगुणस्वभाव ऐश्वर्यं च तदुभयं प्रक्षपयन् प्रशमयन् प्रोपसृष्टात्क्षैधातोर्णिच्यात्वे पुकि मित्त्वाद् 'मितां ह्रस्वः' इति ह्रस्वे शतृ प्रत्ययः क्षपिर्भोजोक्तो मित्सु पठितः। तटिनीमदार्धनः, तटिन्यो नद्यः 'तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी" इत्यमरः। तासां मदार्धनः, अर्धयति वर्धयतीत्यर्धनः, ऋधु वृद्धौ इत्यस्मान्नन्द्यादित्वाल्ल्युः। मदस्य चेतनधर्मत्वादचेतने तदन्वयसिद्धयं तटिनीषु नायिकात्वारोपः। तटिन्यो नितम्बिन्य इवेत्यतिदेशः, महाधनः महान्तो घना मेघा यस्मिन् सः, अन्यत्र महानतिशयितश्चासौ घनो दृढः, "घनं स्यात्कांस्यतालादि वाद्ये मध्यमनृत्ययोः। ना मुस्ताब्दौघदार्ढ्येषु विस्तारे लौहमुद्गरे" त्रिषु सान्द्रे दृढे च-इति मेदिनी धरः। जनावनः जनं लोकं प्रजां चावति पालयति वर्षणाद्धान्यादिनिष्पत्तिजलप्रापणादिभिः अन्यत्र विनयाधानरक्षणभरणादिभिः। वारिधनः, वारि जलमेव धनं यस्य सः, 'अन्यत्र निःसंकोचप्रदानीयत्वेन वारीव धनं यस्य सः इति धनवैपुल्यातिशयप्रदानाय वार्युपमा। मुदावहः, मुदं प्रसन्नतामावहति करोति जनयति चेति मुदावहः "मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः इत्यमरः। वर्षा-समयः शिवाय लोकमङ्गलाय आगमत् उपागतः। अत्र प्रस्तुतोपमेयवर्षासमयधर्मेणाप्रस्तुतोपमा न विजेतृराजधर्मस्य विशेषणबलादवगतेः समासोक्तिरलङ्कारः तदुक्तं सरस्वती—कण्ठाभरणे—'यत्रोपमानादेवैतदुपमानं प्रतीयते। अतिप्रसिद्धेस्तामाहुः समासोक्ति मनीषिणः" इति। परनिबर्हणस्वजनसंभावन-कोष संपच्छक्ति-प्रजापालनादीनि राजधर्मत्वेनोपक्षिप्तानि। वंशस्थवृत्तम्—जतौ तु वंशस्थमुदीरितं जरौ" इति ॥ ॥

दयावतः परक्लेशासहत्वमिति भावेनोपन्यस्यति-

शिलासु तप्तास्वनलैस्तपस्यतां
स्थिरासनं पञ्चभिरञ्चितात्मनाम्।
परामृतात्मा तदनल्पकष्टकृत्—
तपः शमं कर्तुमिवैति वारिदः ॥२॥

शिलास्विति—परामृतात्मा, परामृतं वर्षणम् "वर्षणं तु स्याद् गोघृतं च परामृतम्" इति पुरुषोत्तमः तदेवात्मा यस्य सः वर्षणात्मकः, अपि च परमुत्तमममृतं जल तदेवात्मा यस्य सः अथ च परब्रह्मैवामृतं मोक्षस्वरूपं तदेवात्मा यस्य सः, अन्यच्चामृतं मोक्ष एवात्मा यस्य सोऽमृतात्मा परः सर्वोपाधिविनिर्मुक्तत्वात्सर्वातिगः स चासावमृतात्मेति परामृतात्मा। वारिदो जलदः। तप्तासु घर्मतप्तासु शिलासु पञ्चभिरनलैरग्निभिः स्थिरासनं स्थिरमासनं यस्मिन् कर्मणि यथास्यात्तथा तपस्यतां तपश्चरतां "तपसः परस्मैपदं च"—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याचारे क्यङि परस्मैपदत्वेन शतृप्रत्ययः। अञ्चितात्मनाम् अञ्चितः पूजितोऽवगतश्चात्मा स्वभावो मनः प्रयत्नो बुद्धिर्ब्रह्म च येषां तेषां, "आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि। धृतावपि मनीषायां स्वभावब्रह्मणोरपि" इति मेदिनी। तदनल्पकष्टकृत्, अनल्पं भूरि कष्टं करोत्युत्पादयति तत्, क्विप्, यत्तपः तस्य शमं शमनं कर्तुमिव कर्तुकाम इव एति आयाति। उत्प्रेक्षा। अर्थान्तरेण मेघस्य परब्रह्मपरमेश्वररूपतया भक्तानां तपस्यतां मोक्षदानेन कष्टापहत्वं दयामयत्वं च ध्वनितम् ॥२॥

विशेषकम्

अमन्दधाराभिलक्ष्यबिन्दुभि—
निनादनिह्लीणकठोरदुन्दुभिः।
तडिल्लताताडितभूतलस्थलः
स्फुरन्महाचापधरोऽम्बुवाहकः॥३॥

अमन्देति—अलक्ष्यबिन्दुभिः, अलक्ष्या लक्षयितुमशक्या बिन्दवो यासुतास्ताभिः, "शकि लिङ् च" इति शक्यार्थे लक्षेर्यत्प्रत्ययः। अमन्दधाराभिः, अमन्दाः वेगवत्यो या धारास्ताभिरुपलक्षितः। निनादनिह्लीणकठोरदुन्दुभिः, दुन्दुभिशब्दोऽत्र दुन्दुभिघोषोपलक्षकः निनादेन गर्जितेन निह्लीणो-लज्जितः कठोर उत्कृष्टो दुन्दुभिर्दुन्दुभिर्निर्घोषो-यस्मात्सः 'नुद विदोन्दत्राघ्राह्लीभ्योऽन्यतरस्याम्" इति वा ह्रियो निष्ठानत्वम्। तडिल्लताताडितभूतलस्थलः, तडिल्लता इवेति तडिल्लता वेत्रभूतेति भावः तया ताडितं भूतलमेव स्थलं येन सः, स्फुरन्महाचापधरः. स्फुरन्नभिव्यक्तीभवन्प्रकाशमानो वा यश्चाप इन्द्रधनुस्तस्यधरः, धरतीति धरोधारकः अम्बुवाहक इत्यस्य तृतीयेन सम्बन्धः ॥३॥

किरन्निवोच्चैः शिखराणि भूभृतां
गिलन्निवोत्तुङ्गपतङ्गमानिताम्।
समानयञ्श्यामतया स्वयावनीः
प्रसादयँश्चातककेकिकोकिलान् ॥४॥

किरन्निति—भूभृतां पर्वतानामुच्चैरुन्नतानि शिखराणि किरन्निव क्षिपन्निव, पर्वतोपरिष्टाद् वारिदखण्डानां विशीर्यमाणत्वात् तान्यध्यारुह्य तत्र तेषां व्यायामव्यापारप्रवृत्तत्वाद्वा पर्वतशिखराणां विशरणकारित्वमुत्प्रेक्षितम्। उत्तुङ्गपतङ्गमानिताम् उत्तुङ्गोऽत्युन्नतो यः पतङ्गः सूर्यः, 'पतङ्गौ पक्षिसूर्यौ च इत्यमरः। तस्य मानिताऽऽत्मन उन्नतत्वप्रतापित्वाद्यभिमानः तां गिलन्निव, गिलति गलविलावतारणां करोति स गिलन्। चिरस्थिरोऽपि स्तब्धत्वपरपरितापकत्वाद्यभिमानः परविजिगीषुणा व्याहन्यत एवेति भावः। स्वया निजया श्यामतया वनीररण्यानि अवनीरिति वा च्छेदः, नानाभूमिप्रदेशान् इत्यर्थः, समानयन्, समानास्तुल्याः कुर्वन् तासामात्मसारूप्यं प्रतिपादयन्नित्यर्थः। प्रभावीपुरुषः सर्वत्र स्वगुणानाधत्त इति भावः। चातककेकिकोकिलान्, चातकाश्च केकिनश्च कोकिलाश्चेति द्वन्द्वः, वर्षासु कोकिला अपि "कुरु कुरु" इति "वृष्टि कुरु कुरु"—इत्यभिप्रायकमभीक्ष्णं स्पष्टमुद्घुष्यन्तीति तेषामपि नामोपादानं कृतम्। वसन्ते तु कलालापकरत्वेन नवागतत्वेन च कविभिः कोकिल उपवर्ण्यते एव, वर्षासु पुनरभि प्रायान्तराभ्युपगमेनोपादानस्य युक्तत्वमिति सम्प्रदाय विरोधो नाशङ्क्यः अति तृष्णत्वमेघ निबद्धाशावत्त्वादिना चातकस्याभ्यर्हितत्व माश्रित्य पूर्व निपातः। अल्पच्तरत्वात्केकि शब्दस्य पूर्व प्रयोगार्हत्व मिति चेदभ्यर्हितस्य सर्वथा पूर्व प्रयोगार्हत्व स्वीकारो वैयाकरणानाम्-इति "वासुदेवार्जुनाभ्यां वुन्" इति सूत्रे ज्ञाप्यते, केक्यपेक्षया चातकस्याभ्यर्हितत्वं कथमिति चेत्कवि विवक्षाधीन मेतदितिन्न मः। "विभाषा वृक्ष मृग०" इत्यादिना एकवद्भाव विकल्पेन बहुवचनम्। तान् चातकादीन् प्रसादयन् प्रमोदयन्। गर्वमाश्रितानां परेषां गर्वं स्वेषां च दुःखं मनस्वी न सहत इति भावः ॥५॥

क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निवेदनम्

लेखक :—श्रीराधाकृष्ण शास्त्री, 'सिद्धः' बाँदीकुई (राजस्थान)

संस्कृत-भाषा-रसिकाः मान्याः सर्वे विपश्चितः सदयाः ।
शृण्वन्तु वाक्यमेतत् "सङ्घे शक्तिः कलौ युगे" नियता ॥१॥

सम्भूय कार्यमस्मात् सर्वे कुर्वन्तु संस्कृतोन्नत्यै ।
येनैषा सुरवाणी विश्वमशेषं सुखान्वितं कुर्यात् ॥२॥

सामञ्जस्यं कार्यं पूर्वं सर्वत्र साधु सत्परीक्षाणाम् ।
येन विरोधाभासः पण्डितवर्गेषु न स्थितिं कुर्यात् ॥३॥

इङ्गलिशवर्गे सम्यक् सर्वपरीक्षासु विद्यते साम्यम् ।
एकत्र लब्धलक्ष्योऽप्यन्यस्यां गन्तुमर्हतां लभते ॥४॥

पाठ्यग्रन्थनिकाये कुर्वन्त्वेवम् सुसंग्रहं विबुधाः ।
ये नाल्पीयसि काले बोद्धा बोद्धव्यमाप्य सफलः स्यात् ॥५॥

नूतनतमविषयाणां सुरगिरि कार्यः प्रवेश इति सत्यम् ।
नो चेत् नैषा भाषा जीवितभाषासु सेत्स्यते भुवने ॥६॥

मात्सर्य-दोष-दुष्टां विचार धारामपास्य विबुधौघाः ।
कार्यं कार्यं मत्वा यदि कर्तारस्तदा शुभं भविता ॥७॥

कुमारेश
लिवर और पेट की बीमारियों में
सालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतज्ञान् प्रति

लेखक :–श्रीरामस्वरूपशास्त्री "अमर" तालबेहटस्थः

अयि सुरभारतीसमुपासकाः संस्कृतमर्मज्ञाः पण्डितवर्याः ! साम्प्रतं यादृशी दशाऽस्माकं वर्तते न तादृशी कस्याऽप्यन्यस्येति ? किमस्या दुर्दशायाः कारणम् ? अत्रभवन्तो भवन्त एतत्सर्वं जानन्त्येव ? किन्तु स्वदुःखदूरीकरणार्थमेव किञ्चिन्निवेदनमस्ति मदीयम्। आशाऽस्ति-यद् भवन्तोऽत्र भवन्तः स्वस्वविचारात् व्यक्तीकरिष्यन्तीति । यतः स्यात्सुरभारतीजुषां समुन्नतिः ।

(१)– नगरेषु ये संस्कृतज्ञास्ते तु ग्रामीणसंस्कृतपण्डितानां समुन्नतिमपि नाभिलषन्ति । यतस्तैः केवलं स्वकीयसमुन्नत्यर्थमेव प्रायः प्रयत्नाः क्रियन्ते । कथं स्यादेतद् भेदभावराहित्यम् ?

(२)-सर्वकारैः प्रायशः तेषामेव वार्ता श्रूयते ये सङ्घटितास्तथा सम्मिलिताः सन्तः स्वसङ्घे निवसन्ति । किन्तु समस्ते ऽपि भारते मया नावलोकिता एतादृशी संस्कृतज्ञानां समिति र्यादृशी आङ्ग्लभाषोच्चतर माध्यमिकविद्यालय शिक्षकाणामस्ति । अतः समस्तभारती संस्कृतज्ञानामेका तादृश्येव समितिः स्थापनीया । यया समित्या संस्कृतप्रचारार्थं प्रसारार्थं च सङ्घर्षं विधाय संस्कृतशिक्षकाणामुचितं वर्तनं कथं स्यादित्यस्योपरि विचारो भवेदिति ?

(३)-नागरिक संस्कृत विद्यालयानां महाविद्यालयानां यथा समुन्नतिर्वर्तते तथा ग्रामीणसंस्कृत विद्यालयानां कथं भवेदिति ?

(४)-पारस्परिकद्वेषदूरीकरणार्थं सदुपायाश्चिन्तनीयाः । यथा गौराङ्ग भाषापण्डिताः परस्परं प्रीतियुजो व्यवहारं कुर्वन्ति, तथैव परस्परं निर्भेदं संस्कृतज्ञा अपि व्यवहरेयुः इति ।

(५)-संस्कृतभाषाया एकं दैनिकं पत्रं निःसरेत् । यस्यप्रचारप्रसारकरणेप्रसिद्धा भारतीयाः संस्कृतज्ञाः स्वध्यानं दत्वा संलग्नाः स्युः । यतः संस्कृतस्य दैनिकपत्रस्य परमावश्यकताऽस्ति देवभाषायाः प्रचारार्थमिति ।

(६)-यथा हिन्दीमर्मज्ञैर्नेतृभिश्चापि समर्थिता समर्थ्यते च हिन्दी-भाषा तथैव विहाय प्रान्तीयताभेदं सर्वैरेव संस्कृत-पण्डितैर्महारथिभिश्चापि "संस्कृतभाषा भवेद्राष्ट्रभाषा" इति निश्चित्यान्दोलनं विधेयम् । शनैः शनैश्च संस्कृतभाषा विश्वस्मिन्नपि विश्वजने कथं प्रसरेदितिचिन्तनीयम् ।

(७)-दीनेभ्यः संस्कृतपण्डितेभ्यस्तेषां सन्तन्तिभ्यश्चापि पठनार्थं जीविका निर्वाहार्थञ्चैको ऽखिलभारतीयसंघो निर्मातव्यो यः संस्कृतसंस्कृतिसंरक्षणतत्परेभ्योनागरिकेभ्यो ग्रामीणेभ्योऽपि संस्कृतज्ञेभ्यस्तत्सन्ततिभ्यश्च सहायतां दद्यादिति ।

विश्वसिमि यदस्मिन् निवेदने विचारं करिष्यन्ति विद्वांस इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गतः डॉ० सी० कुञ्जनराजः

[मूललेखक :–के० श्रीमाधवकृष्णशर्ममहोदयः, सञ्चालकः संस्कृतशिक्षा, राजस्थानम्]
अनुवादको दीनानाथत्रिवेदी 'मधुपः' जयपुरम् ।

स्वर्गीयो डॉ० सी० कुञ्जनराजो नूनमस्याः शताब्द्याः सुमहान् प्राच्यविद्यायाः सुविशेषज्ञस्तथा गवेषकश्चासीत् । एतस्य निधनेन संस्कृत-संसारस्य कार्य-कालापे महत्येका क्षतिः समपद्यत, यस्याः पूर्तिरतिकठिना विद्यते ।

डॉ० कुञ्जनराजः केरलप्रान्तस्य कुननकुलम-नगरस्यैकस्मिन् विशिष्टे चिञ्जोर-परिवारे जनि लेभे । बाल्यावस्थायाञ्च प्राचीन-पद्धत्यनुसारेण संस्कृते तस्य शिक्षा-दीक्षा समजायत, कैशोरे वयसि स संस्कृतस्य विस्तृतमध्ययनञ्चकार । तदनन्तरञ्चा-ऽधुनिकशिक्षामधिगन्तुं प्रववृते । इण्टर-मीडियेट-परीक्षोत्तीर्णानन्तरं स मद्रासस्य प्रेसिडेन्सी-कॉलेजे-ऽध्ययनं कृतवान् । अत्र स संस्कृते बी. ए (आनर्स) परीक्षामुदतीतरत् । तस्य विद्यागुरुः स्वर्गीयो महा-महोपाध्यायो विद्यवाचस्पतिः कुलपतिः कुप्पुस्वामी शास्त्री आई. ई. ऐस बभूव । अथ महामहोपाध्या-यात्तस्मात् समधीत्यानन्तरमिंगलैण्डं गत्वा तथा आक्सफोर्डे च विशिष्टमध्ययनं विधाय तत्रैव वसता तेन महाभागेन वेदानां भाष्येषु टीकासु च शोधवि-षयकं कार्यं प्रारभ्यत । स जर्मनदेशमपि गतवान्, तथा यूरोपस्यानेकदेशेषु परिभ्रमणमपि कृतवान् । आक्सफोर्डतः स दर्शनविषये (डॉक्टर आफ फिलो-सफी) 'डॉक्टर' इत्युपाधिं लब्ध्वा भारतं प्रत्याग-तवान्, किञ्चित्कालं यावत् शान्तिनिकेतने चोषि-तवान् । डॉ० एनीबेसेन्टस्य समये मद्रासस्य थियो-साफिकलाभिधायाः संस्थायाः (सोसाइटी) विश्व-प्रसिद्धे अडियार-पुस्तकालये स कार्यमारेभे । तथा ऽस्य पुस्तकालयस्य प्रसिद्धपत्रस्य 'ब्रह्मविद्या' इत्या-ख्यस्य सम्पादनं तेनाऽक्रियत, यत्रानेके संस्कृतशोध-कार्यविषयका लेखाः प्रकाश्यन्ते स्म । अडियार-पुस्तकालय-सिरीजस्य सम्पादनं तेन कियन्त्यपि वर्षाणि यावत् कृतम् । अथ च स मद्रास-विश्वविद्या-लये संस्कृतविभागस्याध्यक्षः समभूत् । एतदीया-ध्यक्षपदमधितिष्ठन्नपि स अवकाशप्राप्तिपर्यन्तम् अडियार-पुस्तकालयेन सह स्वस्य सम्बन्धं यथापूर्व-मेव परिरक्षितवान् । तस्यैव कार्याणां फलमिदं यद् अडियार पुस्तकालय-सिरीजोऽद्यापि प्राच्यविद्यायाः प्रकाशनेषु सर्वापेक्षया महत्त्वपूर्णः परिगण्यते । मद्रास-विश्वविद्यालये च ततः प्रकाशितानामनेकेषां सुदुर्लभानां संस्कृतग्रन्थानां बहून्येव वर्षाणि यावत्स सम्पादनं कृतवान् ।

डॉ० कुञ्जनराजस्य निर्देशन एव मया पाणिनि-विषये शोधविषयकं कार्यं समनुष्ठितम्, तेनैव सम्पा-दितस्य नारायणभट्टस्य प्रक्रियासर्वस्वस्य तथा श्लोकवार्तिकस्य टीकायाः सम्पादनकार्ये सहयोग-प्रदानस्य सौभाग्यं समुपलब्धम् । तस्यैव तत्त्वाव-धाने च मया वैदिक-पाण्डुलिपीनां वर्णनात्मकं सूचीपत्रं (डिस्क्रिपटिब कैटलॉग) व्यरच्यत । तस्यैव नेतृत्वे च विश्वविद्यालयस्य संस्कृतविभागे सम्पूर्णसूचीपत्राणामेकस्य बृहत्सूचीपत्रस्य (केटो-लाग्स कैडीलोग्ररम) कार्यमहमकरवम् । एतद्धि डॉ० कुञ्जनराजस्यैकमतिमहत्त्वपूर्णं कार्यमासीत्, यत् नाद्यावधि परिपूर्णमभूत् ।

डॉ० कुञ्जनराजेन वेदानां भाष्येषु टीकासु च तथा तदितिवृत्तेषु सुमहान्ति कार्याण्यनुष्ठितानि । स हि ऋग्वेदस्य माधवटीकां- या सर्वप्राचीनतमा तथा ऽधुनाप्युपलब्धा वर्तते-सम्पादितवान् । वाक्य-पदीयस्य प्रणेतुः श्री भर्तृहरेस्तथ्यस्य कालस्य निर्ण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योऽपि तेनैव महाभागेन कृतः। महाकविकालिदासस्य ग्रन्थेष्वपि तेन सुमहदनुसन्धानं विहितम्। कुञ्जनराजस्य प्रमुखाऽभिरुचिरवर्तत-अप्रकाशितानां ग्रन्थानां प्रकाशने तथा वैदिकग्रन्थशोधकार्ये च। एतत्सम्बन्धे तेनानुष्ठितानि कार्याणि नूनं सर्वदैव स्मरणार्हाणि वर्तन्ते।

राजस्थानेऽपि शोधकार्याणि प्रोत्साहयितुमनेकवारं स अत्रागतवान्। तदीयैः प्रयत्नैश्च विक्रेयनीरस्य (बीकानेर) नूप-संस्कृत-पुस्तकालयोऽपि महत्त्वपूर्णशोधसंस्थाया रूपे पुनः संघटितः समपद्यत। स हि पुस्तकालयानां कृते बहूनि वर्षाणि सातत्येन कार्यमनुष्ठितवान्। अहं यदा विक्रेयनीरे अनूपसंस्कृतपुस्तकालयस्य पुरातत्त्वाध्यक्षस्य (क्यूरेटर तथा प्राच्यविद्याग्रन्थानां प्रकाशनस्य सञ्चालकस्य पदमधिरूढ आसम्, तदा डॉ० कुञ्जनराजस्य सहयोगेन मयाऽनेकानि सूचिपत्राणि (केटलॉग) प्रकाशितानि। मया तस्यैव महाभागस्य निर्देशानुसारेण गंगा-आरियण्टल-सिरीजस्यापि सम्पादनमाचरितम्। अस्माकं सहकार्यमिदं संभवतश्चतुर्दशवर्षाणि यावत् प्राचलत्। स एव च जयपुरे पुस्तकालयस्य (पोथीखाना) पाण्डुलिपीनामेकां सूचीं विरचितवान्। एतदतिरिक्तञ्च तेन राजस्थाने बहूनि स्थानानि दृष्टानि यत्र प्राचीनाः पाण्डुलिपयोऽविद्यन्त।

ततश्च मद्रास-विश्वविद्यालयतोऽवकाशप्राप्त्यनन्तरं तेहरान-विश्वविद्यालये संस्कृत विभागस्याध्यक्षपदमधिरूढवान् स कुञ्जनराजः। एवमान्ध्र-विश्वविद्यालयेऽपि किञ्चित्कालं यावत् प्राध्यापकपदमलङ्कृतवान्। ततोऽवकाशग्रहणानन्तरञ्च वृद्धावस्थायामपि तेन महाभागेनानेके महत्त्वपूर्णा लेखा अलिख्यन्त।

किञ्च अखिल-भारतीय-प्राच्यविद्यासम्मेलनस्य (आल इण्डिया आरियण्टल कान्फ्रेंस) एकस्मिन् विशिष्टेऽधिवेशने संसारस्य सर्वेऽपि प्राच्यविद्याया गवेषकाः सम्भूय प्राक्तरमहाभागाय तस्मै ससम्मानं स्मारकग्रन्थमेकं समर्पितवन्तः। डॉ० कुञ्जनराजेन कृतानां सर्वेषां कार्याणान्तु गणनैव भवितुं नार्हति। वस्तुतो वर्तमानेऽस्मिन् युगे गुणिनामेतादृक्षाणां विदुषां प्रादुर्भावोऽतिविरल एव विद्यते। एकोनविंशतितमशताब्द्याश्चान्ते कुञ्जनराजस्यैव शुभैः प्रयत्नै भारते विशिष्टस्यैकस्य संस्कृतसंसारस्य जातं जन्म, यत्र संस्कृतं प्रति प्रेरणा तथोत्साहः समजायत।

भारते द्विविधा हि विद्वांसः समुपलभ्यन्ते। तत्रैके तु सन्ति तादृक्षाः पण्डिता ये प्राचीनग्रन्थानां विशिष्टा विद्वांसो वर्तन्ते, अपरे च ते विद्यन्ते, ये खलु आधुनिक-शोध-कार्येषु प्राचीनग्रन्थानां सुविशदे तुलनात्मकेऽध्ययने कुशलास्तथा नव्यशैलीदक्षाश्च वर्तन्ते। एषु विशेषतया च महामहोपाध्यायः श्री कुप्पुस्वामी शास्त्री, म० म० हरिप्रसादशास्त्री, गणपतिशास्त्री, आर. जी. भण्डारकरः, शेषगिरिः शास्त्री, महादेवशास्त्री, डॉ० बी. एस. सूक्तांकरस्तथा च डॉ० मिश्राप्रभृतयश्चोल्लेखनोयाः सन्ति। एतेषामेव विदुषां श्रेणौ विद्यते डॉ० सी. कुञ्जनराजस्यापि विशिष्टमेकं स्थानम्।

इदमस्माकमतिदुर्भाग्यं वर्तते यदद्यास्माज्जगत आधुनिक-विचारशैलीनिपुणः शोधकार्य-प्रणेता डॉ० कुञ्जनराजो लोकान्तरं प्रस्थितः-इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरभारती

पिसुपाटि श्रीसीतारामशास्त्री भाषाप्रवीणः आन्ध्रपण्डितः, आदोनि

सर्वासु प्रापञ्चिकभाषासु गैर्वाणी भाषा अत्युत्तमा इति प्राच्यपाश्चात्यपण्डितप्रकाण्डैः प्रशंसिता नितराम्। आध्यात्मिकाधिदैविकाधिभौतिक-सांघिकराजकीयादिष्वङ्गेषु विद्यमानानामुन्नताशयानां परिज्ञानाय अत्यावश्यकी सकलदेशभाषामातृभूतेयं सुरभारती। व्याकरणादिशास्त्रैः सम्यक् कृता संस्कृता भाषा इति व्युत्पत्तिः।

अपौरुषेयाः, अनादयः, अनन्ताश्च ऋग्यजुः सामाथर्ववेदाः, तदर्थनिर्णयसाधनोपकृतानि शिक्षा-व्याकरणादिषडङ्गानि,-स्कन्द,-पद्म, ब्रह्माण्डाद्यष्टादशमहापुराणानि, मार्कण्डेयाद्युपपुराणानि; मनु-पाराशर-याज्ञवल्क्यादिस्मृतयः, भारतरामायणादीनीतिहासकाव्यानि, एतद्ग्रन्थसंबन्धीनि च बहूनि पुस्तकानि सन्ति। अन्यदेशभाषासु परिवर्तिता उत्तमग्रन्थाः अस्या एव संस्कृतभाषायाः। अन्यदेशीयैः अनूदिताः सम्यक् पठिताः, बहुधा श्लाधिताश्चाऽस्माकं सुरभारतीग्रन्थाः। तेषु कानिचित्पुस्तकनामान्युदाह्रियन्ते। भगवद्गीता, उपनिषदः, कालिदासमहाकवि--विरचितान्यभिज्ञानशाकुन्तल-मेघदूतादीनि, भट्टबाणरचिता कादम्बरी, कौटिल्यरचितम् अर्थशास्त्रम्, वेदाः, अङ्कगणितं, बीजगणितं, फलितगणितं च प्रथमतो गीर्वाणवाण्यामेवाऽविर्भूतमिति, कोल् डा० श्मार्गन्, के० जोरी ब्रुक् महाशयैः प्रमाणपुरस्सरं व्यक्तीकृतम्। शाजहानराजस्य पुत्रः दाराशिको नामधेयः गीर्वाणभाषातः पारशीकभाषायामुपनिषदः पण्डितैः परिवर्तयामास। अनूदितं पुस्तकमिदं "पारिस्" पत्तनं गतम्। "ड्रापरो" महाशयः वीक्ष्य तत् "लाटिन्" भाषायामनूद्य, तन्महोपदेशेन वैषयिकानन्दमग्नं जीवितं स्वकीयं परित्यज्य भारतीययतीश्वरोऽभूत्।

मास्टर बोयिसाहेब नामकः स्वीये "एडिम्बरो रेव्यू" इति पत्रे सुरवाचमेवमस्तौषीत्।" अधुनातनकाले भूमण्डलेस्मिन् संस्कृतभाषैव सभ्यभाषा। ग्रीक्, लाटिन्, जन्द् (पर्षियादेशप्राचीनभाषा) भाषाभ्यः समधिकभावप्रकाशिका, अपूर्वविज्ञानबोधिनीति'च। किंच अनेके विद्वांसः, पोकक्, मास्टर हिरिन्-डुबोमण्ये-फ्रेड्रिक-राधेनप्रभृतयः पाश्चात्या अपि नितरां विज्ञान-मूलकन्दं संस्कृतमिति अश्लाघिषत। विस्तरभिया पाश्चात्यप्रशंसासन्दर्भाद्विरमामि।

देवभाषावारांनिधेः आन्ध्रकर्णाटक - तमिल-मलयाल-हूण-जर्मनी-फार्शीत्यादिभाषाः कुल्या इव समुद्भूतास्संदृश्यन्ते। किञ्चित् भाषासादृश्यं दर्शयामि-संस्कृतम्-शर्करा, आन्ध्रम्-चक्केर, सं०-आकाशम्,-आं ..आकसमु, सं०--वङ्कचम् (कुटिलीकृतं काष्ठम्) आं...वङ्के। एवं सं...अन्नम्-कर्णाटकम्-अन्न, सं...पुस्तकम्-क० ..पुस्तक। सं...एकं, द्वे, त्रीणि, चत्वारि, पञ्च, हिन्दो-एक, दो तीन, चार, पांच। आंग्लम्-फादर, मदर, ब्रदर, मंकी। सं०-पिता, माता, भ्राता मर्कटः इति। सं-त्रयोदश-पालो-तेरस।" सं०—वत्सः—प्रा०—वच्छो। सं०—अक्षि पा—अच्छि। पाणिनीयव्याकरणेन समं संपूर्णं व्याकरणं कुत्राऽपि प्रपञ्चे न लक्ष्यते इति प्राच्यपाश्चात्यविमर्शकशिरोमणिभिः स्पष्टीकृतम्। एतादृशी देवभाषा जीवद्भाषा इति पुरा व्यवहृता। अधुना केचन स्थूलदृष्टयः वदन्ति यत् संस्कृतभाषा मृतभाषेति। अतोऽश्रद्धां विहाय विदधतु यत्नं संस्कृतभाषाध्ययने भारतीयविज्ञानसंस्कृतिरक्षणबद्धकङ्कणास्सहृदयाः। संस्कृतस्य समुचितं-गौरवं समादरञ्च प्रत्यानेतुं सत्वरं प्रयतन्तां संस्कृताभिमानिनः, यतः संस्कृतोद्धरणं संस्कृत्युद्धरणमेवः— इति श्रीः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डितराजाभिमतं काव्यलक्षणम्

[निबद्धा—रामगोपालशास्त्री—महाराजसंस्कृतकालेजः जयपुरम्]

पंक्त्यर्थमात्रबोधाय परीक्षार्थिहिताय च ।
जगन्नाथमतं काव्यलक्षणं प्रतिपाद्यते ॥

कवेः कर्म भावो वा काव्यम् । कविशब्दश्च कुङ्शब्दे (कवते श्लोकान् ग्रथते वर्णयति वा) यद्वा कु शब्दे (कौति) इत्यस्माद् धातोः "गुण-वचनब्राह्मणादिभ्यः कर्मणि ष्यञ्च" इति पाणिनि-सूत्रविहितेन "ष्यञ्" प्रत्ययेन व्युत्पाद्यते । अलङ्कारशास्त्रस्य मूलमग्निपुराणे विलोक्यते । तत्र "संक्षेपात् काव्यमिष्टार्थव्यवच्छिन्ना पदावली" इत्येवं निरूपिते काव्यलक्षणे शब्दस्य प्राधान्यं वर्तते । आचार्यो दण्ड्यपि काव्यादर्शे "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इत्यभि-धायाग्निपुराणोक्तमेव काव्यलक्षणमनुससार । ततः सर्वप्रथममाचार्यो भामहः "शब्दार्थौ सहितौ काव्यम्" इति तदनन्तरं रुद्रटोऽपि "ननु शब्दार्थौ काव्यम्" इत्युक्त्वा काव्यलक्षणे शब्दस्यार्थस्य चेत्युभयोरपि प्राधान्यमङ्गीचकार । तत्पश्चादन्येऽपि मम्मटान्ताः सर्वेऽप्याचार्या एतामेव सरणिमाश्रित्य काव्ये शब्दार्थयोः प्राधान्यं प्रतिपादयामासुः । अथ च पीयूषवर्षो जयदेवश्चन्द्रालोके विश्वनाथश्च साहित्यदर्पणे भूयोऽप्यग्निपुराणोक्तमेव काव्यस्य शब्दमुख्यत्वं प्रख्यापयामासतुः । तदनन्तरं पण्डित-राजस्य रसगङ्गाधरकारस्य समयः समायाति ।

अयं हि न केवलमिष्टार्थव्यवच्छिन्नां पदावलीं न वा शब्दार्थौ काव्यं मनुते अपि तु रमणीयार्थ-प्रतिपादकं शब्दं काव्यत्वेन स्वीकुरुते, अत एव "करोति कुतुकेन काव्यमीमांसाम्" इत्यादिना काव्यनिरूपणं प्रतिज्ञाय कीर्तिपरमाह्लादाद्यनेक-प्रयोजनकस्य काव्यस्य व्युत्पत्तेः (नैपुण्यलक्षण-तद्विशेषज्ञानस्य) काव्यकर्तुस्तद्रसास्वादयितुश्च नितरामपेक्षितत्वेन गुणालङ्काररसभावादिहेतु-भिर्विवेचनीये तस्मिन् (विशेष्य भूते काव्ये) विशेष्य-तावच्छेदकं (गुणालङ्कारादिविशेषणानां विशेष्यं यत् काव्यं तन्निष्ठाया विशेष्यताया अवच्छेदकम् अन्यूनानतिप्रसक्तधर्मरूपम् – अर्थात् काव्यत्वम्) तदितरभेदबुद्धौ च (काव्यं काव्येतरेभ्यो भिन्नं रमणीयार्थप्रतिपादकशब्दत्वाद्— इति भेदानु-मितौ)साधनं (हेतु भूतम्) तल्लक्षणं (काव्यलक्षणम्) तावदेवं निरूपयति—

"रमणीयार्थप्रतिपादकः शब्दः काव्यम्"

इति ।

रमणीयाः = लोकोत्तराह्लादजनक-भावना-विषयाः, ये अर्थाः = वाच्यलक्ष्यव्यङ्ग्यरूपाः, तत्प्रतिपादकः = तद्विषयबोधजनकः, शब्दः = सुप्तिङन्तरूपः, काव्यम्—इत्यर्थः । अस्मिन् लक्षणे कटाक्षादिवारणाय "शब्द" पदम्, व्यंगयादिसङ्ग्र-हाय "प्रतिपादक" पदम्, रमणीयशब्दप्रतिपादके व्याकरणादावतिव्याप्तिनिरासाय "अर्थ" पदम्, "घटमानय" इत्यादि वाक्य व्यावृत्तये "रमणीय" पदम्—इति प्रयोजनमेषां पदानामवगन्तव्यम् ।

यज्ज्ञानं लोकोत्तरम् (अलौकिकम्) आह्लादम् (आनन्दम्) जनयति, तस्य (ज्ञानस्य) गोचरः विषयीभूतः) योऽर्थः स एवात्र रमणीयपदेन विशिष्यते । लोकोत्तरत्वं च न सातिशयम्-व्यक्ति-भेदाद् रुचिभेदाद्वा भिन्नभिन्नेष्वानन्देषु लोकोत्तरत्व-सिद्धया अनवस्थापत्तेः । न वा निरतिशयम्—ब्रह्मानन्दातिरिक्तस्य ब्रह्मानन्दसहोदरस्यापि विषयसम्पृक्तस्य काव्यानन्दस्यासङ्ग्रहापत्तेः । अतो घटपटादिषु घटत्व-पटत्वादिवत् लोकोत्तरत्वमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दे "अयमानन्दो लोकोत्तारो लोकोत्तारः" एवं सहृदयैरनुभूयमानश्चमत्कारत्वापरपर्यायो जाति-विशेष एव । चमत्कारत्वापरपर्याय-लोकोत्तरत्व-जात्यवच्छिन्न आनन्दे पुनः पुनरनुसन्धानरूपो-धारावाहिकः सहृदयानां भावनाविशेष एवैतादृश-जातिविशेषकल्पनायाः कारणं वर्तते । "पुत्रस्ते जातः", "धनं ते दास्यामि" इति वाक्यार्थबोधजन्य आह्लादे तादृशः पुनः पुनरनुसन्धानरूपो धारावाहिको भावनाविशेषो न भवतीत्यतो हेतोर्नास्य लोकोत्तरत्वं येन काव्यत्वमतिप्रसज्येत । 'शब्दः काव्यम्' इति मूल एकत्वमविवक्षितम् । एवञ्च यच्छब्दार्थ-भावनया कश्चनाऽलौकिक आनन्दः प्राप्यते सैव शब्दानुपूर्वी काव्यमिति बोध्यम् ।

परिष्कृतं लक्षणं त्विदम—१. चमत्कारजनक-भावनाविषयार्थप्रतिपादकशब्दत्वं काव्यत्वम् । अस्यायमाशयः— चमत्कारजनिकाया भावनाया विषयभूतानामर्थानां प्रतिपादको यः शब्दस्तत्त्वं काव्यत्वम्" इति । अत्र ज्ञानपदं विहाय ज्ञानधारा-बोधकभावनापदसन्निवेशः समूहालम्बनविधया ज्ञाने भासमानेषु घटपटाद्युदासीनार्थबोधकेषु काव्यत्वातिप्रसक्तिनिरासाय कृतः ।

यत्र यत्किञ्चिच्चमत्कारजनकं ज्ञानं यदा यदा जायते तदा तदा समूहालम्बनविधयाऽन्यो घट पटाद्यर्थोऽपि भासत एव, भासितस्य च तस्यार्थस्य भावनाऽपि भवत्येव । एवं चमत्कारशून्ये तत्र तादृशार्थ-प्रतिपादक-वाक्ये जायमानाऽतिव्याप्ति-र्भावनापदनिवेशेनापि दुरुद्धरैव—इत्यरुचेर्द्वितीयं लक्षणं परिष्कुरुते—

२—यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम् । अस्याऽयमभिप्रायः— काव्यशब्दप्रतिपादितार्थविषयकभावनात्वं घटपटाद्युदासीनशब्दप्रतिपादितार्थविषयकभावनात्वं च भिन्नं भिन्नं भवति । तत्र चमत्कारजनकताया अवच्छेदकम् (अन्यूनानतिप्रसक्तधर्म-रूपम्) काव्यशब्दप्रतिपादितार्थविषयकभावनात्व-मेव भवितुमर्हति, नान्यदिति ।

यत्तत्पदघटितत्वेनाननुगततया (अनिश्चित-तया) काव्यपदशक्यतावच्छेदकस्य च गुरुशरीरतया काव्यलक्षणेऽस्मिन् गौरवं भवति—इत्यरुचेस्तृतीयं लक्षणमवतारयति—

३—स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादक-तासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति । अस्याऽयमाशयः—स्वेन (चमत्कारत्वेन) विशिष्टा (अवच्छिन्ना) या जनकता (चमत्कारत्वावच्छिन्न-जन्यतानिरूपिता कारणता) तस्या अवच्छेदकः (विषयितासम्बन्धावच्छिन्नोऽन्यूनानतिरिक्तवृत्ति धर्मरूपः) योऽर्थः (पुनःपुनरनुसन्धानरूपो धारा-वाहिको भावनाविशेषः) तस्य प्रतिपादकता संसर्गेण (प्रतिपाद्यप्रतिपादकभावसम्बन्धेन) चमत्कारत्ववत्त्वम्(चमत्कारत्वप्रकारतानिरूपितार्थ-प्रतिपादकशब्दविशेष्यकत्वम्) एव वा काव्यत्वमिति । अर्थात् स्वावच्छिन्नजन्यतानिरूपिता या जनकता तन्निरूपिता या विषयित्व-सम्बन्धावच्छिन्ना अवच्छेदकता तादृशावच्छेद-कतावदर्थप्रतिपादकतासम्बन्धेन चमत्कारत्व-विशिष्टत्वमेव काव्यत्वमिति निर्गलितोऽर्थः ।

अत्र हि संसर्गविधया भासमानानामचमत्कार कराणां तदर्थानामुपस्थितेः शाब्दबोधेऽनपेक्षणा-लाघवम्, यत्तच्छब्दविरहादननुगमाभावश्च व्यक्त-मवसीयते । स्वशब्दस्तूपात्तोऽपि वैशिष्ट्य घटकार्थो-पस्थापकत्वेनानुगतार्थक एवेति—अतो नात्र दोष-लेशः ।

"शयितासविधेऽप्यनीश्वरा०" इत्यत्र चमत्कार-जनिका या भावना (पुनः पुनरनुसन्धानात्मा) तस्या विषयीभूतो योऽर्थः (निष्कृष्टवाक्यार्थरूपः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्प्रतिपादकशब्दत्वस्य निरुक्तश्लोकपदेषु सत्त्वात् लक्षणसमन्वयः—इति दिक् ।

मम्मटाभिमत-काव्यलक्षण-मीमांसा

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इत्येतन्मम्मटाचार्यैर्निरुक्तं काव्यलक्षणमस्ति । अत्र हि काव्यस्य शब्दार्थोभयनिष्ठत्वं सगुणत्वं, सर्वत्र सालङ्कारत्वं क्वचित्त्वस्फुटालङ्कारवत्त्वं दोषराहित्यं चेति प्रतिपादितमेभिः । तदिदं न निर्दुष्टं काव्यलक्षणमिति विचार्यते—

काव्यस्य शब्दार्थोभयनिष्ठतायाः परीक्षणम्

१—"शब्दार्थौ काव्यम्" इत्यत्र काव्यत्वस्य शब्दार्थोभयनिष्ठतायां मानाभावः, शब्दैकनिष्ठतायां यथा "काव्यमुच्चैः पठ्यते","काव्यादर्थोऽवबुद्ध्यते" "काव्यं श्रुतमर्थो न ज्ञातः" इत्यादि व्यवहारः सुदृढं प्रमाणमस्ति न तथा शब्दार्थयुगलनिष्ठताया-मिति । अथ च कविकर्मताऽपि शब्द एव संभवति, अतः शब्द एव काव्यशरीरं वर्तते ।

२—"शब्दमात्रे जायमानोऽयं व्यवहारो लक्षणयाऽर्थेऽप्युपपादनीयः" इतिचेत्-स्यादप्येवम्-यदि काव्यशब्दशक्तेः शब्दार्थोभयनिष्ठतायां किमपि प्रबलं प्रमाणं दृश्येत-तदेव नास्ति, अतो बाधाद्यभावान्नात्र लक्षणाया अवकाशः ।

३—काव्यत्वस्य शब्दार्थोभयनिष्ठतायां शब्द एव प्रमाणमस्ति यतो हि भामहोद्भट-रुद्रटानन्दवर्धन-वामन-कुन्तक प्रभृतयः प्राचीनाचार्याः 'शब्दार्थौ सहितौ काव्यम्', "काव्यशब्दोऽयं गुणालङ्कार-संस्कृतयोः शब्दार्थयोर्वर्तते" इत्यादि-रूपेण काव्यत्वं शब्दार्थोभयनिष्ठमेव प्रत्यपादयन्—इति सुस्पष्टम्—इति चेत्—तदपि न मनोरमम् । भामहादिभ्योऽपि प्राचीनेऽग्निपुराणे निरूपितं "संक्षेपात्काव्यमिष्टार्थ-व्यवच्छिन्ना पदावली" इति, दण्डिना च काव्यादर्शे प्रतिपादितं "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली" इति काव्यलक्षणं काव्यत्वस्य शब्दनिष्ठतामेव निर्वक्ति । "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति सूत्रेण मीमांसितः पारदौर्बल्यनियम इवात्रापि पुराणाद्यपेक्षया भामहादीनां शब्देषु दुर्बलत्वं भामहाद्यपेक्षया च पुराणोक्ते काव्यलक्षणरूपे शब्दप्रमाणे प्रबलत्वं सुस्पष्टं वर्तते । एतदेव (अग्निपुराणोक्तिं काव्यत्वस्य शब्दनिष्ठत्वमेव) चास्माकमभिमतं सप्रमाणमस्त्येवेत्यादि मनसि निधाय पश्चाद्भवानां भामहादीनां शब्देषु च दुर्बलत्वादप्रमाणताबुद्धिं विधाय पण्डितराजोऽत्र स्वस्याऽरुचिं प्रदर्शयन् प्रत्यादिशति-"विमतवाक्यं त्वश्रद्धेयमेव" इति ।

४—ननु "आस्वादोद्बोधकत्वमेव काव्यत्वस्य प्रयोजकं तच्च यथा शब्दे तथाऽर्थेऽपि समानमेव वर्तते" इति चेत्तत्रोच्यते—रागादेस्तथा च नाट्याङ्गानां सर्वेषामपि प्रायशः रसाभिव्यञ्जकत्वम् आस्वादोद्बोधकत्वं वा सकलालङ्कारिकैः संमतम् । अतः प्रकृते रागादीनामपि लक्षणीयत्वस्य (लक्ष्यत्वस्य काव्यत्वस्य वा) आपत्तिः (प्राप्तिः) भविष्यति । अर्थाद् रसोद्बोधसमर्थस्यैवात्र लक्ष्यत्वमिति पक्षे लक्षणस्य रागादिष्वतिव्याप्तेर्नेदं समीचीनमिति ।

५—अपि च काव्यपदस्य प्रवृत्तिनिमित्तं (शक्यतावच्छेदकं "वाच्यवृत्तित्वे सति वाच्योपस्थितीय प्रकारताश्रयत्वं प्रवृत्तिनिमित्तत्वम्" इति तल्लक्षणस्यान्यत्राभिधानात्) शब्दार्थयोर्व्यासक्तम् (व्यासज्यवृत्त्या-एकमेवोभयं व्याप्य स्थितम्)? वा (विकल्पार्थकः) । प्रत्येकपर्याप्तम् (पर्याप्तिसम्बन्धेन प्रत्येकं शब्देऽर्थे च पृथक् पृथक् विद्यमानम्)? नाद्यः, यथा एको न द्वौ अर्थात् द्वित्वं द्वयोर्व्यासक्तमेव भवति । [अयमेकः अयमेकः इति मिलित्वैव द्वौ भवतः, अतो द्वित्वं सापेक्षतायां जायते] पृथक् (स्वातन्त्र्येण) वर्तमाने एकस्मिन् पदार्थे द्वित्वं व्यवहर्तुं न शक्यते, तथैव श्लोकवाक्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न काव्यम्–इति व्यवहारस्यापत्तिर्भविष्यति । न च द्वितीयः–एकस्मिन् काव्ये "शब्दकाव्यम्, अर्थकाव्यम्" इति काव्यद्वयव्यवहारापत्तेः । इत्यतो- हेतोः काव्यलक्षणस्य शब्दार्थोभयनिष्ठता न समीचीना ।

काव्यलक्षणे गुणालङ्कारनिवेशस्य सदोषता

१—"सगुणावनलङ्कृती पुनः क्वापि" इति लक्षणे विहितो गुणालङ्कारनिवेशोऽपि न युक्तः, "उदितं मण्डलं विधोः" इति काव्ये 'गतोऽस्तमर्कः" इत्यादौ च काव्यजीवितस्य चमत्कारित्वस्य सत्त्वेऽपि गुणालङ्कारविरहादव्याप्तिदोषापत्तेः ।

२—"उदितं मण्डलं विधोः" इत्यादि वाक्यं गुणालङ्काररहीनत्वात् काव्यमेव नास्तीत्यपि वक्तुं न शक्यते, काव्यतया पराभिमतस्य गुणालङ्कारसहितस्यापि तथा (अकाव्यमिति) वक्तुं शक्यत्वात् काव्यस्य जीवितसर्वस्वं चमत्कारित्वं तु सगुणालङ्कारे तद्रहिते वेत्युभयत्रापि समानमेव वर्तते । किञ्च गुणानामलङ्काराणाञ्च प्राचीननवीनमतभेदेनानियमाद् गुणत्वमलङ्कारत्वं चानुगतं न संभवतीति कथं तयोः (गुणालङ्कारयोः) काव्यलक्षणे प्रवेशः समुचितः स्यात् ?

३—गुणाः शौर्यादिवद् आत्मनः (काव्यात्मभूतस्य रसस्य) धर्माः, अलङ्काराश्च हारादिवच्छरीरस्योपस्कारकाः सन्ति, अत एवैतेषु शरीरघटकत्वं नोपपद्यते । अर्थात् काव्यलक्षणनिर्माणावसरे तु काव्यशरीरघटकत्वेन केवलं शब्दस्य, पराभिमते वा शब्दार्थयुगलस्यैव स्वरूपं निरूपणीयम्, आत्मधर्मत्वेन उपस्कारकत्वेन च गुणालङ्काराणां नियतत्वेऽपि काव्यशरीरघटकत्वाभावाल्लक्षणे सन्निवेशो नोपयुक्त इति ।

"अदोषौ" इति विशेषणस्य विचारः—

१—मम्मटाभिमते काव्यलक्षणे "अदोषौ" इति विशेषणमपि नोचितम्–"दुष्टं काव्यम्" इति व्यवहारे दोषयुक्तेऽपि काव्ये विशेष्यतावच्छेदकत्वेन काव्यपदप्रयोगदर्शनात् ।

२—"यादृशो गुम्फो दोषरहिते भवति, तादृश एवात्र दोषसहितेऽपि काव्ये वर्तते अतो गौण्या लक्षणया दुष्टेऽपि निर्दुष्ट इव काव्यपदप्रयोगो लाक्षणिकोऽवगन्तव्यः" इति चेत् एतदपि न रुचिरम्, मुख्यार्थबाधादिहेतुमन्तरा लक्षणाया अप्रसरात् ।

३—ननु वृक्ष एकांशेन विहङ्गमसंयोगी, अन्यांशेन च तत्संयोगाभाववान् यथा भवति, तथैव दोषरहिते काव्ये निर्दुष्टमिति, दोषसहिते च दुष्टमिति व्यवहारे किमपि बाधकं नास्तीति चेत्–तदपि न वाच्यम्, "मूले महीरुहो विहङ्गमसंयोगी न-शाखायाम्" इति प्रतीतेरिवात्र "इदं पद्यं पूर्वार्द्धे काव्यम्, उत्तरार्द्धे तु न काव्यम्" इति स्वारसिकस्य सर्वजनीनानुभवस्याभावात् । अर्थाद् यथा दृष्टान्तेऽव्याप्यवृत्तिताऽस्ति, न तथा काव्ये । काव्यत्वं तु तिलेषु तैलमिव व्याप्यवृत्ति भवति अतोंऽशतो भेदेन भिन्नस्वरूपो व्यवहारोऽत्र न सङ्गच्छते ।

विश्वनाथाभिमतकाव्यलक्षणपरीक्षा

१—"वाक्यं रसात्मकं काव्यम्" इति लक्षणे "रसवदेव काव्यम्" इति यन्निर्णीतं तदप्यव्याप्तिदोषदूषितमेव । यतो ह्येवं वस्त्वलङ्कारप्रधानानां काव्यानां रसवत्त्वाभावात्काव्यत्वमेव न भविष्यति ।

२—"रसवत्त्वाभावे काव्यत्वमपि नेष्टम्"—इति चेत् तदा तु सर्वोऽपि महाकवि-सम्प्रदायः समुच्छिन्नः सेत्यस्यति । यतो हि जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि कपिबालविलसितानि च कविभिर्वर्णितानि सन्ति । न च तत्र रसोऽस्ति । अत इयमिष्टापत्तिरप्यनिष्टायैवेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजतिलकजीवनस्य उच्चादर्शः

लेखिका :—श्रीमती कृष्णकान्ता गुप्ता, आचार्या, जयपुरम्

"स्वतन्त्रता अस्माकम् जन्मसिद्धो ऽधिकारोऽस्ति" एतत् वाक्यम् भारतीयस्वतन्त्रतासंग्रामस्य आधारभूतमासीत्। एतेषाम् अमरशब्दानाम् वक्ता लोकमान्यतिलको भारतदेशे अमरोऽभवत्। स गणितविद्यायाः विशेषज्ञः संस्कृतस्य च महाविद्वान् आसीत्।

यदा राजद्रोहापराधात् ब्रह्मदेशस्य मांडलेकारावासे षड्वर्षाणि यावत्कठोरदण्डम् अनुभवन् आसीत। तदा गीतारहस्यपुस्तकम् कारागारे एवा लिखत्। एतत् पुस्तकम् श्रेष्ठम् मन्यते संसारस्य विद्वद्भिः। गीतायाः प्रत्येकश्लोकः तेन स्वजीवने आचरणे प्रयुक्तः। पूनानगर्याम् तस्य धर्मपत्नी मृत्युमवाप्नोत्। तस्य पुत्रो मातुः मृत्युसमाचारम् तारिकया महाराजतिलकम् सूचितवान्। कारागारस्य आंगलप्रधानाधिकारी स्वयं शोकसंदेशम् गृहीत्वा महाराजतिलस्य कक्षम् गतवान्। लोकमान्यतिलकः तदानीं गीतायाः स्वाध्यायं कुर्वन् आसीत्। सः अधिकारीं पूर्वम् तम् आज्ञाम् अयाचत तत्पश्चात् क्रमभंगात् क्षमाम् प्रार्थयत शोकतारिकाम् च तस्मै ददौ। महात्मा तिलकस्तारिकामपठत् पठित्वा च ताम् फलके स्थापितवान् पुनश्च स्वाध्यायं कर्तुम् आरभत। आंगलाधिकारी महाराजतिलकस्य कोमलं शान्तम् मुखं च दृष्ट्वा विस्मितोऽभवत्। सः अब्रवीत्, "भगवन्। अहम् एकं प्रश्नम् प्रष्टुम् इच्छामि"।

महाराजतिलकोऽवदत्, "नूनं पृच्छ"। आंगलाधिकारी उवाच, "तारिकया सूचितम् यत् भवतः भार्या ह्यः स्वर्गं गता, परं तस्यै देव्यै शोकात् भवान् एकमप्यश्रु न अवाहयत्। महात्माऽवदत् "मया सर्वाणि अश्रूणि स्वमातृभूम्याः दुर्गत्याम् दुर्दशायाम् वाहितानि। पत्न्याः मृत्यौ एतयोः नेत्रयोः अश्रूणि समाप्तानि"।

विश्वस्य इतिहासे ईदृक् उच्चादर्शस्योदाहरणम् न लभ्यते। एतेनोच्चादर्शेण अयम् महापुरुषः न केवलं भारतवर्षे अपि तु सर्वसंसारे अमरोऽभूत्। महात्मनः तिलकस्य "गीतारहस्यम्" विश्वस्य सर्वासु भाषासु अनूदितम्। वयमपि स्वराष्ट्रोत्थानाय एतस्य महापूरुषस्य जीवनात् स्फूर्तिं ग्रहीतुम् समर्थाः।

३—"महाकविभिर्वर्णितेषु जलप्रवाहादिष्वपि यथाकथञ्चित्परम्परया रसस्पर्शोऽस्त्येव"–इति चेत, तदपि न वाच्यम्, ईदृशरसस्पर्शेन तु "गौश्चलति" "मृगो धावति" इत्यादिवाक्येष्वपि काव्यत्वमति प्रसज्येत, अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वात्। अतो नोपयुज्यते कथञ्चित परम्परया रसस्पर्शस्य काव्यप्रयोजकत्वमिति दिक्।

मूलाद् व्याख्याटिप्पणीभ्यां ग्रन्थेभ्योऽन्येभ्य एव च।
आवश्यकांशमुद्धृत्य लेखोऽयं पूरितोमया॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समानाधिकृतिर्धर्मेम नुष्यस्यास्ति नवा ?

ले० अभयशंकर जे० पुरोहित अहमदाबादः—९

धर्मः संस्कृतेः सभ्यतायाः मर्यादायाश्च प्रतीकः। धर्मः क्रीडायाः हास्यस्य च स्थानं नास्ति। मनुष्यत्वं सामान्यो धर्मः। तत्र च विशेषधर्मो ब्राह्मणत्व-क्षत्रियत्व-रूपः। तत्र मनुष्यत्ववान्मनुष्यो यदि गृह्य ते तदा तु सनातनधर्मेत्तराणां मध्ये यवन क्रिश्चिय-नादीनामपि अत्र प्रवेशोऽधिकारो वा निर्बाधःस्यात्। ते सनातनधर्मं नाङ्गी कुर्वन्ति। यत्र चातुर्वर्ण्य-चातुराश्रम्यमर्यादया सनातनधर्मानुयायिनःशूद्रस्या-पि द्विजातये तत्तत्कर्मणि अनधिकारस्तर्हि अन्येषा-मनधिकार एवमेव सिद्धः।

अत्र च जगति विलसन्ति बहवो धर्माः। हिन्दूधर्मः, (वैदिकधर्मः) यवन–बौद्ध-जैन-पारसीक- क्रिश्चियनानामपि धर्मः। तत्र तत्तद्धर्मा-नुयायिनां तस्मिन् तस्मिन् धर्मेऽधिकारो नान्यस्मिन् इत्येवं भगवता श्रीमता श्रीकृष्णचन्द्रेण प्रतिपादि-तम् "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" "स्वे स्वे कर्मण्यभिरतः संसिद्धि लभते नरः" इत्यादिभिर्वचनैः। एतेषु च सर्वेषु वैदिकधर्मस्यै-वेयं विशेषता यत् वैदिकधर्मातिरिक्तो धर्मो मनुष्यकर्तृकः, तत्तत्प्रवर्तकं प्रणीतः। परं वैदिक धर्मः सनातनः, अनादिरजन्मा विद्यते।

पशुषु मनुष्येषु-अपि-इयानेव भेदः "धर्मो हि तेषामधिको विशेषः धर्मेण हीनाः पशुभिःसमानाः"। संस्कृतेर्मूलमंत्रोऽपि धर्मो भवति।

धर्मस्य परिभाषा कृता मनुना–"धारणाद्धर्म-मित्याहुर्धर्मो धारयते प्रजाः"। महर्षिणा कणादेन गौतमेन च "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति व्याख्यातः।

केचन विवदन्ते यत् यथा ब्राह्मणस्य क्षत्त्रियस्य वा-अङ्गोपाङ्गानि समानानि तद्वत् शूद्रस्यापि तदितरधर्मावलम्बिनोऽपितदा कथन्न तेषामत्रा-धिकारः। परन्तु तदा वयं पृच्छामः-मातृभगिनी-भार्यादीनां अंगान्युपाङ्गानि समानानि तदा भार्यावत् मातृदुहितृभगिन्यादीनामपि कथं भार्यात्वे नाधिकारः। परमेवं न दृश्यते, तेनेदं ज्ञातव्यं भवति यत् तत्र स्त्रीत्वे रूपे साधारणधर्मे विद्यमानेऽपि मातृत्व–दुहितृत्व–भार्यात्वादिरूपो विशेषोऽपि धर्मो विद्यते, तद्वन्मनुष्येषु मनुष्यत्वरूपे साधारणधर्मे विद्यमानेऽपि ब्राह्मणत्व–क्षत्रियत्वादि-रूपो विशेषो धर्मो विद्यते इति। सत्य–ज्ञाना–हिंसा —स्तेय —रूपादि—सामान्यधर्मेष्वधिकारि-त्वेऽपि, भोज्याभोज्या–ध्ययनाध्यापन –याज्या-याज्यादिकर्मसु तेषां तेषामेवाधिकारित्वम्। यथा "स्नानं संध्या जपो होमः स्वाध्यायो देवतार्चनम्" इति ब्राह्मणस्य," "शौर्यं तेजो धृतिर्दाक्ष्य" मिति क्षत्त्रियस्य, "कृषिगोरक्षयवाणिज्यमि" ति वैश्यस्य, 'परिचर्यात्मकं कर्मेति कर्मपार्थक्यात् तत्तद्गतधर्मपार्थक्यमपि भवति–इति तत्र विशेष-लक्षणेषु कर्मवत्सु धर्मेषु मनुष्यमात्रस्य समानाधि-कृतिर्नास्ति।

यदि च नाम धर्मो नाम कर्तव्यमित्यर्थः अभि-प्रेयते तर्हि कर्तव्येषु मनुष्यमात्रस्य समानाधिकारः, परन्तु तत्रापि कर्तव्यानि द्विविधानि भवन्ति १ सामान्यानि २ विशेषाणि च। तत्र सत्य–ज्ञाना-हिंसादिषु चातुर्वर्ण्यस्य किं यवनक्रिश्चीयनादीना-मपि अधिकारः परन्तु यानि विशेषाणि प्राकृतिकानि जन्मसिद्धानि तानि तैस्तैरेव साध्यानि।

चातुर्वर्ण्यं चातुराश्रम्यं च सनातनधर्मस्य विशेषता। तेन काचन निन्द्यता न समायाति न वा कापि सङ्कीर्णता सङ्कुचितता वा। विद्याजीविनो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणाः, पराक्रमशालिनःसमाजरक्षकाः क्षत्रियाः कृषिकर्मादिना देशसमृद्धिकर्तारो वैश्याः, वर्णत्रयीसेवाकर्त्तारश्च शूद्राः इति वर्तन्ते। तन्न यादृशमन्येषां स्थानं तादृशं शूद्राणामपि।

आधुनिकाः पाश्चात्यशिक्षादीक्षितान्तःकरणाः निन्दति केचन वर्णव्यवस्थाम्। परिहसन्ति च किमनया व्यर्थया वर्णव्यवस्थयेति। परन्तु रे मदान्धाः समवलोकयन्तु भवन्तः यत् पाश्चात्यदेशेषु अपि ग्रीकतत्त्वविदा प्लेटो नाम्ना विदुषा वर्णव्यवस्थायाः आवश्यकत्वं भणितम् प्रकारान्तेरण वर्णविभागस्तेष्वपि स्वीकृत अस्ति। अतोऽयमत्र च निष्कर्षो यत् वर्णव्यवस्था वैज्ञानिकभित्तौ अवलम्बितासीत्, अस्ति-भविष्यति च। कथमस्माकमिव वर्णभेदो देशान्तरेषु न विद्यते? यत्र-अस्माभिर्जाति Cast नाम्ना व्यवह्रियते तर्हि तदनुगामिभिः रूसदेशसमुद्भवैः Class क्लासेति नाम्ना व्यवहारः प्रचाल्यते।

ये विशेषधर्माः, तेषु न लन्दनवासिनां न वा-अन्येषां वा यवनानामधिकारः। समाने अवयवसंस्थाने विद्यमानेऽपि तत्तद्गतरक्तभेदत्वात्। अतो न समानाधिकृतिर्धर्मे सर्वेषाम्।

यथा वा देशनेता को भवितुमर्हति? तत्तद्देशीयो भारतीयोऽपि। परन्तु तत्रापि विशेषो धर्मो लोकप्रियत्वरूपो धर्मो भवति, स देशनेता भवितुमर्हति। तद्वदेव सत्यादिष्वपि समानेऽधिकारे विद्यमानेऽपि ब्राह्मणक्षत्रिययोः वैश्यशूद्रयोश्च भेदो वर्तते इति न समानाधिकृतिः।

न धर्ममन्तरा कस्यापि रक्षा भवितुमर्हति। तत्र यो मनुष्यधर्मः स पशूनां नास्ति। यश्च पशूनां पक्षिणामन्यः। यस्य मांसभक्षणत्वरूपेण धर्मेण जीवनं तत्र जलचरस्य जलेन जीवनम्।

यथा वा कस्यचन विद्यार्थिनः परीक्षार्थित्वे समाने विद्यमानेऽपि रीक्षोत्तीर्णतोपायो भिन्नो भिन्नो भवति, तद्वत् पुरुषस्यापि तादृशः अन्यः अन्यो धर्मः विद्यते इति भिन्ना एव अधिकाराः।

यथा वा नैकेन शस्त्रेण सर्वरक्षा सम्पादयितुं शक्यते, तद्वत् नैकेन धर्मेण सर्वेषां परिरक्षणं कर्तुं शक्यते, तद्वत् अन्येषामपि धर्माणामावश्यकता वर्तते इति न समानाधिकारः।

यथा वा अन्यस्मै अधिकारे प्रदत्तेऽपि किं रासभः गौर्भवति, रासभः गौर्न भवति। निर्दुग्धापि गौः पूज्या न च दुग्धवत्यपि रासभी। तस्मात् शूद्रः शूद्रधर्मं पालयतु, वैश्यो वैश्यधर्मं, क्षत्रियश्च स्वधर्मम्, किन्तु न सर्वेषां तत्र ब्राह्मणधर्मेऽधिकारो, न वा ब्राह्मणानां क्षत्रियधर्मे समानाधिकृतिरिति न सर्वेषां समानाधिकारः धर्मे। इत्यलम्।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चाऽप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री 'जवाहर'-शोक-षोडशी

ले० :– जगन्नाथवासिष्ठः, साम्बा (जम्मूकाश्मीरम्)

ऐश्वर्यशालिनि कुलेऽधिगतप्रसूतिः
संलालितो नृपकुमार इवातियत्नैः ।
निःशेषवैभवसुखन्तु निजेच्छया यः
क्लेशं विनैव विजहौ जनता-हिताय ॥१॥

बालोप्यहो प्रकटयन्निजलेखशक्ति
भव्यां जहार जनकस्य हि लेखनीं यः ।
पश्चान्महामहिमलेखकसंघमध्ये
प्रख्यातकीर्तिरभवत्किल भारतीयः ॥२॥

पारेसमुद्रमगमच्च कृतप्रयत्नो
विद्यामवाप्य महतीं धनराशिलभ्याम् ।
स्वार्थाय नैव विनियोजयदप्रमत्तः
सम्यक्तया जनिभुवो निगडञ्चकर्त ॥३॥

कारासु येन निजदेशविमुक्तिहेतोर्
वासो व्यधायि बहुधा व्यथितान्तरेण ।
हा ! हा ! प्रियां भरत भूमिमपास्य धीरो
यातो दिवं स हि जवाहरलालवीरः॥४॥

स्वस्थे वयस्यतिमताकमलावियोगाद्
दूनो ह्यनूननिज-राष्ट्रविमोक्षणैषी ।
नैच्छत्पुनः परिणयं मुहुरर्थितोऽपि
पुत्रैषणां समपहाय महामनस्वी ॥५॥

आद्यः प्रधानसचिवः खलु भारतस्य
योऽद्योदितस्य परबन्धनमोचितस्य ।
आकर्ण्य कर्णकटु तन्निधनं न कस्य
दूनं मनः सहृदयस्य परं नरस्य ॥६॥

भासाऽखिले जगति भास्कर-भा-समानं
तं विश्वपुरुषममुं ननु भारतोत्थम् ।
निम्लोचमानमवलोक्य वियोगवेगात्
साद्रिश्चचाल वसुधा गगनं रुरोद ॥७॥

मान्यो महामहिम एष समस्तराष्ट्र—
संघध्वजो, नमति यं शिरसाऽवनम्रः ।
यातो विहाय धरणीमतिमानवोऽयं
हा ! हन्त ! हन्त ! वर-भारत-देश-रत्नम् ॥८॥

यस्य प्रकाशमतुलं विततञ्जगत्यां
पन्थानमादिशति सङ्गरजान्धकारे ।
शान्तः स हन्त ! सहसा जगदेकबन्धुः
स्तम्भो महानमितशान्तिमयः प्रभावान् ॥९॥

सत्पञ्चशीलकमथाऽपि तटस्थनीतिः
स्वातन्त्र्यमुत्तमतमं तदु लोकतन्त्रम् ।
भूसम्प्रदायनिचये निरपेक्ष्यभावः
शुद्धस्तथैव निज-राष्ट्र-समाजवादः ॥१०॥

एतानि राष्ट्रमनुजस्य हि यस्य पाद—
चिन्हानि, सन्ति प्रथितानि च पावनानि ।
सोऽद्योदयप्रगत–भारत-भाग्य-धाता
यातो दिवं बत ! धराऽभवदुग्रतापा ॥११॥

गांधी महात्मवरदर्शितमार्ग-गामी
गांधीमहात्मवर-कामित-काम-कामी ।
गांधीमहात्मवर-मानस-राजहंसो
लुप्तोऽभवद् भरत-भूमि–शिरोऽवतंसः॥१२॥

हा ! हा ! विधे न तव चेतसि किं दयास्ति
किं वाऽश्मसाररचितोऽसि समस्त एव ।
भूमण्डलैकदयितं खलु शान्तिदूतं
श्रीनेहरूं नरहरिं यदपाहरस्त्वम् ॥१३॥

बालाभं विमलं मनो मतिमतो यस्याऽभवज्जीवने
उत्साहो युवकैः समस्तु सुमहन्निर्माणकार्येष्वहो !
नीतीनां परिचिन्तने सुगहने वृद्धो विशुद्धात्मधी–
रेकोयञ्जगति त्रिमूर्तिमहितामेवन्दधारात्मनि ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व-शान्ति-समस्या

शाश्वतिकी शान्तिः स्वप्न एव

लेखकः—शारदाशंकरः पाण्डेयः

दार्शनिकः सीसैरोऽकथयत् "न्याय्ययुद्धापेक्षयाऽहमन्याय्यां शान्तिमुत्तमाम्मन्ये" इति स्वभाग्यदुर्दैवतः मानवः अधुनैव भयावहां युद्धविभीषिकामन्वभवत्—तृतीयविश्वसंग्राम — सम्भावनया च भृशम् भयमापन्नश्चेदानीमपि अनुमीयते चानेन शाश्वतिकी शान्तिः केवलं स्वप्नमात्रमेव ।

आङ्गलदेशीयः कविशिरोमणिः दार्शनिकः वर्डसवर्थाभिधः मानवानां दयनीयां दशामवलोक्य एकां सूक्तिमाह "मानवैरेव मानवः कां शोचनीयां दशां नीतः इति महदद्भुतम्" तदानीं विपुलधनपतिभिः यन्त्रकलार्जनपरैश्च मुहुर्मुहुः समालोचनया स हास्यास्पदं नीतः । परं ते अस्मिन् वाक्ये तत्त्वरूपेण निहतं रहस्यम् अधिगन्तुन्नाशक्नुवन् । ते च शान्तिस्थापनेच्छया निरन्तरं शिल्पविद्यया नानाविष्कारैः अग्रेसराः समभवन् । परं परिणामतस्ते शस्त्रास्त्रैः यन्त्रकलादिभिश्चायोजितं संहारकारियुद्धं निवारयितुं कथमपि न शेकुः । युद्धमेव शान्त्युपायम् मन्यमानाः पाश्चात्यदेशीया मदावेशेन भृशम् युद्धसन्नद्धाः समजायन्त । युयुत्सव एव शस्त्रास्त्रनिर्माणे रताः दृश्यन्ते । कवयः क्रान्तदर्शिनो भवन्तीति तस्य वचनं प्रत्यक्षमेव तथ्यं सञ्जातम् । सभ्यताशिखरमारूढाः पाश्चात्यदेशीयाः युद्धाभिनिवेशग्रस्ताः पक्षविपक्षेषु विभक्ताः सततं संयस्तधियः प्रतीयन्ते ।

पाश्चात्यदेशेषु प्रथमं संहारकारियुद्धं अकारणमेव चतुर्दशोत्तरैकोनविंशतितमे ईशवीयाब्दे प्रावर्तत । तत्र च यद् यद् मानवविध्वंसकारकं भयावहं कर्म तत्तद् देशीयैः अनुष्ठितन्तत् अभिव्यक्तमेव सर्वेषाम् । मानवः स्वजातीयान् मानवानेव संहर्तुं कृतसंकल्पः तदा मानवकर्मसीमां समुल्लंघ्य साक्षात् हिंस्रपशुतामेवापेदे ।

सर्वदेशीयैः कविभिः दार्शनिकैः विद्वद्भिश्च सम्भूय शाश्वतिकी शान्तिः कथं प्रवर्तिता भवेदिति कमपि उपायमन्वेषमाणाः क्षुब्धचेतसः समभवन् । जनाश्च इतस्ततः शान्तिस्थापनार्थमनेकाः सभाः संसदश्चायोजयामासुः । केवलं विंशतिवर्षपर्य्यन्तमेव योरोपीयजनाः सर्वदेशीयशान्तिपरिषत्साहाय्येन शान्तिमन्वभवन् । तत्पश्चात् सहसैव शान्तिपरिषद् विमृष्टिमवाप । योरोपदेशेषु च भृशमपि

दान्तो दार्शनिकः प्रथामुपगतो विज्ञान-विद्यानिधिर्
मूर्धन्यो भुवि राजनीतिविदुषां मध्ये जगद्वत्सलः ।
विज्ञानामितिवृत्तलेखनविदामग्रेसरो यः सदा
हा ! कष्टं सहसाऽपहाय जनतामाक्रन्दमानां गतः ॥१५

स्वातन्त्र्यप्रधने प्रचण्डमहसा प्लुष्टाः परादुद्रुवुर्
यस्याहो परिपन्थिनो भरत-भू-बन्धे-धृतोग्रव्रताः ।
सोऽयं युद्धनिरोधको गिरिवरः शान्त्यग्रदूतोऽधुना
लोकानां प्रियकृत्क्षणादुपरतः सम्राडशोको महान् ॥१६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महता प्राबल्येन पाश्चात्यदेशेषु पाश्चात्यनभोमण्डलं युद्धमेघैराच्छादितमभवत् । शान्तिश्च पुनरपि भूमण्डले युद्धतरङ्गभङ्गैः सन्देहदोलामधिरूढ़ा समजात । शाश्वतिकशान्तिभावनाऽपि मानवानां तत्तदेशीयै र्भग्नावशेषतां नीता । आङ्गलदेशस्य प्रधान सचिवः चैम्बरलेनः पातालदेशस्य प्रधानः रूजवेल्टाभिधः, महात्मा गांधी च जनरक्तपातकं महासंग्रामं निवारयितुं पौनःपुन्येन प्रायतन्त, परं ते स्वभागीरथप्रयत्नेनापि असफलिव समभवन् ।

हरहिटलराभिधश्च शार्मण्यदेशस्य प्रधानसचिवतामवाप्य तदैव महायुद्धघोषणां व्यदधात् । यच्च सर्वदेशेषु दावदहनमिव प्रसृतम् अभवत् । भारतीयानां कांग्रेस-परिषच्च जनविध्वंसकारि भयावहं युद्धं निवारयितुं प्राणपणेन प्रयत्नमारभत, परं वृटिसशाक्षकैः बलपूर्वकं तेषां प्रयत्नः विफलीकृतः ।

तद्द्वितीयो महाहवस्तु जनानां समूलच्छेदनायैव भयावहैः विध्वंसकारिभिः शास्त्रास्त्रैर्यन्त्रैश्चायोजितः सन् प्रवर्तित आसीत् । तस्मिन् हि आहवे निरपराधिनः पौराः नागरिकाश्च वायुयानैः जलपोतैः विध्वंसकैरन्यैर्विध्वंसकारिभिः आयुधैश्च केवलं कथावशेषतां नीताः । पातालदेशीयाः च अणुबम्बप्रयोगेण च नागा–साकी–हिरोशिमादिव्यापारकेन्द्रभूतानां नगराणां समूलघातं विनाशं व्यदधुः, तदैव च शान्ति स्थापिकाया यू० एन० जो० नाम्न्याः शान्तिपरिषद आयोजनं समजायत ।

लोकास्तु महाहवसन्तापतापेन अतितरां क्षुब्धाः सन्तः शान्तिमन्वेषमाणाः इतस्ततः अवलोकयितुं प्रारभन्त । तस्मिन्नेवान्तरे कोरियाप्रान्तेषु संग्रामस्य कोलाहलः समजायत । अयन्तु यू० एन० ओ० परिषदा स्वमेव छद्मनोत्पादितः प्रकाण्डताण्डव आसीत् । शान्तिदूती यू० एन० ओ० तरिषद् अत्र "रक्षका एव भक्षका" इत्येवं कथानकमनुसरन्ती प्राकटयत् । शान्तिश्च पुनरपि स्वप्न इव प्रतीयमाना समभवत् । परं भारतदेशस्य प्रधानमन्त्रिश्री-नेहरुसाहाय्येन पुनरपि तत्र शान्तिः स्थापिता बभूव ।

भयङ्करैं विध्वंसकारिभिर्युद्धैः कदापि कस्यापि जयो न भवति । विजिगीषवः, युयुत्सवः, अन्यान् देशान् जिघृक्षवश्च सर्वदैव कुटिलमतयो वैडालवृत्तिकाः सर्वाभिसन्धका हिंस्रा एव भवन्ति । ते च सर्वान् परिभूय स्वात्मानमेव उन्नेतुमभीप्सन्ति मिल्टनाभिधः कश्चित् प्रसिद्धः कविः कमपि विजिगीषुं क्राम्वेलनामानं राजानमाह "शान्त्या एव मानवः समुत्कृष्टं जयमाप्नोति, युद्धापेक्षया शान्तिरेव गरीयसी" इति ।

वस्तुतः यावत् कालपर्यन्तं विक्रान्ता बलवन्तश्च निर्बलान् आत्मसात् कर्तुं समुत्सुकाः तावत् जगति शान्तिस्थापनं स्वप्नमात्रमेव । पण्डिता विजयलक्ष्मीः एकदा अकथयत् 'शान्तिः स्वातन्त्र्यञ्च द्वावपि पर्यायवाचकौ शब्दौ, न ह्येकेन विना द्वितीयस्यास्तित्वं भवितुमर्हति । वस्तुतः यदा कश्चिदपरं देशं आक्रम्य तं पादाक्रान्तं कर्तुकामो भवति तदैव मनुष्येषु युध्दप्रवृत्तिर्जागृता संजायते, सर्वतः क्रान्तिरेव समुदिता भवति । सर्वेऽपि जनाः सर्वैः सह स्वसमानतामिच्छन्ति । कैश्चिदुन्मत्तैनिवारितः पराभूतश्च कलहौत्सुकः वितण्डापूर्वकं युद्धमेवारभते । अतः सत्यमेवोक्तम् "शाश्वतिकी शांतिः स्वप्न एव ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दोष वायरिंग के लिये,...

ग्लास्टर केबल आधुनिक प्रणाली से और ब्रिटिश इनसुलेटेड कैलेण्डर्स केबल्स लिमिटेड के तकनीकी सहयोग के साथ ब्रिटिश और भारतीय स्टैंडर्ड स्पेसीफिकेशन्स के अनुसार बनते हैं। भारत सरकार के डाइरेक्टर आफ इंस्पेक्शन, डी० जी० एस० एण्ड डी० के द्वारा इनकी जाँच होकर सर्टिफिकेट मिला है। ग्लास्टर केबल की हर रील पर आई० एस० आई० सर्टिफिकेशन मार्क नं ४३४ की मुहर लगी है जो उत्कर्ष के हिसाब से आपकी गारंटी है।



Alyars.FG155

फोर्ट ग्लास्टर इण्डस्ट्रीज लि०

१४, नेताजी सुभाष रोड, कलकत्ता-१

शाखायें : • एम० ७१, कनाट सर्कस, नई दिल्ली-१

• बुद्धमार्ग, पटना-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टादशः स्वाधीनतायाः सुदिवसः

अनेकशतवर्षेभ्य आगतं दास्यमपास्यास्माकं राष्ट्रमिदं विगत-सप्तदशवर्षेभ्यः प्राग् अगस्तमासस्य १५ तारिकायां स्वातन्त्र्यमाप्तवत्। अद्यास्य श्रावणस्य शुक्लपक्षस्याष्टम्याः शुभवेलायां भारतवासिनो वयं प्राप्तस्वातन्त्र्यस्याष्टादशवर्षस्य अभिनवं दिनं समभिनन्दामः। अस्माकं देशेऽद्यान्तस्तो बाह्यतश्चानेका बाधा मुखानि व्यादाय सन्ति समुपस्थिताः। ताः सर्वा अपि बाधा दूरीकर्तुं चतुश्चत्वारिंशत्कोटिमिता भारतवासिनो वयं सम्भूय प्रयतिष्यामहे, तर्हि निश्चितमेव सर्वत्र विजयं लब्ध्वा वयं निजमातृभूमेः पुरातनं गौरवं यथापूर्वं, संरक्ष्य विश्वस्य भिन्न-भिन्न-समुन्नतराष्ट्राणां मालिकायां देशमिमं समुपस्थापयितुं शक्ष्यामः। जगतः पितरं श्रीपरमात्मानमेतदेव प्रार्थयामहे यत् स कृपयाऽस्माकं देशस्य जनताशासकोपदेशक-नेतृवर्गाणां कृते एतादृशीं सद्बुद्धि कार्यक्षमञ्च सामर्थ्यं दद्यात्, यतोऽस्माकं देशो गौरवमवाप्तुं प्रतिदिनमग्रेसरो भूयात् इति।

अस्मिन् शुभेऽवसरे चास्माकं राष्ट्रपतिमहोदयेन, प्रधानमन्त्रिणा तथा गृहमन्त्रिणा, डॉ० सम्पूर्णानन्द-राज्यपालमहोदयेनैवं राजस्थानस्य मुख्यमन्त्रिप्रभृतिभिश्चये संकेताःकृताः, तेऽस्माभिर्नूनं विचारणीयाः पुनः पुनश्चाभिमन्तव्याः सन्ति। 'भारती' पाठका अपि अवगतार्था भवेयुरिति कृत्वा तेषां संक्षिप्तोंऽशः समुपस्थाप्यते।

श्रीराष्ट्रपति-सन्देशः

स्वाधीनतादिवसे राष्ट्रार्थं प्रसारिते सन्देशे राष्ट्रपतिः डॉ० श्रीराधाकृष्णन्महाभागोऽभाषत यन्महर्घतायाः समुपस्थिताया अस्याः कठिनायाः समस्यायाः समाधानं सर्वैरपि सोद्योगैः सम्भूय

आजादी खतरे में है, हमें अपनी पूरी ताकत से इसकी रक्षा करनी है।

श्री जवाहरलाल नेहरु

आज हमें महात्मा गांधी, पं० जवाहरलाल नेहरु तथा उन समस्त निस्वार्थ देशभक्तों तथा अनगिनती पुरुषों एवं स्त्रियों के प्रति अपनी श्रद्धाञ्जलि अर्पित करनी चाहिये जिन्होंने स्वराज्य की प्राप्ति के लिए मूक बलिदान किये हैं।

डा० सम्पूर्णानन्द,
राज्यपाल, राजस्थान,

हमें आज पुनः अपनी प्रतिज्ञा दुहरानी है कि हम अपनी राष्ट्रीय एकता को अक्षुण्ण रखेंगे और स्वतन्त्रता की रक्षा हेतु बड़े से बड़ा बलिदान तथा राष्ट्र के विकास हेतु कठिन से कठिन परिश्रम करने को सदैव कटिबद्ध रहें।

मोहनलाल सुखाडिया
मुख्यमन्त्री, राजस्थान,

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करणीयम् । तथा खाद्य-सामग्र्या उत्पादनस्याभिवृद्धौ, एवमुत्पादितस्य खाद्यस्य समुचितरूपेण वितरणस्य च व्यवस्थायां सहयोगं प्रदातुमस्माकं देशस्यास्य सर्वेषामेव पक्षाणां सदस्यानामाह्वानं क्रियत इति ।

अग्रे च राष्ट्रपतिमहाभागेन भाषितं यद् व्यक्तिगतेन मनोमालिन्येन तथा स्वस्वपक्षपातेन च जायमानां महतीं क्षतिं प्रति संकेतं विधाय सर्वविधमपि पारस्परिकं दोषजातं परित्यज्य यया रीत्या देशोऽयं समुन्नतिपथमधिरोहेत् तथा सर्वैरपि देशवासिभिः प्रयत्यमिति । किञ्च भ्रष्टाचारापरयणा जनाः समाजस्य महान्तः शत्रवः सन्तीत्यतस्तादृक्षाः जना कठिनतमेन दण्डेन दण्डनीया विद्यन्ते—इति ।

प्रधानमंत्री श्रीलालबहादुरशास्त्रि महोदयः

स्वतन्त्रतादिवसे रक्तदुर्गतः (लालकिला) भाषमाणः अस्माकं देशस्य प्रधानमन्त्री श्रीलालबहादुरशास्त्री भारतवासिनः प्रति अनुरोधं कृतवान् यत् अस्माभिः समग्रामपि भिन्नतां परित्यज्य संयुक्तं तथा बलवद् भारतं निर्मातव्यम् । आभ्यन्तरतश्च बलवत्तयैव भारतमिदं जगति सम्मानस्य भाजनं भवितुमर्हति । धर्म-भाषा-जाति-प्रदेशविषयकान् समग्रानपि भेदान् परिसमाप्य सर्वमपि राष्ट्रमेकतायाः सूत्रे बद्धं भवेत् । अग्रे च प्रधानमन्त्रिमहोदयेनाश्वासनं प्रत्तं यत् सर्वकारः—आर्थिकसमस्यानां समाधानं विधास्यति, तथा भविष्यति काले चाचिरादेव वस्तूनां मूल्यान्यपि-स्थिरीकरिष्यति, तथा साधारणानां जनानां कृते गृह-भोजन वस्त्रादीनामावश्यकताश्चापि यावच्छक्यं पूरयिष्यति ।

किञ्च श्रीशास्त्रिमहोदयः स्वर्गीय जवाहरलालनेहरू महानुभावस्य हृदयतः स्मरणं विधाय स्ववक्तव्यं प्रारब्धवान् यत् श्रीनेहरू : स्वातन्त्र्यसंग्रामस्य सुमहत्तमः सेनानीः समासीत्, तस्य परम्परा अस्माभिः सन्ति संरक्षणीयाः ।

भारत—पाक—वार्ता

श्रीशास्त्रिणा चाग्रे आशा प्रकटिता यद् भविष्यति काले च भारत—पाक-वार्ता सम्पत्स्यते-यत्रैकतायास्तथा मित्रतायाश्च भावनाभिः मतभेदापनयनार्थं प्रयत्ना भविष्यन्ति । अपि च भारत-पाक—सीमास्थले या अपि घटनाः संभवन्ति, ता न भारतस्य हिताय सन्ति, नापि च पाकिस्तानस्य भद्राय । वर्मा-श्रीलङ्का—नेपालाऽफगानिस्तान-प्रभृतिभिः देशैः सह भारतस्य मैत्री कामयमानश्च श्री शास्त्री समभाषत यत् कदापि-कदापि प्रवासिभारतीयानां जनानां समस्याभिर्विविधं यत् काठिन्यं समुपस्थितं जायते, परं तस्य सर्वविधस्यापि समाधानं-अक्टूबरमासे श्रीलङ्कायाः प्रधानमन्त्री श्रीभंडारनायकेमहोदया यदास्माकमत्र समायास्यति तथा विदेशमन्त्री सरदार श्री-स्वर्णसिंहमहोदयश्च ब्रह्मादि—प्रतिवेशिदेशयात्रां विधास्यति—तदा सम्भविष्यति ।

चीनः

प्रधानमन्त्रिणा चाग्रे प्रतिपादितं यत् चीनेन भारतं प्रति नाद्यापि निजो व्यवहारः परिवर्तितः । अत एव भारतमपि स्वनीतौ परिवर्तनं न विधास्यति । भारतं मिथो वार्तया सीमाविषयकं विवादं अपनेतुं वाञ्छति, परमेतदर्थं तत् स्वप्रतिष्ठां कदापि नैव त्यक्ष्यति । अपि च भारतमिदं सैनिकबलेन तथाऽऽणविकाऽयुधबलेनापि नावनतं कदापि भविष्यति। अनेककोटिमितानां भारतीयानां सामर्थ्यं सुमहद्विशालं वर्तते यन्महिम्ना भारतमिदं सर्वविधमप्याह्वानं प्रतिरोद्धुं सर्वथा समर्थं वर्तते—इति ।

केन्द्रीयगृहमन्त्री श्रीनन्दामहानुभावः

भ्रष्टाचारोन्मूलनस्य विषयमिममधिकृत्य श्रीगुलजारीनन्दामहानुभावेन भणितं सम्प्रति सर्वकारेण तथा सदाचारसमित्या च मिथः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्भूय संघटितरूपेण यत् कार्यजातं विधीयते, तत्रान्ततः कियत् साफल्यं लप्स्यते—इत्येतत्कथनन्तु वर्तते कठिनं, परं गतकतिपयमासेषु सञ्जाताभिर्घटनाभिरित्थं प्रतीयते यदस्माकं सोऽयं भ्रष्टाचारोन्मूलनस्य संकल्पोऽवश्यं पूर्ति यास्यतीति ।

राजस्थान–राज्यपाल–

डॉ० श्रीसम्पूर्णानन्दमहोदयः

राजस्थानस्य राज्यपालमहानुभावश्चास्मिन्नवसरे जनतां प्रति स्वस्य शुभाकाङ्क्षां प्रकटयन् समभाषत, यदस्माभिर्गांधीमहात्मने, जवाहरलालमहानुभावाय च तथैवं निःस्वार्थभावेन देशभक्तिमाचरद्भ्यो वीरपुरुषेभ्यः श्रद्धाञ्जलयःसमर्पणीयाः, किञ्च भारतवर्षस्य गौरवमभिरक्षितुञ्चाद्य दिने प्राचीनादर्शानुसारेण कार्यं कर्तुं सङ्कल्पः कर्तव्यः। अद्य चास्माभिः साम्प्रतं वर्तमानासु-अनागतासु च समस्यासु विचारो विधेयः । अपि च 'स्वातन्त्र्यस्य प्राप्तिः' इत्येतावन्मात्रमेवास्माकं लक्ष्यं न, अपि त्वार्थिक- पुनर्निर्माण – सामाजिक-नैतिकसमुद्धारस्य प्राप्तिरपि भवेत् ।

राजस्थानस्य जना आत्मनो देशभक्तौ, वीरतायां तथा निजसर्वस्वसमर्पणे चापि सन्ति प्रसिद्धाः । मम विद्यते पूर्णो विश्वासो यद् घनीभूतैस्तथा सामूहिकैश्च प्रयत्नैराज्यमिदमात्मने वाञ्छितं स्थानं निर्मास्यति, मातृभूमेः प्रगतये तथा यशोलाभाय चातिमहत्त्वपूर्णं सहयोगं प्रदास्यति—इति ।

अद्य कठिनेन श्रमेण तथा बलिदानैश्च समृद्धिं समानेतुं प्रतिक्षेत्रं प्रगतिं सम्पादयितुम् उत्साहेन, विश्वासेन तथाऽऽशाभिश्च परिपूर्णैरस्माभिरभिनवे वर्षे प्रवेशो विधीयते . ईश्वरः सर्वशक्तिसम्पन्नः स अस्माकं प्रयत्नान् सफलीक्रियात् ।

राजस्थानस्य मुख्यमन्त्री

श्रीसुखाड़ियामहोदयः

राजस्थानस्य मुख्यमन्त्री स्वभाषणे प्रोक्तवान् यदागामिनि चैकस्मिन्नेव मासे राज्यस्यास्य खाद्यस्थितौ समुचिता व्यवस्था भविष्यति, इत्याशा विद्यते । किञ्चाग्रे मुख्यमन्त्रिमहोदयेन भाषमाणेन-उत्पादनवृद्धौ राज्यस्य जनता समुचितं सहयोगं दद्यात्–इति संकेतः कृतः । तथा च यदैवोत्पादनेवृद्धिर्भवेत् तदैव वस्तूनां मूल्येष्वपि न्यूनता भवितुमर्हति । अग्रे चैतदपि श्रीसुखाडियामहाभागेन प्रोक्तं यत् अस्माकं देशस्य सीमास्थले सांप्रतं संकटं वर्तते समुपस्थितम्, अतोऽस्माभिः संघटनमवश्यं संरक्षणीयमिति ।

अखिलभारतीय-संस्कृतभाषण-प्रतियोगिता

दिल्लीस्थ–शिक्षामन्त्रालयेन आगामिनि नवम्बरमासे प्राचीनपद्धत्यनुसारेण परिचालितानां संस्कृतपाठशालानां छात्राणां कृते तृतीयामखिलभारतीय-संस्कृतभाषणप्रतियोगितामायोजयितुं निर्णयः कृतो वर्तते । प्रत्येकराजस्य केवलं चतुर्णां छात्राणां वर्गोऽत्र समागच्छेत्, येषु एकोऽध्यापकः संभवेत् ।

किञ्च प्रतियोगितायामस्यां प्राचीनपद्धत्यनुसारेण यासु पाठशालासु पठन-पाठने परिचलतः तासां पाठशालानां छात्रा भागं ग्रहीतुं शक्नुवन्ति, परं प्रतियोगिभिश्छात्रैः शास्त्रिपरीक्षा, शिरोमणिपरीक्षा, प्रथमा, एतत्समकक्षीया वाऽन्या काचित् परीक्षा समुत्तीर्णा स्यात् ।

प्रतियोगिनाञ्च कृते २४ चतुर्विंशतिहोराभ्यः प्रागेव भाषणस्य विषयो निर्दिष्टो भविष्यति । विषयश्च—साहित्य- वेदान्त- मीमांसान्याय-वैशेषिक-व्याकरण—सांख्ययोगेषु—एकतमः स्थास्यति । एतदतिरिक्तञ्च अन्त्याक्षरीप्रतियोगिता तथा समस्यापूर्तिरपि तत्र भविष्यति ।

सर्वोत्तमत्वेन निर्णीतानां त्रयाणां वक्तॄणां कृते यथाक्रमम् १५०) ७५), ५०) रूप्यकाणां पुरस्कारः प्रदास्यन्ते । सहैव च सर्वोत्तमाभ्यां वक्तृभ्यां स्वर्ण-रजतपदकेऽपि दास्येते । यश्च प्रतियोगिनां वर्गः सर्वश्रेष्ठत्वेन निर्णीतो भविष्यति, तदर्थं चलविजयपोहारः (चल शील्ड) दास्यते—इति सहसम्पादकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा

अकस्माद् भाग्यचमत्कारः

ले० स्व० भट्ट श्रीमथुरानाथशास्त्री भूतपूर्वसम्पादकः, जयपुरम्

त्रिंशच्चत्वारिंशद्वर्षाणां पुरातनी सेयं कथा। तदा ऽहं कालेजे पठन्नासम्। ग्रीष्मावकाशे बुन्देलखण्डप्रान्तस्य ओरछापरिसरे ऽगमम्। तत्प्रदेशस्य एकस्मिन् ग्रामे तत्प्रदेशीयः एको व्यवसायी बहूनां वस्तूनां क्रय-विक्रयावकरोत्। तस्य समीपे जीर्णस्फुटितपात्राणामपि एको राशिः प्राचीनतमात् स्थानात् विक्रयार्थं समागच्छत्। मोगलशासनात् पूर्वं यदा हि तद्देशीयराजानां सर्वविधं शासनमासीत् तदा प्रान्तेऽस्मिन् भगवत्या लक्ष्म्याः, तया सह विलास-विभ्रमाणामपि सर्वतः प्राबल्यमासीत्।

तत्रत्याः सामन्ताः सुखिनः, राजविभूतिषु प्रमोदविभ्रान्ताश्चाऽऽसन्। भारतस्य पारतन्त्र्यसमये तेषामपि राजविभूतिविलुप्ताऽऽसीत्। शनैः शनैर्विलुप्तराजलक्ष्मीकास्ते प्राक्तनसंपत्तीर्विक्रीय यथा कथंचिज्जीवननिर्वाहमकुर्वन्। शनैः शनैस्तेषां पुरातनी वस्तुसंपत्तिर्विक्रयार्थं व्यवसायिनां हस्ते समागच्छत्। संभ्रान्तस्य एकस्य सामन्तस्य भवनाद्पात्रादिसंपत्ति र्व्यवसायिनः समीपे विक्रयणाय समायासीत्। प्राचीनानां धनविलाससूचकानां पात्राणां मध्ये एकं ताम्बूलविधानपात्रमपि समागच्छत्, यस्योपरिभागे अतिकलापूर्णं चित्रकार्यमप्यासीत्।

तीस चालीस वर्षों की पुरानी यह बात है। उस समय मैं कॉलिज में पढ़ रहा था। गर्मी की छुट्टियों में मैं बुन्देलखण्ड प्रान्त के ओरछा परिसर में गया था। उस प्रदेश के एक गाँव में उस प्रान्त का ही एक व्यवसायी सब ही चीजों की खरीद, बिक्री किया करता था। उसके पास पुराने और फूटे बरतनों का भी एक ढ़ेर अत्यन्त पुराने एक ठिकाने से बिक्री के लिये आया। मुगलसल्तनत के पहले जब इस प्रान्त के राजाओं का शासन था, तब इस प्रान्त में राजलक्ष्मी का, उसके साथ विलास-विभ्रमों का भी बड़ा जोर था।

वहां के जागीरदार सब तरह सुखी, राजविभूतियों में आनन्दविभोर थे। हिन्दुस्थान की परतन्त्रता के समय उनकी भी राज विभूति विलुप्त हो गई। धीरे धीरे राजलक्ष्मी से रहित वे पुरानी संपत्तियों को बेच कर जैसे तैसे अपना जीवन निर्वाह करते थे। धीरे धीरे उन लोगों की पुरानी चीजें बिक्री के लिए व्यौपारियों के हाथ पहुँची। प्रतिष्ठित एक जागीरदार के मकान से बरतन आदि चीजों का ढेर एक व्योपारी के पास बिक्री के लिए पहुंचा। पुराने धन विलास सूचक बरतनों में एक 'पान दान' भी आया, जिस पर अति कला पूर्ण जड़ाई का काम भी हो रहा था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानि सर्वाणि पात्रादिवस्तूनि व्यापारिणा निजापणे विक्रयार्थं प्रसारितान्यासन्। लोकाः प्राचीनधनिकानां विलासवस्तूनि दृष्ट्वा चकिता अभूवन्। धनिकास्तानि यथाशक्ति क्रेतुमप्यैच्छन्। एका श्रेष्ठिपत्नी ताम्बूलनिधानपात्रमेकं सप्तमुद्राभिरक्रैषीत्। किंतु गृहं गता ताम्बूलपात्रं तत् उद्घाटयितुमपि नाऽशक्नोत्। प्रतिप्रयत्ने कृतेऽपि तस्योद्घाटनं नाऽभूत्तया संभवम्। अत एव द्वितीयदिने तत्ताम्बूलपात्रं व्यापारिणः समीपे परावर्तयत्, स्वस्य सप्तमुद्राश्च अनयत्। एवमेव एको मन्दिराध्यक्षोऽपि ताम्बूलपात्रं तत् सप्तमुद्राभिरक्रैषीत् परं सोऽपि तस्योद्घाटने असमर्थः पात्रं तत् परावर्तयामास।

उन सब बरतन आदि चीजों को व्यापारी ने अपनी दुकान में बिक्री के लिए फैला दिया। लोग पुराने धनिकों की विलास की चीजें देखकर चकित हो गये। धनिक लोग अपनी हैसियत के अनुसार उन चीजों को खरीदना भी चाहते थे। एक सेठांनी एक पानदान सात रुपयों में खरीद लेगई। किन्तु घर जाकर वह उस पात्र को खोल भी नहीं सकी। अत्यन्त कोशिश करने पर भी उस पात्र को खोल न सकी। अत एव दूसरे दिन उस पानदान को व्यापारी को लौटा दिया और अपने सात रुपये ले लिए। ऐसे ही एक मन्दिर के महन्तजी भी उस पानदान को सात रुपये में लेगये, किन्तु वो भी उसको खोल न सके। अतः उनने भी पानदान लौटा दिया।

व्यापारिणस्तस्य ताम्बूलपात्रस्यास्योपरि महान् क्रोधोऽभवत्। स हि पात्रमेतद् सवेगं निजापणान्तः सबलं निचिक्षेप। बलात्प्रक्षिप्तं तत्पात्रं भूमौ निपत्य द्विधा विभक्तमभूत्—पात्रमेकतः, तस्यावरणं चैकतः। किंतु तद् दृष्ट्वा व्यापारी, तत्समीपस्था अन्ये जनाश्च नितान्तं चकिता अभूवन् -यतो हि पात्रस्य मध्यतः शतशतमुद्राणामेकविंशतिः शुल्कपत्राणि इतस्ततो न्यपतन्। व्यापारी त्वरितं प्रधाव्य पात्रं तत् समादाय शुल्कपत्राणि अतित्वरितमतिनिभृतं च समग्रहीत्। ततः प्रभृति व्यवसायी सोऽसौ व्यापार-व्यवसायौ कृत्वा तस्मिन् प्रान्ते प्रसिद्धः श्रेष्ठी समभवत्। अहह! अकस्मादेव सोयं भाग्यचमत्कारः समस्तानामपि विस्मयायाऽऽसीत्।

व्यापारी को पानदान के ऊपर बड़ा क्रोध हुआ। उसने इस पानदान को बड़े जोर से दुकान की जमीन पर दे मारा। फैंका हुआ पानदान दो टुकड़े हो गया—पानदान अलग और ढक्कन अलग। किन्तु यह देखकर व्यापारी और उसके पास के लोग सब चकित होगये। क्योंकि पानदान के भीतर से सौ सौ रुपयों के इक्कीस नोट इधर उधर बिखर गये। व्यापारी ने जल्दी दौड़कर, पानदान को लेकर, अति जल्दी और चुपचाप नोटों को इकट्ठा कर लिया। उसी दिन से यह व्यापारी व्यापार-वाणिज्य करके उस प्रान्त में प्रसिद्ध सेठ होगया। आहा! अकस्मात् यह भाग्य का चमत्कार सब लोगों को विस्मय और आश्चर्यकारक हुआ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP-6
"Licenced to Post
without Prepayment

सूक्ति-सुधा

न जटाभिर्न गात्रैर्न
जात्या भवति ब्राह्मणः ।
यस्मिन् सत्यञ्च धर्मश्च
स शुचिः स च ब्राह्मणः ॥१॥

ब्राह्मण न जटाओं से, न शरीर से और न (केवल) जाति से ब्राह्मण होता है, (किन्तु) जिस में सत्य और धर्म है-वह पवित्र और ब्राह्मण है ॥ १ ॥

आरोग्यं परमो लाभः
सन्तुष्टिः परमं धनम् ।
विश्वासः परमा ज्ञातिर्निर्वाणं
परमं सुखम् ॥२॥

(संसार में) नीरोगता ही सब से बडा लाभ है, सन्तोष श्रेष्ठ धन हे, विश्वास ही उत्तम ज्ञाति है और मोक्ष ही परम सुख है ॥ २ ॥

विद्या सर्वमनुष्याणां
जननी नापरा स्मृता ।
जातोऽनया पुमान् यस्माद्
गच्छेल्लोकद्वये सुखम् ॥३॥

सब मनुष्यों की माता विद्या कही गई है, दूसरी महीं, क्योंकि इस (विद्या) से उत्पन्न हुआ मनुष्य दोनों लोकों (इस लोक और परलोक) में सुख प्राप्त होता है ॥ ३ ॥

अक्रोधेन जयेत् क्रोधं
असाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन जयेत्
सत्येन चानृतम् ॥४॥

(मनुष्य को चाहिए कि वह) क्रोध को शान्ति से जीते (वश में करे) दुर्जन को सज्जनता से जीते, कञ्जूस को धन आदि के दान से जीते और असत्य को सत्य से ॥ ४ ॥

वीरः सुधीः सुविद्यश्च
पुरुषः पुरुषार्थवान् ।
तदन्ये पुरुषाकाराः
पशवः पुच्छवर्जिताः ॥५॥

वीर, बुद्धिमान्, उत्तम विद्यावाला और पुरुषार्थ वाला अर्थात् धर्म, अर्थ, काम और मोक्ष के लिए प्रयत्नशील पुरुष ही (वास्तव में) पुरुष है, उसके अलावा पुरुष तो पुरुष के आकार में बिना पूँछ के पशु हैं ॥ ५ ॥

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिन्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

साहित्याम्बुधिसंविहारनिपुणः शब्दागमज्ञाग्रणीः
छात्राध्यापनलग्नधीः शुचिमनाः काव्यप्रबन्धोद्धुरः ।
छन्दःस्वेकघनाक्षरप्रियतमो देवर्षिवंशोज्ज्वलः ।
चित्रेऽयं प्रतिभाति भट्टमथुरानाथाभिधः कोविदः ।

…म् १४
…ङ्कः ११

वार्षिक मूल्यम् चतस्रो मुद्राः ४)
एकप्रतेः चत्वारिंशत् नवपणाः (४० न·पै·)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्रमसंख्या लेखाः	लेखकाः		पृष्ठसंख्या
१ श्रीगणेशप्रणतिः	श्रीदेवकीनन्दनशास्त्री,	जयपुरम्	३०५
२ जीवनं च कृतित्वं च	देवर्षि श्रीकलानाथशास्त्री,	जयपुरम्	३०६
३ शोकप्रस्तावाः			३१६
४ शोकोद्गारः	श्रीदामोदराचार्यः,	जयपुरम्	३१७
५ अनभ्रो वज्रपातः	श्रीगणेशरामशर्मा,	झालावाडः	३१८
६ श्रद्धाञ्जलयः	"	"	३२६
७ प्रातःस्मरणीयाः कविशिरोमणयः	श्रीविद्याधरशास्त्री,		३२९
८ मथुरानाथा अमी अमराः	श्रीमणिशङ्करशास्त्री,	जोधपुरम्	३३०
९ श्रद्धाञ्जलयः	श्रीहजारीलालशास्त्री,	नवलगढः	३३१
१० आत्यन्तिकविरहः	श्रीदीनानाथशास्त्री,	देहली	३३२
११ श्रद्धाञ्जलयः	श्रीदेवकीनन्दनशास्त्री,	जयपुरम्	३३४
१२ संस्मरणानि	श्रीहनुमत्प्रसादशास्त्री,	देहली	३३५
१३ कतिचन स्मरणानि	श्रीहरिकृष्णशास्त्री,	अजमेरः	३३८
१४ वज्रपातः	भारतीपरिवारः	जयपुरम्	३४६
१५ श्रद्धाञ्जलिः	श्रीहरिशास्त्री,	जयपुरम्	३४७
१६ संस्मरणानि	प्रबन्धसम्पादकः,	जयपुरम्	३४८
१७ सम्पादकीयम्	सम्पादकः		३४९
१८ श्रीमतां मित्रवर्गः शिष्यवर्गश्च	श्रीकमलानाथशर्मा	जयपुरम्	३५१
१९ श्रद्धाञ्जलयः	अनेके		३५५
२० सूक्तिसुधा	सम्पादकः		३५८

भाद्रमासावतरणम्

मेघैर्मेदुरयन्नभश्च धरणीं वर्षाम्भसा प्लावयन् (पूरयन्),
श्रीकृष्णस्य जनूत्सवं गणपते र्जन्मापि संमानयन् ।
कान्ताभिर्हरितालिकाव्रतमुपाकर्मण्यथर्षिव्रजं
सम्पूज्य श्रुतिसंश्रवं कलयितुं भाद्रो हि मा आगतः ॥

—सम्पादकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
सा०महोपाध्याय-
कविभूषण आशुकविः
श्रीहरिशास्त्री
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुप;'
साहित्यालङ्कारः ।

भारती

संस्कृतमासिकपत्रस्य
श्रीमथुरानाथभट्ट-श्रद्धाञ्जल्यङ्कः ।

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता
जयपुरम् ।

वर्षम् १४ | भाद्रपदः, विक्रमाब्दः २०२१ [सितम्बर: १९६४] | अङ्कः ११

श्रीगणेशप्रणतिः

(श्रीदेवकीनन्दनशास्त्री, जयपुरम्)

सिद्ध्यादिभिश्चात्र समादृतानां,
तथापि दीप्तोग्रहुताशनानाम् ।
द्वारस्थितानाञ्च गजाननानां
लम्बोदराणां शरणं व्रजामः ॥
सदा महादेवकृतादराणां
गौरीपयःपुष्टकलेवराणाम् ।
विघ्नाधिपानां गणनायकानां
विनायकानां चरणौ भजामः ॥
अहो सदा मूषकवाहनाना-
मण्याननस्थापितमोदकानाम् ।
मन्दारमालापरिमण्डितानां
दण्डायुधानां चरणौ स्मरामः ॥
शुण्डाग्रदण्डस्थितपुण्डरीक-
प्रकम्पनामोदफलप्रदानाम् ।
सदा मनीषाबलवित्तदानां
विद्याप्रदानां चरणौ नमामः ॥
नासमस्तपदं चात्र प्रायः सम्बन्धसूचकम् ।
हेरम्बचरणाम्भोजसामीप्यं कामये ततः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविशिरोमणि-भट्टश्रीमथुरानाथशास्त्रिणो

जीवनं च कृतित्वं च

(देवर्षि कलानाथशास्त्री, साहित्याचार्य, M. A. (Eng.), भूतपूर्वो 'भारती'-सहसम्पादकः, आङ्ग्लसाहित्यप्रवक्ता, राजकीय कालेजः, सीकर (राजस्थान))

प्रायो मासपूर्वमेव नश्वरं कायं विहाय, सुदीर्घं, सनातनं सार्वदिकं च स्वकीयसाहित्यमस्मभ्यं प्रदाय सहसैव दिवमारूढस्य मत्पितुर्जीवनस्य कृतित्वस्य च विषये किंचिन्मया लेख्यमिति समाज्ञप्तोऽस्मि । इदमपि, पुत्रस्य दारुणेषु कर्त्तव्येष्वकेतमम् ? निवापाञ्जलिं प्रदाय पुंनाम्नो नरकात् त्राणस्य पौराणिकेन कर्त्तव्येन सहैव तत्सम्बन्धे किंचिन्निवेदनस्याधिकारो वा कर्त्तव्यं वा तदिदमपि सुतस्यैव ? किन्तु यस्याः संस्कृतसरस्वत्याः कृते तैराजन्म, आमरणं चानन्यभावेन सेवातपस्तप्तं, यां च संस्कृत भाषां सर्वभावेन 'जीवितां' साधयितुं तैः सर्वमविगणय्य प्रयतितम् तस्या एव विद्वद्भ्यस्तेषामेव संबन्धे किं वा नवीनमहं निवेदयिष्यामि ? ते मत्तोऽधिकं जानन्ति 'भारती' सम्पादकस्य विषये, 'मञ्जुनाथस्य' सम्बन्धे, 'संस्कृतरत्नाकरस्य' भूतपूर्वसम्पादकमधिकृत्य ।

इदमपि जानन्ति दयालवः संस्कृतसेवका यज्जयपुरनगरम् 'अपरा काशीति' नाम्ना यैः प्रख्यापितं भारते, तेषामेव विद्यावाचस्पति--मधुसूदनझा-श्रीलक्ष्मीनाथशास्त्रि-श्रीगिरिधरशर्म चतुर्वेदादीनां सरणौ प्रवृत्तेनानेन संस्कृतकाव्यक्षेत्रे तु युगस्यैकस्यारम्भ एव कृतोऽभूत । सन् १६०४ वत्सरे पत्रकारितायामपि नवयुगारम्भं संस्कृते चिकीर्षुभिः कतिपयविद्वत्सुहृद्भिः 'संस्कृतरत्नाकर'पत्रं स्थापितं, यस्य सर्वप्रथमाङ्के 'सम्पादकीय'लेखस्य कर्त्ता सोऽयमेव किशोरो भट्टमथुरानाथशर्मा आसीत् । म. म. पं. गिरिधरशर्मा चतुर्वेदी, राजगुरुः पं. चन्द्रदत्तओझा, व्याकरणाचार्यः पं. सूर्यनारायणशर्मा इत्यादयोऽन्ये सुहृदो 'विद्वन्मण्डले'त्यभिधानभाजः पत्रस्यास्य संस्थापका आसन् । हन्त ! स्वनामधन्यं श्री चतुर्वेदपादं विहायाद्य सर्वेऽप्येते संसारमिमं परित्यक्तवन्तः । कियती त्वरिता कालस्य गतिः ? ह्यस्तनीव तेषां विदुषां वाणी मदीये कर्णकुहरे गुञ्जति । विदुषां सुहृदां वैदुष्यपूर्णा विनोदाः, विवेकशालीनि व्याख्यानानि, उदात्ताः परिहासगोष्ठ्यः--सर्वमिदमद्यापि नवीनमिव मे स्मृतौ, येषु 'भट्ट' महोदयस्य पुत्र इत्यधिकारपत्रं प्राप्तवता मयकाऽपि शिशुना प्रविष्टमासीत् । तदिदमेव गौरवमहमाजीवनं वोढास्मि ।

हन्त, कालस्यानया गत्या तूर्णमेव व्यतिगमितानां, सम्प्रति कथाशेषाणां क्षणानां स्मृतौ कियन्मार्मिकमुदीरितमासीत्तैः स्वकीये 'जयपुरवैभवे' ! कः खल्वजानात्तदा यत्तदिदं सर्वं तेषामेव स्मृतौ कदाचन सत्यापितं भविष्यति ?

ते केचिद्विलासाः समुद्गूढघनस्नेहरसाः
ते वै परिहासा ये प्रमोदमवहन्नहो
तत्तत्समयेषु सुहृद्गोष्ठीसुखसंभृतानि
तानि रमितानि यानि चिन्तामहरन्नहो ।
मञ्जुनाथ निध्यानेन किमपि नवीनानीवऽ
कौतुकमिदानीमपि चित्तेऽजनयन्नहो
कानिचित्सुखानि तानि पूर्वमनुभूतान्यपि
साम्प्रतमतीतवृत्ता-भूतान्यभवन्नहो ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यं खलु, शूराग्रगण्या भीमादयः, प्रतापशालिनः केनेडी-नेहरूसदृशाः, धनवैभवमत्ता आगाखाँ इत्यादय एव यदा न मृत्युमतिशेतुमभूवन् समर्थास्तदा कस्य वा परलोकगमनं विलप्येत ? स्वकीये 'साहित्यवैभवे' तैरेवोक्तमासीत्—

"आसँस्तेऽपि पार्थिवाः पृथिव्यां बलभारभृतो
व्याप्नुते स्म तेषामनुभावतो भयं न किम् ?
श्रेष्ठिनो वदान्या भूरि जाता लोकमान्याः पुन-
र्याता रूपशालिनो धरायामदयं न किम् ? ।
मञ्जुनाथ पुंसां हन्त कोऽयमभिमानोऽधुना
नश्वरे शरीरे, वेत्सि विधि-समयं न किम् ?
आयाता धरायामद्ययावद्भूरिसंख्या नरा-
स्ते किल धरायामेव याता विलयं न किम् ?

(साहित्यवैभव—काव्ये)

संस्कृत सेवा

सत्यप्यस्मिन् क्षणभङ्गुरे जगति रससिद्धानां येषां कवीश्वराणां यशःकाये जरामरणजं भयं नास्ति ते नूनमजरामराः। एवंविधेष्वेव कविषु स्थानमेकमुपलब्धुं भट्टमहाभागैरेभिः प्रयत्नो विहितः, कविकर्मणि निःसङ्गभावेन स्वकीयं समग्रमपि जीवनं समर्प्य। साहित्यसेवायै तादृशी संलग्नता, सर्वमन्यदनुषङ्गीकृत्य, तन्मयीभूय च केवलं तद्गतरसानुभवप्रयुक्ता, नान्यर्त्किविदुद्दिश्यानुष्ठिता निरन्तरं वाङ्मयानुशीलनस्य सहजा प्रवृत्तिर्या मया तेषु वीक्षिता, बाल्यकाले सा नितरां स्वाभाविकी, मानवसाधारणीव प्रवृत्तिरित्यहमजानाम्। 'मस्तिष्कविक्षेप एवाय' मिति ते बहुधा मयाऽधि क्षिप्ता अपि।

"आङ्ग्लसाहित्ये, बङ्गभाषासाहित्ये, हिन्द्यां, अन्यान्यभाषासु च या या अभिव्यक्तिसरण्यस्ताः सर्वा अपि तनासां भाषाणां नैसर्गिक्यो धाराः सन्ति, किमिति भवन्तस्ताः सर्वा अपि संस्कृते समवतारयितुमिच्छन्ति ?" इति बहुधाऽहमकथयम्। तदा हि तदिदं सर्वं संस्कृते भक्त्यतिरेकस्यैव फलमित्यहमजानाम्। अद्य स्मरामि यत्तादृशी तन्मयता, संस्कृतप्रवणता, संलग्नता च केवलमतीतस्यैव वस्तु। तत्कालीनेषु, गतस्यास्य युगस्य संस्कृतपण्डितेष्वेव तादृशी संलग्नताऽवर्तत, द्वित्रा एव मन्ये अवशिष्टास्तस्य युगस्य विद्वांसः। सर्वेऽन्ये दिवमारूढाः। अद्यतनास्तु भौतिकयुगस्य सन्ततय इति वा, वैविध्यपूर्णस्य जीवनस्य विषमतासु विविध-कार्यावलीषु, आवश्यकतासु च व्यापृता न तावन्तं समयं साहित्यचर्चायै दातुं प्रभवन्ति संस्कृतसेविन इतिकृत्वा वा, तादृशीं साहित्यसेवां न द्वित्रैरपि पुरुषायुषैः कर्तुं पारयेयुरिति दृढं वच्मि।

पञ्चाशद्वर्षाणि 'संस्कृतरत्नाकर' सम्पादनं कृतवद्भिरेतैः विविधसाहित्येभ्यो बहुविधाः साहित्यविधाः संस्कृतेऽवतारिताः। संस्कृतरत्नाकर-पाठकाःस्मरेयुर्यद् 'विनोदवाटिका' इति नाम्ना विनोद (Jokes, चुटकुले) वार्तालापस्यैकः स्तम्भस्तत्सम्पादकेन प्रचालितोऽभूत्। 'साहित्यकुसुमवाटिका' इति नाम्ना अभिनवसाहित्यसमालोचनस्य पद्धतिर्नवीनतयाऽवतारिताऽभूत्।

एते वङ्गसाहित्यस्य ज्ञातारः, वङ्गीयमासिकपत्राणां नियमिता ग्राहकाश्चासन्। 'प्रवासी' 'जन्मभूमि' प्रभृतिपत्राणां पूर्णा श्रङ्का अधुनाऽपि तत्पुस्तकालये सुरक्षिताः। 'प्रवासी' सम्पादकस्य श्री रामानन्दचट्टोपाध्यायस्य लेखशैल्या, समालोचनपद्धत्या चैते भृशमासन् प्रभाविताः। अत एव "कष्टिपाथर" इति स्तम्भान्तर्गताये समालोचनपरा लेखाः श्रीरामानन्देनालेख्यन्त, तैः प्रभाविता भट्टमहाभागा अपि संस्कृतेऽभिनवसाहित्यसमालोचनस्य तत्समामेव नवीनां शैलीमजनयन्। नीरक्षीरविवेकविधया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणदोषविवेचनस्यैषा शैली संस्कृते पत्रकारिताया इतिहासस्यान्यतममुल्लेखनीयं वस्तु ।

नवीना धाराः

'आदर्शरमणी', 'असमसाहसम्' 'अना- दृता', 'बालकःभृत्य' इत्यादय उपन्यासाः, अगणिता लघुकथाः, विनोदपूर्णा विवेचनपराश्च परःशतं लेखाः "किन्तोः कुटिलता" इत्यादयः सरल–साहित्यिक–विनोदपूर्णा निबन्धाश्च संस्कृतजगति नवीनाया रुचेः श्रीगणेशं विधाय तद्युगीयां संस्कृतजगतो विचारधारामवचेतनविधया सुबहु प्रभावितवन्तः ।

'संस्कृतभाषा मृतभाषा नाऽस्ति' तदिदमान्दोलनमनेनाध्ययनकालमारभ्य मृत्युपर्यन्तं प्रचालितम् । आङ्गलानां बहूनाम्, आङ्गलशिक्षाप्रभावितानां बहूनां भारतीयविदुषां चाप्यासीदयं प्रवादो यत्संस्कृतभाषा मृताऽस्ति । एतस्य प्रवादस्याधारस्तु संस्कृतविद्यालयादिप्राचीनपरम्परातो नितांतमनभिज्ञानां कतिपयदुर्दुरूढानामियं धारणैवासीद्यत् संस्कृतेन नाऽधुना कोऽपि व्यवहरति, न च सेयं कदाचिदपि व्यवहरणीया भाषाऽभूत् । नाजानँस्तादृशाः प्रगल्भपुंगवा यत्संस्कृतेऽद्याप्यनेकानि पत्राणि प्रकाश्यन्ते, सम्मेलनानि भवन्ति, पत्राणि पंडितैर्विलिख्यन्ते, पंडिता व्याख्यानानि ददति, विद्यालयेषु संस्कृतमाध्यमेनाध्यापयन्ति च । सर्वस्यास्य परिज्ञानस्याभावे तैःसाधयितुमिष्टं यद् यथा 'लैटिन' भाषा, 'ग्रीक'भाषा वा (पुरातनी) योरपीयदेशेषु, इंग्लैंडदेशे च नाधुना केनापि कुत्रापि भाष्येते–केवलं ग्रन्थस्थ एव, तथैव संस्कृतं भारतेऽपि । एतस्य हेत्वाभासस्य, घोरभ्रमस्य च को वा प्रतिवादं करोतु ? विंटरनिट्जेन स्वकीय 'संस्कृतसाहित्येतिहासे', श्री पी. के. गोड़े महाभागेन स्वकीये शोधपत्रे एकस्मिन्, डा. राघवन् महाभागेन साम्प्रतमेव प्रकाशिते, 'आधुनिकभारतीयसाहित्य'-नामकग्रन्थान्तर्गते 'संस्कृत-साहित्याख्ये' निबन्धे च खण्डनमस्य प्रवादस्य विहितम् । किन्तु सर्वतः पूर्वं प्रवादमिमं तूर्णमेव निराधारं साधयितुं भट्टपादैरेव प्रयत्नः ससंरम्भमारब्धोऽभूत् । सन् १९३० वत्सरे वाराणस्यां संजातेऽखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य द्वादशाधिवेशने सभामन्वादनेनोद्घोषितं यदस्य प्रवादस्य समर्थकाः समायान्तु, तेषां चक्षुरुन्मीलनायाऽहमुपस्थितः । एतत्पूर्वमपि १९१५ ई० वत्सरमारभ्य अनेन जयपुरीयत्रिद्वत्सभासु भाषाशास्त्रीयदृष्टयाऽस्य प्रश्नस्य समीक्षायै सुबहु प्रयतितम् ।

"सेयं भाषा व्याकरणनियमैः सुदृढं निबद्धा, प्रवाहोऽस्या अवरुद्धः, आधुनिकसाहित्यं नास्यामधुना संभवं स्रष्टुम्, आधुनिकविषयानभिव्यञ्जितुं नास्यां विद्यन्ते शब्दाः, अस्याः पुराणी साहित्यविवेचनपरिपाटी, पुराणं छन्दःशास्त्रम्, पुरातनी च विचारसरणिर्मृतप्रायैव, न तस्यां किंचित् परिवर्त्तनं भोजकालादारभ्य (एकादशशताब्दी) संजातम् इत्यादयस्तर्का आसन्नाधुनिकशिक्षितानाम् । तानिमान् निराधारान् साधयितुमेतैः 'साहित्यवैभवम्' 'जयपुरवैभवम्' इत्याख्यं काव्यद्वयं विरचितम् । अत्र हि नवीनविषया नवीनेषुच्छन्दःसु, नवीनशब्दैः, नवीनपरिपाट्या निबद्धाः, सर्वासां भाषाणां छन्दःसु संस्कृते सहजतया साहित्यनिर्माणं संभवम् इति साधयितुम् उर्दू-हिन्दीप्रभृतिच्छन्दःसु सहजलालित्येनापूर्वं चमत्कारं जनयतः काव्यस्यावतारणाऽत्र विहिताऽमीभिः ।

काव्यद्वयमिदं सर्वेषामेव कृपालूनां संस्कृतरसिकानां लोचनगोचरतामवश्यमेवाऽऽगतं स्यात्, निर्मायस्नेहेन च गुणग्राहिभिरादृतमपि स्यादिति नात्र मद्वचसामधिकोऽवकाशः ।

चरमः कविताग्रन्थः

गच्छता कालेन, चरमे वयसि बहुधैतैऽकथयन् 'यन्मया शृङ्गाररचना भूयस्यो विहिताः, 'जयपुरवैभव' नाम्नि ग्रन्थे राज्ञां, महापुरुषाणामन्येषां च नराणां स्तुतयोऽपि कृताः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सांसारिकी चर्चाऽप्यनुष्ठिता, अधुना 'नरकथा' मिमां सर्वथा विहाय चरमां मे वाणीं 'गोविन्द' गुणकथनेनैव सफलीकर्तु 'मिच्छामि' इति । अत एव सर्वेष्वपि तेषु च्छन्दःसु एतैर्भक्तिरसाप्लुता कविता रचिता, यान्येतैः पूर्वं निबद्धान्यासन्, 'गोविन्दवैभव' नाम्ना च प्रकाशितमिदं काव्यं 'गीताप्रेस गोरखपुरतः' । एतेषां सुहृदः सजातीयाः सम्बन्धिनश्च 'कल्याण' पत्र-सम्पादका गोस्वामिश्रीचिम्मनलालजी M.A.' महोदयाः काव्यमिदं सुभृशं प्राशंसन्, प्राकाशयंश्च १९५७ ई. वत्सरे ।

'काव्यमिदं मदीयमन्तिमम्, नाधुनाऽहं गोविन्दचरणयोरर्पितां काव्यवाणीं नरकथयाऽऽविलीकरिष्यामि' इति तदा भट्टमहाभागा अकथयन् । सत्यं, तद्दिनादारभ्य मृत्युपर्यन्तं नैतैरेकमपि च्छन्दो विलिखितमभ्यर्थितैरपि, अनुरुद्धै रपीत्यधुना स्पष्टं स्मरामि । केवलं गद्यरचनैव तदारभ्यैतैर्विहिता, न कविता । 'जीवनस्य संध्या' सेयमेतेषामासीत् । 'गोविन्दवैभवे' तामेव जीवनसंध्यां साफल्येनातिवाहयितुमेभिः कामना सेयं कृताऽभूत् ।

ज्ञानमक्षराणां किंचिदासीद् दयया ते पुरा
जीवनप्रभाते यतो ज्योतिरुद्भवेद् विभो !
तदनु कवित्वकला प्रौढिग्रन्थनिर्माणादि
यस्मात् साधुसम्मानादि सर्वं संभवेद्विभो !
साम्प्रतं त्वजानन्नुपरामसमयं मे जनाः
किं मे लोकरञ्जनादिदम्भैः संभवेद्विभो ?
केवलं पदाब्जे तव नित्यमिदं संध्यायामि
जीवनस्य संध्या मम वन्ध्या न भवेद्विभो !
(पृ. २६, पद्य. ३४)

अभिनवयुगावतारणा

संस्कृते हिन्दीप्रचलितानां प्रलम्बदण्डकच्छन्दसां, विशेषतो 'घनाक्षरी' (कवित्त) च्छन्दसो निबन्धनं तदानीं प्रचलिताया लालित्यधारायाः संस्कृतेऽपि प्रवेशार्थमनयैव प्रवृत्त्या भट्टमहोदयेनाभूद्विहितम् । जानन्ति काव्यमर्मज्ञा यद् व्रजभाषाप्रचलितपद्धत्या सभायां 'कविरो' श्राविते, अन्त्यानुप्रासघटितं ललितमिदं छन्दः सभायां तमेवाभूतपूर्वं कञ्चन प्रभावं प्रकटयति यथा उर्दू 'मशायरासु' (कविगोष्ठीषु) गजलगीतिः । केवलं कौतुकेन निर्मितान्येतस्य घनाक्षरीछन्दांसि सकृदेव 'पण्डितसभा'सु श्रावितानि यदा श्रोतृमण्डल्यामलौकिकमिव किंचित् कार्मणं प्रसारितवन्तस्तदा तत्कालीनशिक्षासंचालक (Director of Public Instruction) महोदयैः श्रीश्यामसुन्दरशर्मभिः श्री गिरिधरशर्मभिः, कवेर्ज्येष्ठभ्रातृश्रीरमानाथशास्त्रिभिश्चायमधिकानि घनाक्षरीच्छन्दांसि लेखितुं प्रेरितः । अस्यैव क्रमस्य फलस्वरूपेण 'मञ्जुकवितानिकुञ्जस्य" सृष्टिरभूदस्य पुष्परूपेण 'वैभवत्रयं' सहृदयानद्याप्यानन्दयतीति तैरेव लिखितं स्वकीय 'जयपुरवैभव'-स्याऽऽमुखे ।

एतेन श्रावितानि सुललितसहजसंघटनया संस्कृतेऽवतारितानि घनाक्षरीच्छन्दांसि कियत्सजीवानि कियच्चमत्कारजनकानि च प्रासिध्यन् सभास्विति केवलं तत्सामयिकाः श्रोतारो वा स्मरेयुः, हिन्दीकविसम्मेलनेषु बच्चन-नीरजादीनां काव्यश्रवणरसिका आधुनिका वा कल्पयितुं प्रभवेयुः । 'जयपुरवैभवे' प्रस्ताविकलेखे म. म. पं. गिरिधरशर्मभिस्तात्कालिकानां दृश्यानां संकेत एवं खलु प्रत्तोऽस्ति ।

"एतद्रचितानि घनाक्षरीप्रभृतिच्छन्दांसि श्रावं श्रावं सर्वेऽपि विद्वांसः कमपि विचित्रं चमत्कारमन्वभवन् । स्वाभाविकीं च तां कृतिं सर्वेऽपि सममन्यन्त न तु हठाकृष्टाम् । अहह, साऽस्मन्मित्रगोष्ठी, तत्र च सानन्दमुपविष्टेषु युवसुहृत्सु भट्टमहोदस्य संस्कृतकवित्वपाठः, मध्ये मध्ये आनन्दस्रोतसि प्रवहतां सुहृदां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषेण च श्रीस्वामिमहाभागस्य सानन्दमभिनन्दनानि, अद्यापि ननु दृग्गोचरतां श्रवणगोचरतां चोपयान्ति। क्रमेण च जयपुरे जायमानाः सर्वा अपि सभाः सम्मेलनानि गोष्ठी-समवायाश्च नवीनविचित्रकाव्यै रेतैः प्रतिध्वनितान्यभूवन्। देशान्तरेष्वपि संस्कृतसाहित्यसम्मेलनावसरे परिचयमस्याः कृतेरवाप्य सर्वेऽपि विद्वांसः कमपि चमत्कारमानन्दातिरेकं चान्वभवन्, सर्वत्रापि च प्रथितमेतत्कवित्वयशः।"

(ज. वै. पृ. ४३)

घनाक्षरी, छप्पय, दोहा, सोरठा, सवैया, कुण्डलिया इत्यादि सर्वाण्यपभ्रंशच्छन्दांसि यथाऽनेन सहजलालित्येन संघटितानि तथैव उर्दू प्रचलितानां समग्राणामपि ('बहर') छन्दसां साफल्येन संस्कृतेऽवतारणा कृता। अश्वघाटी-नर्कुटक—शिखरिणी—शार्दूल--मन्दाक्रान्ताप्रभृति-प्रचलित—प्रचलितेषु संस्कृतच्छन्दःसु तु साधिकारं काव्यरचनानेन विहितैव। 'काव्यकुञ्जः' समस्याविलास इत्याख्यं काव्य-ग्रन्थद्वयं प्रायो दशवर्षपूर्वमेव संकलितमधुनाऽपि पाण्डु-लिपिरूपेण वर्त्ततेऽस्मत्समीपे यस्य प्रकाशनं योग्यं गुण-ग्राहिणमद्यापि प्रतीक्षते। काव्यद्वयेऽस्मिन् संस्कृतच्छन्दःस्वेव काव्यरचना वर्तते।

-त्वदिदमनेन काव्यक्षेत्रे सन् १९२२ वत्सरमारभ्य सन् १९५७ वत्सरं यावद्विहितं, तदनन्तरं नैकमपि च्छन्दो व्यलेखि, यत्कारणमहं पूर्वमेवोक्तवानस्मि।

जीवन-वृत्तम्

आषाढकृष्णसप्तम्यां संवत् १९४६ वत्सरे (सन् १८८९) श्रीद्वारकानाथभट्टमहोदयाज्जानकीनाम्न्यां जनन्यां जनिं लब्धवताऽनेन पूर्वमुर्दूलिपिरध्येतुमारब्धा-ऽभूत्। एतत्पितृचरणाः सांसारिकव्यवहारविमुखाः-क्षेत्र-संन्यासमिवोपजीवन्ति स्म। पितामहाः श्रीलक्ष्मीनाथभट्टा एतच्छिक्षादेःप्रबन्धमकुर्वन्-येषामुद्देश्यमभूद् एतस्मै कस्मिंश्चन न्यायालये लेखकपदप्रदानम्। किन्तु भाग्ये किंचिदन्यदेवाऽभूत् कुलपरम्परानुरूपमनेन कानिचित्संस्कृतपुस्तकानि पठितु-मारब्धानि, संस्कृतकालेजे चायं प्रवेशितः। तत्र प्रवेशिका-ध्यापकैः पंडितवरेण्यश्रीकाशीनाथशास्त्रिचरणैः कौमुदा-दिव्याकरणशास्त्रे भृशं परिश्रामितोऽयं स्वल्पीयस्येव वयसि प्रवेशिकापरीक्षामुदतरत्। प्रवेशिकापरीक्षा तदानीं राजकीये इति कृत्वा रामनिवासोद्यानस्थे सुप्रसिद्धे हर्म्ये 'एलबर्टहाल' इत्याख्ये समघटत। अल्पायुषश्छात्रा मषीपात्रादिप्रयोगान-भिज्ञा इति हर्म्येऽस्मिन् न मलिनतां जनयेयुरिति माऽसौ तत्र निरुध्येतेति पितामहचरणैरायुर्वर्षद्वयमधिकं व्यलेखि!!! आश्चर्यकरमिदमिदानीम्। स्वल्पीयो वयोऽधुना लिख्यते, सेवा-निवृत्तिर्विलम्बेन भवत्विति कृत्वा। किन्तु तदानीं नाभूदसौ नियमः। हन्त! जयपुर-राज्य-प्रधानमन्त्रिणा सर मिर्जा इस्माईलेन यदा पञ्चपञ्चाशद्वर्षवयसि सेवानिवृत्तिनियमः प्रयोजितस्तदैव भट्टमहोदया वस्तुतस्त्रिपञ्चाशत्तमं वर्षं, राजकीयपत्रकेषु च पञ्चपञ्चाशत्तमं वर्षं प्राप्ता इति संस्कृत-कालेज-साहित्याध्यक्षपदसेवातो निवर्तिताः। नैते Exten-sion- कृते जात्वपि प्रायतन्त। एवमेकस्य प्रपक्वमतेर्विदुषः सेवानामवसरः संस्कृतकालेजेन निरुद्धः।

आस्तां तावत्। प्रवेशिकोत्तरणानन्तरं साहित्य-न्याय-व्याकरणेति शास्त्रत्रयस्य गुरवः एनं स्व-स्वविषयं पठितुं प्रेरितवन्तः। बहुविधविचारानन्तरम् निर्धारितं यदयं साहित्य-व्याकरणेति शास्त्रद्वयं समकालमेव पठतु। एतत्कृते राज्यशासनाद्विशेषानुमतिरप्येतस्यैव कृते लब्धाऽभूत् तत्कालीनशिक्षासंचालक-श्रीसंजीवनगङ्गोपाध्याय-सकाशात्। साहित्याध्यापकाः श्रीगोपीनाथनांगल्या महोदयाः, व्याकरणाध्यापकाश्च 'सप्तति' मुद्राः प्रतिमासं प्राप्नुवन्तो विशेषपदाधिष्ठिताः श्री हरिदत्तझा महाभागा अस्याभूवन्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाध्यायाख्यमाध्यमिकपरीक्षासु । परीक्षाद्वयमिदमुत्तीर्यानेन पूर्वं व्याकरणे शास्त्रिपरीक्षा ससम्मानं सर्वप्राथम्येनोत्तीर्णा । अस्या एव परीक्षायाः कृतेऽनेन सुबहु परिश्रान्तमासीत् । काशीस्था म. म. पं शिवकुमारमिश्रप्रभृतयः शिखरविद्वांसस्तदैव परीक्षका नियता अभूवन् । प्रौढपाण्डित्यस्य, फक्किकापरिष्कारादिसर्वविधिप्रकाराणां च तदात्वे सेयमभूत्परीक्षा । अस्यां ससम्मानमुत्तरद्भ्यो विद्वद्भ्यः परीक्षकाः स्वयं प्रमाणपत्रोपरि तदा स्वटिप्पणीः(Remarks)प्रादुः, हस्ताक्षराणि च चक्रुरिति विचित्रा प्रणाली तदा शिक्षाविभागे प्रचलिताऽभूत् । म. म., पं. गिरधरशर्माणः कतिपयवर्षपूर्वमेवेमां परीक्षां विशेषयोग्यतया समुदतरन् । भट्टमहोदयेनापि ससंमानमुर्त्तीर्णेयम् । अद्यापि श्रीशिवकुमारमिश्रस्य प्रशंसापदानि, हस्ताक्षराणि च विद्यन्तेऽस्य प्रमाणपत्रे 'लेखपटुरयं बटुः ।'' १९०७ वत्सरेऽनेन सेयं परीक्षा भारतविश्रुतानां तत्कालीनकालेजाध्यक्षाणां व्याकरणमार्तण्डश्रीलक्ष्मीनाथशास्त्रिवर्याणां सविधे व्याकरणमधीत्योत्तीर्णा ।

एतत्पूर्वम् १९०६ वत्सरे पंजाब--विश्वविद्यालयस्य चरम 'शास्त्रि' परीक्षायामयं प्रथमश्रेण्यां सर्वप्रथमः सर्वस्मिन्नपि विश्वविद्यालये घोषितोऽभूत् । १९०९ वत्सरे साहित्याचार्यपरीक्षां श्री कृष्णशास्त्रि-पादानां शिष्यत्वे सोऽयमुदतरत् ।

तदाऽयं जयपुरराज्यप्रदत्तग्रामसंपत्तिभोगिनां श्रीसुन्दरलालभट्टानां दत्तकपुत्र इत्यधिकारेण ग्रामादेः प्रबन्धमारभत । ऋणं संशोध्य, (यत् प्रायः पंचविंशति–सहस्रात्मकमासीत्) ग्रामादिसंपत्ति बन्धकान्निष्कास्यानेन स्वकीयं स्वतन्त्रजीवनमारब्धं, मध्यप्रदेशे 'ओरछा' राजधानीतो विवाहोऽपि विहितः । कतिपयवर्षानन्तरं पत्न्याः स्वर्गमनमभूत् । मध्यप्रदेशादेव व्यूढा द्वितीया पत्न्यपि स्वर्गामिनी समभूत् । तदा प्रायः पञ्चत्रिंशद्वर्षायुषि तृतीयो विवाहोऽनेन जयपुरसमीपवर्तिनि 'महापुरा'ख्यग्रामें कृतो यस्मात्सन्ततिरपि सम्भूता । आसां पंक्तीनां लेखको मन्दमतिरयमपि तदैव जन्माऽलभत ।

राज्यसेवा

राजकीयग्रामसंपत्तेरुपभोक्तेति नायं कदापि राज्यसेवायै लालायितोऽभूत् । नाऽनेन कदापि कुत्रापि भृतिकृते प्रार्थनापत्रं स्वजीवने प्रहितमिति सगौरवमसौ कथयति स्म । तदानीं हिन्दीसाहित्यसम्मेलनपरीक्षाणां जयपुरे समारम्भं चिकीर्षुणाऽनेन 'हिन्दी साहित्य--रात्रिपाठशाला' स्थापिता प्रथमा-विशारद-साहित्यरत्नादि–परीक्षाश्चाऽत्र तत्केंद्रं प्रस्थाप्याऽऽरब्धाः । संस्कृतच्छात्राणां गृहे पाठनमप्यारब्धम् । तदैव सन् १९२२ वत्सरे यदा नवीनमहाराजस्य श्रीमानसिंहस्य प्रथमो विवाहमहोत्सवो योधपुरनगरे समभूत्, तत्र च राजकीयकवीश्वररूपेणाऽयमपि सम्मिलितो भूत्वा निवृत्तस्तदा तत्रानेन सह संगतेन तत्कालीनशिक्षासंचालकेन श्रीश्यामसुन्दरशर्मणा (यो ह्यस्याभिन्नं मित्रं परस्तादभवत् यश्च तस्य मृत्योर्दिनद्वयात्पूर्वमेव स्वर्गमारूढः) सोऽयमनुरुद्धो यत्संस्कृतकालेजे द्वितीयाध्यापकपदमयं स्वीकुर्यादिति । तदनुसारं चत्वारिंशन्मुद्राः प्रतिमासं प्रदायायं विना प्रार्थनापत्रादिकमेव तत्र श्रीदुर्गाप्रसादद्विवेदिनः अध्यक्षत्वकाले कालेजे द्वितीयाध्यापको नियमितः ।

१९२६ वत्सरेऽयं 'महाराजा' संस्कृतकालेजे (आंगलपद्धतिप्रचालिते 'इंटर' कालेजे परस्तात् 'डिग्रीकालेजे') हिन्दीसंस्कृताध्यापकपदे तेनैव श्री श्यामसुन्दरशर्मणा प्रतिष्ठापितः । तत्रानेन संस्कृतपाठनस्य नवीनां शैलीमाविष्कृत्य, व्याकरणरूक्षरटनातः पूर्णं नियमानां सरलया प्रायोगिकपद्धत्या हृदयङ्गमीकरणमुखी स्वकीया पद्धतिरारब्धा येन तदात्वे सर्वस्मिन्नपि शिक्षाजगति तस्यास्य ख्यातिः प्रसृता । उद्दण्डाच्छात्राः, विनमिताः: संस्कृतकक्षासु यदा पूर्वं द्वित्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव छात्रा अभूवँस्तदा एतस्य काले पञ्चाशत्तोऽप्यधिकं विद्यार्थिन: समागच्छन्ति स्मेति प्रवेशाद्वञ्चिता अपि बहवः क्रियन्ते स्म ।

अस्यामेव पद्धतावाधारितं पाठ्ययपुस्तकं 'संस्कृतसुबोधिनी' ति नाम्नाऽनेन परस्ताद्विलिखितम् (भागद्वये) यद्बहुकालपर्यन्तं राज्यशिक्षाविभागे पाठ्यपुस्तकत्वेन निर्धारितमासीत् । लोकतन्त्रात्मके शासने पुस्तकमिदं परिवर्तितम्, १९३० ई० वत्सरेऽयं सकलसंस्कृतविद्यालयानां निरीक्षकपदमलभत । तत्रापि दूरदूरस्थप्रदेशेषु स्थितासु पाठशालासु जयपुरशिक्षाविभागेन प्रचालितानां प्रवेशिकोपाध्यायशास्त्र्याचार्यपरीक्षाणां Affiliation प्रचारं विधायाऽनेन जयपुरशिभागाधीन-सहायता प्राप्त (Aided) विद्यालयेषु महती वृद्धिः कृताऽभूत् ।

तदैव संस्कृतगाथासप्तशती-साहित्यवैभवादिग्रन्थानां प्रकाशनमभूत् 'निर्णयसागर, बम्बई' तः । एतत्सुहृदः पं० श्रीगिरिधरशर्मचतुर्वेदाः संस्कृतकालेजाध्यक्षास्तदाऽभूवन् । व्याकरणाचार्य पं० श्रीचन्द्रदत्त ओझा, पं० सूर्यनारायणाचार्याः, श्रीलक्ष्मीरामस्वामिमहाभागाः, श्रीसोमदेवगुलेरी (पं० श्रीचन्द्रधरगुलेरिणः सहोदराः) प्रभृतीनां विद्वन्मित्राणां गोष्ठीषु त्वयमाबाल्यमासीदन्तभुक्त इति तदाऽस्य कवित्वख्यातिः शनैः शनै र्ववृधे । तदैव १९३४ वत्सरे म. म. पं० गिरिधरशर्मभिरयं संस्कृतकालेजे साहित्यविभागाध्यक्षपदे गृहीतः । अस्मादेव पदात् सन् १९४२ वत्सरे सोऽय विश्रामं जग्राह ।

विश्रामानन्तरम्

अल्पीयस्येव वयसि विश्रामोऽनेन गृहीत इति पर्याप्तसेवावर्षाणामभावे विश्रामवृत्ति (Pension) रपि नाधिगता पर्याप्ता । "राज्यसर्वकारो मदीयसेवानां मूल्यं केवल ४२) द्विचत्वारिंशद्रूप्यकाणि ददाति, यत्खलु मदीयस्यैकस्य भृत्यस्य मासिकवेतनायावश्यं पर्याप्तं भवति" इति सविनोदमयं कथयति स्म ।

'विश्रामग्रहणं' खलु नाम्नैवाऽभूत् । वस्तुतस्तु विश्रामानन्तरमनेनाधिकं परिश्रान्तं साहित्यसेवायाम् । १९०४ वत्सरादारम्य यत् 'संस्कृतरत्नाकर'पत्रं प्रकाशयितुमारब्धं, तत्सम्पादकत्वनिर्वाहोऽनेन १९५० वत्सरं यावद्विहितः, मध्ये कतिपयवर्षाणि पं० श्रीसूर्यनारायणाचार्योपि सम्पादनमकरोत् । 'वेदाङ्क' आयुर्वेदाङ्क, शिक्षाङ्क, दर्शनाङ्केतिनाम्ना चत्वारो विशेषाङ्क-ग्रन्थाः प्रकाशिता येषां सम्पादनमनेन विहितम् ।

'जयपुरवैभव' नामककाव्यग्रन्थस्य प्रकाशनं, 'संस्कृतसुधा' नामकप्रारम्भिक-पाठ्यपुस्तकलेखनं, 'गोविन्दवैभव' लेखनं, 'सुलभसंस्कृत'-नामकराज्यसर्वकारीयपाठ्यपुस्तक-लेखनं राजस्थान प्राच्यविद्या शोधसंस्थान (Rajasthan Oriental Research Institute) स्यानुरोधेन 'ईश्वरविलास' नामकस्यैतिहासिकमहाकाव्यस्य टीका, ऐतिहासिकटिप्पण्यश्चानेन लिखिताः, सम्पादनं च विहितम् । एवं 'पद्यमुक्तावली'-'वृत्तमुक्तावली' इत्याख्यग्रन्थद्वयस्य टीकासम्पादनादिकमपि तत एव विहितम् ।

अमुद्रितग्रन्थाः

भट्टमहाभागा मृत्योर्मासचतुष्टयात् पूर्वमपि प्रतिदिनं प्रायो होराचतुष्टयं यावल्लेखनकार्यं-निर्वाहियामासुः । एतदनन्तरं नेत्रज्योतिषो मान्द्यान्न तावन्तं समयं कार्यं कर्तुं प्राभवन् । किन्तु विश्रामानन्तरं विंशतिवर्षेषु एतैर्निम्नलिखिता मौलिकग्रन्था विलिखिता येषां पाण्डुलिपयःप्रकाशनार्थं सन्नद्धीकृता अद्यापि प्रकाशकं प्रतीक्षन्ते ।

१. भारतवैभवम् (भारतीयेतिहासस्य संक्षिप्ता रूपरेखा' देशभक्तिपूर्णा लघुकथाश्च)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्याणामादिभाषा (संस्कृतभाषाया ऐतिहासिकं, भाषाशास्त्रीयं च विवेचनम्)।

धातुप्रयोगपारिजातः (व्याकरणस्य धातुमुखं विवेचनं धातूनामकारादिक्रमेण विश्वकोषविधया रूपाणां समीक्षा)।

काश्मीरकमहाकविर्बिल्हणः (बिल्हणस्य काव्यानां मीमांसा, आलोचनात्मकमध्ययनम्)।

स्तुतिकुसुमाञ्जलेः (जगद्धरकृतायाः) हिन्द्यनुवादः।

समस्याविलासः (समस्यापूर्तिपद्यानां संग्रहः)

काव्यकुञ्जः (मुक्तकरचनानां संग्रहः)

रसमीमांसा (भारतीयसाहित्ये रससिद्धान्तानां सरलं छात्रोपयोगि विवेचनम्)।

भारतीपत्रिका

१९५० वत्सरादनन्तरं 'संस्कृतरत्नाकर' पत्रस्य प्रकाशनं अ. भा. सं. सा. सम्मेलनस्य वाराणसीस्थ केन्द्रीयकार्यालयात्प्रारब्धमितिसम्पादनमप्येतस्य काशीस्थमहादेवपाण्डेय-नागेशोपाध्यायेतिप्रथितविद्वद्द्वयेनाङ्गीकृतम्। तदनन्तरं भट्टमहाभागैः सम्पादनादपि विश्रामो गृहीतः। परन्तु विश्रामोऽयं केवलं वर्षद्वयायैव सिद्धः। १९५२ वत्सरे तु जयपुरात् प्रकाश्यमानाया 'भारती' पत्रिकायाः सम्पादनमनेनानुरुद्धे नाङ्गीकृतं यन्मृत्युपर्यन्तं सपरिश्रमं निर्व्यूढम्।

निःस्वार्थवृत्तिः

एवं राज्यसेवातो विश्रमानन्तरं मृत्युपर्यन्तं साहित्यसेवा नाऽनेन केवलं स्वान्तःसुखाय, अयाचितं, निःस्वार्थं च विहिता या कतिपय-वर्षानन्तरमभूतपूर्वेव प्रतीता भविष्यति। यथा हि मया पूर्वमुक्तम्, संस्कृतसेविनां प्रवृत्तौ यन्महत् परिवर्त्तनमस्मिन् युगे समागतं तदिदमेव यत् पूर्वतनानां विदुषां जीवनं, प्राणनं, आचारव्यवहाराः, वार्त्तालापाः, गोष्ठ्यः-सर्वमपि संस्कृतमयमेवाऽभूत्। तत्र धनलिप्साया, यशोलिप्साया अथवा उपकारप्रत्यायनस्य गन्धोऽपि नाभूत्। अद्य संस्कृताध्यापका यद्येकहोरामपि छात्रं कंचन गृहे पाठयन्ति तर्हि दक्षिणां (Tuition fee) जिघृक्षन्ति, वेतनवृद्धये लालायिता भवन्ति, एकं लेखमपि लिखन्ति चेद्रायल्टीं (Royalt) याचन्ते। संस्कृतं तेषां कृते व्यवसायोऽस्ति (Profession), जीवनस्याङ्गं न। महदिदमन्तरम्। भवन्तो न विश्वसेयुर्यत् पितृचरणानां प्रायः पञ्चविंशतिग्रन्था अद्यावधि प्रकाशिताः किन्त्वेकस्मादपि ग्रन्थादेकोऽपि पणो रायल्टी रूपेण न मिलति। 'निर्णयसागरेण'सर्वे ग्रन्था निजसात्कृताः केवलं सम्पादनावसरे शोधपत्रपठनस्य (Proofreading) दक्षिणा शतं वा द्विशतं वा रूप्यकाणि दत्तानि। काशी 'ज्ञानवापीतः' प्रकाशितस्यैकस्य पुस्तकस्य रायल्टी निर्धारिताऽभूत्प्रकाशकमहोदयस्यौदार्येण, या मध्यस्थव्यक्तिभिः सानन्दं भुक्ता। राज्यसर्वकारद्वारा पाठ्यपुस्तकानां राष्ट्रीयकरणानन्तरं विलेखिते पाठ्यपुस्तके सहस्ररूप्यकाणां दक्षिणाऽनेन लब्धाऽभूत्। सा जीवने एकमात्रं 'पुस्तकलेखनाद् आयः' इति शीर्षकान्तर्गतं लेखितुं शक्यते। पुरातत्त्वसंस्थानात् पुस्तकानां प्रतिपृष्ठं पारिश्रमिकं यदमिलत्सकृदेव, तदपि वाऽऽयरूपेणाऽयं लब्धवान्।

विद्यार्थिनां गृहे पाठनस्य, पत्रसम्पादनस्य, च वृत्तेः स्वप्नेऽपि कल्पना तदानीन्तनैर्विद्वद्भिर्न कृताऽभूत्, यां वयं पामरा आधुनिका लोलुपतयाऽधिकारं मन्यामहे हन्त! युगपरिवर्तनस्य कियद्भीषणं स्वरूपम्!!

साहित्यग्रन्थानां टीका, सम्पादनं च

काव्यलेखनादध्यापनाच्चापि गुरुतरं स्थायितरं च सहित्यसेवाकार्यं यदेतैः कृतं तन्मूर्धन्यानां साहियग्रन्थानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषतो जगन्नाथपण्डितराजरचित 'रसगङ्गाधर' स्य संशोधनं, सम्पादनं, टीकां च विधाय। काव्यमालायां प्रकाशितस्य साहित्यसिद्धान्तानां शास्त्रीयविवेचनापरस्य मूर्धन्यग्रन्थस्यास्य साहित्याचार्यपरीक्षायां निर्धारणं तु प्रायः सर्वाभिरेव परीक्षासंस्थाभिः कृतमासीत्, परन्तु तदाऽस्य शुद्धं सटीकं च संस्करणं न कुत्राप्युपलभ्यत। नागेशटीका 'गुरुमर्मप्रकाशा' ख्या निर्णयसागरेण याभूत्प्रकाशिता, सा टिप्पणीतोऽपि लघीयसी, निराशाजनिका चाभूत्। मूलपुस्तके भृशमशुद्धः पाठः, भ्रामिका मुद्रायन्त्राशुद्धयः, किमपि शुद्धं संस्करणं न, कुत्रापि टीका न, न च कश्चन बोधकः एवं विधायां स्थितौ साहित्याध्यापका ग्रन्थमिमं 'गजनिमीलिकामकृत्वा अध्यापयितुं नाशकन्' साहित्याचार्यकक्षायामध्यापयताऽनेनापि भूयांसि कष्टानि सोढानि, अनुभूतं च बहु काठिन्यम्। यथा कथंचित् स्वबुद्धया शोधनं Emendations. विधाय, पदच्छेदादि, प्रघट्टकादि च निर्माणेन पुस्तकमिदं संशोधितम्। 'सरलाख्या विषयविशदंकरणी टीकालिखिता, समीक्षात्मिका विस्तृता भूमिका रचिता, १९३९ वत्सरे च निर्णयसागरात् सर्वप्रथमं शुद्धमिदं संस्करणं प्राकाश्यत, यद्धि त्वरितमेव विक्रीतं, समाप्तं च।

'रसगङ्गाधरस्य' सर्वप्रथमसंस्कारस्वरूपेणानेन या सेवा विहिता, सा गुणग्राहिभिर्विद्वद्भिः समस्तेऽपि भारते सुभृशंप्रशंसिता। एतदनन्तरं तु बहुभिरेव विद्वद्भिरस्य संस्करणस्याधारेण टीकाटिप्पणादिसहितानि नवनवानि संस्करणान्यस्य प्राकाश्यन्त, अनुवादा अपि विहिताः, कैश्चन स्वस्वभूमिकास्वाभारोऽप्यस्य पूर्वसम्पादकाय प्रकटितः, बहुभिश्च महापण्डितम्मन्यैरेतादृशस्य व्यर्थविनयस्यानावश्यकत्वं मन्वानैर्नेदमपि कष्टं कर्तुं प्रसादः कृतः। जम्मलमडकश्रीमाधवरामशास्त्रिणा तेलगुभाषायां, अहमदाबादस्य श्रीरामचन्द्रबलवन्त आठवले महोदयेन महाराष्ट्रभाषायां च रसगङ्गाधरस्य योनुवादः कृतस्तत्रापि सम्पादकायास्मै धन्यवादा आभ्यां प्रदत्ताः।

स्व० पं० श्रीपुरुषोत्तमचतुर्वेदविहितोऽस्य प्रथमाननस्य हिन्द्यनुवादो भट्टमहोदयेन संशोधितात् संस्करणादस्मात् पूर्वमेव प्रकाशितोऽभूत्। द्वितीयाननं परस्तात् प्राकाशि। तृतीयाननमप्यधुना प्रकटितम्। पुस्तकमिदमपि मूर्धन्यविदुषा विनिर्मितमित्यतीवोपयोगि, सहायकं चाभूत्। किन्तु मूलसंस्करणे कृतश्रमस्य सम्पादकस्यास्य काचन सेवाऽस्ति, सा संस्कृतसाहित्येतिहासे स्मरणीया स्थास्यति।

एवमेव कादम्बर्याः संपादनं, 'चषक' टिप्पणी चानेनकृते। (१९४१ वत्सरे प्रकटिता निर्णयसागरादियम्।) 'गीतगोविन्दस्य सम्पादनमप्यनेन निर्णयसागरानुराधेने विहितम्' 'संस्कृतगाथासप्तशती' हालकृतगाथासप्तशत्याः संस्कृते समच्छन्दोऽनुवादरूपा विलिख्य तट्टीकया 'व्यङ्ग्यसर्वङ्कषया' समीक्षापरया विस्तृतभूमिकया च सहिताऽप्यनेन प्रकाशिता। 'गाथारत्नसमुच्चय' इति नाम्ना एतस्याः सुन्दरगाथानां चयनं सटीकं, सभूमिकं स्वयमेव प्रकाशितं यस्य प्रतयोऽद्यापि विद्यन्ते लब्धुं शक्याश्च। 'शिलालेख–ललन्तिका' नाम्ना प्राचीनशिलालेखानां कतिपयेषां संग्रहः, सम्पादनं, टिप्पण्यश्चानेन निर्णयसागारात् प्रकाशितम्। इदं पुस्तकं शास्त्रिपरीक्षापाठ्यत्वेनाप्यस्ति नियतं राजस्थाने।

हिन्दी-साहित्य-सेवा

जयपुरीयमहाराजकालेजे सोयं हिन्दीप्राध्यापकोऽप्यभूत्। एतत्प्रचालितहिन्दीसाहित्यपाठशालातो भूयांसः स्नातका विनिर्गता येषु बहवोद्य राजस्थाने हिन्दयाःसाहित्यकारेषु स्थानं लभन्ते। रीति कालीन-साहित्यस्यायमाचार्योऽभूत् 'बिहारि' कवेर्दोहानां संस्कृतेऽवतारणा समच्छन्दसि (दोहायामेव) याऽनेन कृता सा 'विहारिविलासः' इति नाम्ना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथक् खण्डरूपेण 'साहित्यवैभव' काव्ये प्रकाशिता। हिन्दी संस्कृतसाहित्यिका एनां सुभृशमभिरोचयामासुः। 'संस्कृतमें बिहारी' इति शीर्षको लेखोऽस्य बिहारिणः संस्कृतेऽनुवादं कृतवतां कवीनां विमर्शपरः प्रकाशितो हिन्दी-पत्रिकासु यस्योपरि श्रीकिशोरीदासवाजपेयिना सह धारावाहिक-लेखरूपेण बहुकालं यावत् क्षोदक्षेमः प्रवृत्तः साहित्यरसिकानां च चर्चाविनोदायायं समभूत्।

वाल्मीकीयरामायणे विभीषणशरणागतिप्रसङ्गस्य सुरुचिर-मनोरञ्जक-कथा प्रकारानुसारि विवेचनं 'शरणागति रहस्य' नाम्ना हिन्दीपुस्तकेनानेन विहितं यद् गीता प्रेस, गोरखपुरतोऽद्यापि सुलभम्।

'सरस्वती' 'माधुरी' 'राष्ट्रभाषा', 'जयभूमि' प्रभृति हिन्दी-पत्रिकासु, गांधी, पोद्दार–महारावल प्रभृत्यभिनन्दन–ग्रन्थेषु चास्य लेखा बहवः प्राकाश्यन्त।

समाजे सम्मानः

गुणग्राहिभिः संस्कृतविद्भिः संस्कृतसेवातोऽस्य परितुष्य सभा-सम्मेलनादिष्वस्य यत् सम्माननं विहितं तन्नाऽपरिचितं समीक्षावताम्। अ. भा. सं. सा. सम्मेलनस्य दिल्ली-अधिवेशने, अन्यत्र च कविसम्मेलनाध्यक्षपदेऽयं बहुधाऽऽरोपितः। राजस्थान सं. सा. सम्मेलनस्य द्वितीयाधिवेशने (सन् १९५०) बीकानेरनगरेऽयं साभापत्ये निर्वाचितः। राज्ये संस्कृतभाषायास्तच्छिक्षायाश्च समीक्षायै नीतिनिर्धारणाय च राजस्थान सर्वकारेण या विशेषज्ञसमितिः (Expert Committee) श्रीलक्ष्मीलालजोषि-महोदयानामाध्यक्ष्ये नियमिताऽभूत्तस्याः सदस्यत्वे, सोऽयं राज्यपालमहोदयद्वारा मनोनीतोऽभूत्। 'राजस्थान-साहित्य-अकादमी'ति नाम्ना सुप्रथितया संस्थया स्वसंस्थापकसदस्ये-ष्वस्य नाम गृहीत्वा महदिदं सम्माननीयं पदमौदार्यपूर्व-कमस्मै साहित्यसेवापरितुष्टया प्रदत्तम्। वाराणसेयसंस्कृत-विश्वविद्यालयस्य प्रथमदीक्षान्तसमारोहावसरे समायोजितस्य महतः कविसम्मेलनस्य साभापत्यायायं निर्वाचितोऽभूत्। आकाशवाण्यां संस्कृतनाटकवार्त्तादिलेखनायासकृदा-मन्त्रितेनानेन 'मञ्जुला'ख्या सामाजिकनाटिका, बहूनां प्राचीननाटकानां रूपान्तराणि च विरचितानि, कविगोष्ठीषु प्रामुख्यं च निर्व्यूढम्। बड़ौदा-विश्वविद्यालयेनातिरिक्त-व्याख्यानं प्रदातुं (Extension lectule) निमन्त्रितेनानेन रसगङ्गाधरमाधारीकृत्य रससिद्धान्तसमीक्षापरं व्याख्यानद्वयं तत्र कृतम्, सन् १९५६ वत्सरे।

एतन्निर्मितां 'शिखरणीमालां श्रुत्वा प्रसीदता अखिल-भारतीय सं. सा. सम्मेलनस्य पंचविंशाधिवेशनेन सन् १९३६ वत्सरे 'कविशिरोमणि' इत्युपाधिनाऽसौ सत्कृतः। भारत-धर्ममहामण्डल, वाराणसीतः 'साहित्यवारिधि' रित्युपाधि-मयमलभत। 'कविसार्वभौम' इत्युपाधिना मोहमयीस्थ वेल्लनाटीयतैलङ्गसभयाऽयं सभाजितः।

राजस्थान-सर्वकारीय-संस्कृतशिक्षासञ्चालनालयस्यानुरोधोपरि-राजस्थानसर्वकारेण कतिपयवर्षपूर्वं त्रिसहस्र-मुद्रात्मकः साहित्यकारपुरस्कारोऽप्यस्मै समर्पितोऽभूत्। सर्वमिदं कवितागुणग्राहिणां निश्छलस्नेहस्यैव विलसित-मित्ययं बहुधाऽवोचत् "यस्य जीवनस्यारम्भो मया ऋण-ग्रस्तायां स्थितौ, सुमहति परिवारे, उपेक्षामये च वातावरणे विहितस्तस्मिन्नेव जीवने यत् किञ्चित्सरस्वतीं निषेव्य, कवि-कर्मणो चापियत् किञ्चित्प्रयत्य यदपि किञ्चिन्मयोपार्जितं तत्सर्वमपि समाजायैव विहायाहं प्रस्थास्ये," इति बहुधाऽयं कथयति स्म।

अद्याहं विचारयामि यत्स्वकीयसाहित्यरूपेणानेन कियान् खलु प्रभूतो निधिरस्मै समाजाय समर्पितः। एतद्विलिखितानां ग्रन्थानामेव संख्यां कर्त्तुमहं प्राभवम्, न खलु लेखानां,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथानां, सम्पादकीयलेखानां, समाचारटिप्पणीनां, समालोचनात्मकं-टिप्पणीनाम्-विनोदालापानां (Jokes) व्याख्यानानान्यनिबन्धानां च। प्रभूता हि सेयं सामग्री न सहजमेवेयत्तया निर्धारयितुं शक्या। चतुर्दशवर्षावस्थातः संस्कृते लेखनमारब्धवताऽनेन चतुःसप्ततिवर्षपर्यन्तं निरन्तरं, दैनन्दिनो लेखनकार्यक्रमो नैकं दिनं सकृदपि परित्यक्तः। मृत्योरेकं दिवसं पूर्वमपि 'परीक्षकप्रतिवेदन' रूपेण किंचनायं लेखयन्नेव मया दृष्टः कस्तदाऽजानात् यद् हृदयाभिघात (Heart attack) वशाद्धोराचतुष्केनैव सर्वस्यास्य जीवननाटकस्य स्वप्नवदेवमन्तो भवेत्! चरमे वयसि स्वनिर्मितग्रन्थानां विनोदार्थं वाचनं, काव्यकृतीनामवकाशसमये समाम्रेडनं चास्य दैनिककार्यक्रमस्याङ्गमभूत्सम्पन्नम्। मृत्युदिवसस्य प्रातरेव स्नानावसरे दैनन्दिनकार्यक्रमानुसारं निम्नलिखितं 'सवैया' पद्यं स्वनिर्मितमाम्रेडयन् मयाऽयं श्रुतोऽभूत्—

"जन्मनि जातु कृतं न हितं मम देवगणो दुरितं किमपोहतु?
जाह्नवि!कं शरणं परियामि? ममोद्धरणं किल कः परिशोचतु?
दीनमुपायविहीनमिमं दयया परिगृहच गिरं मम बोधतु-
देहविमोकदिने भुवनेश्वरि! गात्रमिदं पुलिने तव लोठतु"।

* शोक-प्रस्तावाः *

भारतविश्रुतस्य कविशिरोमणेः पण्डितप्रकाण्डस्य संस्कृतसाहित्यसार्वभौमस्य भट्टश्रीमथुरानाथ-शास्त्रिणः स्वर्गारोहणेन शोकमनुभवन्त्यो निम्नलिखिताः संस्था दिवङ्गतायात्मने शाश्वतीं शान्तिं, तत्परिवारजनेभ्यश्चाघातमिमं सोढुं शक्तिं भूतभावनाद्याचमानाः अद्य यावत् शोकप्रोस्तावान् पारितवत्यः—

(१) अ. भा. सं. साहित्यसम्मेलनम्, देहली
(२) राजस्थान सं. सा. सम्मेलनम्, जयपुरम्
(३) रात्रिसंस्कृतविद्यालयः, संस्कृतवाग्विवर्द्धिनी परिषद्, जयपुरम्
(४) वैदिकसंस्कृतिप्रचारकसंघः, जयपुरम्
(५) श्रीधन्वन्तरी सेवासमितिः, जयपुरम्
(६) बीकानेर संस्कृतसाहित्यसम्मेलनम्, बीकानेरः
(७) हिन्दी विश्वभारती, बीकानेरः
(८) संस्कृत-साहित्य-सदनम्, पूना
(९) राजकीय-संस्कृत-कालेजः, अजमेरः
(१०) संस्कृत प्रचार परिषद्, जयपुरम्।
(११) राजकीय-डिग्रीकालेजः, सीकरः

महामहिम्ना राजस्थान-राज्यपालेन डा० सम्पूर्णानन्दमहाभागेनापि स्वकीयः संदेशः प्रहितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविचक्रवर्ति-श्रीमथुरानाथभट्टानां स्वर्गप्रयाणावसरे

* शोकोद्गारः *

सद्योऽनवद्य-रसपूरितगद्यपद्य—
संपादनैककुशलः कविचक्रवर्ती ।
शृङ्गाररूपरसराजनवावतारः
श्रीमंजुनाथविबुधोऽद्य दिवंगतो हा ॥१॥

कादम्बरीरसास्वादमदिरप्रतिभाजुष ।
क्रुष्टा टीका कृता येन मंजुनाथोऽद्य नास्ति सः ॥२॥

रसगंगाधरग्रन्थोदुरूहग्रन्थिसंकुलः ।
सुगमोऽकारि टिप्पण्या येन हा स न जीवति ॥३॥

सर्वेऽपि कवयो दृष्ट्वा यस्य साहित्यवैभवम् ।
मन्यन्ते दीनमात्मानं मंजुनाथः स हा गतः ॥४॥

कविता विधवा जाताऽमरभाषा मृतोपमा ।
शृङ्गारो नीरसो जातो मंजुनाथे दिवं गते ॥५॥

देवभाषासमस्यायै देवसाहाय्यकांक्षया ।
देवलोकमितो यातो मंत्री संस्कृतसंसदः ॥६॥

भूयासः कवयो लोके रसभावपरायणाः ।
मंजुनाथवदेतेषु प्रतिभा प्रतिभाति नो ॥७॥

साहित्यसूर्ये कवि-मंजुनाथे
याते कलाभिः सकलाभिरेषः ।
साकं, कलानाथ उदीयमानः
कर्ता प्रकाशं जगतीति तोषः ॥८॥

दामोदराचार्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत सेविसमाजेऽनभ्रोऽसौ वज्रपातः !!!

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, झालावाडस्थः (राज०)

अहह ! हा, हन्त !! हन्त !!! तमिममतिदारुणं महाशोक दायकं दुस्संवादं जानतामस्माकं हृदयं शतधा विदीर्यते, बत दुःखवेदनाव्याकुलं च विषीदतितमाम्, यद्धि विगते ग्रीष्मर्तौ ज्येष्ठ-मासे, कृष्णपक्षे नवम्यां तिथौ (४, जून १९६४ दिनाङ्के) गुरुवासरे, प्रातः काले हृदयगतिरोधाद् भारतविख्याता-नाम् कविशिरोमणीनां देवर्षि,भट्टावटङ्कानां विद्वत्कुलमूर्द्ध-न्यानां स्वनामधन्यानां मथुरानाथशास्त्रिवर्याणाम् साहित्या-चार्य-व्याकरणशास्त्रप्रभृति-विविधविरुदोपाधिभूषितानां मञ्जु-नाथेत्युपनामकानां पण्डितमहाभागानां, राजस्थानप्रदेशस्य राजधान्यां जयपुरनगर्यां, तेषां स्वकीये निवासस्थले मञ्जु-निकुञ्जेति ख्याते निधनं बभूवेति ।

सत्यमेवासौ संस्कृतसेविसमाजस्योपरि महानर्थ-करो दुर्विषहचोऽनभ्रो हि वज्रपातोऽतीव दुःखशोक जनको महाव्याघातः ! स चासौ संस्कृतहितैषिणां कृते शोक-दुःखावसरः !! तैलङ्गभट्टतिलकानाममीषां शास्त्रिमहा-भागानां निधनान्न केवलं पण्डितवर्गस्यैवापि तु, समग्रस्य भारतराष्ट्रस्य, स्वदेशीयसभ्यसमाजस्य, संस्कृत-साहित्य-सेविविद्वन्मण्डलस्य, सनातनवर्णाश्रमधर्मस्य, महर्षिजन-सभ्यताया आर्य-संस्कृतेश्च तादृशो काप्यपूरणीया महती क्षतिर्बभूव, या चिरायापि पूरयितुं न शक्यते ।

तदस्मिन् महत्यनुतापक्लेशबहुलेऽपि समये वयं वैकुण्ठधामाश्रितानां भट्टश्रीमन्मथुरानाथशास्त्रिमहा-भागानां शाश्वतिकीं शांति परमेशितुः कामयामहे तथा तत्परिवारसदस्यान् प्रति समशोक-भागित्वं, समवेदनां सहानुभूतिं च स्वात्मनः प्रकटयामः ।

अथ तैलङ्गभट्टकुलतिलका मञ्जुनाथेत्युपनामानो भट्टश्रीमथुरानाथशास्त्रिमहोदयाः स्वाभिधानधन्या विद्वन्मूर्द्धन्याः संस्कृतपण्डितेषु भारतीयेष्वग्रगण्याः समग्रेऽपि देशे सुविख्याताः सुप्रतिष्ठिता महामहिम-महीयांसो विद्वांस आसन्निति सर्वेऽपि च संस्कृतसेवि-समाजस्य सदस्या निपुणं जानन्त्येव । महाभागानाममीषां परिचयप्रदानं नाम सहस्ररश्मये दीपदर्शनमिव स्यात्, परन्त्वत्र स्वर्गतानां तेषां शोकप्रसङ्गे तद्गुणगण समुदायास्तद्गता अस्माकं श्रद्धाभक्तिसमादरभावा स्तत्पु रुषार्थपरम्परास्तत्साहित्यसेवासम्भारास्तेषां संस्कृताभ्यु-दयायाजन्माचरिताः प्राणपणा-महाप्रयासास्तत्प्रगल्भ-प्रतिभाप्रकर्षास्तत्कर्मठत्वोद्योगास्तेषां स्वसमाज-सेवाव्यवसायाभियोगास्तेषामनुदिनमनुध्याताः सुरभारती-शुभचिन्तनपरम्पराविचारधाराः प्रेरणाप्रदा अध्य-वसायाः सत्यसङ्कल्पाश्च जनमिमं बलादिव किमपि वक्तुं नियुञ्जते । तत एव हि पङ्क्तीनामासां लेखको वराकः सर्वथा असमर्थोऽपि तद्विषये स्वलेखनीं व्यापा-रयितुं प्रवर्तते । तदिदं नास्थाने स्यादिति तत्परिचिताः सुहृदो बुधा मम मन्दमतेरनधिकारचेष्टां क्षाम्यन्तु ।

भट्टमहाभागाः श्रीमन्थुरानाथशास्त्रिचरणाः कविशिरो-मणयः साहित्याचार्याः संस्कृतवाङ्मयस्यासाधारणा विशिष्टा विद्वांस आसन् । इमे पदवाक्यप्रमाण-तत्त्वज्ञा अतीवमेधाविनः प्रखरतरप्रतिभाप्रभाभास्वरमतयः कुशाग्रधिषणा महामनीषिणो महाकवयश्चाभूवन् । अमी महाभागाः संस्कृतवाङ्मये सर्वास्वपि ज्ञान-विज्ञानविद्याप्रस्थानशाखाप्रशासु पारङ्गताः प्रवीणाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...धियो बभूवुः । विशेषतः संस्कृतसाहित्यशास्त्रे ...स्मिमे प्राचीनवाङ्मये, नवसर्गविधासु सर्वासु सर्वतन्त्र-...तन्त्रा अगाधज्ञानार्णवा अशेषशेमुषीजुषो विरेजुः । ...संस्कृतसाहित्यान्तर्गतानां सर्वासामपि सूक्ष्ममातिसूक्ष्मा-...णाम् पारिभाषिकीणां पुराणीनां नवीनानां च काव्यकृति-...समृद्धीनामिमे तात्त्विकं चूडान्तं ज्ञानं स्वाधीनं ...धिकारं ररक्षुः । गद्य-पद्य-नाटक-चम्पू-कथोपन्या-...ख्यायिकाप्रभृति निखिलमपि तत्त्वमक्षरनिबद्धं ...संस्कृत-वाङ्मयान्तर्गतमेतेषां सुपरिचितं सुविवेचितं ...सम्यगनुशीलितं करतलामलकवत् प्रत्यक्षमासीत् ।

अथ मञ्जुनाथाचार्यपादानां कविशिरोमणीनां रचना-...तिमणीनां पुण्यप्रभाज्योतिर्भिस्ते सहृदया अवश्यमेव परि-...ताः स्यु र्ये तेषाम् मञ्जकवितानिकुञ्जमिति तत्काव्यसंग्रह-...न्थान्तर्गतं 'साहित्यवैभवम्' 'जयपुरवैभवम्' 'गोविन्दवैभवम्' ...इति ग्रन्थरत्नत्रयीमेकवारमपि पठितवन्तो भवेयुः । अस्मिन् ...हि ग्रन्थरत्नत्रये मञ्जुनाथभट्टमहाभागैस्तै रेतै हिन्दी-उर्दू-...भाषाच्छन्दःसु नवशैल्या नव्यविधाभिश्च वर्तमानयुगोचितं ...सर्वमपि जगत्प्रवृत्ति-प्रपञ्चजातं मनोज्ञया संस्कृतभाषया ...अधिकारं सुरुचिरं काव्यात्मना व्यावर्णितमास्ते । गीतिकाव्य-...रचनादिकममीषां परमरमणीयं मधुरमधुरं नैसर्गिकं ललितं ...मञ्जुलं सदपि संस्कृतकाव्यसर्गे कामप्यभिनवरसमाधुरी-...मनोज्ञां शैलीमाविश्चक्रे । तदेतित्सर्वं जानन्त्येव बुधा-...स्तत्काव्यरचनानामभिज्ञाः सहृदया मार्मिकाः । अतोऽति-...रिक्तं बाणभट्टस्य सुविख्यातायां कादम्बरीकथायाममीभि-...र्भट्टमहोदयैः कृताश्छात्रप्रबोधिन्यष्टीकाष्टिप्पण्यो, हिन्दी-...भाषाया महाकवेर्विहारिलालस्याथ 'सप्तशत्या' दोहाच्छन्दसां ...समपद्यः संस्कृतानुवादस्तथैवंविधा अन्यान्या अनेका उप-...योगिन्यः संस्कृतग्रन्थरचनाः कविशिरोमणीनामेतेषां महा-...भागानां नैसर्गिकीं प्रतिभां नवनवरमणीयार्थवत्साहित्यसर्गो-...चितां नैपुणीं विद्वत्तां च सप्रमाणं प्रत्यक्षमेव परिचाययन्ति नाम नूनम् ।

अथ च महाभागैरमीभिर्मथुरानाथाचार्यैः स्वशिक्षाध्ययन-व्युत्पत्त्यादिविषये स्वयमेवोक्तम्—

"श्रीकाशीनाथशास्त्रिप्रवरकरुणया प्रापितो वाक्प्रवेशं, श्रीलक्ष्मीनाथशास्त्रिप्रपदपरिचयाच्छास्त्रपाण्डित्यमाप्तः । साहित्यं कृष्णाशास्त्रिप्रणिहितदयया लब्धवान्मातुलैः स्वै-र्वाग्गुम्फं लम्भितोऽसाविति विनयभराद्वन्दते मञ्जुनाथः ।१।"

अन्यच्च—

"काशीनाथशास्त्रिभिः प्रदर्शितप्रथमपथो
वर्द्धितमनोरथोऽनुमेने तत्प्रशासनम् ।
कौमुदीं मनोरमां सरत्नमथ शेखरं च
श्रीमद्धरिदत्तेभ्यः पपाठ दृढितासनम् ॥
मञ्जुनाथ एष लक्ष्मीनाथशास्त्रिसविधतोऽपि
शेखरेऽथ कौमुद्यां विवेद वादशासनम् ।
एवं लक्ष्मीनाथशास्त्रिचरणानुकम्पाबलाद्
भाष्यावधि सम्पादयामास शब्दशासनम् ॥२॥"

अपरं चापि—

"पञ्चनद विश्वविद्यापीठे सर्वमूर्द्धपदं
चरमपरीक्षार्थिषु सोऽयं समवाप्तवान् ।
जयपुरराजकीयशिक्षाप्रविभागादयो
व्याकरणे शास्त्रिपदमेष परिलब्धवान् ॥
साहित्येऽपि लेभे क्रमादेष किलाचार्यपदं
'रत्नाकर' मुत्प्रमदं सोऽयं संप्रथितवान् ।
शास्त्रमर्म शीलितवान्, वाग्मिनः प्रकीलितवान्,
वाचमथोन्मीलितवान्, किं वा न कलितवान् ॥३"

इत्थं वयं निश्चप्रचं वक्तुमुत्सहामहे यन्मथुरानाथभट्ट-महोदया इमे भारतवर्षदेशस्यास्य प्रथमकोटिकेषु विद्वत्तल्ल-जेषु गण्या अद्वितीया मनीषिप्रवरा आसन्निति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ क नु खल्वहं मन्दधीर्ज्ञानरङ्को मञ्जुनाथमहाभागानामुद्भटपाण्डित्यस्य परिचयं कारयितुं प्रभवेयम् ? केवलमेतन्मात्रमेव निवेदनमत्रममाधीनं यद्धि वर्तमानकालीना भारतीयाः संस्कृतज्ञा महापण्डिता महामहोपाध्यायाः स्वर्गीया मधुसूदनझा महाभागाः, स्वर्गीया गङ्गानाथझा महोदयाः, स्वर्गीया रामावतारपाण्डेयमहाभागाः, स्वर्गीयाः शालग्रामशास्त्रिणः, स्वर्गीया महामहोपाध्याया दुर्गाप्रसादद्विवेदास्तथान्येऽपि च तत्सदृशाः प्रोद्भटा भारतीया महापण्डिताश्चापि मथुरानाथशास्त्रिवर्याणामेतेषां प्रौढं पाण्डित्यं यथावसरं मुक्तकण्ठं प्रशशंसुः। वर्तमानकाले संस्कृतपण्डितेष्वग्रगण्या महर्षिकल्पा महामहोपाध्यायाः श्रीगिरधरशर्मचतुर्वेदमहोदयाः, कविराजा गोपीनाथाचार्यप्रवरामहामहोपाध्यायास्तथा श्रीमद्भारतीकृष्णतीर्थचरणादयः समर्था विद्वांसो जयपुरीया मैथिलाः काशिका गुर्जरा महाराष्ट्रिया दाक्षिणात्याः सार्वप्रादेशिका विद्वद्धुरीणाश्चापि दिवङ्गतानाममीषां मथुरानाथशास्त्रिमहोदयानां प्रौढं ज्ञानगम्भीरं च प्रस्फुरत् पाण्डित्यं प्रशंसन्ति।

महालेखकाः

भट्टश्रीमथुरानाथशास्त्रिप्रवरा न केवलं काव्यकृतित्वे कविशिरोमणयः, शास्त्रार्थतत्त्वनिरूपणे एव विविधविद्यापारावारपारीणाः, सकलकलाकलापकुशलाः समर्था विद्वांसोऽभूवन् प्रत्युत संस्कृतगद्यपद्यादिलेखने, हिन्दीभाषायाः साहित्यसेवाविधावपि चातीव कर्मठाः पटीयांसो रचनाकाराः सिद्धासनाः सिद्धलेखनीका वरिष्ठा महालेखकाश्चाप्यासन्। स्वस्य विद्यार्थिजीवनादारभ्य चतुःसप्ततिवर्षाणां स्वायुषोऽन्तपर्यन्तमिमे संस्कृतहिन्दीभाषयोरनेकासु पत्रपत्रिकासु सदा सर्वदा निरन्तरमविच्छिन्न मौलिकान् गद्यपद्यप्रबन्धान् कथानकाख्यायिकाः, लघ्वीः कथाः, सम्वादान्, रेखाचित्राणि, भ्रमणवृत्तान्तान्, हासपरिहासव्यङ्ग्यविनोदादीनि, गल्परचनाः पुस्तकालोचनाः, ग्रन्थसमीक्षाः, शोधान्वेषणानि, प्राचीनसाहित्यसम्पत्परिचयादीन्नाना विषयानधिकृत्य लिखन्तो विलिखन्तश्च तस्थुस्तथा वह्वीः स्वसाहित्यलेखरचनाश्च प्रकाशितवन्तः। नैकमपि हिन्दीमासपत्रं, संस्कृतपत्रिका वा तादृशी वर्त्ततेऽत्र भारते यत्र साहित्यस्य सर्वविधासु विधासु नानाशैलीक्रमैरमीभिर्मथुरानाथाचार्यवर्यैः मौलिकं नवीनं समुपयोगि च साहित्यं विरच्य सुलिखितं सुस्फीतं च प्रकाशितं न भवेत्। माधुरी-सरस्वती-प्रभा-सुधा-कल्याणादिषु हिन्दीभाषायाः सुप्रतिष्ठितासु पत्रिकासु तथा सुप्रभातसूर्योदय-अमरभारती-ज्योतिष्मती-पण्डित-पत्रिका-मधुरवाणी-प्रतिभा-मालवमयूर--शारदा-संस्कृत--रत्नाकर-भारतीत्यादिषु संस्कृतपत्रिकासु महाभागानामेतेषां मथुरानाथशर्मणां काव्यादीनि गद्यनिबन्धाः च यत्र तत्र प्रकाशिताः प्राचुर्य्येणोपलभ्यन्ते तत्र तत्र च ते प्रोज्ज्वलं देदीप्यमानास्तेषां महालेखकत्वं सुस्फुटं प्रमाणयन्ति। 'संस्कृतरत्नाकरस्य 'भारत्यास्तु' ते सम्पादका एव विरेजुस्तदिदं जानन्त्येव पाठकाः। येषां सज्जनानां प्रसङ्गतो भट्टमहाभागानामेतेषाम् तद्धस्तलिखितानां पाण्डुलिपीनां साक्षाद्दर्शनस्यावसरो नन्वाप्तो, यैर्वा साकं तेषां पत्रव्यवहारो वा भवति स्म, ते जानन्ति यदमीषां मथुरानाथभट्टपादानां हस्तलेखाक्षराणि कियत् सुन्दराणि स्वाभाविभाविकानि मुक्तामणिमालागुम्फितानीव मनोहराणि चारूणि रुचिराणि नातिह्रस्वाणि न च बहुदीर्घाणि सुस्पष्टाकाराणि स्फीतानि चासन् सन्ति वेति। लेखनकला शिल्पतन्त्रेऽमी भट्टमहोदयाः सुप्रवीणाः कलाकारा इवादर्शलिपिलेखका अभूवन्। वर्ण-शब्द-वाक्यांश-वाक्यानां यथायथं लेखने, विरामादिलिपिसङ्केतचिह्नानां यथास्थानं समीचीने साधु प्रयोगे, लेख्यविषयं विभाज्य तद्रूपरेखावधारणे, अनुच्छेदप्रकल्पने, शिरोरेखा विन्दुविसर्गादिसंस्थापने चैतेषां लेखनौचित्यं, चातुर्यं, पटुत्वं च नवाभ्यासशीलानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गदर्शकमादर्शभूतं चासीत् । एवं ते भारतीयेषु वरिष्ठ-केष्वपि महालेखका आसन् ।

पत्रकाराः

इतः पञ्चाशद्वर्षेभ्यः पूर्वं यद्यपि केचन समर्थाः कृतविद्वांसः संस्कृतभाषायाः पत्रपत्रिकाः काशीप्रभृतिक्षे-त्रेषु सम्पाद्य प्रकाशयन्ति स्म नाम नूनम्, परन्तु वर्तमान-युगानुरूपः संस्कृतपत्रकारितायाः विकाशक्रमस्य सूत्रपातो यदपेक्षं न सम्यक् स्थितिमाससाद । एवंविधे सङ्कीर्णेऽपि देशे काले स्थित्यन्तरे तैरेतैर्भट्टमहाभागैर्मञ्जुनाथशास्त्रि-भिर्महामहोपध्यायानां श्रीमद्गिरिधरशर्मचतुर्वेदमहोदयानां प्रेरणया तत्सहयोगाच्च जयपुरात् 'संस्कृत-रत्नाकरस्य' मासिक-पत्रस्य प्रकाशनमारब्धम् । बहूनि वर्षाणि यावत्त एते मथुरा-नाथशर्मभट्टाः पत्रस्यैतस्य सम्पादनकार्यं कुर्वाणा निरव-च्छिन्नं नियतवेलं च तत् सोत्साहं प्रकाशयन्तः स्वात्मनो वाग्देव्युपासनारसिकत्वं, स्वसमाजाभ्युदयाय जागरूकं सचेष्टत्वं, अधर्मधाराप्रवाहे संस्कृतज्ञानां जनानामुद्धाराय प्रयत्न-शीलत्वं, नवविचारक्रान्तिदूतत्वं, सम्पादनपटुत्वं, सिद्धस-म्पादकाचार्यत्वं च प्रमाणयामासुः । 'संस्कृत-रत्नाकरा' दनन्तर-मेभिर्भट्टकुलभूषणैर्मञ्जुनाथाचार्यवर्यैर्महाप्राणैः पुनर्जय-पुराद् 'भारती'-मासिकपत्रिकायाः सम्पादनं कृत्वा प्रामाणि-केन प्रकारेण तत्प्रकाशनं कुर्वद्भिः संस्कृताभ्युदयोद्धारप्रय-त्नान्दोलनं गतिशीलं सुरक्षितम् । सैषा भारतीपत्रिका संस्कृतपत्रपत्रिकास्वात्मनःपदं प्रतिष्ठां च स्वाधीनं रक्षन्ती अद्याद्यापि संस्कृतपत्रकारितायाः विकाशक्रमपथं परिष्कुर्वती विजयते । 'संस्कृतरत्नाकरे' 'भारत्यां' च मञ्जुनाथाचार्यैः-सम्पादकधुरन्धरैः समये-समये स्वलेखन्यग्राङ्कुरेण या हि सम्पादकीयाष्टिप्पण्यः, पुस्तकालोचनानि, 'संस्कृतसमाजस्य प्रवृत्तिसम्वादाः, सभासम्मेलनसमाचाराः, विविधविषय-गताः स्वदेशीया विदेशीयाश्च वृत्तान्ताः, विद्वत्परिचयाः, विज्ञापनानि पत्रादीनि वा सम्पाद्य-सम्पाद्य प्रकाशितानि तेषु तेषु स्तम्भेषु, तान्येव तेषां सिद्धपत्रकारत्वं, सफलसम्पा-दकत्वं, देशकालवित्त्वं, बहुश्रुतत्वं परिष्कृतरुचिसम्पन्नतां च स्फुटं विद्योतयन्तितमाम् । भट्टमहाभागानां सम्पादकत्वे 'रत्नाकरस्य' 'भारत्याश्च' 'आयुर्वेदाङ्कः' 'शिक्षाङ्को' मधुसूदन-झाभिनन्दनाङ्कात्मको दर्शनाङ्क' इत्याद्याः केचनातीवगम्भीर-रुचिरपाठ्यसामग्रीपरिपूर्णा बहिरङ्गान्तरङ्गरमणीयाः सचित्रा विचित्राश्च विशेषांङ्काः संस्कृतपत्रकारिताक्षेत्रे स्थायि-साहित्यनिधिरत्नभूता विजयन्ते । तदेवं मथुरानाथभट्ट-महाभागाः पत्रकारत्वेनापि समर्थाः सम्पादकाचार्याः 'पुराण-मित्येव न साधुसर्वम्' इति समर्थयन्तोऽतीव प्रगतीशीलाः । स्वसमाजस्य सङ्घटने, नेतृत्वावहने च सक्षमा धैर्यधनाः कर्मठास्तपस्विनश्च पत्रकारा आसन् ।

शिक्षाशास्त्रिणः

विद्वत्कुलसमादरणीया भट्टमहाभागाः श्रीमथुरानाथ-शास्त्रिवर्याः समर्थाः शिक्षाशास्त्रिणः शिक्षणपद्धतिपरिष्क-र्त्तारः, शास्त्राचार्याः, कुलपतिकल्पाः प्राध्यापकाश्चाभूवन् । 'महाराज-संस्कृतकालेजः, जयपुरम्' इति भारतभुवि सुप्रतिष्ठिते संस्कृतमहाविद्यालये बहूनि वर्षाणि यावत् प्राध्यापकपदमधिति-ष्ठन्तः परस्सहस्रेभ्यश्छात्रेभ्यः साहित्यशास्त्रमपाठयन् । ततः पुनः 'महाराजांग्लमहाविद्यालये, जयपुरस्थे' संस्कृत-हिन्दीसाहित्यविषयानध्यापयन्तः प्राध्यापककार्यं कृतवन्तः । कियन्त्यपि च वर्षाणि त एते जयपुरराज्यस्य शिक्षाविभागा-न्तर्गतानाम् संस्कृतपाठशालानां निरीक्षकपदे नियुक्ताः स्वनियोगं पर्यपालयन् । अत्र निरीक्षकत्वाधिकारिपदे स्थिता भट्टमहाभागाः संस्कृतशिक्षायाः, संस्कृताध्यापकानां चाभ्यु-न्नतये सर्वात्मना सपरिश्रमं च बहु प्रयतिरे ।

अथांग्लविद्याप्रचारबहुले, तथाविधसंस्काराचार-विचारदूषितेऽपि च शिक्षामण्डलवाताबरणे भट्टमहोदया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यप्रवरा मथुरानाथशास्त्रिपादाः शिक्षापद्धतिसुधाराय बहु पर्यश्रमन् । आंग्लशासकानां प्रभावादत्र भारते, तत्रापि च राजस्थानप्रान्ते शिक्षाविभागे बतांगलविद्याया एव नय-दुन्दुभिर्ध्वनति स्मांग्लशिक्षाशिक्षितानामेव सर्वत्र विजयध्वजोद्धूननं विजृम्भते स्म तदानीम् । इत्येवंविधे विषमे, संकीर्णे, प्रतिकूलेऽपि च परदेशीयविद्यायास्तमस्तोमघटाटोपाच्छन्ने शिक्षाभिक्षावातावरणे मञ्जुनाथभट्टचरणा हिन्दीसंस्कृत-वाङ्मयान्तर्गतानां पौर्वात्यविद्यानां तद्विदुषां पण्डितानां च प्रतिष्ठाप्रतिपत्तिसंरक्षणं, संस्कृतशिक्षापद्धतेः परिष्काराय प्रारम्भिकाच्छिक्षणादारभ्याचार्यकक्षापर्यन्तमत्युच्चशिक्षौपयिकं पाठ्यपुस्तकप्रणयनं, स्वयमन्यैश्च शालोपयोगिनां पुस्तकानां लेखनं, पाठ्यपुस्कान्तःपातिविषयाणामुपयुक्त-क्रमेणोत्तरोत्तरविकाशक्रमेणाभ्यासोदाहरणसंग्रहणमित्यादिना-नायोजनाबद्धं श्रमसाध्यान् पुरुषार्थानायासान् प्रयासांश्च भूयोभूयः समाचेरुः । पाश्चात्याडम्बरप्रधानेष्वपि शिक्षाधिकारिसदस्येषु संस्कृतविद्यायां मानप्रतिष्ठागौरवाणां, विपक्षाश्रयिषु दुराग्रहग्रहिलेषु चेतनाशून्येषु जडप्रायेषु तत्कालीनेषु, स्वप्रभावमुद्रासंस्थापनं नाम भट्टमहाभगानां तेजोमयव्यक्तित्वविशेषादेव सम्भवति स्म । इत्थं संस्कृतशिक्षा जगत्यपि चैते भट्टमहाभागा मञ्जुनाथपादाः किमपि लोकातिशायि पराक्रममाचेरुः ।

पाठनशैली

विद्वच्चक्रचूडामणीनां कविशिरोमणीनां भट्टमहोदयानां पाठनशैली प्रौढातीवार्थगौरवगम्भीरा समन्वयव्यतिरेकाभ्यां सूक्ष्मातिसूक्ष्मतत्त्वनिरूपणगह नापि सती शिष्याणां पात्रत्व-धारणाशीलस्वभावक्षमतानुगामिनी बभूव । क्वचित् प्रसङ्गानुसारं संश्लेषण-विश्लेषणपरा, क्वचित् प्रौढपाण्डित्यानुभव-गुणगणगरिष्ठापि च प्राञ्जला, मधुरमधुरापि परमतत्त्वोद्घोषणपरा, विनोदप्रचुरापि ज्ञानविज्ञानान्तःसारसरस्वतीव रसवती, विचित्राप्यत्युद्भट-प्रभावप्रकर्षसुस्फीता च समभूत् । तेषां सैषाध्यापनपद्धतिर्गम्भीरजटिलोद्ग्रथितानां, क्लिष्टातिक्लिष्टानामपि च विषयाणां निरूपणे शिष्यहृदयावर्जनी च बभूव । भट्टमहोदयानां पाठ्यविषयस्य सरलातिसरलया, बालबोधिन्या, प्रवाहगुणवत्या, स्वाभाविकया' संस्कृतभाषया व्याख्यानं ललितमञ्जुलैर्मर्मस्पृग्भिरुदाहरणैर्भूयोभूयः प्रकारैरनेकैर्भावबद्धं प्रबोधनं, मन्दमतिकेभ्यश्छात्रेभ्योऽपि करुणाकरुणया श्रमसाध्यया दयालुतया प्रहृष्टेनान्तरात्मना सधैर्यं विषयनिरूपणं, पाठितस्य विषयस्य पुनः पुनरुद्घोष्योद्घोष्यान्तेवासिनां हृदये संस्कारार्पणं, तस्य च क्रमेण स्थिरतापादनं, स्वानुभवप्रवचनपूर्वकं स्नेहाद्वात्सल्याच्चाध्यापनमिति तेषां पाठनपद्धतेरनन्यसुलभा विरलविरला अत्यूर्जस्वला भास्वराश्च गुणगणविशेषा आसन् । मञ्जुनाथभट्टाचार्याणां वक्तृत्वशक्तिः प्राणबलौजःस्फीता प्रतिपक्षिणामपि मनो हरन्ती, प्रसन्नगम्भीरा, सुखश्रवणार्थवती च समभूत् । यैश्च भाग्यशालिभिस्तेषां विद्वत्परिषत्सु भाषणप्रवचनशास्त्रार्थ-परिष्काराः श्रुतास्ते जानन्ति तेषां वाक्पतिकल्पानां व्याख्यानचमत्कारान् । त एते मञ्जुनाथाचार्याः प्रायशोऽनेकासु परिषत्सु, सभाधिवेशनेषु भाषणप्रव च नार्थं समामन्त्र्यन्त । तत्र च ते साधिकारं, सोहापोहं, सयुक्तिप्रयुक्ति-प्रमाणं निर्वाचितान् विषयानधिकृत्य तथा भाषन्ते स्म संस्कृते हिन्दीभाषायां च, यथा तद्वक्तव्यानां श्रोतारो विद्वांसोऽपि च जनास्तद्वाग्मितां, भाषणकौशलं, प्रखरतरपाण्डित्यं' दार्शनिकत्वं, ज्ञानं, विद्यां, योग्यतां, बहुश्रुतत्वं, मर्मवेदितां चोन्मुक्तकण्ठं प्रशशंसुः । किंविधमपि स्खलनमनभीष्टं मनागपि तद्भाषणे न कदापि जायते स्म । धाराप्रवाहं भाषमाणानां मथुरानाथशास्त्रिपादानाम् महाप्रभावशालि व्यक्तित्वं तदानीं सुतरां देदीप्यते स्म यदा ते सात्त्विकं विद्याभिमानमात्मनि दधतो भाषणे स्वात्माभिव्यक्तिं कर्तुं समुद्युञ्जते स्म । तदात्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रोतॄणां हृदय इत्थं प्रतिभाति स्म यथा स्वयं सुरभारती वाग्देवी सर्वशुक्ला सरस्वती शारदा तन्मुखे विराजमाना तज्जिह्वाग्रे ननर्तेव। मूर्तिमद्वाक्पतेरिव तदानीं तद्व्यक्तित्वं तेजोमयं, सरलसरलमपि ज्ञानगौरवगम्भीरं, प्रभविष्णवपि च सौम्यं खलु कृतविद्यानामपि कृते स्पृहणीयं प्रचकाशे भृशम्। अथ भट्टमहोदयानां कवितापाठस्तु तावत्तेषामेव प्रकारमौलिको लोकोत्तर इव रेजे। तेषां काव्यपाठे या हि स्वरमाधुरी, लालित्यं, वर्णोच्चारे स्पष्टता, यतिविरामक्रमसौष्ठवं, सशक्ततौजोगुणप्रभृतयस्ते तेऽशेषा विशेषाः प्रत्यक्षं भवन्ति स्म सचेतसाम् चक्षुष्मतां च सहृदयधुरीणानां भावुकात्मनां रसिकप्रवणानाम् ये वर्षशतानामभ्यासेन, महत्या साधनयापि च नान्येन केनाप्यात्मसात् कर्तुं सुशकाः। प्राप्तावसरं प्रायेण तदिदं दरीदृश्यतेऽनुभूयते च यद्धि कृतविद्यानां विचक्षणानां महापण्डितानामपि च यदा कदाभिसभं वाक्स्खलनं, मनोभङ्गश्चे ततःसंक्षोभश्च तुदतितमां, परन्तु मञ्जुनाथमहोदयानां सभासु देदीप्यमाने व्यक्तित्वे सदा सर्वदा किमपि तादृक् प्रशांततेजोमयत्वं, रुचिरगाम्भीर्यं निर्विकारत्वं, प्रसन्नाह्लादमयत्वं च विरेजे यत् पश्यन्तः प्रौढा विद्यावन्तो महामनीषिणो भव्या भद्राः पण्डिताश्चापि मुग्धसर्वान्तःकरणवृत्तयः 'साधु साधु! समीचीनम् !! किमु वक्तव्यम् !!! धन्योऽसि भट्टकवे !!! इति श्लाघावादशतैस्तान् भृशं प्राशंसन्। कथं न स्यादेवम् ? यतो हीमे मथुरानाथभट्टपादाः कविशिरोमणयः संस्कृतवाङ्मयस्यैकस्यैव ज्ञानगङ्गानिष्णाता केवलं नासन्नपितु नव्य-प्राचीनहिन्दीभाषायां, व्रजभाषायां, बङ्गीयवाण्यां, मैथिल्यां, गुर्जर्यां, राजस्थानीयायां तथान्यान्यासु भाषासु चापि व्युत्पन्ना अभूवन्। अनेकासां भाषाणां साहित्यमर्मं ते तत्त्वतो विविदुः। सभाचातुर्यं त्वमीषां मञ्जुनाथाचार्याणां जन्माजन्मान्तरोपार्जितैः पुण्योपचयैः सम्प्राप्तं निसर्गसिद्धमिवाभूत्। इमे जयपुरमहाराज्याश्रितानां समर्थविद्वत्परिवृढानां तैलङ्गभट्टविदुषां नैष्ठिके हि प्रोच्चब्राह्मणकुले विद्याविनयशीलसदाचारसम्पन्ने लब्धजन्मान आसँस्ततो महाराज्यवैभवानां भोक्तारः स्वयमपि च स्वपुरुषार्थबलादुपार्जितसम्पच्छ्रियः सर्वविधसभासु परिषत्सु समाजेषु प्रमुखं भागं ग्रहीतारो भुक्तभोगा धनधान्यवैभवसमृद्धिमन्तो यशस्विनो विख्याता विद्वांसश्चाभूवन्। तस्मादेवैते सहृदयाः संगीतचित्रादिललितकलानां मर्मज्ञा जनमनोविज्ञानवेत्तारो लोकमनोरञ्जननिपुणा रसिकशिरोमणयः कृतविद्या अनुभवशालिनश्चासन्। सत्यप्येवं ते सच्चरित्राः सदाचाराः स्वपुरुषार्थबलादुपार्जितान्याय्यादतिरिक्तं भोग्येऽपि वस्तुनि नितान्तं निःस्पृहा वितृष्णाश्च बभूवुः।

समाजसेवा

भट्टश्रीमथुरानाथशास्त्रिवर्याः संस्कृतविद्यायाः, संस्कृतसेविसमाजस्य, संस्कृतोपजीव्यानां भारतीयजनानां च श्रेयःप्रेयः साधनाय मनसा, वचसा, कर्मणा च यावज्जीवं महतीं प्रभूतां च सेवां सम्पादयामासुः। वर्षाणि यावत्ते सनातनवर्णाश्रमधर्मसम्मेलनस्य, जयपुरस्थाया वाग्वर्द्धिन्याः सभायाः राजस्थान-साहित्य-संगमस्य चैवमेवानेकासां विद्वत्परिषदां मान्याः सभापतयो मन्त्रिणो विशिष्टाः सदस्याः परामर्शतादारो वा सामान्यसदस्याश्च तस्थुः। आसां सर्वासां संस्थाप्रतिष्ठानपरिषदां कार्यकारिणीषु समितिषु, वार्षिकाधिवेशनेषु तथान्यान्येषु महोत्सवसम्मेलनेषु च त एते भट्टमहाभागा मथुरानाथाचार्या अहमहमिकया, कर्तव्यबुद्ध्या, प्रसन्नेन हृदा प्रमुखं भागं जगृहुस्तत्र तत्र च सर्वत्र ते नानाकार्यकलापान् प्रीत्या मनोयोगेन च सायासप्रयासं सोत्साहं सोद्योगं च सम्पादयामासुः। एवं विधानां समितिसम्मेलनानामधिवेशनान्युपस्थातुं ते प्रायेण स्वदेशस्यास्य भारतवर्षस्य सर्वानपि प्रान्तभागान् भूयोभूयो बभ्रमुः। यत्र कुत्रापि ते वव्रजुस्तत्र तत्राखिलभारतविख्यातैः पण्डितप्रवरैः कलाकारैः शिक्षाविशेषज्ञैर्गुणगणविशिष्टैर्जनैस्तेषां सहवासात् साह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चर्यात् सम्पर्काच्च मैत्रीभावः सौहृदं सख्यं परिचयघनिष्ठता विचारविनिमयाश्च बभूवुः। फलतस्तेषां परिचयक्षेत्रमनुभवक्षेत्रं चातीव व्यापकं विस्तीर्णं च बभूव। भारतीये संस्कृतसेविसमाजे क्व नु कुतो वा किं किं जायमानमास्ते, समविषमगुणा भिन्नरुचयः पृथक्प्रवृत्तयो विभिन्नस्वभावाः के के जनाः क्व नु कुत्र किं किं वा चेष्टमानाः सन्ति, संस्कृतसमाजस्योद्धृतिविधौ तदभ्युदयाय च कानि कानि तत्त्वानि विभूतिमन्ति सत्त्वगुणसम्पन्नानि समुपयोगीनि च वर्तन्ते, के च दोषा विजृम्भमाणाः किल त्याज्याः परिमार्ज्याश्च वर्तन्त इति ते तत्त्वत इदमित्थं बुबुधुः। परिणामतस्ते स्वसमाजस्योद्धाराय नीतिनिर्माणे, मन्त्रणायां, स्वोद्देश्यविधेयादीनां प्रचारे प्रसारे शुभाभ्युपायपरिचिन्तने च समर्था बभूवुः देशे सर्वत्र पर्यटनात् स्वसाध्यसिद्धेरतिरिक्तं प्रकारान्तरेण तेषां समर्थैर्विद्वद्भिः कर्मठैः कार्यकर्तृभिः सह परिचयेन साकमेव स्ववैदुष्यस्य, प्रतिभाप्रकर्षस्य, महत्तायाः, गौरवस्य, कुलशीलकर्मणां च परिचयोऽत्र देशेऽस्मिन् सर्वप्रान्तेष्वधिकाधिकं तेने। संस्कृतसेविसमाजस्य सम्मेलनाधिवेशनेषु भट्टमहाभागा इमे प्रायः सर्वत्र कविसम्मेलनेषु नित्यव्रताः स्थायिनः सभापतय इवासन्। कदाचिदेते 'काव्यप्रकाशस्य' प्रकरणविशेषाणां व्याख्यां विधातुं, कदाचित् 'रसगङ्गाधरस्य' गुरुगम्यग्रन्थग्रन्थीनपाकर्तुं, कदाचिन्नाट्यशास्त्रगतानां महतीनां शङ्कानां समाधानाय च मोहमयी-कालिकाता-बडौदा-पूना-इन्दौर-प्रभृतिषु स्थानेषु तत्तत्स्थानीयाभिर्विद्वत्परिषद्भिः संस्कृतसमाजैश्च सादरं ससम्मानं च समामन्त्र्यन्त। कदाचिद्व्याख्यानमालान्तर्गतं विषयविशेषमधिकृत्य भाषणप्रवचनार्थमाहूयन्त। कदाचिद्धामिकेषु कृत्येषु यज्ञयागादिषु शास्त्रीयं निर्णयं दातुमामन्त्र्यन्त मोहान्तैर्मठाधीशैः पुरोहितैर्धर्मसङ्घैः समाजैश्च त एते भट्टश्रीमथुरानाथाचार्यवर्याः। एवं ते सततं संस्कृतसेविसमाजस्य, सनातनवर्णाश्रमधर्मस्य, भारतीयसंस्कृतेः सभ्यतायाः साहित्यस्य शिक्षायाश्च संरक्षणे पोषणे प्रवर्द्धने च सन्ततं सन्नद्धा व्यस्तसमस्ताश्च तस्थुः।

न केवलमेतावदेवापि तु शिक्षासंसारेऽपि च मथुरानाथशर्मणां कापि महती प्रतिष्ठा प्रतिपत्तिर्यशोगौरवं च विजयते। यतस्तत्क्षेत्रेऽपि च इमे कमपि लोकातिशायिनं पुरुषार्थमाचेरुः। अनेकासां शिक्षापरिष्कारसमितीनां, पाठ्यक्रमनिर्द्धारणपरिषदां, हिन्दीसाहित्यसम्मेलनसञ्चालितानां परीक्षापटलसमीतीनां च ते सम्माननीयाः सदस्या नियुक्ता आसन्। एवंविधसङ्घटनेषु मञ्जुनाथपादाः परमेण मनोयोगेन, श्रमसाध्येन च पुरुषार्थेन, कर्मठतयात्मनः सहयोगं सहकारं चार्पितवन्तः। राजस्थानविश्वविद्यालयद्वारा सञ्चालितां एम. ए,. बी. ए. तथाइन्टर-परीक्षाणां ते हिन्दीसंस्कृतसाहित्यविषयकाणां प्रश्नपत्रनिर्मातारः परीक्षार्थिनां परीक्षकाश्च भवन्ति स्म। हिन्दी साहित्यसम्मेलनेन विहितानां साहित्यरत्नादिपरीक्षाणां चापि साहित्यभाषा-विज्ञानादिविषयाणां परीक्षकत्वं चक्रुः। संस्कृतसाहित्य सम्मेलनेन देहल्यां वर्तमानेन सञ्चालितानां परीक्षाणां परीक्षकाणां, च ते प्रमुखाः सञ्चालका आसन्। एवमेव पञ्चाम्बुविश्वविद्यालयादीनां नानासंस्थाप्रतिष्ठानविद्यापीठादिषु भट्टमहाभागानां सहयोगो बभूव। अथ च 'राजस्थानलोकसेवाऽऽयोगे' परीक्षणायामन्त्रितानां सार्वकारसेवार्थं प्रत्याशिनां चयनायान्तर्व्यूहेषु हिन्दीसंस्कृतविषययोस्तद्योग्यतापरीक्षणाय ते विशेषज्ञतया तत्सदस्यत्वेनायोगसभापतिभिरनेकशोऽव्रियन्त शिक्षाविभागमहाधिकारिभिश्च ते प्रत्याशिनां मौखिकपरीक्षार्थं सक्षमा विशेषज्ञा अमन्यन्त। एवंविधेषु सर्वेष्वपि कार्यकलापेषु त एते भट्टमहाभागा निष्पक्षगतं निरपेक्षं च न्याय्यं सत्योर्जितं स्वनिर्णयं प्रददुः। इत्थं नानाकर्मप्रवृत्तिषु व्यापृता मथुरानाथशास्त्रिणो महाभागाः परमया निष्ठयौदार्येण च स्वसमाजसेवायां देशसेवायांच स्वजीवनं समर्पयामासुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मसिद्धान्तो निष्ठास्था च

स्वकुलपरम्परया परिपालिते महर्षिजनप्रणीते सनातनवर्णाश्रमधर्मे मथुरानाथाचार्यचरणाः स्वास्थां निष्ठां च दृढयन्तो ऽभूवन्। श्रौतस्मार्तविधिविहितेषु धर्मकर्मसु ते श्रद्धामलघ्वीं दधुः। दार्शनिकदृशा त एते वाल्लभीं शुद्धाद्वैतसिद्धान्तसमर्थितां पुष्टिमार्गीयां भक्तिपद्धतिमङ्गीकुर्वाणाः परमवैष्णवा भगवति बालकृष्णे नवनीतप्रिये व्रजवल्लभे गोपाले गोपीजनवल्लभे श्रीकृष्णे परमात्मनि स्वात्मसमर्पणं कृतवन्त आसन्, वल्लभकुलाचार्यांश्च ते स्वधर्मगुरुं मेनिरे। यद्यपि श्रीकृष्णो भगवान् गोपीजनवल्लभो बालकृष्णस्तेषां स्वेष्टदेवः सर्वात्मनाराध्योऽभूत्तथापीमे भट्टमहोदयाः सर्वेश्वराद्वैतं समर्यादंमेनिरे। तस्मादेवैते स्वप्रणीतेषु ग्रन्थेषु मङ्गलाचरणप्रकरणेषु सर्वदेवसमभावं गणेश-सरस्वती-शिवाम्बिका- हयग्रीवादिदेवान् यथाप्रसङ्गं ववन्दिरे। स्वहृदि सन्ततं स्वेष्टदेवं श्रीकृष्णं भगवन्तं स्मरन्तो ऽपि च भट्टमहोदया मथुरानाथशास्त्रिणो ऽन्यासु भगवद्विभूतिषु भेददृष्टिं पूर्वाग्रहं सङ्कीर्णसम्प्रदायदुरभिमानं वा नाश्रयन्त। सदसद्विवेककुशलाः समदर्शनाः समधीतसर्वदर्शनाः शास्त्रानुभवाभ्यां स्वस्थचिन्तनपरास्त एते मथुरानाथभट्टमहाभागाः शङ्कर रामानुजादिभ्यः सर्वेभ्योऽपिपूज्येभ्य आचार्यचरणेभ्यस्तेषां सत्सिद्धान्तेषु च ससम्मानं श्रद्धाभावं निष्ठामास्थां विश्वासं चास्तिकत्वेन ररक्षुः। धार्मिका विवादाः सम्प्रदायाग्रहा वितण्डावादाश्च न तेभ्यो रुरुचिरे।

एवं विधिनां नानागुणगणसम्पन्नानां महाकवीनां, महाविदुषां महापण्डितानां, समर्थानां संस्कृतपत्रकाराणां, समाजसेवकानां, शिक्षाशास्त्रिणां, साहित्यमहोदधीनां, महालेखकानां भट्टश्रीमथुरानाथशास्त्रिमहाभागानां निधनान्न केवलं भारतीयविद्वत्समाजस्य, संस्कृतसाहित्यस्य, हिन्दसाहित्यसेविनां, शिक्षाजगतः, संस्थाप्रतिष्ठानानामनेकेषां, धर्मस्य, संस्कृतेः, सभ्यतायाश्चैवापि तु समग्रस्यराष्ट्रस्य चिरायापूरणीया कापि महती दुर्विषह्या क्षतिरपक्षतिर्बभूवेति हा हन्त हन्त! कस्मै किमाचक्ष्महे, किं वा परिदेवयाम आक्रोशाम वा?

"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्" ॥

कुमारेश
लिवर और पेट की बीमारियों में
मालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
ओ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धाञ्जलयः

लेखकः- विद्याभूषणः श्रीगणेशरामशर्मा, झालावाडः

हं हो ! हन्त !! हन्त !!! हतकोऽसौ क्रूरकर्मा विधि-
वँज्रपातनिष्ठुरं व्यधत्त दुर्विचेष्टितम् !
नूनं निर्दयोऽयं प्रजहार सतां मर्मस्थलं,
गुणिगणविद्वज्जनहृदयं विखण्डितम् !!

स्रोतो ज्ञानगङ्गाया निरुद्धं हा ! कृतान्तेनाद्य
कवितानिकुञ्जजीवनवृन्दं चापदण्डितम् !!
कुण्ठितं हि चेतो रसिकानां लुण्ठितं च धनं,
वैकुण्ठं निनाय बत मञ्जुनाथपण्डितम् !!! १॥

शोचति हृदन्तः खेदखिन्ना भुवि भारतीयं
निःश्वसिति नैराश्यं गतासौ कवितेश्वरी !
सीदन्तीसमस्तबुध परिषद्विलापाकुला
विन्दते सुखं नोऽशरणेव रसनिर्झरी !!
याते मञ्जुनाथे दिवं कथमिव देदीप्यतां
लोकप्रिया प्रतिभा शिवङ्करी वशङ्करी ?
संस्कृतसरस्वती विलोक्य रसस्रोतस्विनीं
रुद्धामुद्धुनीते शिरो, रोदिति घनाक्षरी !!! २॥

छन्दोज्ञानवारिधिः कलानां निधिर्वाग्मिवरो
रचनाविधानशिल्पतन्त्रेषु स्वतन्त्रोऽभूत् ।
भास्वानिव रेजे प्रतिभाप्रकर्षतेजोज्ज्वलन्
शास्त्रतत्त्वविज्ञाने समर्थोऽसौ सुधीन्द्रोऽभूत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यालापकौशले कवीन्द्रकुलमौलिमणि-
ग्रन्थग्रन्थिभेदने गरीयान् गुरुमन्त्रोऽभूत् ।
वाचां रमणीयार्थप्रसन्नपदरीतिजुषां
मन्ये, मञ्जुनाथो वाग्विशिष्टसिद्धयन्त्रोऽभूत् ॥३॥

विद्वद्वृन्दमध्ये सत्प्रतिष्ठो लोकनिष्ठो बुधः
संस्थाप्रतिष्ठानेष्वधिष्ठातासीद्वरिष्ठोऽयम् ।
सिद्धासनो लेखकोत्तमोऽसौ सिद्धसम्पादको
मार्मिकोक्तिव्यङ्ग्यध्वन्यलङ्कृतिपटिष्ठोऽयम् ॥
'संस्कृत रत्नाकर' ममन्थ सुधास्वादेच्छया
'भारती' सिषेवे महामहिममहिष्ठोऽयम् ।
प्रेष्ठो रसिकानां भावुकात्मनां विदग्धहृदां
गुणिनां गरिष्ठो मञ्जुनाथो वाग्वशिष्ठोऽयम् ॥४॥

Insurance is a Social Service
With best Complements & Greetings
form

Ruby General Insurance Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.	Rs. 1,00,00,000
Paid up Capital. ...	Rs. 32,00,000
Assets Exceed. ...	Rs. 3,21,00,000
Nett Premiums in 1962. ...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA
FOREIGN BRANCHES & AGENCIES :
Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala, Nairobi, Penang, Rangoon, Singapore & San Fernado. D.L.M.S.,
Head Office :
"INDIA EXCHANGE"
India Exchange Place, Calcutta-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्य साहित्य के प्रकाशन में

राजस्थान सरकार का महत्त्वपूर्ण योग

राजस्थान प्राच्य विद्या प्रतिष्ठान, जोधपुर के

सात संग्राह्य नये प्रकाशन

राजस्थान पुरातन ग्रन्थमाला:- प्रधान सम्पादक-मुनि जिनविजय, पुरातत्वाचार्य

१—काव्य प्रकाशन-भट्ट सोमेश्वर विरचित संकेत सहित। जैसलमेर ग्रन्थभण्डार से प्राप्त प्राचीनतम प्रति के आधार पर प्राध्यापक रसिकलाल छोपरिख द्वारा सम्पादित अन्यतम संस्करण (दो भागों में) मूल्य-प्रथम भाग १२) ००, द्वितीय भाग ८)२५ नये पैसे।

२—वस्तुरत्न कोश-अज्ञात कर्तृक नाना वस्तु प्रतिपादक विशिष्ट कोश-ग्रन्थ सम्पादिका-प्रिय बालाशाह एम०.ए० पी० एच० डी०, डी० लिट्। मूल्य—४) ००,।

३—मुंहता नेणसीख्यात भाग—जोधपुर के प्रधानामात्य मुंहता नेणसी लिखित मूल भाषा में राजस्थान का इतिहास सम्पादक-बदरी प्रसाद साकरिया। मूल्य ८) २५ नये पैसे।

४—भगतमाल-चारण ब्रह्मदास विरचित राजस्थानी काव्यमय भक्त चिरितावली। सम्पादक-उदयराज उज्वल। मूल्य १) ७५नये पैसे।

५—रघुवर जस प्रकाश-चारण कवि किसना जी आढा निर्मित राजस्थानी भाषा में काव्य-शास्त्र सम्बन्धी ग्रन्थ। सम्पादक—सीताराम लालस। मूल्य ८) २५नये पैसे।

६— राजस्थान हस्तलिखित-ग्रन्थों की सूची। भाग १ मूल्य ४) ५०नये पैसे

७—राजस्थान प्राच्य-विद्या के प्रतिष्ठान् के हस्तलिखित ग्रन्थों की सूची। भाग २ मूल्य १२) ००,।

प्राप्ति स्थान-राजस्थान प्राच्यविद्या प्रतिष्ठान, रेजीडेन्सी, जोधपुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातःस्मरणीयाः कविशिरोमणयः

विद्याधरः शास्त्री एम० ए०

पूज्यानां श्रीमथुरानाथभट्टमहदोयानां स्वः प्रयाणेन न केवलं राजस्थानं न वा केवलं जयपुरमपि तु समस्तमेवाधुनिकं संस्कृतसाहित्यक्षेत्रमनुभवति कमपि चिरमपूरणीयं महान्तमभावमत्र नास्ते किमपि विशेषतो वक्तव्यम् ।

जयदेवकवेरनन्तरं कविशिरोमणिभिर्येन संगीतमयेन काव्येन, येनाभिनवेन सरलसरलेन संस्कृतगद्येन, यैर्नवीनैः छन्दःप्रकारैर्यया चाविच्छिन्नरसप्रवाहपरिस्फूर्जज्जविन्या दण्डकशैल्या सम्पोषितं समकालीनं संस्कृतकाव्यं तद् वर्तते—संस्कृतरसिकैः सर्वत्रैव सर्वथा सर्वदाभिनन्दनीयम् ।

वैशिष्ट्यञ्चैषां कविवराणां न केवलं स्वकाव्यान्तर्गतमेव विभासतेऽपितु ताभिस्ताभी रसमाधुरीभिः—संस्कृतवाङ्मयमापूरयतां यत्र तत्र वर्तमानानां शतशः—सहस्रशश्च तेषां शिष्यपुङ्गवानां कृतिष्वपि तत्तथैवास्ते सञ्चकासमानम् ।

सम्पादनविषये भारती-संस्कृतरत्नाकरादिपत्राणां सम्पादने तत्रभवद्भिः सम्पादकीयासु टिप्पणीषुनिर्भयं प्रकाशिता ये विचाराः ते ऽपि केषां कृते न भवेयुः सत्पथप्रदर्शकाः ।

सौभाग्यमेतद्विद्धि वीकानेरनगरस्य यच्छ्रीमतां साभापत्ये सम्पन्नस्य राजस्थानसंस्कृतसाहित्यसम्मेलनस्य नाममात्रेण द्वितीयाधिवेशनं वस्तुतस्तु सम्मेलनगतिप्रवर्तकं प्रधानमधिवेशनं बीकानेर एवाभवत् अद्वितीयेन विद्वत्समागमेन परिपूर्णम् ।

अत्राहं मान्यैः सुरभारतीमहत्त्वं वर्णयद्भिः स्वीये भाषणे—संकलिता इमे श्लोकाः ।

यथैवादौ सृष्टा नरजगति सभ्यत्वसरणिः
यदीयं साम्राज्यं क्वचन समये प्राज्यमभवत् ।
यतोऽमूः संभूता जगदुदरसूता नरगिरो
गिराऽसौ गीर्वाणी जयति वरवाणी परिवृढा ॥

तिमिरमपास्य ययैवादौ ज्ञानमाविष्कृतम्
शासनमुपाहितं ययैव विबुधोत्सवाय ।
यस्याः सेवनेन कविलोका यानल्पमरपदम्
यमिह वदन्ति प्रभवित्रीमात्मशोधनाय ॥
याऽसौ सर्वमङ्गला न केवलमिहैव लोके
सेयं दिव्यलोकेष्वपि भूरिभव्यवैभवाय ।
लोकद्वयकल्याणी शुभवहाऽथ शर्वाणीव
सेयं सुरवाणी जानि लेभे जगतः शिवाय ॥

यथा संस्कृतभक्तास्तथैव मान्या भारतभक्ताअप्यासन् श्रीमतां भारतवैभवे पश्यन्तु वैभवम्—

मानवसमाजे सभ्यतायाः साधयित्री सेयममित-
मगाधज्ञानराशिजनविश्वमण्डलेऽस्मिन्निखिले
ऽपिप्रभावपित्री बभौ भरतभगीरथादिभूपोद्भावयि
त्रीयम् ।
श्रीमद्रामकृष्णपदपङ्कजैः पवित्रीकृताभीष्म-
प्रमुखानां धर्मधीराणां सवित्रीयम् वीराणां
वरित्री चिन्तनीयचरितानां चारु चेतसि
चरित्री भाति भारतधरित्रीयम् ॥

उत्तरभारते सम्पन्नानामखिलभारतीयानां प्रायशः सर्वेषामेव कविसम्मेलनानामाध्यक्ष्यमतो मान्यैरेव प्रायशः समलङ्कृतम् । मध्ये मध्ये च तत्र सदैव संश्रावितास्तास्तास्तत्तद्भावलहरिपरिपूर्णाः स्वीया रचनाः ।

यद्यपि साहित्योपासना महाभागानामभवत्प्रधाना जीवनप्रकृतिः परमतः परं भगवद्भक्तिनिमज्जनं समये समये च सम्पन्नासु संस्कृतविचारगोष्ठीषु संस्कृतशिक्षापरिष्करणं चासीत् श्रीमतां प्रधानं जीवनलक्ष्यम् ।

किम्बहुना सम्प्रति श्रीमतामिह लोकलीला—संवरणात्—

जातं जयपुरं शून्यं कलाकाव्यादिवैभवैः
जाता चतुर्दिनाच्छन्ना गोर्वाणीकाव्य चन्द्रिका ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मथुरानाथा अमी अमराः ।

लेखकः- आचार्य-मणिशङ्करद्विवेदी, जोधपुरम् ।

"धी श्री स्त्री" सहनाथाः । कीर्तितगाथा मञ्जुनाथास्ते ।
हितकाव्यकलानाथा । मथुरानाथा अमी अमराः ॥१॥

सममेव श्रीरमया । सदया शारदयाऽप्यसेविषत, ये ॥
नित्यं यान् सहहृदयाः । कृतसमयाः समया मुदाऽऽयन् ! ॥२॥

कवितावनिताहाराः । संस्कृतसाराः प्रमेयपरिवाराः ।
गुणिगोष्ठीशृङ्गाराः । स्वरितास्ते ऽनुभूतसंसाराः ॥३॥

भूषितजनिभू—भालाः । मनोमरालाः सुगीतगोपालाः ॥
विरुदविशाला बालाः । रसिकरसाला अविस्मार्याः ॥४॥

वन्द्याः कलाविलासाः । परिहासा नन्द—नन्दनोपासाः ॥
मञ्जु—निकुञ्ज—निवासाः । साहित्य प्रभृति-वैभवोद्भासाः ॥५॥

काव्यकला—कीलालं । ह्र`पित-हालं गृहीत्वाऽलम् ॥
रचनाऽऽध्ययनालवालम् । संस्कृतशालं च येऽसिञ्चन् ॥६॥

प्रतिभावन्तो ऽविकलाः । सकलाः सरलाश्च हिन्दी उर्दूनाम् ॥
गीतिघनाक्षरि-गजलाः । सुरगिरि सफलाः प्रायोजिषत ॥७॥

रमणीयाः सत्स्वभावाः । प्रथितप्रभावा महानुभावास्ते ॥
श्रीमद्द भट्टोपाह्वाः । कृतिचितरम्यरम्यसद्भावाः ॥८॥

नाना—सभात्तभागाः । रसानुरागा विदितरङ्गरागाः ॥
विस्मृतप्रीतिपरागाः । कृतसत्त्यागाः प्रणम्यन्ते ॥९॥

सदा सुधी—सत्कार्याः । काव्याचार्याः शिरोधार्याः ॥
काले कृतिभिः स्मार्याः । आर्यानार्याः सदा ऽवन्तु ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्ट श्रीमथुरानाथेभ्यः श्रद्धाञ्जलयः

लेखकः- हजारीलालशास्त्री, नवलगढः

संस्कृतजगति सुविख्यातानां महामहिमशालिनां विपश्चिदपश्चिमानां भट्टश्रीमथुरानाथमहाभागानां निधनं श्रुत्वा चेखिद्यते चेतः। सुरभारत्याः समुपासकानामध्येतॄणामध्यापकानां ह्रास समये एतादृशानां महानुभावानामभावः केषां सहृदयानां हृदयेषु खेदं न जनयति।

स्वर्गीयपूज्यभट्टमहोदयैः सह मदीयसम्पर्कस्त्रिशद्वर्षेभ्य आसीत्। यदा ते जयपुरराजकीयसंस्कृतविद्यालयानां निरीक्षका आसन् तदा नवलगढेऽपि तेषामागमनमभूत्, तदवसरे एव तद्बुद्धिवैभवप्रदर्शकं "संस्कृत-साहित्य-वैभव-नामकं ग्रन्थमवालुलोकमहम्, तदवलोकनेन भट्टपादानां संस्कृत-साहित्ये कीदृशो महान् प्रवेश आसीदित्य शासिषम्, तत्र ग्रन्थे न केवलं पुरातनेन्द्रवज्रोपेन्द्रवज्रादीनां छन्दसां निर्मितिरेव रमणीयतां धत्ते किन्तु संस्कृतसाहित्ये प्रायो दुष्प्राप्याणि घनाक्षरीदोहासोरठा ख्यानि पद्यानि भट्टमहोदयानां रचनाचातुरीचणत्वं प्रकटयन्ति।

यद्यपि ते महाराजसंस्कृतकालेजे साहित्यविभागे साहित्यप्रधानाध्यापका आसन्, तथापि तेषां पाण्डित्यं पाणिनीयव्याकरणेऽपि विशिष्टमासीदिति आस्माकीन-विद्यालयनिरीक्षणावसरे कञ्चिच्छात्रम् अष्टौ-प्रयोगं साधयेति पृच्छतां वैकल्पिकञ्चेदमष्टन आत्वमितिपङ्क्तिं विशदयतां दृष्टम्।

स्वर्गीयाः श्रीमन्तो भट्टमहाभागा योग्यतमा अध्यापका आसन्नित्यत्र केषाञ्चिदपि वैमत्यं नासीत्। किन्तु प्रौढा लेखकाः कवयश्चाभूवन्नित्यपि तेषां साहित्यवैभवसदृशं नूतनशैलीपरिशीलितंग्रन्थं तथा समये समये भारतीसम्पादकीयलेखानन्यांश्चरत्नाकरादिपत्रेषु विविधविषयान्, लेखान् विलोककानां विदुषां निभृतं नास्ति।

श्रीभट्टमहाभागा विलक्षणवैदुष्यसम्पन्ना महावक्तारश्चासन् इत्यपि निःशङ्कं वक्तुं शक्यते। एकमपि संस्कृतसाहित्यसम्मेलनं ना भूत् यस्मिन् ते कस्याश्चिदपि संस्कृतसम्मेलनान्तर्गतायाः परिषदः साभापत्यं नावहन्।

वीकानेरे जातस्य राजस्थान-संस्कृतसाहित्य-सम्मेलनस्य द्वितीयाधिवेशनस्याध्यक्षपदमलमकार्षुः। जोधपुरे जाते ऽलवरपुरे च जाते संस्कृत-सम्मेलनेऽहमप्यासम् सदस्यरूपेणोपस्थितः। तत्र तत्रभवतां भट्टमहोदयानां भाषणानां श्रवणस्यावसरो ऽलाभि दृष्टञ्च तत्र शास्त्रेषु प्रगाढपाण्डित्यं भाषणवैदुष्यञ्च।

मयि च तेषां स्नेहः सर्वदैवासीत्। यत्र कुत्रापि मेलनमभूतदैव विद्यालयीयैर्देशीयैः पारिवारिकैश्च विविधैः प्रश्नैर्मधुरया वाचा सस्नेहं कुशलं पृच्छन्ति स्म।

जयपुरपुरं महाविदुषां जन्मभूरित्यत्र न कापि विचिकित्सा, परन्तु मम विचोर वर्तमानकाले महामहोपाध्याय-श्रीगिरिधरशर्मचतुर्वेदानां स्वर्गीयभट्टश्रीमथुरानाथानाञ्च यादृशी विद्वदग्रगणनीयताऽस्ति चासीच्च तादृशी अन्येषां न। किमधिकं लिखेयं श्रीभट्टमहाभागाः संस्कृताकाशस्य देदीप्यमानाः सहस्रकिरणा आसन्। तेषां स्वर्गमनेन संस्कृतलोकस्येयती विशेषा क्षतिरजनि यस्याः पूर्ति निकटभविष्ये ऽसम्भवा प्रतिभाति।

तैः सह मदीयः सम्पर्कस्तु क्वाचित्क एवाभूदतः किमधिकं प्रतिपादयेयम् तेषां विषये। तेषां वैशिष्ट्यं गुणगरिमाणञ्च त एव वक्तुं लेखितुञ्च प्रभवो ये सदैव तेषां सांनिध्यमभजन्। एतन्निर्विवादं वक्तुं शक्यते यदद्य भगवती गीर्वाणवाणी वरिष्ठवरदपुत्रवियोगेन महत्कष्ट मनुभविष्यति, तस्याश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभट्टमहाभागानामाऽत्यन्तिकविरहः

श्रीदीनानाथशर्मा शास्त्री सारस्वतः विद्यावागीशः विद्याभूषणः, विद्यानिधिः, अध्यक्षः, रामदल संस्कृतमहाविद्यालयः, देहली

मम पार्श्वे प्राग् 'भारती' नियमेन समेति स्म; मया तत्र निबन्धा अपि प्रहीयन्ते स्म; प्रत्युत सर्व-संस्कृतपत्त्रेषु मया निबन्धाः प्रेष्यन्ते स्म। इदानीमहं 'श्रीसनातनधर्मालोक ग्रन्थमालां यस्या अष्टौ पुष्पाणि (मूल्यं ५०)) प्रकाशितानि, नवमं च पुष्पं प्रकाशनाय प्रस्तुतमस्ति—स्वयं सम्पादयामि प्रकाशयामि च । इतश्च अध्यापनकार्य्यमपि मामकीनं पर्याप्तं समयमादत्ते; अतः सम्प्रति व्यस्ततावशाद् मत्सन्निधौ समयः पर्याप्तो न तिष्ठति, येन निबन्धनिबन्धनं कृत्वा पूर्ववत् सुरसरस्वतीं सेवेय एतदनुभूय मत्पार्श्वे 'भारती' अपि नियमेन न समेति । अत एव मम तद्विषये ज्ञानं न तिष्ठति किमपि ।

गतमासे मदन्तिके' श्रीद्विवेदमहोदयानाममिनन्दनाङ्काय भारत्यभिमुखतो निबन्धप्रेषणया प्रेरणा प्राप्ता। तत्र च मया निबन्धः प्राहायि। यदा सोऽङ्को मत्पार्श्वे प्राप्तः; तत्र सम्पादक-नाम्नि भट्टमथुरानाथशास्त्रिणां न प्राप, नव्यसम्पादकद्वयस्य नाम निध्यायाऽहं विस्मेरो वश्यमबोभूयिषि । एतदभिनन्दनाङ्क' स्यैव इयं सम्पादकद्वयी सम्पादिका भवेद्-इति च मया स्वमनसि तदानीं समाहितम् ।

ततोऽद्यत्वे 'भारती' प्रबन्धसम्पादकपत्त्रेण भट्टमहोदयानां दिवंगतिं निशम्याऽहं सहसा स्तब्धोऽजनिषि। मया व्यचारि यद् भट्टमहाभागस्य आत्यन्तिकवियोगेन सुरभारत्याः वस्तुतः सुमहान् आघातो लग्नः ।

म. म. पं. गिरिधरशर्मन्यायशास्त्रिणः, श्री पं. सूर्यनारायणशास्त्रिणो व्याकरणाचार्याः, भटश्री-मथुरानाथशास्त्रिणः साहित्याचार्याः—इति त्रयी त्रयीव सुरसरस्वत्याः प्रमोदकरी समजनिष्ट । एभिस्त्रिभिः संस्कृतसाहित्य सम्मेलनं प्रचालितम् । तस्य च मुखपत्त्रं 'संस्कृतरत्नाकरः' प्राकाश्यत । तत्र मुख्यसम्पादकास्तु म. म. श्रीगिरिधरशर्म्माणोऽस्थुः परं त्रयाणामेषां सहयोगस्तिष्ठति स्म। म. म. पं. गिरिधरशर्माणो यदा जयपुरं विहाय हरिद्वारस्थे ऋषिकुले चिराय स्थिताः, ततो लवपुरे श्रीसनातनधर्मकालेजे स्थिताः; तदानीं म. म, पं. गिरिधरशर्म्मसम्पादकत्वे प्रकाश्यमानः 'संस्कृतरत्नाकरः' तेषां दविष्टत्वाद् भट्टश्रीमथुरानाथशास्त्रिभिरेव वस्तुतः सम्पाद्यमानोऽविद्यत ।

ततः 'संस्कृतरत्नाकरेण चिरनिद्रा प्राप्ता । ततः पुनः पं. श्रीचन्द्रशेखरशास्त्रिणः सम्पादकत्वे प्रकाशितोपि 'रत्नाकरः' द्वित्रसङ्ख्काः प्रकाश्य पुनरस्तमितः । ततो म. म. पं. गिरिधरशर्माणो जयपुरीयमहाराज-संस्कृतकालेजे अध्यक्षत्वेन प्राप्ताः। ततश्च 'संस्कृत-रत्नाकर' स्यपुनर्जन्म महता समारोहेण जातम् । तत्र पं० सूर्यनारायणशास्त्रिणो व्याकरणाचार्याः, भट्टश्रीमथुरानाथशास्त्रिणः—साहित्या-

प्रचारे प्रसारे च महान् प्रगतिरोधःस्यादिति । भगवान् भूतनाथः सततं प्रार्थ्यते यद् भट्टमहाभागेभ्यः स्वलोकवासं शोकसंतप्ताय मित्रवर्गाय परिवाराय च धैर्यं, शोकं सोढुञ्च शक्ति दद्यात् ।

दिवं गता यद्यपि माननीयाः
कीर्तिध्वजः पोस्फुरतीह येषाम् ।
श्रद्धाञ्जलि श्रीयुतमञ्जुनाथा
गृह्णन्तु ते स्नेहसमर्पितम्मे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चार्याश्च 'रत्नाकर' स्य सम्पादका जाताः, म म. श्रीगिरिधरशर्माणश्च प्रकाशकाः । ततो महतोत्साहेन तस्य आयुर्वेदाङ्कः, वेदाङ्को दर्शनाङ्कश्च प्रकाशिताः ततो 'रत्नाकरः' कतिपय वर्षकृते केवलं श्री सूर्यनारायणव्याकरणाचार्याणां सम्पादकत्वे प्रकाशितः; ततः पुनः केवलं भट्टमथुरानाथशास्त्रिणां सम्पादकत्वे च प्राचलत् । ततः 'संस्कृतरत्नाकरः' जयपुरतोऽपसृत्य देहल्यां प्राप्तः ।

ततो वाराणसीकल्पं जयपुरं संस्कृतपत्त्रविरहितं मा भूद्—इति विविच्य श्रीगिरिराजशास्त्रिणा जयपुराद् 'भारती प्रक्रान्ता । ततः प्राक्तनसम्पादकस्य सम्पादकत्वे तया सारल्यमवलम्ब्य वरीयसी प्रगतिः कृता । ततः पुनर्भट्टमथुरानाथशास्त्रिणां सम्पादकत्वे प्राप्ता । इदानीं यावत् सा तत्सम्पादकत्वे स्थिता महतीमुन्नतिमकार्षीत् । तस्याः सुमहान् प्रचारोऽजनि । परमिदानीं भट्टमहोदयानामात्यन्तिकविरहाद् विषण्णा सा तन्नाम्ना विशिष्टाङ्कं प्रकाश्य तत्स्मृतिममरीकृतवती ।

एतावता इतिहासेन स्पष्टमिदं यद्–देवर्षिभट्टमथुरानाथशास्त्रिभि सुरसरस्वत्या महती सेवा कृता । अनेके लेखका उत्पादिता उत्साहिताश्च । मया सह श्रीसूर्यनारायणशास्त्रिव्याकरणाचार्यवत् तेषामपि महान् स्नेह आसीत् । मम निबन्धान् प्रायः प्रत्यङ्क प्रकाशयन्ति स्म । देहल्यां तैः साकं संस्कृतसाहित्य सम्मेलने सम्मेलनमपि जातमासीत् । तैर्मदीयलेखानां कृते स्वकीयान् सद्भावान् उपस्थाप्य अहं समुत्साहितः । तैः 'संस्कृतरत्नाकर'–'भारत्यादिषु कथासाहित्यस्य सृष्टि रपि कृता । तेषां 'किन्तोः' कुटिलता' प्रभृति लेखान् अहमद्यापि सोत्कण्ठं स्मरामि ।

इतश्च तैः 'साहित्यवैभवम्' सुन्दरकाव्यं निर्माय तत्र नवीनच्छन्दसां × कवित्तदोहादीनां सृष्टिरपि कृता । नवीनगजलादीनाम् एका कवितापुस्तिकापि विरचिता । कादम्बर्याः प्राचीन टीकायां टिप्पणीं विधाय तदीयदोषपरिमार्जनं कृत्वा तदीयसुन्दरसंस्करणं निर्णयसागरमुद्रणालयात् प्रकाशितम् । 'गाथासप्तशत्याः' टीकापि प्रकाशिता । जयपुरीयस्कूलानां ते पर्यवेक्षकाः (इन्स्पैक्टर) अपि स्थिताः—इति श्रुतम् ।

निष्कर्षोऽयं यत्—तेषां सुरसरस्वतीवरिवस्या आडम्बरमात्रे न भूत्वा हार्दिकी एवासीत् । ये गीर्वाणवाण्या समम् अल्पमपि सम्बन्धं स्थापयन्ति; ते भट्टमहाभागान् जानाना एव मवे ययुः । महाराजसंस्कृतकालेजे ते साहित्यस्य प्रतिष्ठिताः प्राध्यापकाः समवर्तिषत । वाराणसेयाऽमरभारतीप्रभृतिपत्त्रेष्वपि तेषां रोचककथा मुद्र्यन्ते स्म । तेषां गुणगणास्तु बहवः; परं लेखनी लघ्वी; अत एव साकल्येन ते वर्णयितु न शक्यन्ते । तेषामात्यन्तिकवियोगेन सत्यं विषीदति संस्कृतसमाजः ।

परमात्मानं प्रार्थये—तेषां सद्गतिर्भवेत् । तेषां परिवारेण सह, विशेषतस्तदीययोग्यतनुजनुषादेवर्षिकलानाथशास्त्रिणा सह मे समवेदना वर्वर्ति । ते च मृतानामपि तेषाममरभारतीसेवया अमरत्वं विभाव्य धैर्यधारणं कुर्वन्त्विति मामिका प्रेरणा 'भारती' परिवारमपि तेषां स्मृत्यङ्कप्रकाशनोपलक्ष्येऽभिनन्दन् तदीयवर्तमानसम्पादकौ प्रेरयामि यत्—तावपि भट्टमहोदयानां क्रममनुसरन्तौ 'भारतीम्' इतोप्यतिशय्य सर्वप्रियां विदध्याताम् । कृतमधिकाक्षरक्षरणेन ।

× 'नवीनच्छन्दसां । अत्र समासे संहितायां तुक् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धाञ्जलयः

लेखकः– श्रीदेवकीनन्दनशास्त्री, महाराज-संस्कृतकालेजः, जयपुरम्

अथ साहित्याकाशे गुरवो भास्करवद् भासन्ते ते ।
कविता लहरिर्येषां यमुनालहरीरनुसरतीव ॥१॥

व्याकरणे निष्णाता आसन् निर्मलवाचां प्रभवस्ते ।
विद्वत्कवयः ख्याता अत एव कविशिरोमणयस्ते ॥२॥

क्रीडन्तः काव्यवने जीवन्त्यद्यापि कालिदासाद्याः ।
पण्डितराजाश्चैवं मथुरानाथा महाकवयः ॥३॥

किं पञ्चत्वं याता गुरवो ऽस्माकं प्रपञ्चनिर्मुक्ताः ।
मर्त्या अपि न म्रियन्ते रससिद्धा ये महाकवयः ॥४॥

नित्यं नवरसपुष्टाः सन्तुष्टाः काव्यामृततनुमन्तः ।
विश्वे वन्द्याः पूज्या भवन्ति नूनं महाकवयः ॥५॥

व्याकरणे साहित्ये विविधकलासु च नैपुण्यं येषाम् ।
तेषां श्रद्धाञ्जलयः पुण्याः पूता जाता इति शम् ॥६॥

वरदा वाणी तेषां भूयान्नृणां विदुषां विश्वेषाम् ।
इति षट्पदी मदीये वदनसरोजे सदा रमताम् ॥७॥

श्रीमति जयपत्तने श्रीमथुरानाथा महाकवयः
कवीनां शिरोमणयः स्वर्गताः प्रणम्यन्ते,
येषाञ्च बहुशिष्याः कलानाथादयः पुत्राश्चेह
श्रीमन्तो धीमन्तो गुणवन्तो हि गण्यन्ते ।
ये साहित्यवैभवादिग्रन्थविमलकीर्त्या भुवि
स्वर्गे च दिव्यदेहेन गुरवस्ते समर्च्यन्ते ॥
सह तत्परिवारशान्तिदानेश्वरप्रार्थनया ।
वचन — पुष्पश्रद्धाञ्जलयः समर्प्यन्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवं गतानां श्रीभट्टमहाभागानां संस्मरणानि

(ले० विद्याभूषणः, विद्यावागीशः श्रीहनुमत्प्रसादशास्त्री, पण्डितमार्तण्डः)

आसीत् २५।११।३१ ख्रिष्टाब्ददिनम् । शेखावाटीस्थे 'राममढ' नगरे तदानीमहमासं श्रीहरनन्दरायरूइयासंस्कृतकालेजे प्राचार्यः । साहित्याचार्य--कविशिरोमणि---भट्टश्रीमथुरानाथशास्त्रिणो वर्षपूगेभ्यो जानतोऽपि दृष्टवतोऽपि च सांनिध्येन परिज्ञातुमिदम्प्रथमोऽवसरो लब्धः । भट्टमहाभागा हि तदानीन्तने जयपुरराज्ये राजकीयानां स्वतन्त्राणां च सर्वासां संस्कृतपाठशालानां निरीक्षकाः (सूपरिविसराः=सुपरवाइजराः) आसन् । ते ममैव पार्श्वे कालेजस्य छात्रावासे उषित्वा प्रायः पञ्चदशानां संस्कृतपाठशालानां निरीक्षणादि राजकीयकृत्यमकुर्वन् । अतिरिक्ते समये संस्कृतोन्नति-समाजदशा-शास्त्रचर्चादिषु संलपद्भिः श्रीभट्टमहाभागैः सहावर्धिष्ट मम भक्तिसम्पुटितः प्रेमा । विशेषतो 'रसगङ्गाधरे' टीकां कुर्वन्तो श्रीभट्टमहाभागा विचाराणामादानप्रदानैर्नितरां समतुष्यन्, शिष्यतुल्यं तथा श्रद्धालुं च मां ते सुहृत्त्वेन पर्यगृह्णन्, आगृह्णन्तं च मां नमस्कारेण सहाशिषाऽपि समन्वगृह्णंश्च । तत्सूचकपत्रेषु समुपस्थितस्य केवलमेकस्यैव कियन्तश्चिदंशा इह लिख्यन्ते—

"बाधे दृढे-इति न्यायः क्वत्य इति नाद्यापि निश्चितम्०—० स्वस्ति श्रीमदनन्त—गुणमण्डितेषु हनुमत्प्रसादशास्त्रिमहोदयेषु पाण्डित्यसौजन्यादिगुणपक्षपातिन्यो नतयः, वयःसम्बन्धधार्ह्य निबन्धनास्त्वाशिषः । कदाचिदेकस्य 'साहित्यवैभवस्य' मूल्यं श्रीमदायत्तं भवेत् । अस्तु, तत्परिवर्त्ते किञ्चिदुचितं श्वेतकम्बलादिकमेतस्मै जनाय प्रसादीक्रियतामिति मे हार्दम् । पूर्वमपि तथा कृतत्वात् ०—० रत्नाकरस्य विशेषाङ्कः साम्प्रतं शीघ्रमेव प्रकाश्येत । अत्रत्येन प्रेसाध्यक्षेण वितथप्रतिज्ञतया भृशं न्हेपिताः कार्यकर्त्तारः । अस्तु, साम्प्रतमवशिष्टो भागः अजमेरनगरे मुद्रयित्वा प्रकाश्येत ।

प्रचीयतां मयि स्नेहः । अहं प्रत्यवसरं श्रीमन्तमनुस्मरामि । किं वा मौखिकप्रकत्थनेन । भवत्पत्रं कालेजसंकेतेन प्राप्तम् । तत्र चाभूद् बृहद्दिनावकाशः अवकाशोत्तरं च प्राप्य पत्रमहं रुग्णोऽभवम् । अत एव समये उत्तरं प्रहेतुं नाऽपारयमिति क्षन्तव्यो मे मन्तुः"—मः ।

कीदृशान्यमूनि सरलसरलान्यात्मीयत्वभावाभिव्यञ्जकानि भाषाशैलीशिक्षकाणि निश्छलनिष्यन्दसौहार्दमुद्गिरन्ति मञ्जूनि मञ्जुनाथाक्षराणि ! हा हन्त ! विषीदत्यन्तस्तादृशं साहित्यमहाम्बुधिं, नैकविद्यापारङ्गतं, लेखने भाषणे, कवने, शिक्षणे, व्यवस्थापने, सम्पादने, सद्व्यवहारादिषु च युगप्रवर्त्तकं 'मञ्जुनाथमहाभागं गीष्पतेः सख्यमीयुषं श्रुत्वा ।

इतः परं नैकशः पाठशालानिरीक्षकत्वेन, रामगढे जयपुरराजकीयसंस्कृतपरीक्षाणां केन्द्रव्यवस्थापकत्वेन च समायातानां भट्टमहाभागानां दर्शनसुखमनुभूतं, प्राप्तं च संलापादिसम्बन्धदार्ढ्यम् । समये समये ते केषुचिन्महत्त्वपूर्णेष्वान्तरिकेषु कार्येषु संमतिं मे समगृह्णन्, अमन्यन्त च मां विश्वसनीयतमम् । तथा हि—स्वर्गता रा० प्रा० संस्कृतसाहित्यसंमेलनमहामन्त्रिणः श्रीवृद्धिचन्द्रशास्त्रिणः फतहपुरीये चमडियासंस्कृतमहाविद्यालये तदानीं प्राचार्यत्वेन नियुक्ता नवीना एवासन् । तेषां प्रतिष्ठामूलाभित्तिर्दृढीकरणीयाऽऽसीत् । वाराणसेयकेन्द्रे फतहपुरस्थे परीक्ष्यच्छात्रैः सह गतवतो मे "श्रीवृद्धिचन्द्राः सन्त्यस्माकं प्रेष्ठारछात्राः, एषां प्रतिष्ठा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकटकाल में आपका सहयोग

देश सेवा का अवसर सभी के लिए

किसान :

★ अधिक उत्पादन करें

★ ग्राम-रक्षा दल के सदस्य बनें

★ श्रम बैंक में योग-दान करें

मजदूर :

★ खूब उत्पादन बढ़ायें

★ हड़ताल न करें

★ विवादों को बातचीत से सुलझायें

व्यापारी :

★ मुनाफाखोरी न करें

★ माल का अनुचित संग्रह न करें

★ कीमत न बढ़ायें

महिलायें :

★ फिजूलखर्ची न करें

★ स्वर्ण दान करें

★ गृह-उद्योगों में भाग लें

★ बालकों को राष्ट्रप्रेम सिखायें

सामान्य नागरिक :

★ होम गार्ड के सदस्य बनें

★ सेना में भरती होवें

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामगढे भवतामिव यथा स्यात्, तथा कांश्चनोपायान्निर्दिशन्तु" इति संमतिमगृह्णन् । तदानीं बहुभ्यो नगरेभ्यः समागतानां विदुषां छात्राणां च संमिलितामेकां सभामायोज्य तत्र वृद्धिचन्द्राणां भाषणादिभिस्तद्वै दुष्यमुद्रासमङ्कनसंमतिं मदीयामुद्गृह्य तथैवानुष्ठितमासीदिति किं पल्लवनेन ।

आसीन्मयि संकटं वैक्रमवत्सरे एकनवतितमे (१९९१) । रामदुर्गीये कालेजे मद्गमनात्पूर्वमनेके पण्डिताग्रगण्यास्तत्प्राचार्यपदावाप्तिसमुत्सुकाः प्रकाशानप्रकाशांश्च नानामार्गानालम्बितवन्तः । मयि प्रतिष्ठिते तु तेऽन्तर्द्विषन्तः प्रत्येकस्मिन्नवसरे मम हान्यै समचेष्टन्त । प्रायः पञ्चवर्षावधि कालेजीयाध्यापकेषु प्रेम्णा, सहयोगेन च कार्यं कुर्वत्सु नासीत्कस्यापि किमपि कर्त्तुं साहसम् । "कालेजः सर्वोच्चा संस्था, एतस्याः प्राचार्यः पाठशालीयाध्यापकान् यः पाठयेत् तादृशः स्याद्" इत्यादिरूपं श्रेष्ठिनः पार्श्वे पत्रदानाद्यान्दोलनमपि तेषां पाठ्यमानेषु केषुचिदध्यापकेषु विफलमभूत् । अन्ते कुतश्चित्कारणाद् (वस्तुतः सौहार्दभेदपटूनां केषांचित् पैशुन्येन) अन्तरेव भिन्नैः कैश्चित् सहयोगिभिः समुत्तेजिता विद्रोहावसरमलप्सत ते । अरच्यत किमपि षड्यन्त्रम् 'एनं शास्त्रार्थे पराभूय श्रेष्ठिनो दृष्टौ निपात्योच्चाटयामः" इति । सर्वमिदं श्रुत्वा शास्त्रार्थावसरेभ्य आत्मानं पर्यरक्षम् । परन्तु एकस्मिन्नवसरे समापतित एवासौ समयः, यत्र मया विवशेन संमिलितेनाभूयनैथ । वैवाहिकामन्त्रणे कस्मिंश्चित् "द्वा सुपर्णा" श्रुतावालङ्कारिकः समभूच्छास्त्रार्थः । आसीदनेकैः पण्डितप्रकाण्डैः सहोद्गतः सतीर्थ्योऽपि वितीर्थीभूतो नव्यन्यायशास्त्री श्रीयमुनाधरलाटामहाशयो वादिशिरोमणिः, अहं चाभूवं वैवश्येन प्रतिवादी । मध्येशास्त्रार्थमवाच्यं यद्वा तद्वा ब्रुवाणः, हस्तपादं च प्रक्षिपन् सभ्यैः परिहस्यमानश्च वादी परिसमापयच्छास्त्रार्थम् । सर्वत्र च तन्मूलायां निन्दायां प्रसृतायां यत्र तत्र लेखान् संप्रेष्य परेषां मनःसु विकृतिं जनयितुकामस्यैको लेखो रत्नगढे ममाप्यक्षिगोचरोऽभूत् । तदादाय सर्वं तदखण्डयम् । मदीयं लेखं स्तेनयित्वा भूयोऽप्येकं सुगुप्तमवच्छेदकताप्रकारतामयं लेखं मत्सहयोगिभिः कारयित्वा षड्यन्त्रं तत्प्रायः षण्मासानचाल्यत । अथ रामदुर्गीयपरीक्षाकेन्द्रव्यवस्थापनाय समागतेषु भट्टमहाभागेषु तेषां पुरतो व्यन्यासि शास्त्रार्थोदन्तो निर्णयाय । वादिप्रतिवादिनो नाम्नोः पृष्टयोः मदीयं नाम श्रुत्वा श्रीभट्टभास्करा मामपृच्छन् । अन्ते तेषामाध्यक्ष्ये नियमादिनिर्धारणपूर्वकं भूयः समभूच्छास्त्रार्थः । सर्वं खण्डनमण्डनादिकं पूर्वलिखितलेखाधारेण समपद्यत । अकस्मात्तु सुगोप्य रक्षितं तल्लेखं दृष्ट्वा सक्रुत्स्तब्धस्त्वरितं कर्तव्यं निश्चित्य विपक्षिभाषणसमकालमेव खण्डनसंकेतान् विलिख्य च पुनरुत्तरदानाय समयं समयाचिषि । भाषमाणे मयि "अयं लेखोऽधुनैव लिखितः" इति परे कोलाहलमकार्षुः । परन्तु यं निर्णयाधारं वादी स्वयं स्वीकृतवान्, तमेवोद्दिश्य पूर्वमनावश्यकानि मत्वा कञ्चुककोशे निहितानि वाराणसेयानां सर्वतन्त्रस्वतन्त्राणां श्रीमद्दामोदरगोस्वामिनां, म. म. श्रीबालकृष्णमिश्राणां, विद्वद्वरेण्यानां श्रीहाराणचन्द्रभट्टाचार्याणां च मत्पक्षे जातानि कृतविपक्षिप्रत्याख्यानानां संमतिपत्राणि प्रदर्श्य यदा तत्खण्डनमकार्षम्, तदा महता हर्षेण, सतालिकानादपटपटं च समघोष्यत मदीयो विजयः ।

प्रयाते सर्वस्मिन् कुतूहलिनि निर्णयजिज्ञासौ च जनसमूहे, प्रशान्ते च वातावरणे सायमेकान्ते भट्टमहाभागाः समवदन्–'शास्त्रिणः! किं भवद्भिः किमपि तन्त्रमनुष्ठीयते ? अहं निर्णयकासनमधिष्ठायात्मनः प्रतिष्ठारक्षायै भगवन्त–प्रार्थयं यद् हे भगवन् ! मदीयां लज्जां रक्ष । एकत्र सत्यः पक्षः, अपरत्र चानेकधा छलमवच्छेदकताभाषावच्छिन्नम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातः स्मरणीयानां भट्टश्रीमथुरानाथशास्त्रिचरणानां

कतिचनस्मरणानि

लेखकः–गोस्वामी हरिकृष्ण शास्त्री साहित्याचार्यः प्रिन्सिपल राजकीयसंस्कृतकालेज अजमेर

भारतेऽस्मिन् वर्षे संस्कृतसाहित्यजगति साहित्यमार्तण्डानां विद्यावारिधीनां कविशिरोमणि-भट्टश्रीमथुरानाथशास्त्रिचरणानां साहित्यसेवाम् अध्ययनकालादारभ्य समुपासित-संस्कृत-रत्नाकराणां भारतविभूतीनां, स्वीयस्वर्गप्रस्थानवेला पर्य्यन्तं सुरभारतीसेवाजुषां, साहित्यवैभव, जयपुर-वैभव, गोविन्दवैभवप्रभृतिनैकसंस्कृतग्रन्थरत्नैः स्वनिर्मितैः साहित्यशेवधिपुषां विदुषां काव्य-वैभव-विलासान् सहासान् को न जानीते संस्कृतसेवी जनः ?

सुरभारतीविभूतिभूतानां, देवर्षिकुलप्रसूतानां सुरपुरीयसंस्कृतसाहित्य—भाण्डागारं समुल्लासयितुमेव पुरुहूताद्यैः सहसा समाहूतानामावृत्तचरणानामाकस्मिकेन पुरन्दरपुरप्रस्थानेन भूतलविलसितसाहित्यस्योल्लासने कियती क्षतिर्न जातेति को नाम निगदितुं शक्नोति । कदा वा वसुमतीविराजमाना सुरभारती तादृशमतादृशं, स्वभाण्डागारपरिपोषकं, क्षतिमोषकं, विद्वज्जनतोषकं भट्टकुलमल्लजं कवितल्लजं पुनः समवाप्तुं पारयिष्यतीति विश्वविधातैव विजानीयात् । शोकसन्तप्तो मनुजस्तु केवलं तद्विरहविधुरः स्वीयं शोकाञ्जलिमेव समर्पयितुं शक्नोति—तथाहि—

स्फूर्जद्वैभवलब्धगौरववरस्रग्वी गिरां मण्डनं
काव्योल्लासितमञ्जुकुञ्जलवलीलास्योल्लसत्कोकिलः ।
नव्यां वृत्तसुमावलीं सुरभितां तन्वन् सुपुष्पाकरो—
हा हन्त प्रबलोष्णकालकवलीभूतोऽधुना स्वर्गतः ॥१॥

अस्मिन् व्यतिकरे कमहं निर्णयं कथं सद्य एव छल-प्रपञ्चान् विधूय दद्यामिति । भवद्भिस्तु कथमिदं निर्णीतं यत्–एतानि पत्राणि अस्मिन् काले श्राव्याणीत्यादि" । "भगवन् ! न किमपि तन्त्रम्, विपक्ष-समूहेन दिनपूगात्पीड्यमानोऽहं केवलमार्त्तभावेन स्वस्वरूपस्य सत्यस्य परिरक्षणाय भगवन्तं प्रार्थये एव" इत्यहमुदतरम् । तदिदं वृत्तं श्लोकैः परिनिबध्नता मया श्लोकार्धेन प्रत्यवसरं श्रीभट्टभागानां नामोल्लेखपूर्वं स्मर्यते । सोऽयमर्धः—

सोऽहं सत्पथमाश्रयन् समभवं शुद्धः सतां स्वर्णवत्
स्थेये सत्यपरीक्षणाय मथुरानाथे सति प्रेक्षिणि ।
इति ।

इह 'मथुरानाथे' इति पदं श्लेषयेयुर्विद्वांसो भगवति श्रीकृष्णेऽपि । क्वेदानीं तादृशस्य सर्वगुण-निधेः, सर्वविधज्ञानविज्ञानशालिनो महापुरुषस्य पुनर्दर्शनं सुलभं स्यात् ।

अनेकवर्षात्मकेन कालेन व्यवहिते तादृशे घनिष्ठे पत्राचारदर्शनादिव्यतिकरे प्रोषिते च मयि राजस्थानादन्यत्र प्रतिवसति. भूयोऽप्यभूदितो वर्ष-द्वयात् प्राग् रत्नगढे श्रीभट्टमहाभागानामन्तिमं दर्शनं रा० प्रा० सं० संम्मेलनावसरे, यत्र मामागतं श्रुत्वा वृद्धा अपि, अशक्ता अपि च भट्टमहाभागाः "किमसौ ! हनुमत्प्रसादशास्त्री ?, क्वास्ते ?" इत्यादि पृच्छन्तः स्वयं ममावासमागत्य दर्शनेना कृतार्थयन् । हन्त ! श्रीमथुरानाथभट्टमहाभागानां स्मृतिमात्रमधुना शिष्टमिति हृदयविदारिणी घटना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीयां मञ्जुलकाकलीं श्रुतिसुखां कूजन्निकुञ्जे चरः
कुर्वन् कोकिलपुङ्गवोऽद्भुतरसां लीलाऽलसां वल्लरीम् ।
सद्यः कर्णसुधाऽऽसवेन विदुषः सम्प्रीणयन्, मानसं
स्वानन्दोत्कलितं विधाय हह हा लोकान्तरेऽन्तर्हितः ॥२॥

कविशिरोमणि—भट्टमहोदयः सरसकाव्यकलापकलाधरः ।
सुभगमञ्जुसुधां भुवि निर्भरन्नहह मध्यनिशि प्रलयं गतः ॥३॥

सुकविनव्यचकोरकुलोद्भवान् चटुलचञ्चुपुटं दधतः शिशून् ।
निजविभूतिविभूषितवर्त्मनि प्रसरतो रसतां क्व नयन् गतः ? ॥४॥

किमुत भारतनायकनेहरू निगदितं परिवर्तयितुं (ह्यनुवादयितुं) दिवि ।
सुरगिरि, त्रिदशोत्सवमुल्लसत्ययमहो पुरुहूत समादृतः ॥५॥

हा हन्त, स्मृतिपथमुपगतो हि तैः सह सञ्जातो मधुरमधुराऽऽलापः सम्प्रति जनयति भूरि भूरि खेदं विरहविधुरेऽद्यमानसे । तथा हि:—

हास्योल्लासवशंवदेन मयका पृष्टाः कदाचिन्निजे
ग्रामे, यत् समुपागताः कविवराः "काव्ये कथं स्याद् रुचिः" ॥
उक्तं, तैरधुनैव कान्तकमनी (रमणी) वृन्देन साकं रहः
संलापं कुरु, वर्णयाऽऽशु गदितं तत्कं, "मुहुस्तत् पठ" ॥६॥

इतो जयपुरादविदूरे एव निवसति महापुरा नामा ग्रामः । अस्त्यत्र तेषां श्वशुरालयः । समये समये च ते तत्र गच्छन्ति स्म ।

एकदा—"यदा हि ते तत्र गताः पल्यङ्कोत्सङ्गसंश्रिताः ।
समालापरता आसन्" समायात् तत्र (कोऽपि) मर्कटः ॥७॥
बृहल्लाङ्गूलभृत् कश्चिच्छ्यामास्यः पिप्पलाश्रितः ।
बालानां कौतुकोल्लासी हस्योल्लासी सोऽभवत् ॥८॥

तदानीमेव कश्चित् कौटुम्बिकः शालभद्रः समागत्य परिहासं प्रसर्जयन् प्रावोचत् भट्टपादान्—"महाराज ! अद्य तु श्याममुखो लाङ्गूली वानरः समागतः—अहो समुत्सवोऽभूद् बालानामिति । भट्टपादैरवगतम् यदयं मामुद्दिश्यैव कथयति, "लाङ्गूली समागतः" इति । तदा प्रोक्तम् भट्टपादैः—"किमु गतोऽप्यन्यत्र कुत्रचन ?" स तु सम्मुखे एव मे स्थितः समालपति चायम्" । पुनरुक्तम् तेन—नहि नहि महाराज ! अधुनैवागतः । पश्यतु भवान् "इति वृक्षोपरि दर्शयति स तं भट्टपादान् । भट्टपादाः अपि प्रहसन्त एव नहि, नहि, मित्र ! सम्मुख एव पश्यामि ; किं पुन वृक्षोपरि । आम्, अयन्त्वत्रत्य एव, निवसति च सर्वदैवात्रेति मन्ये । कुतोऽस्याऽऽगमनमन्यतः ।? शालभद्रः–नहि, अयन्त्वद्यैवागतः । इत्युक्त्वा प्रहसति । भट्टपादाः—हसन्त एव-भवतु स्वश्वशुरालये समागतस्तर्हि, का हानिः, सम्मानयन्तु भवन्तोऽपि स्वसम्बन्धिनमिति । सर्वे हसन्ति च ।

किञ्चः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दोष वायरिंग के लिये,...

ग्लास्टर केवल आधुनिक प्रणाली से और ब्रिटिश इनसुलेटेड कैलेण्डर्स केवल्स लिमिटेड के तकनीकी सहयोग के साथ ब्रिटिश और भारतीय स्टैंडर्ड स्पेसीफिकेशन्स के अनुसार बनते हैं। भारत सरकार के डाइरेक्टर आफ इंस्पेक्शन, डी० जी० एस० एण्ड डी० के द्वारा इनकी जाँच होकर सर्टिफिकेट मिला है। ग्लास्टर केवल की हर रील पर आई० एस० आई० सर्टिफिकेशन मार्के नं ४३४ की मुहर लगी है जो उत्कर्ष के हिसाब से आपकी गारंटी है।



Alyars.FG155

फोर्ट ग्लास्टर इण्डस्ट्रीज लि०

१४, नेताजी सुभाष रोड, कलकत्ता-१

शाखायें : • एम० ७१, कनाट सर्कस, नई दिल्ली-१

• बुद्धमार्ग, पटना-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा हि भट्टपादाः राजसेवायां १६३२ तमे ईशवीयेऽब्दे, "सुपर्वाइजर आफ संस्कृत पाठशालाज" पदे नियुक्ताः आसन्, तदा प्रत्यब्दं द्वित्रिवारं पाठशालानां निरीक्षणार्थं सर्वत्र जयपुर-प्रान्ते गच्छन्ति स्म। तैः सह पङ्क्तीनामासां लेखकोऽपि गच्छति स्म। एकदा शेखावतीप्रान्ते पर्य्यटन्तः क्रमेलकैर्यात्रां कुर्वन्तः, चिड़ावा, डूंडलोद, रामगढ, फतेहपुर, झून्झनूप्रभृतिष्वन्यतमे ग्रामे संस्कृतविद्यालयान् निरीक्ष्य निवासस्थाने प्रत्यावर्तिताः। तत्र भोजनादिकं सम्पाद्य शनैः शनैः चङ्क्रमण-पराः धर्मशालायाः भवनानि निरीक्षमाणाः, कस्यांश्चनैकस्या भित्तौ लिखितमपश्यन् कृष्णाङ्गारेण स्थूलाक्षरैः केनापि कुमतिना चञ्चलचेतसा लिखितम्—'आशिक" तत्रैव च "माशुक" "माशूक" स्थाने ह्रस्वस्यैवो "उ" कारस्य प्रयोग आसीत्। तद् दृष्ट्वा भट्टपादाः अहसन्, पठित्वा चाहमपि। तदानीम्ः—

"स्वाभाविककविहृदयाः कवयन्तो मां हि समवदन्नेतत्
त्वमपि करोषि तु कवितां, पदयोः स्वीयां तु दर्शय प्रतिभाम् ॥६॥

निवेदितञ्च मया, नाहमिदं पदं पूरयितुं समर्थः, यतोहि "आशिक" पदन्तु "उर्दू भाषायाः" विद्यते, कथमस्योपरि रचना क्रियेत। प्रथमन्तावत् आरम्भो भवद्भिर्विधेयः, तदनन्तरन्तु मया पूरयितुं यतिष्यते। इति निवेदिताः श्रीभट्टपादाः क्षणं विचिन्त्य सद्य एव 'आशिक' पदोपरि आर्याच्छन्दसि पदरचनां व्यधुः। तद्धि—

"आशि कवलमेकं किल पङ्किलमपि निजकरेणु-सञ्जुष्टम्"

इत्यर्द्धां निर्माय प्रोचुः किं भोः, अधुना त्ववगतम्? शेषार्द्धां त्वमेव पूरयेति। ततः किञ्चिद् विलम्ब्य मयापि निवेदितम्—यत्—

"गजपतिना, शुचिमतिना, कृतिना रतिनायकेन रसिकेन" इति

श्रुत्वैव अत्यन्तं प्रमुदिताः मत्पृष्ठोपरि स्वीयं करं धृत्वा सस्मितम्-मुहुर्मुहुः स्वशिरः कम्पयन्तः सभ्रूभङ्गविलसितञ्च विधाय प्रोचुः—ऊँ, हूँ, हुँ, साम्प्रतन्तु "खञ्जोऽपि लत्तां स्फोरयति, द्विलत्तिकां वा प्रक्षिपति—इति प्राहसन्। ततः "माशुक" इति पदस्यापि पूरणवेला समायाता।

शनैः शनैः किमपि किमपि गुनगुनायमानाः भट्टपादाः सद्यः प्रावोचन्-आम् शृणु तावत्—
"माशुक"—"मा शुक! संवह गर्वं, मधुरां वाणीमुपेत्य निजगदिताम्"
इति श्रावयित्वा, आज्ञापयन्-शेषा पूर्तिस्त्वया विधातव्येति।
मार्गे क्रमेलकारूढेन मयाऽप्यंशतः शब्दशय्या कल्पनाविषयतां नीता।
क्षणं विचार्य्य—"त्वत्तोऽभ्यधिकां मधुरां स्पष्टां वाणीन्तु सारिका वदति"
अथवा—"कलयति पश्य पिकोऽयं त्वत्तोऽप्यधिकान्तु काकलीं मधुराम्"
इति श्रुत्वाऽतीवप्रहृष्टाः स्वाशीर्भिरभ्यनन्दयन्।

एकदा भारतीपत्रिकायाः प्रबन्धसम्पादकः श्रीगिरिराजशास्त्रिमहाभागः प्रावोचत्-यद् भारत्याः विनोदवाटिकास्तम्भे-होलिकावसरे मनोविनोदाय पाठकानां लघुकायाः कविताः समपेक्ष्यन्ते' इति। तदा श्रीभट्टपादैः कतिचन दोहाच्छन्दांसि लिखितानि, मयाऽपि तदानीं लिखितानि श्रावितानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च, तानि तु तदा भारत्याः होलिकाङ्के प्रकाशितान्यप्यभूवन्। तदानीमेव भट्टपादैः समस्याप्येका दत्ता,— "वन्दे बोतलवासिनीम्" इति। तदा पूज्यपादाः मामेवोत्तेजयन्तः प्रोचुः को नाम सर्वतः प्रथमं पूरयित्वा ददाति—स्वयं शास्त्रिचरणाः, अहम्—भागिनेयः श्रीकलानाथशास्त्री चेति संनद्धा आसन्— किन्तु तेषामनुकम्पयैव स्नेहातिशयेन, प्रोत्साहेन, अत्युत्तेजनया च—आवेशोद्रेके सद्य एव प्रथमं मया निवेदिताः—पूर्तिश्च समुपस्थापिता—यद्यपि नास्त्यत्र—गम्भीर्य्यम्—

तथापि—"नाशिनीं गेहसम्पत्तेर्वकवासविकासिनीम्।
हासिनीं मित्रमोदानां वन्दे बोतलवासिनीम्" इति।

तथा साकूतमुक्तम्—"अहो खञ्जः सपादं हसतीति चित्रम्" (सचरणम्)

इत्थं प्रहसन्तो हासयन्तश्च-कलयन्ति स्म काव्यविनोदान्। सम्प्रति-सर्वं स्वप्नायितमिवाऽभवत्। स्मारं स्मारं-स्वस्वनयनाम्बुधारानिपातनातिरिक्तं न किमपि लभामहे। केवलं प्रणामाञ्जलिपुरःसरं पादपङ्कजयोस्तेषां पद्यप्रसूनाञ्जलिरेव समर्प्यते—पृच्छ्यते च भगवन्।

"त्रिभुवनवितते गिरां प्रसारे, विबुधगिरां नवगुम्फनं विधातुम्।
त्रिदशपृथुकशिक्षणाय किं ते, अभिनववृत्तकृते भवत्प्रयाणम्? ॥१०॥

सरसकवे! देवघनाक्षरीवृत्तेषु सुधानिर्झरिणी ते वाणी कुत्र कदा वा पुनः श्रुतिविषया भवित्री कदाचनेति—।

हा हन्त! "वृत्तदेवघनाक्षरी—सुधानिर्झरीभूरि।
शृणुयाम क्व नु तां, यया कर्णः सुधयाऽऽपूरि ॥११॥

कुण्डलिया :—

हित्वा हन्त जनान् स्वकान् गतोऽपि विबुधोत्तंस।
हृदयादपयास्यसि कथं, कविकुल मानसहंस।
कविकुलमानसहंस वंशमधि गौरवशालिन्।
मञ्जुलकविताकुञ्जपुञ्जगुञ्जितवनमालिन्।
ललितपदावलिकलितमाधुरीदर्शितसुगुणान्।
कथमुपयाम गते दिवं नु हित्वा हन्त जनान् ॥१२॥

सार्वभौमकवे! कियतो भवतो गुणगणान् गायेम—सम्प्रति तु :—

"हृतवित्ते जनचित्ते जनयति खेदं स्मृतोऽनुसंलापः
परिहासस्य विकासः, स्मृत्यधिवासो विलास इह वाचाम् ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुरराजकीय - संस्कृतशिक्षणालयानां निरीक्षकरूपेण
राजकीयशिक्षाविभागाधिकारिमध्ये स्थिताः
भट्टश्रीमथुरानाथशास्त्रिमहाभागाः
(उष्णीषे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"हमारी पीढ़ी के सबसे महान् व्यक्ति की यह प्रबल इच्छा थी कि हर आंख के आंसू को खुशी के मोती में बदल देना चाहिए। यह लक्ष्य दूर हो सकता है पर यह सही है कि जब तक एक आंख में भी आंसू छलकते रहेंगे, तब तक हमारा काम अधूरा ही रहेगा। इसलिए हमें मेहनत करनी है, कड़ा परिश्रम करना है ताकि हमारे स्वप्न साकार हो सकें।"

—जवाहरलाल नेहरू

हर आँख का आँसू खुशी का मोती बन जाए . .

"तो आइये, हम मिल कर आज़ाद भारत को खुशहाल और मजबूत बनाने में लग जाएं। एक ऐसी दुनियां बनाने में जिसमें युद्ध के लिए कोई जगह न हो। यह महान् कार्य हमारे सामने है और उसे हमें पूरा करना है। क्या हम गांधी जी और जवाहरलाल जी के प्रति इससे ज्यादा सच्ची और अच्छी श्रद्धांजलि अर्पित कर सकते हैं।"

—लालबहादुर शास्त्री
प्रधान मंत्री

हमारा लक्ष्य साफ है : हरेक के लिए सुखी जीवन।

इसलिए हमें गरीबी और बेरोजगारी मिटाने के लिए पूरी शक्ति लगानी है तथा सबके लिए भोजन, कपड़े और रहने के स्थान का प्रबन्ध करना है।

आइये हम कदम से कदम मिला कर समाजवाद के इस लक्ष्य की ओर आगे बढ़ें।

आज की चुनौती का एकमात्र जवाब है - अनुशासन और संगठित कार्य

जय हिन्द

एकता बनाये रखिये, चुनौती से काम लीजिये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यन्ते शिष्यवर्गस्य मध्ये भट्टमहोदयाः

वामतः– श्रीढुण्ढुराजशास्त्री, श्रीफूँदालालः सा० श्राचार्यः, स्व० श्रीभट्टमहाराजः कविशिरोमणिः, दीनानाथत्रिवेदी 'मधुपः' श्रीबलदेव शर्मा सा. श्रा.

पृष्ठतः– भट्टश्रीरघुवीरस्वरूपः सा. श्रा., भट्टगोपीनाथः सा. श्रा., श्रग्रे च भट्टश्रीकलानाथः साहित्याचार्यः भट्टमहोदयानामेव ज्येष्ठः तनयः सुता च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-संसारे ऽनभ्रवज्रपातः

'भारती' सम्पादकस्य साहित्यसार्वभौमस्य कविशिरोमणिदेवर्षिभट्टश्रीमथुरानाथशास्त्रिणः स्वर्गारोहणम्

हा हन्त, भारतस्य संस्कृतक्षितिजेऽनुपमया प्रतिभाप्रभया देदीप्यमानस्य साहित्यसूर्यस्य ज्येष्ठकृष्णनवम्यां गुरुवासरे ४-६-६४ तारिकायां निशीथोत्तरमेकवादनावसरे सहसैवास्तमनमभूदिति सूचयन्तो वयं नितरां विषीदामः। पञ्चसप्ततिवर्षदेशीयो भट्टमहाभागः प्राक् प्रायः पञ्चाशद्वर्षाणि 'संस्कृतरत्नाकर' पत्रस्य सम्पादनमकार्षीत्। प्रायो दशवर्षेभ्यः पूर्वमयं 'भारती' मासिकपत्रिकायाः सम्पादकत्वमूरीचक्रे यदनेन मृत्युपर्यन्तं निर्व्यूढम्।

साहित्यवारिधि–कविशिरोमणि–कविसार्वभौमेत्यादिबिरुदालङ्कृतोऽयं जयपुरे सन् १८८९ वत्सरे जन्म लेभे। संस्कृतकालेजे (जयपुरीये) व्याकरणशास्त्र–साहित्याचार्यादिपरीक्षाः ससम्मानमुत्तीर्यानेन पञ्जाबविश्वविद्यालयीया शास्त्रिपरीक्षा १९०६ वर्षे सर्वप्राथम्येनोत्तीर्णा। १९२२ ई० वत्सरे महाराजसंस्कृतकालेजे सोयं साहित्याध्यापकोऽभूत्। १९२६ वत्सरे महाराजकालेजे (आङ्गल विद्यालये) हिन्दी-संस्कृतप्राध्यापकपदं, १९३० वत्सरे समस्तपाठशालानां निरीक्षकपदं, १९३४ वत्सरात् १९४२ वर्षपर्यन्तं महाराजसंस्कृतकालेजे साहित्यविभागाध्यक्षपदं चानेनाधिष्ठितम्। संस्कृतकवितायां नवीनशैली-छन्दःप्रकारादिसमन्वयपुरःसरमनेन भूयांसः काव्यग्रन्थाः साहित्यवैभव, जयपुरवैभव-गोविन्दवैभवा' दयो लिखिताः, 'रसगङ्गाधर' 'कादम्बरी' 'ईश्वरविलास' 'पद्यमुक्तावली' प्रभृतिग्रन्थाः सम्पादिताः भाष्यटीकाभूमिकाभिश्चालंकृताः। एतल्लिखिताः १४ मौलिकग्रन्था उपलभ्यन्ते। 'संस्कृतसुबोधिनी' 'सुलभसंस्कृतम्' प्रभृतयः पाठ्यग्रन्था अप्यनेन लिखिताः।

एताद्विलिखिताः परः सहस्रं लेखाः, कथाः पद्यानि, टीकाष्टिप्पण्यश्च संस्कृतसंसारस्यामूल्यो निधिः। आधुनिककाले भट्टपादानां साहित्यभाण्डागारः सर्वाधिकः। संस्कृतरत्नाकर' पत्रसम्पादनं १९०४ ई० वत्सरादारभ्य पञ्चाशद्वर्षाणि यावदमीभिः संस्कृतपत्रकारितायाः स्वस्था परम्परा प्रवर्तिता। एतेषां रचनाशैली, गद्यलेखविधा च संस्कृतसाहित्येतिहासे नवीनमेकं युगं प्रसूतवत्यौ। संस्कृतभाषायामसामान्यमधिकारमधिष्ठितानामेषां काव्यैरपभ्रंश—ब्रजभाषा—उर्दू इत्यादिच्छन्दसां प्रयोगद्वारा भाषाया अस्या अभिव्यक्तिमाध्यमेषु या ह्यभूतपूर्वा वृद्धिरनुष्ठिता, तदिदमेषामवदानमाचन्द्रदिवाकरं संस्कृताध्येतृभिः स्मरिष्यते। रसगङ्गाधरस्य शोधन-सम्पादन-टीकादिविधानेन 'संस्कृतसुबोधिनी'-संस्कृतसुधा-सुलभसंस्कृतादिपाठ्यग्रन्थनिर्माणे, च परः शतानां शिष्याणां शेमुषीं निर्मलीकृत्य भट्टमहाभागैः संस्कृतसाहित्यस्य या ऽऽजीवनं सेवा विहिता, सा सर्वदैवाजरामरा स्थास्यति। भट्टमहाभागान् प्रसभमस्मत्सकाशादाहृत्य दारुणेन विधिना संस्कृतज्ञानां हृदयान्यकरुणमाहतानि। एतेषां भौतिकं सामीप्यं व्यतिगमय्यापि वयं सदैव तेषां यशःकायस्य छायायां जीविष्यामः। चराचरनायको भगवान् भट्टमहोदयेभ्योऽक्षय्यदिव्यलोकवासं तत्परिवारजनेभ्यश्च वज्राघातमिमं सोढुं शक्तिं प्रदेयादित्येवास्माकं प्रार्थना।

भारतीपरिवारः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धाञ्जलिः

सा० महोपाध्यायकविभूषणाशुकविः श्रीहरिशास्त्री दाधीचः,

येनाऽनेकविधा निबन्धरचनाः स्फारा उदाराः कृताः
शब्दालंकृतिशेवधिः समभवद्यद्वाग्विलासोदयः ।
ख्यातो नैकगुणाकरः सहृदयो विद्वत्सु बद्धादरः
सोऽयं मञ्जुनिकुञ्ज-संकलयिता प्राप्तः कथाशेषताम् ॥१॥

भारत्याः पदसेवकः सुरगिरामुन्नायनेच्छाधरः
यः संसत्सु बहुत्र संस्कृतविदां प्राप्तः सभाध्यक्षताम् ॥
व्याख्यानेऽतिपटुर्महाञ्जयपुरीराजप्रजामानवान् ॥
मित्रप्रीतिविवर्द्धनः स मथुरानाथो दिवि भ्राजते ॥२॥

शीर्षे बन्धुनिबद्धरंगपटिको दीर्घाङ्गरक्षं वहन्
अंसालंबिमहोज्ज्वलद्विपटको हासप्रभावान्मुखे ।
खर्वश्रीरपि योऽवहत्सुरुचिरामोजोविशालां तनुं
तस्मै भट्टकवीश्वराय हरिणा श्रद्धाञ्जलिर्दीयते ॥३॥

नूत्ने यो वयसि स्वसंस्कृतगिरा रत्नाकरं पूरयन्
विद्यां स्वाधिगतां प्रकाशमनयत् भास्वानिवाभां निजाम् ॥
वार्द्धक्ये समपादयच्छुचिमिमां यो भारतीपत्रिकां
स्वर्लोकं गतवान् स कोविदवरः श्रीमञ्जुनाथाभिधः ॥४॥

यो देवर्षिकुले चिराय समभूद्देवर्षिवत् ख्यातिमान्
शास्त्रार्थप्रतिपादने भट इव प्राभूद्बलेनोद्भटः ।
यो वक्ति स्म रसोज्ज्वलां पिक इव प्रायो मनोज्ञां गिरं
एकोप्येष कवित्वमञ्जुलकलाकारो गतः पञ्चताम् ॥५॥
देवर्षये श्रीमथुरामिधाय भट्टाय विद्वत्कुलमण्डनाय ।
भुवं विहायाथ दिवंगताय श्रद्धाञ्जलिर्दीयत एष भक्त्या ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुवर्याणां श्रीभट्टमहाभागानां संस्मरणानि

पूज्यतमगुरुवरस्य स्वर्गीय—भट्टमहाराजस्य साहित्यिकप्रतिभायाः कविकर्मणः वक्तृतायास्तथा संस्कृतसाहित्यस्य च सेवाया विषयेऽनेकाः कतिचिद् वार्ताः 'भारती' संस्कृतमासिकस्यास्मिन् श्रीभट्ट-श्रद्धाञ्जल्यङ्के सन्ति प्रकाशिताः। अहमपि स्वजीवने भट्टमहाभागानां याभिः कतिपयविशेषताभिः प्रभावितो वर्ते, ताः संस्मरणरूपेणात्र समासतो निवेदयामि।

१९३८ ईशवीयवर्षात् १९४२ वत्सरं यावदहं यदा जयपुरीय—महाराज—संस्कृत-महाविद्यालयेऽधीयान आसम्, तदा शास्त्रिश्रेणौ भट्टमहाभागतः पठनस्यावसरं लब्धवान्। साहित्यदर्पणादिग्रन्थानामध्यापनस्यावसरे च मार्मिकं स्थलं विश्लेषणात्मकरूपेण सम्यगवबोधयति स्म भट्टमहाराजः, यद्यस्माकं मध्ये कश्चनच्छात्रो दत्तावधानो न भवति स्म, तदा सविनोदं तेन गुरुमहाभागेन प्रोच्यते स्म प्रायः—'भ्रातः! सम्प्रति त्वया नैजं मस्तिष्कभाजनं सम्यक् संरक्षणीयम्, अन्यथा मद्वचोनिर्गतोऽयं रसस्ततो बहिरेव कुत्रचिन्निपतिष्यति, न मनागपि हस्तगतो भविष्यति' इति। एतद्वचो निशम्य त्वरितमेव तदा शिष्याः सर्वेऽध्यध्ययने पूर्णरूपेण दत्तावधाना भवन्ति स्म।

किञ्च श्रीभट्टमहाराजः स्वयं न्यायप्रियस्तथा छात्रोन्नतिप्रियश्चावर्तत—तदानीं मयैतद्विज्ञातम्, यदा महाराजसंस्कृत-कालेजस्य पक्षतो राजस्थानीय—क्रीडाप्रतियोगितायां मल्लक्रीडायां भागं गृह्णन्नहं पिलानीस्थितेन प्रख्यातेन मल्लेन श्रीप्रभुदयालुशर्मणा सह द्वित्रवारं मल्लक्रीडां कुर्वन् तत्समतामासादितवान्, तथैव महाराज—महाविद्यालयस्य श्रीगौरीशङ्करश्च मल्लक्रीडायां पराजितवान्। तदा स श्रीगुरुदेवो वृत्तमिदं श्रुत्वा कामं प्रासीदत्, माञ्च स्वस्यान्तिके समाहूय ममोत्साहं वर्धयन्नवोचत् यद् 'यथा त्वं नियमेन विधाय व्यायामं स्वस्य शरीरं पुष्टं सबलञ्च कृतवानसि, तथैवाहमपि कतिपयवर्षेभ्यः प्राक् काममत्यधिकं व्यायाममकार्षम्, तथा संप्रति चापि नित्यं नियमेन समाचरामि, यतो हि दैहिको मानसश्च व्यायामो नित्यं नियमेनाऽवश्यं विधेयः। अतस्त्वयापि स्वजीवने व्यायामसेवनं न परित्यक्तव्यम्'—इति।

अपि च ते भट्टमहानुभावा आधिक्येन अस्वस्था यदा आसन् स्वस्थाने अहञ्च तद्दर्शनार्थं गतवान्, तदा श्रीभट्टमहोदयः पूर्वं स्वशरीरं स्पृष्ट्वा पुनर्मामकं शरीरं स्वहस्तेन परामृशन् समभाषत—'गिरिराज! त्वं नित्यं व्यायामं सेवसे, अतस्तव शरीरं पूर्णरूपेण वर्तते पुष्टं स्वस्थम्, परं कतिपयवर्षेभ्यः प्राक् मम मित्रं स्वर्गीयः श्रीसूर्यनारायणाचार्यः 'वार्द्धक्ये व्यायामो न कर्त्तव्यः' इति सानुरोधमुक्त्वा मां न्यषेधत्। ततः प्रभृति मया व्यायामः परिहृतः, केवलं भ्रमणमेव मया विधीयते। पुनश्चैतदपि श्री कविशिरोमणिभिः प्रोक्तम्—यत् गिरिराज! यदि त्वं वदेस्तर्हि संप्रति पुनरहं व्यायामं प्रारभेये'-ति। एवं व्यायामविषये श्रीभट्टमहाभागानां तेषामासीदनन्योऽनुरागः।

अपि च श्रीगुरुमहाराजस्य साहित्यप्रणयने काममतिरुचिरवर्तत। महाभागः स हि प्रातः शीघ्रं समुत्थाय चिरकालं लेखनकार्यं तथाऽध्ययनं कुर्वाण एवास्थात्। तस्य साहित्यसेवायामनन्याभिरुचेश्चैतदेव प्रत्यक्षमुदाहरणं वर्तते यत् जीवनस्यान्तिमदिनेष्वपि—'भारती' सम्पादनकार्यं नैव पर्यत्यजत् स महाभागः। कर्मवीरः स हि महाराजः सर्वं स्वकीयमावश्यकं गृहकार्यमपि परित्यज्य प्रथमं 'भारती' पत्रिकायाः सम्पादकीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य विद्वद्वरस्य गुणगणाकरस्य साहित्यविद्याधुरन्धरस्य शुभ्रसुयशोभरस्य भट्टश्रीमथुरानाथमहोदयस्य स्मृतौ सोयं भारतीपत्रिकाया विशेषाङ्कस्य भवतां पाणिपल्लव उपस्थापितस्तस्य सूक्ष्मशेमुषीभृतो महिमशालिनः परिचयादिविषये किमपि वक्तुं समादिष्टोऽहम् साम्प्रतं हि तदिदमीषत् वदामि—

निश्चयेन जानेहं भट्टमहोदयाः मत्तः पंचसम्बत्सरज्येष्ठा आसन्। अहं च षोडशवर्षीय एव तेषां सम्पर्कं प्राप्तवान्। ततः प्रभृति तेषां वैदुष्यं साहित्ये नैपुण्यं वाक्पाटवं व्यवहारं कवित्वकलां प्रौढिं व्याख्यातृत्वं सम्पादकत्वं लेखनशैलीं सौहार्दं सहृदयतामौदार्यं तेजः क्षमां बलं साहसं करुणां प्रसादं निग्रहानुग्रहमपि च सर्वं यथा यथासमयं यथावसरं च मया समनुभूतं दशपञ्चदश पंक्तिषु किं पुस्तिकारूपेणापि पृथक् पृथक् गुणानां विवेचनं कुर्याम् चेन्महानिबन्धः सम्पद्येत।

जयपुरे च प्रायशः बहवो जनाः पण्डिताः छात्राः सभ्याः सम्यक् जानन्ति, ततो हि संक्षिप्यैव बोधयामि।

इमे हि महाशयाः सहृदया महान्त उदाराः सुविचारा निर्विकारा अभूवन्। भाषणव्यवहारे मृदुलस्वभावा मधुरगिरश्चासन्। सत्यपि कारणे क्रोधविवशा अपि कस्यचित्कृतेऽपशब्दं न वदन्तिस्म। शास्त्रार्थसमयमपहाय यत्र कुत्र व्यवहारविषये न विवन्देत स्म। सुहृत्समुल्लासगोष्ठीप्रिया हीमे प्रायशो निजवृषभशकट्यामास्थाय मित्रैः सह नगराद्वहिर्विहरन्त स्म। तत्रैव च संस्कृतभाषणं कुर्वन्तः समस्यापूर्त्यादिकं स्वपाण्डित्यं प्रदर्शयन्ति स्म। क्वापि सरस्तीरे वाऽऽरामे उपवने वा विराजन्तो मित्रेषु मनोरञ्जनमपि नैकधा कलयन्ति स्म। स्वयं न हसन्तः परान्हासयन्तिस्म, यथा च संस्कृतसाहित्यनिबन्धेषु कवीनां लक्षणानि सन्ति तान्यत्र प्रतीयन्ते स्म। उत्सवे समाजे च गमनं, चित्रादिनिरीक्षणोत्कण्ठा, जनसंघट्टे गमनं, तत्र प्रकृतिसमाभ्यासः नृत्यगीतादिश्रवणं, तत्र च कवित्वदृष्ट्या औचित्यानौचित्यविचारः, कविसम्प्राप्तौ स्यकीयं कवित्वश्रावणं, परेषां च कवित्वश्रवणं, परमादरेण तद्गुणगणाभिनन्दनं, उदारतया च गृहप्राप्तानां कविजनानां विदुषां सत्कारः। मित्रेषु सहयोगित्वं, देशोत्सवदर्शनं, चित्रकाव्यनिर्माणं भाषाविवेचनं देववाणी-समुन्नतिकृते नितरां योगदानमित्यादिकविजनोचिता गुणास्तत्र भवत्सु भट्टमहोदयेषु दृष्टा मयका अनुभूताश्च यथा च ये च कविकण्ठाभरणादिषु क्षेमेन्द्रादिभिः प्रतिपादिताः

लेखन—प्रूफशोधनादिकमेव कार्यं कुरुते स्म। किञ्चैवं १५ वर्षेभ्यः प्राक् पूज्यस्य उमाकान्तकेशव (बावासाहब) आपटेमहोदयस्याध्यक्षतायां 'भारती' मासिकप्रकाशनस्य विषये प्रथमं वार्तालापे संवृत्तेऽनन्तरं भारत्यामेतादृशी सरले संस्कृते लेखसामग्री प्रदेया, यया दशमकक्षास्थश्छात्रोऽपि विना श्रममर्थं बोद्धुं शक्नुयात्—इति निर्णयोऽयमजायत। तदा श्रीभट्टमहाभागेनाऽपि तथैवाङ्गीकृत्य १४ वर्षाणि यावत्कार्यमिदं सपरिश्रमं निर्व्यूढम्। श्रीमहाकवेस्तस्य प्रबलोऽभिलाषोऽयमवर्तत यत् सुरसरस्वती सेयं राज्यभाषापदं लभेत—इति। एतदर्थञ्च भट्टमहाभागैस्तैः सुमहान् प्रयत्नोऽपि कृतः। अद्य तेऽत्र लोके न सन्ति, केवलं तेषां स्मृतिरेव विद्यते। अतः श्रीभट्टमहाभागाभिलाषपूर्त्यर्थञ्च संस्कृतस्य भूयसी समुन्नतिर्यथा भवेत् तथैव तन्मार्गमनुसरद्भिः संस्कृतसेविभिरस्माभिः प्रयासो विधेयः—इति गिरिराजशास्त्री प्रबन्धसम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थमेते महोदयाः समभ्यस्यन्तः शास्त्राणि कलयन्तः काव्यानि विमृशन्तः आकरग्रन्थान् काव्यप्रकाशादीन्, विचारयन्तः पुराणानि स्मरन्तः स्मृतीः पठन्तश्चोपनिषदः विवेचयन्तश्चालंकारान् अनुभवन्तो, भावान् विभावानपि समुन्नतश्रेणिगता विद्वांसः सम्पन्नाः रसगंगाधरे ऽपि ये टीकां व्यरचयन्तः कादम्बर्यामपि प्राञ्चिता स्वलेखनी चैभिर्महाभागैः ।

नैकान् निबन्धान् लेखांश्चैतैस्वकीयसहकारिसम्पादकत्वसंचालिते संस्कृतरत्नाकरे (संस्कृतमासिकपत्रे)ददति स्म । जनमनोरञ्जनापूर्णा इमे प्रजाभिः समभिनन्द्यन्ते स्म सोऽयं रत्नाकरो बहूनि वर्षाणि समपाद्यत विद्वद्वरैरेतैः सम्वर्धितः परिपूर्णप्रकाशमायातः ख्यातिं च लेभे ।

मयापि तत्र रत्नाकरप्रकाशशोधनप्रचारविषये कार्यं किंचन सम्पाद्यते स्मेति ममापि लेखानिमे महाशयाः मम साहसम्वर्धयन्तः प्रकाशितवन्तः स्वकीये संस्कृतरत्नाकरे इति बहुप्राचीनां वार्तामद्योद्भवामेव स्मरामि परं न पश्यामि तान्भट्टमहोदयानिति खेदः ।

बलीयान् खलु निष्ठुरः क्रूरः एवैष कालः युगपरम्परां दारयन्नयं न पश्यति कुलं न विचारयति चौचित्यं नेक्षते वयः नालोकते विद्यां न स्मरतिगुणान् न विमृशति परिस्थितिं न वेत्ति कारुण्यं न स्पृशत्यौदार्यं न चिन्तयति कुल न जानाति दैन्यं न कलयति दयां तथैव च न विचारयति धर्मं चेति ।

तदनेन क्रूरेण निर्घृणेन कालेनैव सोऽयमस्माकं विद्वत्पुंगवः कविशिरोमणिः बलादिवापहृतस्तत्कृते वयं खिद्यामश्चिन्तयामो ध्यायाम आकलयामश्च तं तं जनं परं तादृशो नैकोऽपि-दृग्गोचरं प्राप्नोति ।

किं वदामः-संख्यातः प्रवृद्धा विद्यालयाः विद्वांसश्च छात्राश्चापि अध्ययनपुस्तिका अपि प्रतिदिनं विवर्धन्त एव, तट्टीकाष्टिप्पणानि कुञ्चिकाश्चापि विपुलीभवन्तीव, परं क्व सा मेधा, क्व तद्धैर्यं, कुत्र च तादृक् पटुत्वं, क्व सा भाषणशैली क च काव्यकलाः कुत्र ते कवित्वगुणाः, क्व चानुप्रासादिशब्दालंङ्कृतिझङ्काराः सूक्तिषु, क्व तेऽर्थालङ्कारा ध्वनयश्च क्व च रीतयः वृत्तयश्चेति, काव्यनिर्माणकलास्तद्गुणाश्च नूतनैरुद्भूयमानै र्हिन्दिकोविदैः विलोप्यन्त एव नामृश्यन्ते न विचार्यन्ते नाद्रियन्ते प्रत्युताधरीक्रियन्ते त्यज्यन्ते न स्वीक्रियन्ते न विज्ञायन्ते चेति ।

सोऽयं विद्वान् भट्टमहोदयः स्वकवितायां सर्वानिमान् साहित्यगुणगणान् यथास्थानं यथावसरं यथाभावं यथारसं यथावकाशं स्वकलाकारताबलेन स्वर्णभूषणेषु जटिता यथा यथोचितं रत्नानि स्थापयति उट्टङ्कयति निखनति तद्वत् विन्यस्यति स्मेति नैतादृशः कविः शीघ्रमस्मानुपेयादिति निराशामात्रमेव ।

तदमीषां गुणानां मयकोदितानामुदाहरणमेकैकशस्तु किम्मिदानीं दर्शयामि नायमवसरः परं उपस्थापये तदीयं ग्रन्थद्वयं यत्र च सर्वा अपि साहित्यसम्पदः सम्भृतास्तत्र तत्र पश्यन्तु साहित्यकोविदाः सहृदयाः जयपुरवैभवं साहित्यवैभवं चेति इमौ महानिबन्धौ तत्पुत्रपं०श्रीकलानाथसन्निधाने मिलतः इति गृहीत्वा दर्शनानुभवतोमदीयं कथनं चरितार्थीक्रियतामिति ।

सम्प्रति च काले जराजीर्णतामुपगम्यमानोऽपि सोऽयं महान्तं साहसमेव कुर्वन् संस्कृतभाषासाहित्यसमृद्धये यतमान एव दृश्यते स्मेति नाऽविदितमत्रत्यानाम् । उदाहरणार्थं भारतीपत्रिकायाः सम्पादकत्वभरमपि बहन्नेव जीवति स्म । भारतीसेवां संस्कृतभाषापूजनमिव करोति स्मेति तमिमं धन्यं वदन्त एव वयं श्रद्धाञ्जलिमावेदयन्तः श्रीपरमेश्वरं सदाशिवं प्रार्थयामो यदस्मै स्वर्गताय कविशिरोमणये भट्टमहोदयाय शाश्वतं सुखं शान्तिं च प्रापयतुतरामिति शिवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमतां मित्रवर्गः शिष्यवर्गश्च

ले० श्रीकमलानाथशर्मा, भट्टमहाभागानां कनिष्ठपुत्रः

सुहृदः

पूज्यपितृचरणानां मित्रवर्गे ये ये महान्तो विद्वांसो विचारकाः, शोधकर्त्तारः, कवयः, साहित्यकाराश्चाभूवन्, तेषु आंगलभाषाविदः, हिन्दीविद्वांसः, संस्कृतज्ञाः, राज्यकर्मचारिणः, पदाधिकारिणश्च सर्वेऽपि सर्वविधवर्गीया अभवन्। कारणमेतस्येदमेव वर्तते यद् भट्टमहाभागाः संस्कृतविद्वांसोऽभूवन्। अत एव संस्कृतज्ञा एतन्मित्राणि भवन्त्विति स्वाभाविकमेव, परं हिन्दीविद्वत्स् बहवः सुहृदोऽस्य हिन्दीसेवाप्रसङ्गादासन्, तथैव महाराज-कालेजे (आङ्गल डिग्री कालेजे) अध्यापनसमये आङ्गलभाषा, दर्शन, राजनीति-फारसीत्यादिबहुविषयाणां विद्वांसोऽप्यस्य सुहृदोऽभवन्, ततश्च राजकीयग्रामादिसम्पत्तेरुपभोक्तेति कृत्वा बहवः सामन्ता अप्यनेन सुहृद्भावमापन्नाः। एवं विविधक्षेत्रेषु कार्यं कृतवतोऽस्य सुहृद्वर्गोऽपि विविधक्षेत्रीयः सुविस्तृतश्चाऽभूत्। किन्तु शिशुना मया तेषु मित्रेषु त एव स्मर्यन्ते येषां प्रसङ्गानुगता चर्चा पितृचरणैः कृताऽभूत् पारिवारिक-वार्त्तालापेषु। यद्यपि महाराजाकालेजे, संस्कृतकालेजे संस्कृतसंमेलनेषु, कविसम्मेलनेषु चानेन सह कार्यं कृतवन्तः सर्वेऽपि महानुभावा अस्य मित्राण्येवासन्, तथाऽपि कतिपयेषां नामोल्लेखमहं स्मृतेराधारेण करिष्ये, येन सहृदयानां पाठकानामेतन्मित्रसम्बन्धे किंचन परिज्ञानं स्यात्।

यौवनकाले कविगष्ठीषु पण्डितसभासु चामीभिर्विद्वद्भिः सख्यं सम्पन्नं भट्टमहाभागानाम्।

१. स्व० स्वामिश्रीलक्ष्मीराममहाभागाः, आयुर्वेदमार्त्तण्डाः, गोष्ठ्यां प्रामुख्यं सर्वदैवाभजन्।
२. म. म. पं. गिरिधरशर्मचतुर्वेदाः, तदा संस्कृतकालेजाध्यक्षाः, भारतविश्रुता बुधाः।
३. स्व. पं. चन्द्रधरगुलेरी-सुप्रसिद्धा विद्वान्, हिन्दीसाहित्यकारश्च
४. स्व. पं. श्री सोमदेवगुलेरी, एतद्भ्राता, संस्कृताध्यापकः, संस्कृतकालेजे जयपुरम्
५. पं. जगद्धरगुलेरी, एतत्कनिष्ठः, राज्याधिकारी, पञ्चाम्बुप्रान्तीयः,
६. स्व. राजगुरुः पं. चन्द्रदत्तचौधरी, व्याकरणविभागाध्यक्षः, (सं. का., जयपुरे)
७. स्व. पं. श्रीसूर्यनारायणाचार्यः (महाराजकालेजे संस्कृताध्यापकः)
८. स्व. पं. कन्हैयालालशास्त्री न्यायविभागाध्यक्षः, (सं. का., जयपुरम्)
९. स्व. पं. श्रीनारायणशास्त्री खिस्ते, वाराणसेयसंस्कृतकालेजे साहित्यप्राध्यापकः।
१०. पं. प्रद्युम्नझा (विद्यावाचस्पति श्रीमधुसूदनझा महाभागानां तनयः) जयपुरम्।
११. पं. श्रीचिम्मनलालगोस्वमी "कल्याण" सम्पादकः, गोरखपुरम्।
१२, स्व. पं. पुरुषोत्तमचतुर्वेदी, साहित्यमार्त्तण्डः, काशी।
१३. श्रीहरिशास्त्री, आशुकविः, वर्तमान-'भारती' सम्पादकः, जयपुरम्-इत्यादयः।

निम्नलिखितविद्वांसोऽपि विभिन्नप्रसङ्गेषु सख्यमापन्ना :—

१. प्रो. दिनेशचन्द्रदत्तः, महाराजकालेजे भू पू. आङ्गलसाहित्यविभागाध्यक्षः, जयपुरम्।
२. प्रो. रामचन्द्रबलवन्त आठवले, अहमदाबादे आर्ट्सकालेजे संस्कृताध्यक्षः गुर्जरप्रान्ते।
३. स्व. मौलवी बका महोदयः, महाराजकालेजे पारसीकसाहित्यविभागाध्यक्षः, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. श्री चाँदबिहारीलालमुंशी, 'सबा' महोदयः, भारतख्यातः उर्दू कविः, जयपुरम् ।
५. स्व. डा० अमरनाथयाज्ञिकः, आयुर्वेदविभागे एलोपेथिप्रवक्ता, जयपुरे ।
६. श्रीशोभामयघोषः, महाराजकालेजे भू.पू. इतिहासविभागाध्यक्षः, जयपुरम्
७. श्रीवासुदेवशरणोऽग्रवालः वाराणस्यां विश्वविद्यालये भारतीयशास्त्राध्यक्षः, उत्तरप्रदेशे ।
८. श्रीबलभद्रलालमहाभागाः शुद्धाद्वैतदर्शनाचार्याः, मथुरा ।
९. श्रीउदयशङ्करभट्टमहाभागः हिन्द्या विख्यातो लेखकः साहित्यकारश्च, देहली ।
१०. श्रीरायकृष्णदासमहोदयः हिन्दी-साहित्यकारः, काशी ।

स्व० श्रीपरशुरामकृष्णगोड़े-महोदयो भाण्डारकर ओरिएन्टल रिसर्च इंस्टिट्यूट, पूना संस्थाया अध्यक्षो (क्यूरे र) भट्टमहाभागस्य घनिष्ठसुहृत्सु मुख्यत उल्लेखमर्हति । अनेन हि भट्टमहाभागस्य साहाय्येन बहवः शोधप्रबन्धाः पूरिताः, भट्ट-महाभागेन चास्य बहवः प्रबन्धा आङ्गलभाषातो हिन्द्यां संस्कृते चावतारिताः । संस्कृतविकासार्थं राजस्थान-सर्वकारेण या संस्कृतविकाससमितिः (Expert Commiltee) नियमिता, तस्याः, सदस्याः, ये हि पूर्वत एवैषां सुहृदोऽभूवन् यात्रासु, सभासु, समितिषु च विद्वत्तापूर्णविनोदैरभूतपूर्वमेकं वातावरणं निर्मान्ति स्म, यद्भट्टमहाभागा नितरामराचेयन् । एतेषु तदानीन्तनो जागीरकमिश्नरः अधुना राजस्थान-संस्कृतायोगस्याध्यक्षः श्रीलक्ष्मीलालजोशी, I.A.S.; राजस्थानसंस्कृतशिक्षासंचालकः श्री के. माधवकृष्णशर्ममहोदयः, तदानीं सर्वकारीयपाठ्यपुस्तकराष्ट्रियकरणसचिवः श्रीरामचन्द्रवामनकुम्भारे M.A. महोदयः, अधुना शंकराचार्य-सिंहासनारूढस्तदानीं जयपुरीयसंस्कृतकालेजाध्यक्षः श्रीचन्द्रशेखरद्विवेदी, राजस्थान-संस्कृतपरीक्षापंजीयकः श्रीयुगलकिशोरशर्मा M.A इति विद्वत्पञ्चकमेतेषां स्मृतावामृत्यु समस्फुरत् सस्नेहम् अनेनैव समितिसख्यसंबंधेन ।

एवं विविधेषु क्षेत्रेषु भट्टमहोदयानां विद्वत्सुहृदः सर्वदैवैषां स्नेहभाजनमभूवन्, एतेषु च सदैव सस्नेहं श्रद्धापरा आसन् ।

शिष्याः

महाराजकालेजे, संस्कृतकालेजे च विपुलानि वर्षाण्यध्यापितवतो भट्टमहाभागस्य परः शतं शिष्याः सन्ति, ये भारतस्य विविधेषु प्रान्तेषु विद्यन्ते सुस्थिताः । संस्कृतकालेजेषु विद्यार्थिनां संख्या स्वल्पैव भवतीति महाराजसंस्कृतकालेजेपि नासन् बहवश्छात्राः । तथापि स्वतन्त्ररूपेण साहित्यमधीतवत्सु बहवो विद्वांसोऽप्येतेषां शिष्यसूच्यामुल्लेखमर्हन्ति । महाराजकालेजे संस्कृतं हिन्दीं चाधीतवन्त एतच्छात्रा बहुसंख्याकाः सन्ति । एते संस्कृतं वा हिन्दीं वा द्वितीयभाषारूपेणाधीतवन्तस्तथापि संस्कृताध्यापके भूयसीं श्रद्धां परिरक्ष्य सपरिश्रमं संस्कृतमधीतवन्तो विद्वांसश्च संवृत्ताः । भट्टमहाभागै र्बहुकालं यावत् हिन्दीप्राध्यापकपदमप्यधिष्ठितम् । हिन्दीसाहित्यरात्रि-पाठशालायामपि बहवश्छात्रा एतत्सकाशमपठन् । एवमेवंविधा बहवः सज्जना अद्यापि सर्वकारेऽन्यत्र चोन्नतानि पदान्यधितिष्ठन्ति । एतेषु संस्कृतकालेजीयच्छात्राणामुल्लेखार्हाः, कतिपयेऽधस्तादुपसूच्यन्ते—

१. श्रीगणेशरामशर्मा विश्रुतः संस्कृतसाहित्यकारः झालावाड़ः ।
२. श्रीरघुवीरस्वरूपभट्टः, सा आ. अलवरविद्यालये ऽध्यापकः ।
३. श्री जगदीशशास्त्री, साहित्यविभागाध्यक्षः, सं. का. जयपुरम्
४. श्रीगिरिराजशास्त्री 'भारती' प्रबन्धसम्पादकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. श्रीबलदेवशास्त्री, जयपुरम्

६. श्रीदुर्गादत्तशर्मा, जयपुरमाध्यमिकविद्यालयाध्यापकः।

७. श्रीगोविन्दनारायणशर्मा

८. श्रीफूँदालालशर्मा म. सं. का. पुस्तकालयाध्यक्षः, जयपुरे

९. श्रीचन्द्रशेखरवैद्यवरः, अनुसंधानशाला, आयुर्वेदकालेजः, जयपुरम्

१०. श्रीगोपीनाथभट्टः साहित्याचार्यः, अध्यापकः।

११. रा. गु, कथाभट्टः श्रीजगदीशचन्द्रशास्त्री साहित्याचार्यः, जयपुरम्

१२. श्री दीनानाथत्रिवेदी 'मधुपः' प्रसिद्धः साहित्यकारो 'भारती' सहसम्पादकः।

स्वतन्त्ररूपेण संस्कृतमधीतवत्सु—

१. स्व. पं. श्रीवृद्धिचन्द्रशास्त्री।

२. पं. श्रीमुकुन्ददेवो वैद्यवरः,

३. श्रीजयरामदासः स्वामी,

४. स्व. श्रीनन्दकिशोरवैद्यवरः,

५. श्रीप्रवीणचन्द्रजैनः M.A., प्रिंसिपलः, डूंगर कालेजः, बीकानेरः।

६. स्व. पं श्रीमोतीलालशास्त्री वेदवीथीपथिको भारतविश्रुतो वेदविद्वान्।

७. डा० सरनामसिंहशर्मा 'अरुणः' राजस्थानविश्वविद्यालये हिन्दीविभागाध्यक्षः।

८. प्रो० राधागोविन्दशर्मा गवर्नमेंटकालेजे संस्कृतप्रवक्ता (टोंक) इत्यादय उल्लेखार्हाः।

महाराजा कालेजे एतद्विद्यार्थिषु निम्नोद्धृताः कतिपये अभूवन्—

१. श्रीकन्हैयालालतिवाड़ी M,A,, राजस्थानस्य प्रमुखः उद्योगपतिः, जयपुरम्

२. श्रीद्वारकानाथपुरोहितः I.P.S., D.I.G. Police।

३. श्रीनरोत्तमलालजोशी भू.पू. राजस्थान-विधानसभाध्यक्षः, झूंझनूः।

४. डा० कन्हैयालालः सहलः M.A., हिन्दीसाहित्यजगति विश्रुतो विद्वान् पिलानो।

५. प्रो० मक्खनलालसहलः M.A., आंग्लसाहित्यविभागाध्यक्षः, बीकानेरकालेजे।

६. श्रीयुगलकिशोरचतुर्वेदी, भू.पू. शिक्षामन्त्री, मत्स्यप्रदेशे।

७. डा० रामरतनकासलीवालः, उदयपुर-विश्वविद्यालये राजनीतिविभागाध्यक्षः।

८. श्रीनारायणमाथुरमहोदयः, हैड़मास्टरः।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. श्रीमदनगोपालखूंटेटामहोदयो राज्याधिकारी।

१०. श्रीनृसिंहप्रसादहल्दिया ,, ,,

११. पुरोहितश्रीप्रतापनारायणः कविरत्नं, हिन्दीसाहित्यकारः, जयपुरम्

१२. श्रीमुकुन्दरामपंड्या, Treasuny officer, जयपुरम्

१३. श्रीगोपालनारायणबहुरा M.A. राजस्थान पुरातत्त्वान्वेषणसंस्थान (जोधपुर)-स्योपसंचालकः।

१४. श्रीओमिनचन्द्रचटर्जी, मुख्यन्यायालय-वाक्कीलः, जोधपुरम्

१५. श्रीमणीन्द्रनाथबनर्जी, राज्याधिकारी, A.S,O, अलवरः।

१६. श्रीफणीन्द्रनाथबनर्जी ,, जयपुरम्।

१७. श्रीमनोहरलाललड़ीवालः, 'अग्रवाल-ब्रदर्स' संस्थाध्यक्षः, जयपुरे।

१८. श्रीश्यामसुन्दरशर्मा, M.A., भू.पू. रजिस्ट्रारः, रुड़कीविश्वविद्यालये, संप्रति वनस्थल्याम्।

१९. मेजरजयसिंहमहोदयः, केकड़ीपंचायत-समिति-प्रधानपदारूढः। अन्ये च बहवः-

भट्टमहोदयात् हिन्दीसाहित्यमप्यधीतवन्त इमे विद्वांसोऽपि स्मरणीयाः :—

१. श्रीपूर्णचन्द्रो जैनः M.A. भारत प्रसिद्धः पत्रकारः

२. श्रीसिद्धराजढढ्ढा, M.A., भारतप्रसिद्धः पत्रकारः।

३. श्रीजवाहरलालो जैनः M.A ,, पत्रकारः।

४. डा० प्रभुनारायणशर्मा सहृदयः M.A., भू.पू. हिन्दीप्राध्यापकः म. सं. कालेजे, कामर्सकालेजे च, जयपुरे।

५. श्रीमहताबचन्द्रखारैड़ः, राज्याधिकारी, जयपुरम्

६. श्रीमनमोहनभट्टः, राज्याधिकारी

७. श्रीमती कौशल्या तेजपालः, M.A.

८. श्रीमती जया गोस्वामी—इत्यादयः।

एतदतिरिक्तं गीजगढ़संस्थानाधिपतिः स्व. ठाकुरश्रीकुशलसिंहमहाभागः संस्कृतं भट्टमहाभागादधीतवान्। वैद्यमार्त्तण्डः श्रीहनुमत्प्रसादशास्त्री चापि साहित्यमेतत्सकाशादधीतवान्। मज्ज्येष्ठभ्राता प्रो. कलानाथशास्त्री सा. आ., M.A., संप्रति आंग्ल साहित्यप्राध्यापको भट्टमहाभागात्साहित्यशास्त्रं, सौन्दर्यशास्त्रं, कवनकलां, व्याकरणं, हिन्दीकवितां चाधीतवान्। अनेन सम्पादनकलां, समालोचनाशास्त्रं चापि नियमतोऽधीत्य भट्टमहाभागाः सुभृशं सन्तोषिता इत्यन्तिमच्छात्ररूपेणैतस्य नामाप्युल्लेखनीयम्। मयका तु शिशुना यदपि पूज्यपितृचरणेभ्योऽधिगतं संस्कृते, तत्केवलं तदीयसंपर्केणैव, आशीर्वादेनैव च सुस्थायि समभूत्।

एवं पूज्यचरणानां मित्रमण्डली, शिष्यमण्डली च सुबहु विस्तृते, देशस्य प्रत्येकं प्रदेशे व्याप्ते च वर्त्तेते।

आवश्यकं निवेदनम्

अङ्कस्यास्य प्रकाशनात्परं स्व० श्रीभट्टमहाभागमुद्दिश्य ये केचन लेखाः संप्राप्तास्ते ऽङ्केऽत्र स्थानमलब्ध्वाग्रिमाङ्के प्रकाशनमेष्यन्ति—इति

प्रबन्धसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुरीय-महाराजसंस्कृत-कालेजस्य भूतपूर्व-साहित्यप्राध्यापकाय 'रत्नाकर'-'भारती' भूतपूर्वसम्पादकाय श्रद्धेयमहाकवये दिवंगताय भट्टश्रीमथुरानाथशास्त्रिमहाभागाय

श्रद्धाञ्जलयः

[१]

शिरोमणिर्योऽखिलसत्कवीनां
महाकविर्भारतभूप्रसिद्धः ।
स मञ्जुनाथापरनामधेयो
दिवं गतो हा मथुराद्यनाथः ॥

[२]

हंसः कोविदमानसस्य सुभगो यो भट्टवंशाग्रणीः,
सातत्येन च येन मञ्जुकविताकुञ्जे विहारः कृतः ।
यः सत्काव्यसरित्पतिः समुदितो नाथः कलानां यतः,
स्वर्लोकं गतवान् स हन्त सहसा श्रीमञ्जुनाथः कविः ॥

[३]

छन्दोभिः सुमनोहरैरभिनवैर्हिन्द्यां प्रसिद्धै रहो काव्यान्यारचितानि येन कविना बह्वचस्तथा गीतयः ।

यः सम्पादितवान् दलान्यपि तथा रत्नाकरनादीनि च,
सम्मान्यः स महाकविर्जयपुराल्लोकान्तरं प्रस्थितः ॥

[४]

श्रद्धेय ! विद्वद्वर! मर्त्यलोकं
गर्ह्यं परित्यज्य दिवं गतोऽसि ।
शं ते शिवः शाश्वतिकं ददातु-
श्रद्धाञ्जलिः सम्प्रति तेऽर्प्यतेऽयम् ॥

—दीनानाथत्रिवेदी 'मधुपः' जयपुरम्

जयपुरीय-महाराज-संस्कृत-महाविद्यालयस्य भूतपूर्वाध्यक्षाणां पण्डित-मार्तण्ड-श्रीचन्द्रशेखरशास्त्रिद्विवेदमहाभागानां

शोकोद्गाराः

[स्वर्गतभट्टमहाभागानुद्दिश्य सञ्जातायामत्र पुरा शोकसभायां पूज्यैः श्रीचन्द्रशेखरशास्त्रिमहाभागैरेते स्वकीया उद्गाराः प्रकटिता आसन् । साम्प्रतञ्च ते द्विवेदिवर्य्या आश्रमपरिवृत्तिं विधाय जगदीशपुर्यां जगद्गुरु-श्रीशङ्कराचार्याणां गोवर्द्धनाख्यं पीठमलंकुर्वाणा वर्तन्ते-इति सहसम्पादकः]

स्व० कविशिरोमणि-भट्टश्रीमथुरानाथशास्त्रि-महाभागस्य वैकुण्ठलोकगमनेन सम्प्रति सर्वोऽपि संस्कृत-समाजः सुमहतीं क्षतिमनुभवन्नास्ते । वस्तुतो भट्टमहाभागः स राजस्थान एव न केवलमपि तु भारतवर्षेऽपि सुप्रसिद्धो महाकविर्बभूव । सातत्येन सुरसरस्वतीसमुपासकः स हि महानुभावः स्वकीयं सम्पूर्णमपि जीवनं संस्कृत-सत्काव्यादि-प्रणयन एव यापितवान् । साहित्यवैभवादयोऽनेके तद्विरचिताः काव्यग्रन्था महाकवेस्तस्याऽऽकल्पान्तं संस्कृतसंसारे सर्वतः कीर्तिं प्रसारयिष्यन्ति ।

किञ्च 'विविध-सभासम्मेलनादिषु भट्टमहाभागस्य तस्य वदनविनिर्गत-काव्यरस-माधुरीं कर्णाञ्जलिपुटैरसकृन्निपीय समेऽपि सभ्याः सहृदया अनन्दमानन्दमनुभवन्ति स्म' इत्यवसरः सोऽयं मयापि समुपलब्ध आसीत् । अपि च यथा स महाकविर्बभूव तथैव सहृदयोऽपि । नूनं भट्टमहाभागेन सदृक्षाः कवयो नेदानीं सर्वत्र दृग्गोचरीभवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च संस्कृत-सेवा-परायणाः प्रायो विद्वांसोऽनुभवन्ति विदन्ति च सम्यगिदं यत्-सोऽयं भट्टमहोदयो वर्तमानस्यास्य युगस्य महाकविरेव समासीदिति। अन्ते चाहं परमात्मानं प्रार्थये यत् सर्वशक्तिसम्पन्नः स दिवंगताय कविवरभट्टमहाभागाय शाश्वतिकीं शान्ति तथा शोकतन्तप्ताय च तस्य परिवारायासह्यं दुःखं सोढुं सामर्थ्यं दद्यादिति।

—❀—

येनाद्यावधि पावनेन मनसा, सम्पादिता भारती
नीताः पुण्यमयाश्चतुर्दशसमास्तस्याः सुसञ्चालने।
जीवन्ती सुरभारतीति सुयशो यस्य स्थिरं गीयते-
श्रीभट्टः स दिवं गतो भवतु मे सेवापथे प्रेरकः ॥
श्रद्धा कामदुघा विभाति सततं लोकस्य सेवावतां-
कीर्तिः शारदकौमुदीव कलिता लोके सुधावर्षिणी।
येषां पुण्यकथा पुनाति भुवनं पुष्णाति लोकाशयान्
तेषां विश्वजनीनयोगजनिता भूयात् कृतिः शान्तये॥
लोकरयैकपरोपकारपरमा गच्छन्ति ये निःस्पृहाः,
येषां ज्ञानगिरां निपीय सुरसं बुद्धिर्नृणां वर्धते।
येषां चारुचरित्रपूजितधरा धर्मस्य संचालिका-
तेषां संस्मरणं ददातु कुशलं, भूयाद् भुवः शान्तये॥
कर्मणा यस्य यस्या जनिर्जृम्भिता,
सा भवेत् पत्रिका तस्य कीर्तिः परा।
श्रद्धया यस्य वृद्धिं गता भारती-
सैष भट्टः प्रदेयात्, शुभामाशिषम्॥

—सिद्धेश्वरशास्त्री, ब्यावरः

———

श्रीभारतीचरणपद्मसुधासुपूर्णम्,
विज्ञान-ज्ञान-निगमागमदेहभूतम्।
वागीश्वरीवरदहस्तनिधानपूतम्,
श्रीभट्टपादममलं प्रणमामि भक्त्या॥
यो भारतीभुवनमण्डलमण्डलीको,
विद्वत्समाजनिधिभारतरत्नमासीत्।
तङ्क्रूरकालकरगम्प्रविधाय नूनम्,
हा हन्त! हन्त विधिना स्वमदर्शि मौढचम्॥

यः पञ्चसप्ततिमिते रुचिरे स्ववर्षे,
साहित्यलोकहितसाधनभास्करोऽस्तः
यः पाठनेन निजरूपगुणेन सम्यग्,
विद्यालयं किल पवित्रितवान् सनाऽद्य॥
को वर्धयिष्यति मदीयसुगुप्तकोषम्,
काव्यैरुतात्मकथनैर्भुवनस्य मध्ये।
मत्पादपंकजपरागपवित्रिताङ्गो,
हा हन्त, "भट्ट" मथुरोऽद्य दिवं प्रयात-॥
आजीवनं हि कविना सुरभारती या,
संसेविता सुकृतिनाऽमलमानसेन।
यो "भारती" सुविदितागमशास्त्ररूपाम्,
गीर्वाणवाचमिव संतत-मग्न आसीत्॥
कायेन नास्ति यशसा परिवर्तमानः,
"साहित्यवैभव" तनोति सुवैभवं किम्।
यस्याप्रमेयसुयशः किल काव्यगीतं,
तत्पादयो "भृगु" धृतोऽञ्जलिरेष भातु॥

—चतुर्भुजशर्मा शास्त्री-आयुर्वेदरत्नम्
-अध्यक्षः-[श्रीराघवायुर्वेदभवनं छाबड़ा]
[कोटा-राजस्थानम्]

—❀—

हा हन्त, भारतीयसंस्कृतिमूलाधारभूतां संकृतसाहित्यकला बालिकां साहाय्यरहितामिव दीनामितस्ततः परिभ्रमन्तीं परितो निराहताञ्च विलोक्य सहृदयवरो देवर्षिवर्यः श्रीमञ्जुनाथोपाह्वभट्टश्रीमथुरानाथशास्त्रिमहाभागः पुत्रीत्वेनाङ्गीकृत्य लालनपालनद्वारा नानालङ्कारसज्जितां नवरसपरिपुष्टां जयपुरवैभवशालिनीं श्रीकलानाथादिसाहचर्येण भ्रातृमतीं कथञ्चित् तरुणतां गतां तां यदा कदाचित् संस्कृतायुर्वेदादि-कालेजप्राङ्गणेषु विलसन्तीं परित्यज्य कमपि दिव्यलोकं सनाथीकृतवानिति विकलः सहृदयसंसारः।

आचार्यपरशुरामभारद्वाजः
प्र.अ. राजकीय संस्कृतविद्यालयः, बोंली

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुरमहाराजसंस्कृतकालेजस्य साहित्यविभागाध्यक्षपदाद् विश्रान्तिग्रहणावसरे



वामतः प्रथमपङ्क्तौ– भट्टश्रीमथुरानाथशास्त्रिणः, म० म० श्रीगिरिधरशर्माणः, स्व० श्रीनन्दकिशोरशास्त्रिणश्च ।

शिष्यवर्गश्च–

वामतः द्वितीयपङ्क्तौ– श्रीदामोदरशर्मा शास्त्री, श्रीदुर्गादत्तशर्मा सा. आचार्यः, श्री गोपालप्रसादशास्त्री, भट्टश्रीरघुवीरशर्मा साहित्याचार्यः, पूर्णचन्द्रसाहित्याचार्यः, दीनानाथत्रिवेदी 'मधुपः' श्रीगोपीनाथभट्टः सा० आ०, बलदेवशर्मा सा० आ०, श्रीगिरिराजशर्मा शास्त्री ।

वामतः तृतीयपंक्तौ– श्रीगोविन्दनारायणशास्त्री, आनन्दीलालशास्त्री, राधाकृष्णशास्त्री । अग्रे च चतुर्वेदिमहाभागानां कनिष्ठः पुत्रः श्रीशिवदत्तशर्मचतुर्वेदी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP-6
"Licenced to Post
without Prepayme

सूक्ति-सुधा

राजहंसगुणान् राजहंसा एव वहन्त्यहो ।
कुक्कुटा न हि जानन्ति नीरक्षीर-
विवेचनम् ॥१॥

राजहंस की टेक राजहंस ही पालसी।
हरि, जल दूध विवेक मुर्गा नहि पहचान सी ॥१॥

स्वदेशहितकर्तारो महिमनं प्रयान्ति हि ।
महात्मा मोहनो गान्धिरत्र दृष्टान्त
ईक्ष्यताम् ॥२॥

हितकर्त्ता निज देश के महती महिमां पाँय ।
गांधी महा   तमा जग में समझे जाँय ॥२॥

परोपकारनिरताः ख्यातिं यान्ति परामिह ।
विश्वविद्यालयं कृत्वा मालवीयः श्रुतो-
ऽभवत् ॥३॥

उपकारी जन लोक में पावें उन्नत ख्याति।
जगविद्यालय कर हुए मालवीय जिस भांति ॥३॥

देशकालानुकूलं यो जनानुपदिशत्यहो ।
दयानन्द इवाभ्येति स हि लोके महा-
त्मताम् ॥४॥

देशकाल अनुकूल जो देते हैं उपदेश।
दयानन्द सम जगत में महिमा लहे विशेष ॥४॥

श्रीहरिः

प्रकाशकः—जयबहादुरसिंह   पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



भूमौ संदर्शितस्वर्गा दुर्गा दुर्गातिनाशिनी ।
भारते सर्ववर्गाणामपवर्गाय जायताम् ॥

वर्षम् १४ वार्षिकमूल्यं पञ्च मुद्राः ५)
अङ्कः १२ एकप्रतेः पञ्चाशत् नवपणाः (५० न. पै.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेशबिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारैः स्वीकृता

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्लेच्छ विच्छायकरणं शरणं भारताऽवनेः ।
तुलजापुरदेवीयं खड्गं ते स्वयमार्पयत् ॥

विषय—सूची

क्रमसंख्या	लेखाः	लेखकाः	पृष्ठसंख्या
१	मङ्गलपद्यानि	श्रीहरिशास्त्रिणः जयपुरम्	३६१
२	श्रीदधिमती-पुष्पिताग्रा	,, ,, ,,	३६२
३	शरदृतुवर्णनम्	श्रीरामचन्द्रः पचौरी शास्त्री, उत्तरप्रदेशः	३६३
४	म. म. पं. श्रीगिरिधरशर्मणामभिनन्दनपद्यानि	श्रीहरिशास्त्री दाधीचः, जयपुरम्	३६५
५	,, ,, ,, ,, ,,	श्रीदीनानाथत्रिवेदी 'मधुप':, जयपुरम्	३६७
६	,, ,, ,, ,, ,,	श्रीवैदिकसंस्कृतिप्रचारकसंघस्य, जयपुरम्	३६६
७	श्रद्धासप्रसूनाञ्जलिः	श्रीदुर्गादत्तशर्मा साहित्याचार्यः, ,,	३७२
८	श्रीभट्टमथुरानाथशास्त्रिणां वैभवम्	श्रीनन्दकिशोरगौतमः 'निर्मलः', ,,	३७३
९	पद्यावलिः	श्रीवैद्यचन्द्रशेखरः शास्त्री ,,	३७७
१०	शोकाश्रु	श्रीगिरिराजप्रसादद्विवेदः, फैजाबाद	३७७
११	सम्पादकीयम्	श्रीहरिशास्त्री, जयपुरम्	३७८
१२	लघुकथा	स्व० भट्ट श्रीमथुरानाथशास्त्री, जयपुरम्	३८०
१३	सूक्ति-सुधा	श्रीहरिशास्त्री, जयपुरम्	३८२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकविः
श्रीहरिशास्त्री
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

'लेरुपखैष्दुता याऽऽस्ते भारतीव सितच्छदा'
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १४ | आश्विनः, विक्रमाब्दः २०२१ (अक्टूबरः १९६४) | अङ्कः १२

मङ्गलपद्यानि

श्रीहरिशास्त्रिणः प्र० सम्पादकस्य

सजलजलदमालानीलनीलां विशालां
प्रकटविकटदंष्ट्रां लोलजिह्वां करालाम् ।
करसरसिजराजत्खड्गमुण्डाभयेच्छां
शवकरकृतकाञ्चीं कालिकामाश्रयेऽहम् ॥१॥
स्मरणसममिवारं साधकानां पुरस्तात्
तदभिलषितकामान्दातुमाविर्भवन्तीम् ।
सुरनरमुनिसंघैः पूज्यपादारविन्दां
हृदयसरसिजे स्वे कालिकां चिन्तयामि ॥२॥
उरसि नरशिरःस्रक्शोभिता पृष्ठभागे
पवनरयविकीर्णं केशजालं वहन्ती
रविशशिशिखिनेत्रा सर्वसर्वार्थदात्री
करुणितहृदया सा कालिका श्रेयसेऽस्तात् ।

मासावतारः

सूर्यस्यातपमेधयन् प्रतिगृहं श्राद्धैः पितॄन्स्तर्पयन्,
विप्रान् सम्परिपोषयन् बहुविधैर्मिष्टान्नपानैस्तथा ।
चामुण्डाचरितानि च द्विजवरैः सम्पाठयन् सर्वतः,
मासो ह्याश्विन एति साधुसदृशो मेघान् खलान् वारयन् ॥
-श्रीहरिशास्त्री

(१) लेखैर्देवैः पक्षे निबन्धैः । (२) छदा वस्त्राणि पत्त्राणि च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीदधिमती-पुष्पिताग्रा

लेखकः-आशुकविः पं० हरिशास्त्री दाधीचः

दधिमति ! वरदे ! प्रसीद मातः ! करुणदृशाऽव दधीचिवंशजान्नः ।
शरणमुपगता वयं भवत्याश्चरणसरोरुहमिष्टदं मनोज्ञम् ॥१॥

भगवति ! भवतोकृपादृशैव प्रथितयशा भुवनेष्वभूद्दधीचिः ।
तव पदयुगले रतिर्न केषां समुदयमातनुते प्रणामभाजाम् ॥२॥

यदह्नि विदिता कुलाम्बिका त्वं तदवधितो ह्यकुतो भया वयं स्मः ।
भवतु भयमहो कथं शिशूनां मृगपतिवाहिनि ! मातुरङ्कगानाम् ॥३॥

वयमिह भवती-कृपाविशेषाद् द्रविणवताञ्च विदाम्पुरो भवाम ।
उपकृति-समये परं परेषामनभिमुखा नहि जातुचिद्भवाम (व्रजाम) ॥४॥

मतिमतिविमलां स्मृतिं च दिव्यां श्रुतिशिरसां परमार्थगां प्रदेहि ।
यशसि रुचिमसौ परोपकारं नयविनयौ हृदयान्तरे निधेहि ॥५॥

व्यपनय विपदो मिथश्च भेदं, प्रकटय सम्पदमेकतां दृढाञ्च ।
अभयमथ च दीयतां दधीचेरिव शिवतत्त्वगवेषणापटुत्वम् ॥६॥

अपि तव करुणाभरी दृगस्मास्वयि जगदम्ब विलासलेशमेतु ।
पुनरपि जगतीह कोप्युदारो द्रुतमुदियात् स महामना दधीचिः ॥७॥

अपि युवतिषु सा सती सुवर्चा उदयमियादिति निश्चितं मनो नः ।
पुनरपि भवतात्सतां द्विजानां जगति यतः शुचि ब्रह्मतेज इद्धम् ॥८॥

अपि च दिविषदो महीभृतश्च द्विजचरणाब्जयुगं सुसेवमानान् ।
अभयमथ विनम्य याचमानान् पुनरवलोकितुमम्बिके ! स्पृहास्ति ॥९॥

विकट-भयसमाकुलाब्जयोनि-प्रमुखसुरैर्विनुता नताम्बिके ! त्वम् ।
उदधित उदितेति दैवतौघैरुदधिमतीत्यभिधानतोऽर्चितासि ॥१०॥

प्रणतपुरुषधारणं दधीति प्रथितमिदं त्वयि सर्वतः प्रशस्तम् ।
तदिह दधिमतीति ते पराख्या विकटविदारिणि ! निर्गता प्रसिद्धिम् ॥११॥

उदधिमथन-निष्फल-प्रयासैरखिलसुरैर्विधिना प्रयोजितैस्त्वम् ।
अवहितमनसा त्वदेकतानैर्मनुजपतस्तपसा च तोषितासि ॥१२॥

जलधितट उदेत्य दिव्यदेहा पय उदधेर्दधि कुर्वती ह्यमथ्नाः ।
तदिह दधिमथीति नाम लोके प्रथितमिदं भुवनेश्वरि ! प्रशस्तम् ॥१३॥

नत-सुर-परिपोषणाच्च तेषां रिपुमथनाद् दधिमथ्यपि त्वदाह्वम् ।
प्रथितमपि चतुर्विधं तवैतत् भवतु भवानि ! सुखाय सन्ततं नः ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरदृतुवर्णनम्

लेखकः- रामचन्द्रः पचौरी शास्त्री, संस्कृतप्राध्यापकः इन्टर कालिजः, (उत्तरप्रदेश स्व०)

घनव्यपायेऽपगते घनातपे, विराजमाना वनराजिरुत्सुका।
प्रतीक्षते शारदचन्द्रशीतलां, विभावरीं भावयितुं स्वकं वपुः ।।१।।

क्वचिद् घनालिः क्वचिदातपो महान्, क्वचिच्च छायातपमिश्रितं नभः ।
दिनेषु संदृश्यत एवमेव हि, निशासु चन्द्रो रमणीयतां यतः ।।२।।

प्रवाति वायुर्विगितातपक्लमो, मरीचिमाली न च तीक्ष्णतां गतः।
नभोऽमलं चन्द्रकरैर्लसन् मुहुर्न कस्य चेतः कुरुते समुत्सुकम् ।।३।।

दिशः प्रसन्ना न मलीमसं नभः, सरस्सु पङ्केरुहचारुदर्शनम्।
विहंगरागैरुपशोभिता मही, करोति सुस्वागतमेव शारदम् ।।४।।

गतागतं चारुतया प्रकुर्वते, विशुष्कपङ्केऽध्वनि पान्थमानवाः ।
सुखेन नाव्याः सरितो यियासुभिः, विलङ्घ्य यात्रा क्रियते समुत्सुकैः ।।५।।

सरोऽमलं वारिचयेन संभृतं, प्रफुल्लपङ्केरुहचारुदर्शनम्।
द्विरेफमालाभिरतीवसुन्दरं, विहंगमानां कलकूजिताञ्चितम् ।।६।।

विकूजयन्ती कलहंसमालिका, सरस्सु फुल्लोत्पलकैरवेषु च।
मनोरमं प्रावृषि केकिकूजितं, विमानयन्ती परितो ह्यवस्थिता ।।७।।

पुनरपि कुशमुष्टिमात्रमोघं त्रिदशगणास्त्रगणं तथा च विष्णोः ।
भुजसहितरथाङ्गराजरोधं द्विजतपसो महसावलोकितुं स्मः ।।१५।।

पुनरपि विधिविष्णुरुद्रमुख्यैरमरगणैः सहितं समस्तविश्वम्।
परिकलितविराट्तनोर्दधीचेरधिहृदयं विवलद्विलोकयाम ।।१६।।

सुरपतिसहितेषु दैवतेषु स्वपतिविवंचनमञ्चितेषु कामम्।
संपदि च पशुतामुपानयन्तीं द्विजतरुणीं समवेक्षितुं मनोऽस्ति ।।१७।।

कलयति भवती-कृपा-कटाक्षः सततमिदम्प्रभृतीनि कौतुकानि ।
सकृदुपरि शिरःसु नः शिशूनामपि विनिधेहि तमेतमम्ब ! शीघ्रम् ।।१८।।

तव चरणसरोजयोः प्रकामं मधुकरताज्जगदम्ब ! मानसं नः।
तदिह च मकरन्दरूपविद्यामपि च तपः सततं समर्जयामः ।।१९।।

इति किल ललितार्थपुष्पिताग्रां हरिकविराजकृतां नुतिं त्वदीयाम्।
पठति च शृणुते च भक्तिमान्यस्तदभिमतं परिपूरयस्व कामम् ।।२०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बकावलीध्यानपरायणा सती, पदेन चैकेन तडागसंस्थिता ।
निमीलिताक्षी मुनिभावमागता, सकैतवं मीनकुलं हि खादति ॥८॥
नवा लता लोलशरीरयष्टिका, भ्रमद्द्विरेफावलिराजिता सती ।
किरत्प्रसूनैः शरदोऽभिनन्दनम्, करोति कान्तारगता सुकोमला ॥६॥
जलान्यलं फुल्लसरोरुहाणि, कुमुद्वतीकेलिविराजितानि ।
वनानि चात्यन्तमनोहराणि, लसन्ति रम्याणि च सद्गृहाणि ॥१०॥
शरद्घनानां विरलातपानामध्यास्य छायामथ शालिगोप्त्र्यः ।
गायन्ति गीतानि मनोरमाणि, सभर्तृकाः शालिकृषिं लुनन्त्यः ॥११॥
नभस्तले भिन्नघने समुज्ज्वले, कलाकलापैरुपशोभितः शशी ।
सुधामयूखैः स्नपयन् महीतलम्, वनौषधीनां कुरुते सुपोषणम् ॥१२॥
समुज्ज्वला कौमुदिका कुमोदिनीं, सरस्सु पत्युर्विरहोपपीडिताम् ।
निमीलिताक्षीमथ नक्तमुत्सुकां, विकासयन्ती नितरां प्रकाशते ॥१३॥
क्वचिल्लुनन्ति क्वचिदावपन्ति, क्वचिच्च कर्षन्ति कृषीवलाः कृषिम् ।
स्वराष्ट्रसंपोषणमात्रभावनाः, सुखं विहायाऽनिशमुद्यमे रताः ॥१४॥
प्रवर्षणेनाधिकमार्द्रतां गतम्, स्वकं स्वकं वेश्म पुनर्नवं नवम् ।
चिकीर्षवो ग्राम्यजनाश्चनागराः, विलेपयन्तीह मृदा सुधादिभिः ॥१५॥
चतुर्षु मासेष्वथशीतदीधितिः, तमोवृतो नेक्षणमार्गमागतः ।
अतश्चकोरी विरहाकुला सती, तनुं तनुं स्वां कलयत्यहर्निशम् ॥१६॥
विलोक्य तं साद्य सुकान्तिसम्भृतम्, नितान्तकान्तं स्वकमुत्सुका सती ।
निरीक्षमाणाऽनिमिषेण चक्षुषा, सुयोगिनीवात्मनिरीक्षणे स्थिता ॥१७॥

काशा विकासमगमन् जरठत्वमाप्ता,
शुभ्राम्बरेव धरणी वहुधा विभाति ।
स्वैरं वनेषु विचरन्ति समस्तजीवाः,
वैरं विहाय सहजं शरदि प्रसन्नाः ॥१८॥
सशालिधान्यैः प्रचिताः प्रकोष्ठाः,
सवाजिगोभिर्भरिताः सुगोष्ठाः ।
नवान्नपानैरभितर्पितेष्टाः,
शिष्टाः सुखं शारदमाश्रयन्ते ॥१६॥
गृहे गृहे धान्यचयो निचीयते,
नवान्नयागश्च सुखं विधीयते ।
निपीयते सोमरसः सुयाज्ञिकै—
र्हविर्भिरिष्ट्वा शरदीश्वरं हरिम् २०॥

इत्थमानन्दभावेन शारदी श्रीरनुत्तमा ।
जीवानां मानसोल्लासं, जनयन्ती प्रकाशते ॥२१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म. म. पंडितवर-श्रीगिरिधरशर्मणामभिनन्दनपद्यानि

लब्धोदयो गोकुलचन्द्रनाम्नः कवीश्वरान्माधवसिंहकाले ।
सम्प्राप्तविद्यश्च महर्षिलक्ष्मी-जीवाभिधाभ्यां बुधपुंगवाभ्याम् ॥१॥
बाल्यादयं संस्कृतवाक्प्रवीणः शब्दागमे पूर्णकृतश्रमश्च
न्यायेऽपि तीक्ष्णप्रतिभो मनीषी, आचार्यनाम्नीं पदवीमवापत् ॥२॥
क्रमाद्विवृद्धाभ्यसनो बुधेषु, वक्तुं समाभाषितुमुद्यतोऽभूत् ।
शास्त्रार्थचर्चाप्रथितो भवन् सन्, ख्यातिं परां प्रापदिति क्रमेण ॥३॥
सनातनं धर्ममुपाश्रयन् सन्, सरस्वतीं मातरमाश्रयन् सन् ।
आर्यब्रुवान् संसदि ह्रेपयन् सन्, दिने दिने ख्यातिमवापदुच्चैः ॥४॥
इह बहु विदितोऽभूदेष शास्त्रार्थकर्ता, बुधगिरिधरशर्मा जान्हवीतीरसंस्थे ।
ऋषिकुल उपहूतोऽध्यापनार्थाय लोकैः कुलपतिपदमाप्तः काममस्थात् चिराय ॥५॥
अमरभणितिसेवी तत्समुत्थानमिच्छुर्विविधललितलेखैः पत्रसम्पादकोऽभूत्
जयपुरनगरीतोऽप्येकरत्नाकराख्यं, प्रकटितममुनैव स्वीयसम्पादकत्वे ॥६॥
विशदमधुरलेखा स्वस्य पत्रे मनोज्ञाः सहृदयरमणीया आगताश्च प्रकाशम् ।
समुपकृतमनेन प्रायशो देववाण्याः कुहचिदपि फलन्ति ज्ञावतां सुप्रयोगाः ॥७॥
ततश्च लाहौरपुरे सनातने विद्यालयेऽध्यक्षपदं प्रपन्नः ।
स्वकीयपाण्डित्यकलाकलापैः साश्चर्यसम्मानमवापदेषः ॥८॥
तत्रैव कर्मप्रवणं तमेनं, निशम्य राज्याधिकृतो ह्युदाराः ।
सम्राज आविर्भवलक्षितोत्सवे, महामहोपाधियुतं व्यकार्षुः ॥९॥
ततः प्रभृत्येष महानुभावो नानाविधग्रन्थविलेखलग्नः ।
पाण्डित्यपूर्णान्बहुशो निबन्धान् प्राकाशयच्छात्रविबोधनार्थम् ॥१०॥
श्रुत्वा तमेनं प्रतिभाचमत्कृतं, श्रीमानसिंहो जयपूर्नरेश्वरः ।
आहूय सत्संस्कृतरम्यविद्या-लये स्वकेऽध्यक्षपदे न्ययुङ्क्त ॥११॥
अत्रागतः सत्सु सदैव मान्यतां प्राप्तः सचायं रविवत्प्रकाशितः ।
अनेकशो ब्राह्मणबालकाँस्तथा, शास्त्राणि सर्वाणि सुखं व्यबोधयत् ॥१२॥
भजन्निहाऽयं मधुसूदनाख्यं, विदाम्वरं धर्मसभाप्रधानम् ।
वेदेष्वपि स्वां प्रतिभां प्रसार्य्य, ग्रन्थांस्तदीयान् हृदि संन्यवेशयत् ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं सदा भारतसंस्कृतेर्वै, संरक्षणं धर्मसुपोषणं च ।
कुर्वन् स्वबुद्धेर्बलतो मनीषी सुसंयमोऽपि स्थविरत्वमाप्तः ॥१४॥
अमरभरिणतिसेवामित्थमेष प्रकुर्वन्, समुचितसमये स्वे राजसेवाऽवकाशम् ।
अलभत बहुमानावाप्तिपूर्वं सहर्षं, पुनरपि सुरवाणीं सेवते नित्यमेव ॥१५॥
जरामिदानीं समवेक्ष्य चाप्तां, दुरत्ययां सोऽयमुदारभावः ।
श्रीविश्वनाथं शरणं प्रपन्नः, काश्यां वसन् यापयति स्वमायुः ॥१६॥
स एष वृद्धो बुधमौलिरत्नमसाध्यरोगेण विवेल्लितोऽपि ।
उमासहायेन शिवेन रक्षां, कृत्वाऽधुना संप्रहितोऽत्र दिष्टचा ॥१७॥
संमानयोग्योऽस्ति स एष मान्यतां, सभक्तिवन्द्योऽस्ति स एष वन्द्यताम् ।
आनन्दनीयोऽस्ति मुदाभिनन्द्यताम्, सुदर्शनीयोऽस्ति स एष दृश्यताम् ॥१८॥
प्रशंसनीयोऽस्ति परं प्रशंस्यताम्, अभ्यर्चनीयोऽस्ति मुदा समर्च्यताम् ।
समर्थनीयोऽस्ति सदा समर्थ्यताम्, संसेवनीयोऽस्ति सदैव सेव्यताम् ॥१९॥
अयमपि हरिशास्त्री सद्विदेऽस्मै प्रणामं कलयति मतिभाजामेकरत्नोपमस्य ।
विबुधगिरिधरस्य ह्यायुषो रक्षणार्थं निजहृदि जगदम्बां प्रार्थयत्येवमद्य ॥२०॥
मातर्मृडानि ! जगदम्ब ! दयैकदृष्टचा, त्रायस्व भो ! गिरिधरं बुधमौलिरत्नम् ।
सम्यक् समृद्धिमयतां च तदस्यवंश—लक्ष्मीर्वसन्ततिलकेव सुशोभतां च ॥२१॥
यो विद्वान् जयपत्तने कविकुले देहोदयं लब्धवान्
यो वात्रैव च राजपंडितगुरोर्विद्योदयं लब्धवान् ।
प्रज्ञापाटवतश्च यत्र गतवान् भाग्योदयं लब्धवान्
सोऽयं पंडितमण्डनं गिरिधराचार्यश्चिरंजीवतात् ॥२२॥
शब्दागमज्ञानविधौ पतञ्जलिं, न्यायागमे चापि महर्षिगौतमम् ।
संस्मारयत्येष बुधान्विलोकितः, संभाषितः, सोऽयमरोगितामियात् ॥२३॥
सेवनं यस्य मन्दानां कोविदीकरणौषधम्
स वै गिरिधराचार्यो बुधोऽस्मासु प्रसीदतात् ॥२४॥
कवीशकुलमण्डनं श्रुतिविरोधिनां खण्डनं, सुहृन्निकरचन्दनं कुटिलतर्कविध्वंसनम् ।
प्रधान सुरवन्दनं नमत सत्पथस्यन्दनं,
सुतीक्ष्णमतिमंडितं गिरिधराभिधं पण्डितम् ॥२५॥

—श्रीहरिशास्त्री दाधीचः । "भारती" सम्पादकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्वेदविदां धुर्यश्चतुर्वेदकुलाग्रणीः ।
अचतुर्वदनो वेधाः शास्त्रलोकविनिर्मितौ ॥१॥
चतुरो भाषणे यश्च वाचस्पतिर्महामहो-
पाध्यायो भूतपूर्वो यो दक्षोऽध्यक्षो विचक्षणः ॥२॥
वैयाकरणमूर्द्धन्यो धन्यो मान्यो वदान्यकः ।
सोऽयमाभाति चित्रेऽत्र श्रीमान् गिरिधराभिधः ॥३॥
देशेऽत्र धार्मिकाः सत्यं क्वैतादृक्षाः सुकर्मठाः ।
सुधीन्द्राः सर्वशास्त्रज्ञा दृश्यन्ते बहवोऽधुना ? ॥४॥
सम्मान्यः सूरिभिः सर्वैः सर्वत्र सर्वदा सुधीः ।
महत्या श्रद्धया भक्त्या सोऽयं सत्क्रियतेतराम् ॥५॥
मान्यान् सम्मानयन् मर्त्यः सर्वान् कामानवाप्नुते ।
अतो विज्ञैः सुधीरेष श्रद्धयाऽद्याभिनन्दितः ॥६॥

विनीत :—

रवीन्द्ररङ्गमञ्चः, जयपुरम्
१९-१०-६४

श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक साथ चलो—
मिलजुल कर काम करो !

"देश के अलग अलग भागों में रहने वाले लोगों की धारणाएं कुछ खास मामलों में चाहे जितनी भी दृढ़ हों, उन्हें यह कभी नहीं भूलना चाहिए कि वे पहले भारतीय हैं, और यह कि उन्हें अपने सभी विवादों का हल एक राष्ट्र और एक देश के अपरिवर्तनीय ढांचे में रहकर ही करना है। आइए, हम इस एकता की भावना को दिलों में जगह देने की पूरी कोशिश करें और राष्ट्रीय एकता को मजबूत बनाएं।"

—लालबहादुर शास्त्री
प्रधान मंत्री

एक शक्तिशाली भारत के निर्माण का हमारा लक्ष्य साफ और सीधा है जिसमें सभी की समृद्धि हो और आजादी बनी रहे।

एक राष्ट्र के रूप में हम साहस, दृढ़ संकल्प और सद्भाव व उदारता के साथ मिलजुल कर काम करें और आगे बढ़ें।

जय हिन्द

आजादी की रक्षा के लिए एकता बनाए रखिए।

डीए ६४/एफ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातःस्मरणीयचरणानाम्, अनुकरणीयतपःपूतचरितानाम्, विद्वन्मंडलमौलिमणीनाम्, भारतीय-संस्कृतेः मूर्तिमत्प्रतीकानाम्, वैदिक-विज्ञानबोधन-प्रवीणानाम्,

विविधविद्याविद्योतितान्तःकरणानाम्, तत्रभवतां भवतां श्रीमतां विद्यावाचस्पति - महामहोपाध्यायादि-विविधविरुदावलिविभूषितानाम् श्रीगिरिधरशर्मचतुर्वेदमहाभागानाम् करकमलयोर्मिलिन्दायताम् अभिनन्दनपत्रमिदम्

स्पृहणीयचरिताः श्रीचतुर्वेदमहाभागाः,

अद्य परमप्रमोदभरे शुभावसरे भवदभिनन्दनं कुर्वाणोऽयं राजस्थान-जननिवहः आत्मानं धन्यं भृशं गौरवान्वितं च मनुते। भवादृशामेव कतिपयविद्वद्वरेण्यानां प्रादुर्भावाद् अद्य जयपुरनगरी काशीनगरगौरवमनुभवति। ऋग्वेदीयाश्वलायनशाखाध्येतॄणां माथुरचतुर्वेदब्राह्मणानां सत्कुले जनिं लब्ध्वा तत्रभवता श्रीमता जयपुरनगरीयं विद्वद्रत्नप्रसवितृगौरवेण समलंकृता।

अध्यापनकलाविचक्षणा गुरुचरणाः,

परमदुरूहशास्त्राणि गहनविषयाश्च जिज्ञासूनां मानसपटले सरलतयैव सुदृढं खचिता भवेयुरिति भवतां सुबोधा पाठनपरिपाटी कुत्रचिदेव दृष्टिपथमवतरति। तस्या एव पाण्डित्यपूर्णायाः पाठनशैल्याः सुपरिणामोऽयं यदद्य भवदन्तेवासिनः पंडितमूर्द्धन्यतागौरवमावहन्तः समस्तेऽपि भारतभूभागे भवत्कीर्त्तिपताका दोधूयमाना अवलोकयन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादनकुशला गुरुपादाः!

छात्रावस्थायां विंशद्वर्षदेशीयेनैव भवता जयपुरात् 'संस्कृतरत्नाकर' नामकं पत्रं प्रकाश्य संस्कृतभाषाया महती सेवा विहिता। अद्यत्वे तदिदं पत्रं श्रीमता एव संस्थापितस्य 'अखिलभारतीयसंस्कृतसम्मेलनस्य' मुखपत्रगरिमाणमावहतीति परंमप्रमोदास्पदम्। विद्यावाचस्पति—श्रीमधुसूदनझाप्रणीतानां विविधवैदिकग्रन्थानां सम्पादनं व्याख्यानं च भवता महता श्रमेणाकारि—यानि च ग्रन्थरत्नानि संस्कृतवाङ्मयस्य निधिस्वरूपाणि संवृत्तानि। एतदतिरिक्तम्-भगवद्गीतायाः, उपनिषदाम्, उपयोगिनाम् अन्येषामपि सुरभारतीप्रौढग्रन्थानां सम्पादनं भाष्यं चाकलय्य जिज्ञासूनां कृते सरला सरणिराविष्कृता। हिन्दीभाषायां देववाण्यां च भवतां निबद्धा निबंधलेखाश्चिरस्थायिनः साहित्यस्य अंगभूता मन्यन्ते। प्रभावशालिनी भवल्लेखपरिपाटी किमप्यपूर्वं वैशिष्ट्यं धारयतीति नात्र सन्देहप्रसरः।

विद्वद्वरेण्याः, शास्त्रार्थमहारथिनः!

चतुर्वेदमहाभागा न केवलं लेखकलायामेव प्रवीणा अपि तु भाषणविद्यायामपि लब्धयशस्काः सन्ति। लक्षजनपूरितासु सभासु यदास्माकं गुरवो गहनशास्त्रविषयेषु धार्मिकविषयेषु वा स्वविचारधाराः प्रवाहयन्ति तदा मन्त्रमुग्धाः जनाः आत्मनो धन्यं मन्यमानाः चतुर्वेदमहाभागं प्रति श्रद्धावनता भवन्ति। शास्त्रार्थसभायां श्रीमतामप्रतिसमाधेया अनुपपत्तीः अकाट्याँश्च तर्कानाकर्ण्य हतोत्साहाः चकिताश्च भवन्ति प्रतिपक्षिणः। राष्ट्रपितृमहात्मगान्धिमहोदयस्य अध्यक्षतायामपि श्रीमद्भिः अनेकशः शास्त्रार्थो विहितः, यत्रैकदा गान्धिमहाभागेन स्वीयमुखारविन्देन चतुर्वेदमहाभागानां युक्तीनां प्रशंसा कृता।

विद्वद्वन्द्या वाचस्पतयः!

भवत्प्रस्फुरत्पांडित्यमुग्धाः चमत्कृतवक्तृत्वकलया च प्रभाविताः सततसान्निध्यमभिवाँच्छन्तो लवपुरीया जनाः 'सनातनधर्मनामकं कालेजं संस्थाप्य प्रधानाचार्यपदे च महाभागमेनमेव प्रतिष्ठापितवन्तः। तत्रैव कार्यं निर्वहतां श्रीमतां सार्वदेशिकं प्रखरं पाण्डित्यमवलोक्य भारतसाम्राजः प्रातिनिध्यमावहता वायसरायमहोदयेन सर्वविद्वन्मूर्द्धन्योऽयं महामहोपाध्यायपदेन समलंकृतः। ततश्च स्वजन्मभूमिसेवानुरागिणा भवता जयपुरसंस्कृतकालेजस्य प्रधानाचार्यपदमंगीकृत्य सनाथिता राज-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानभूमिः । विविधवेदादिविषयाध्यापकानां नवनियुक्तिभिर्भवता कालेजस्यास्य महती समुन्नतिर्विहिता ।

सर्वजनवन्दनीया महामहोपाध्यायपादाः !

जयपुरकालेजतो विश्रामग्रहणानन्तरमपि भवद्गुणगणग्रहणकामनया वाराणसेयहिन्दुविश्वविद्यालयकुलपतयः श्रीगोविन्दमालवीयमहाभागा भवन्तं अनुसंधाननिर्देशकपदे विभूषितवन्तः । हिन्दुविश्वविद्यालयतः काशीनागरीप्रचारिणीसभासकाशात् च लब्धा वाचस्पतिपदवी सनाथीकृता । साहित्यवाचस्पतिपदवीं च हिन्दीसाहित्यसम्मेलनं समर्पितवत् । उत्तरप्रदेशसर्वकारेण वाराणसेयसंस्कृतविश्वविद्यालये अवैतनिकराष्ट्रियप्राध्यापकपदप्रदानेन सुसम्मानिता महाभागाः ।

राष्ट्रपतिसम्मानिता ऋषिकल्पाः !

प्रत्यब्दं स्वतन्त्रतासमारोहावसरे राष्ट्रपतिसम्मानितेषु विद्वत्प्रवरेषु प्रमुखं स्थानं समासादितवन्तः श्रीमन्त इति सर्वजनविदितम् । 'भारतीयसंस्कृति और वैदिक विज्ञान' नाम्नि श्रीमद्रचिते राष्ट्रभाषापुस्तके केन्द्रियसाहित्य-अकादमीद्वारा पंचसहस्रमुद्राणां पारितोषिकमपि समर्पितम् महाभागाय ।

पंचाशीतिवर्षीयेणापि भवता अद्यापि त्रिकालसंध्याहवनादिकं यथाकालं विधाय ऋषिकल्पं जीवनं याप्यते । भवतामगाधपाण्डित्येन तपःपूतचरितेन च मुग्धा हिन्दुसंस्कृतिसमुपासका भूतपूर्वराष्ट्रपतिश्रीराजेन्द्रप्रसादमहाभागाः काशीनगरीमुपेत्य समस्तविद्वन्मौलितामावहन्तं श्रीमन्तं शिरसा समर्चितवन्तः ।

महामनीषिणः !

श्रीमत्सदृशं पुत्ररत्नमवाप्य परमगौरवान्विता धन्या चाद्य राजस्थानधरिणी भवत्सेवासन्तुष्टा परिपुष्टा च राजस्थानजनता श्रद्धाभरेण चेतसा कृतज्ञतामावहन्ती श्रीमतां दीर्घजीवनलाभाय प्रार्थयते भगवन्तं भूतभावनं भवानीपतिमिति शम् ।

रवीन्द्ररंगमंचः
जयपुरम्
दि० १९-१०-६४

श्रीमच्चरणसरोजचञ्चरीकाः
श्रीवैदिकसंस्कृतिप्रचारकसंघस्य
पदाधिकारिणः सदस्याश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धासप्रसूनाञ्जलिः

श्रीदुर्गादत्तशर्मा साहित्याचार्यः,

लोके ख्यातयशास्तथा सुरगिरः साहित्यसेवारतः,
तैलङ्गान्वयदीपकः कविशिरोमौलित्वमाप्तो बुधः ।

स्वर्लोकं प्रति भारतस्य गुरुतां, विज्ञापनायैव किम्,
हित्वा देशममुं गतः सुरसभां श्रीनेहरूसन्निधौ ॥

संजाताः कृपातो यस्य, बहुसंख्या विपश्चितः
अनेकैः कविभिर्यत्र बोधः समानीयते ।

विद्वत्सभासु ग्रन्थरचनासु संपादकीय-
कार्येष्वपि यस्य बुद्धिर्जातु न प्रहीयते ॥

गोविन्दसाहित्यजयपत्तनसुवैभवकृत्,
पावनकृत्येष्वपि गीतिवीथिर्यस्य गीयते ।

मंजुनाथचरणेष्वद्य, मत्यानया कातरया,
श्रद्धासुप्रसूनांजलिः शोकसदि दीयते ॥

मृदुपदरचनायां, भावगंभीरतायाम्,
गहनविषयबोधे, शिष्यबुद्धिप्रबोधे ।
कविकुलगणनायामादिगण्योऽतिधन्यो,
स्मृतिपथमनुयातो मंजुनाथो वरेण्यः ॥

अश्वग्रीवार्चनेन प्रथितसुयशसां, मंजुनाथोपनाम्नां,
भावामोदप्रधाना रुचिरगुणयुताऽऽलोचनालोकलीला
रस्या स्निग्धा सुहृद्या सहृदयपवनान्दोलिता वैभवाढ्या
कासारे मानसे मे मृदुपदकमलस्रग्धरा शं तनोतु ॥

Insurance is a Social Service

With best Complements & Greetings

form

Ruby General Insurance Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.		Rs. 1,00,00,000
Paid up Capital.	...	Rs. 32,00,000
Assets Fxceed.	...	Rs. 3,21,00,000
Nett Premiums in 1962.	...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA

FOREIGN BRANCHES & AGENCIES:

Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala Nairobi, Penang, Rangoon, Singapore & San Fernado. D.L.M.S.,

Head Office:

"INDIA EXCHANGE"

India Exchange Place, Calcutta-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कविशिरोमणिभट्टमथुरानाथशास्त्रिमहाभागानां वैभवम्'

लेखकः-नन्दकिशोरगौतमः 'निर्मलः', एम. ए. साहित्याचार्यः (उ०) अनुसन्धानसुधीः

'अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते' ॥

असारे खलु अस्मिन् संसारे सर्वे एव जनाः शिक्षिता न जायन्ते शिक्षितेष्वपि विद्वांसो न भवन्ति, विद्वत्स्वपि काव्यरसज्ञा न जायन्ते, काव्यरसज्ञेष्वपि काव्यमर्मज्ञाः विरला एव भवन्ति, तेषु अपि ब्रह्मानन्दसहोदरस्य उत्पादयितारः कवयः विरला एव आविर्भवन्ति, तेष्वपि कविषु प्रसिद्धतमाः प्राप्तयशसः कालिदासादयः विरला एव । न जाने कति कवयः 'सद्यः परनिर्वृतये' इमाम् अनुभूतिं कृत्वा एव यमलोकगामिनः भवन्ति । न जाने कतिजन्मनां पुण्यसञ्चयेन प्राक्तनाद्यतनसस्कारैश्च मानवः 'कविः' इति दुर्लभां पदवीं प्राप्नोति । यथा खलु आनन्दकन्दमुकुन्द-श्रीकृष्णचन्द्रेण गीतायां मानवानां कृते ब्रह्मप्राप्त्यर्थं काठिन्यं प्रदर्शितम् तदेव काठिन्यं[1] ब्रह्मानन्दसहोदरस्य (काव्यरसस्य) वा वर्तते ।

कश्चिदेव सुरभारतीसेवी स्यात् यः कविशिरोमणिदिवंगतभट्टमथुरानाथशास्त्रिमहाभागानां विषये न जानाति । यद्यपि संस्कृतसाहित्यसमाजः अद्य तेषां विरहेण शोकाकुलः वर्तते परं ते दिवंगता अपि अमरा यतो हि तेषां ग्रन्थाः देववाण्या अक्षुण्णनिधयः वर्तन्ते । भट्टमहाभागेन संस्कृतसाहित्यस्य याः बहुमूल्यसेवाः कृताः ताः संस्कृतजगतः प्रछन्नाः न वर्तन्ते । एषां महाभागानां उत्कृष्टकवित्वप्रभाव आधुनिकेषु सर्वेषु एव संस्कृतज्ञेषु वरीवर्ति । यथा हि मयोक्तमुपरि यत् न केवलं ते 'कविः' इति उपाधिना विराजन्तेतराम् । तैः काव्यस्य सर्वाणि प्रयोजनानि लब्धानि आसन् । तेषु काव्यस्य हेतुत्रयमपि सामूहिकरूपेण प्रतिष्ठितम् आसीत् स्वकीयप्रतिभां प्रति तु कविना स्वयमेव गोविन्दवैभवे स्वग्रन्थे कथितम् "पूर्वार्जितपुण्यैर्या कवित्वकला प्राप्ता" (गोविन्दवैभवम्-पृ० २)

साम्प्रतमहं तेषां प्रमुखग्रन्थानां क्षिप्तरूपेण परिचयं प्रदाय मम अल्पमत्यनुसारेण तेषां कवित्वम् प्रति निवेदयामि । महाभागस्यास्य पञ्चदश ग्रन्थाः प्रकाशिताः बहुग्रन्थाश्चामुद्रिताः वर्तन्ते । परमहं 'साहित्यवैभवम्' 'जयपुरवैभवम्' 'गोविन्दवैभवम्' च इति वैभवत्रयमेव नीत्वा यत्किंचित् बालसुलभचेष्टया उदीरयितुकामोऽस्मि ।

कविवरेण्यस्यास्य प्रथमोऽयं प्रसिद्धतमो ग्रन्थः 'साहित्यवैभवम्' न केवलं वैभवम् अपि तु वर्तते साहित्यसागरः ग्रन्थस्य विशालतां दृष्ट्वा मम मतौ कालिदासस्य तत् पद्यं समायाति

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥"

---

१. मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः । (गीता ७।३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य सागरस्यागाध-गाम्भीर्य्ये तु ते एव काव्य-मर्मज्ञाः प्रवेष्टुम् अलं, ये बृहस्पतिरिव प्राज्ञाः सन्ति। अहं तु अस्य स्वरूपं संक्षिप्तरूपेण अत्र तस्य महाभागस्य शब्देषु एव प्रस्तौमि।

१. साहित्य वैभवम्—ग्रन्थोऽयं संस्कृत-ब्रजभाषयोरुभयोरपि पदाङ्कानानुसृत्य साहित्य-सरणावभिप्रयाति। उभयोरपि भाषयोः साहित्य-राजतन्त्रे बहवः समया नियमिताः सन्ति। एतेभ्यः कविसमयेभ्यो विरुद्धा वर्णना सहृदयानां गोष्ठीषु न गरिष्ठा गण्यते। तदनुसारमेवात्रापि नवरसानां परिचयः, शृङ्गारे नायिकाभेदस्य दिग्दर्शनम्, एतदादयो विषया निबन्धनीया अभूवन्।

युद्धवीरे च समरवर्णनस्य शैली बहुष्वंशेषु हिन्दीसाहित्यसंदर्भानुसारम्। तत्र हि पूर्वं हस्त्यश्वादीनामलङ्कृतं वर्णनम्, अग्रे च दन्दुभिनादः, शस्त्रसंग्राहः, रुधिरप्रवाहः, भूतयोगिन्यादिसंचारश्च वर्णितो भवति। अन्योक्तिविनोदादिषु बहुषु विषयेषु तु संस्कृतकवीनामेव पद्धतिरनुसृतेति स्यादेव समीक्षकमहाभागानां विदितम्।

पाठकमहाभागा द्रक्ष्यन्ति यदस्मिन्निकुञ्जे प्रारम्भादन्तपर्यन्तं दोहा-चौपाई-कवित्त-सवैयादीनि नवीननवीनच्छन्दांसि, ऋतुवर्णनस्य नवीना सामग्री, बारहमासीप्रभृतयो नवीनप्रकाराः, बहुभाषामिश्रपद्यानि, गज़ल-ठुमरी-प्रभृतयो गीतयः, एकमेव पद्यं हिन्दीसंस्कृतभाषागतं भवतीति चित्रम्, खड्गबन्ध-पद्मबन्ध शिविकाबन्धाद्यतिरिक्तानि मोटरशकटिबन्धप्रभृतीनि चित्रकाव्यानि, विहारिमहाकवेः संस्कृतदोहामयी सूक्तिः, उर्दू हिन्दी भाषाभ्यां सह संस्कृतसूक्तीनां तुलनात्मकं निबंधनं, रेड़ियोवायुयान-मोटरप्रभृतीनां स्वरूपवर्णनम्, एवमादीनि नानाविधानि मनोरञ्जकसाधनानि संघटस्य संस्कृतसाहित्यसेविनां कृते नवीनसेवाप्रकारोऽवलंबितः।

ग्रन्थेऽस्मिन् पञ्चदश-अध्यायाः वर्तन्ते। प्रथमाध्यायस्य नाम 'आमुखवीथी' वर्तते। द्वितीयोऽयमध्यायः 'षड्ऋतुवीथी' यत्र षड्ऋतु-वर्णनम् ऋत्वनुसारेण नायिकावर्णनमपि च वर्णितम्। तृतीयेऽध्याये 'नवरसवीथी' यत्र शृंगाररसस्याधारे नायिकाप्रभेदाः प्रदर्शिताः। चतुर्थे 'दोहाचत्वरे' हिन्दीभाषायां दोहाछन्दोभिः विभिन्नान्नां स्त्रीणां लक्षणं नखशिखवर्णनं च प्रदर्शितम्। पंचमे च नीतिवीथ्यां माया-परसेवा-मुद्रा-दुर्जन-मैत्री-प्रभृतीनां वर्णनं वर्तते। षष्ठे अन्योक्तिरूपेण नीतिमेघचातकसिंहादीन् उद्दिश्य अन्योक्तय उक्ताः विद्यन्ते। सप्तमे विनोदवीथ्यां कवीनां पण्डितानां वैयाकरणानां वैद्यादीनां च वर्णनं वर्णितम्। अन्योक्तिविनोदे विनोदे अष्टमे भ्रमरबकुलमल्लिकाकदम्बकेतकीयूथिकादीनां अन्योक्तिविधया वर्णनं कृतम्। नवम्यां च छन्दोवीथ्यां पंक्तिशशिवदनामदलेखेन्द्रवज्राशालिनी-तोटक-प्रियंवदास्वागतादीनाम् अनेकेषां छन्दसां विभिन्नविषयान् गृहीत्वा छन्दः प्रदर्शनी प्रदर्शिता। दशमे ऽध्याये हिन्दी भाषाव्यवहृतानां छन्दोभिः वर्णनं वर्तते यथा खलु चौपाई-रोला-उल्लाला-सवैया आल्हादयः। एकादशे अध्याये च उर्दू भाषाछन्दःसु कविताकामिनी प्रसाधिता यथा ननु—बहरेहजज मुसद्दस महजूफ-बहरेमलमुसम्यन महमहजूफ-बहरे मुजारे मुसम्मनअखरब मकफूफ—महजूफ-बहरेतवीलवा बहरे मुतदारिक मखबून मुजाइफादीनि। द्वादशे च अध्याये गीतिवीथ्यां दादर—लावनी—ठुमरी-गालिगीतिः - इत्यादिरागान् गृहीत्वा कविता गीता, अस्यामेव वीथ्यां उर्दू भाषाचत्वरं वर्तते। यत्र 'गजल' छन्दसा बहु वर्णितम्। त्रयोदश्यां च नवयुगवीथ्याम् आधुनिकान् सर्वान् विषयान् गृहीत्वा वर्णनं कृतम्। चतुर्दश्यामुपसंहृतवीथ्यां कविताविज्ञानां वैरल्यं, निर्वेदः-तृष्णातो-निर्वेदः—ईर्ष्यालुपण्डितादिविषयाः वर्णिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पंचदश्यां च वंशवीथ्यां एषां महाभागानां वंशपरिचयः वर्तते ।

२–जयपुरवैभवम्– कथ्यते यत् एकस्यैव महाकाव्यस्य 'जयपुरवैभवम्' प्रथमो भागः उत्तरभागस्तु 'साहित्यवैभम्' वर्तते । यस्य वर्णनं मया उपरि वर्णितम् । अस्मिन् जयपुरवैभवे ब्रजभाषा प्रसिद्धानि सर्वाण्येव च्छन्दांसि बाहुल्येन व्यवहृतानि । अस्य तात्पर्यमिदं न वर्तते यत् संस्कृतप्रसिद्धच्छन्दोनिर्माणे कवेरल्पोऽभ्यास आसीत्, नहि नहि महाकाव्यस्य भागयोः अनयोः स्थाने स्थाने प्रौढ़ानि संस्कृतप्रसिद्धान्यपि च्छन्दांसि विराजन्त एव । जयपुरे एव १९९३ वैक्रमेऽब्दे आयोजिते संस्कृतसाहित्यसम्मेलने शिखरिणीमालामेतद्ग्रथितां समाकर्ण्य परमं परितोषमावहद्भिः सभापतिभिर्गोस्वामिकुलतिलकैराचार्यप्रवरगोकुलनाथमहाभागैः (मुंबईस्थैः) भट्टमहाभागाः 'कविशिरोमणि' पदेनालंकृताः । तेनानल्पैव तेषां छन्दसां निर्माणेऽपि कविशक्तिः प्रसिध्यत्येव । किन्तु नवीनानां प्रलम्बच्छन्दसां संस्कृते निर्माणमभिनवं कार्यमिति तत्राऽस्य रुचिरधिका, कठिन एव कार्ये महतां विशेषेण रुचिर्जायते, अस्यापि स्फुटं निदर्शनमिदम् ।

इदं तु नाम्नैव परिस्फुटति यत् जयपुरवैभवमिदं जयपुरमेव संबध्नातीति । ग्रन्थारम्भे मङ्गलानन्तरं प्रख्याताः सर्वेऽपि कवयः स्मृताः, तेषु यस्मिन् यस्मिन् यो यो विशेषः स स्वविचारानुसारेण स्पष्टीकृतः । अत्र मालायां सर्वसाधारणजनतायामप्रसिद्धा अपि कवयः प्रोताः दृश्यन्ते, तेन कवेरध्ययनबाहुल्यं मार्मिकत्वं च स्पष्टमेव । तदनन्तरं प्रशस्ता देववन्दना । अथ प्रथमतः वर्तते जयपुरनगरवर्णनम् । तदनु 'राजवीथ्यां' भूतपूर्वस्य (ग्रन्थनिर्माणकाले म्रियमाणस्य) महाराजमाधवसिंहस्य विस्तृतं वर्णनम् । तस्य राज्यकाले संपन्नानां विशिष्टानामुत्सवानां विवरणम् । अत्रैव वर्तमानमहाजस्य विवाहमहोत्सवः तस्याधिकारप्राप्त्युत्सवश्च सविस्तरं कविजनोचितं वर्णितः । प्रसंगादत्रैव कुमारजन्मोत्सवोऽप्यधिकोल्लासकरः प्रवर्णितः । तत्र भानुसप्तमीमेलकवर्णने हस्त्यश्वोष्ट्रादीनां वर्णनमतिविशिष्टम् । अत्रत्या वर्णनशैली प्राचीनान् महाकवीन् स्मारयति । २१०—२११ पृष्ठयोः जयपुरस्य विशेषतां द्योतयत् प्रागतितमां प्रसृतं भूरि भोजनं 'हेडा' पदवाच्यमिह सचमत्कृति वर्णितम् ।

अथ नागरिकविशिष्टा जना नागरिकवीथ्यां वर्णिताः । प्रथमतः राजगुरवः तदनु सामन्ता अग्रे च जयपुरीया विशिष्टा विद्वांसः । प्राचीनवर्णनपरम्परारीतिः कविनात्र सम्यक् परिपालिता । तदग्रे उद्यानवीथ्यां जयपुरपरिसरे स्थितानां स्थानविशेषाणां वर्णनम् । अनेनापि सर्वत्र भ्रमणमनेन कृतमिति कवे रसिकधौरेयत्वं ख्याप्यते । अग्रे च व्रजभाषावीथ्यां स्वपूर्वजानां स्वस्य च व्रजभाषाकविता अतिचमत्कृतिसाराः संनिवेश्य ग्रन्थस्य समापनंकृतम् ।

गोविन्दवैभवमिदं वर्तते भट्टमहाभागानां जीवनस्य सन्ध्याकालीनरचना । यथा हि ग्रन्थस्यास्य नाम्ना एवाभिव्यज्यते यत् अस्मिन् योगेश्वरश्रीकृष्णचन्द्रस्यैव यशोगानं वा तेभ्यो भावपूर्ण प्रार्थना प्रार्थिता वरीवर्ति । मध्ये मध्ये तेषाम् अपररूपाणां नारायणहयग्रीवधन्वन्तरिशंकरगणेशभगवतीमहालक्ष्मीसरस्वतीपार्वतीगङ्गायमुनाऽऽमेरस्थितशिलामयीदेव्यादिभ्योऽपि कृपार्थं याचना कृता, अनेन साकमेव भगवतः रूपमाधुर्याः (भगवतः अङ्गप्रत्यङ्गानां वर्णनं) तस्य मुरलिध्वनेः भगवन्नामकीर्तनस्य नवधाभक्तेः संसारतः वैराग्यस्य, शान्तरसस्य, कालक्रौर्यस्य, रासलीलायाः, रूपमुग्धगोपीनां गजेन्द्रमोक्षस्य भवाटव्यादीनां भक्तिरसपोषकाणां विषयाणामपि स्फुटरचनाभिः दिग्दर्शनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारितम् । यत्र तत्र आधुनिकशिक्षाप्रणाल्यां वर्तमानस्त्रीशिक्षायां, संस्कृतभाषायां दर्शनशास्त्रे एवं काशीनगर्याः महिम्नः अपि कानिचित् पद्यानि ग्रथितानि वर्तन्ते । यानि अप्रासंगिकानि भूत्वापि उपयोगितायाः दृष्टेः संग्रहणीयानि विद्यन्ते । प्रमुखतस्तु ग्रन्थोऽयम् आदितः समाप्ति यावत् भक्तिरसेणैव संप्लुतः वर्तते । लेखकस्य च भक्तहृदयस्य परिचायकः वर्तते । न कोऽपि सन्देहस्तत्र वर्तते यत् लेखकः जीवनसन्ध्यायां भगवद्गुणानुवादेन स्वकीयां वाणीं लेखनीं च धन्यातिधन्ये कृतवान् । अनया च दृष्ट्या ते हि साधुवादार्हाः । तेषां रचनायां प्रसादमाधुर्यं, शब्दालङ्कारादिकाव्यगुणानां शोभा दरीदृश्यते । इत्थं भक्त्या समं काव्यदृष्ट्यापि एषां प्रयासः सर्वथा स्तुत्योऽभिनन्दनीयश्चास्ति ।

गोविन्दवैभवस्यास्य असाधारणवैशिष्ट्यमिदं वर्तते यत् कविना साहित्यवैभवादिवत् अन्यान्यलौकिककृतय इव स्वकीया इयं रचना कविसम्प्रदायपरिगृहीतसंस्कृतछन्दःसु न कृत्वा ब्रजभाषायाः प्रचलितछन्दःसु एव कृता, अद्भुतसाफल्यञ्चोपलब्धं तत्र ।

गोविन्दवैभवे देवघनाक्षर्यनङ्गशेखरादिकवित्तभेदाः सवैयाश्वघाटीनकुटचतुष्पदीकुण्डलिछप्पय–वरवैदोहासोरठामृतध्वन्यादिछन्दसाम् अनुपम–शोभादर्शनार्थं मिलति । अत्र यावत् यत् सवैया-छन्दःउपजात्य दिद्वादशभेदानां स्वकीयरचनायां चारुरूपेण एव प्रयोगः न कृतः अपि तु अस्य प्रकरणानां विभागोऽपि प्रारम्भे विषयानुसारी–भवन्नपि अग्रे छन्दोनुसारी एव । गीतिगोपुरप्रकरणे तु अनेन उर्दू काव्ये प्रयुक्तानां गजललावणीरेखतादीनां छन्दसामपि स्वच्छन्दं प्रयोगः क्रियते एषां च ता गीतयः मनोहररूपेण गेयार्हाः सञ्जाताः । ब्रजभाषाया उर्दू भाषायाश्च एषां छन्दसाम् इयं विशेषता वर्तते यत् एषु सर्वेषु प्रत्येकस्मिन् चरणे अन्त्यानुप्रासस्य समावेशोऽनिवार्यो भवति येन एषां छन्दसां माधुर्यं चमत्कारश्च वर्धते । गोविन्दवैभवस्य प्रत्येकं पद्ये अन्त्यानुप्रासस्य अतीव चारुरूपेण निर्वाहः कृतः । अनया च दृष्ट्या तानि सर्वाणि एव पद्यानि अतीव मनोहराणि संजातानि । नास्त्यलमिदमेव परम् अन्त्यानुप्रासस्य अतिरिक्तचरणानां मध्येऽपि यत्र तत्र यमकानुप्रासयोः बहुलः प्रयोगः अजायत, येन तेषां पद्यानां सौन्दर्यम् अत्यधिकं वर्धितं वरीवर्ति ।

अन्ते च पत्रिकायाः गौरवभयात् न मया किमपि पद्यमुदाहरणरूपेण प्रस्तुतम् तत्कृतेऽहं क्षमाप्रार्थी अस्मि, तथा तेषां दिवङ्गतकविशिरोमणिमहाभागानां चरणारविन्दयोः मुहुर्मुहुः भावपुष्पाञ्जलि समर्प्य विरामामि ।

कुमारेश
लिवर और पेट की बीमारियों में
मालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री 'मञ्जुनाथेति' उपाख्यावतां प्रातः-
स्मरणीयाचार्यपादश्री'मथुरानाथ-
जीभट्ट' महोदयानां स्वर्गारोह-
णानन्तरं तेषां शोकसभायां
पठिता पद्यावलिः ।

आचार्यपादकिङ्करो वैद्यचन्द्रशेखरः—

(१)

गुरुवर ! तव देवलोकयात्रा,--
हृदयगतेरवरुद्ध-भावभावा-
दमरलिपिसुशिक्षणाय किं ते,
सपदि जवाहरनेहरूहिताय ॥

(२)

व्रजलिपिवरहिन्दिदेवगीर्भि-
र्विपुलविभा सरसा त्वदीयमूर्तिः ।
कविपथिकसुमार्गदर्शनेन
किमधिगमिष्यति तात ! भूमिभागम् ॥

(३)

जयपुरवरवेषभावभाषा-
निपुणतमा वरजीवनी त्वदीया ।
अशनशयनपानमानयोगे-
ऽनिशमनुशिक्षति कर्मयोगमार्गम् ॥

(४)

मुकुन्दसाहित्यजयादिवैभवैः
'घनाक्षरी'-पद्यसुधौघवर्षिणी,
प्रहर्षिणी लोकमनोनुकर्षिणी ।
किं ते सुमूर्तिस्त्रिदिवं गताधुना ॥

(५)

आचार्यपादराजीवचञ्चरीको महेशतः ।
इच्छामि शान्तिमतुलां गुरवे चन्द्रशेखरः ॥

शोकाश्रु

(लेखक :-पं० श्रीगिरिराजप्रसादद्विवेदः,
पिलखावाँ, फैजाबाद उ० प्र०)

मथुरा किमु द्वारकापुरी,
मथुरानाथ-वियोगिनी कथ ?
शशिना रहिता हि कौमुदी
कुमुदानां न विकासनक्षमा ॥१॥

★

विधिना विधुरं निपातितं,
न हि सोढुं सहते मनो मनाक् ।
रुदती खलु मित्रमण्डली,
श्वसतीयं करुणैर्विचेष्टितैः ॥२॥

★

कविता नवरागरञ्जिता,
प्रियहीना विरहव्यथामिता ।
अधुना जयपत्तनं कथं ?
बत ! वासन्तिकवासवासितम् ॥३॥

★

बहुधा किल शोकविह्वलः
दयनीयः शरणागतः प्रभो ! ।
सततं वितरावलम्बनं,
स कलानाथशिशुः क्रमाश्रयेत् ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया तटस्थराष्ट्रशीर्षपरिषत्

सुविदिततरे काहिरानगरे अक्टोबरमासस्य प्रथमे सप्ताहे सम्पन्नायां त्रिदिवसीयतटस्थराष्ट्रपरिषदि, अक्टोबरमासस्य सप्तमे ७ दिनांके अस्मद्देशीयः प्रधानमन्त्री श्रीलालबहादुरः शास्त्री, विश्वशान्तेरुद्देश्यं तन्मतिक्रियमाणान् प्रयत्नांश्च वर्द्धयितुं खलु-एकं पञ्चसूत्रमायोजनं प्रास्तौत्। श्रीशास्त्रिणः शान्तिकल्पानि पंचसूत्राणि यथा—

१ आणविकं निरस्त्रीकरणम् (२) सीमावर्तिनां संघर्षाणां शान्त्या एव उपशमः (३) विदेशीयसाम्राज्यवादस्य आक्रमणात् हस्तक्षेपाच्च उन्मोचनम् (४) अन्ताराष्ट्रियो विकासः (५) राष्ट्रसंघस्य तर्थं तद्विकासकार्याणां च पूर्णतया समर्थनम्। इति।

श्रीशास्त्रिणा एतेषां पञ्चानां सूत्राणां समर्थनं निर्दिष्टं यत् तटस्थराष्ट्राणि आणविकनिरस्त्रीकरणसन्धौ प्रयत्नशीलानि भवेयुः। तथा च शक्तिसम्पन्नेषु राष्ट्रेषु भारमारोप्य आणविकसन्ध्यर्थं तानि तत्कर्तुं समुद्योजयेयुः।

भारतदेशविषये वदद्भिस्तैरुक्तं यद भारतेन तु आणविकशक्तेरुपयोगं केवलं शान्तिपूर्णकार्येष्वेव कर्तुं, संकल्पितम् मानवतामाणविकविपदस्तारयितुं तटस्थराष्ट्राणि स्वकीयमेकं शिष्टमण्डलं सम्प्रष्य, चीनदेशस्य (चीनदेशाधिपस्य) विनाशपूर्णान् आणविकपरीक्षणविचारान् परिवर्तयेयुः।

सीमावर्तिनां संघर्षाणां विषये च ते श्रीख्रुश्चेवस्य (रसियाप्रधानस्य) प्रस्तावममन्यन्त तत्स्वागतं चाकुर्वन् यस्मिन् तेन ख्रुश्चेयेन सीमासंघर्षेषु शक्तिप्रयोगं न कर्तुं मन्त्रणा कृतास्ते।

भारतं साम्राज्यवादस्य सर्वदा विरोधपरस्तथा चोपनिवेशानां स्वतन्त्रतायाः पक्षपात आस्ते। दक्षिण एफ्रिकायां यावन्मानवमूल्यानि न जयेयुस्तावदखंडेन संघर्षेण भवितव्यम्।

एवमार्थिकविकासकृते चैवमीरितम्-विकासमायातानि राष्ट्राणि स्वस्वकीयार्थस्रोतांसि प्रवर्द्धयेयुः। वयमस्मत्पदेष्वेव स्थातुमिच्छामः अद्यावधि स्वनिर्भरत्वाभवे देशेऽस्मिन् राजनैतिकी दासताऽऽसीत् इत्येवकारणमभूत्। एतदर्थं सर्वे वयं सहयोगं प्रवर्तयामः।

राष्ट्रसंघीयसहयोगविषये च वदद्भिरेवं प्रकाशितम्—राष्ट्रसंघो विश्वबन्धुत्वं प्रति प्रवर्द्धमान आस्ते, इति।

काहिरापरिषदि घानादेशस्य राष्ट्रपतिः क्वायनुक्रुमा-महाशयेन स्वकीयभाषणसमये भारतस्य भूतपूर्वप्रधानमन्त्री जवाहरलालनेहरुः स्मृतः तदा सर्वा परिषत् नेहरुमहोदयाय श्रद्धाञ्जलिमर्पयन्ती मिण्टद्वयं समौनमेवास्थिता।

संयुक्त-अरवगणराज्यस्याध्यक्षस्य श्रीनासिरमहाशयस्य भारतस्य च प्रधानमन्त्रिणः श्रीलालबहादुरशास्त्रिणश्च काहिरानगर्यां संयुक्ता विज्ञप्तिः प्रकाशिताऽभवन् यस्यां द्वाभ्यां नेतृभ्यां द्वयोरपि देशयोः आर्थिक-वैज्ञानिक-शैल्पिकादिक्षेत्रेषु घनं सहयोगं दातुं निश्चयः कृतः।

अस्मद्देशे प्रवर्तमाना महर्घता अन्नाभावश्च

अस्माकंदेशेऽत्र विगतमासचतुष्टयात् खाद्यादिपदार्थानां महर्घता धान्याभावश्च प्रतिदिनं वर्धत एव। वस्तुतस्तु धान्यानां तावान् अभावो नास्ति, यावान् तर्क्यते। एतत्तु अस्माकं सर्वकारस्य मुव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्थायाः समुचितनियन्त्रणस्य चाभावात् धान्य-व्यापारिषु महत्सु च कृषकेषु स[illegible]कटायाः राष्ट्रियतायाः समाजसेवायाः मातृभूमिभक्तेश्चाभावपरिस्थितिरेव मौलिकं कारणं वरीवर्ति। अस्माकं राष्ट्रमस्माकं देशवासिनो बान्धवाश्च कष्टमापन्नाः सन्तीति भावोदये जाते धान्यादिमूल्यानामुन्नतिः धान्यसंग्रहः भ्रष्टाचाराद्याश्चान्येऽपि राष्ट्रघातका दोषाः समाप्ति यातु सुशकाः। एतदर्थं प्रभुं सर्वशक्तिशालिनं श्रीहरिं प्रार्थयामो यत्स राज्यशासकेषु सर्वेष्वपि देशवासिषु च सतीं बुद्धिं दत्त्वा ईदृशं राष्ट्रहितरूपमग्निं चैतेषां हृदये प्रज्वालयेत्, यस्मिन् स्वार्थपरत्वभेदभावाद्या दोषा भस्मसाद् भवन्तु, राष्ट्रञ्चास्मदीयं पूर्णतयात्मनिर्भरं भूत्वा उन्नतिपथे अग्रगामि भूयादिति शम्।

श्रीहरिशास्त्री, जयपुरम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघुकथा

अतिथिसेवायाः फलम्

स्व० भट्ट श्रीमथुरानाथशास्त्रिमहाभागाः

प्रज्वलज्ज्येष्ठस्याऽऽसीद् घोरो मध्याह्नः। दिवसस्य द्विवादनमेवाऽसीत्। प्रचण्ड आसीत्सूर्यस्याऽऽतपः। आष्ट्रनिर्गता ज्वाला इव मध्याह्नवात्याः चलन्ति स्म। प्रधानाध्यापकः तत्पत्नी गृहस्य द्वारं वातायनं च निबध्य विश्रामं कुरुतः स्म। एतावतैव द्वारस्य बहिः वेदिकोपरि 'धम्' इति महान् शब्दः अश्रूयत। गृहद्वारमुद्घाट्य यथैवाध्यापकेन बहिर्दृष्टम्—एको दीनो जर्जरवस्त्रवेष्टितो मनुष्यो भूपतितो दृष्टः। दयालुरध्यापकः आश्रयं दत्त्वा तमेतं गृहस्य अभ्यन्तरे अनयत्। तस्य पत्नी एकस्मिन् पात्रे शर्करा-जलं निर्माय तम् अपाययत्। शर्कराजलपानेन तस्य अतिशान्तिर-भवत्। स्वस्थः सन् स हि स्थितोऽभवत्। गृहिणी तदर्थं भोजनमानयत्, अतिदयया च तस्मै भोजनमकारयत्। भोजनोत्तर-मेकस्यां खट्वायां तमेनमशाययताम्। द्वावपि पति-पत्न्यौ व्यजनेन तस्य पवनमकुरुताम्। आगन्तुकस्त्वरितमेव निद्रादेव्याः क्रोडे व्यश्राम्यत्।

निद्राया मध्ये एव शयानः स स्थितोऽभवत्। अध्यापकं प्रति अभाषत—"भवदर्थं

झलझलाते जेठ की घोर दुपहरी थी। दिन के दो बजे थे। सूर्य की धूप अति प्रचण्ड थी। भाड से निकली ज्वाला की तरह लुएं चल रही थीं। मास्टरजी और उनकी पत्नी मकान का दरवाजा और खिड़की बन्द करके आराम कर रहे थे। इतने में ही दरवाजे के बाहर चबूतरे पर 'धम्म' यह महान् शब्द सुनाई दिया। घर का दरवाजा खोलकर जैसे ही मास्टरजी ने बाहर देखा—'एक गरीब फटे पुराने वस्त्र पहने भूमि में गिरा है।" दयालु अध्यापक उसको सहारा देकर घर के अन्दर ले गया। उनकी पत्नी ने एक गिलास में शर्बत बनाकर उसको पिलाया। शर्बत के पीने से उसको बड़ी शान्ति मिली। स्वस्थ होकर वह बैठ गया। गृहिणी उसके लिए भोजन ले आईं और अत्यन्त दया से उसे भोजन कराया। भोजन के अनन्तर एक खाट पर उसको सुला दिया। दोनों ही पति-पत्नी पंखे से उसको हवा करने लगे। आगन्तुक शीघ्र ही निद्रादेवी की गोदी में सो गया।

निद्रा के बीच में ही सोता सोता वह उठ बैठा। मास्टरजी से बोला—"आपके लिए डेढ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्द्धशतमुद्रामासिकस्य प्रधानाध्यापकता शासनाददीयत । परश्वः राज्यलेखो भवत्-समीपे समागच्छेत् ।" एतदुक्त्वैव पुनः सः अशेत ।

जागृतावस्थायाम् अध्यापकेन यदा पृष्टं तदा अयमकथयत्—"मम नास्ति किञ्चिदपि स्मरणं यत् मया भवन्तं प्रति किञ्चिदुक्तं भवेत् । अहं तु दुःखाक्रान्तः एकः चर्मकारोऽस्मि । मया हि त्रीणि दिनानि पुत्रशोकस्य कारणात्किञ्चिदपि नाऽऽसीद् भुक्तम् । भीषणग्रीष्मज्वालया भवतां द्वारदेशे न्यपतम् ।

यथैव शीतला सन्ध्याऽभवत् अतिथिर्यथागतमगच्छत् । किन्तु अध्यापकस्य समीपे सार्द्धशतमुद्रामासिकप्राप्तेः सूचना यथासमयं प्राप्ताऽभवत् ,

स्वामिमहोदयो बहुधाऽकथयत् यत् भगवतः सोऽयमंशाऽवतारः । किन्तु अध्यापकमहोदयस्य कृते आसीत्तदिदम् अतिथिसेवायाः प्रत्यक्षं फलम् ।

सौ रुपये महीने की हैडमास्टरी राज्य से देदी गई है । परसों राज्य का हुकुम आपके पास आ जायगा ।" यह कह कर ही वह फिर सो यगा ।

जागने पर मास्टरजी, ने जब पूछा तो यह बोला—"मुझको कुछ भी याद नहीं, मैंने आपको क्या क्या कहा था । मैं तो दुखी एक चमार हूँ । तीन दिन हुए पुत्रशोक के कारण मैंने अब तक कुछ नहीं खाया । भयंकर गर्मी की ज्वाला से आपके दरवाजे में आ गिरा ।"

जैसे ही ठंडी साँझ हुई, अतिथि जैसे आया था वैसे चला गया । किन्तु मास्टरजी के पास डेढ सौ रुपये महीने प्राप्ति की सूचना यथासमय पहुँच गई ।

स्वामीजी अक्सर कहा करते थे कि यह ऐसा भगवान् का अंशाऽवतार है । किन्तु अध्यापकजी के लिये यह अतिथि सेवा का प्रत्यक्ष फल था ।"

आवश्यक निवेदनम्

श्रीजवाहरस्मारिका

विदितमस्तु तत्रभवतां भवतां विपश्चितां यदस्माकं भारतस्य भूतपूर्वप्रधानमन्त्रिप्रवरस्य स्व० श्रीजवाहरलालमहाभागस्य पुण्यस्मृतौ तज्जन्मदिवसावसरे 'श्रीजवाहरस्मारिका' (१४-११-६४) प्रकाश्यमेष्यति । एतदर्थं विद्वांसः प्रार्थ्यन्ते यत्—श्रीनेहरूमहाभागमुद्दिश्य स्वकीयाः कविता लेखाः संस्मरणानि चातिसत्वरमेव कृपया प्रेषयन्तु भवन्तः—इति निवेदयति—

भावत्को

गिरिराजशर्मा शास्त्री

प्रबन्धसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. J 7
Licence No. PP-6
"Licenced to Post without Prepayment

भारती

सूक्ति-सुधा

पुरुषस्यात्र संसारे त्रयो वै गुरुवः स्मृताः ।
माता पिता तथाऽऽचार्य्य एतान्सेवेत भक्तितः ।।१।।

इस संसार में पुरुष के तीन गुरु होते हैं (मुख्य) १ माता २ पिता, ३ आचार्य उपनयनादि संस्कार करा कर मन्त्रदाता हो, वेदाध्ययनादि कराने वाला हो इन तीनों की सभक्ति सेवा करनी चाहिए ।।१।।

नित्यमेषां च सुश्रूषुः सर्वधर्मफलं व्रजेत् ।
एतेषामाशिषा मर्त्यः सर्वान्कामानवाप्नुयात् ।।२।।

नित्य ही इनकी सेवा करने वाला सर्व धर्म के निर्वाह का फल पा लेता है । इन तीनों की आशीः से मनुष्य के सभी काम सफल होते हैं ।।२।।

एषां प्रियं हितं कुर्वन्सर्वतो मानमाप्नुयात् ।
अमीभिरननुज्ञातो न किञ्चिदपि चाचरेत् ।।३।।

इन तीनों का प्रिय और हित साधन करता हुआ सभी कामनाएं पा लेता है । इन तीनों के आदेश के बिना कुछ भी नहीं करना चाहिए ।।३।।

एत एव त्रयो वेदा एत एव त्रयः सुराः ।
एत एव त्रयो लोका एत एव त्रयोऽग्नयः ।।४।।

ये ही तीन वेद हैं ये ही तीन देव हैं, ये ही तीन लोक हैं, और ये ही तीन अग्नि हैं ।।४।।

इति चेतसि श्रद्धावान् सर्वतः सुखमाप्नुते ।
तस्मात् सर्वप्रयत्नेन भजन्तु स्वगुरुत्रयम् ।।५।।

इस प्रकार चित्त में इन तीनों पर श्रद्धा रखने वाला सर्व त[illegible] पाता है । इस कारण सर्व प्रयत्न करते हु[illegible]न तीनों गुरुओं की सेवा कीजिए ।।५।।

प्र० सम्पादकः—श्रीहरिशास्त्री, जयपुरम्

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

पाण्योर्युग्मे कमलयुगलं बिभ्रती स्वर्णमुद्राः,
वर्षन्ती चाभयमपि करे चापरे संवहन्ती ।
अम्भोजस्था कनकमुकुटा श्रीरियं हस्तिहस्तो-
दञ्चद्देवद्रुमसुममुरीकुर्वती वन्दनीया ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वार्षिकमूल्यं पञ्च मुद्राः ५)

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेशबिहार-पञ्चनद-आंध्र-बम्बई-सर्वकारैः स्वीकृता

विषय-सूची

क्रमसंख्या	लेखाः	लेखकाः		पृष्ठसंख्या
१	सन्देशाः			
२	मङ्गलम्	श्रीहरिशास्त्री, भारतीसम्पादकः,	जयपुरम्	५
३	नूतनवत्सरकृते निवेदनम्	,, ,,	,,	६
४	अभिज्ञानशाकुन्तलम्	श्रीगणेशरामरामस्नेही शास्त्री,	,,	८
५	भारत ! का तवायतिः ?	म. म. श्रींलक्ष्मीनारायणद्विवेदी	तिर्वा	१४
६	भूपसन्देशः	श्री के. कुन्जुपिल्लपनिकरः,		१५
७	गीतिका	श्रीविष्णुदत्तशर्मा विशारदः,	रतनगढः	१६
८	शैतानसिंहः	श्रीनरेन्द्रकुमारः पण्ड्या,	गनोडा	१६
९	अमरं भामतीनाम	श्रीगणपतिशुक्लः साहित्याचार्यः, एम ए.		२०
१०	हिन्दूसम्मेलनस्यायोजनम्	'मधुपः'	जयपुरम्	२२
११	श्रीस्वामिविवेकानन्दः	स्वामी श्रीगङ्गानन्दः,	कनखलः	२४
१२	भारत गीतम्	श्रीहरगोविन्दपाराशरः		२५
१३	गुरुदक्षिणा	श्रीभगवान्शरणभारद्वाजः		२६
१४	भाषणानां सारः	दीनानाथत्रिवेदी 'मधुपः'	जयपुरम्	२८
१५	चीनांशुकं त्यज्यताम्	आचार्य-श्रीमणिशङ्करद्विवेदी		३१
१६	रक्तबिन्दवः	हरगोविन्दपाराशरः	छिंदवाडा	३२
१७	ऋषिर्दयानन्दः	ब्र० श्रीरामविनोदः,	संतालपरगना	३३
१८	विद्याध्ययननामा षष्ठो मणिः	श्रीहरिशास्त्री दाधीचः,	जयपुरम्	३५
१९	सूक्तिसुधा	,, ,,	,,	४०

मासावतारः

आराच्छीतमुपाह्वयन् रविकरैर्वास्थापयन्मन्दताम्,
गेहाँल्लेपनमार्जनादिभिरलं रम्यान्समापादयन् ।
कान्ताश्चोषसि बोधयन्नदनदीकूपेषु संस्नापयन्,
मासः कार्तिक एष विप्रयुगलान्संभोजयन्नागतः ॥

—श्रीहरिशास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

No. 2739-DM/(C)/64
उप-मंत्री
संचार भारत,
DEPUTY MINISTER
COMMUNICATIONS
INDIA
नई दिल्ली,
५ अक्टूबर, १९६४

संदेश

यह जानकर बड़ी प्रसन्नता हुई कि संस्कृत मासिक-पत्रिका "भारती" ने सफलतापूर्वक १४ वर्ष पूरे कर लिये हैं और अब अपने प्रकाशन के पन्द्रहवें वर्ष में प्रवेश कर रही है।

संस्कृत विविध-भाषाओं की जननी है और हमारे सम्पन्न, विविधतापूर्ण और प्राचीन इतिहास, संस्कृति और परम्परा की आगार है। अतः यह जान कर बड़ा हर्ष होता है कि इस भाषा के प्रयोग को पुनरुज्जीवित करने और हमारे सर्वोच्चकोटि के तत्व-चिन्तन से जनता को परिचित कराने में सहायता देने का प्रयास किया जारहा है।

विजय भगवती

4640 64 DEM.
PRIVATE SECRETARY
To Deputy Minister for Education,
INDIA
निजी सचिव,
उप शिक्षा मंत्री
भारत सरकार
नयी दिल्ली–२
अक्तूबर १२, १९६४ ई०

प्रिय महोदय,

आपका पत्र क्रमांक ५२९१ दिनांक २८ सितम्बर, १९६४ जिसके साथ आपने संस्कृत मासिक पत्रिका "भारती" भेजी है, श्री भक्त-दर्शन, शिक्षा-उपमंत्री महोदय को प्राप्त हो गया है। वह आपको उसके लिये धन्यवाद देते हैं।

भवदीय

राजाराम जैन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्र संख्या जी० एस० २६७१
RAJ BHAVAN
बम्बई-३५,
६ अक्तूबर, १९६४

महोदय,

आपका २८ सितम्बर का पत्र श्रीमती विजयालक्ष्मी पंडित को मिला। यह जानकर उन्हें प्रसन्नता हुई कि "भारती" अपने पन्द्रहवें वर्ष में प्रवेश कर रही है। उनकी शुभ कामना है कि पत्रिका सानंद और सफलतापूर्वक प्रकाशित हो और इससे अधिकाधिक नरनारी लाभ उठावें।

भवदीय,
राम भद्राचारी

मंत्री
वन आणि शिक्षण
महाराष्ट्र
सचिवालय, मुंबई-३२
१३ अक्टूबर १९६४.

भवत्प्रेषिता "भारती" मासिकपत्रिका संप्राप्ता।
काव्यविज्ञानसहित्युविषयान् लेखांस्वभावलोक्य संजात
कौतूहलो भवम्। चतुर्दशवर्षाणि यद्धे विध्ययुक्तम् साहित्यप्रकाशनम्
भवद्भिःकृतम् तत् स्वार्थरहिता जनसेवा विश्वशिक्षाचेति मे मतम्।
ममाखिलाः शुभाकांक्षा भव वा यशः कृते नित्यवर्तिन्यः।
शुक्लचंद्रकलेव भवत्कार्य प्रगतिमार्गानुसारि स्यादितीशचरणयोरभ्यर्थना।

म० ध० चौधरी
शिक्षण व वन मंत्री

मुख्य मंत्री, बिहार।

पटना,
दिनांक ६ अक्तूबर, १९६४

मुझे इस बात की प्रसन्नता है कि "भारती" संस्कृत मासिक पत्रिका पिछले १४ वर्षों से प्रकाशित हो रही है। संस्कृत भाषा के प्रचार के लिए इस पत्रिका के प्रयास स्तुत्य हैं।

मेरी कामना है कि इसका नया वर्ष मंगलमय सिद्ध हो।

कृष्णवल्लभ सहाय
मुख्य मन्त्री, बिहार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

INDUMATI CHIMANLAL,
Minister, Education and
Social Welfare
Sachivalaya, Ahmedabad-15,
Dated 21-10-1964

Dear Shri Shashtri,

I thank you for sending me a copy of magazine "Bharti". It is most interesting and enjoyable to see this magazine. Sanskrit is a rich and most caltured language, and I am very happy that it is being revived and liked by the people.

I wish you all success,

Yours sincerely,
(INDUMATI CHIMANLAL)

DUPTY MINISTER,
Information and Broadcasting,
INDIA.
5, Safdarjang Road,
New Delhi,
October 9, 1964.

Dear Sir Shashtri,

I am glad that BHARATI is completing 14 years of useful work in the cause of Sanskrit. I have no doubt that in course of time Sanskrit will reach the position of importance which is its due, sooner than later. May it be given to you all to carry on your good wcrk for many years to come.

Yours Sincerely,
(C. R. Pattabhi Raman)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

No. M. Edn. 1758/64

S. R. KANTHI B. A., LL. B.
Minister for Education.
Vidhana Soudha,
Bangalore-1,
Dated 7-10-1964

My Dear Giri Raja Sharma Shastry,

I am in receipt of your letter dated 28-9-64. I am glad to know that you have been publishing "Bharathi" regularly during the last 14 years and that you will be entering the 15th year of its publication. I had a look at the issue so kindly sent by you with your letter. I find that "Bharathi" Contains articles from learned and distinguished educationists from various parts of the country and that the articles are interesting and educative. As such I wish your endeavour all success.

Thanking you,

Yours sincerely,
R. S. KANTHI

C.M.S./GG/7124
सचिवालय,
अहमदाबाद।

महोदय,

यह जान कर मुझे बड़ी प्रसन्नता हुई है कि भारती संस्कृत मासिक पत्रिका सफलतापूर्वक अपने पन्द्रहवें वर्ष में प्रवेश कर रही है। भारतीय भाषाओं को समृद्धिवान बनाने की दिशा में संस्कृत का अत्यन्त महत्वपूर्ण योगदान रहा है। मुझे विश्वास है कि यह पत्रिका संस्कृत को अधिकाधिक लोकप्रिय बनाने में बड़ी उपयोगी सिद्ध होगी।

इस प्रत्रिका की सफलता के लिए मैं अपनी हार्दिक शुभ कामना भेजता हूं।

बलवन्तराय मेहता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकविः
श्रीहरिशास्त्री
सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

'लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा[2]
भारती भारतीयानां भासतां भवनेष्वलम्
-श्री हरिः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा शास्त्री
भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

वर्षम् १५ | कार्तिकः, विक्रमाब्दः २०२१ (नवम्बरः १९६४) | अङ्कः १

कार्तिके--भारतीकृते मङ्गलम् (महालक्ष्मी-प्रार्थना)

श्रीहरिशास्त्री भारती-सम्पादकः ।

अयि भृगुनन्दिनि ! विश्वविनोदिनि ! सेवकमोदिनि ! वैभवदे !
भगवति हे भवभीतिनिवारिणि शोकविदारिणि पाहि चिरम् ।
प्रणतमनोरथसिद्धिविधायिनि ! हे वरदायिनि ! विश्वनुते
जय कमले जय पद्मनिवासिनि विष्णुविलासिनि सिन्धुसुते ! ॥१॥

मातर्मे परमे त्रिलोकजननि क्षीरोदकन्ये रमे
पद्मे पद्मनिकेतने भृगुसुते नित्ये जयन्तीन्दिरे !
श्रीः कल्याणि हरेः कुटुम्बिनि परे कारुण्यवारां निधे !
देशेऽस्मिन् दृशमीदृशीं कुरु यतो दारिद्र्यमोयाल्लयम् ॥२॥

एह्येहि स्वागतं देवि ! कमले ! श्रीहरिप्रिये ! ।
घृत-तैल-प्रदीपैस्त्वां चिरं नीराजयामहे ॥३॥

---

(१) लेखर्देवैः पक्षे निबन्धैः । (२) छदा वस्त्राणि पत्राणि च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभारतीसमुन्नतिप्रणयिनः !!!

नूतनसंवत्सरकृते निवेदनम्

अयिभोः पाठकमहाभागाः !!!

इयं हि खलु सरलसंस्कृतप्रचारप्रधाना 'भारती' पत्रिका निग्रहानुग्रहसमर्थायाः श्रीपराम्बायाः कृपाप्रभावात् अद्य चतुर्दशाब्दान् उल्लङ्घ्य सप्रमोदं पञ्चदशे वर्षेऽस्मिन् प्रवेशं करोतीति महान्मोदावसरः। सेयं पत्रिका यथाशक्ति यथावसरं श्रीमतां पाठकमहाभागानां सेवायां विविधान् लेखान् कविताश्च नानाविधा आवेदयन्तीव प्रवर्तते इति सपरितोषमुच्यते। अपि मन्यन्ते भवन्तोऽपि तदिदं तथ्यं नापह्नुतम्।

पारतन्त्र्यमभिभूय लब्धस्वातन्त्र्येऽपि भारते अस्माकं देशे परभाषायाः अद्यावधिकालमपि–सुदृढमिव स्वराज्यं विलोक्य मनोऽस्माकं खिन्नमिव जायते, तपति उच्चटति उल्बणमिव भवतीति किमधिकं ब्रूमः। अस्तु, सोऽयं प्रकृतेर्भगवत्या लीलाविलासः। परं येषां देशे ये स्वयंशासकाः अधिकारिणः प्रबन्धकाः सन्ति तेषां मनःसु किमिदं तमोऽनुविष्टं न नश्यति नापह्रीयते न क्षरति नादर्शनं प्रयाति न लुप्यते इति चित्रमेव। ये पूर्वं प्रावदन् स्वराज्ये प्राप्तमात्रे एव प्राक् संस्कृतिं संस्कृतं चास्य देशस्य समुज्ज्वलयिष्यामः, त एवाद्य प्रभुतां स्वीकृत्य एवं परिवर्तिता यद् कस्यापि किमपि कथनं देशहितप्रवर्तकं न शृण्वन्ति नाकलयन्ति न वाञ्छन्ति हन्त सोयं कीदृक् क्रूरः समयः प्राप्तः।

सम्प्रति सेयं पत्रिका उपर्युक्तमुद्देश्यं किमपि किमपि यथाशक्ति साधयन्ती श्रीमतां सेवां विदधती अपि नैतादृशं पोषणं प्राप्तवती यद्वशादियं सर्वत्रालं प्रसृता स्यात् तदस्याः कृते श्रीमन्तो भवन्तः उदाराशयाः संस्कृतप्रसारिणीमिमामूरीकृत्य स्वस्वप्रतिवेशिभ्यश्चापि तदस्या गुणान्वा संवर्णयन्तो अस्यां स्वमित्राणां मनांसि चावर्जयन्तः संस्कृतभाषायां प्रेम उत्पादयन्तु। तत्पठनाय प्रेरणां च कलयन्तो ग्राहकसंख्यामपि वर्द्धयितुं चेष्टन्ताम्।

तदनेन प्रयत्नेन सह लेखान् साहित्यसंस्कृतिसदुद्योगप्रधानान् सुलभोपदेशान् सरलाः कविताश्चापि अस्यै प्रेषयन्तुतराम्। यथा पूर्वेषु वर्षेषु श्रीमद्भिरुदारैर्यैर्लेखकैः कविवरैश्चास्याः सम्वर्धनं कृतं तदर्थे च तान्धन्यान्वदन्तो वयं पुनरनुरोधं कलयन्तः आवेदयामो यदस्यां तादृशीतोऽपि विशिष्टा कृपादृष्टिः कर्तव्या यथा सेयं सुरसरस्वतीं सेवमाना पत्रिका श्रीमतां सेवाकरणे प्रत्यहं परमुत्साहं लभेत। भारतीयान्बालकांश्च संस्कृतं शिक्षयेत।

राज्यसर्वकारा यद्यपि बहुतरां बहुलैः सज्जनैरावेद्यमाना बलादिवानुरोध्यमाना बहुधा यदा कदा संस्कृतभाषायाः कृते आश्वासनानि वाङ्मयानि वितरन्ति परं कार्ये तानि परिणमय्य न प्रदर्शयन्ति स्वकार्यौदार्य्यम् संस्कृतभाषाप्रेम चेति खेदावहम्। प्रतिग्रामं स्कूलसंख्यासंवर्धनेन न संस्कृतिसुरक्षणं भवति भविष्यति वा नहीदमपि स्कूलसंख्यासम्वर्धनं च न देववाणी सुरक्षणाय पोषणाय प्रवर्तनाय चेति सुव्यक्तमेव किमेतत्कृते कथयामः।

कामं परा भाषा अपि विलसन्तामस्मिन् प्रकृतिक्रीडास्थले पुण्यफले भारतदेशे या अस्य स्वकीया संस्कृतिप्रचारमूलभूता भव्या भविकप्रसारा परमोदारा सुरभारती अपि सुतरां संरक्षणीया भवेत्, न तु त्यक्तुं योग्या। ईदृशाः प्रकाराः ऊरीक्रियन्ते येषु समुल्लसितेषु वराकीयं गीर्वाणवाणी शयनमेवावलम्बते प्रतिदिनमिति, नापह्नुतं भवतां पाठकानां विवेकतः। तथापि इदमावेद्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयादर्शसंस्कृतिसाहित्यसदाचारधर्मव्यवहारादीनां सुरक्षणम् काम्यं चेत् अवश्यं सुरभारती समुपासितव्या नान्यः कोऽपि वा उपायोऽस्य देशस्य धर्मसंस्कृतिसाहित्यसमाजव्यवहारसुधारणाय तत्संरक्षणाय सम्बर्धनायापि च, यतो हि भारतीयादर्शसंस्कृतिव्यवहाराः संस्कृतभाषायां आकरग्रन्थेष्वेव मिलन्ति नाङ्गलभाषासु इति सगर्वं कथयामः। ततो हि संस्कृतप्रसाराय अस्यै गीर्वाणभाषायै अवश्यमेव राज्याश्रयो देयो दापयितव्यश्च राज्याश्रयमुपलभमान हीयं राजशासनाधीनासु संस्थासु प्रवर्त्स्यते तत्र तत्र प्रसरन्ती च भारतीयान्बालकान् आदर्शभूतां संस्कृतिं गुणान् साहित्यकलां च शिक्षयिष्यति यतस्ते बाला एव अग्रे धुरं वक्ष्यन्ति राज्यकार्याणां तदानीं सुसंस्कृतव्यवहाराः समाजसेविनः उपकारपरा उदाराः परस्परानुग्रहिणश्च सम्पत्स्यन्ते इति बहुला लाभाः भविष्यन्ति भवतां कृते।

तदस्याः सुतरां प्रसारकामनया भवन्तः संस्कृतपत्रिकाः पत्राणि च प्रवर्तयन्तु, प्रकाशयन्तु च। यानि सन्ति तानि पोषयन्तु प्रवर्द्धयन्तु भूषयन्तु पाश्चिमादिदेशेष्वपि प्रसारयन्तु चेति। सोऽयं गृहाश्रयः कल्पः। सेयं पत्रिका अनेनापि सकुशलं शनैः शनैः राज्यसिंहासनम् प्राप्तुं चेष्टिष्यते इति न संदेहः।

इतः परं किमाश्चर्यं भविष्यति यस्मिन् भारतदेशे देवानां क्रीडास्थलं देवाधिदेवश्चात्रावतीर्णः जन्म लेभे क्रीडितः सम्यक् प्रतिपन्नः राज्यं राज्यप्रबन्धादींश्च चक्रे (रामः कृष्णश्च) तैश्च नियतीकृतान् धर्मान् सदाचारान् व्यवहाराननुशीलयन्तश्चात्र जना लक्षावधिवर्षेभ्यः निवसन्तः एवागता मृताः जनिष्यन्ति च जन्यन्ते च। तादृशेऽस्मिन्देशे तेषां भारतीयानामस्माकं सम्प्रति सुरक्षणाय संस्कृतभाषा नापेक्ष्यते इति ब्रुवाणा एवास्मासु अधिकुर्वन्ति इति।

Insurance is a Social Service

With best Complements & Greetings

form

Ruby General Insurance Co. Ltd.

Business Transacted.

FIRE, MARINE, ACCIDENT, AVIATION, MACHINERY & ERECTION ETC. ETC.

Authorised & Subscribed Capital.		Rs. 1,00,00,000
Paid up Capital.	...	Rs. 32,00,000
Assets Exceed.	...	Rs. 3,21,00,000
Nett Premiums in 1962.	...	Rs. 1,85,00,000

BRANCHES & AGENCIES IN ALL IMPORTANT TOWNS IN INDIA

FOREIGN BRANCHES & AGENCIES:

Aden, Amsterdam, Beirut, Chittagong, Colombo, Jamaica, Khulna, Karachi, Kuala Lumpur, Kampala Nairobi, Penang, Rangoon, Singapore & San Fernado. D.L.M.S.,

Head Office:

"INDIA EXCHANGE"

India Exchange Place, Calcutta-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्"

लेखकः—गरोशराम रामस्नेही शास्त्री, आयुर्वेदाचार्यः श्रीदादूमहाविद्यालयः, मोतीडूँगरीं, जयपुरम् ।

"संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः संगमः सज्जनैः सह" ॥

इति विद्वज्जनानां स्वानुभवसिद्धसिद्धान्तमनुसृत्य संसारस्य येन केनाऽपि कविहृदयेन "कामं तद् भारतीयं स्यात्, कामं वा भारतेतरत्, कामं तदार्यजातीयं काममार्येतरद् भवेत्" आस्वादितं महाकवेः कालिदासस्य काव्यपीयूषम्, अवश्यमेव तत् सञ्जातं महाकवेश्चरणेषु श्रद्धावनतम्, प्रशंसितञ्च तेन मुक्तकण्ठेन महाकवेः काव्यकौशलम् । यद्यपि महाकविकालिदाससदृशाः महाकवयो न भवन्ति कस्यापि देशस्य, जातेः, धर्मस्य, सम्प्रदायस्य वा सीमाभिराबद्धाः, यतो हि तेषाममरकृतयोऽनपेक्ष्य जात्यादिभेदाभिनिवेशम् नितान्तमाह्लादयन्ति समानरूपेण सर्वेषामपि सहृदयानां स्वान्तानि तथा चोक्तमभियुक्तैः—

"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम्" ॥ इति ।

तथापि श्रीमहाकविकालिदासमहाभागैः स्वकीयपावनजीवनलीलाभिर्गौरवेण सनाथिता या खलु भारतभूमिस्तस्या स्नेहाभिमानसम्भारभाजो वयं भारतवासिनो यदि वहामः कामपि सविशेषामात्मीयतां महाकविम्प्रति, महाकवेर्गुणगानैर्मन्यामहे धन्यं कृतकृत्यञ्चात्मानम्, महाकवेर्यशोरागालापेष्वात्मविस्मृता वयं यद्येतावदपि प्रगल्भतामातनितुमुत्सहामहे यन् महाकविकालिदासमहाभागाः मूर्धाभिषेकमर्हन्ति विश्वस्यापि महाकविसमाजेष्विति तदपि नास्वाभाविकमस्माकं कृते । विश्वस्य महाकविषु कतमदासनमलङ्कर्तु मर्हति महाकविकालिदास इति निर्णयाधिकारं विजह्मो वयं देशान्तरीयाणामेव सहृदयविचक्षणानां कृते, किन्तु भारतीयमहामनीषिणान्तु प्रसिद्धमद्यावधि निर्विवादमिदमैकमत्यं यन्महाकविकालिदासमहाभागा एव भारतीयमहाकविरत्नमालिकायाः सर्वशिरोमणयः ।

काव्यामृतरसास्वादनलोलुपतोपहतस्वान्तैस्तु सर्वैरपि निर्मथ्यते महाकवेः काव्यानां क्षीरार्णवः किन्तु "रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषाम्" इत्युक्त्या दृष्टिभेदैरपि नानवगाहितान्यद्यावधि महाकवेः काव्यसरसामन्तस्तलानि । तथा हि यदि केऽपि मार्गयन्ते भौगोलिकतथ्यानि महाकवेः काव्येषु तर्ह्यपरेऽन्वेषयितुमुत्सुकास्तत्रैतिहासिकतत्त्वानि । एके यदि गवेषयितुमर्हन्ति तत्र कान्यपि वैज्ञानिकतत्त्वानि तर्हि तदन्ये सूक्ष्मेक्षिकया साक्षात्कुर्वन्ति तत्रोच्चतमानि दार्शनिकरहस्यानि । किमधिकम् "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भागवतपद्धतिमवलम्बमानेव महाकवेः कवितासरस्वती परिपोषयति सर्वेषामपि स्वकीयभक्तिभाजाम् मनोरथान् ।

महाकवेः काव्यगौरवेण प्रभावितान्तःकरणैर्विद्वज्जनैर्यादृशाः खलु श्रद्धाञ्जलयः समर्पिताः महाकविचरणेषु तेषां कश्चिदाभासो भवितुर्हति निम्नाङ्कितैर्भावोद्गारविशेषैः । तथा हि यदि गायन्त्येके:-

"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्वेव जायते" ॥ इति

तर्ह्यन्ये सोत्साहमभिव्यंजयन्ति महाकवेः कामप्यतुलनीयां महनीयताम्—

"पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासाः ।
अद्यापि तत्तुल्यकवेरभावात्,
अनामिका सार्थवती बभूव" । इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ यदि केचिदुत्सहन्ते:—

"साकूतमधुरकोकिलविलासिनी कण्ठकूजितप्राये।
शिक्षासमयेऽपि मुदे रतिलीला कालिदासस्य" ॥

इति प्रशंसितुं महाकवेः काव्यकृतिरतिलीलां तर्हि तदितरे नाऽस्मानं नियन्तुमर्हन्ति—

"जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।
कवी इति कालिदासे कवयस्त्विति दण्डिनि" ॥

इति सविशेषं महिमानं महाकवेरुपवर्णयितुम्—

"माहिषं दधि सशर्करं पयः कालिदासकवितां नवं वयः।
शारदेन्दुमबलां च कोमलां स्वर्गशेषमुपभुञ्जते जनाः" ॥

इति कस्याप्यनुभविनः सहृदयस्य वचनं किं न प्रमाणयति यत् कियदाह्लादकराः महाकवेः काव्यव्यापाराः ?

"भासो हासः कविकुलगुरुः कालिदासो विलासः,
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः ॥
यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरः,
केषां नैषा सरसकविता कामिनी कौतुकाय" ॥

इति कविताकामिनी विलासत्वव्याजेन महाकवेर्महिमोत्कर्षविशेषाभिव्यंजनं केषां सहृदयानां हृदयेषु नावहति चमत्कारातिशयम् ? अस्तु,

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" ॥

इत्येवं कविकर्ममर्मज्ञैः प्रतिपादितानि काव्यप्रयोजनान्येव संयोजयन्त्यस्माकं हृदयेष्वेवं निश्चयविजयं यत् लोकमङ्गलसाधनविधानमेवानन्यदुद्देश्यं कवीनां काव्यव्यापारप्रचाराणाम्। "स्वान्तःसुखाय कविकौतुकमातनोमि इत्यभियुक्तमहोक्तिमनुसृत्योच्चकोटिकाः कवयः आत्मसंतोषैकप्रवणाः भवन्ति सोत्साहमुत्सुकाः कस्यापि महापुरुषस्यादर्शचरित्रचित्रणासु व्यापारयितुमात्मनः सौवर्णी काव्यशालाकां तूलिकाम्। तथा हि स्वयमेवाङ्गीकुर्वन्ति कालिदासमहाभागाः—

"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः"। इति

एवंविधमहाकवीनां काव्यसृष्टिष्ववश्यमेव सङ्घटितानि भवन्ति तानि शाश्वतिकानि लोकमङ्गलकारीणि तत्त्वानि यानि न केवलं कृतार्थयन्ति तेषां कवीनामेवात्मनः अपि त्वनन्तकालस्य कृते सम्पद्यन्ते समस्तलोकोपकारककरणानि। एतादृशा एव खल्वस्माकं महाकवयः श्रीकालिदासमहाभागाः ये न केवलं भासाश्वघोषभवभूतिमाघभारविदण्डिबाणप्रभृतीनामेवाग्रे सरत्वेन गणनीया अपि तु ये समर्जयितुमर्हन्ति व्यासवाल्मीकिवसिष्ठप्रभृतिषु महर्षिष्वपि कमपि ससम्मानं स्थानविशेषम्, यतो हि स्वसमकालिकसम्राजां राजसभास्वपरिमितं धनधान्यवैभवमपरिच्छिन्नं यशोराशिं च समर्जयता महाकविना स्वकीयकाव्यव्यापारेण, विविधलोकव्यवहारशिक्षाम्, अमङ्गलविध्वंसम्, अमन्दानन्दसंदोहम्, स्निग्धोपदेशविशेषांश्च जनतासु प्रसारयता यादृशः खलु राष्ट्रस्य महानुपकारः सम्पादितः न तत्र किमपि विशेषं न्यूनत्वं द्रष्टुमर्हामो वयम्।

सर्वानुभवसिद्धमेतद् यत् यथा खलु दृश्यकाव्यद्वारा शीघ्रतया, सारल्येन, अतिशयेन च सामाजिकान् प्रभावयितुं प्रभवति महाकविः, यथा च रसास्वादं सम्पादयितुमर्हन्तितरां रसिकजनाः दृश्यकाव्यद्वारा न तथा श्रव्यकाव्यतः। अत एवेदं मतमास्थितं काव्यतत्त्वविशेषज्ञैर्यत् "काव्येषु नाटकं श्रेष्ठम्" इति। तथा च द्विविधेनापि काव्यपथेन लोकोपकारसाधनासु सोत्साहं प्रवर्तमानेन महाकविना स्वकीयोत्कृष्टकाव्यकृतिभिरभिवर्धिता काऽपि महती संस्कृतसाहित्यस्य श्रीसमृद्धिः। महाकवेः काव्यकृतीनां गम्भीरानुशीलनचणैर्विचक्षणैरेवाविष्कृतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्" इति निष्कर्षो, यस्य समर्थने किमपि तुच्छं व्यापारयाम्यहं स्वलेखनीमस्मिन् संक्षिप्ते निबन्धे।

१. आदर्शकथानकम्

अभिज्ञानशाकुन्तले हि चित्रितं तस्य महाराजस्य दुष्यन्तस्य पवित्रं चरित्रं यस्यापत्यमभूद् भरत-महाराजो यस्य नाम्ना भारतमिति प्रख्यातमास्ते-ऽद्यावधि राष्ट्रमिदमस्माकम् महाराजदुष्यन्तस्य शकुन्तलायाश्च कथानकं यद्यपि संगृहीतं महा-कविना महाभारतात् पुराणेभ्यश्च तथापि स्वकीय-काव्यानामुच्चमादर्शमनुस्मरता तेन तदनुकूलतया-परिवर्त्य परिष्कृत्य च कथानकमिदं समुद्दीपितं नायकयोश्चरित्रं स्वकीयापूर्वप्रतिभाप्रभावेण। सोऽयं महाकवेर्दृष्टिकोण एव प्रमाणयति यत् कियानुन्नतो महाकवेः काव्यानामादर्शः।

२. उत्कृष्टं नाट्यकौशलम्

अभिज्ञानशाकुन्तलं हि उत्कृष्टं प्रमाणं महाकवेः काव्यकौशलस्य। रूपकेऽस्मिन् पूर्णतया प्रकाशमाप्ता महाकवेः काव्यप्रतिभा। अनुपमं खलु निदर्शनं शाकुन्तलम् महाकवेः कल्पनाशक्तीनाम्, अद्भुतमत्र भाषालालित्यम्, अतीव मार्मिकी पात्राणां संवादयोजना, अपूर्वैव क्षमता प्रदर्शिताऽत्र महाकविना मानवीयमनोभावानामभिव्यंजनेषु, शृङ्गारप्राधान्येऽपि सर्वेषामेव रसानां निर्वाहितोऽत्र मनोहरः समन्वयः, तथा कौशलेन सम्पादिता-ऽत्रोत्तरोत्तरं प्रसङ्गानां सङ्गतिर्यथा समुत्तेजयति सा सततं दर्शकानामौत्सुक्यम्, नाटकस्यास्य प्रत्येकं दृश्ये, प्रत्येकं च प्रसङ्गे तथाऽकर्षकत्वमाहितं महाकविना यथा नाणुमात्रमप्युद्वेगः आविशति दर्शकानां चित्तेषु, असाधारणतया यथास्थानं संनिवेशितानि काव्यतत्त्वानि नाट्यतत्त्वानि महा-कविनाऽस्मिन् रूपकोत्तमे। तदेभिरेवाकर्षण-विशेषैर्विद्योतते रूपकमेतत् समस्तस्यापि संसारस्य हृदयाकर्षकत्वेन।

३. औचित्यनिर्वाहः

"अनौचित्याद् ऋतेनास्ति रसभंगस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा॥" इति

"वयोऽनुरूपः प्रथमस्तु वेषो
वेषानुरूपश्च गतिप्रचारः।
गतिप्रचारानुगतश्च पाठ्यं
पाठ्यानुरूपोऽभिनयश्च नाट्ये॥"

इति काव्यनाट्यमर्यादा सर्वांशतः प्रतिपादिता शाकुन्तले पात्रविशेषाणां कथनोपकथनेषु तदनुरूप-तामाविष्कुर्वता महाकविना। तथा हि-शकुन्तलायाः दुष्यन्तसम्बन्धं समर्थयतो महर्षेः कण्वस्य "दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता इत्युक्तिः कियदनुरूपा तदोयजीवन-पद-मर्यादानाम्। 'वत्से सुशिष्यपरिदत्तेव विद्या अशोचनीयाऽसि संवृत्ता" इत्येतादृशा एवोपमा-विशेषाः शोभामावहन्ति कुलपतेः कण्वस्य। एवमेव राज्ञो दुष्यन्तस्य, शकुन्तलायाः, तत्सखीनाम्, विदूषकस्य, पात्रान्तराणाञ्च प्रसङ्गभेदानुगतेषु संवादोपसंवादेषु न क्वचिदपि संलक्षयितुं शक्यते-ऽस्माभिरनौचित्यलेशोऽपि।

४. भाषावैशिष्टयम्

नितान्तमेव परिमार्जितः प्रसादमयश्च-शाकुन्तलस्य भाषाप्रवाहः। एकतो यदि शाकु-न्तलस्य सरलसरलेषु वाक्यविन्यासेषु न विद्यते-नाम्नापि दूरान्वयक्लिष्टपदप्रयोगादिभाषादोषा-क्रोशः, तर्ह्यपरतो निरूढपदवाक्यानां प्रचुरप्रयोग आदधाति शाकुन्तलस्य भाषासु कामपि विशेषामेव सुषमाम्। तथा हि "क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति" "किमत्र चित्रं यदि विशाखे शशांकलेखामनुवर्तेते", "दिष्ट्या-ऽनुरूपस्तेऽभिनिवेशः, सागरं वर्जयित्वा कुत्र वा महानदी अवतरति", एष नाम आग्रहो यत् शूला-दवतार्य हस्तिस्कन्धे प्रतिष्ठापितः", "सतां हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः", सर्वः सगन्धेषु विश्वसिति" इत्येतादृशाः सरलातिसरलाः रूढ़प्रयोगाः कां सरसतामावहन्ति शाकुन्तलभाषास्विति स्वयमनुभवितुमर्हन्ति शाकुन्तलस्य सहृदयाः पाठकाः ।

५. संकेतैरेव भावाभिव्यंजना

अभिधाव्यापारेण कस्यापि भावविशेषस्य विस्तारेणाविष्कारमुपेक्षमाणो महाकविः शाकुन्तले सूक्ष्ममार्मिकव्यञ्जनाविधयैव प्रायोऽभिव्यंजयामास गम्भीरान् भावान् । तथा हि 'शकुन्तलायाः प्रथमदर्शनेन समुदितान् दुष्यन्तस्य कोमलमनोभावानभिव्यंजयति महाकविः केवलं "अये! लब्धं नेत्रनिर्वाणम्" इति संक्षिप्तेनैव वाक्यैकमात्रेण । दुष्यन्तस्य शकुन्तलायाश्च प्रेमालापाः नितान्तमेव संक्षिप्ताः शाकुन्तले । स्पष्टेऽपि दुष्यन्तस्याश्वासनभङ्गे स्वाभाविका अपि शकुन्तलायाः विरहालापाः न केऽप्युपनिबद्धा महाकविना शाकुन्तले किन्तु महर्षेर्दुर्वाससः आतिथ्यसत्कारम्प्रति शकुन्तलाया अनवधानतयैव अभिव्यंजितानि तस्या अन्तर्द्वन्द्वानि । दुष्यन्तेन कृतेऽपि शकुन्तलायाः प्रत्याख्याने स्वयं शकुन्तलाया अन्येषां वा तदीयसम्बन्धिनां मौनाभिव्यक्तिर्महाकवेरभिव्यंजनाकौशलस्यानुपममुदाहरणम् । तदिदं शाकुन्तलस्यानन्यसाधारणं वैशिष्ट्यम् ।

६. प्रकृतेरपि चैतन्यम्

महाकविराविष्करोति जडप्रकृतिष्वपि कामपि सजीवतामिव, उपस्थापयति च प्राकृतिकानपि पदार्थान् रूपकस्य मञ्चेषु सजीवपात्ररूपेण । तथा हि शकुन्तलायाः प्रस्थानसमये:—

क्षौमं केनचिदिन्दुपाण्डुतरुणा-
माङ्गल्यमाविष्कृतम्,
निष्ठ्यूतश्चरणोपराग-
सुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलै-
रापर्वभागोत्थितैः,
दत्तान्याभरणानि नः,
किसलयच्छायापरिस्पर्धिभिः ॥

इति शकुन्तलायै प्रेमोपहारान् समर्पयतां वृक्षाणां यादृशं खलु स्नेहप्रदर्शनन्तदिदमनुहरति महाकविकालिदासस्यैव प्रतिभाशैलीम् ।

"अन्तर्हिते शशिनि सैव कुमुद्वती मे,
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य,
दुःखानि नूनमतिमात्रदुरुद्वहानि ॥"

इति शकुन्तलाकुमुद्वत्योरैकरूप्यव्याजेन प्रकृतिमानवयोस्तादात्म्यं क्व नु खलु शाकुन्तलादन्यत्र लब्धुमर्हामो वयम् ।

पातुं न प्रथमं व्यवस्यति जलं
युष्मास्वसिक्तेषु या,
नादत्ते प्रियमण्डनाऽपि भवतां
स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रवृत्तिसमये
यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं
सर्वैरनुज्ञायताम् ॥

इत्येवं जड़चेतनयोरकल्पनीयं तादात्म्यप्रकाशनं कस्य नाम महाकवेरन्यस्य सामर्थ्यम् ।

७. पशुपक्षिणामपि मानवतादात्म्यम्

निश्छलप्रेमप्रभावेण पशुपक्षिणोऽपि कथमात्मीयाः प्रियजनाः सम्भवन्तीत्यत्र प्रकृष्टं निदर्शनं शाकुन्तलम् । तथा हि :—

उद्गीर्णदर्भकवला मृग्यः
परित्यक्तनर्तनाः मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चत्यश्रूणीव लताः ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्याश्रमस्य मूकचेतन्यस्यैतादृशं करुणामयं चित्रं दुर्लभं खलु शाकुन्तलादन्यत्र।

८. मनोभावाभिव्यंजनवैशिष्टयम्

शाकुन्तले हि विभिन्नपात्राणां सचित्रेव मनोभावाभिव्यंजना प्रकाशयति महाकवेः भावाभिव्यक्तिशक्तेरौदार्यसौन्दर्यम्। तथा हि दुष्यन्तं प्रत्युदीयमानस्य शकुन्तलायाः प्रेमाङ्कुरस्य—

"दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे,
तन्वी स्थिता कतिचिदेव पदानि गत्वा
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥"

इति कियत् यथार्थं शब्दचित्रम्!

"अनाघ्रातं पुष्पं किसलयमलूनंकररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद् रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति
विधिः।" इति

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं,
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं,
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥"

इति च दुष्यन्तस्यान्तर्द्वन्द्वानां शाब्दिकः प्रतिबिम्बः कियानुत्कृष्टः!

"यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठस्तम्भितवाष्पवृत्तिकलुषं चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥"

इत्येवं पुत्रीवियोगेन पितुर्वात्सल्यविह्वलतायाश्चित्रं कियत् स्वाभाविकम्!

९. संयतशृङ्गारः

यद्यपि "शृङ्गारप्रधानः खलु कालिदासः" इति प्रसिद्धो लोकप्रवादो महाकवेर्विषये, स्वाभाविकश्च शृङ्गारवर्णनप्रवाहपतितस्य कस्यापि कवेरात्मविस्मृतस्य कोऽपि मर्यादाव्यतिक्रमः। तथापि "सोऽहमाजन्मशुद्धानां" इति स्पष्टतरमेव स्वकीयनायकेषु चारित्र्योत्कर्षविशेषं लक्ष्यीकृत्य प्रवर्तमानस्य "अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः" इति च स्वकीयनायकेषु धर्मपरायणतामादधानस्य—

"रेखामात्रमपिक्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥"

इत्येवञ्च प्रजानां दृढमर्यादानिष्ठाम्प्रति, अभिमानविशेषमावहमानस्य महाकवेः कृतिषु सम्भवति, कोऽपि मर्यादा व्यतिक्रम इति कल्पनाऽपि नोदेतुमर्हति कस्यापि गुणज्ञस्य चेतसि। अत एव शाकुन्तले प्रसङ्गानुरोधेन शृङ्गारवर्णनप्रवणोऽपि महाकविर्न विस्मरति मर्यादारक्षाम्, निवारयति नायकयोः प्रगल्भतातिप्रसक्तिम् अभिव्यंजयति च कठिनेष्वपि प्रसङ्गेषु तयोर्मर्यादानु-गामित्वमेव। तथा हि—शकुन्तलामुग्धोऽपि दुष्यन्तो न सहसा प्रवर्तते किमप्युच्छृङ्खलं व्यवहर्तुमपि तु विवेचयति स्वकीयकर्त्तव्यम्, परीक्षते च शकुन्तलायाः गम्यागम्यत्वम्। "न जाने भोक्तारं कमिह समुपस्थास्यति विधिः' इति तत्त्वान्वेषणपरायणतैव तस्य पर्यवस्यति "वयं तत्वान्वेषान्मधुकर! हताः" इत्यनुभवे। "असंशयं क्षत्रपरिग्रहक्षमा' इति सुपरीक्षितनिश्चयपूर्वकमेव सः प्रवर्तते शकुन्तलाम्प्रति, "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इत्यात्मविश्वासपुरस्सरम्। तपोवनात् स्वयं पत्नीभावेनोपस्थितामसाधारणरूपलावण्यवतीं शकुन्तलाम्प्रति "अनिर्वर्णनीयं परकलत्रम्" "अनार्यः खलु परदारव्यवहारः" इत्येवमुदात्तभावोदार्यं दुष्यन्तस्य प्रमाणयति तस्य मर्यादानिष्ठत्वम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव शकुन्तलाऽपि "पौरव ! रक्ष विनयम् मदनसंतप्ताऽपि न खल्वात्मनः प्रभवामि" इत्येवमभिजातस्त्रीजनोचितमर्यादानुगामिनी न भवति कस्याप्युद्दामभावावेशस्य वशवर्तिनी । तदित्थं शाकुन्तलस्य संयतश्शृङ्गारो भवितुमर्हति महाकवेरुत्कृष्टालंकारः ।

१०. भारतीयमर्यादापरिपोषः

शाकुन्तलं हि महाकवेरादर्शलक्ष्यविशेषोपनिबद्धं परिपोषयति सामाजिकेषु भारतीयां सनातनीमार्यमर्यादाम् । तथा हि—

"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भवदक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहणीपदं युवतयो वामा कुलस्याधयः ॥"

इत्येवं यदि विजृम्भते शाकुन्तले भारतीयनारीणां मर्यादापरम्परा तर्हि :—

"कुमुदान्येव शशांकः,
सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रह-
संश्लेषपराङ्मुखी वृत्तिः ॥"

इत्येवं विजयते तत्र भारतीयपुरुषाणामादर्शमर्यादाविशेषोऽपि । एकतस्तावत् शाकुन्तले :—

"आचार इत्यवहितेन मया गृहीता,
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनाय ॥

इति विलसति सेवकानां कर्त्तव्यैकविधानमर्यादा तर्हि प्रक्षान्तरे—

"भानुः सकृद्युक्ततुरङ्ग एव,
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥

इत्युल्लसति तत्रोदात्तनृपजनोपात्ता काऽपि विशिष्टा राजधर्ममर्यादा ।

तदित्थं भारतीयजीवनस्य विशिष्टादर्शपरम्परामेव सततमनुवर्तमानतया—

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती न हीयताम् ।
ममापि च क्षपयतु नीललोहितः,
पुनर्भवं परिगतशक्तिरात्मभूः ॥

इत्याशीर्वचनैः पर्यवसीयमानं शाकुन्तलं कस्य नाम सचेतसो हृदयं न व्यवसाययितुमर्हति यत्—
"कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्" इति

कुमारेश
लिवर और पेट की बीमारियों में
मालफा-डारमिन
जले, कटे, घाव एवं चर्म रोगों में
औ·आर·सि·एल् लिः • कुमारेश हाउस • हावड़ा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारत ! का तवायतिः ?

म. म. लक्ष्मीनारायणद्विवेदी, कविरत्नं, साहित्याचार्यः विद्यालंकारः, विद्याचूडामणिः, तिर्वा, फर्रुखाबाद

यदा गता नः किल संस्कृतिः प्रिया
या जीवनी शक्तिरभूद्बलोत्तरा ।
तदावशेषं किमु नः ? किमाहृतं
विसौरभं म्लानविभं कुशेशयम् ॥१॥

मधूद्वमन्ती किरती द्युतिं श्रियं,
समेधयन्ती शिरसः स्त्रगुज्ज्वला ।
स्वयं समुच्छिद्य पदैर्विमर्दिता
विहस्तिता यत्खलु भारतीयता ॥२॥

प्रशंसितं लोकगुरुत्वमण्डितं
हतं परासुत्वमुपागतं यदि ।
वैदेशिकैः स्वार्थरतैर्भवेदिदं
कथं स्वकत्वेन न भारतम् ॥३॥

सनातनी विश्वजनीनताश्रिता
समस्तभाषाजननीति विश्रुता,
या भारती तामवहेलयन् हसन्
स्वं भारतीयं वदतीति चिन्त्यताम् ॥४॥

सनातनाद्धर्ममहापथाच्च्युतो
निन्द्यार्थकामैकपरायणो जनः ।
वैदेशिकाचारविदूषितः कथं
समुन्नतिं नेष्यति हन्त भारतीम् ॥५॥

एतादृशां चेन्ममतास्ति भारते
विसंस्कृतौ हेलितधर्मसत्पथे ।
तदा मुमूर्षौ गवि कङ्क फेरुकैः
श्वभिः प्रदर्श्या ममता न किं मता ॥६॥

यन्मानसं नाम सरोवरं भवे-
न्निरस्तमुक्ताफलमुग्रशम्बुकम्
अपेतहंसं बक-काकसेवितं
भजेन्न किं साम्यमिदं सरोऽन्तरैः ॥७॥

आर्योचिताचारपरम्परा परा
परासिता चेद्भवता तदा परे ।
अजातिदोषान्निजजाति-सात्मतां
त्वां हन्त नेष्यन्ति न किं प्रलोभनैः ॥८॥

आनीय च त्वां निज सात्मतां परे
विमानयिष्यन्ति विदूष्य धर्षणम् ।
विधाय ते भारत रे तदापदां
दुरन्ततान्ताय तवायतौ स्थिता ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूपसन्देशः ❀

(पूर्वभागः)

लेखकः– के. कुञ्जुपिल्लपनिकर

प्रेयान् कोऽपि प्रबलसुचिरप्रेमवत्या विधे वि-
द्वेषात् पत्न्या विरहरुजयाऽसह्यया दह्यमानः ।
पश्यालाख्ये किल पुरवरे राज्यकार्यप्रवर्तः
कालं निन्ये कथमपि चिरात् साधुशीलः कदाचित् ॥१॥

शश्वद्दीप्यद्विरहकदनज्वालया सोऽवलीढाद्-
धूमैर्जातैरिव हृदयतस्तस्य निःश्वासवेगैः ।
ग्रस्तोन्मेषस्थितिमुपगतस्तत्र संत्यज्य निष्ठां
चक्रे वासं खलविधिविलासान्तदीक्षामनस्कः ॥२॥

तत्रायातस्तदनु निकटे तस्य पाथोधिकाञ्ची-
वृत्राराति प्रियतनुभवो नर्मसंभाषणार्थी ।
मित्राधीशः प्रणयिषु कृपावर्षविख्यातिमान् स्वा-
मित्राणां भूपतिकुलमणिः प्रौढकल्पान्तवह्निः ॥३॥

भूपं तावद्विरहविधुरस्स प्रणम्यागतं तं
तापाधिक्यात् सततगलितैरश्रुभिः क्लिन्नवक्त्रः ।
यत् सौहार्दं निजविषयकं–पूर्वमेवैधमानं
स्मृत्वा कार्यं निगदितुमिदं प्रोद्यतोभूत् स्वकीयम् ॥४॥

आकल्पान्तं जय, सुकृतिमूर्द्धन्य ! राजन्यमौले !
छायान्यूनं भुवि तव यथा स्यान्न सौजन्यसिन्धो ।
यावच्छक्यं किमपि लघु साहाय्यमस्मै विधातुं
शोकोद्विग्नः सदयमधुना प्रार्थयेऽहं भवन्तम् ॥५॥

❀ संरदारबिरुदधारिणा के. ए. पाणिक्कर इत्याह्वयेन कविवरेण केरलभाषायां विरचितस्य भूपसन्देशकाव्यस्य संस्कृतभाषायां विवर्तनमिदम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्कान्तायास्सुचिरविरहक्लेशमापद्यमान-
श्शुष्कात्माहं विगतशरणो हा करोम्यत्र वासम् ।
दुष्कालोत्थं वहदविकलं खेदमन्यार्थचिन्ता-
निष्कासोत्कं भवति हृदयं मामकं दीनदीनम् ॥६॥

यद्येतावत् कदनविवशं मामयं विप्रयोगः
कर्त्तुं शक्तः पुनरिह कथा का मदीया प्रियायाः ।
पृथ्वीपालप्रमुख ! सुतरामप्रमेयाधिसिन्धौ
मग्ना मन्ये नियतमबला सा निरस्तावलंबा ॥ ७ ॥

सन्देशं मे प्रियसख ! समावाप्य गच्छस्व याव-
ज्जायागेहं तदपि सुभगं वङ्गिराज्यस्थमेव ।
कायापायावधि जिगमिषुं तां वियोगार्ति हेतोः
पीयूषार्द्रप्रणयवचनैस्तन्निवर्तां विधेहि ॥८॥

किं दौत्येनाऽतनुत भगवान् पाण्डुपुत्रार्थमेत-
द्रुद्रो बाणासुरनिलयने द्वास्थतवृत्तिं वितेढो ।
गृद्ध्रायाऽत्तुं निजतनुमदात् प्रार्थिने बुद्धदेवो
वर्तिष्यन्ते भूतकसदृशाश्चात्मभवत्तेष्वमर्त्याः ॥९॥

वंशे जातः श्रुतिमति भवान् राष्ट्रकूटाभिधाने
सर्वं त्यक्त्वा प्रणयजनतारक्षणे बद्धदीक्षे ।
किं नो कार्या नृवर ! नितरां स्नेहधीः स्नेहवत्सु
त्याज्यं तावत् किमिह वचनं मोहबद्धं मदीयम् ॥१०॥

कारुण्यं मां प्रति कलितवान् चेतसि त्वं नृपेन्द्र !
ज्यायान् भ्राता मयि तव सदा हृद्यवात्सल्यवर्षी ।
सर्वं त्वेतन् मनसि कलयन् साम्प्रतं दीर्घयात्रा-
गम्यं जायाभवनमपि मे वीततन्द्रं व्रजस्व ॥११॥

वक्ष्ये मार्गं सरलसुगमं कृत्स्नमादौ ततस्ते
यात्रायां यद्यदिह सकलं तत्र तत्रास्ति कार्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यङ्नानाविधनवपरिष्कारसंपन्नमयेऽस्मिन्
काले हेतुर्भवति न सखे ! क्वापि देहक्लमस्य ॥१२॥

गत्वा पूर्वं प्रमुदितमनाः पट्टियालेशमद्धा
नत्वा धात्रीरमणमुररीकृत्य यात्रानुवादम् ।
अद्यैव त्वं सह करुणया मामकं कार्यमेतत्
स्मृत्वा कामं हृदि दृढमितः प्रस्थितो भूर्महात्मन् ॥१३॥

नित्योल्लासिप्रसवि खलु "मृत्स्नेहयान"[1] प्रयाणं
तस्मान्नैजं पवनजवमारुह्य "मोट्टारपत्रं" ।
शीघ्रं गच्छन्नसि यदि यथाकालमायासहीनं
प्राप्तं स्यात् भूवर ! भुवि कुरुक्षेत्रतीर्थं प्रशस्तम् ॥१४॥

आविष्कृत्याप्रतिममहिमप्रोल्लसद्विश्वरूपं
श्रीमद्गीतामृतमनुपमं प्रोक्ष्य चाम्भोरुहाक्षः ।
तेने लोकोत्तरसुकृतवत् पावनं वर्त्तते त-
त्पुण्यक्षेत्रं भुवनविदितं सर्वथैवाभिवन्द्यम् ॥१५॥

युद्ध्यत् सेनाततिवलयितं सूतवृत्तिं चरन्तं
सिक्तोरस्कं शरशतनिपातोत्थरक्त प्रवाहैः ।
विद्युन्मालाकलितजलदश्यामलं कोमलांगं
अत्र ध्यायन् निहितमनसा शार्ङ्गपाणिं भजस्व ॥१६॥

यस्याभ्याशे तदनु मतिमन् ! विद्यते देशभागः
"पानिप्पत्ति"त्यखिलविदितस्तद्विलोको भवन्तम् !
नेष्यत्यद्धा तत्र बहुतराः पूर्विकास्तत्र हिन्दु-
स्थानत्राणप्रवणमतयो वीरसायुज्यमापुः ॥१७॥

तं भूभागं सपदि धृतसम्मोदमुत्सृज्य किञ्चि-
द्दूरं गच्छत्यथ भवति पन्थानमुल्लंध्य राजन् !
दिल्लीनाम्नीमिव दिविषदां दिव्यभोगान् नगर्याः
छायां द्रक्ष्यत्यवनितलगां राजधानीं दधानाम् ॥१८॥

[1] Motor Car

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यां पुर्यां तपनतनयाचारुनीलाश्महार-
श्रीरम्यायामतुलितयशोराजितायां शताब्दान् ।
क्षोणीचक्रं प्रतनभरतक्ष्माधवा शासयन्तो
निन्युः स्वाराणमदमविकलं संहरन्तो महान्तः ॥१९॥

भुञ्जन्नासीत् सुकृतनिलयो धर्मसूनुः पुरा तां
पश्चादन्ये क्रममनु नृपा हन्त ! भुञ्जन्त आसन् ।
भूयो भूपाः मुकिलकुलजाताः परे चांऽगलेयाः
भुञ्जन्ते संप्रति बहुमतास्तच्चरित्रं विचित्रम् ॥२०॥

तारामार्ग शिखरततिभिर्व्यालिखत् सौधजालं
राकाचन्द्रप्रतिभटमुखज्योतिराभोगरम्यम् ।
पश्यंस्तत्र प्रियसख ! भवान् जायया विप्रयुक्तं
मामाकांक्षाव्यधितहृदयं विस्मरन्मास्तु धीमन् ॥२१॥

श्रीमन्मल्लीकुसुममृदुलस्मेरमुग्धाननानां
वाङ्माधुर्यक्षपितगुडिकाखण्डमाध्वीमदानाम् ।
मल्लाक्षीणां प्रणयमधुरातिथ्यमादातुकामः
प्रेमोल्लासाकुलितहृदयस्तत्र मा गा विलम्बम् ॥२२॥

दृश्यं तत्तन्नयनसुभगं सर्वमालोक्य राजन्
द्दिल्याः नानाचरितरुचिरं सम्यगन्ते निवर्त्य ।
"मद्राख्य" श्रीपुरगमनसन्नद्धमाविश्य जातो-
न्निद्रामोदं "ज्वलनशकटं"* तस्थिवान् गच्छ शीघ्रम् ॥२३॥

सीमातीतद्रुतिगतिवशो यावदाप्नोषि विश्व-
ख्यातं वन्द्यं तदनु मथुरानामधेयं पुराग्रम् ।
कंसारातेः पदयुगरजःपावितं भक्तिनम्रो
याहि श्रीमान् ! यदिह जगतो धन्यधन्यं प्रणम्य ॥२४॥

नत्वं पश्चात् किमपि नयतो ते दृशोः गोचरं स्या-
दाग्राभिख्यं महितनगरं तत्र नित्यं चकास्ते ।
सौधोत्तंसं मणिविरचितं "ताज्महल्" शाजहान-
क्ष्माभृन्मौलेरिव सुरुचिरं स्वप्नमात्तस्वरूपम् ॥२५॥

* Train

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गीतिका"

(लेखक :—विष्णुदत्तशर्मा 'विशारदः'
श्रीपण्डितपुरम् रतनगढ़ः (चूरू)

विद्वन् भो विद्वन् !

आगम्यताम् गुरुवर संसारेऽस्मिन्नसारे,
अज्ञानावृता वयं पतिताः स्मः कासारे (१)

दुःखं भो दुःखं दुर्दैन्यमापतितम्,
रिपवो भारतवर्षस्य ऋद्धिं कर्षन्ति (२)

गर्ते निपतितं आर्यावर्त्तमस्माकम्,
आगम्यताम् संभूय राष्ट्रमुद्धरत (३)

शिष्याः भो शिष्याः ! निद्रामुत्सृजत,
भारतवसुधायै किञ्चित्कार्यं कुरुत (४)

कृष्णन् ! भो कृष्णन् ! वरिष्ठशिक्षकोऽसि त्वम्,
देशस्य सेवायां सौख्येन राजसे (५)

शिष्याश्च गुरूवः सर्वेऽद्य सम्भूय
राष्ट्रस्याध्यक्ष्ये कृष्णं वाञ्च्छामः (६)

शिष्याः ! भो गुरवः सर्वे एकीभूय,
राष्ट्रस्योन्नत्यै श्रीकृष्णं यच्छामः (७)

गुरुवर, भो गुरुवर !
विद्वन् भो विद्वन् !
उत्तिष्ठ रे उत्तिष्ठ ॥

शैतानसिंहः

(लेखकः—नरेन्द्रकुमारपण्ड्या, गनोड़ा)

संरक्षिता येन चुशूलभूमिः
सुरक्षितं भारतगौरवञ्च ॥
स्वतन्त्रतापुष्पितपादपोऽस्ति
शैतानसिंहो रणवीर एषः ॥१॥

अत्यल्पसंख्यैर्वरयुद्धवीरैः
स्वदेशरक्षाव्रतसिद्धहस्तैः ॥
रुद्धं महच्छत्रुदलस्य सैन्यं
शैतानसिंहस्य रणाधिपत्ये ॥२॥

प्रतापराठोड़कुलप्रतिष्ठा
संवर्धिता वीरवरेण तेन ॥
संस्थापितः पूर्वजकीर्तिकेतुः
शैतानसिंहेन हिमाद्रिशृङ्गे ॥३॥

शैतानसिंहे त्रिदिवंगतेऽपि
क्रिया न भूतस्य प्रयोजनीया ॥
हृद्या हृदिस्था शिवमूर्तिरेषा
प्रत्येकशूरे प्रतिबिम्बितास्ति ॥४॥

वीरप्रसूस्ते विदुलास्ति माता
पत्नी च हाडामहिषी द्वितीया ॥
त्वज्जन्मना भारतभूः सुधन्या
कृता त्वया वीरवरेण्य ! नूनम् ॥५॥

राजस्थानविभूतिस्त्वं
क्षत्रियान्वयभास्करः ॥
धन्योऽसि वीरशार्दूल !
धन्यास्ति तव वीरता ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमरं भामती नाम

(लेखकः—गणपतिशुक्लः, साहित्याचार्यः, एम० ए०)

मिथिलाप्रदेशवासी नवमशताब्दसमुत्पन्नः त्रिलोचनगुरोः शिष्यः श्रीवाचस्पतिमिश्रः महान् दार्शनिको बभूव। यस्यैकग्रन्थः सुतरां प्रसिद्धोऽस्ति। नाम वर्तते भामती टीका। इयं ब्रह्मसूत्रशाङ्कर-भाष्योपरि विरचिताऽस्ति। भामती नाम विषये महत्वपूर्णाऽस्ति रुचिकरा बोधप्रदा वार्ता—

सच्चरित्रोऽयम् विद्वद्वरेण्यः श्रीवाचस्पतिमिश्रः दर्शनग्रन्थपठनपाठनतत्परः सन् दुर्बोधशाङ्कर-भाष्यं सरलीकर्तुम् टीकालेखने महतीं दीर्घकालसाधनाम् अनन्यचित्तः सन् कृतवान्।

अस्मिन् लेखनकर्मणि स्वगृहं परित्यज्य नानानगरस्थविद्वद्भिः सह शास्त्रचर्चां कुर्वन् परिभ्रमणमपि विहितवान्। इत्थं बहुवर्षाणि व्यतीतानि। दाम्पत्यसुखमपि प्राप्तुं न शशाक' इदमपि श्रूयते यत् स विवाहितोऽपि कार्यव्यस्ततया स्वपत्नीम् पत्नीरूपेणाऽपि न ज्ञातवान्। दीर्घकाले व्यतीतेऽपि सन्ततिविहीना पत्नी विनम्रतया पतिमुवाच—

"स्वामिन्! पुत्रं विना सर्वं शून्यं जगत्। कः अस्माकं नाम कुलञ्च रक्षिष्यति चालयिष्यति च। सन्ततिलब्धये किमपि व्रतं तपश्च करणीयम्। आयुरपि सम्प्रति व्यतीतमेव। भवन्तस्तु सर्वं जानन्त्येव, कमधिकं ब्रवीमि"।

पतिः श्रीमिश्रः समबोधयत् धीरतया—'प्रिये! त्वत्कथनं मन्ये, पुत्राभावात् त्वं दुःखिताऽसि। किन्तु विचारय सूक्ष्मबुद्ध्या यत् पुत्र एव लोके न वस्तुतः कुलवर्धकः। स नीचः सन् कुलनाशकोऽपि संभवेत्। विदुषां कृते कुलरक्षकं लोकोत्तरं श्रेष्ठं कर्म एव विद्यते येन सहस्रवर्षपर्यन्तमपि स मनुष्यः जनैः स्मर्यते स्तूयते च। किं पुत्रः इत्थं कुलसंरक्षणं कर्तुं पारयेत्? उत्तमाः आत्मनः ख्याता भवन्ति।

भामती प्रत्यवदत्—'किन्तु आवयो र्नाम कश्चालयिष्यति?,

वाचस्पतिः प्राह—"प्रिये! शृणु, तव त्यागतपोबलसहयोगेनैव टीकालेखने समर्थोऽभवम्। अनेन बहूनामुपकारः स्यात्। अतो मम नाम तु चलेदेव किन्तु अस्याः टीकायाः नाम, त्वन्नाम "भामती" इत्युपरि एव स्थापयामि"।

भामती प्रसन्ना जाता। कालान्तरे दिवङ्गतावपि एतौ स्वत्यागतपोबलार्जितश्रेष्ठरचनया भामतीटीकया अद्यापि जीवितावेव। भामती नाम तु अमरमेव जातम्। सुष्ठूक्तम्—

रचनात्मककार्याणि, विदधत्यमरं नरम्।
दिवंगतेऽपि हि नरे, तानि जीवन्ति निश्चितम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दोष वायरिंग के लिये,...

ग्लास्टर केवल आधुनिक प्रणाली से और ब्रिटिश इनसुलेटेड कैलेण्डर्स केबल्स लिमिटेड के तकनीकी सहयोग के साथ ब्रिटिश और भारतीय स्टैंडर्ड स्पेसीफिकेशन्स के अनुसार बनते हैं। भारत सरकार के डाइरेक्टर आफ इंस्पेक्शन, डी० जी० एस० ऐण्ड डी० के द्वारा इनकी जाँच होकर सर्टिफिकेट मिला है। ग्लास्टर केबल की हर रील पर आई० एस० आई० सर्टिफिकेशन मार्क नं ४३४ की मुहर लगी है जो उत्कर्ष के हिसाब से आपकी गारंटी है।



Alyars.FG155

फोर्ट ग्लास्टर इण्डस्ट्रीज लि०
१४, नेताजी सुभाष रोड, कलकत्ता-१
शाखायें : • एम० ७१, कनाट सर्कस, नई दिल्ली-१
• बुद्धमार्ग, पटना-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगामिनि १९६६ ईशवीयवत्सरे कुम्भमेलकस्यावसरे सुविशालस्य

हिन्दूसम्मेलनस्याऽऽयोजनम्

विगतागस्तमासस्य ३० दिने स्वामिचिन्मयानन्दस्य सांदीपनीनाम्न्यामकादम्यां समायोजित एकस्मिन्नधिवेशने निर्णय एष जातो यद् हिन्दूसमाजस्य सर्वेषामेव सम्प्रदायानां भक्तिमार्गानुयायिनाञ्चैकं सम्मेलनं विश्वहिन्दूपरिषत्' इति नाम्नाऽऽयोजितं भवेदिति।

अधिवेशनस्य चास्य कृते गतनवमासान् यावद् विभिन्नानां सम्प्रदायानां तथा मतानां (पन्थ) प्रमुखैर्नेतृभिस्तर्कशास्त्रिभिर्विचारकैश्च सह साक्षात्कारे विचार-विमर्शे च सम्पन्नेऽनन्तरमगस्तस्य २९,३० दिनयोरधिवेशनमाकारितमभूत्, यत्र षष्टिसंख्यातोऽप्यधिका निमन्त्रिताः प्रतिनिधयः समुपस्थिताः समासन्। तत्र मास्टर-श्रीतारासिंहः, अकालीदलस्याध्यक्षो ज्ञानिभूपेन्द्रसिंहः, डॉ० के० एम० मुंशी, संन्ततुकडोजीमहाराजः, श्री मा० स० गोलवलकरमहाभागः, वॅरिष्टरः एच्. जी. अडवानी, श्रीलालचन्द्र-हीराचन्द्रः, श्रीमाणिकचन्द्रशाहः–एतेषां महानुभावानामुपस्थितिस्तत्र विशेषेणोल्लेखनीया विद्यते। एतदतिरिक्तञ्च नैरोबीतः त्रिनिदादतश्चापि त्रयो हिन्दूप्रतिनिधयः समुपस्थिताः समभूवन्।

अधिवेशनस्य प्रारम्भश्च सुप्रसिद्धसंगीतकारेण श्रीसुधीरफडकेमहोदयेन प्रतिज्ञागीतेनाक्रियत। श्रीमान् एस. एस. आपटेमहोदयो यो हि कल्पनाया एतस्याः कृते मूर्तं स्वरूपं दातुं प्रयत्नशीलोऽवर्तत स स्वस्य कार्यकलापस्य परिचयं कारयन् प्राप्ताः शुभकामनास्तथा सहयोगस्याश्वासनानि चापि पठित्वा श्रावितवान्। तथा श्रीशङ्कराचार्य–असमसत्ताधिकारि-श्रीप्रभुदत्तब्रह्मचारि-स्वामिनारायण-पन्थ-योगिमहाराज-लिङ्गायतगुप्तजैनमुनि–सुशीलकुमार-कुशकबकुल-मैसूरनरेश-विकोमनरेश-डॉ० सी० पी० रामस्वामि-श्री न० वि० गाड़गिल-श्रीप्रकाशवीरशास्त्रि-डॉ० श्री सुनीतिकुमारचटर्जी-श्रीवटुकनाथ–भट्टाचार्य--श्री नित्यनारायणबनर्जी – श्रीरामराव–देशमुख-श्रीहनुमत्प्रसादपोद्दार-श्री के० संथानम-मेरठस्थ-श्रीसीताराम-श्री एस. आर. दास-बाबूश्रीजगजीवनराम--श्रीपाददामोदर--सातवलेकर -- महन्त-दिग्विजयनाथ-श्रीविश्वबन्धु-श्री एस. पी. जैन-श्रीजुगलकिशोरबिडलाप्रभृतिभ्यः सन्देशाः प्राप्ता आसन्।

स्वामिचिन्मयानन्दस्याध्यक्षतायां सम्पन्नेऽत्राधिवेशने परिषद उद्देश्येषु, नीतौ तथा कार्यक्रमेषु च विविधाः चर्चाः प्राचलन्. तथा चैकस्याः सञ्चालनसमित्याः स्थापना चाप्यभूत्।

'हिन्दू' शब्दस्य व्याख्या

विभिन्नेषु प्रस्तावेषु च विचारविनिमये जातेऽनन्तरमधिवेशनेऽत्र 'विश्वहिन्दूपरिषत्' इति नाम स्वीकृतमभूत्। 'हिन्दू' शब्दस्य व्याख्या चेत्थमक्रियत यत्- 'भारतस्य आध्यात्मिक-नैतिक-शाश्वतमूल्यं प्रति निष्ठा तथा समादरो यस्मिन् वर्तते, स 'हिन्दू' पदवाच्यो विद्यते इति।

डॉ० मुंशीमहोदयश्च परिषद उद्देश्यानि च निम्नलिखितानुसारेण प्राकटयत्- १-- सर्वतः प्रथममित्थमुपक्रमो विधेयो येन हिन्दूसमाजः सुसंघटितो दृढश्च भवेत्। २- वर्तमानेऽस्मिन् युगे च हिन्दूसमाजः सोऽयं सम्यगाध्यात्मिक-नैतिकमूल्यान्यभि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षेत्, तथैतेषां प्रचारप्रसारौ च कुर्यात् । ३- देशवासिभिः सर्वैरपि हिन्दूभिः सह सुदृढः सम्पर्कः संस्थाप्यः, तथा तेषां कृते च साहाय्यं प्रदेयमिति ।

'विश्वहिन्दूपरिषत्' च सेयमुपर्युक्तां व्याख्यामेतां यः कोऽपि सर्वात्मना स्वीकरिष्यति, तस्य सर्वस्यापि जनस्य कृतेऽत्र स्थानं दास्यति । किञ्चैष नियमोऽपि पारितोऽभूद् यद् राजनैतिकदलस्य कोऽपि पदाधिकारी परिषदोऽस्याः कार्यकारिण्याः सदस्यतां नैव लप्स्यते—इति ।

संस्थायाश्चास्या एका परामर्शदात्री समितिरपि स्थास्यति, यस्यां श्रीशङ्कराचार्याः, सर्वेषां मतानुयायिनां सम्प्रदायानाञ्चाचार्या गुरवः सन्तपुरुषाः, विचारकाः तत्त्ववेत्तारश्च भविष्यन्ति । अस्याः समितेर्मार्गदर्शने चाध्यक्षोपाध्यक्ष-महामन्त्रिकोषाध्यक्षादयः परिषदः कार्यं सञ्चालयिष्यन्ति । अतश्चात्र सम्प्रति स्वामिचिन्मयानन्दमहाभागो मनोनीतकार्यवाहकाध्यक्षस्य रूपेण स्वीकृतः । श्री एस. एस. आपटेमहोदयो महामन्त्री, श्रीसदाजीवितलालः (मुम्बापुरी), श्री एम. एन. घटाटेमहोदयश्च (नागपुरम्) कोषाध्यक्षरूपेण निर्वाचितौ स्तः ।

प्रयागे सम्मेलनम्

सम्मेलनेन सञ्चालनसमित्यै सर्वविधानामौपचारिकतानां पूर्तिमाचरता संविधाननिर्माणस्य कार्यमर्पितम् । किञ्चास्याः कृते १९६६ तमे ईशवीयाब्दे भाविनो महाकुम्भमेलकात् पूर्वमेव प्रयागे सार्वजनिकाधिवेशनस्यायोजनस्य दृष्ट्यापि सर्वेऽप्यधिकाराः प्रादीयन्त । पवित्रतमे चास्मिन्नवसरे भारतस्य तथा वैदेशिकानां हिन्दूनामेकस्य सम्मेलनस्यायोजनस्य वर्तते कल्पना, यत्र च विभिन्नधर्मावलम्बिनां विदुषां परिसंवादास्तथा चर्चाश्च सम्पत्स्यन्ते । वैदिककालात्समारभ्य यावत् स्वतन्त्रताप्राप्तिसमयं सञ्जातं हिन्दूसंस्कृतेर्विकासं तथा गौरवमाख्यातुं शक्तैका प्रदर्शिन्यपि समायोजिता भविष्यति । विभिन्नतायामैक्यस्य साधका अन्ये कार्यक्रमाश्चापि विधास्यन्ते ।

अपि च विश्वस्य हिन्दूसमाजस्य कृते शीघ्रमेव संयोजकानां हस्ताक्षरैरङ्कितमावेदनमपि विधास्यते, यत्र महतः कार्यस्यास्य पूर्त्यर्थं तनुमनोधनैः साहाय्यं दातुमाह्वानं भविष्यति । अन्ते च रामटेकस्य १५१ वर्षवयस्को योगिमहाराजः श्रीसीतारामदासः स्वस्य प्रेरणाप्रदस्य भाषणस्यान्ते परिषदमाशिषा समायोजितवान् । किञ्चाकादम्यामत्र दिनद्वयं यावत् सर्वविधामपि व्यवस्थां स्वामी श्रीचिन्मयानन्दमहाराज एव कृतवान् । सर्वैरप्यवधातव्यं यत् परिषदोऽस्या आगामि अधिवेशनं मासत्रयानन्तरम् अमृतसरनगरे सम्पत्स्यते—

इत्यनु० दीनानाथत्रिवेदी 'मधुपः' ।

★★
★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"वीर-शिशु-स्वामिविवेकानन्दः"

लेखकः— स्वामी गङ्गानन्दःश्रीकृष्णनिवासाश्रमः, कनखलः

भारतवर्षमेकोऽद्वितीयो विशालदेशोऽस्ति। तत्र बहवश्च शाखा विद्यन्ते। वर्णः, धर्मः, आश्रमः, जातिः, भाषा, वेशोभूषा, आहारो विहारादयः। किन्तु मूल-तत्त्वमेकमेवास्ति न द्वितीयमिति। इयञ्च रत्नगर्भा वसुन्धरा आत्मजानां सम्यक्रूपेण परिपालनाय अनेकान् मार्गान् प्रदर्शितवती। किन्तु तेषां मध्ये आध्यात्मिकः राजनैतिकश्च मार्गो महत्त्वशाली दृश्यते। उक्तायां व्यवस्थायां यदि कदाऽपि परि-वर्त्तनं विच्छिन्नं भवति तदा भगवता स्वयमेव स्वप्रोक्तवचनस्य परिपालनं चरितार्थं करोतीति निःसन्देहः।

अस्तु, भारतीयेतिहासस्य सङ्कटमयसंक्रान्ति-काले श्रेष्ठतम-नृजीवानामधः पतनस्य चरमावस्था-काले यदा सामाजिकश्रेण्यां सामाजिकपरिपाट्याञ्च उच्च-नीच-श्रेष्ठ-पतितादिभेदाः बलवत्तरं स्थानं अधितिष्ठन्ति, राजकीयदण्डविधानं यत्र दुर्बलान् अन्यायपूर्वकं व्यर्थमेव प्रशास्ति, अत्याचारमय-पैशाचिकदुर्णीतयो विविधरूपमादाय अनधिकार-मार्गं प्रतिगन्तुमिच्छन्ति, यदा च पुरातनवर्णव्यव-स्थायाः स्वेच्छाचाराद् विभिन्नता विच्छिन्नता च भवति, अवश्यं हि विनाश एव स्यात् तदा 'उत्ति-ष्ठत जाग्रत प्राप्य वरान्निबोधतेत्यादि" निनादस्य पुनरुद्घोषणार्थं शस्यश्यामला तुषारमण्डितकिरीटिनी धर्मार्थकाममोक्षदा वीरप्रसविनी भारतवसुन्धरा च भगवती भुवनेश्वरी वीरशिशून् स्वामिविवेकानन्द-सदृशान् महापुरुषान् जनयति।

वङ्गदेशान्तर्गत-कलिकाताबृहन्नगरस्य दत्तोपनगरे सन् १८६३तमे ख्रिष्टाब्दे मकरसंक्रान्तौ ब्राह्ममुहूर्त्ते च युगाचार्य-स्वामिविवेकानन्दमहोदयस्य प्रादुर्भावो-ऽभूत्। अज्ञानतिमिरच्छन्नानां भारतीयजनानां हृदि पुनः प्रकाशमयोज्ज्वलज्ञानजननाय सवितेव भारतभुवमुद्भावयांचकार। स्वामी महोदयः सन्या-सात् प्राक् नरेन्द्रनाम्ना विख्यात आसीत्। नराणा-मिन्द्रः पालकः मार्गप्रदर्शकः स आसीत्। पश्चाद् विवेकानन्द अर्थात् विवेकश्चासौ आनन्दः परब्रह्म-स्वरूप एव उक्तञ्च भगवता स्वयमेव यत् "प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" अत एव स्वामी विवेकानन्दयतिः साक्षात्परमेश्वर एव आसीत्-इत्यस्मिन् विषये न काचन विप्रतिपत्तिः।

तस्य उपदेशान् यदि वयं भारतीया अनुगच्छेम-तर्हि चीनशक्तिस्तु का? अस्मिन् विश्वे काऽपि शक्तिर्नास्ति या धर्मप्रियभारतवासिनां, शान्त्या-धारभूत-पञ्चशीलानुगमनानां आध्यात्मिकाधि-भौतिकादिमार्गे कमपि बलवत्तरं प्रतिबन्धं प्रदास्य-तीति। वीरशिशोर्विवेकानन्दस्य अयमुद्घोष आसीत् वर्त्तमाने तथा भविष्यत्यपि काले लाभप्रदः सिध्यति। यद्यपि तेन वीरवरेण भूमण्डलस्य समग्रराष्ट्राणि प्रति प्रेम संरक्ष्यते स्म तथापि भारतं प्रति सोऽत्य-धिक उदारचित्त आसीत्। अतो वीरवरस्य तस्य श्रीविवेकानन्दयतेर्वार्ण्यां भारतीयैरवश्यं श्रद्धा सर्व-भावेन विधेया। यतो वयं सर्वे वीरवसुन्धरायाः सन्ततिभूताः स्मः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारत-गीतम्

भारतं कुरु विकसितम्

लेखकः-हरगोविन्दपाराशरः

जागृतं कुरु उद्यतं कुरु,
निर्भयं कुरु अग्रगम् ॥
भारतं कुरु विकसितम् ॥
पौरुषं कुरु बलकरं कुरु,
सशस्त्रं कुरु समरिणम् ॥
भारतं कुरु विकसितम् ।

बन्धनं छित्वा सकल जन-
एकतां कुरु सन्ततम् ॥
भारतं कुरु विकसितम् ।
वीरजं कुरु शत्रुहीनम्
उन्नतं कुरु जययुतम् ॥
भारतं कुरु विकसितम् ।

भारताभिमानिनो नागरिकान् प्रति इयं विवेकस्य वीरवाणी उद्घोषिताऽस्ति यत्, "अयि धर्मप्रिया नागरिकाः ! अतीतस्य गौरवं मा विस्मरन्तु अतीतमेवास्मान् भविष्यत्प्रगतेः मार्गमादर्शयति। अतः दीर्घसूत्रितां विहाय उत्तिष्ठ ! उत्तिष्ठ !! अपि च रजनी दीर्घा नावशिष्यते घनतमस्तिमिरं प्रशान्तमभूत्, आरक्त-प्रवीण-नव-रविःसहस्र-किरण-निकरेण सह विकीर्णोऽभूत् । मा भैष्ट ! मा भैष्ट !! भारतजनन्या वीरशिशवः पुनर्न शयीरन् । समाजस्य जागरणाय जागरिता भवेयुः स्वतन्त्रतासंग्रामे विजयाय च । अतीतं विश्वसिहि अन्यथा न स्वतन्त्रैर्भाव्यम् । भारतशब्दस्यार्थं स्वस्मिन् चरितार्थयेयुश्चेद् विश्वस्य न कापि शक्तिर्युष्मान् नमयितुं शक्नोति" ।

अतः स्वामिमहोदयस्यास्मिन्वर्षे जन्मशताब्द्या उपलक्षे वयं सर्वे भारतीयाः तस्य परमपवित्रं तेजस्विनमात्मानमाराधयामः । यस्मात् एतस्मिन् आतङ्कितराष्ट्रे चीनभारतयोः सीमाविवादविषयके युद्धक्षेत्रे धर्मप्रियाः पञ्चशीलानुगमनशीला भारतीया एव विजयिनो भवेयुः । अवश्यमेव । कथं न ते विजयिनः स्युः ? शान्तिप्रियभारत-राष्ट्राय अन्यानि चानेकानि शान्तिप्रियाणि राष्ट्राणि धनं-बलं-महास्त्रं प्रदास्यन्ति, भारतमेव समर्थयन्ति च । विस्तारवादि-चीनदेशस्य भारतोपरि पैशाचिकदुर्णीतिपूर्ण-धर्मविमुखाक्रमणविषये निन्दाञ्च करिष्यन्ति । सम्प्रति भारतवर्षमतीव शक्तिशालि वर्त्तते एवं-चास्मिन् विश्वे कापि शक्तिर्नास्ति या धर्मप्रियभारतवर्षं नमयितुं शक्नुयात् । अतो भारतस्यैव विजयोऽवश्यं भविष्यतीति ध्रुवो निश्चयः ।

अतः परमहंसप्रवर-श्रीरामकृष्णमहोदयप्रदत्त पीयूषात्मकं ज्ञानमापीयाधिगतयथार्थज्ञानेन स्वामि-विवेकानन्देन स्वात्मबलमवलम्ब्य भारतीयान् प्रति यादृशी ह्याचारशैली समुपदिष्टा तामेवाचारशैलीमवलम्ब्य भारतीयैः सर्वलोकातिशायि-शक्तिमद्भिर्भवितव्यम् । न मनागपि तस्योपदेशो विस्मरणीयः । इति शम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरु-दक्षिणा

ले० श्री भगवान् शरणभारद्वाजः 'प्रदीपः' एम० ए० (संस्कृत) प्र० व० ।

शीतलसंस्पर्शसुखावहः प्रभातसमीरणः स्वारुणिमया दिवो दुहितरं पराजित्य तां प्रति उपहसतामिव, मधुमुदित–मधुकर–निकरोपगुञ्जित-विरुदानामिव, विविधखगकुलकलरवाभिनन्दितसौन्दर्याणामिव, लतिका-गुल्माङ्कराजितानां प्रसूनानां पृष्ठदेशे सस्नेह-कराधानेन मदिररूपश्लाघां बहुशश्चकार । धनुर्ज्याटङ्कारैर्खड्गानाञ्च झङ्कारैर्बहुविधानामन्यानाञ्च ऋजुविषमायुधानां निर्घोषैराचार्य्यद्रोणस्य प्रतिष्ठानं सौदामन्याः लावण्यदीप्त्या गंभीरघोषैश्च समायुक्तानां घनानामिव कर्णनेत्रयोरुत्सव इवाभवत् । रुद्राक्षमालालङ्कृतकण्ठो भस्मरागविभूषितकपिशजटाकलापः धनुर्निषङ्गोपशोभितवृषभस्कन्धः त्रिपुण्ड्राङ्कितभव्योन्नतललाटः सरोरुहपत्रायतलोचनः कम्बुग्रीवः यज्ञोपवीतव्याजेन मनसि लोकत्रयस्य कृतसाक्षात्कारः द्रोणाचार्य्यः पवित्रकुशासनालङ्कृतोन्नतशिलाखण्डे विरराज ।

देशदेशान्तरेभ्य आगता असंख्येयाः राजकुमाराः प्रतिष्ठानचत्वरे शस्त्रास्त्रसंचालननिग्रहयोरभ्यासंचक्रुः । अम्लाना मुखश्रीः आचार्यस्यान्तः करणस्य मुदितायाः सुस्पष्टं प्रत्ययं प्रज्ञापयन्ती शिष्याणां दाक्षिण्यस्यासन्दिग्धत्वं द्योतते स्म ।

"अत्रभवतामाचार्य्यचरणानां दर्शनस्योद्दामाभिलाषेणालोडितहृदयाम्बुधिरेकः जिज्ञासुराश्रमं प्रवेष्टुं सानुकम्पानुमतिं याचते ।" मेघमन्द्रध्वनिना सम्पूर्णं प्रतिष्ठानमेव जुगुञ्ज अकस्मात् रुद्धहस्तास्सर्वे शिक्षार्थिनः द्वारदेशं प्रति समाकृष्टाः बभूवुः ।

"पुनीतस्यास्य विद्यामन्दिरस्य हृदयं जिज्ञासून् सर्वदैव निमन्त्रयति, भद्र !" कृष्णकायोऽश्मतनुरेकस्तरुणः प्रवेशञ्चकार । सत्वरमेवाचार्यपदपरागं स्वशिरसि निवेश्य सुतरामानन्दितो बभूव । साष्टाङ्गप्रणामपुरस्सरं [illegible]सरलविनतमुद्रायामसौ युवा आचार्यसम्मुखमुदतिष्ठत् । आशीर्वचोभिराशंसां कुर्वता गुरुणा स्वपार्श्ववर्तिशिलातलमुपवेष्टुं सः इङ्गितः । स तस्य परिचयमागमनोद्देश्यञ्च पप्रच्छ । आत्मपरिचयानन्तरमेकलव्येनोक्तम् "भवतां पादपद्मानां सेवनं कुर्वन्नहमत्र धनुर्विद्यां ज्ञातुमागतोऽस्मि" आचार्य्येण श्रुत्वा चिन्तितञ्च मनसि "यत्र धनुर्धरा अर्जुनदुर्योधनप्रभृतयः कुलीनाः राजकुमाराः, तत्र किरातस्यैकस्य प्रविष्टिः ? किं नायं क्षत्रियत्वापमानः ? प्रतिष्ठाविपरीतमेतद् ....असम्भवम्.......... कुपात्रे सन्निहिता विद्या लोकानां नाशकारिणी !"

"अनुगृह्णातु मां देव !"

"गुरुकुलमर्यादानुसारं तव प्रवेशोऽत्रासंभवः । कमप्यन्यमन्वेषय ।" आगन्तुकं निराशयता करगृहीतश्मश्रुणा आचार्य्येणोक्तम् ।

दिवसा व्यतीताः । मासा गताः । एवं मन्दं-मन्दमेकं वर्षं गतम् । एकदा शिष्यमण्डलैरनुगत आचार्य्यद्रोणोऽटव्यां भ्रमणार्थं जगाम । स्मितमुखानि पुष्पाणि, ललितालापरताः पिकाः, भूजनन्या उपायनीभूता नेत्रनिर्वाणदायिनी हरितता ।

'गुरुदेव' ! प्रकृत्या ललितरंगानुरोधरमणीयं दृश्य काव्यं पश्यतो आचार्यस्य चेतः समाकृष्य, "आपूर्णमस्य शुनो मुखं बाणैर्किन्तु लवमात्रमपि नायं कष्टमनुभवति । कस्येदं हस्तकौशलमिति" ईर्ष्याश्चर्यमिश्रस्वरेणार्जुनः पप्रच्छ ।

विस्मयविमुग्ध आचार्यः कुशलसाधकान्वेषणाय पुरश्चचाल । अनतिदूरे सघनपादपावलिमध्ये मृण्मूर्त्याः समक्षं समावर्तनसंस्कारोपलक्ष्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वहस्तकौशलस्यान्तिमप्रदर्शने संलग्नस्तरुण एकस्तेन दृष्टः। पदध्वनिना आकृष्टः सः सपदि एवागत्य आचार्यचरणयोर्लुण्ठितोऽभूत्। विस्मयविस्फारितलोचनः गुरुस्तमुत्थाप्य 'एकलव्य' इति प्रोवाच।

"तीक्ष्णबाणाक्रान्तमुखस्य शुनो निर्वैकल्यं किं तवैव हस्तदाक्षिण्यस्य परिचायकम् ?"

"आम् श्रीमन् !"

'कस्तव गुरुः ?"

'भवानेव !'

"किमहम् ? कथम् ?"

एकलव्येन मूर्तिरिङ्गिता। "अद्याहं दीक्षान्तदिवसे गुरुदर्शनं लब्ध्वा कृतार्थोऽस्मि।"

"दीक्षान्ते शिष्येण गुरवे दक्षिणा निवेदितव्येति शास्त्राज्ञा।" कौलीन्यं नास्तिपात्रत्वलक्षणमपि तु ग्राह्यग्रहणं कर्तुमुद्यमाकांक्षैवेति विचारदोलाधिरूढमना द्रोण उवाच।

"आदेशेन मां कृतार्थयतु गुरुदेव !"

"दक्षिणाकराङ्गुष्ठं मह्यमर्पय" द्रोण आदिदेश।

स्मिताननेनैकलव्येन तीक्ष्णासिधारया कर्तितः निमिषमात्रेऽङ्गुष्ठः गुरुचरणयोरर्पितः। गगनात् पुष्पवृष्टिः पपात। वृन्दारकवृन्दवन्दितपादारविन्दा भागवती शारदा आविर्भूय तस्मै भगवद्भक्तिपरायणस्य समृद्धजीवनस्य वरं दत्तवती।

आज़ादी खतरे में है।

पूरी ताकत लगा कर इसकी रक्षा कीजिए।

—जवाहरलाल नेहरू

देश की रक्षा के लिए केवल सैनिक शक्ति ही काफी नहीं। उसके लिए आर्थिक शक्ति भी उतनी ही जरूरी है। जो खेती, उद्योग और शिल्प को तेजी से बढ़ाने से ही मिलेगी। आपका काम बड़े महत्व का है। अनुशासन और लगन से काम करके रक्षा व्यवस्था को दृढ़ बनाइए।

DA 64/F9

देश की रक्षा के लिए योजनाबद्ध विकास जरूरी है

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयपुरस्थ-रवीन्द्ररङ्गमञ्चे विगतदिने (१६-१०-६४) भारतप्रसिद्धस्य परमश्रद्धेयस्य म० म० पं० गिरिधरशर्मचतुर्वेद महाभागस्य समभिनन्दनावसरे सञ्जातानां भाषणानां सारः

डा० श्रीसम्पूर्णानन्दराज्यपालमहानुभावः



श्रीराज्यपालमहाभागः स्वकीये भाषणे समभाषत यद् योऽपि विदुषां समादरः क्रियते, तत्र ष विचारः कदापि विधेयो यदस्माभिः विदुषां कश्चनोपकारो विधीयते । विदुषां सत्कारः कर्तव्यः' इति तु वर्ततेऽस्माकं कर्तव्यम् । परन्तु सहैव एतदपि विचारणीयं भविष्यति यद् यया विद्ययाऽस्माकं समाजो लाभान्वितो भवति, सा विद्या वस्तुतो विद्यते सफला, परं यया नो तथा, तदा सा तु निष्फलैवेति ।

अत्र विषये राज्यपालमहाभागेनाग्रेऽनन्तचतुर्दशीव्रतकथामधिकृत्य भणितं यद् आसीदेको महान् आम्रवृक्षो बहुभिः फलैः समाकीर्णः, परन्तस्य तानि फलानि सर्वाण्यपि कीटानुविद्धान्यभूवन् । अतो न कोऽपि प्राणी तस्य वृक्षस्यैकमपि फलमुपभोक्तुं शशाक । स वृक्षः पूर्वस्मिन् जन्मनि महापण्डितः समवर्तत परं तदानीं स स्वविद्यां न कस्मैचिदपि सुयोग्याय विद्यार्थिने प्रायच्छत् । एतत्कर्मवशादेव स तादृक्षो वृक्षः समजनि । अतः कथनस्यायमभिप्रायो विद्यते यत् परमार्थतो विद्वान् स एवास्ति, यस्य विद्ययान्येऽपि शतशो जना लाभान्विताः भवेयुः । धनं हि व्ययतो न्यूनतां याति, परं न तथा विद्या । तथापि दुर्भाग्यमस्ति यद् विद्वांसः प्रायो ऽपि न ते स्वविद्यानिधिं समुचितमात्रायां दातुमिच्छन्ति ।

अपि चाद्य येषां सम्प्रत्यभिनन्दनं क्रियते, वस्तुतो वर्तन्ते महाविद्वांस एते । तथा चाग्रे द्राक्तरमहोदयेन प्रतिपादितं यदधिकारिणः कृते विद्याया दानमवश्यं कर्तव्यमेव विदुषा । तथ्यो विद्वान् सुयोग्यस्य शिष्यस्य अन्वेषणे भवति तत्परः । सोऽयं महामहोपाध्यायमहाभागो ऽपि विद्यत एतादृक्ष एव विद्वान्, यो हि पूर्वं स्वयं विद्यां समधीत्य पुनः संस्कृतस्याभ्युन्नतये सफलं प्रयत्नं कृतवान् । श्रीचतुर्वेदिमहाभागस्यास्य शरीरस्य सम्बन्धो यद्यपि जयपुरेण तथा राजस्थानेन सहाऽस्थात्, तथाऽप्यद्यत्वे तु मम नगरं काशीमयमलङ्कुरुते ।

अपि च महाभागस्यास्य भौगोलिकभूम्यैव सह न केवलं वर्तते सम्बन्धः, अपित्वखिले विशालेऽपि संसारेऽस्मिन् यत्रापि सन्ति संस्कृतज्ञा जनास्तत्र सर्वैरपि विद्वद्भिः ससम्मानं पण्डितवर्य्यो ऽयं समादृतो भविष्यति । तथा च स्वोपार्जितायाः विद्याया वितरणे सर्वदा विद्यते ऽयं महाभागस्तत्परः । वस्तुतो पण्डितानां विद्यते कर्तव्यमिदमेव यत्ते तथा प्रयतेरन् यथा सुयोग्याः शिष्यास्तद्विद्यानिधिं सुखेन लब्धुं शक्नुयुरिति । संस्कृतस्य विद्वांसो हि प्रायो ऽध्ययनाध्यापनविषयकमेवानुतिष्ठन्ति कार्यम्, परन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवादृक्षाणां प्राचीनपरम्पराप्राप्तसकलशास्त्रतत्त्वानां पण्डितानां सम्प्रति वैरल्यमुपजायमानमनुभूयतेतराम् । काश्यामपि सम्प्रति तथा न भवति । काश्यां हि पूर्वं श्रीभुवनेश्वरशास्त्रिप्रभृतयः येन प्रकारेण घोरं विधाय परिश्रमं समधीत्य च शास्त्राणि विद्वांसः समभूवन्-इत्यस्ति वृत्तान्तोऽयमत्याश्चर्यकरः । प्राचीनसमये हि काश्यां हट्टाधिपतयः (दूकानदार)-रात्रौ येऽपिच्छात्राः प्रहरिणः कर्म सम्पादयन्ति स्म, तेभ्यः पणचतुष्टयं प्रयच्छन्ति स्म, तत्र पणद्वयं तैलस्य कृते तथा पणद्वयं च चणकार्थमिति । एवमेव श्री-विनोवाभावेमहानुभावो ऽपि बहूनि वर्षाणि यावत् काश्यामधीतवान् । तदानीं सो ऽयमपि तत्राऽध्ययन-काले पणद्वयप्राप्तचणकादिभक्षणेनैव स्वकार्यं परिचालयति स्म । तदानीं प्रायस्तत्र सर्वेषामेव दशा ऽवर्तत । तदनीं सप्तहोरासमयं यावत् प्रचलति स्माध्ययनकार्यम् ।

अपि च देशस्यास्य स्वातन्त्र्यप्राप्तेरनन्तरमद्य शिक्षकस्तावद् अष्टशतं सहस्रं वा रूप्यकाणि मासिक-वैतनिकरूपेण लभते, परं तदा महामहोपाध्यायो-पाधियोग्यानपि शिष्यान् पाठयन् पाठकैः केवलं ५०) पञ्चाशद्रूप्यकात्मकमेव मासिकंद्र व्यमाप्नोति स्म । तथा च तदानीन्तना महान्तः पण्डिता स्वगृहेषु पाठयन्ति स्म शिष्यान् । सहैव च प्रातः कालात्समारभ्य रात्रिं यावत् तेषां सोऽयमध्यापनस्य क्रमः प्रचलति स्म । एवमेव तदा विनेयाश्छात्राश्चापि न्याय-व्याकरण-वेदान्त—साहित्यादि—विविधशास्त्रपारङ्गतानां पण्डितानां सान्निध्यतः पृथक्-पृथक् विभिन्नानि शास्त्राणि समधीयते स्म ।

डा० 'श्री वेनिस' महाभागः संस्कृतस्य महान् विद्वान् अवर्तत । स च पण्डितश्रीदुर्गादत्तशास्त्रिणां शिष्यस्तथा काशीराजकीय-संस्कृतमहाविद्यालयस्या ऽऽसीत् प्रधानाचार्यः । तैरप्येकदा प्रोक्तमासीद्यत् केवलमस्मत्सकाशत एवाध्ययनात् संस्कृतस्य पुष्कलं ज्ञानं लब्धुं न शक्यते ? परं प्राचीनपण्डितेभ्य स्तथा गुरुमुखाच्च समधीतैव विद्या भवति खलु फलवतीति-वार्तेयं वस्तुतो विद्यते तथ्या ।

अपि चाग्रे प्रोक्तं श्रीराज्यपालमहोदयेन यद् वस्तुतः प्राचीनाः पण्डिता एव संस्कृतस्य गौरव-मभिरक्षितुं सन्ति प्रभवः । अद्यतनीना विद्यार्थिनो न भवन्ति परिश्रमशालिनो गुरून् प्रति श्रद्धाल-वश्च । संस्कृतं न वर्तते मृतभाषा परं तदध्येतार एव तत्र मृतभाषात्वमानयन्ति ।

एवं प्रकारेण त्वद्यास्माकं भयं भवति यत् संस्कृतस्यावस्था नावनता भवेत् कदाचित् ? । अतो यदि सर्वैरपि संस्कृतसेविभिः श्रीचतुर्वेदिमहाभागा-नामेषामनुसरणं विधीयेत, तदैव संस्कृतस्य संरक्षणं भविष्यति । तथा चैतान् प्रति समादरप्रकाशनस्या-यमेवास्ति प्रकारो यदेभिः प्रचालितं कार्यजातं तदग्रेऽपि परिचालनीयमिति ।

किञ्च भारतवर्षस्य संस्कृतेः सभ्यतायाश्चापि मूलं वेद एव विद्यते, वेदमन्तरेण नापि तयोः स्थितिरन्यत्र भवितुमर्हति । यद्यपि तदर्थमहं किञ्चिद्वक्तुं नास्मि प्राप्ताधिकारः, तथापि प्रशंसकः किमपि वक्तुं शक्नोत्येव । अद्यतः कतिपयवर्षेभ्यः प्राक् भारतसर्वकारः संस्कृतस्य तथा संस्कृतशिक्षा-याश्च विषये चैकमायोगं न्ययुङ्क्त । तत्र तदा कति-पयवार्ताभिः सहैवायमप्येको विचारः समासीद्यत् सामवेदपाठिनः कुत्र-कुत्र वर्तन्ते—इति । जयपुरेऽपि सामवेदस्य राणायनीशाखायाः कतिचन जनाः सन्ति परं ते तु सर्वे नाद्य विद्यन्ते । यद्येवमत्र वेदस्यैकस्यापि रक्षा भवति, तदा तु वर्तते सुमहतो हर्षस्य वार्ता, परं दुःखमस्ति यत् कृतेऽप्यन्वेषणे-ऽत्रापि ते जना नोपलभ्यन्ते । अत्रा ऽप्यद्य यजुर्वेद-नैव कार्यारम्भो जातः । नात्र सामवेदपाठी कश्चिद् दृष्टिपथमुपयातः । सस्वरं वेदानामध्ययनं विद्यते खलु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुख्यं वस्तु । एवन्तु किञ्चित् समधीत्य व्याकरणानुसारेण मन्त्राणां कश्चनार्थोऽपि कर्तुं शक्यत एव, परं मन्त्राणां सस्वरमध्ययनञ्चास्ति कठिनम्, तदेव विद्यते च परममावश्यकम् । सम्प्रति हि दक्षिणदेश एव सामवेदोऽस्त्यवशिष्टः । तन्मध्यादेव च कतिचन विज्ञाः काशीं तथोत्तरप्रदेशञ्चालङ्कुर्वन्ति । अतो वेदानां संरक्षणमाचरन्तो वयं महामहोपाध्यामहाभागं प्रति वस्तुतः सम्मानं प्रकटयितुं प्रभविष्यामः -इति ।

म० म० पं० श्रीगिरिधरशर्मचतुर्वेदिमहोदयाः

श्रीचतुर्वेदमहाभागेन प्रोक्तं यत् संस्कृतसागरे योऽपि जनो यावदन्तस्तलं प्रविशति, स तावदेव ततस्तत्त्वमवाप्नोति । अपि लघु खल्विदं मानवस्य जीवनं संस्कृतस्यागाधतां परिज्ञातुमपर्याप्तमेव वर्तते । यद्यप्यहं वस्तुतः प्राप्तपरिपूर्णज्ञानो नास्मि, तथापि मम साम्प्रतमभिनन्दनमाचरद्भिस्तत्रभवद्भिर्विद्वद्भिः 'मयि अत्यधिकगुणगणो वर्तते' इति यत् समुपवर्णितं, तत्तु श्रीमतां मां प्रति प्रेम्णः सद्भावादेव केवलम् । जयपुरमिदं पूर्वं संस्कृतस्य केन्द्रभूतमवर्तत । सुदूरदेशेभ्योऽपि पठनार्थमत्र समासमागच्छन्ति स्म च्छात्राः । परमिदानीं संस्कृतस्य शोचनीया दशाऽस्ति संवृत्ता । अद्य प्रायः सर्वत्रैव संस्कृताध्ययनपरायणानां छात्राणां महान् अभाव एव दृग्गोचरीभवति । अत एव बह्व्योऽपि संस्कृतपाठशाला अवरुद्धाः समजनिषत । अतः संस्कृतज्ञैः सर्वैरपि सम्भूय समस्यायाश्चैतस्याः समाधानमवश्यमेव करणीयम् । अन्यथेदं संस्कृतज्ञानां कृते किलात्मघातसदृशमेव सम्पत्स्यते कर्म । यद्यपि केन्द्रीय-प्रान्तीयसर्वकारास्तु सम्प्रति संस्कृतस्य कृते चेष्टन्ते, परं 'सर्वमपि स्वयं सर्वकार एव साधयिष्यति' इति चेतसि नैव विचिन्त्याऽऽत्मनिर्भरैः सर्वैरपि संस्कृतसेविभिरपि भाव्यम्-एतदेवास्ति समीचीनम् । स्वकर्तव्यस्य पालनं वयं कुर्याम, तथा स्वदोषान् च पश्येम, ततश्च सर्वकाराच्चापि समुचितं साहाय्यं गृह्णीयाम ।

किञ्च पूर्वं जयपुरनगरमिदं यथा संस्कृतस्य केन्द्रमासीत्, तथैवाग्रेऽपि तिष्ठेत्, एवञ्च न जायेत पण्डितानां ह्रासः -एतदर्थमस्माभिः प्रयासो वधेयः । संस्कृते च वस्तुतो वैदिकवाङ्मयमेव विद्यतेऽनुपमं प्रकाशमानं वाङ्मयम् । स्वर्गत-गुरुवर-श्रीमधुसूदनशर्ममहाराजेन चैतदर्थं सुमहान् कृतोऽभूत्प्रयत्नः । तत्रास्माभिरपि ध्यानमवश्यं देयमेव ।

शिक्षामन्त्रि-श्रीहरिभाऊ-उपाध्यायमहाभागाः



मान्याः श्रीचतुर्वेदिन एते जयपुर इह लब्ध्वा जन्म समधीत्य च काशीप्रभृतिदेशान्तरेष्वपि स्वप्रतिभां प्रसारितवन्तः । तथा च "स्वदेशे पूज्यते" इति वृद्धोक्त्यनुसारेण श्रीमन्तो महामहोपाध्याया इह हि स्वदेशे (अर्थात् स्वगृहे) यथा सत्क्रियन्ते, तथैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चीनांशुकं त्यज्यताम्

[लेखकः—आचार्यमणिशङ्करद्विवेदी]

पूर्वं याचितसख्यकैरपि च यैरज्ञातमैत्रीगुणै-
श्छिन्ना छद्मसखैः प्रवञ्चनपरैर्मैत्री मृषावादिभिः।
यैः स्वीकृत्य च पंचशीलनियमा आक्रान्तृभिर्विस्मृता-
स्तेषां देशसमुद्भवं तदभिधं चीनांशुकं त्यज्यताम् ॥१॥

यावन्नो भजतेऽभिषङ्गपदवीमारादरातिः स्वयम्
यावच्चापसृतो न भारतभुवः सेनानिवेशो भवेत्।
सीमा सीदति कष्टकण्टकचिता लद्दाखनेफान्तगा
तावद्भारतभूनिवासिभिरिदं चीनांशुकं त्यज्यताम् ॥२॥

द्वाराणि प्रहृतानि सिंहशिशवः सुप्ताः समुद्बोधिताः
सोढव्यः कथमीदृशः परिभवः स्वं पौरुषं दर्श्यताम्।
भोः हुंकारमुखा ! निजार्थविमुखाः !! राष्ट्रं रणे रक्ष्यताम्
चैनैश्चीत्क्रियतां तथा प्रह्रियतांश्चीनांशुकं त्यज्यताम् ॥३॥

धुन्वन्तु ध्वजिनीध्वजाः सधक्धक्चित्तैः समं वैरिणाम्
वर्धन्तां निजदेशगौरवगिरो धुर्याः ध्रियन्तां धियः।
धग्धग्धगज्ज्वलिते प्रकोपदहने दग्धा न दग्धा इमे
तावन्नाऽधिकरोति भारतमतश्चीनांशुकं त्यज्यताम् ॥४॥

पात्यन्तां परिपन्थिनां हि दशना व्याजस्मितव्याकुलाः
छिद्यन्तां च शिरांसि शोकविधुरा ऽऽनिन्दानतान्याहवे।
नाश्यन्तां निखिला घृणाभरभृतः कामा रिपोरन्तरा
गृह्यन्तामसवोऽथवा ह्यमरताश्चीनांशुकं त्यज्यताम् ॥५॥

देशान्तरेष्वपि—इति तु विदितमस्ति प्रायः समेषामपि विदुषाम्। एतेषां पाण्डित्यादिगुणगणस्य विषये च यत्किमपि प्रोच्यते, तदप्यस्ति स्वल्पमेव।

अग्रे च प्रतिपादितं श्रीशिक्षामन्त्रिमहाभागैर्यत्-श्रीमतामेषां चतुर्वेदिनां गुणानां वर्णनमेव केवलं नास्त्यस्माकं कर्तव्यम्, ८५ पञ्चाशीत्यात्मके स्वस्यायुषि वर्तमाना अपि महापण्डिता एते यथा संस्कृतस्याभ्युन्नतये सन्ति तत्परास्तथैव यदि वयमप्येतान् अनुकरिष्यामस्तर्हि संस्कृतस्य सम्भविष्यति सुरक्षणमपीति शम्—

—दीनानाथत्रिवेदी 'मधुपः' जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113547

रक्तबिन्दवः

[लेखकः—हरगोविन्दपाराशरः शनीचरा, छिदवाड़ा]

"मातः ! मातः ! श्रुतं त्वया । अस्माकमुपरि आक्रमणं जातम् । चीनदेशः भारतमातुः शिरः घातयति, हिमालयं आक्रामति, मम देशस्य सीमास्थितान् भ्रातॄन् हन्ति, शस्त्रास्त्रैः निरीहान् घातयन् अग्रे सरति । मातः ! तवानुज्ञां प्राप्तुमहमत्रागतोऽस्मि । अद्य वयं कतिचित् छात्राः स्वेच्छया सैन्यप्रशिक्षणं प्राप्तुं हिमाचलप्रदेशं गच्छामः । मातः ! देहि मेऽनुज्ञाम् ।" आकर्ण्येदं अवाक् स्थिता वसन्तस्य विधवा माता किञ्चित् तूष्णीं स्थित्वावदत् "इदं सर्वमसम्भवम्, असत्यम्, हिमालयं न कोऽपि आक्रान्तुं समर्थः ? निरर्थकोऽयं समाचारः । एकश्वासे एव शोभाकथयत्—"अकस्मादेव कथमाक्रमणम् ? अस्माकं प्रतिरक्षामन्त्री किं स्वपिति ?" पुनरवदत् "अस्तु तावत्" ममापि माता भारतमाता एव । गच्छ तस्या रक्षायै ।

भारतस्य प्रतिनगरोतः अनेके छात्राः राष्ट्ररक्षासेनायां गताः । ते सर्वे षाण्मासिकीं प्रशिक्षां समाप्य प्रत्यक्षसेवार्थं युद्धसीमां प्रथमोपचाराय प्रेषिताः । तत्र ते मण्डपान् निर्माय वसन्ति, योद्धॄणां च व्रणान् प्रथममुपचरन्ति । वसन्तः तन्मयभावेन सेवते सर्वान् । सः सर्वदा भारतस्य विजयं ध्यायति । एकस्मिन् दिने एकोऽतीव विद्धः योद्धा तत्रानीयत । वसन्तः सोत्साहः तमुपचरति । तस्य समीपे एव सर्वदा तिष्ठति । कुतूहलवशात् स तं योद्धारं पृच्छति "कथं पराजेतुं नैव शक्यन्ते एते चैनिकाः ।" तदुत्तरे दीर्घश्वासं मुञ्चन् सैनिकः बिरलाक्षरैः प्रत्यवदति "सर्वे चैनिकाः अतीवक्रूराः, युद्धनिपुणाः सन्ति, ते संख्यायामपि अधिकतराः । ते युद्धस्थलात् पृष्ठं न गच्छन्ति, तन्मनस्कतया युद्ध्यन्ते तेषां समीपे शस्त्राणि अपि अधिकानि सन्ति । अत एव तेषां आक्रमणं रोद्धुं न शक्यतेऽस्माभिः । ईश्वरः भारतस्य वीरान् वर्द्धयतु" इति कथयन् सः अन्तिमं अश्वसत् ।

अयं समाचारः सद्य एव सर्वत्र प्रासरत् तथा प्रधानमन्त्रीजवाहरलाल नेहरू समीपे स्वरक्तबिन्दुभिः उल्लिख्य वसन्तः इमां प्रतिज्ञां प्रैषयत्—"चैनिकाः मम भारतमातुः शिरः छिन्दन्ति । अतः अद्याहं भारतस्य शिरोरक्षणाय स्वजीवनं राष्ट्ररक्षणाय दातुं प्रतिजाने यतः सति भारत-शिरोरक्षणे—एवस्माकं शिरांसि सफलानि नान्यथा ।"

अस्य प्रतिज्ञापत्रस्येयं प्रतिक्रियाभूत्-प्रधानमन्त्री नेहरु इमां वसन्तरक्तलिखितां प्रतिज्ञां भारतदेशस्य प्रत्येकस्थाने प्रासारयत् । यदीमां शिशुकृतां बलिदानमयीं प्रतिज्ञां भारतीयाः अपठन् तदा ते राष्ट्ररक्षणाय स्वजीवन आयोजयन् । वसन्तैकशरणा शोभा-अपि स्वजीवनम् महिलासु राष्ट्रचेतनामुत्पादयितुं अयोजयत् ।

एन बी सी बेयरिंग
उन
पहियों को
चलाते हैं
जिनसे



क्योंकि
NBC बेयरिंग
• बारीकी से बने हैं
• वैज्ञानिक प्रमाण विधि से बने हैं
• ऊँचे दर्जे के कारबन क्रोम स्टील के बने हैं
• मजबूत हैं

निर्माता नेशनल इंजिनियरिंग इंडस्ट्रीज लिमिटेड
(बेयरिंग डिविजन) जयपुर
बिक्री केन्द्र :
इंडिया एक्सचेन्ज बिल्डिंग, कलकत्ता १ जी/३, एडवेन्ट, १२/ए, बेकवे रिक्लेमेशन, कोलाबा रोड, बम्बई । ए-३३०, डिफेन्स कोलोनी, नई दिल्ली ० अमर निवास, ५६, मजीठा रोड, अमृतसर ० बोसको हवेन टीची रोड, कोयम्बटूर ।

देश को शक्तिशाली बनाइए—राष्ट्रीय रक्षा सर्टिफिकेट्स खरीदिये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिर्दयानन्द आर्यसमाजश्च

ब्रह्मचारी रामविनोदः, गुरुकुल महाविद्यालयो वैद्यनाथधाम, संतालपरगना

भवन्तः जानन्ति एव यद् आवश्यकतामनुसृत्यैव वैज्ञानिकाः नूतनमाविष्कारं कुर्वन्ति सततम् । वैद्योऽपि निपुणं निरीक्ष्य निदानञ्च कृत्वा रोगिणः चिकित्सां करोति । सामाजिकदोषापनेतारोऽपि तथैव पूर्वापरीभूतामवस्थां कारणञ्च विज्ञाय समाजसुधारे प्रवर्तन्ते ।

यदा ऋषेर्दयानन्दस्य आविर्भावकाल आसीत् तदा भारतवर्षस्यैव न हि अपितु विश्वस्य सामाजिकी दशा चिन्तनीया आसीत् । सर्वत्रैव स्वार्थबुद्धयः कृत्रिमधर्मं पुरस्कृत्य स्वार्थं साधयन्ति स्म । कृत्रिमं जातिवादञ्च प्रकल्प्य स्पृश्यास्पृश्यव्यवस्थां विधाय केचन समाजे विभेदं जनयन्ति स्म । श्वेतकृष्णवर्णेनापि यत्र तत्र सामाजिकाधिकारभेदं प्रकल्पयन्तो गौराङ्गा दुःशासनं कुर्वन्ति स्म । पुञ्जीवादस्य प्राबल्ये कर्मकराणां कृषकाणाञ्च दशा दयनीया आसीत् । शासितारश्च प्राकृताधिकारेणापि वञ्चिताः आसन् । स्त्रीणां दशा तु शिक्षाधिकारं विना अतीव चिन्तनीयैव आसीत् ।

एतस्मिन्नेव काले ऋषिदयानन्दस्य महती प्रतिभा सामाजिकदोषापनयने तमोध्वंसिनी भानोर्विभेव उदेति स्म । तस्य प्रकाशरश्मयः क्वचित् शास्त्रार्थेन, क्वचित् सदुपदेशेन, क्वचिद् विद्यालयस्थापनेन क्वचिद् वेदभाष्येण, क्वचित् विभिन्नपुस्तकपुस्तिकालेखनेन च सर्वासु दिक्षु प्रसरन्ति । श्रीदयानन्दाविर्भावकाले अत्रत्याः प्रकृतयोऽपि कथयन्ति स्म यन्नाधिककालं मानवानां ध्वान्तपूर्णो मार्गो भविष्यति । ऋषिदयानन्दस्य सदुपदेशेनैव यत्र तत्र मूर्तीपूजकाः मूर्तीर्निक्षिप्य गंगायाम् एकेश्वरस्याराधकाः अभूवन् । क्रिश्चनाः यवना अपि स्वधार्मिकदृढतामपहाय सद्विचारप्रचारे संलग्ना अभूवन् । अधुना अल्ला ईश्वर इत्येकस्य नाम्नो यदुद्घोषणं कुर्वन्ति नेतारः, तद् दयानन्दस्यैव प्रयत्नस्य फलम् । अद्य स्वदेशस्य माहात्म्यं श्रूयते यश्च स्वातन्त्र्यं भजते, स्वतन्त्रतायै प्रयत्नशीलश्च । यः देशः तत्र सर्वत्र केनापि प्रकारेण तस्यैव स्फोटशब्दस्य गुञ्जनं भवति, जागरयति च जनमानसे अर्चयन्तु स्वराज्यमिति ।

किञ्च दयानन्दः स्वयं महानपि पैगम्बरवादस्य अवतारवादस्य च विरोधी आसीत् । स च एतेषां वादानां यद् दूषणं आसीत्, तत्सर्वं जानाति स्म । तस्मादेव स वारं-वारं वदति स्म ममान्तरं ममप्रतीकं च विधाय ईश्वरस्थाने पूजनं न स्यात् यथा बौद्धाः, जैनमतावलम्बिनश्च स्वसिद्धान्तं विहाय कुर्वन्ति । स जानाति स्म यद् मम क्षणभंगुरं शरीरं कदापि पञ्चत्वं गन्तुं शक्नोति किञ्च ममानन्तरं लोकहितसाधनकार्यस्य व्यतिरेको न स्यात् तस्मादेव पुस्तकप्रणयनातिरिक्तम् आर्यसमाजस्य स्थापनमपि स्वयमेव मुम्बापुर्यां ११३१ विक्रमाब्दे कृतवान् ।

अस्तं गतेऽपि भानौ तद् प्रकाशेनैव चन्द्रः कथमपि रात्रितमः अपनीय मार्गं दर्शयन् आह्लाद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर: भवत्येव । दयानन्दानन्तरम् आर्यसमाजोऽपि रूढिवादविनाशने, दीनहीनोद्धरणे स्वतन्त्रतान्दोलने मानवमात्रस्य शिक्षादीक्षाधिकारप्रदाने च सततमद्यावधि उन्निद्रः सामाजिक प्रहरी इव तिष्ठति ।

नायं समाजः वर्गविशेषस्य संघटनमस्ति, अपितु मानवमात्रस्य ये हि शुभचिन्तकाः सन्ति तेषां समेषामयं समाजः अस्ति । तस्मादेव वैदेशिका अपि एनमङ्गी कुर्वन्ति, विदेशेऽपि बहुत्र आर्यसमाजस्य प्राबल्यं दृश्यते ।

अधुना आणविकयुगे जनाः जनहितं विहाय स्वार्थसाधनरता इव दृश्यन्ते । मानवः मानवं दृष्ट्वैव विभेति न विश्वसीति अन्योन्यम् । तस्मात् अद्य सर्वत्र आर्यसमाजस्य महती आवश्यकता अस्ति । अयमेव समाजः विश्वबन्धुत्वस्य पाठं पाठयन् कृण्वन्तो विश्वमार्यमिति उद्घोषयन् मानवान् आर्यधर्मे-मानवहित साधनधर्मे आनयिष्यति-इति वर्तते विश्वासः ।

★

आजादी खतरे में है । पूरी ताकत लगा कर इसकी रक्षा कीजिए ।

—जवाहरलाल नेहरू

उपजाओ अधिक, खर्च कम करो

विकास कार्यों से जो भी फल मिले उस पर सबसे पहले देश की रक्षा का हक है । हमें उपज बढ़ा कर और खर्च घटा कर देश की रक्षा के लिए अधिक सामग्री और साधन जुटाने हैं । इससे मंहगाई को रोकने में भी मदद मिलेगी । हर प्रकार की फजूलखर्ची और बर्बादी को रोकिए ।

आपकी किफायत में देश की ताकत है

DAVP

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमणिमालायां—

विद्याऽध्ययननामा षष्ठो मणिः

श्री हरिशास्त्री दाधीचः, जयपुरम्

विद्यैव संसारगतस्य पुंसः
क्षेमाय योगस्य सुखाय मुक्त्यै ।
ततो हि बालाः ! स्वमनोऽवधाय
नित्यं स्वविद्याध्ययने यतध्वम् ॥१॥

विद्या ही संसार में मानवों के योग क्षेम सुख और मुक्ति के लिए समर्थ है इस कारण हे बालको विद्या को सावधानी से पढ़ने का यत्न करो।

अयि भारतीपाठनप्रणयिनोविद्यार्थिनः !!! बहुकालादयमहं भवद्भिरेतत्पत्रिकाद्वारा मिलितोऽस्मि, अपि कुशलिनो भवन्तः ? आम् अहमपि भगवत्या जगदम्बिकायाः कृपातः कुशल्येवास्मि, स्मारयामि च वर्ष-चतुष्टयात् पूर्वम् भारत्यामस्यामेव बालोप-देश-मणिमाला-नामिकैका लेखमाला मुद्रिताभूत् । अनिवार्यैः कारणैः कैश्चिदियं मध्यत एव भग्ना, तामहमद्यतः पुनः प्रवर्तयामि ।

अहो भारती के पढ़ने में प्रणय (प्रेम) रखने वाले छात्रो ! आज मैं बहुत दिनों में इस पत्रिका द्वारा आप लोगों से मिल रहा हूं । आप सब कुशल हैं ? हां मैं भी जगदम्बा की कृपा से सकुशल हूं आपको याद दिलाता हूं कि आज से ४ वर्ष पूर्व इसी भारती में बालोपदेशमणिमाला नाम से एक लेखमाला प्रकाशित हुई थी वह बीच में ही अनिवार्य कुछ कारणों से बन्द हो गई अब उसे फिर प्रारम्भ करता हूँ।

इदानीमयं विद्याध्ययननामा मणिः प्रकाश्यते, तदेनं सावधानयुक्तेन मनसा पठन्तु विचारयन्तु चानुशीलयन्तुतरामिति मदीया प्रणयाभ्यर्थनास्ते ।

आज यह विद्याध्ययन नाम का छठा मणि प्रकाशित होकर आपकी सेवा में प्रस्तुत है, इसे आप सावधान मन से पढ़िए, विचारिए तथा अनुशीलन कीजिए, ऐसी मेरी प्रेम प्रार्थना है।

संसारे हिं साम्प्रतं पुराकालेऽपि च विद्यायास्तु प्रभावः प्रसादश्च सर्वतो भद्रतयैव भवति स्म, भाति चेति न कस्यापि विवादोऽस्मिन् विषये । सोऽद्यापि तथैव किं ततोऽप्यधिकाधिकं वरीवर्ति प्रसरीसर्ति च । भारतस्यैवं भाग्येन फलितमेव जानीत, यद् विद्याप्रचारार्थं जननायका मन्त्रिणश्च

इस संसार में पहले और अभी विद्या का प्रभाव और प्रसाद तो सर्वतोमुखी प्रकाशित होता रहा ही है और हो भी रहा है इसलिए विप्रतिपत्ति नहीं है वह आज भी वैसे ही चला उससे भी अधिकाधिक चलता [illegible] फैलता जा रहा [illegible] समझिए भारत के भाग्य ही फले हैं जो विद्या प्रचार के लिए जननायक मन्त्रीवृन्द [illegible] अधिकारी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्यप्रशासतारश्च सज्जनाः प्रतिदिनं विद्याप्रसाराय प्रयतमाना एव सन्ति । विद्यायाः क्षेत्राणां सर्वतः प्रतिग्रामं वृद्धिः क्रियमाणा दृश्यते, तदध्यापकानामपि च सुतराम् ।

परं सर्वमिदं प्रसारणं भारतीयसंस्कृतिसाहित्यसदाचारधर्मादीनां संरक्षणाय संवृद्धये वा न प्रभवति न चोपयुज्यते । अद्यतना हि पठितारः पठन्तश्च पठिताश्च बाला युवानो वा कुमारिका युवत्योऽपि सर्वप्रकारैर्विदेशीयां संस्कृतिं विदेशीयं वेषं विदेशीयमेवाचारं विदेशीयमेव धर्माचरणं चापि स्वीकुर्वन्त एव मुदं बिभ्रति । न खलु स्वकीयदेशवेषभाषा संस्कृतिसदाचारधर्मसाहित्य — स्वीकरणे तत्संम्बर्द्धने तत्सुरक्षणे चैतेषां मनसि समुद्भवन्मोदोऽनुभूयते । प्रत्युत स्वसदाचारसंस्कृतिभाषासाहित्यस्वीकृतिकृते प्रेर्यमाणाः अनुनीता अपि इमे भ्रुवं वलयन्ति नासां संकोचयन्ति घृणां कलयन्ति औदासीन्यं भजन्ति मौनं चाश्रयन्ते उन्मनस्का श्च भवन्ति नानुमोदन्ते नोत्सहन्ते न विमृशन्ति नानुप्रच्छन्ति न स्वीकुर्वंति न प्रचारयन्तीति सम्यगवलोकयन्तो वयं तु परं खिद्यामो वदामश्चेदम् — हा भगवन् किमिदानीञ्जातम् कथमेतद्धर्मप्रधानस्य सर्वतः प्रसारिव्यापारकेन्द्रीभूतस्यार्यावर्तस्य पुण्यभूमिमयस्य भारतदेशस्य नेतृषु

वर्ग सभी प्रतिदिन विद्याप्रसार के लिए प्रयत्नशील हो रहे हैं। विद्या का क्षेत्र सब तरफ प्रति गांव बढ़ता ही दिखाई देता है और पाठकों का वर्ग भी बढ़ ही रहा है।

पर यह सब फैलाव भारतीय संस्कृति साहित्य सदाचार-धर्मादि संरक्षण और सम्वृद्धि के लिए समर्थ नहीं है, न उपयुक्त ही है । आजकल के पढ़ने वाले या पढ़े हुए बालक तथा जवान, लड़कियां कुमारियां वा युवतियां सब तरह से विदेशी संस्कृति विदेशी वेष विदेशी ही आचार विदेशी ही धर्मचारण भी अपनाती हुई ही प्रसन्न दिखाई पड़ती है। अपने देश की संस्कृति सदाचार साहित्य धर्मादि स्वीकृत करने और उसके सम्बर्द्धन तथा सुरक्षण में इनके मन में कोई प्रसन्नता नहीं मालुम पड़ती है। प्रत्युत स्वदेश भाषा साहित्य सदाचारादि के लिए इन्हें प्रेरित करते हैं, कुछ समझाते हैं, तो ये नाक भौंह सिकोड़ते हैं, घृणा करते हैं, उदासीनता दिखाते हैं, चुप्पी साधते हैं, तथा न अनुमोदन करते हैं, न उत्साह दिखाते है, न विचारते हैं, न पूछते हैं, न मंजूर करते हैं न प्रचार करते हैं, न अच्छी तरह देखतें ही हैं, इस बात का हमें बहुत खेद है। हम कहते हैं—हे भगवन्: यह क्या हो गया ये लोग इस देश के जो धर्म प्रधान है जिसका व्यापार सब तरफ फैला हुवा है ऐसे पुण्य भूमि आर्यावर्त भारत देश के वर्तमान नेता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113547

शासनाधिकारिषु शिक्षाप्रसारिषु च जनेषु स्वदेशप्रेमा, स्वदेशभाषास्नेहः स्वदेशसंस्कृतिसमृद्धिस्पृहा, स्वदेशधर्माचारविचारसमुत्साहश्च सर्वथा समुत्सन्न इवाऽऽस्ते, किं न जागर्ति देशप्रेमा किं न प्रवर्द्धते राष्ट्रभाषायां स्नेहः किं न समेधते संस्कृति स्पृहा किं न समुदश्वति स्वदेशधर्माचारविचारसमुत्साहश्चेति । आस्तां स्वकृतस्यैव कर्मणः फलानुभोगोयमित्यपि सदुःखमेव भणामः, तदिदमस्मद्वचनं च सम्यग्भावयितुं भवतोऽपि प्रेरयामः ।

अधुना कथं कीदृशी कदा विद्याध्येतव्येति स्वदेशसमृद्धिवर्द्धनदृशा भवतां पुरस्तात् निवेदयामः । विद्या ज्ञानं बोधश्चेति पर्यायशब्दा एव, तज्ज्ञानं नानाप्रकारकं भवति, तथापि स्वव्यवहारोपयोगिनां द्रव्याणामुपायानां च स्वस्य इह परत्रापि सुखशान्ति प्राप्तिप्रधानानामुपायानां च सम्यगवबोधो हि विद्याशब्देन व्यवह्रियते, न तु सदैव दासत्वानुबोधकानां सेवावृत्तिप्रधानानां ग्रन्थानामध्ययनं विद्या व्यवह्रियते । स्वातन्त्र्यप्रवर्त्तकेऽस्मिन् काले पारतन्त्र्यानुभवप्रदानानामुपायानां सर्वथैव बहिष्कारो विधेयः । अर्थप्रधानेऽस्मिन् स्वातन्त्र्ययुगे तु साऽस्माकमियमुक्तिर्भवद्भिः सर्वदा विमृश्याऽनुशीलनीया च ।

सा विद्या या हि योगाय क्षेमायाऽभ्युदयाय च ।
सुखाय यशसे चान्ते मोक्षायापि भवत्यलम् ।१।

और शासन के अधिकारी तथा शिक्षा प्रचारक लोगों में स्वदेश का प्रेम स्वदेश भाषा का स्नेह स्वदेश की समृद्धि बढ़ाने की ईच्छा, स्वदेश के धर्म प्रचार का उत्साह सभी कैसे उच्छिन्न हो गये हैं । इनमें देश का प्रेम और देश भाषा का स्नेह संस्कृति समृद्धि स्वदेश धर्माचार प्रचार का उत्साह क्यों नहीं जागृत होता है। हो सकता है यह भी अपने स्वकृत कर्मों का फलानुभव ही हो यह भी दुःख के साथ कहना पड़ता है। इस हमारे कथन को अच्छी तरह विचारने की आपसे भी प्रार्थना करते हैं।

अब कैसी विद्या कैसे पढ़नी चाहिए इस पर स्वदेश समृद्धि बढ़ाने की दृष्टि से आपके सम्मुख प्रस्तुत करते हैं । विद्या ज्ञान और बोध ये पर्याय शब्द हैं इसका ज्ञान नाना प्रकार से होता है तो भी अपने व्यवहारोपयोगी द्रव्यों का तथा उपायों का तथा अपने यहां और वहां परलोक में सुख शान्ति लाभ के प्रधान उपायों का सम्यक् भली भांति ज्ञान प्राप्त करना ही विद्या शब्द का अर्थ है । किन्तु सदा ही दास (गुलाम) बनाने के और सेवा वृत्ति प्रधान ग्रन्थों का और उपायों का ज्ञान विद्या नहीं है वैसे उपायों का वैसे ग्रन्थों का इस स्वतन्त्रतापूर्वक युग में सर्वथा बहिष्कार कर देना चाहिए, अर्थ प्रधान इस स्वतन्त्रता युग में तो यह हमारी उक्ति सदैव आपके ध्यान में रखने और अनुशीलन करने योग्य है—

सा विद्या या हि योगायक्षेमायाऽभ्युदयाय च ।
सुखाय यशसेचान्ते मोक्षायापि भवत्यलम् ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. L 7
Licence No. RP-6
"Licenced to Post
without Prepayme

सूक्ति-सुधा

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥

कल करने का जो काम हो उसे आज ही कर लो। दोपहर बाद करने का है उसे पूर्वाह्ण में ही कर लेना चाहिए। इसने काम कर लिया है या नहीं कर लिया है इसकी प्रतीक्षा काल (मृत्यु) नहीं करता है ॥१॥

क्षेत्रापणगृहासक्तमन्यत्रगतमानसम् ।
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ॥

मनुष्य चाहे खेत में दुकान (बाजार) में हो या घर में छुपा हो अथवा अन्यत्र कहीं भी मन रखे हो पर मौत जैसे वृकी उरण को (भेड़ के बच्चे को) उठा ले जाती है, वैसे ही अचानक आकर मानव को (प्राणी को) ले जाता है ॥२॥

न कालस्य प्रियः कश्चिन्न द्वेष्यश्चास्य विद्यते ।
आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ॥

इस काल (मौत) के न कोई प्रिय है न कोई द्वेष्य (वैरयोग्य) है। यह तो आयुष्य कर्म के क्षीण होते ही जन को बलात् हर ले जाता है ॥३॥

नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥

जिसका समय प्राप्त नहीं होता है उसे चाहे बाणों से भी वेधो तो नहीं मरता है और जिसका समय प्राप्त हो गया है वह कुशा की नोक से छुआ भी मर जाता है (नहीं जीता है) ॥४॥

नौषधानि न मन्त्राश्च न होमा न पुनर्जपाः
त्रायन्ते मृत्युनोपेतं जरया वापि मानवम् ॥

मौत को प्राप्त हुए जन को—चाहे वह जराजीर्ण हुआ हो न कोई औषध, न मन्त्र, न होम, न जप कोई कभी बचा नहीं सकते हैं ॥५॥

सम्पादकः—श्रीहरिशास्त्री, जयपुरम्

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)
श्री राधेश्याम शर्मा द्वारा श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर में मुद्रित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar